

सनातनशास्त्रम्

श्रीश्रीमत्सीतारामदासोङ्कारनाथ-प्रवर्त्तितम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीश्रीठाकुरसीतारामदासोङ्कारनाथः

(१९)

जप नाम जपेह त्वं नाम सर्वान् क्षणानिह ।
क्षीयतां सर्वपापानि तव नामजपात् सदा ॥१

विषयाणां विरागो हि पापक्षयस्य लक्षणम् ।
अनुरागो महान् साधु-गुरु-नामसु जायते ॥२

क्रमोपचीयमानायामासक्तौ नाम्नि सर्वथा ।
संसारवासना सर्वा निःशेषमपगच्छति ॥३

न क्षुद्रसुखभोगेच्छा काप्यन्या तस्य जायते ।
आविर्भवति तच्चित्ते भूमानन्दस्तदा महान् ॥४

आनन्दः खलु सोऽसीमोऽनन्तोऽपारश्च सर्वथा ।
यो जनो लभते भूमौ तं तस्य जन्न सार्थकम् ॥५

मक्षिकाणां व्रणास्वादसदृशं भोगजं सुखम् ।
जन्मानि कति वा भोगान् भुक्त्वा त्वं दुःखमाप्तवान्॥६

जप नाम सदा तच्चे-च्छ्रयति त्वां महाबलम् ।
अवश्यं तेऽपि यास्यन्ति विषयाणां सुखस्पृहाः ॥७

अस्तु वा यातु वेति त्वं न प्रेक्ष्य किञ्चिदप्यहो ! ।
केवलं जप नाम त्वमासीनो निर्जने वने ॥८

तन्न शक्नोषि चेत् तर्हि स्वच्छन्दं यत्र तिष्ठसि ।
हे सीतारामदास ! त्वं केवलं तं समाह्वय ॥९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१३७३ वङ्गाब्दीये प्रथमवर्षे] प्रथमपुष्पम् [श्रीरामनवमीसंख्या, वैशाखमासः

सनातनशास्त्रम्

श्रीश्रीमत्सीतारामदासोङ्कारनाथ-प्रवर्त्तितम्

श्रीमन्महर्षिवेदव्यासप्रणीतम्

विष्णुपुराणम्

श्रीश्रीधरस्वामिकृतात्मप्रकाशाभिधटीकोपेतम्

महामहोपाध्याय-श्रीकालीपदतर्काचार्य्यकृतपादटीकासमलङ्कृतम्

चौखम्भा ओरियन्टालिया के.३७/१०२ गोपाल मन्दिर लेन वाराणसी

उत्तर प्रदेश संस्कृत अकादमी द्वारा प्रकाशित लखनऊ

सम्पूजकाः

महामहोपाध्याय-श्रीकालीपदतर्काचार्य्यः

डाः श्रीगौरीनाथशास्त्री एम्-ए, डि-लिट्

श्रीनारायणचन्द्रगोस्वामी न्यायाचार्य्यः एम्-ए च

सञ्चालकौ

श्रीश्रीजीवन्यायतीर्थः

श्रीयादवेन्द्रनाथन्यायतर्कतीर्थश्च

Rs. 30 = 00

[प्रतिसं[illegible]क-मूल्यं सार्द्धैकरूप्यकम्

(१५०)

त्रिंशति रुप्य[illegible]

त्रिंशति रुप्यक[illegible]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वत्वाधिकारी
श्रीसत्यधर्म्मप्रचारसङ्घः
(जयगुरुसम्प्रदायः)

Q22:222
152L3

सहसम्पूजक-सङ्घाः

श्रीश्यामाशङ्कर विद्याभूषणः

श्रीरघुनाथ काव्य-व्याकरणतीर्थः

श्रीहरिनारायण तर्क-वेदतीर्थः

श्रीरामरञ्जन काव्य-व्याकारणतीर्थश्च

मुमुक्षु भवन वेद वेदाङ्ग पुस्तकालय
वाराणसी।
आगत क्रमांक 1259
दिनांक 14/6

कर्मकिङ्करौ
श्रीमानसरञ्जन रायः
श्रीनन्ददुलाल चट्टोपाध्यायः
कार्य्यालयः
१८९, वि, टि रोड
अशोकगड़
कलिकाता-३५
फोन नं ५६-४३२९

श्रीश्यामाशङ्करविद्याभूषण द्वारा 'श्रीसीताराम-वैदिकमहाविद्यालय ७।३, पि, डब्लिउ, डि रोड्, कलिकाता-३५ इति स्थानात्' प्रकाशितम्; ५५।६४, कालीचरणघोष रोड्स्थित-सार्भिस्-प्रिन्टार्स नामक-मुद्रालयान्मुद्रापितञ्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सनातनशास्त्रस्य नियमावली

१। सनातनशास्त्रम्—शास्त्रग्रन्थमयसंस्कृतमासिकपत्रम् प्रतिमासं नियमतः प्रकाशयिष्यते।

२। अस्य वार्षिकमूल्यम् प्रेषणशुल्कसहितम् मुद्रापञ्चदशकम्। एकसंख्यामूल्यं सार्द्धैकरूप्यकम्।

३। वार्षिकरूपेण षाण्मासिकरूपेण च ग्राहकत्वं स्थिरीकृतम्।

४। ग्राहकगणलिखितपत्रविषयमनुसृत्य शीघ्रमेव सकलव्यवस्था अवलम्ब्यते, किन्तु प्रयोजनं विना पत्रोत्तरं न दास्यते। पत्रोत्तरेच्छुभिरवश्यमेव स्वलिखितपत्रेण सह उत्तरपत्रमपि (रिप्लाइकार्ड) प्रेषणीयम्।

५। अस्मिन् सनातनशास्त्रे विष्णुपुराण-श्रीमद्वाल्मीकिरामायण-श्रीमद्भागवत-महाभारतादि सकलशास्त्रग्रन्थाः क्रमशः प्रकाशिता भविष्यन्ति।

६। मूल्यप्रेषणस्थानम्— श्रीसीताराम-वैदिकमहाविद्यालयः
कार्य्याध्यक्षः सनातनशास्त्रस्य
७।३, पि, डब्लिउ, डि रोड्
कलिकाता-३५

७। प्रतिमासं द्वितीयसप्ताहे प्रकाशनात् परं ग्राहकाणां सविधे सनातनशास्त्रम् प्रेषयिष्यते। मासस्यान्तिमदिनाभ्यन्तरे अस्य मासिकपत्रस्यालाभे कृपया स्मारकपत्रमेकं कार्य्यालये-प्रेषणीयम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीश्रीठाकुर-सीतारामदासोङ्कारनाथदेवानां वाणी

विशालविश्वस्य विधानबीजं
वरं वरेण्यं विधि-विष्णु-सर्व्वैः।
वसुन्धरा-वारि-विमान-वह्नि-
वायुस्वरूपं प्रणवं विवन्दे॥

१३६८ वङ्गाब्दे यदा पुरीधाम्नि मौनी आसम्, तदा श्रीमान् शिशिरकुमार-ब्रह्मचारी पत्रमेकं दत्तवान्। तत्र स शास्त्ररक्षार्थं प्रार्थनाम् अकरोत्। तदीयपत्रमुपलक्ष्य त्रीणि नामानि अवतीर्णान्यभवन्। तानि यथा—आर्यशास्त्रम्, सनातनशास्त्रम्, शास्त्रभगवांश्चेति। एतत्प्रसङ्गेन मम पुत्रैः (पुत्राधिकशिष्यैः) सह सर्वविषयालोचनानन्तरं ते कलिकातामागमन्। तत्र काचन सभा आहूता। तस्यां सभायामार्य्यशास्त्रमधिकृत्य आलोचनाऽभवत्। ततः श्रीगुरुकृपया 'आर्य्यशास्त्रम्' मूर्त्तिं पर्य्यगृह्णात्। तत्र स्मृतिग्रन्थाः, प्रचलितस्मृतयः, अप्रचलितस्मृतयः, वाल्मीकिरामायणञ्च प्रकाशं गतानि। सम्प्रति विष्णुपुराणं प्रकाशितं भवति। अस्मिन् 'आर्य्यशास्त्रे' शास्त्राणां मूलसंस्कृतम् वङ्गभाषानुवादेन सह वङ्गाक्षरेण मुद्रापयित्वा प्रकाशनं नीयते।

अतः परं यदभिलाषो जागरितोऽभवत्—तत् 'सनातनशास्त्रम्'। 'सनातनशास्त्रम्' उपलक्ष्य साम्प्रतं महती चेष्टा जायते। 'सनातनशास्त्रम्' अद्य श्रीरामनवमी।तिथौ आविर्भवति। श्रीकालीपदतर्काचार्य्यतातः, श्रीगौरीनाथतातः, श्रीनारायणतातश्च अस्य सम्पादकाः, श्रीश्रीजीवन्याय-तीर्थमहोदयः, श्रीयादवेन्द्रन्याय-तर्कतीर्थश्च अस्य सञ्चालकौ। श्रीभगवच्चरणे प्रार्थयामहे—तदीयकृपया सनातनशास्त्रमिदं जगति प्रचारितं भवतु। अस्माकमुद्देश्यमिदं यत्—प्रमाणभूतभाष्य-टीकादिसम्बलिताः शास्त्रग्रन्थाः सम्प्रति प्रायशो दुर्लभा वर्त्तन्ते, एतेन तेषां बहुलप्रचारो यथा स्यात्, तथा सम्पादनीयम्।

यदिदं शास्त्रग्रन्थानां परिवेशनं नूतनसंस्करणञ्च, तत् केवलं न वङ्गदेशाय, तदिदं समग्रभारतवर्षायेत्युक्तिरपि न समीचीना, किन्तु अमेरिका-लण्डन-प्रभृतिदेशेषु यत्र यत्र संस्कृतचर्च्चा अस्ति, तस्मै तस्मै देशायेति। तेनेयं प्रचेष्टा। श्रीभगवच्चरणे प्रार्थयामहे निर्विघ्नमस्य भूया प्रचारो भवत्विति शतम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवेदनम्

मान्याः सनातनधर्मप्रवणाः सज्जनाः। सुविदितमेवेदं भवतां यदद्य कराले कलौ काले परितः प्रसृता निरतिशया ग्लानिः सुकृतानाम्, अभ्युत्थानञ्च महत् सम्प्रवृत्तं नानाविधानां दुष्कृतानाम्; येन येन प्रतिपदमनिष्टशतानि समुत्पद्यन्ते जीवनिवहेषु। न केवलं कालस्यैवायं प्रभावो येन निकृष्टे पथि प्रवृत्तिर्जनसमाजस्य, विनिवृत्तिश्च पथः सुप्रशस्तात्, किन्तु सुकृतोपदेशपराणां सनातनशास्त्राणां क्रमशो दुर्लभतया कृत्याकृत्यविनिर्णयाभावेनैव यत्र कुत्रापि रागप्राप्ते सुकरे प्रवृत्तिर्जीवानां सन्निवृत्तिश्च सुतरां हितसाधनेऽपि दुष्करे कृत्यकदम्बे। शास्त्रं नाम द्विविधं कर्म प्रतिपादयति,—हितञ्चाहितञ्च। हितं कर्म शास्त्रेण विधीयते, निषिध्यते चाहितं कर्म। विहितं कर्म समनुतिष्ठन्तो जीवाः कल्याणमभिविन्दन्ति, निषिद्धमाचरन्तश्चाहितं प्रपद्यन्ते। शास्त्रीयविधिवाक्यादिष्टसाधनतां ज्ञात्वैव जीवा विहिते कर्मणि प्रवर्त्तन्ते, शास्त्रीयनिषेधवाक्यादनिष्टसाधनतामवधार्य्यैव च निषिद्धात् कर्मणो निवर्त्तन्ते। तदेवं शास्त्र-विज्ञातसव्यपेक्षैव हितकर्मसु प्रवृत्तिरहितकर्मसु निवृत्तिश्च। एतत् सर्वं सावधानेन मनसा समीक्षमाणा भगवन्तः श्रीश्रीसीतारामदासोङ्कारनाथमहाराजचरणाः कियतः कालात् पूर्वं सनातनधर्मशास्त्राण्यभितः प्रचारयितुमार्य्यशास्त्रं नाम मासिक सुबृहत् पत्रमेकं प्रावर्त्तयन्, यत्र धर्मशास्त्रग्रन्थानां मूलानि तदीयवङ्ग-भाषानुवादाश्च यथाक्रमं वङ्गीयाक्षरेण नियमतः प्रकाश्यन्ते।

किन्तु तदिदं वङ्गाक्षरमयं वङ्गभाषानुवादमयञ्च पत्रं वङ्गाक्षरं तथा वङ्गभाषामविदुषां नोपकाराय कल्पत इति विचार्य्य विश्वकल्याणाय परिगृहीतजन्मानस्ते सनातनशास्त्रं नाम द्वितीयं देवनागराक्षरमयं मासिकं सुबृहत् पत्रं प्रवर्त्तयन्ति, यत्र देवनागराक्षरैरेव सनातनधर्मशास्त्रग्रन्थानां मूलं यथासम्भवं तदीयटीकाभाष्यादयश्च प्रकाश्येरन्। क्वचित् क्वचित् पादटीकादिकमपि समपेक्षितमुपन्यस्येत। अनेन हि निःशेषमेव विश्वमुपकृतं स्यात्।

श्रीमत्कृष्णद्वैपायनाभिधानमहर्षिवेदव्यासप्रोक्तेन श्रीश्रीधरस्वामिकृतात्मप्रकाशाख्यव्याख्यासमलं-कृतेन श्रीकालीपदतर्काचार्य्यकृत-पादटीकासमन्वितेन पुराणशिरोहीरायमाणेन श्रीमद्विष्णुपुराणेनास्य सनातनशास्त्रस्य क्रियते समारम्भः। अति समीचीना श्रीधरस्वामीकृता टीका विष्णुपुराणस्य ततः सैवात्र बोधसौकर्य्यार्थमुपन्यस्ता। अस्यां श्रीधरटीकायाम् आत्मप्रकाशेति स्वप्रकाशेति च द्विविधं नामसमुप-लभ्यते। तदुक्तं प्रथमांशे टीकायां प्रतिज्ञाश्लोके—स्वयं श्रीधरेण—'तन्मार्गेण सुबोधसंग्रहवतीमात्म-प्रकाशाभिधां, श्रीमद्विष्णुपुराणसारविवृतिं कर्त्ता यतिः श्रीधरः।' इति,

द्वितीयांशटीकायाः प्रक्रमे च—'संश्रित श्रीपरानन्दनृहरिः श्रीधरो यतिः। पुराणं वैष्णवं व्याख्यात् स्वप्रकाशाख्यटीकया इति। वयन्तु तदीयटीकायाः प्रथमांशनिरुक्तम् 'आत्मप्रकाशे'ति नामैव गृहीतवन्त इत्यवधेयम्।

अनन्तरमनेनैव नयेनात्र तिलकटीकासहित-श्रीमद्वाल्मीकिरामायणप्रमुखा महाग्रन्थाः प्रकाशं गच्छेयुः। तदत्र सनातनशास्त्रप्रियाणां सुकृतदुष्कृतपरिज्ञानमभिलषतां प्रसादोपहितां शुभदृष्टिं कामयामहे। गच्छतः स्खलनं भवेदिति न्यायेन क्वचिदत्रोपजातं स्खलनमुपलक्ष्यते चेत्, तद् वयं करुणया विज्ञापनीया इति सविनयं विशेषविदः प्रार्थयामहे च। इति—

१८८७ शकाब्दीय-
श्रीरामनवम्याम्

विनयावनत-
सम्पादकानाम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीसनातनशास्त्रप्रशस्तिः

१

निस्तब्धं निभृताब्धिनीरनिचितं विश्वं हि निस्वं यदा
दृश्यं नैव मनुष्यपक्षिपशु-वृक्षाधारभूमीतलम् ।
न ज्योतिर्न च विद्युथदग्निकणिका न द्योतिरश्मिस्तदा
नादब्रह्म सनातनं व्यरचयन् सर्गादिमस्पन्दनम् ॥

२

ओङ्कारस्तदनु प्रकीर्णमनुसम्भारं हि झङ्कारयन्
व्योमाङ्कोपरि नर्त्तयंस्त्रुटिगणानावर्त्तयन् ।
कुर्वन् मृज्जलवायुमुज्ज्वलतरं सूरप्रभां ज्वालयन्
वर्गस्फोटसनातनस्थितिमृक्षि-स्वान्ते समख्यापयत ॥

३

यो वेदान् धरणीधृतेरपि पुरागाधोदधेरुद्दधे
तेषामर्थपुराणसार्थमवदद् यः पञ्चमञ्चागमम् ॥
यस्माद् भारतवर्षमार्षाविभवज्योतिर्मयं द्योतितं
सोऽयं तोयधिनद्धशेषशयनो नारायणः पातु नः ॥

४

दिव्यस्वच्छकलाकलापललिता या पालिता ब्रह्मणा
शक्तिर्ब्रह्ममयी युनक्ति जनवाग्व्यक्तिं च या लीलया ।
लीना यत्करपल्लवे चिरशुभा वीणा नवीनायिता
शास्त्रात्मा च सनातनी विजयते सा भारते भारती ॥

५

यस्याकुण्ठितकण्ठलुण्ठितमहो वैकुण्ठनाथप्रियं
प्रेय श्रेय उभावगुण्ठितमिदं तद्व्यासभाषान्वितम् ॥
शास्त्रं यच्च सनातनं त्रिजगतीमाङ्गल्यमूलं गतिः
सर्वेषां मनुजन्मनां विजयतामोङ्कारनाथाशिषा ॥

श्रीश्रीजीवन्यायतीर्थ प्रार्थिता ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथेदं प्रकाशनमारभ्यते सनातनशास्त्ररत्नराजीनां परमपूज्यचरणानां सुगृहीतनामधेयानां श्रीश्रीसीतारामदासोङ्कारनाथपादानां स्वभिप्रायेण। महानुभावानामेतेषां नवतमोऽयं प्रयासः सर्वथा श्लाघनीयः स्वादेव यतः सुरवाणीविलसितेष्वेषु ग्रन्थेषु समेषामेव जनानां न केवलं साक्षात् परिचयलाभः परञ्च तेषां जीवनादर्शसमुन्नयनमिति फलयुग्म एव दृष्टिरस्मिन् संलक्ष्यते।

पुण्यश्लोकानाममीषां प्रेषणया प्रथमं श्रीश्रीविष्णुपुराणम् समनन्तरञ्च क्रमेण श्रीमद्वाल्मीकिरामायणप्रमुखा ग्रन्थाः प्रकाशं गच्छेयुः। सर्वप्रान्तीयानां पाठकवर्गाणां सहजबोधाय संग्रहसौकर्याय चैते देवनागराक्षरेण मुद्रिताः स्वल्पमूल्याश्च विधीयन्ते।

प्रकाशं गमितेष्वेतेषु ग्रन्थरत्नेषु सर्व एव कृतार्थतां लभेरन्नित्याशास्महे इत्यलम्।

श्रीगौरीनाथशास्त्रिणः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीविष्णुवन्दनम्

विश्वातीतं विश्वविधानं विबुधेशं विश्वान्तं विश्वम्भरमाद्यं विभुमीड्यम् ।
विद्याविद्यावेद्यविहीनं हृदि वेद्यं वन्दे विष्णुं विश्वविलासं विधिवन्द्यम् ॥

सत्यं सत्यातीतमसत्यं सदसन्तं शुद्धं बुद्धं मुक्तममुक्तं विधिमुक्तम् ।
सर्वं सर्वासर्वसुदूरं सुखसान्द्रं वन्दे विष्णुं सर्वसहायं सुरसेव्यम् ॥

मानं मानातीतममेयं मनसाप्यं मन्तुर्मन्तारं मुनिमान्यं महिमाढ्यम् ।
मायाक्रीडं मायिनमाद्यं गतमायं वन्दे विष्णुं मोहमहाहिं महनीयम् ॥

पारं पारापारमपारं परपारं पारावाराधारमधार्यं ह्यविकार्यम् ।
पूर्णाकारं पुर्णविहारं परिपूर्णं वन्दे विष्णुं परमाराध्यं परमार्थम् ॥

कालातीतं कालकरालं करुणाद्रं कालाकाल्यं केलिकलाढ्यं कमनीयम् ।
कामाधारं कामकुठारम् कमलाक्षं वन्दे विष्णुं कामविलासं कमलेशम् ॥

नित्यानन्दं नित्यविहारं निरपायं नीराधारं नीरदकान्ति निरवद्यम् ।
नानानानाकारमनाकारमुदारं वन्दे विष्णुं नीरजनाभं नलिनाक्षम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुपुराणस्य सूचीपत्रम्

प्रथमः अंशः

अध्यायः	विषयाः	पृष्ठाङ्कः
१	मङ्गलाचरणम्, पराशरं प्रति मैत्रेयस्य प्रश्नः, पराशरस्योत्तरदानञ्च।	१
२	विष्णुस्तुतिः, सृष्टिप्रक्रिया च।	६
३	ब्रह्मणः सर्गजनिकायाः शक्तेर्विवरणम्, तस्यायुर्निरूपणञ्च।	१३
४	कल्पान्ते सर्गवर्णनम्।	१७
५	देवादीनां सृष्टिकथनम्।	२३
६	चातुर्व्वर्ण्यसृष्टिः, चातुर्व्वर्ण्यस्थान-निरूपणञ्च।	३१
७	मानसप्रजासृष्टिः, रुद्रादीनां सृष्टिः, चतुर्विधप्रलयवर्णनञ्च।	३५
८	लक्ष्म्युत्पत्तिकथनम्।	४०
९	इन्द्रं प्रति दुर्वाससः शापः, ब्रह्मणः समीपे देवानां गमनम्, समुद्रमन्थनम्, इन्द्रस्य लक्ष्मीस्तुतिश्च।	४३
१०	भृगुसर्गादीनां पुनः कथनम्।	५५
११	ध्रुवोपाख्यानम्।	५७
१२	ध्रुवस्य वरलाभः।	६२
१३	वेणनृप-पृथुनृपोपाख्यानम्।	७०
१४	प्रचेतसां तपस्या।	७७
१५	कण्डुमुनिचरितम्, म्यैथुनधर्म्मेण दक्षस्य प्रजासृष्टिश्च।	८१
१६	मैत्रेयस्य प्रह्लादचरितविषयकः प्रश्नः।	९४
१७	प्रह्लादचरितकथनम्।	९६
१८	प्रह्लादस्य विनाशाय दैत्यान् प्रति हिरण्यकशिपोरादेशः।	१०६
१९	प्रह्लादं प्रति हिरण्यकशिपोरुक्तिः, प्रह्लादस्य विष्णुस्तवश्च।	११०
२०	श्रीभगवत आविर्भावः, हिरण्यकशिपु-वधश्च।	११५
२१	प्रह्लादवंशकथनम्।	१२२
२२	श्रीभगवतो विष्णोश्चतुर्विधविभूतिवर्णनम्।	१२६

द्वितीयः अंशः

१	प्रियव्रतस्य पुत्राणां विवरणम्, भरत-वंशकथनञ्च।	१३८
२	जम्बूद्वीप वर्णनम्।	१३९
३	भारतवर्षवर्णनम्।	१४४
४	षड्द्वीपवर्णनम्, लोकालोकपर्व्वत-कथनञ्च।	१४७
५	सप्तपातालविवरणम्, अनन्तस्य गुण-वर्णनञ्च।	१५४
६	नरकवर्णनम्, हरिस्मरणेन सर्व्व-प्रायश्चित्तकथनञ्च।	१५७
७	सूर्य्यादि ग्रहाणां सप्त-लोकानाञ्च संस्थानम्।	१६३
८	सूर्य्यरथसंस्थानादिकथनम्, कालस्य निरूपणम्, गङ्गाया उत्पत्तिश्च।	१६८
९	आधारभूतं लोकानां त्रयाणां वृष्टिकारणम्। (ज्योतिश्चक्र-शिशुमारचक्रवर्णनम्।)	१८२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्यायः	विषयाः	पृष्ठाङ्कः
१०	सूर्य्यरथाधिष्ठातॄणां देवादीनां विवरणम्।	१८५
११	सूर्य्यरथस्थायास्त्रयीमय्या विष्णुशक्तेर्विवरणम्।	१८७
१२	चन्द्रादिग्रहाणां रथादीनां प्रवहवायोः श्रीविष्णोर्माहात्म्यस्य च कथनम्।	१९०
१३	जड़भरतोपाख्यानम्, सौवीरं राजानं प्रति भरतस्य तत्त्वोपदेशश्च।	१९५
१४	राज्ञः सौवीरस्य प्रश्नः, भरतस्योत्तरदानञ्च।	२०६
१५	ऋभु-निदाघसंवादः।	२१०
१६	निदाघसमीपे ऋभोः पुनर्गमनम्, आत्मतत्त्वोपदेशश्च।	२१४

तृतीयः अंशः

१	मन्वन्तरविवरणम्।	२१७
२	सावर्ण्यादिमन्वन्तरकथनम्, कल्पपरिमाणञ्च।	२२०
३	वेदव्यासस्याष्टाविंशति नामकथनम्।	२२४
४	वेदव्यासमाहात्म्य-वेदविभागवर्णनम्।	२२८
५	यजुर्वेदशाखाविभागः, याज्ञवाल्क्यकृत सूर्य्यस्तुतिश्च।	२३१
६	सामाथर्व्ववेदशाखाविभागः, पुराणानां लक्षणादि निरूपणञ्च।	२३४
७	यमगीता।	२३७
८	श्रीविष्णुपूजायाः फलश्रुतिः, चातुर्व्वर्ण्यधर्मकथनञ्च।	२४२
९	ब्रह्मचर्य्याद्याश्रमचतुष्टयवर्णनम्।	२४७
१०	जातकर्मादिक्रियायाः कन्यायाश्च लक्षणनिरूपणम्।	२५१
११	गृहस्थसदाचाराणां मूत्रपुरीषोत् सर्गादि विधेश्च वर्णनम्।	२५५
१२	गृहस्थाचारकथनम्।	२६७
१३	शवदाहस्य, अशौचस्य, एकोद्दिष्टस्य, सपिण्डीकरणस्य च व्यवस्था।	२७१
१४	श्राद्धफलश्रुति-विशेषश्राद्धफल, पितृगीतावर्णनम्।	२७५
१५	श्राद्धभोजि-विप्रलक्षणादिकथनम्, योगिप्रशंसा च।	२७८
१६	श्राद्धे मधुमांसादिदानफलस्य क्लीवादिद्वारा श्राद्धदर्शनदोषस्य च वर्णनम्।	२८३
१७	नग्नलक्षणम्, भीष्म - वशिष्ठसंवादः, विष्णुस्तुतिः, मायामोहोत्पत्तिश्च।	२८७
१८	असुरेभ्यो मायामोहस्योपदेशदानम्, बौद्धधर्मोत्पत्तिः, नग्नसम्पर्कदोषः, नृपस्य शतधनुष उपाख्यानञ्च।	२९२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थः अंशः

अध्यायः	विषयाः	पृष्ठाङ्कः
१	वंशविस्तारकथनम्, ब्रह्मणो दक्षादीनाञ्चोत्पत्तिः, पुरूरवसो जन्म, रेवत्या सह बलरामस्य विवाहश्च।	३०१
२	ईक्ष्वकोर्जन्मः, ककुत्स्थवंशस्य युवनाश्वस्य सोमरेश्चोपाख्यानम्।	३०७
३	सर्पविनाशमन्त्रवर्णनम्, अनरण्यवंशस्य सगरोत्पत्तेश्च कथनम्,।	३१७
४	सगरस्याश्वमेधयज्ञः, भगीरथस्य गङ्गानयनम्, रामचन्द्रादीनामुत्पत्तिश्च।	३२१
५	निमियज्ञविवरणम्, सीताया उत्पत्तिः, कुशध्वजवंशकथनञ्च।	३२८
६	चन्द्रवंशकथनम्, ताराहरणम्, अग्नित्रयोत्पत्तिश्च।	३३१
७	पुरूरवसो जह्नोश्च वंशकथनम्।	३३७
८	आयुर्वंशकथनम्, धन्वन्तरेरुत्पत्तिः, तद्वंशवर्णनञ्च।	३४०
९	रजेर्दैत्यानाञ्च युद्धम्, क्षत्रवृद्धस्य वंशावलिकथनञ्च।	३४१
१०	नहुषवंशवर्णनम्, ययातेरुपाख्यानञ्च।	३४३
११	यदुवंशस्य सहस्रहस्तार्ज्जुनचरित्रस्य च वर्णनम्।	३४६
१२	यदुपुत्रक्रोष्टुवंशकथनम्।	३४८
१३	सत्वतपुत्राणां वर्णनम्, स्यमन्तकमणिवृत्तान्तकथनञ्च।	३५१
१४	अनमित्रान्धकयोर्वंशवर्णनम्।	३६२
१५	शिशुपालस्य पूर्व्व-पूर्व्वजन्मवृत्तान्तस्य वसुदेवस्य च सन्तानानां वर्णनम्।	३६४
१६	तुर्व्वसुवंशकथनम्।	३६९
१७	द्रुह्युवंशविवरणम्।	३७०
१८	ययातिपुत्रस्यानोर्वंशवर्णनम्।	३७१
१९	पुरुवंशकथनम्।	३७२
२०	कुरुवंशवर्णनम्।	३७६
२१	भाविनृपतीनां विवरणम्।	३७९
२२	भावि - कालीनेक्ष्वाकुवंशीय - नृपाणां वर्णनम्।	३८१
२३	मगधवंशवर्णनम्।	३८२
२४	कलिकालस्थित-नृपाणां कलिधर्म्मस्य च वर्णनम्। राजवंशवर्णनोपसंहारश्च।	३८३

पञ्चमः अंशः

१	वसुदेव-देवक्योर्विवाहः, ब्रह्मणः समीपे पृथिव्या गमनम् विष्णोः स्तोत्रम्, कंसादीन् हन्तुं विष्णोरङ्गीकारश्च।	३९३
२	यशोदागर्भे योगमायाया देवकीगर्भे भगवतश्च प्रवेशः। देवानां देवकीस्तुतिः।	४०२
३	भगवत आविर्भावः, योगमायाद्वारा कंसस्य बञ्चना च।	४०४
४	कारागाराद् वसुदेव-देवक्योर्मुक्तिलाभः।	४०७
५	पूतनावधः।	४०९
६	शकटभञ्जनम्, बलदेव-कृष्णयोर्नामकरणञ्च।	४१२
७	कालीयदमनम्।	४१७
८	धेनुकासुरवधः।	४२४
९	प्रलम्बासुरवध।	४२६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्यायः	विषयाः	पृष्ठाङ्कः
१०	शरद्वर्णनम्, गोवद्धनपूजा च।	४३०
११	इन्द्रस्य क्रोधः, श्रीकृष्णस्य गोवद्धन-पर्व्वतधारणञ्च।	४३५
१२	इन्द्रस्यागमनम्, इन्द्रेण श्रीकृष्णस्य अभिषेकश्च।	४३८
१३	गोपानां श्रीकृष्णप्रभाववर्णनम्, गोपिभिः सह तस्य रासक्रीड़ा च।	४४१
१४	वृषभासुरवधः।	४४८
१५	श्रीकृष्णमानेतुं कंसेनाक्रूरस्य प्रेषणम्।	४४९
१६	केशिवधः।	४५१
१७	अक्रूरस्य गोकुलयात्रा।	४५५
१८	भगवतः श्रीकृष्णस्य मथुरागमनम्, गोपिनां विरहवर्णनम्, अक्रूरस्य मोहश्च।	४५९
१९	श्रीकृष्णस्य रजकवधः, मालाकारगृहे प्रवेशश्च।	४६६
२०	श्रीकृष्णस्य कुब्जानुग्रहः, धनुःशाला-प्रवेशः, कंसवधश्च।	४६८
२१	उग्रसेनस्य राज्याभिषेकः, भगवतो वासुदेवस्य विद्याधयनञ्च।	४७६
२२	जरासन्धस्य पराजयः।	४७९
२३	द्वारकाया दुर्गनिर्म्माणम्, कालयवन-दहनम्, मुचुकुन्दस्य भगवत्स्तुतिश्च।	४८१
२४	तपसे मुचुकुन्दस्य प्रस्थानम्, बलरामस्य व्रजयात्रा च।	४८६
२५	बलभद्रस्य व्रजविहारः, यमुनाकर्षणञ्च।	४८८
२६	रुक्मिणीहरणम्।	४९१
२७	प्रद्युम्नहरणं शम्बरवधश्च।	४९२
२८	रुक्मिवधः।	४९६
२९	नरकासुरवधः।	४९९
३०	पारिजातहरणम्।	५०२
३१	श्रीभगवतो द्वारकापुरीप्रत्यावर्त्तनम्, शताधिकषोड़शसहस्रस्त्रीभिः सह विवाहश्च।	५०६
३२	ऊषाचरितम्।	५११
३३	कृष्ण-वाणासुरयोः संग्रामः।	५१३
३४	पौण्ड्रकवधः, काशीदहनञ्च।	५१८
३५	कृष्णपुत्र-शाम्बस्य विवाहः।	५२२
३६	द्विविधवधः।	५२६
३७	ऋषिणां शापः, यदुवंशविनाशः, भगवतः स्वधामप्रत्यावर्त्तनञ्च।	५२८
३८	यादवानामन्त्येष्टिसंस्कारः, परीक्षितो राज्याभिषेकः, पाण्डवानां वनगमनञ्च।	५३४

षष्ठः अंशः

१	कलिधर्म्मनिरूपणम्।	५४१
२	वेदव्यासेन कलियुगस्य शूद्राणाम्, स्त्रियाञ्च महत्त्वस्य वर्णनम्।	५४७
३	निमेषादिकालमानस्य नैमित्तिक-प्रलयस्य च वर्णनम्।	५५१
४	प्राकृतप्रलयवर्णनम्।	५५६
५	आध्यात्मिकादि त्रिविधतापवर्णनम्, भगवान् वासुदेवश्चेति शब्दद्वयस्य व्याख्या, भगवतः पारमार्थिकस्वरूप-वर्णनञ्च।	५६१
६	केशिध्वज-खाण्डिक्योर्विवरणम्।	५७१
७	ब्रह्मयोगनिर्णयः।	५७६
८	शिष्यपरम्पराकथनम्, विष्णुपुराणस्य माहात्म्यमुपसंहारश्च।	५८७

—o—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुपुराण सूचीपत्र

हिन्दी अनुवाद

प्रथम अंश

अध्याय	विषय	पृष्ठा
१	मंगलाचरण, पराशरके प्रति मैत्रेयका प्रश्न तथा पराशरका उत्तर।	१
२	विष्णुस्तुति तथा सृष्टिप्रक्रिया।	३
३	ब्रह्माकी सृष्टि उत्पन्न करनेवाली शक्तिका वर्णन और उनकी आयुका निरूपण।	६
४	कल्पान्तमें सृष्टिका वर्णन।	८
५	अविद्यादि विविध सर्गोंका वर्णन।	११
६	चातुर्वर्ण्य-व्यवस्था, पृथिवीविभाग और अन्नादिकी उत्पत्तिका वर्णन।	१४
७	मरीचि आदि प्रजापतिगण, तामसिक-सर्ग, स्वायम्भुवमनु एवं शतरूपा तथा उनकी सन्तानका वर्णन।	१६
८	रौद्रसर्ग और भगवान् तथा लक्ष्मीजीकी सर्वव्यापकताका निरूपण।	१९
९	इन्द्रके प्रति दुर्वासाका शाप, देवताओंका ब्रह्माके पास जाना, समुद्र-मन्थन और इन्द्रद्वारा लक्ष्मीजीकी स्तुति।	२१
१०	भृगु आदिकी सृष्टिका पुनः वर्णन।	२८
११	ध्रुवका वनगमन तथा मरीचिप्रभृति ऋषियोंसे भेंट।	२९
१२	ध्रुवको भगवद्दर्शन तथा वरप्राप्ति।	३२
१३	वेन और पृथु राजाका उपाख्यान।	३८
१४	प्रचेताओंकी तपस्या।	४३
१५	कण्डु मुनिका चरित्र और दक्षकी मैथुनी सृष्टि।	४६
१६	मैत्रेयका प्रह्लादचरित्रविषयक प्रश्न।	५३
१७	हिरण्यकशिपुका दिग्विजय और प्रह्लादचरित।	५४
१८	प्रह्लादको मारनेके लिये दैत्योंके प्रति हिरण्यकशिपुका आदेश।	५९
१९	प्रह्लादके प्रति हिरण्यकशिपुकी उक्ति तथा प्रह्लादद्वारा भगवान श्रीविष्णुकी स्तुती।	६२
२०	नृसिंह भगवान्‌का प्रादुर्भाव तथा प्रह्लादकी स्तुति।	६६
२१	प्रह्लादवंशवर्णन, कश्यपमुनिका अन्यस्त्रियोंके वंश एवं मरुद्गणकी उत्पत्तिका वर्णन।	६९
२२	श्रीविष्णुभगवान्‌की चतुर्विध विभुतिका वर्णन।	७१

द्वितीय अंश

१	प्रियव्रतवंशका वर्णन।	७६
२	भूगोलका विवरण।	७८
३	भारत आदि नौ खण्डोंका विभाग।	८१
४	प्लक्ष आदि द्वीपोंका वर्णन और लोकालोकका कथन।	८३
५	पाताल आदि सात लोकोंका वर्णन।	८७
६	नरक वर्णन एवं हरिमाहात्म्य कथन।	८९
७	सूर्यादिग्रहों और सात लोकोंकी स्थितीका वर्णन।	९२
८	सूर्यरथकी स्थिति, कालनिरूपण और गंगा आविर्भावका वर्णन।	९४
९	ज्योतिश्चक्र तथा शिशुमारचक्रका विचार।	१०१
१०	सूर्यरथके अधिकारीदेवताओंका वर्णन।	१०३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्याय	विषय	पृष्ठा
११	सूर्यरथमें स्थित वैष्णवी शक्तिका वर्णन।	१०५
१२	चन्द्रादि ग्रहोंके वर्णनपूर्वक श्रीविष्णु-माहात्म्य कथन।	१०७
१३	जड़भरतका उपाख्यान।	११०
१४	सौवीरराजाका प्रश्न और भरतका उत्तर	११६
१५	ऋभु और निदाघका संवाद।	११८
१६	निदाघके समीप ऋभुका पुनः जाना और आत्मतत्त्वका उपदेश करना।	१२०

तृतीय अंश

अध्याय	विषय	पृष्ठा
१	मन्वन्तरोंका वर्णन।	१२२
२	सावर्णि आदि मनुओंका विवरण और कल्प परिमाणका कथन।	१२४
३	वेदव्यासके अट्ठाईसनामोंका कथन।	१२७
४	ऋग्वेदकी शाखाओंका वर्णन।	१२६
५	शुक्लयजुर्वेद एवं तैत्तरीय यजुः-शाखाओंका विवरण।	२३०
६	सामवेदकी शाखा, अठारह पुराण एवं चौदहविद्याओंके विभागका कथन।	१३२
७	यमगीता।	१३४
८	श्रीविष्णुपूजाकी फलश्रुति और चातुर्वर्ण्यधर्मका कथन।	१३७
९	आश्रमधर्मका वर्णन।	१३९
१०	जातकर्म और विवाह-संस्कार आदिका विवेचन।	१४१
११	गृहस्थसम्बन्धी सदाचारका विवेचन।	१४३
१२	गृहस्थके सदाचारोंका वर्णन।	१५०
१३	श्राद्ध विचार।	१५२
१४	श्राद्धप्रशंसा एवं श्राद्धमें पात्रापात्रका विचार।	१५५
१५	श्राद्धभोजी ब्राह्मणोंका लक्षण एवं योगीजनकी प्रशंसा।	१५७
१६	श्राद्धमें मधु, मांस आदि देनेका फल और नपुंसक आदिकेद्वारा श्राद्धदर्शन दोषका वर्णन।	१६०
१७	नग्नलक्षण, भीष्म-वशिष्ठ संवाद, विष्णुस्तुति एवं मायामोहकी उत्पत्ति।	१६२
१८	मायामोहद्वारा असुरगणको उपदेश दान और बौद्धधर्मकी उत्पत्ति, नग्न-सम्पर्कका दोष, राजा शतधनुकी कथा।	१६५

चतुर्थ अंश

अध्याय	विषय	पृष्ठा
१	वंशविस्तार कथन, ब्रह्मा और दक्ष आदिकी उत्पत्ति, पुरूरवाका जन्म तथा रेवतीके साथ बलरामका विवाह।	१७१
२	इक्ष्वाकुका जन्म, ककुत्स्थ वंशके युवनाश्व और सौभरिका उपाख्यान।	१७४
३	सर्पविनाश मन्त्रका वर्णन, अनरण्यवंश और सगरकी उत्पत्तिकी कथा।	१८०
४	सगरका अश्वमेध यज्ञ, भगीरथद्वारा गङ्गाका आगमन, रामचन्द्र आदिकी उत्पत्ति।	१८२
५	निमिके यज्ञका विवरण, सीताकी उत्पत्ति तथा कुशध्वजवंश वर्णन।	१८७
६	चन्द्रवंश वर्णन, तारा हरण और अमित्रयकी उत्पत्ति।	१८६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्याय	विषय	पृष्ठा
७	पुरूरवा और जह्नुका वंश वर्णन।	१९३
८	आयुवंशका वर्णन, धन्वन्तरिकी उत्पत्ति तथा उनके वंशका वर्णन।	१९५
९	रजि और दैत्योंका युद्ध, तथा क्षत्र-वृद्धवंशका वर्णन।	१९६
१०	नहुषवंशका वर्णन और ययातिकी कथा।	१९७
११	यदुवंश और सहस्रबाहु अर्जुनका चरित्र वर्णन।	१९९
१२	यदुपुत्र क्रोष्टुका वंश वर्णन।	२००
१३	सत्वतपुत्रोंका वर्णन तथा स्यमन्तक मणिका वृत्तान्त।	२०२
१४	अनमित्र और अन्धकके वंशका वर्णन।	२०९
१५	शिशुपालके पूर्वजन्मोंका वृत्तान्त तथा वसुदेवका वंश वर्णन।	२११
१६	तुर्वसु वंशका वर्णन।	२१३
१८	ययातिके पुत्र अनुका वंश वर्णन।	२१४
१९	पुरुवंश वर्णन।	२१५
२०	कुरुके वंशका वर्णन।	२१७
२१	भावी राजाओंका वर्णन।	२१९
२२	भविष्यकालमें होनेवाले इक्ष्वाकुवंशीय राजाओंका वर्णन।	२२०
२३	मगधवंशका वर्णन।	२२०
२४	कलियुगके नरेशोंका और कलि-धर्मोंका वर्णन एवं राजवंश वर्णनका उपसंहार।	२२१

पञ्चम अंश

१	वसुदेव-देवकीका विवाह, पृथिवीको ब्रह्माके समीप जाना और विष्णुकी स्तुति, कंस आदिके वधके लिये विष्णुकी स्वीकृति।	२२७
२	यशोदाके गर्भमें योगमायाका एवं देवकीके गर्भमें भगवान्‌का प्रवेश तथा देवताओंद्वारा देवकीकी स्तुति।	२३२
३	भगवान्‌का आविर्भाव एवं योगमाया-द्वारा कंसको वञ्चना।	२३३
४	कारागारसे वसुदेव और देवकीका मुक्तिलाभ।	२३५
५	पुतना-वध।	२३६
६	शकट भङ्ग एवं बलदेव और श्रीकृष्णका नाम करण।	२३८
७	कालीय-दमन।	२४१
८	धेनुकासुर-वध।	२४५
९	प्रलम्बासुर-वध।	२४६
१०	शरद् वर्णन एवं गोवर्धनकी पूजा।	२४८
११	इन्द्रका क्रोध और श्रीकृष्णद्वारा गोवर्धन-पर्वतका धारण।	२५१
१२	इन्द्रका आगमन और उनकेद्वारा श्रीकृष्णका अभिषेक।	१५३
१३	गोपोंद्वारा श्रीकृष्णका प्रभाववर्णन और गोपीयोंके साथ उनकी रास-लीला।	२५५
१४	वृषभासुरका-वध।	२५९
१५	श्रीकृष्णको बुलानेके लिये कंसद्वारा अक्रूरको भेजना।	२६०
१६	केशी-वध।	२६१
१७	अक्रूरजीकी गोकुल-यात्रा।	२६३
१८	भगवान्‌का मथुराको जाना, गोपि-योंका विरह वर्णन और अक्रूरजीका मोह।	२६५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अध्याय	विषय	पृष्ठा
१६	श्रीकृष्णकेद्वारा रजकका वध, तथा मालीपर कृपा।	२६६
२०	श्रीकृष्णकी कुब्जापर कृपा, धनुर्भङ्ग एवं कंसका वध।	२७१
२१	उग्रसेनका राज्याभिषेक और भगवान् वासुदेवका विद्याध्ययन।	२७७
२२	जरासन्धकी पराजय।	२७६
२३	द्वारकादुर्गकी रचना, कालयवनका भस्म होना और मुचकुन्दद्वारा भगवान्‌की स्तुति।	२८०
२४	मुचकुन्दका तपस्याके लिये प्रस्थान और बलरामजीकी व्रज यात्रा।	२८३
२५	बलरामजीका व्रज विहार और यमुनाका आकर्षण।	२८४
२६	रुक्मिणीका हरण।	२८६
२७	प्रद्युम्न हरण और शम्बरासुरका वध।	२८७
२८	रुक्मीका वध।	२८६
२६	नरकासुरका वध।	२६१
३०	पारिजात-हरण।	२६३
३१	भगवान्‌का द्वारकापुरीमें आगमन और सोलह हजार एक सौ रमणियोंके साथ विवाह करना।	२६८
३२	उषाचरित।	२६६
३३	श्रीकृष्ण और वाणासुरका युद्ध।	३०१
३४	पौण्ड्रक वध और काशीदहन।	३०५
३५	शाम्बका विवाह।	३०८
३६	द्विविध वध।	३१०
३७	ऋषियोंका शाप, यदुवंशका विनाश और भगवान्‌का स्वधाम गमन।	३१२
३८	यादवोंका अन्त्येष्टि संस्कार, परीक्षित्‌का राज्याभिषेक और पाण्डवोंका वन-गमन।	४१६

छठा अंश

१	कलिधर्म निरूपण।	३२२
२	श्रीवेदव्यासद्वारा कलियुग, शुद्र और स्त्रियोंका महत्व-वर्णन।	३२६
३	निमेषादि काल, मान और नैमित्तिक प्रलयका वर्णन।	३२८
४	प्राकृतप्रलयका वर्णन।	३३१
५	आध्यात्मिक आदि त्रिविध तापोंका वर्णन, भगवान् तथा वासुदेव शब्दोंकी व्याख्या और भगवान्‌के परमार्थिक रूपका वर्णन।	३३४
६	केशिध्वज और खाण्डिक्यकी कथा।	३३६
७	ब्रह्मयोगका निर्णय।	३४२
८	शिष्यपरम्परा विष्णुपुराणका माहात्म और उपसंहार।	३४८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



भगवान् श्रीविष्णुः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुपुराणम्

श्रीमन्महर्षिवेदव्यासप्रणीतम्

[श्रीधरस्वामिकृतटीकासहितम्]

प्रथमः अंशः

प्रथमः अध्यायः

(मङ्गलाचरणम्, पराशरं प्रति मैत्रेयस्य प्रश्नः, पराशरस्योत्तरदानञ्च)

ॐ नमो भगवते वासुदेवाय ।

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥१॥

सदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसृष्टि-स्थिति-काल-संलयः ।

श्रीविन्दुसाधवं वन्दे परमानन्दविग्रहम् ।
वाचं विश्वेश्वरं गंगां पराशरमुखान् मुनीन् ॥ १ ॥

श्रीमच्चित्सुखयोगिमुख्यरचित-व्याख्यां निरीक्ष्य स्फुटं
तन्मार्गेण सुबोधसंग्रहवतीमात्मप्रकाशाभिधाम् ।
श्रीमद्विष्णुपुराणसारविवृतिं कर्त्ता यतिः श्रीधर-
स्वामी सद्गुरुपादपद्ममधुपः साधु स्वधीशुद्धये ॥ २ ॥

श्रीमद्विष्णुपुराणस्य व्याख्यां स्वल्पातिविस्तराम् ।
प्राचामालोक्य तद्व्याख्या मध्यमेयं विधीयते ॥ ३ ॥

अस्मिन् विवक्षितं यत्तु वस्तु तन्नमनात्मकम् ।
मुनिर्मन्त्रोपनिषदा कृतं बध्नाति मङ्गलम् ॥ ४ ॥

जितं त इति ।—तत्रांशे प्रथमेऽध्याये मैत्रेयेण पराशरे ।
प्रवृत्त्यर्थं पुराणस्य प्रश्ना द्वाविंशतिः कृताः ॥

इह खलु पुराणानामीश्वरनिश्वसितस्वरूपत्वेन वेदमूलत्वेन इदानीन्तनानां व्यासवशिष्ठपराशरादीनां स्मृतिरूपत्वेन च प्रमाणत्वं प्रयोजनवत्त्वञ्च दुरपह्नवमेव । तद्व्याख्यानानाञ्च तत्तदर्थाभासनिरासतत्तदर्थप्रकाशकत्वपरत्वेन प्रयोजनवत्त्वम् पुराणत्वाविशेषेऽपि उपाख्यानलघुत्वेन जगज्जीवात्म-परमात्मनामैकात्म्यप्रतिपादनाभ्यासवशादत्रैव पुराणे मुमुक्षूणां प्रवृत्तिरुचिततमेत्येतदेव व्याख्यायते । तत्र च सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानां तदपवादेन मुक्तेश्च प्रतिपादनम् । सदाचार-भूगोल-भरतोपाख्या-

---

नादिनिरूपणस्य साक्षात् परम्परया वा मुक्तावेवोपयोगो द्रष्टव्यः । पुण्डरीकाक्षेति । हृदयाख्यं पुण्डरीकम् अश्नुते व्याप्नोतीति तथा । यद्वा पुण्डरीके इव अक्षिणी यस्येति । अत्र श्वेतत्वमविवक्षितम्, लोहितत्वेनैव नयनोत्कर्षात् । शिवाराधनार्थं पुण्डरीकीकृतमक्षि येनेति वा, "पुण्डरीकं परं धाम अक्षमव्ययमुच्यते" इत्यादि श्लोकोक्तव्युत्पत्त्या पुण्डरीकीक्षेति सम्बोधनमिति वा । ते इति सम्बन्धे षष्ठी । तव जितं जयोऽस्त्वित्यर्थः । यद्वा, ते त्वया जितं सर्वोत्कर्षेण स्थितमिति । एतेन नमस्कार आक्षिप्तः (क) । विश्वभावन विश्वोत्पादक । हृषीकाणामिन्द्रियाणामीश तत्प्रवृत्तिहेतुत्वात्, "प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो ये मनो विदु" रिति श्रुतेः । महापुरुषेति जीवव्यवच्छेदाय । महत्त्वञ्च "द्वा सुपर्णा सयुजा

श्रीमद्विष्णुपुराणस्य टीकायाः श्रीधरस्य च ।
क्रियते पादटीकेयं श्रीकालीपदशर्मणा ॥

(क) एतेन नमस्कार आक्षिप्त इति-स्वामी । अत्र एतेनेति—त्वया जितं सर्वोत्कर्षेण स्थितमित्यनेनेत्यर्थः । नमस्कारः स्वावधिकोत्कर्षवत्तया ज्ञापनरूपो नमस्कारपदार्थः । आक्षिप्तः सूचित इत्यर्थः । उक्तं हि गदाधरभट्टाचार्य्येणानुमानदीधिति-विवृतौ—'वस्तुतस्तु स्वावधिकोत्कर्षवत्तया ज्ञापनं नमस्कार' इति । तदेवं सर्वोत्कर्षेणेत्यनेन सर्वावधिकोत्कर्षस्य प्रतिपाद-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रधान-बुद्ध्यादि-जगत्-प्रपञ्च-सूः
स नोऽस्तु विष्णुर्मति-भूति-मुक्तिदः ॥२॥

प्रणम्य विष्णुं विश्वेशं ब्रह्मादीन् प्रणिपत्य च ।
गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसम्मितम् ॥३॥

सखाया" इत्यादि श्रुतेः, नित्यमुक्तस्वभावत्वाच्च। पुरि शरीरे शयनात्तु पुरुषत्वम्। विश्वोत्पादकत्वे हेतुः पूर्वजेति, सृष्टेः पूर्वमेव स्वतः प्रादुर्भूतत्वेनानन्यथासिद्धत्वेन वान्येषां तदधीनत्वात्।

नन्वेकस्मादेव नमस्कारान्मङ्गलसिद्धौ कृतं बहुभिर्नमस्कारैरिति चेन्न, अस्य शास्त्रस्यातिश्रेयःसाधनत्वेन बहुविघ्नसम्भावनया मङ्गलबाहुल्यावश्यकत्वात्। अथवा पुण्डरीकाक्षेत्यादि-पञ्चविशेषणैः "भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्। आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः" ॥ इति पञ्चमांशोक्तः। पञ्चात्मा हरिरीरितः इति। तत्र पुण्डरीकाक्षेति भूतात्मा, विश्वभावनेति प्रधानात्मा, हृषीकेशेति इन्द्रियात्मा, महापुरुषेति परमात्मा, पूर्वजेत्यात्माभिहितः ॥ १ ॥

श्रोतृप्रवृत्त्यङ्गं सम्बन्धं प्रयोजनञ्च (ख) प्रतिपादयितुमाह—सदक्षरमिति। सोऽतिप्रसिद्धो विष्णुर्व्यापनशीलो देशकालस्वरूपतो व्यवच्छेदाभावात्।

विशतेर्वा विष्णुः प्रवेशनशीलः, "तत् सृष्ट्वा तदेवानुप्राविशद्" इति श्रुतेः। मतिभूति-मुक्तिदोऽस्तु—मतिभूत्या तत्त्वज्ञानोद्रेकेण मुक्तिदः। यद्वा अधिकारिभेदात् मतिम् उत्तमां बुद्धिं भूतिम् ऐश्वर्यं मुक्तिञ्च ददातीति तथा। विष्णुपदस्य प्रवेशनशीलार्थत्वे मूर्त्तत्वं प्राप्तं निराकरोति ब्रह्मेति पूर्णमित्यर्थः। तदपि कुत इत्यत आह—सत्, सर्वानुस्यूतम्। इदं सदिदं सदिति सर्वत्र प्रतीयमानत्वाद् अनष्टमिति यावत्। अक्षरमिति विकारं निराकरोति। पुमान् कूटस्थः, कुतस्तर्हि मर्त्यादिप्रदत्तमत आह—ईश्वरः कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थः। तदपि कुत इत्यत आह—गुणेति, गुणाः सत्त्वरजस्तमांसि तेषामूर्मयः क्षोभजनिताः सृष्टिस्थितिकालाः, कालः संहारः, तेषां संलयः संश्लेषोऽभ्यासो यस्मिन् स तथा, सर्वाधिष्ठानत्वेनेश्वरत्वमभ्याहृतमित्यर्थः। ननु प्रधानादेव सृष्ट्यादि इति चेदत आह—प्रधानबुद्ध्यादीनां जगत्प्रपञ्चानां सूः सविता। प्रधानस्यानादितया कथं तज्जनकत्वमिति चेन्न, प्रलये तस्याकिञ्चित्करत्वेन शक्त्यर्पणद्वारा जननोपचारात्। यद्वा प्रधानद्वारा बुद्ध्यादिसूरित्यर्थः। यद्वा यो विष्णुर्वेदान्तिनां सदक्षरं ब्रह्म पातञ्जलानां क्लेशकर्मविपाकाशयैरपरामृष्ट ईश्वरः। सांख्यानां पुमान् पुरुषः। तदुक्तं कापिलैः "न प्रकृतिर्न विकृतिः पुरुष" इति। स मतिभूतिमुक्तिदोऽस्त्वित्यन्वयः। शेषं समानम् ॥ २ ॥

अथ पराशरो मुनिः गुर्वादिभक्तिं पुरुषार्थसाधनं दर्शयन् मैत्रेयं निमित्तीकृत्य विष्णुतत्त्वप्रतिपादकं विष्णुपुराणमारभते—प्रणम्येति। प्रशब्देन भक्तिश्रद्धातिशयो द्योत्यते। विश्वेषां ब्रह्मादिस्तम्बपर्य्यन्तानाम् ईशं प्रवृत्तिनिवृत्तिकारणम्। प्रकृतशास्त्रे सम्प्रदायप्रवर्त्तकान प्रणमति—ब्रह्मादीनिति। ब्रह्म-ऋभु-दक्ष-पुरु-कुत्स-सारस्वतप्रभृतीन्, गुरुं कपिलं सारस्वतं वा। पुराणं सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितमिति पञ्चाङ्गम्। तत्र यथायथं प्रथमेऽंशे सर्ग-प्रतिसर्गौ। द्वितीये प्रसङ्गागतं भूगोलज्योतिश्चक्रम्। तृतीये मन्वन्तरम्। चतुर्थे वंशः। पञ्चमे वंशानुचरितम्। षष्ठे वैराग्योपयोगि-प्रलयादिकमभिधाय आत्यन्तिकप्रलयरूपमोक्षः कथ्यते। स्तौति—वेदेन सम्मितं तुल्यमिति ॥३॥

नात् स्वस्यापि सर्वान्तर्गतत्वेन स्वावधिकोत्कर्षस्यापि प्रतिपत्तेः प्रागुक्तनमस्कारस्यानेन सूचनमुपपन्नम्।

(ख) श्रोतृप्रवृत्त्यङ्गं सम्बन्धं प्रयोजनञ्चेति—श्रीधरः। सम्बन्धप्रयोजनयोः श्रोतृप्रवृत्त्यङ्गत्वेन शास्त्रादौ तयोः प्रतिपादनस्य कर्त्तव्यतावोधकं शास्त्रं यथा,—

'सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इत्येतत्—तेनप्रमाणसिद्धं प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्य हेतुत्वादिरूपयुक्तिसिद्धमपि सम्बन्धप्रयोजनयोः श्रोतृप्रवृत्त्यङ्गत्वमितिध्येयम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इतिहासपुराणज्ञं वेदवेदाङ्गपारगम् ।
धर्मशास्त्रादितत्त्वज्ञं वशिष्ठतनयात्मजम् ॥४॥

पराशरं मुनिवरं कृतपूर्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥५॥

त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ।
धर्मशास्त्राणि सर्व्वाणि वेदाङ्गानि यथाक्रमम् ॥६॥

त्वत्प्रसादान्मुनिश्रेष्ठ मामन्ये नाकृतश्रमम् ।
वक्ष्यन्ते सर्वशास्त्रेषु प्रायशो येऽपि विद्विषः ॥७॥

सोऽहमिच्छामि धर्म्मज्ञ श्रोतुं त्वत्तो यथा जगत् ।
बभूव भूयश्च यथा महाभाग भविष्यति ॥८॥

यन्मयञ्च जगद् ब्रह्मन् यतश्चैतच्चराचरम् ।
लीनमासीद् यथा यत्र लयमेष्यति यत्र च ॥९॥

यत्प्रमाणानि भूतानि देवादीनाञ्च सम्भवम् ।
समुद्र-पर्वतानां च संस्थानञ्च तथा भुवः ॥१०॥

सूर्य्यादीनाञ्च संस्थानं प्रमाणं मुनिसत्तम ।
देवादीनां तथा वंशान् मनून् मन्वन्तराणि च ॥११॥

कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपञ्च युगधर्मांश्च कृत्स्नशः ॥१२॥

देवर्षिपार्थिवानाञ्च चरितं यन्महामुने ।
वेदशाखाप्रणयनं यथावद् व्यासकर्त्तृकम् ॥१३॥

धर्म्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनाम् (ग)।
श्रोतुमिच्छाम्यहं सर्व्वं त्वत्तो वाशिष्ठनन्दन ॥१४॥

ब्रह्मन् प्रसादप्रवणं कुरुष्व मयि मानसम् ।
येनाहमेतज्जानीयां त्वत्प्रसादान्महामुने (घ) ॥१५॥

इतिहासेत्यत्र शिष्यप्रश्न एव पुराणप्रवृत्तिहेतुरिति भावः। इतिहेत्यव्ययम् पारम्पर्योपदेशाभिधायि, तस्यासनम् आसः अवस्थानमेतेष्विति। इतिहासाः पुरावृत्तानि "धर्म्मार्थकाम-मोक्षाणामुपदेशसमन्वितम्। पूर्व्ववृत्तकथायुक्तमितिहासं प्रचक्षते" इति स्मृतेः। वेदवेदाङ्गपारगम्—वेदस्य तदङ्गानां शिक्षा-कल्प-व्याकरण-निरुक्त-च्छन्दो-ज्योतिषाञ्च पारगम्। धर्म्मशास्त्रं स्मृतिः, आदिशब्दो न्यायमीमांसादिसंग्रहार्थः। धर्म्मशात्रार्थेति वा पाठः। वशिष्ठतनयः शक्तिः तस्यात्मजं पुत्रम् ॥ ४ ॥

पराशरमिति स्वस्मिन्नेव परोक्षनिर्देशो लोकोक्त्या देहादावनहङ्कारद्योतनार्थः। प्रणिपत्य दण्डवत् प्रणम्य पाद-ग्रहणादिविधिना अभिवाद्य च ॥ ५ ॥

बुभूत्सितमर्थं प्रष्टुं तत्कृतमनुग्रहमनुवदति—त्वत्त इति द्वाभ्याम्। त्वत्तो वेदाध्ययनमधीतं कृतमित्यर्थः। ओदन-पाकं पचतीतिवत्। अन्ये विद्वांसो मां सर्वशास्त्रेषु अकृत-श्रमं न वक्ष्यन्ति, अपि तु विद्विषोऽपि कृताभ्यासमेव वक्ष्य-न्तीत्यर्थः ॥ ६ । ७ ॥

पूर्वं यथा जगद् बभूव, पुनश्च यथा भविष्यतीति जगतो जन्मप्रकारप्रश्नः ॥ ८ ॥

यन्मयमित्युपादानप्रश्नः। यतश्चेति निमित्तप्रश्नः। लीनमासीद् यत्रेति लयाधारप्रश्नः ॥ ९ ॥

प्रमाणमियत्ताप्रकाशकं वा। यत्प्रमाणानि महाभूतानि यत्प्रकाश्यानि चेत्यर्थः। देवादीनाञ्च सम्भवमित्यनु-सर्गप्रश्नः ॥ १० ॥

कल्पान् ब्रह्मायुःपरिमितान्, महाकल्पान् ब्रह्माहः-संज्ञान्। विभागानिति पाठेऽपि स एवार्थः। चतुर्युगै-रावर्त्तमानैर्विकल्पितान् विभक्तान् ॥ ११-१२ ॥

वाशिष्ठः शक्तिः। तस्य नन्दन सुत हे पराशर ॥१३-१४॥

प्रसादप्रवणं प्रसादाभिमुखम् येन प्रसादप्रवणेन चित्तेन जातात् त्वत्प्रसादादहमेतत् सर्वं जानीयाम् (घ) ॥ १५ ॥

(ग) वर्णधर्मान् आश्रमधर्मांश्चेत्यर्थः।

(घ) पञ्चदशश्लोकस्य टीकायां मूलस्थ—येनेतिपदघटक-तृतीयाया जन्यत्वार्थकत्वेन जातादित्यर्थविवरणोपपत्तिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

साधु मैत्रेय धर्मज्ञ स्मारितोऽस्मि पुरातनम् ।
पितुः पिता मे भगवान् वशिष्ठो यदुवाच ह ॥१६॥

विश्वामित्रप्रयुक्तेन रक्षसा भक्षितो मया ।
श्रुतस्तातस्ततः क्रोधो मैत्रेयासीन्ममातुलः ॥१७॥

ततोऽहं रक्षसां सत्रं विनाशाय समारभम् (ङ) ।
भस्मीकृताश्च शतशस्तस्मिन् सत्रे निशाचराः ॥१८॥

ततः संक्षीयमाणेषु तेषु रक्षः स्वशेषतः ।
मामुवाच महाभागो वशिष्ठो मत्पितामहः ॥१९॥

अलमत्यन्तकोपेन तात मन्युमिमं जहि ।
राक्षसा नापराध्यन्ते (च) पितुस्ते विहितं तया (छ)।२०।

मूढानामेष भवति क्रोधो ज्ञानवतां कुतः ।
हन्यते तात कः केन यतः स्वकृतभुक् पुमान् ॥२१॥

संचितस्यापि महतो वत्स क्लेशेन मानवैः ।
यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥२२॥

स्वर्गापवर्गव्यासेधकारणं परमर्षयः ।
वर्जयन्ति सदा क्रोधं तात मा तद्वशो भव ॥२३॥

अलं निशाचरैर्दग्धैर्दीनैरनपकारिभिः ।
सत्रं ते विरमत्वेतत् क्षमासारा हि साधवः ॥२४॥

एवं तातेन (ज) तेनाहमनुनीतो महात्मना ।
उपसंहृतवान् सत्रं सद्यस्तद्वाक्यगौरवात् ॥२५॥

ततः प्रीतः स भगवान् वशिष्ठो मुनिसत्तमः ।
संप्राप्तश्च तदा तत्र पुलस्त्यो ब्रह्मणः सुतः ॥२६॥

पितामहेन दत्तार्घ्यः कृतासनपरिग्रहः ।
मामुवाच महाभागो मैत्रेय पुलहाग्रजः ॥२७॥

वैरे महति यद्वाक्याद् गुरोरस्याश्रिता क्षमा ।
त्वया तस्मात् समस्तानि भवान् शास्त्राणि वेत्स्यति ।२८
सन्ततेर्न ममोच्छेदः क्रुद्धेनापि यतः कृतः ।
त्वया तस्मान्महाभाग ददाम्यन्यं महावरम् ॥२९॥

पुराणसंहिताकर्त्ता भवान् वत्स भविष्यति ।
देवतापारमार्थञ्च यथावद् वेत्स्यते भवान् ॥३०॥

वशिष्ठस्तव कदा किमुवाचेत्यपेक्षायां तदुक्तेरुपोद्घात-कथामाह—विश्वामित्रप्रत्युक्तेनेत्यादिना ॥ १६-२१ ॥

यशस्तपसोर्नाशकत्वादेव स्वर्गापवर्गयोर्व्यासेधस्य प्रतिबन्धस्य कारणं क्रोधः । हे तात ! तद्वशो मा भव ॥२२-२३॥

(ङ) समारभमित्यत्र आत्मनेपदिनोऽपि रभेः परस्मैपदे प्रयोग आर्षत्वात् सोढ़व्यः ।

(च) परस्मैपदिनोऽपि राधेरात्मनेपदे प्रयोगः पूर्ववदार्षत्वादेव सोढ़व्यः ।

(छ) विहितमिति—पुराकृतमित्यर्थः । कर्मेति शेषः । तथा तादृशफलजनकम् । तथा हि तव पितुः शक्त्रेरकाले तथाभूतजीवनावसाने तेनैव कृतानि दुरदृष्टजनककर्माण्येवापराध्यन्ति, न तु राक्षसा इति भावः ।

गुर्व्वाज्ञाकारिणां शत्रुपक्षीया अपि अनुकूला भवन्तीति दर्शयन्नाह—सम्प्राप्तश्चेत्यादिना ॥ २४-२६ ॥

यद् यस्मात् अस्य गुरोर्वाक्यात् क्षमा आश्रिता तस्मात् ॥ २७ ॥

प्रवृत्ते च निवृत्ते च कर्म्मणि अस्तमला अज्ञानविपर्य्ययशून्या मतिर्भविष्यति । ते च कर्म्मणी स्मृतिप्रसिद्धे ।

अथवा विहितमिति—प्राक्तनकर्मानुसारेण धात्रा सम्पादितमित्यर्थः । धातुस्तत्सम्पादने निमित्तत्वमात्रमेव रक्षसाम्, न तु तेषां तत्र स्वातन्त्र्यं येन ते विशेषेण तत्रापराधिनः स्युरिति भावः ।

(ज) तातेनेति—पितृतातेन पितामहेन वशिष्ठेनेत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रवृत्ते च निवृत्ते च (ञ) कर्मण्यस्तमला मतिः ।
मत्प्रसादादसन्दिग्धा तव वत्स भविष्यति ॥३१॥
ततश्च भगवान् प्राह वशिष्ठो मत्पितामहः ।
पुलस्त्येन यदुक्तं ते सर्व्वमेतद् भविष्यति ॥ ३२ ॥
इति पूर्वं वशिष्ठेन पुलस्त्येन च धीमता ।
यदुक्तं तत् स्मृतिं यातं त्वत्प्रश्नाखिलं मम ॥३३॥
सोऽहं वदाम्यशेषं ते मैत्रेय परिपृच्छते ।
पुराणसंहितां सम्यक् तां निबोध यथायथम् ॥३४॥
विष्णोः सकाशात् सम्भूतं जगत् तत्रैव संस्थितम् ।
स्थिति-संयमकर्त्ताऽसौ जगतोऽस्य जगच्च सः ॥३५॥

इति श्रीविष्णुपुराणे प्रथमांशे प्रथमोऽध्यायः ॥१॥*

"इह वामुत्र काम्यञ्च प्रवृत्तमभिधीयते। वैराग्यज्ञानपूर्वन्तु निवृत्तमुपदिश्यते" इति (ञ) ॥३१॥

यथायथं यथार्थम् ॥३४॥

श्रोतुः सुखप्रतिपत्तये संक्षेपतस्तावत् सर्वप्रश्नोत्तरतया पुराणार्थमाह—विष्णोरिति श्लोकेन। सकाशात्-काशः प्रकाशः ईक्षणमिति यावत्, तत्सहिताद् विष्णोर्जगदुद्भूतम्। "स ऐक्षत लोकान् उत्सृजा" इति, "सोऽकामयत बहु स्यां प्रजायेय" इत्यादिश्रुतिसिद्धमिच्छादिशब्दापरपर्य्यायं यदीक्षणमालोचनात्मकं तेन प्रकारेण जगदुद्भूतम्। अनेन यथा बभूवेत्यस्य जन्मप्रकारप्रश्नस्योत्तरं तत्रैव स्थितम्। प्रलयकाल इति लयाधारप्रश्नस्योत्तरम्। च-शब्दाज्जगतः स्थितिरपि तत्रैवेत्युक्तम्। अस्य जगतः स्थितिसंयमयोरसावेव कर्त्ता। जन्मनोऽप्युपलक्षणम्। अनेन यतश्चैतच्चराचरात्मकं जगदित्यस्य निमित्तप्रश्नस्योत्तरम्। जगच्च स इत्युपादानप्रश्नस्योत्तरम्। उपादानकारणरूपत्वात् कार्य्यस्य। अनेनैव विष्णोर्जगदुपादानरूपकर्त्तृत्वादिकथनेन विष्णोरेवोद्भविष्यति तत्रैव स्थास्यतीत्यादि-सर्व्वप्रश्नस्योत्तरमर्थाद् द्रष्टव्यम्। तत्र च यथा जगद् बभूव, यथा च पुनर्भविष्यति, यन्मयं च जगत्, यतश्च यत्र पूर्वं लीनम्, पुनश्च यत्र लयमेष्यति। यत्प्रमाणानि भूतानि देवादीनाञ्च सम्भवमित्यष्टमप्रश्नत्योत्तरं प्रथमांशे। समुद्रपर्व्वतानाञ्च संस्थानं, भुवः संस्थानम्, सूर्य्यादीनाञ्च संस्थानम्, तेषां परिमाणञ्चेति चतुःप्रश्नोत्तरं द्वितीयांशे। "देवादीनां तथा वंशान् मनून् मन्वन्तराणि च। वेदशाखाप्रणयनं यथावद् व्यासकर्त्तृकम्। धर्म्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनाम्"। इति षट्प्रश्नोत्तरं तृतीयांशे। देवर्षिपार्थिवानाञ्च चरितमिति प्रश्नस्योत्तरं तद्वंशविस्तारोक्तिपूर्वकं चतुर्थांशे। तत्र च यदुवंशे भूभारहरणार्थमवतीर्णस्य हरेश्चरितं विस्तारेण पञ्चमांशे। कल्पान् कल्पविकल्पांश्च कल्पान्तस्य स्वरूपञ्चेति प्रश्नत्रयस्य प्रथमांशेन संक्षेपेण दत्तोत्तरस्य युगधर्म्मांश्च कृत्स्नश इत्यस्य चोत्तरं षष्ठांशे इति विवेकः ॥ ३५ ॥

(ञ) प्रवृत्ते च निवृत्ते च कर्मणीति—प्रवृत्तिलक्षणे निवृत्तिलक्षणे च द्विविधे शास्त्र विहित कर्मणीत्यर्थः। तदुक्तं मनुना—

'प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम्' इति।

(ञ) एतस्मिन्नर्थे किञ्चित्पदवैषम्येणापि पाठो दृश्यते यथा—

'इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।
निष्कामं ज्ञानपूर्वन्तु निवृत्तमुपदिश्यति। इति

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे प्रथमोऽध्यायः।

---

* कस्मिंश्चिद् ग्रन्थे अस्याध्यायस्य १-४ संख्यकाः श्लोका न सन्ति।

पाठान्तराणि—१८ श्लोके—भस्मीभूताश्च—।
२० ,, —विहितं हि तत्।
२२ ,, सञ्चितस्यापि महता।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयोऽध्यायः ।

[विष्णुस्तुतिः, सृष्टिप्रक्रिया च ।]

पराशर उवाच ।

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥१॥
नमो हिरण्यगर्भाय हरये शंकराय च ।
वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥ २ ॥
एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।
अव्यक्तव्यक्तभूताय विष्णवे मुक्तिहेतवे ॥ ३ ॥

सर्गस्थितिविनाशानां जगतोऽस्य जगन्मयः ।
मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥४॥

आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्व्वभूतस्थमच्युतं पुरुषोत्तमम् ॥५॥

ज्ञानस्वरूपमत्यन्तनिर्म्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥६॥

द्वितीयोऽध्यायः

अथैतत् पुराणप्रतिपाद्यं विष्णोः स्वरूपं परापररूपेण प्रणमन् विस्तरेण पुराणार्थं वक्तुमाह—अविकारायेति नवभिः श्लोकैः। तत्र तावत् पूर्व्वाध्यायान्ते पुराणार्थं संक्षेपश्लोकेन जगदुपादानकर्त्तृत्वाद्युक्त्वा प्राप्तं विकारादिप्रसङ्गं वारयन् प्रणमति। लोके हि क्रियाश्रयत्वात् कर्त्ता विकारी दृष्टः। रागादिमांश्चानित्यश्च साहंकारश्च, एतद् व्यावर्त्तयति—अविकारायेति चतुर्भिः पदैः (क)। उपादानकारणमपि मृत्सुवर्णादिघटकटकादिनानापरिणामैरनेकरूपं दृष्टं, तद् व्यावर्त्तयति—एकरूपमेव रूपं यस्य तस्मै। सदेति सर्वत्रान्वयः। तत्र हेतुः, सर्वजिष्णवे—अचिन्त्यैश्वर्य्येण सर्वान् कर्त्तृकारणादीन् जेतुं अतिशयितुं शीलं यस्य तस्मै, एवम्भूताय विष्णवे नम इत्युत्तरेणान्वयः ॥ १ ॥

ब्रह्मादित्रिमूर्त्तिरूपेण प्रणमति, हिरण्यगर्भादिरूपाय, तैः रूपैः सर्गस्थित्यन्तकारिणे वासुदेवाय नमः। तदेवं संसारप्रवर्त्तकत्वमुक्त्वा तन्निवर्त्तकत्वेन प्रणमति। ताराय भक्तानां तारकाय च (ख) ॥ २ ॥

किञ्च एकमनेकं स्वरूपं यस्य, स्थूलः सूक्ष्मश्चात्मा स्वरूपं यस्य। विरुद्धस्वरूपद्वयं कथमित्यत्राह—अव्यक्तव्यक्तरूपाय—अव्यक्तं कारणम्, व्यक्तं कार्यं तदुभयरूपाय। अतोऽव्यक्तरूपत्वादेकरूपाय च। व्यक्तरूपत्वादनेकरूपाय स्थूलात्मने चेत्यर्थः। एवं सर्वात्मत्वेनोपासकानां मुक्तिहेतवे नमः ॥ ३ ॥

कार्य्यकारणत्वमभिनयन् प्रणमति—सर्गेति। जगतः सर्गादीनां यो मूलभूतो जगन्मयश्च अतो विष्णवे सर्वव्यापिने तथा परमात्मने कार्यकारणाभ्यां परम उत्कृष्ट आत्मा स्वरूपं यस्य तत्सङ्गरहितायेत्यर्थः ॥ ४ ॥

आधारभूतमित्यादीनां प्रणम्य कथयामीति चतुर्थेनान्वयः। अणीयसामपि अणीयांसमतिसूक्ष्मतमं सर्वभूतेषु नियन्तृत्वेन स्थितम्। भूतान्तःस्थत्वेऽप्यच्युतं तैरपरिच्छिन्नम् ॥५॥

अर्थस्वरूपेण दृश्यरूपेण द्रष्टृजीवभ्रान्तिज्ञानेन स्थितं प्रतीतम् ॥ ६ ॥

(क) अविकारायेतिपदेन विकारव्यावर्त्तनम्। शुद्धायेत्यनेन रागादिमत्त्वव्यावर्त्तनम्। नित्यायेत्यनेनानित्यत्वव्यावर्त्तनम्। परमात्मन इत्यनेन च साहङ्कारत्वव्यावर्त्तनम्।

(ख) द्वादशश्लोके वासुदेवशब्दार्थप्रदर्शनावसरे स्वामिना वसनाद् वासनाच्च वासुरित्युक्तम्। तत्र वसनं स्थितिलक्षणं सर्वत्रासाविति मूलाल्लभ्यते, वासनं स्थितिलक्षणवसनप्रयोजकव्यापारः 'समस्तञ्च वसत्यत्रेति मूलादुपात्तम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुं ग्रसिष्णुं विश्वस्य स्थितौ सर्गे तथा प्रभुम् ।
प्रणभ्य जगतामीशमजमक्षरमव्ययम् ॥७॥
कथयामि यथा पूर्व्वं दक्षाद्यै र्मुनिसत्तमैः ।
पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥८॥
तैश्चोक्तं पुरुकुत्साय भूभुजे नर्मदातटे ।
सारस्वताय तेनापि मह्यं सारस्वतेन च ॥९॥
परः पराणां परमः परमात्मात्मसंस्थितः ।
रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥१०॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ।
वर्ज्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ।११।
सर्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥१२॥
तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् ।
एकस्वरूपं च सदा हेयाभावाच्च निर्म्मलम् ॥ १३ ॥
तदेतत् सर्व्वमेवासीद् व्यक्ताव्यक्तस्वरूपवत् ।
तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥ १४ ॥
परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ।
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम् ॥१५॥

विष्णुं ग्रसिष्णुमित्यनेन कालरूपेण प्रणामः। अतः सर्गस्थित्यन्तकारिणे इत्यनेनापौनरुक्तम्, अत एव नमस्यस्वरूपभेदद्योतनार्थं प्रणम्यैतस्यावृत्तिः। अक्षरम् अचलम् ।७।८।

पितामहेन दक्षादिभ्यः प्रोक्तं त्वया कथं कथ्यते ? तत्राह तैश्चोक्तमिति ॥ ९ ॥

अव्यक्तादिस्वरूपात् परमात्मनो जगत्सृष्ट्यादि वक्तुं ततः प्राचीनं तत्स्वरूपमाह—पर इति चतुर्भिः। "इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः" इत्यादिश्रुतिस्मृतिभ्यः परत्वेन प्रतिपादितानामिन्द्रियादीनां परः प्राक्तनः, अत एव परम उत्कृष्टः परमात्मा आत्मसंस्थितः अनन्याधारः। रूपवर्णादिभिः यो निर्देशः तदेव विशेषणं तेन विवर्जितः। रूपं शुक्लादि, वर्णो ब्राह्मणादिः। आदिशब्दाज्जातिक्रिये। शुक्लः ब्राह्मणः गौः पाचक इत्यादिनिर्देशेन विशेष्टुमशक्यः। यद्वा रूपादिनिर्देशविवर्जितः, रूपाद्यभावात्। अत एव विशेषणैरपि विवर्जित इत्यर्थः ॥ १० ॥

सद्भावविकारवर्जितश्चेत्याह—अपक्षयेति। ननु च "असन्नेव स भवति असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः" इति। अस्तीत्येवोपलब्धव्य इत्यादिश्रुतेरस्तित्वं तावदङ्गीकर्त्तव्यम्। तथा च द्वितीयो भावविकारः प्राप्त इत्यांशक्याह—शक्यते वक्तुं यः सदास्तीति। सर्वदा अस्तित्वं च न भावविकारः, किन्तु जन्मान्तरास्तित्वमेव, कादाचित्कत्वात्, अतो नायं दोष इत्यर्थः ॥ ११ ॥

परमात्मैव च सात्वततन्त्रविद्भिर्वासुदेव इत्युच्यते इत्याह—सर्वत्रेति, सर्वत्रासौ वसति, समस्तञ्चास्मिन् वसति इति, वै प्रसिद्धौ, ततः स वासुदेव इति विद्वद्भिरुच्यते इत्यर्थः। वासनात् वसनाच्च वासुः, द्योतनाद् देवः, वासुश्चासौ देवश्चेति वासुदेवः। "वासनाद् द्योतनाच्चैव वासुदेवं ततो विदु" रिति मोक्षधर्मेषु निरुक्तेः ॥ १२ ॥

स एवौपनिषदैर्ब्रह्मेत्युच्यते इत्याह—तद्ब्रह्मेति। यः परमात्मा रूपवर्णादिराहित्येन जन्मादिराहित्येन च लक्षितः स एव वासुदेव इति ब्रह्मेति चोच्यते। न वस्त्वन्तरं लक्षणभेदाभावादित्याशयेन तदेव लक्षणमनुवदति—परमं नित्यमित्यादि। हेयम् अविद्या तत्कार्य्यञ्च, तदभावान्निर्मलम्। तदुक्तं भागवते "वदन्ति तत् तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्दतः" ॥१३॥

तदेवं शुद्धं ब्रह्मस्वरूपं निरूप्य इदानीं तस्यैव स्वमायाविष्कृतव्यक्तादिचतूरूपस्य सर्वप्रपञ्चोपादाननिमित्ततामाह। तदेवेति। तदेव ब्रह्म एतत् सर्वं ब्रह्म प्रपञ्चजातम्। कथम्भूतम् ? व्यक्ताव्यक्तस्वरूपवत्, व्यक्तं महदादि, अव्यक्तं प्रधानं, तत्स्वरूपवत्', तेन रूपेण स्थितं सत्। तथा पुरुषरूपेण कालरूपेण च स्थितं सत् ॥ १४ ॥

चतूरूपोद्भवप्रकारमाह—परस्येति। "स ऐक्षत" "सोऽकामयत" इत्यादिश्रुत्युक्तेक्षणादिकर्त्ता पुरुषः परस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रधानपुरुषव्यक्तकालानां परमं हि यत् ।
पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम् ॥१६॥

प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः ।
रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः ॥१७॥

व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव च ।
क्रीड़तो बालकस्येव चेष्टां तस्य निशामय ॥१८॥

अव्यक्तं कारणं यत् तत् प्रधानमृषिसत्तमैः ।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् ॥१९॥

अक्षय्यं नान्यदाधारममेयमजरं ध्रुवम् ।
शब्दस्पर्शविहीनं तद् रूपादिभिरसंहितम् ॥२०॥

त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् ।
तेनाग्रे सर्व्वमेवासीद् व्याप्तं वै प्रलयादनु ॥ २१ ॥

वेदवादविदो विद्वन्नियता ब्रह्मवादिनः ।
पठन्ति वै तमेवार्थं प्रधानप्रतिपादकम् ॥२२॥

नाहो न रात्रिर्न नभो न भूमि-
र्नासीत्तमो ज्योतिरभून्न चान्यत् ।
श्रोतादिबुद्ध्यानुपलभ्यमेकं
प्रधानिकं ब्रह्म पुमांस्तदासीत् ॥२३॥

ब्रह्मणः प्रथमं रूपम् । तथा च पुराणान्तरे वक्ष्यते । "तस्यैव योऽनुगुणभुग् बहुधैक एव शुद्धोऽप्यशुद्ध इव मूर्त्तिविभागभेदैः । ज्ञानान्वितः सकलसत्त्वविभूतिकर्त्ता तस्मै नमोऽस्तु पुरुषाय सदाव्ययाय" इति । तस्यैव शुद्धस्य ब्रह्मणो योऽनु समन्वन्तरः पुरुष इति हि तस्यार्थः । तथा च नारदीयतन्त्रे—"विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयन्त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते" इति । भागवते च, "कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः । पुरुषेणात्मभूतेन वीर्य्यमाधत्त वीर्य्यवान् । ततोऽभवन्महत्तत्त्वम्" इत्यादि ।

व्यक्ताव्यक्ते तथैवान्ये रूपे, पुरुषेक्षणीयमव्यक्तं—ततो जातं व्यक्तं चेति द्वे अन्ये विलक्षणे रूपे । जड़त्वात् कालस्तथा परं रूपं, सर्वेषां क्षोभकत्वादन्ते निर्देशः ॥ १५ ॥

परस्य ब्रह्मणो रूपाणीत्युक्त्या प्राप्तं तेषामुपादेयत्वं वारयन्नाह—प्रधानेति । सूरयो यत् पश्यन्ति तदेव विष्णोः परमं रूपमित्यर्थः ॥ १६ ॥

तर्हि प्रधानादिरूपैः किं कार्य्यमत आह—प्रधानेति । प्रधानादिरूपाणि तु जगतः स्थितिसर्गनाशानां व्यक्तिसद्भावहेतवः । व्यक्तिरभिव्यक्तिः प्रकाशः, सद्भाव उत्पत्तिः, तत्र हेतवः कारणानि । कथं ? प्रविभागशः । "चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ । प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्दनः । ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः । विष्णुर्मन्वादयः कालः" ॥ इत्यादिना वक्ष्यमाणविभागप्रकारेण ॥ १७ ॥

नन्वेवं चतूरूपो भूत्वा विष्णुः सर्गादौ किमर्थं प्रवर्त्तते, तत्राह—व्यक्तं विष्णुरिति । विष्णुर्व्यक्तादिरूपो भवतीति यत् तत् क्रीड़तो बालकस्य चेष्टामिव जानीहि । तदुक्तं "लोकवत्तु लीलाकैवल्यम्" इति ॥ १८ ॥

अथेदानीं तदेव रूपचतुष्टयं प्रपञ्चयिष्यन् प्रथमं प्रधानं प्रपञ्चयति—अव्यक्तमिति पञ्चभिः । यदव्यक्तं तद् ऋषिसत्तमैः कारणं प्रधानं प्रकृतिरिति च प्रोच्यते । नित्यं सदैकरूपं वृद्ध्यादिहीनमित्यर्थः । सदसदात्मकं कार्य्यकारणशक्तियुक्तम् ॥ १९ ॥

अक्षयम् अविनाशि । पाठान्तरे क्षयानर्हम् नान्यदाधारं अनन्याश्रयम् मूलकारणत्वात् । नान्याधारमिति वक्तव्ये अन्यशब्दे षष्ठत्वविभक्त्यलोपावार्षौ । अमेयम् इयत्ताशून्यम् ध्रुवं निश्चलम् ॥ २० ॥

गुणत्रयसाम्यरूपम् अनादि जन्मशून्यं प्रधानं प्रभवाप्ययम् प्रभवन्तीति प्रभवाः कार्याणि, अपियन्ति लीयन्तेऽस्मिन् इति अप्ययं कार्याणां लयस्थानमित्यर्थः । अग्रे सृष्टेः पूर्वम् अतीत-प्रलयानन्तरम् । सर्वमेव कार्यजातं तेन व्याप्तमन्तर्निहितमासीदित्यर्थः । "तम आसीत् तमसा गूढ़मग्रे प्रकेतम्" इति श्रुतेः ॥ २१ ॥

अत्रार्थे विद्वत्सम्मतिमाह ।—वेदवादाः सिद्धार्थपराणि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णोः स्वरूपात् परतो हि तेऽन्ये
रूपे प्रधानं पुरुषश्च विप्र ।
तस्यैव तेऽन्येन धृते वियुक्ते
रूपान्तरं यत् तद् द्विज कालसंज्ञम् ॥२४॥

प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत् ।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसंचरः ॥२५॥

अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते ।
अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥२६॥

गुणसाम्ये ततस्तस्मिन् पृथक् पुंसि व्यवस्थिते ।
कालस्वरूपरूपं तद् विष्णोर्मैत्रेय वर्त्तते
कालस्वरूपं तद्विष्णोर्मैत्रेय परिवर्त्तते ॥२७॥

ततस्तत् परमं ब्रह्म परमात्मा जगन्मयः ।
सर्व्वगः सर्व्वभूतेशः सर्वात्मा परमेश्वरः ॥ २८ ॥

प्रधानं पुरुषञ्चापि प्रविश्यात्मेच्छया हरिः ।
क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ ॥२९॥

वाक्यानि, तद्विदः नियतास्तदर्थनिष्ठाः, ब्रह्मवादिनः वेदं प्रवचनशीलाः। एतमेवार्थमुद्दिश्य श्रुत्यर्थसूचनपरं प्रधान-प्रतिपादकं 'नाह'रित्यादिश्लोकं पठन्ति ॥ २२ ॥

तदा नाहो न रात्रिरासीत्, सूर्य्याद्यभावाद् रात्रेरभावान्न तमः, अह्नोऽभावान्न ज्योतिः। न चान्यत् किञ्चिदभूत् शब्दाद्यभावात्। श्रोत्रादिजन्यज्ञानेनानुपलभ्यं प्राधानिकं प्रधानमेव प्राधानिकं ब्रह्म च पुमांश्चेति त्रयमेव तदा प्रलये आसीत्। तथा च श्रुतिः "नासदासीन्नो सदासीत् तदानीम्" इत्यादि ॥ २३ ॥

कालस्वरूपं विवृणोति विष्णोरिति चतुर्भिः। परतो निरुपाधेः विष्णोः स्वरूपात् ते प्रागुक्ते प्रधानं पुरुषश्चेति द्वे रूपे अन्ये विलक्षणे मायाकृते। 'तेऽन्ये' इत्यार्षः सन्धिः। तस्य विष्णोरेवान्येन रूपेण ते द्वे रूपे धृते सर्गकाले संयोजिते, वियुक्ते च प्रलयकाले। यद्वा वियुक्ते यथा तिष्ठतस्तथा प्रलयकाले धृते स्थापिते, तयोरवियोगे प्रलयाभावप्रसङ्गात्। तदेतत् कालसंज्ञं रूपान्तरम् ॥ २४ ॥

कालस्वरूपेण प्रकृतिपुरुषयोर्वियोजनं प्रतिसंञ्चर-समाख्ययोपपादयन्ति—'प्रकृता'विति। अतीतग्रहणं सर्व-प्रलयोपलक्षणार्थम्। अतीतप्रलये यद यस्मात् प्रकृतौ संस्थितं लीनं विश्वमासीत, तस्माद् विश्वस्य प्रकृतौ सञ्चरणात् प्राकृतोऽयं महाप्रलय उच्यते। एतच्च प्रकृतिपुरुषयोरवियोगे घटत इति भावः ॥ २५ ॥

कालश्च प्रलये अस्तीति व्यक्तं तस्यानादिनिधनत्व-माह—'अनादि'रिति। अत्र कार्य्यान्यथानुपपत्तिं प्रमाणयति —'अव्युच्छिन्ना' इति। ततः कारणात्, एते सर्गस्थित्यन्त-संयमाः—सर्गः स्थितिश्च तदन्ते संयमश्च, अव्युच्छिन्नाः प्रवाहरूपेणाविरताः ॥ २६ ॥

ततः कारणात् तस्मिन् प्रलये गुणसाम्ये प्रधाने पुरुषे च पृथक् वियुक्ततया व्यवस्थिते सति। तथैव तयोर्धारणार्थं कालाख्यं रूपं वर्त्तते। अन्यथा प्रलयानिर्वाहादिति भावः। नाहो न रात्रिरित्यत्र सूर्य्यादिगत्युपलक्षितः स्थूलः कालो नास्तीत्युक्तम्। अत्र तु यावत्प्रलयं प्रकृतिपुरुषवियोग-धारको विष्णोः स्वरूपभूतः कालो वर्त्तते इत्युच्यते इत्य-विरोधः।

अनेनैव प्रलये प्रकृत्या वियुक्तस्तूष्णीं लीन इव तिष्ठन् सर्गकाले च प्रकृतिमधिष्ठाय सृष्ट्यादिकर्त्ता पुरुष इति पुरुषस्वरूपमपि विवृतं द्रष्टव्यम् ॥ २७ ॥

इदानीं व्यक्तस्वरूपं प्रपञ्चयिष्यन् परमेश्वरात् प्रकृति-पुरुषयोः क्षोभप्रकारमाह—'तत' इति पञ्चभिः। ततः सर्गकाले सम्प्राप्ते, परमेश्वरो हरिः स्वेच्छया प्रधानं पुरुषञ्च प्रविश्य क्षोभयामासेति द्वयोरन्वयः। कथम्भूतो हरिः? तत्राह—'तद्ब्रह्मे'त्यादि। अव्यक्तादिवत्। रूप-विलक्षणः ॥ २८ ॥

कथम्भूतौ प्रधानपुरुषौ व्ययाव्ययौ परिणाम्यपरि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते ।
मनसो नोपकर्त्तृत्वात् तथासौ परमेश्वरः ॥३०॥
स एव क्षोभको ब्रह्मन् क्षोभश्च पुरुषोत्तमः ।
स संकोचविकाशाभ्यां प्रधानत्वेऽपि च स्थितः ॥३१॥
विकाराणुस्वरूपैश्च ब्रह्मरूपादिभिस्तथा ।
व्यक्तस्वरूपश्च तथा विष्णुः सर्व्वेश्वरेश्वरः ॥३२॥
गुणसाम्यात् ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने ।
गुणव्यञ्जनसम्भूतिः सर्गकाले द्विजोत्तम ॥३३॥
प्राधानतत्त्वमुद्भूतं महान्तं तत् समावृणोत् ।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ।
प्रधानतत्त्वेन समं त्वचा बीजमिवावृतम् ॥३४॥
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।
त्रिविधोऽयमहंकारो महत्तत्त्वादजायत ॥३५॥
भूतेन्द्रियाणां हेतुः स त्रिगुणत्वान्महामुने ।
यथा प्रधानेन महान् महता स तथावृतः ॥३६॥
भूतादिस्तु विकुर्वाणः शब्दतन्मात्रिकं ततः ।
ससर्ज्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम् ।
शब्दमात्रं तथाकाशं भूतादिः स समावृणोत् ॥३७॥

णामिनौ (ग), उपादाननिमित्तभूताविति यावत्। प्रलयकाले बियुक्ततयात्मनि तूष्णीं स्थितौ स्वांशभूतौ प्रधानपुरुषौ स्वकालशक्तयोद्बुद्धेच्छाशक्त्या संयोज्य सृष्ट्युन्मुखौ चकारेत्यर्थः ॥ २९ ॥

प्रविश्य क्षोभयामासेत्युक्त्वा प्राप्तं सक्रियत्वं वारयति—'यथे'ति। सन्निधिमात्रेण गन्धो मनसः क्षोभाय जायते, न तु उपकर्त्तृत्वान्न तदनुकूलक्रियाकारित्वात् ॥ ३० ॥

ननु प्रधानादीनामपि स्वरूपाव्यतिरेकात् क्षोभ्यस्यान्यस्य तत्कार्यस्य चाभावात् कथं क्षोभकत्वम् ? तत्राह—'स एवे'ति द्वाभ्याम्। संकोचः साम्यं, विकाशो गुणक्षोभः, ताभ्यामुपलक्षितः। प्रधानत्वेऽपि स एव स्थितः, तदवस्थाद्वयोपेतं प्रधानमपि विष्णुरेवेत्यर्थः ॥ ३१ ॥

विकाराणुस्वरूपैर्महाभूतमहदादिरूपैर्ब्रह्मरूपादिभिर्जीवभेदैरप्युपलक्षितः। व्यक्तस्वरूपश्च समष्टिव्यष्टिदेहात्मकश्च विष्णुरेवेत्यर्थः ॥ ३२ ॥

इदानीं महदादिक्रमेण व्यक्ताख्यप्रपञ्चसृष्टिमाह—'गुणसाम्या'दित्यादि—'बीजं बाह्यदलैरिवे'त्यन्तेन। ततः क्षोभानन्तरम्। तस्माद् गुणसाम्यात्, क्षेत्रज्ञेन पुरुषेणाधिष्ठितात्। गुणानां व्यञ्जनं महत्तत्त्वम्। व्यज्यतेऽनेनेति व्यञ्जनं तस्य सम्भूतिः उद्भवोऽभूत् ॥ ३३ ॥

अत्र च यथा मृदेव पिण्डाद्यवान्तरकार्यावस्थामापाद्यमाना घटादेरुपादानं, दण्डादिकन्तु निमित्तमात्रम्, घटादावनुगमात् विनापि दण्डमनाशित्वाद्वा, तथैवेश्वराधिष्ठितं प्रधानमेव महदाद्यवान्तरकार्य्याण्युपादानतया व्याप्नुवत् चरमकार्य्यस्याप्युपादानमिति दर्शयितं पूर्वकार्य्येणोत्तरोत्तरकार्य्यस्य व्याप्तिमाह—'प्रधानतत्त्व'मित्यादिना। उद्भूतं महान्तं कर्मभूतं तदुपादानभूतं प्रधानतत्त्वं कर्त्तृभूतं समावृणोत् व्याप्नोत्। एतदेव विवृणोति 'सात्विक' इति। सममन्यूनानतिरेकं यथा भवत्येवं त्वचा बीजं यथा आवृतं तथा सात्विकादित्रिधोद्भूतो महान् प्रधानतत्त्वेन समन्तादावृत इत्यर्थः ॥ ३४ ॥

वैकारिकः सात्विकः, तैजसो राजसः, भूतादिस्तामस इति स्वयमेव व्याख्यातम् ॥ ३५ ॥

स च भूतानामिन्द्रियाणाञ्च हेतुः। देवानामप्युपलक्षणम् ॥ ३६ ॥

तामसाहंकारकार्य्यं प्रपञ्चयति 'भूतादि'रिति नवभिः। विकुर्व्वाणः क्षुभ्यन्नित्यर्थः ॥ ३७ ॥

(ग) व्ययाव्ययाविति—व्ययते विकृतिं प्राप्नोति परिणमत इति यावत् यः सः व्ययः, न व्ययते न विकृतिं प्राप्नोति इत्यव्यय इति व्युत्पत्तिभ्यां व्ययाव्ययशब्दौ परिणाम्यपरिणामिनावित्यर्थकौ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आकाशस्तु विकुर्व्वाणः स्पर्शमात्रं ससर्ज्ज ह ।
बलवानभवद् वायुस्तस्य स्पर्शो गुणो मतः ॥३८॥

आकाशं शब्दमात्रन्तु स्पर्शमात्रं समावृणोत् ।
ततो वायुर्व्विकुर्व्वाणो रूपमात्रं ससर्ज्ज ह ॥३९॥

ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते (घ) ।
स्पर्शमात्रन्तु वै वायू रूपमात्रं समावृणोत् ॥४०॥

ज्योतिश्चापि विकुर्व्वाणं रसमात्रं ससर्ज्ज ह ।
सम्भवन्ति ततोऽम्भांसि रसाधाराणि तानि च ।४१।

रसमात्राणि चाम्भांसि रूपमात्रं समावृणोत् ।
विकुर्व्वाणानि चाम्भांसि गन्धमात्रं ससर्ज्जिरे ॥४२॥

संघातो जायते तस्मात् तस्य गन्धो गुणो मतः ।
तस्मिंस्तस्मिंस्तु तन्मात्रा तेन तन्मात्रता स्मृता ॥४३॥

तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते ।
न शान्ता नापि घोरास्ते न मूढ़ाश्चाविशेषणाः ॥४४॥

भूततन्मात्रसर्गोऽयमहंकारात् तु तामसात् ।
तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश ॥४५॥

एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ।
त्वक् चक्षुर्नासिका जिह्वा श्रोत्रमत्र च पञ्चमम् ॥४६॥

शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विज ।
पायूपस्थौ करौ पादौ वाक् च मैत्रेय पञ्चमी ॥४७॥

विसर्गशिल्पगत्युक्तिः कर्म्म (च) तेषाञ्च कथ्यते ।
आकाशवायुतेजांसि सलिलं पृथिवी तथा ॥४८॥

शब्दादिभिर्गुणैर्ब्रह्मन् ! संयुक्तान्युत्तरोत्तरैः (छ) ।
शान्ता घोराश्च मूढ़ाश्च विशेषास्तेन ते स्मृताः ॥४९॥

नानावीर्य्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य (ज) कृत्स्नशः ॥५०॥

समेत्यान्योऽन्यसंयोगं परस्परसमाश्रयाः ।
एकसंघातलक्ष्याश्च सम्प्राप्यैक्यमशेषतः ॥५१॥

पुरुषाधिष्ठितत्वाच्च प्रधानानुग्रहेण च ।
महदाद्या विशेषान्ता (झ) ह्यण्डमुत्पादयन्ति ते ॥५२॥

तत्क्रमेण विवृद्धन्तु जलबुद्बुदवत्समम् ।
भूतेभ्योऽण्डं महाबुद्धे ! बृहत् तदुदकेशयम् (ञ)
प्राकृतं ब्रह्मरूपस्य विष्णोः संस्थानमुत्तमम् (ट) ॥५३॥

अभवत् (ङ), साद्रयो द्वीपाः समुद्राश्च अभवन्नित्यर्थः ॥३८॥

(घ) तत्—ज्योतिः । रूपगुणमिति-रूपं गुणो यस्य तत् रूपगुणमिति व्युत्पत्त्या रूपात्मकगुणयुक्तमित्यर्थः ।

(ङ) अभवदित्यनेन 'लोकसंग्रह' इत्यस्य सम्बन्धः ।

(च) विसर्गशिल्पगतिभिः सहिता उक्तिरिति मध्यपदलोपी समासः । विसर्गः पायूपस्थयोः कर्म, शिल्पं करयोः कर्म, गतिः पादयोः, उक्तिश्च वाचं इति यथाक्रमं कर्माणि वेदितव्यानि ।

(छ) उत्तरोत्तरैः क्रमसिद्धैः शब्दादिभिः शब्दस्पर्शरूपरसगन्धैः। पूर्वार्द्धोक्तानि आकाशादीनि भूतानि संयुक्तानि सम्बद्धानीत्यर्थः । एवञ्च आकाशं शब्दगुणकम्, वायुः स्पर्शगुणकः, तेजो रूपगुणकम्, सलिलं रसगुणकम्, पृथिवी च गन्धगुणेति तत्र तत्र क्रमेण तत्तद्गुणसम्बन्धः सिद्धः ।

(ज) असमागम्येति-असम्भूय अमिलित्वेति यावत् ।

(झ) विशेषान्ता इति—प्रागुक्तविशेषाख्याकाशादिमहाभूतपर्य्यन्ता इत्यर्थः ।

(ञ) तत्—अण्डम् । भूतेभ्य इति । जातमिति शेषः । उदकेशयं सलिलस्थितम् ।

(ट) संस्थीयते अस्मिन्निति व्युत्पत्त्या अधिकरणार्थका—नट्प्रत्ययेन संस्थानमित्यस्य अधिष्ठानक्षेत्रमित्यर्थः । तदेव विवृण्वन्नाह—अव्यक्तेत्यादिना । प्राकृतमिति प्रधानानुग्रहेण समुत्पादितमित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्राव्यक्तस्वरूपोऽसौ व्यक्तरूपी जगत्पतिः ।
विष्णुब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः ॥५४॥
मेरुरुन्नमभूत् तस्य जरायुश्च महीधराः ।
गर्व्भोदकं समुद्राश्च तस्यासन् सुमहात्मनः ॥५५॥
साद्रिद्वीपसमुद्रास्तु सज्योतिर्लोकसंग्रहः ।
तस्मिन्नण्डेऽभवद् विप्र ! सदेवासुरमानुषः ॥५६॥
वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः ।
वृतं दशगुणैरण्डं भूतादिर्महता तथा (ठ) ॥५७॥
अव्यक्तेनावृतो ब्रह्मंस्तैः सर्व्वैः सहितो महान् ।
एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम्
नारिकेलफलस्यान्तर्बीजं बाह्यदलैरिव । ॥ ५८ ॥
जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ।
ब्रह्मा भूत्वास्य जगतो विसृष्टौ सम्प्रवर्त्तते ॥५९॥
सृष्टञ्च पात्यनुयुगं यावत् कल्पविकल्पना ।
सत्त्वभुग् भगवान् विष्णुरप्रमेयपराक्रमः ॥६०॥
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः
मैत्रेयाखिलभूतानि भक्षयत्यतिभीषणः (ड) ॥६१॥
स भक्षयित्वा भूतानि जगत्येकार्णवीकृते ।
नागपर्य्यङ्कशयने शेते च परमेश्वरः । ॥६२॥
प्रबुद्धश्च पुनः सृष्टिं करोति ब्रह्मरूपधृक् ॥६३॥
सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकाम् ।
स संज्ञां याति भगवानेक एव जनार्दनः ॥६४॥
स्रष्टा सृजति चात्मानं विष्णुः पाल्यञ्च पाति च ।
उपसंह्रियते चान्ते संहर्त्ता च स्वयं प्रभुः ॥६५॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
सर्व्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् ॥६६॥

अण्डस्यान्तः स्थितिमुक्त्वा तद्बाह्यस्थितिमाह—'वारी'ति। ततः कटाहरूपपृथिव्यावरणानन्तरं तद्बहिः प्रत्येकं वारिवह्न्यादिभिर्दशगुणमुत्तरैरधिकैरावृतम्। पृथिव्यावरणात् कोटियोजनप्रमाणाद्दशगुणं तोयावरणं, ततो दशगुणं वह्न्यावराणमित्येवं दशगुणोत्तराणि पृथिव्याद्यावरणानि सप्त। प्रकृत्यावरणं त्वष्टममपरिमितम्। "मह्यादिभिश्चावरणैरष्टभिर्वहिरावृतम्" इति शुकोक्तेः। अत एव प्रकृतिं पृथक्कृत्य प्राकृतैः सप्तभिरित्युक्तम् ॥ ५७ । ५८ ॥

तदेवं टह्माण्डं सृष्ट्वा तस्मिन् लीलया प्रविष्टस्य परमेश्वरस्य गुणावतारैरवान्तरसृष्ट्यादिलीलामाह—जुषन्निति यावदध्यायसमाप्तिः। विसृष्टो विविधचराचरादिसृष्टौ सम्प्रवर्त्तते ॥ ५९ ॥

यावत् कल्पविकल्पना ब्रह्मदिनावसानं यावत्। सत्त्वभुक् सत्त्वगुणाधिष्ठितः ॥ ६० ॥

तमोद्रेकीत्यार्षः सन्धिः। तमउद्रेकवानित्यर्थः ॥ ६१ ॥

परमेश्वरः शेते ब्रह्माद्यवतारमूलस्वरूपेण ॥ ६२ ॥

ब्रह्मादिरूपाणि च तद्व्यतिरिक्तानि न भवन्तीत्याह—'सृष्टिस्थित्यन्तकरणा'दिति। करणामिति पाठे सृष्ट्यादि करणं निमित्तं यस्याः सा तां यातीत्यर्थः ॥ ६४ ॥

स्रष्टृ-सृज्यादिभेदश्च न तात्त्विक इत्याह—'स्रष्टे'ति। विष्णुरेव स्रष्टा आत्मानमेव सृजति। पाल्यश्च पालकश्च उपसंहार्य्यश्च संहर्त्ता च स्वयमेव ॥ ६५ ॥

कुत इत्याह—'पृथिवी'ति। यद् यस्मात् पृथिव्याप-इत्यादि सर्वं जगत् पुरुषाख्यं हि पुरुषसंज्ञमेव। "पुरुष एवेदं सर्वम्" इति श्रुतेः ॥ ६६ ॥

(ठ) महतेति—वृत इति लिङ्गविपरिणामेनान्वयः।

(ड) भक्षयति—ग्रसते संहरतीति यावत्! 'यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जग'दिति सप्तशतीस्तोत्रादावपि रुद्रस्य जगद्भक्षणं प्रसिद्धम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स एव सर्व्वभूतेशो विश्वरूपो यतोऽव्ययः ।
सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् ॥६७॥
स एव सृज्यः स च सर्गकर्त्ता
स एव पात्यत्ति च पाल्यते च ।
ब्रह्माद्यवस्थाभिरशेषमूर्त्ति-
र्विष्णुर्वरिष्ठो वरदो वरेण्यः ॥६८॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे द्वितीयोऽध्यायः ।

ननु कथं स एव सर्गादिकर्त्तेत्युच्यते, पित्रादीनां कर्तृपालकादीनां प्रतीयमानत्वात् ? तत्राह—'स एवे'ति । यतः स हरिरेव सर्वभूतानामीशः प्रवर्त्तको विश्वरूपश्च, ततो हेतोर्भूतस्थं पितृपुत्रादिषु स्थितं सर्गादिकं यस्य हरेरेवोपकारकम्, तत्प्रयुक्तैस्तद्विभूतेरेव विस्तारात् । यथा ऋत्विग्भिः कृतं यजमानस्यैवोपकारकं तत्प्रत्युक्तैस्तद्विभूतेरेव विस्तारात् तद्वदित्यर्थः ॥ ६७ ॥

उक्तं स्रष्टृसृज्याद्यैक्यमुपसंहरन् विवक्षितमर्थमाह—स एवेति । अत्ति चेति चकारादद्यते च । ब्रह्माद्यवस्थाभिः सर्गादिकर्त्ता अशेषमूर्तिः सृष्ट्यादिरूपः । अतो विष्णुरेव वरिष्ठः महत्तमः श्रेष्ठः परमार्थ इति यावत्, वरदश्च, वरेण्यो वरणीयः, परमानन्दरूपत्वात् ॥ ६८ ॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे द्वितीयोऽध्यायः ।

पाठान्तराणि :—(४३)—तन्मात्रं—। (४४)—मूढाश्चाविशेषिणः । (५३) मेरुत्वमभूत्—। (६७)—सर्वभूतात्मा—।

तृतीयोऽध्यायः

[ब्रह्मणः सर्गजनिकायाः शक्तेर्विवरणम्, तस्यायुर्निरूपणञ्च]

मैत्रेय उवाच ।

निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्त्तृत्वं ब्रह्मणोऽभ्युपगम्यते ॥१॥

पराशर उवाच ।

शक्तयः सर्व्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥२॥

तृतीयोऽध्यायः

तदेवं ब्रह्मणः सृष्ट्यादिकर्त्तृत्वमुक्तम्, तत्र शङ्कते—'निर्गुणस्ये'ति—सत्त्वादिगुणरहितस्य । अप्रमेयस्य—देशकालाद्यनवच्छिन्नस्य । शुद्धस्य अदेहस्य सहकारशून्यस्येति वा । एवं अमलात्मनः-पुण्यपापसंस्कारशून्यस्य रागादिशून्यस्येति वा । एवम्भूतस्य ब्रह्मणः कथं सर्गादिकर्त्तृत्वमिष्यते, एतद्विलक्षणस्यैव लोके घटादिषु कर्त्तृत्वादिदर्शनादित्यर्थः ॥ १ ॥

परिहरति—'शक्तय' इति सार्द्धेन । लोके हि सर्वेषां भावानां मणिमन्त्रादीनां शक्तयः अचिन्त्यज्ञानगोचराः,—अचिन्त्यं तर्कासहं यज्ज्ञानं कार्य्यान्यथानुपपत्तिप्रमाणकं, तस्य गोचराः सन्ति । यद्वा—अचिन्त्या-भिन्नाभिन्नत्वादिविकल्पैश्चिन्तयितुमशक्याः, केवलमर्थापत्तिज्ञानगोचराः सन्ति । यत एवम्, अतो ब्रह्मणोऽपि तास्तथाविधाः सर्गाद्याः सर्गादिहेतुभूता भावशक्तयः स्वभावसिद्धाः शक्तयः सन्त्येव,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता ।
तन्निबोध यथा सर्गे भगवान् सम्प्रवर्त्तते ॥३॥
नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः ।
उत्पन्नः प्रोच्यते विद्वन् नित्य एवोपचारतः ॥४॥
निजेन तस्य मानेन ह्यायुर्व्वर्षशतं स्मृतम् ।
तत्पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥५॥
कालस्वरूपं विष्णोश्च यन्मयोक्तं तवानघ ।
तेन तस्य निबोध त्वं परिमाणोपपादनम् ॥६॥
अन्येषाञ्चैव जन्तूनां चराणामचराश्च ये ।
भू-भूभृत्सागरादीनामशेषाणाञ्च सत्तम ॥७॥
काष्ठा पंचदशख्याता निमेषा मुनिसत्तम ।
काष्ठास्त्रिंशत्कला तास्तु त्रिंशन्मौहूर्त्तिको विधिः ।८।
तावत्संख्यैरहोरात्रं मुहूर्त्तैर्मानुषं स्मृतम् ।
अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः ॥९॥

पावकस्य दाहकत्वादिशक्तिवत्। अतो गुणादिहीनस्याप्यचिन्त्यशक्तिमत्त्वाद् ब्रह्मणः सर्गादिकर्त्तृत्वं घटत इत्यर्थः। श्रुतिश्च "न तस्य कार्य्यं करणञ्च विद्यते, न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च' ॥ "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" इत्यादिः। यद्वा एवं योजना,—सर्वेषां भावानां पावकस्योष्णताशक्तिवदचिन्त्यज्ञानगोचराः शक्तयः सन्त्येव। ब्रह्मणः पुनस्ताः स्वभावभूताः स्वरूपादभिन्नाः शक्तयः, "परास्य शक्तिर्विविधैव श्रूयते" इत्यादिश्रुतेः। अतो मणिमन्त्रादिभिरग्न्यौष्ण्यवन्न केनचिद् विहन्तुं शक्यते, अत एव तस्य निरङ्कुशमैश्वर्य्यम् (क)। तथा च श्रुतिः—"स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति"रित्यादिः। 'तपतां श्रेष्ठ' इति सम्बोधयन् या कापि तपःशक्तिः स्वयं वेद्येति सूचयति। यत एवम्, अतो ब्रह्मणो हेतोः सर्गाद्या भवन्ति, नात्र काचिदनुपपत्तिरित्यर्थः ॥ २ ॥

तदेवं ब्रह्मणः सर्गादिकर्त्तृत्वमुपपाद्य प्रस्तुतं ब्राह्मं सर्गमनुवर्त्तयितुमाह—'तन्निबोधे'ति ॥ ३ ॥

ननु नारायणाख्य एव चेद् ब्रह्मा कथं, तर्हि "हिरण्यगर्भः समवर्त्तताग्रे" इत्यादिश्रुतिभिस्तस्योत्पत्तिरुच्यते ? तत्राह—'उत्पन्न' इति। उपचारतः—स्वेच्छयाविर्भावस्याप्युत्पत्तिसादृश्यात् ॥ ४ ॥

औपचारिकमेव तस्यायुर्मानमाह,—निजेन स्वकीयेन वक्ष्माणेन (ख), वर्षशतं तस्यायुः स्मृतम्। तदायुः परार्ख्यं सर्वातिशायित्वात् ॥ ५ ॥

तेन—कालेन, तस्य—ब्रह्मणः, अन्येषाञ्च परिमाणस्य जीवनकालस्य उपपादनं सम्पादनं, निबोध। पाठान्तरे (ग) परिणामस्य अवसानस्य उपपादनमित्यर्थः। अचराश्च ये तेषामपीति शेषः ॥ ६ ॥

तदेव निमेषादिक्रमेण निरूपयति—काष्ठेत्यादिना। अक्षिपक्षनिक्षेपोपलक्षितः कालो निमेषः। पञ्चदश निमेषाः एका काष्ठोक्ता, त्रिंशत् काष्ठा एका कला। त्रिंशत कलाः एका घटिका। ते द्वे मौहूर्तिको विधिः मुहूर्त्तमानप्रकारः ॥ ७ ॥

तावत्संख्यैः त्रिंशत्संख्यकैर्मूहूर्त्तैस्तावन्ति त्रिंशदहोरात्राणीति लौकिकः सावनो मास उक्तः। पक्षद्वयात्मक इति-चान्द्रो मासः, "दशविधं मासमुशन्ति चान्द्रम्" इति स्मृतेः ॥ ८ ॥

सौरैर्मासैरयनप्रकारमाह—तैरिति। तच्छब्देन चान्द्रैरदूरविप्रकर्षात् सौरा मासा लक्ष्यन्ते। सूर्य्यस्य मेषाद्येकैकराशियोगः सौरो मासः। तैः षड्भिरयनम्। द्वेऽयने इत्यर्षः सन्धिः। अतः परं दिव्यमानमाह—अयनमित्यादिना। दक्षिणमयनं देवानां रात्रिः, उत्तरमयनं दिनम्। एवम्भूतैः षष्ट्युत्तरत्रिंशताहोरात्रैर्देवानां वर्षमिति द्रष्टव्यम् ॥ ९-१० ॥

(क) निरङ्कुशम्—प्रतिबन्धकशून्यम्।

(ख) वक्ष्यमाणेन—अत्रैव तृतीयाध्याये उत्तरत्र चतुर्विंशश्लोके कथयिष्यमाणेनेत्यर्थः।

(ग) 'परिणामोपपादनम्' इति पाठान्तरम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तैः षड्भिरयनं वर्षं द्वे ऽयने दक्षिणोत्तरे ।
अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम् ॥१०॥
दिव्यैर्व्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् (घ) ।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे ॥११॥
चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः ॥१२॥
तत्प्रमाणैः शतैः सन्ध्या पूर्व्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि सः ॥१३॥
सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञितः ॥१४॥
कृतं त्रेता द्वापरञ्च कलिश्चैव चतुर्युगम् ।
प्रोच्यते तत्सहस्रञ्च ब्रह्मणो दिवसं मुने ॥१५॥
ब्रह्मणो दिवसे ब्रह्मन् ! मनवश्च चतुर्दश ।
भवन्ति परिमाणञ्च तेषां कालकृतं शृणु ॥१६॥
सप्तर्षयः सुराः शक्रो मनुस्तत्सूनवो नृपाः ।
एककाले हि सृज्यन्ते संह्रियन्ते च पूर्व्ववत् ॥१७॥
चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः (ङ) ।
मन्वन्तरं मनोः कालः सुरादीनाञ्च सत्तम ॥१८॥
अष्टौ शतसहस्राणि दिव्यया संख्यया गतिः ।
द्वापञ्चाशत् तथान्यानि सहस्राण्यधिकानि च ।१९।

तैर्वर्षैश्चतुर्युगमानमाह—दिव्यैरिति । 'दिव्यै'र्द्वादशभिर्वर्षसहस्रैश्चतुर्युगमित्यन्वयः ॥ ११ ॥

यथाक्रमं कृतयुगे चत्वारि सहस्राणि, त्रेतायां त्रीणि, द्वापरे द्वे सहस्रे, कलावेकसहस्रमिति ॥ १२ ॥

तत्प्रमाणैः—तेषां सहस्राणां यत् प्रमाणं चत्वारि त्रीणि द्वे चैकमित्युक्तम् । तत्प्रमाणैस्तत्संख्यैः शतैः परिमिता युगस्य पूर्व्वभोगिनी सन्ध्योच्यते । तावानेव युगानन्तरवाची सन्ध्यांशः । एतच्च युगधर्मव्यवस्थायामुक्तम् । तथा च शुकः—"सन्ध्यांशयोरन्तरेण यः कालः शतसंख्यकः । तमेवाहुर्युगं तज्ज्ञा यत्र धर्म्मो विधीयते" इति ॥ १३ ॥

तदेवं युगानां दशसहस्राणि वर्षाणि तत्पूर्वोत्तरभाविनाञ्च सन्ध्यासन्ध्यांशकानां शतैः द्वे सहस्रे, एवं द्वादशभिर्वर्षसहस्रैश्चतुर्युगमिति सिद्धम् ॥ १४ ॥

मन्वन्तरमानं वक्तुमाह—'ब्रह्मण' इति ॥ १६ ॥

ततसूनव एव नृपाः । एककाले हि सृज्यन्ते —अधिकारिणः क्रियन्ते, संह्रियन्ते निरधिकाराः क्रियन्ते इत्यर्थः ॥ १७ ॥

(घ) कृत-त्रेतादिसंज्ञितम् सत्यत्रेतादिसंज्ञया समाख्यातम् । आदिशब्देन बहुव्रीहिना कलिद्वापरयोरपि लाभात् सत्य-त्रेता-द्वापर-कलिसंज्ञाभिः समाख्यातमित्यर्थः ।

साधिकेत्यत्र श्लोकाः—"द्विचत्वारिंशता युक्तशतेनाभ्यधिकास्तथा । दिव्याब्दाः पञ्चसाहस्रा मासा दशदिनाष्टकम् । चतुर्यामा मुहूर्त्तौ द्वावष्टावपि कलास्तथा । काष्ठा सप्तदश द्वौ च निमेषौ तदनन्तरम् । देवस्यैकनिमेषस्य सप्तमो भाग इष्यते । मानुषाब्दास्तु लक्षाणि सार्द्धाष्टादश तत्परम् । सहस्रमष्टाविंशत्या युता चाब्दचतुःशती । चतुर्विंशत्यहोरात्रयुता मासाश्च षट् तथा । नाड्यो द्वादश तावत्यः कालाश्च तदनन्तरम् । पञ्चविंशतिकाष्ठाश्च निमेषा दश साधिकाः" इति चतुर्युगसहस्रप्रमाणस्य ब्रह्मदिनस्य चतुर्दशधा विभागे प्रतिभागमेकसप्ततिश्चतुर्युगानि भवन्ति । अवशिष्यते चतुर्युगषट्कान्तरस्य चतुर्दशांशो यथागणितः प्रतिमन्वन्तरमेकसप्ततेरधिक इत्यर्थः । सुरादीनाञ्च सप्तर्षयः सुराः शक्र इति पूर्वोक्तानाम् मन्वन्तराधिकारिणाम् ॥ १७ ॥

तमेव मन्वन्तरकालं दिव्याब्दैर्गणयति—'अष्टा'-वितिं ॥१९॥

तमेव मानुषाब्दैर्गणयति—'त्रिंशत् कोट्य' इति द्वाभ्याम् । नियुतानि लक्षाणि पूर्वोक्तमधिकं कालं विना ॥२०–२१॥

(ङ) साधिका इति अधिकेन सह वर्त्तमाना इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिंशत्कोट्यस्तु सम्पूर्णाः संख्याताः संख्यया द्विज ।
सप्तषष्टिस्तथान्यानि नियुतानि महामुने ॥२०॥

विंशतिश्च सहस्राणि कालोऽयमधिकं विना ।
मन्वन्तरस्य संख्येयं मानुषैर्व्वत्सरैर्द्विज ॥२१॥

चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतम् ।
ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसञ्चरः ॥२२॥

तदा हि दह्यते सर्व्वं त्रैलोक्यं भूर्भुवादिकम् ।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः (च) ।२३।

एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः ॥२४॥

जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः (छ) ।
तत्प्रमाणां हि तां रात्रिं तदन्ते (ज) सृज्यते पुनः ।२५

एवन्तु ब्रह्मणो वर्षमेवं वर्षशतं च यत् ।
शतं हि तस्य वर्षाणां परमायुर्महात्मनः ॥२६॥

एकमस्य व्यतीतन्तु परार्द्धं ब्रह्मणोऽनघ ।
तस्यान्तेऽभून्महाकल्पः पाद्म इत्यभिधीयते ॥२७॥

द्वितीयस्य परार्द्धस्य वर्त्तमानस्य वै द्विज ।
वाराह इति कल्पोऽयं प्रथमः परिकीर्त्तितः ॥२८॥

इति श्रीविष्णुपुराणे प्रथमेंऽशे तृतीयः अध्यायः ।

ब्राह्म्यो नैमित्तिकः ब्रह्मनिद्रानिमित्तः, प्रतिसञ्चरः प्रलयः ॥ २२ ॥ भूर्भुवादिकमित्यार्षः सन्धिः ॥ २३ ॥

भोगी शेषः, स एव शय्या, तद्गतः सन् शेते । त्रैलोक्यज्ञानबृंहित इति पाठे त्रैलोक्यज्ञानमयैर्जीवैरुपबृंहितः । त्रैलोक्यग्रासबृंहित इति पाठे प्रपञ्चग्रासेन समृद्ध-ब्रह्मानन्द इत्यर्थः ॥ २४ ॥

जनस्थैश्चिन्त्यमानः । महर्लोकस्थानामपि तदा तत्रैव गतत्वात् । तत्प्रमाणां ब्रह्माहःपरिमितां तां रात्रिं नैरन्तर्य्येण शेते ॥ २५ ॥

एवं त्विति । एवम्भूतैरहोरात्रैः पक्षमासादिकल्पनया वर्षम् ॥ २६ ॥

महाकल्प इति—अवान्तरकल्प एव पुष्करप्रादुर्भावादिगुणैर्महत्त्वान्महाकल्प इत्युच्यते ॥ २७ ॥

(च) जनं प्रयान्ति—जनलोकं गच्छन्ति ।

(घ) अब्जसम्भव इति—अब्जात् पद्मात् सम्भवो यस्येति व्युत्पत्त्या पद्मयोनिः ब्रह्मेत्यर्थः । 'अगर्ह्यो व्यधिकरण बहुव्रीहिर्जन्माद्युत्तरपदे' इत्यनुशासनात् साधुः ।

(ङ) तदन्ते—तत्प्रमाणाया रात्रेरवसाने । सृज्यते तेन जगदिति शेषः ।

(छ) जनस्थैः जनलोकवर्त्तिभिरित्यर्थः ।

(ज) तदन्त इति—तस्याः तत्प्रमाणाया रात्रेरन्ते ।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे तृतीयोऽध्यायः ॥

पाठान्तराणि :—(४)—नित्यमेवोपचारतः । (१५)—द्वापरश्च— । (१८)—संख्यया स्मृतम् । (२७)—इत्यभिविश्रुतः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थोऽध्यायः

[कल्पान्ते सर्गवर्णनम् ।]

मैत्रेय उवाच ।

ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान् यथा ।
ससर्ज्ज सर्व्वभूतानि तदाचक्ष्व महामुने ॥१॥

पराशर उवाच ।

प्रजाः ससर्ज्ज भगवान् ब्रह्मा नारायणात्मकः ।
प्रजापतिपतिर्देवो यथा तन्मे निशामय ॥२॥
अतीतकल्पावसाने निशासुप्तोत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ॥३॥
नारायणः परोऽचिन्त्यः परेषामपि स प्रभुः ।
ब्रह्मस्वरूपी भगवाननादिः सर्व्वसम्भवः ॥४॥
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।
ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् (क) ॥५॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं (घ) तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ॥६॥
तोयान्तः स महीं ज्ञात्वा जगत्येकार्णवे प्रभुः ।
अनुमानात् तदुद्धारं कर्त्तुकामः प्रजापतिः ॥७॥
अकरोत् स तनूमन्यां कल्पादिषु यथा पुरा ।
मत्स्यकूर्म्मादिकां तद्वद् वाराहं वपुरास्थितः ॥८॥
वेदयज्ञमयं रूपमशेषजगतः स्थितौ
स्थितः स्थिरात्मा सर्व्वात्मा परमात्मा
प्रजापतिः ॥९॥
जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः ।
प्रविवेश तदा तोयमात्माधारो धराधरः ॥१०॥

चतुर्थोऽध्यायः

पूर्वोपक्षिप्तमेव ब्राह्मसर्गं प्रसङ्गान्तरितं श्रोतुकामो मैत्रयः पृच्छति—'ब्रह्मे'ति ॥ १ । २ ॥

प्रतिज्ञातं प्रजासर्गं निरूपयिष्यन् प्रथमं तदाधारभूताया भूमेरुद्धारं वक्तुमाह—'अतीतकल्पे'त्यादिना । निशायां सुप्तं प्रस्वापः, तस्मादुत्थितः (ख) । अत एव तदा सत्त्वोद्रिक्तः । दृश्यते हि निद्रावसाने प्रबुद्धानाम् प्रसन्नकरणत्वलक्षणः सत्त्वातिशयः ॥ ३ ॥

सर्वसम्भवः (ग) विश्वस्रष्टा ॥ ४ ॥

ब्रह्मणो नारायणसंज्ञां व्युत्पादयति—'इमञ्चे'ति । ब्रह्मस्वरूपिणं नारायणं प्रति ब्रह्मस्वरूपो नारायण एवेत्यस्मिन्नर्थे ॥ ५ ॥

"नरतीति नरः प्रोक्तः परमात्मा सनातनः ।" इति वचनात् नरः पुरुषोत्तमस्तस्माज्जाता नाराः । तदुक्तम्—"तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान् । तेन नारायणो नाम यदापः पुरुषोद्भवाः" ॥ इति ॥ ॥ ६ ॥

ततः किमत आह—'तोयान्त'रिति पादोनद्वाभ्याम् । तोयस्योपरि पुष्करपर्णं दृष्ट्वा तदधिष्ठानानुमानात् तोयस्यान्तर्महीं ज्ञात्वा तदुद्धारं कर्त्तुमिच्छन् नारायणोऽन्यां तनुं तदुद्धारयोग्यामकरोदित्यन्वयः ॥ ७ ॥

(क) प्रभवाप्ययमित्यत्र प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानम् स चासावप्ययश्चेति कर्मधारयः । अप्ययो विनाशः, कारणे कार्य्योपचारादयं प्रयोगः । प्रभवनं प्रभवः उत्पत्तिः अप्ययो विनाशः, तयोरुभयोरेव वा औपचारिकोऽत्र प्रयोगः ।

(ख) अथवा निशायां निरुक्तपरिमाणायां रात्रौ निशां निरुक्तपरिमाणां रात्रिं व्याप्य वा सुप्तः अनन्तरं उत्थितः इतिः स्नातानुलिप्तकृष्टमदीकृत इत्यादिवत् कर्मधारयः ।

(ग) सर्वसम्भव इत्यत्र सर्वेषां सम्भव उत्पत्तिर्यस्मादिति व्यधिकरणबहुव्रीहिः पूर्ववदेव शिष्टसम्मतः ।

(घ) अयनम् आश्रयः । तस्य पुरुषोत्तमस्य । ताः स्वसृष्टा आपः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरीक्ष्य तं तदा देवी पातालतलमागतम् ।
तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा ॥११॥

पृथिव्युवाच ।

नमस्ते सर्व्वभूताय तुभ्यं शङ्खगदाधर ।
मामुद्धरास्मादद्य त्वं त्वत्तोऽहं पूर्व्वमुत्थिता ॥१२॥

त्वत्तोऽहमुद्धृता पूर्व्वं त्वन्मायाहं (ङ) जनार्दन ।
तथान्यानि च भूतानि गगनादीन्यशेषतः ॥१३॥

नमस्ते परमात्मात्मन् पुरुषात्मन् नमोऽस्तु ते ।
प्रधानव्यक्तभूताय कालभूताय ते नमः ॥१४॥

त्वं कर्त्ता सर्व्वभूतानां त्वं पाता त्वं विनाशकृत् ।
सर्गादिषु प्रभो ब्रह्मविष्णुरुद्रात्मरूपधृक् ॥१५॥

सम्भक्षियित्वा (च) सकलं जगत्येकार्णवीकृते ।
शेषे त्वमेव गोविन्द चिन्त्यमानो मनीषिभिः ॥१६॥

भवतो यत् परं तत्त्वं तन्न जानाति कश्चन ।
अवतारेषु यद्रूपं तदर्च्चन्ति दिवौकसः ॥१७॥

त्वामाराध्य परं ब्रह्म याता मुक्तिं मुमुक्षवः ।
वासुदेवमनाराध्य को मोक्षं समवाप्स्यति (१) ॥१८॥

यत् किंचिन्मनसा ग्राह्यं यदग्राह्यं चक्षुरादिभिः ।
बुद्ध्या च यत् परिच्छेद्यं तद्रूपमखिलं तव ॥१९॥

पुरा यथा मत्स्यकूर्म्मादिकां तनुं कल्पादिषु तत्तत्कार्यार्थमकरोत् तद्वत् । तथा च श्रुतिः—"सोऽपश्यत् पुष्करपर्णे तिष्ठन्, सोऽमन्यत अस्ति चैतत् यस्मिन्निदमधितिष्ठति" इति । "स च वाराहं रूपं कृत्वा उपन्यमज्जत् । स पृथिवीमप आर्च्छद्" । इत्यादि । तदा च वाराहं वपुरास्थितः सन् तोयं प्रविवेश इत्युत्तरेणान्वयः ॥ ८ ॥

वेदयज्ञमयरूपमास्थितः, यतोऽशेषजगतः स्थितौ स्थितः वेदयज्ञाधीनत्वाज्जगत्स्थितेः ॥ ९ । १० ॥

तदा वसुन्धरा तदधिष्ठात्री देवी तं तुष्टाव ॥ ११ ॥

अस्मात् पातालतलात्, मामुद्धर त्वत्तो हेतोरहमुत्थिता उत्पन्ना उद्धृता उद्गता वा ॥ १२ ॥

उपादानकारणमपि मम च गगनादीनाञ्च त्वमेवेत्याह—'त्वन्मये'ति—त्वन्मयी ॥ १३ ॥

उपादाननिमित्तत्वादिकं साधयन्ती परब्रह्मस्वरूपेण पूर्वोक्तपुरुषादिचतूरूपेण प्रणमति—'नमस्त' इति ॥ १४ ॥

ब्रह्मादिरूपेण सृष्ट्यादिकर्त्ता च त्वमेवेत्याह—'त्व'मिति । पाता—पालकः ॥ १५ ॥

शेषे—शयनं करोषि ॥ १६ ॥

दिवौकसोऽपि (छ) ॥ १७ ॥

मुमुक्षूणामपि तदेव भजनीयमित्याह—'त्वा'मिति । परं ब्रह्ममूर्त्तिं त्वामेवाराध्य मुक्तिं प्राप्ताः ॥ १८ ॥

मनसा ग्राह्यं संकल्प्यम् । बुद्धया च यत् परिच्छेद्यमध्यवसेयम् ॥ १९ ॥

(ङ) त्वन्मयीत्येवमीप्प्रत्ययेन वक्तव्ये त्वन्मयेत्याप्प्रत्ययेन निर्देश आर्षत्वात् सोढव्यः । त्वन्मयेत्यस्य त्वन्मयीत्यर्थविवरणात् त्वन्मयेत्यस्य आर्षत्वमाक्षिप्तम् । मयट्प्रत्ययस्य टानुबन्धत्वेन नदाद्यन्तर्गतत्वात् तदुत्तरं स्त्रियामीप एवानुशासनसिद्धत्वात् ।

(च) उपसर्गादिना समस्तस्य धातोः क्त्वाचः ल्यप्प्रत्ययानुशासनात् संभक्षयित्वेति क्त्वाचा प्रयोग आर्षतयाननुयोज्यः ।

(१) अतएव 'मुक्तिमिच्छेज्जनार्दना' दिति विधिं शास्त्रकाराः समुपदिशन्ति ।

(छ) दिवौकसोऽपि देवताअपि, का कथा अन्येषामिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वन्मयाऽहं (ज) त्वदाधारा त्वत्सृष्टा त्वामुपाश्रिता ।
माधवीमिति लोकोऽयमभिधत्ते ततो हि माम् ॥२०॥
जयाखिलज्ञानमय जय स्थूलमयाव्यय ।
जयानन्त जयाव्यक्त जय व्यक्तमय प्रभो ॥२१॥
परापरात्मन् विश्वात्मन् जय यज्ञपतेऽनघ ।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारस्त्वमग्नयः ॥२२॥
त्वं वेदास्त्वं तदङ्गानि त्वं यज्ञपुरुषो हरे ।
सूर्य्यादयो ग्रहास्तारा नक्षत्राण्यखिलं जगत् ॥२३॥
मूर्त्तामूर्त्तमदृश्यञ्च (ञ) कठिनं पुरुषोत्तम ।
यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वर ।
तत्सर्व्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः ॥२४॥

पराशर उवाच ।

एवं संस्तूयमानस्तु पृथिव्या पृथिवीधरः ।
सामस्वरध्वनिः श्रीमान् जगर्ज्ज परिघर्घरम् ॥२५॥
ततः समुत्क्षिप्य धरां स्वदंष्ट्रया
महावराहः स्फुटपद्मलोचनः ।
रसातलादुत्पलपत्रसन्निभः
समुत्थितो नील इवाचलो महान् ॥२६॥
उत्तिष्ठता तेन मुखानिलाहतं
तत्सम्भवाम्भो जनलोकसंश्रयान् ।
प्रक्षालयामास हि तान् महाद्युतीन्
सनन्दनादीनपकल्मषान् मुनीन् ॥२७॥
प्रयान्ति तोयानि क्षुराग्रविक्षते
रसातलेऽधः कृतशब्दसन्तति ।
श्वासानिलास्ताः परतः प्रयान्ति
सिद्धा जने ये नियतं वसन्ति ॥२८॥

मम तु त्वदीयत्वं लोकप्रसिद्धमेवेत्याह—'त्वन्मये'ति । त्वत्समाश्रया त्वच्छरणा इत्येतैर्हेतुभिस्तत आरभ्य मामयं लोको माधवीं (झ) त्वदीयामभिधत्ते ॥ २० । २१ ॥

परापरं कारणं कार्य्यञ्च, उच्चनीचं वा, तदात्मन् तद्रूप, यज्ञपते यज्ञफलद, वषट्कारः वषड् इति मन्त्रः तद्वाच्यो वा ॥ २२ ॥

यज्ञपुरुषो यज्ञमूर्त्तिर्यज्ञाराध्यो वा । तारा अश्विन्याद्याः, अन्यानि नक्षत्राणि, विपरीतं वा (ट), उभयथापि प्रयोगदर्शनात् ॥ २३ ॥

मूर्त्तम्—असर्वगतं द्रव्यं, कठिनं वा । अदृश्यम्—अप्रत्यक्षम् । भूयो भूय इत्यादरार्थम् ॥ २४ ॥

सामस्वर एव ध्वनिर्यस्य स इदानीं वाराहं रूपमनुकृत्य परिघर्घरं तज्जात्यनुकृत्या जगर्ज्ज व्यनदत् ॥ २५ ॥

समुत्क्षिप्य—उद्धृत्य । स्फुटे विकसिते पद्मे इव लोचने यस्य सः । उत्पलपत्रसन्निभः स्निग्धश्यामः ॥ २६ ॥

निष्कल्मषानपि तान् मुनीन् प्रकर्षेण क्षालयामास—अतिनिर्मलानकरोत् । पाठान्तरेऽप्येवमेवार्थः ॥ २७ ॥

वराहस्य खुराग्रेण विक्षते विदीर्णे रसातले सति, तेन द्वारेणाधस्तात् तोयानि प्रयान्ति । कथं ? कृतशब्दसन्तति—

(ज) अत्रापि पूर्ववत् स्त्रियामाप्प्रत्यय आर्षः ।

(झ) माधवीमिति इत्यत्र अव्ययोगे माधवीशब्दात् प्रथमायां विभक्तौ प्राप्तायां द्वितीयाप्रयोग आर्षः । अथवा इधातोर्गमनार्थस्य भावे क्तप्रत्ययेन इतं गमनं गत्यर्थधातोर्ज्ञानार्थकत्वस्यापि सिद्धेर्ज्ञानमिति यावत् तद् विद्यते यस्य स इती ज्ञानी अयं लोकः मां माधवीम् अभिधत्ते इत्यन्वयः । माधवीमिति माधवस्य नारायणस्येयमिति व्युत्पत्त्या ष्णप्रत्ययान्तान् माधवशब्दात् स्त्रियामीप् प्रत्ययेन माधवीशब्दसिद्धेर्माधवसम्बन्धिनीमित्यर्थः ।

(ञ) मूर्त्तामूर्त्तमित्यत्र समाहारद्वन्द्वः, तेन मूर्त्तञ्च अमूर्त्तञ्चेत्यर्थः ।

(ट) विपरीतं वेति—नक्षत्राणि अश्विन्यादीनि, तदन्याश्च तारा इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उतिष्ठतस्तस्य जलार्द्रकुक्षे—
महावराहस्य महीं विधार्य्य ।
विधुन्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयो जुषन्ति (त) ॥२९॥
तं तुष्टुवुस्तापपरीतचेतसो
लोके जने ये निवसन्ति योगिनः ।
सनन्दनाद्या नतिनम्रकन्धरा
धराधरं धीरतरोद्धतेक्षणम् ॥३०॥
जयेश्वराणां परमेश केशव
प्रभो गदाशंखधरासि चक्रधृक् ।
प्रसूति (ठ) नाशस्थिहेतुरीश्वर—
स्त्वमेव नान्यत् परमञ्च यत् परम् ॥३१॥
पादेषु वेदास्तव यूपदंष्ट्र
दन्तेषु यज्ञाश्चितयश्च वक्त्रे
हुताशजिह्वोऽसि तनूरुहाणि
दर्भाः प्रभो यज्ञपुमांस्त्वमेव ॥३२॥
विलोचने रात्र्यहनी महात्मन्
सर्व्वाश्रयं (ड) ब्रह्मपदं शिरस्ते ।
सूक्तान्यशेषाणि सटाकलापो
घ्राणं समस्तानि हवींषि देव ॥३३॥
स्रुक्तुण्ड सामस्वरधीरनाद
प्राग्वंशकायाखिलसत्रसन्धे ।
पूर्तेष्टधर्म्मश्रवणोऽसि देव
सनातनात्मन् भगवन् प्रसीद ॥३४॥

सनिर्घोषं यथा भवति तथा, सप्तम्यन्तपाठे कृता शब्दसन्ततिर्यस्मिन् रसातले तस्मिन्नधः प्रयान्तीत्यर्थः । श्वासानिलेन अस्ताः क्षिप्ताः । जने जनलोके ॥ २८ ॥

'विगृह्ये'ति पाठे (ण) विशेषेण गृहीत्वा । रोमान्तरस्था मुनय इति जनलोकं यावद् रोमप्रसरणादिति भावः ॥२९॥

तोषेण परीतं व्याप्तं चेतो येषां ते । तारतरः अत्युच्चः स चासावुद्धतेक्षणश्च उन्नतदृष्टिः तम् । धीरतरोद्धतेक्षणमिति पाठे निर्विशङ्कोदारेक्षणमित्यर्थः ॥ ३० ॥

ईश्वराणां ब्रह्मादीनां परमेश ! अतो जगतः प्रसूत्यादीनां त्वमेव हेतुः, ईश्वरश्च नियन्ता । यच्च परमं पदं तदपि त्वत्तो नान्यत् । त्वमेव परं ब्रह्मेत्यर्थः । पाठान्तरं सुगमम् ॥३१॥

परमत्वेन स्तुत्वा प्रस्तुतावताररूपं यज्ञरूपकेण स्तुवन्ति—

'पादेष्वि'ति त्रिभिः । यज्ञपुमांस्त्वमेवेति प्रतिज्ञा । तत्सम्पादनं पादेष्वित्यादिभिः । चतुःसंख्यत्वाद् यज्ञाङ्गत्वाच्च वेदा यज्ञमयस्य तस्य पादत्वेन रूप्यन्ते । यूपा उन्नतत्वाद् दंष्ट्रा यस्य, हे यूपदंष्ट्र । दन्तेषु यज्ञाः पुरोडाशादिभक्षणार्थत्वाद् दन्तत्वेन रूप्यन्ते । चितयः "श्येनचितं चिन्वीत कङ्कचितं चिन्वीत" इत्यादिश्रुत्युक्तान्यग्निस्थलानि ताश्चितयो वक्त्रस्थानीया हविर्निक्षेपस्थानत्वात् । एवं सर्वत्र किञ्चित् साम्यमूहनीयम् । हुताशोऽग्निर्ज्जिह्वा यस्य सः । दर्भास्तव तनुरुहाणि रोमाणि ॥ ३२ ॥

रात्र्यहनी तमःप्रकाशधर्म्मके यज्ञकालात्मके तव विलोचने, निमेषोन्मेषाभ्यां तयोरपि तमःप्रकाशधर्म्मकत्वात् । परं ब्रह्म तव शिरः उत्तमाङ्गम् । सूक्तानि वैष्णवादीनि । सटाकलापः—स्कन्धकेशरसन्दर्भः ऋकसन्दर्भरूपत्वात् सूक्तानाम् । हवींषि घ्राणेन्द्रियं गन्धवत्त्वसाम्यात् (थ) ॥ ३३ ॥

(ठ) प्रसूतिः सृष्टिः ।

(ड) सर्वाश्रयमिति सर्वं आश्रयो यस्य तत् । ब्रह्मणः सर्वगतत्वात् शिरसोऽपि सर्वावयवोपरि वर्त्तमानत्वात् तथात्वमुपपन्नम् ।

(ण) विगृह्येति पाठे एकोनत्रिंशश्लोके 'विधार्य्ये'तिपदस्थान इति शेषः ।

(त) जुषन्तीति परस्मैपदमार्षम् । आत्मनेपदप्रयोगेऽपि प्रकृते न वृत्तदोष इति चिन्त्यम् ।

(थ) हविषो गन्धवत्त्वं प्रत्यक्षसिद्धमेव, घ्राणेन्द्रियस्य पार्थिवेन्द्रियत्वेन तत्र पार्थिवत्वेन हेतुना गन्धवत्त्वेनोभयोरुपपन्नं साम्यमिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदक्रमक्रान्तभुवं भवन्त-
मादिस्थितिञ्चाक्षर विश्वमूर्त्ते ।
विश्वस्य विद्मः परमेश्वरोऽसि
प्रसीद नाथोऽसि चराचरस्य ॥३५॥

दंष्ट्राग्रविन्यस्तमशेषमेतद्—
भूमण्डलं नाथ विभाव्यते ते ।
विगाहतः पद्मवनं विलग्नं
सरोजिनीपत्रमिवोढ़पङ्कम् ॥३६॥

द्यावापृथिव्योरतुलप्रभाव
यदन्तरं तद् वपुषा तवैव ।
व्याप्तं जगद्व्याप्तिसमर्थदीप्ते
हिताय विश्वस्य विभो भव त्वम्॥३७॥

परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते ।
तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥३८॥

यदेतद् दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥३९॥

स्रुक्तुण्डेत्यादि चत्वारि सम्बोधनानि। स्रुक् जुहूस्तुण्डं मुखं यस्य, वराहमुखाकारत्वात् स्रुचः। सामस्वर एव धीरो गम्भीरो नादो यस्य। प्राग्वंशः अग्निशालायाः पूर्वभागः। "पूर्वभागोऽग्निशालायाः प्राग्वंशः परिकीर्तित इति वचनात् प्राग्वंशः कायो मध्यभागो यस्य। अखिलानि सत्राणि द्वादशाहादीनि सन्धयो यस्य, तेषां त्रिवृत्यश्च दशाद्यहःसंहतिरूपत्वात्। पूर्त्तं स्मार्त्तो धर्मः, इष्टं श्रौतो धर्मः, तौ श्रवणौ यस्य स त्वमसि। सनातनात्मन्—नित्यमूर्त्ते ॥ ३४ ॥

तदुपपादयति 'पदक्रमे'ति। 'पदक्रमेण पादविक्षेपेणाक्रान्ता व्याप्ता भूः येन तथाभूतं भवन्तं विश्वस्यादिस्थितिञ्च—जनकं पालकञ्च विद्म इत्यन्वयः। अतः परमेश्वरोऽसि, नाथश्च त्वमेवासि, नाथ्यते प्रार्थ्यत इति नाथः। अभिप्रेतमर्थं याचनीयश्चासीत्यर्थः (द)। 'पादक्रमाक्रान्तमनन्तमादिस्थितं त्वमे'वेति पाठे भो अक्षर! भो विश्वमूर्ते! त्वया पादक्रमैराक्रान्तमनन्तं विश्वं, तस्मात् त्वमेव विश्वस्यादिस्थितं कारणं परमेश्वरश्च नाथश्चासीति वयं विद्मः, अतः प्रसीदेत्यन्वयः ॥ ३५ ॥

किञ्च,—ते तव दंष्ट्राग्रे विन्यस्तं स्थितमेतद् भूमण्डलम् ऊढ़पङ्कं धृतपङ्कं सरोजपत्रमिव विभाव्यते प्रतीयते कथम्भूतं सरोजपत्रमिव पद्मवनं विगाहतः प्रविश्य विहरतः अर्थाद् गजेन्द्रस्य इव तव दंष्ट्राग्रे विलग्नमिवेत्यर्थः ॥ ३६ ॥

किञ्च,—द्यावापृथिव्योर्यदन्तरमन्तरीक्षं तत् तवैव वपुषा व्याप्तम्। जगद्व्याप्तौ समर्था दीप्तयो यस्य भो तथाभूत! पाठान्तरं सुगमम् ॥ ३७ ॥

तव वपुषा व्याप्तमित्युक्तेः प्रतीतव्याप्त्यापवादेन परमार्थमाह—'परमार्थ' इति। अन्यश्चेन्नास्ति, कथं तर्हि त्वया व्याप्तमित्युक्तं, तत्राह—तवैष महिमा मायाप्रभावः। कोऽसौ, येन महिम्ना व्याप्तम् एतच्चराचरं जगत् स एषः ॥ ३८ ॥

व्याप्ताज्जगतस्तस्य वैलक्षण्यमाह—'यदेतदि'ति। तव यदेतत् मूर्त्तं भूतात्मकं तद्रूपं दृश्यते, एतत् ज्ञानात्मनो ज्ञानघनस्य तव ज्ञानमयमेव रूपम्। ज्ञानात्मकं तवेति वा पाठः। अयोगिनस्त्वज्ञा भ्रान्तिज्ञानेन जगद्रूपम् भूतमयं पश्यन्तीत्यर्थः ॥ ३९ ॥

इदं वाराहं रूपं त्वया लीलया धृतं ज्ञानात्मकमिति किं वक्तव्यम्। यतो वस्तुतस्तद्रूपाव्यतिरेकाज्जगदपि ज्ञानमयमेवेत्याह—'ज्ञानस्वरूप'मिति। मोहमये सम्प्लवे संसारसागरे ॥ ४० ॥

(द) अभिप्रेतमर्थं याचनीयश्चासीत्यत्र द्विकर्मकस्य दुहाद्यन्तर्गतस्य याचेः कर्मणि वाच्ये प्रयुक्तेनानीय प्रत्ययेन अप्रधानस्यैव कर्मण उक्तत्वाद् युष्मादः प्रथमा, अर्थस्य प्रधानकर्मणश्च तेनानुक्तत्वात् अर्थपदोत्तरं द्वितीया।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥४०॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥४१॥
प्रसीद सर्व्वसर्व्वात्मन् भवाय जगतामिमाम् ।
उद्धरोर्व्वीमिमेयात्मन् शंन्नो देह्यब्जलोचन ॥४२॥
सत्त्वोद्रिक्तोऽसि भगवन् गोविन्द पृथिवीमिमाम् ।
समुद्धर भवायेश शं नो देह्यब्ज लोचन ॥४३॥
सर्गप्रवृत्तिर्भवतो जगतामुपकारिणी ।
भवत्वेषा नमस्तेऽस्तु शं नो तेह्यब्जलोचन ॥४४॥

पराशर उवाच ।

एवं संस्तूयमानोऽथ परमात्मा महीधरः ।
उज्जहार क्षितिं क्षिप्त न्यस्तवांश्च महार्णवे ॥४५॥
तस्योपरि समुद्रस्य महती नौरिव स्थिता ।
विततत्वाच्च देहस्य न मही याति संप्लवम् ॥४६॥
ततः क्षितिं समां कृत्वा पृथिव्यां सोऽपि नोद्गिरीन्
यथा विभागं भगवाननादिः परमेश्वरः ॥४७॥
प्राक् सर्गदग्धानखिलान् पर्व्वतान् पृथिवीतले ।
अमोघेन प्रभावेण ससर्जामोघवांछितः ॥४८॥
भूविभागं ततः कृत्वा सप्तद्वीपं यथातथम् ।
भुवाद्यांश्चतुरो लोकान् पूर्व्ववत् समकल्पयत् ॥४९॥
ब्रह्मरूपधरो देवस्ततोऽसौ रजसा वृतः ।
चकार सृष्टिं भगवांश्चतुर्व्वक्त्रधरो हरिः ॥५०॥

ज्ञानात्मकमेव सर्वमित्यत्र विद्वदनुभवं प्रमाणयन्ति—'ये त्वि'ति। ज्ञायते अनेनेति ज्ञानं वेदान्तपुराणादि, तद्विदः। श्रुतिश्च—"सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वम्" इत्यादिः ॥ ४१ ॥

सर्व सर्वात्मन् जड़ाजड़स्वरूप! भवन्त्यस्मिन्निति भवो निवासः तदर्थमुर्व्वीमुद्धर। एवं कृत्वा शं सुखं नोऽस्मभ्यं देहि। भो अब्जलोचन! अब्जवत् सुप्रसन्ने लोचने यस्य तव ॥ ४२ ॥

साम्प्रतञ्च तवेदमेव युक्तमित्याह—'सत्त्वोद्रिक्तोऽसी'ति द्वाभ्याम्। भवाय उद्भवार्थम्। अब्जलोचन—श्रीनिलयभूते लोचने यस्य ॥ ४३ ॥

जगदुपकार एवास्मत्सुखं, तदेवास्माभिः प्रार्थ्यत इति त्वमेव जानासीति पुनः सम्बोधयन्ति। अब्जे हृत्पुण्डरीके लोचनं दृष्टिर्यस्य,—भो हृदयसाक्षिन्नित्यर्थः ॥ ४४। ४५ ॥

विततत्वात् विस्तृतत्वात्, संप्लवं—निमज्जनं न याति ॥४६॥

यथाविभागं यथास्थानम् ॥ ४७ ॥

अमोघवाञ्छितः सत्यसंकल्पः ॥ ४८ ॥

यथातथं—यथावत्। भूवाद्यांश्चतुरो लोकान् यथापूर्वं समकल्पयत्—संकल्पेनैव सृष्टवान् पातालेन सह भुवादीन् चतुष्टयम्। यद्वा महर्लोकस्यापि सङ्कर्षणमुखानलोष्मणा शून्यतया विनष्टप्रायत्वाच्चतुरो लोकानित्युक्तम्। तथा च श्रुतिः—"सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्वः"। इति। दिवः पृथगुपादानात् स्वःशब्देन महर्लोको गृह्यते ॥ ४९ ॥

तदेवं भूम्युद्धारादिलोकरचनापर्यन्ता वाराहमूर्तेर्हरेर्लीलोक्ता, अथ तेनैव ब्रह्मरूपेण कृतां देवादिसृष्टिमाह—'ब्रह्मरूपे'ति ॥ ५० ॥

रजसावृतः सृष्टिं चकारेत्युक्तम्, तत्र रजोगुणस्य कर्मशक्तिर्दुःखादिहेतुत्वाद् ब्रह्मणो नित्यं कर्मदुःखित्वापत्तिः प्राप्तमित्याशंक्याह—'निमित्तमात्र'मिति। असौ हरिर्ब्रह्मरूपधरः। अयमर्थः,—सृष्टानां सर्गे ब्रह्मा निमित्तमात्रं पर्ज्जन्यवत् सन्निधिमात्रेण साधारणकारणमेव, न तु प्रति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निमित्तमात्रमेवासीत् सृज्यनां सर्गकर्म्मणि ।
प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥५१॥
निमित्रमात्रं मुक्त्वकं नान्यत् किंचिदवेक्षते ।
नीयते तपतां श्रेष्ठ स्वशक्तया वस्तुवस्तुताम् ॥५२॥

इति श्रीविष्णुपुराणे प्रथमांऽशे चतुर्थोऽध्यायः ।

सृज्यं स्वयं व्याप्रियते । तदुक्तम्—"यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते" इति । अत्र तर्हि मुख्यं कारणं किमित्यत्राह-प्रधानकारणीभूता इति । प्रधानं मुख्यमसाधारणं कारणं तथाभूतः । यतः कारणात् सृज्यशक्तय एव ॥ ५१ ॥

एतद् विवृणोति—'निमित्तमात्र'मिति । निमित्तमात्रसमवधाने सति कारणात्मना स्थितं सूक्ष्मं वस्तु स्वपरिणामशक्त्यैव वस्तुतां स्थूलरूपतां नीयते । निमित्ताद् यदन्यत् तत् स्थूलरूपपरिणामार्थं नापेक्षते । यथा धान्यादिबीजेषु सूक्ष्मात्मना स्थितमङ्कुरादि पर्ज्जन्ये सति स्वपरिणामशक्त्यैव तथा परिणमते तद्वत् । अतो नोक्तदोषप्रसङ्ग इत्यर्थः ॥ ५२ ॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे चतुर्थोऽध्यायः ।

पाठान्तराणि :—७ श्लोके, १म पङ्क्तौ—तोयान्तस्थां महीं ज्ञात्वा जगत्येकार्णवीकृते ।
८ ,, ,, ,, —अकरोत् स्वतनूमन्या— । २७ श्लोके, २य पङ्क्तौ—ततसम्भवाम्भो— ।
१२ ,, ,, ,, —नमस्ते पुण्डरीकाक्ष— । ४६ ,, १म ,, —तस्योपरिजलौघस्य— ।
१३ ,, ,, ,, —त्वयाहमुद्धृता— । ४८ ,, २य ,, —भूराद्यांश्चतुरो— ।
२० ,, ,, ,, —त्वत्समाश्रया— ।

पञ्चमोऽध्यायः ।

[देवादीनां सृष्टिकथनम् ।]

मैत्रेय उवाच ।

यथा ससर्ज्ज देवोऽसौ देवर्षिपितृदानवान् ।
मनुष्यतिर्य्यग्वृक्षादीन् भूव्योमसलिलौकसः ॥१॥
यद्गुणं यत्स्वरूपञ्च यत्स्वभावं जगद्द्विज ।
सर्गादौ सृष्टवान् ब्रह्मा तन्ममाचक्ष्व तत्त्वतः ॥२॥

पराशर उवाच ।

मैत्रेय कथयाम्येष शृणुष्व सुसमाहितः ।
यथा ससर्ज्ज देवोऽसौ देवादीनखिलान् प्रभुः ॥३॥
सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा ।
अबुद्धिपूर्व्वकः सर्गः प्रादुर्भूतस्तमोमयः ॥४॥

पञ्चमोऽध्यायः

ब्रह्मरूपधरो देवः सृष्टिञ्चकारेत्युक्तम् । तत्प्रकारं जिज्ञासुः पृच्छति—'यथे'ति द्वाभ्याम् । भू-व्योम-सलिलान्योकांसि स्थानानि येषां तान् ॥ १ ॥

यद्गुणमित्यादि । गुणः—सत्त्वादिः, स्वभावः—शान्तत्वघोरत्वादिः । रूपं, द्विपाच्चतुष्पादित्याद्याकारः, यादृग् गुणशीलाकारमित्यर्थः ॥ २ । ३ ॥

अविद्यां विना सृष्टेषु देहेषु जीवानां कर्तृत्वभोक्तृत्वाद्यसम्भवात् प्रथममविद्याविर्भावमाह—'सृष्टिमि'ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।
अविद्या पंचपर्व्वैषा प्रादुर्भूता महात्मनः ॥५॥
पंचधावस्थितः सर्गो ध्यायतो प्रतिबोधवान् ।
बहिरन्तोऽप्रकाशश्च (१) संवृतात्मा नगात्मकः ॥६॥
मुख्या नगा यतश्चोक्ता मुख्यसर्गस्ततस्त्वयम् ।
तं दृष्ट्वाऽसाधकं सर्गममन्यदपरं पुनः ॥७॥

तस्याभिध्यायतः सर्गस्तिर्य्यक्स्रोताभ्यवर्त्तत ।
यस्मात् तिर्य्यक् प्रवृत्तः स तिर्य्यक्स्रोतास्ततः स्मृतः ॥८॥

पश्चादयस्ते विख्यातास्तमः प्राया ह्यवेदिनः ।
उत्पथग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिनः ॥९॥

अबुद्धिपूर्वकः अनवधानमूलः, तमोमयः अविद्यावृत्तिरूपः ॥ ४ ॥

तदेवाह—'तम' इति। अन्धसंज्ञितः अन्धतामिस्रः। पञ्च पर्वाणि वृत्तिविशेषा यस्याः सा। तत्र तमो—देहादावनात्मन्यात्माभिमानः, मोहः—तत्सम्बधिषु पुत्रादिषु स्वाम्यहमस्मीत्यभिमानः। महामोहः—शब्दादिभोगस्पृहा। तामिस्रः—तत्प्रतिघाते क्रोधः। अन्धतामिस्रः विनाशादिशङ्कया नित्यं तद्रक्षणाद्यभिनिवेशः। एते च पञ्च विपर्य्ययाः पातञ्जले क्लेशशब्देनोक्ताः—"अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" इति ॥ ५ ॥

तदेवमविद्यायामुद्भूतायां सत्यां प्रथममत्यन्ततमोमयं स्थावरसर्गमाह—'पञ्चधे'ति सार्द्धेन। तस्य सृष्टिं ध्यायतः सतो नगात्मकः स्थावररूपः सर्गः पञ्चधावस्थितः। "वृक्षगुल्मलतावीरुत् समस्तास्तृणजातय" इति पञ्चमांशे वक्ष्यमाणः पञ्चप्रकारो जात इत्यर्थः। तस्य सामान्यलक्षणम् अप्रतिबोधवान् कोऽहमिति परामर्शशून्यः। बहिःशब्दादिविषये अन्तः सुखादौ च अप्रकाशः ज्ञानशून्यः (क)। संवृतात्मा मूढ़स्वभावः ॥ ६ ॥

मुखमिव प्रथमं ब्रह्मणः सर्गो भवतीति मुख्या नगा स्थावराः। अत एव पर्वतानां स्थावरत्वेऽपि ब्राह्मसर्गः प्रागेव वराहेण सृष्टत्वान्नात्रानुप्रवेश इति पञ्चधेत्युक्तम्। यद्वा पर्वतानां पक्षच्छेदनिमित्तमागन्तुकं स्थावरत्वं, स्वाभाविकमिति नात्रानुप्रवेशः। मुख्यसर्गपरितोषेण सर्गान्तरं ध्यायतस्तस्मात् किञ्चिदुत्कृष्टस्तिर्य्यक्सर्गो जात इत्याह—'तं दृष्ट्वे'ति सार्द्धैस्त्रिभिः। असाधकं पुरुषार्थप्रवृत्तिशून्यं दृष्ट्वा अपरं सर्गममन्यत्-अमन्यत दध्यावित्यर्थः। 'अमन्यत परं पुन'रिति पाठः साधुः (ख) ॥७॥

तिर्य्यक्स्रोताः अभ्यवर्त्तत, सन्धिरार्षः। यस्मात् तिर्य्यकप्रवृत्तः तिर्य्यगाहारसञ्चारेण प्रकृष्टं वृत्तं वृत्तिर्जीवनं यस्य सः ॥ ८ ॥

पश्चादय इति—आदिशब्देन पक्ष्यादिः। तेषां लक्षणं तमःप्राया तमोऽधिकाः। अवेदिनः अनुसन्धानशून्याः—तथा च श्रुतिः—"अथेतरेषां पशूनामशनायापिपासे एवाभिज्ञानं, न विज्ञातं वदन्ति, न विज्ञातं प्रपश्यन्ति, न विज्ञश्वस्तनं, न लोकालोकौ"। इति। उत्पथग्राहिणः—उन्मार्गवर्तिनः भक्ष्याभक्ष्यगम्यागम्यादिविवेकरहिता इत्यर्थः। अज्ञाने विपर्य्ययज्ञाने सम्यग्ज्ञानाभिमानिनः ॥ ९ ॥

---

(१) बहिरन्तोऽप्रकाशश्चेत्यत्र बहिरन्तरप्रकाश इति अन्यथोक्तिरार्षप्रभावतन्त्रा।

अत्र यथा 'बहिरन्तोऽप्रकाशश्चे'त्युक्त्वा 'अन्तःसंज्ञा भवन्त्येते सुख-दुःखसमन्विता' इत्युक्तेस्तथा 'वृक्षगुल्मलतोषधितृणवीरुधादीनामपि भोगायतनत्वमिति सांख्यसूत्रोक्तेर्विरोधश्चिन्त्यः।

(क) बहिःशब्दादिविषये अन्तःसुखादौ च अप्रकाशः ज्ञानशून्य इति स्वामी नन्वेवं—'अन्तःसंज्ञा भवन्त्येते सुख-दुःखसमन्विता' इत्यादि मनुवचनविरोध इति चेन्न प्रकृतेज्ञानशून्य इत्यस्य सुखदुःखादिज्ञानानुमापकस्थितरोदनादिलक्षणक्रियापरिशून्य इत्यर्थकत्वेनाविरोधः। णिजन्त प्रकाशधातोर्घञि निष्पन्नस्य प्रकाशशब्दस्य प्रकाशानुकूलव्यापारार्थकत्वाज् ज्ञायेन तज्-ज्ञानमिति ज्ञानशब्दस्यापि ज्ञानकरणार्थकत्वादयमेवार्थः प्रकृत इति ध्येयम्।

(ख) मन्यतेरात्मनेपदित्वादमन्यदिति परस्मैपददयोगः शब्दानुशासनवाह्यत्वमिति ध्येयम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहङ्कृता अहम्माना अष्टाविंशद्वधात्मकाः ।
अन्तःप्रकाशास्ते सर्व्वे आवृताश्च परस्परम् ॥१०॥
तमप्यसाधकं मत्वा ध्यायतोऽन्यस्ततोऽभवत् ।
ऊर्द्ध्वस्रोतास्तृतीयस्तु सात्त्विकोर्ध्वमवर्त्तत ॥११॥
ते सुखप्रीतिबहुला बहिरन्तस्त्वनावृताः ।
प्रकाशा बहिरन्तश्च ऊर्ध्वस्रोतोद्भवाः स्मृताः ॥१२॥
तुष्टात्मनस्तृतीयस्तु देवसर्गस्तु स स्मृतः ।
तस्मिन् सर्गेऽभवत् प्रीतिर्निष्पन्ने ब्रह्मणस्तदा ॥१३॥

अहंकृताः साहंकारमेव कृतं कर्म येषां ते। अहंमानाः साहङ्कार एव मानोऽवबोधो येषां ते। अष्टाविंशद्वधात्मकाः अष्टाविंशतिवधस्वभावाः। अन्तःसुखादावेव प्रकाशः प्रकृष्टं ज्ञानं येषां ते। आवृताश्च परस्परम् अन्योन्याभिजात्यस्वभावाद्यनभिज्ञाः। अष्टाविंशतिवधाः सांख्योक्ताः। "एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टाः। सप्तदशधा तु बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम्। आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। बाह्या विषयोपरमात् पञ्च तुष्टयोऽभिहिताः। ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः। "अयमर्थः—इन्द्रियवधा एकादश अन्धबधिरत्वादिरूपाद् वैकल्यात् स्वार्थग्रहणाशक्तिरूपाः। तुष्टीनां नवानां सिद्धीनाञ्चाष्टानां वैकल्यात् सप्तदशधा बुद्धेर्वधः, तदेवमष्टाविंशतिवधात्मकाः पश्वादयः। यद्यपि मनुष्यादीनामपीन्द्रियाद्यशक्तयः सम्भवन्ति, तथापि तिरश्चां तदाधिक्यादेवमुक्तम्। तत्र नव तुष्टीराह—आध्यात्मिकाः प्रकृत्युपादान-काल-भाग्याख्याश्चतस्रस्तुष्टयः। तत्राष्टविधप्रकृत्यां चित्रलयान् मुक्तोऽस्मीति प्रकृत्याख्या तुष्टिः। सन्न्यासवेशोपादानमात्रात् कृतार्थोऽस्मीति तुष्टिरुपादानाख्या। कालत एव सेत्स्यति, किं ध्यानक्लेशेनेति तुष्टिः कालाख्या। भाग्योदयादेव सेत्स्यतीति तुष्टिर्भाग्याख्या। एताश्चात्मानमधिकृत्य भवन्तीत्याध्यात्मिकाश्चतस्रः। अर्थानामर्ज्जनरक्षणव्ययनाशादिदोषदर्शनेन शब्दादिपञ्चविषयोपरमात् पञ्च तुष्टयो बाह्यविषयत्वाद् बाह्याः। एवं नव तुष्टयोऽभिहिताः। अष्टौ सिद्धीराह—'ऊह' इति। उपदेशानपेक्षमेवार्थोन्नयनमूहसिद्धिः। प्रासङ्गिकाच्छब्दश्रवणादर्थज्ञानं शब्दसिद्धिः। गुरूपदेशादेव ततो विवेकार्थज्ञानमध्ययनसिद्धिः। दुःखत्रयविघातात् तिस्रः सिद्धयः। सुहृत्प्राप्तितोऽर्थसिद्धिः। विद्वत्तपस्विशुश्रूषालभ्या अर्थसिद्धिरित्येता अष्टौ सिद्धयः। अयञ्चेन्द्रियाशक्तितुष्टिसिद्धिरूपस्त्रिविधः। सिद्धेर्मुक्तेः पूर्वोऽङ्कुशः प्रतिघातक इति श्लोकत्रयस्यार्थः। आसाञ्च तुष्टिसिद्धीनामभावसलिला चेत्यादि पारिभाषिकसंज्ञान्तरं तत्तदवान्तरभेदश्च विस्तरभयान्न लिख्यते। अष्टाविंशद्वधात्मका इति वा पाठः (ग)। तदा तु भागवतोक्ता नव द्विशफाः, षडेकशफाः, त्रयोदश पञ्चनखा इत्यष्टाविंशतिर्भेदा ग्राह्याः। तदुक्तं—"गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्॥ श्वा शृगालो वृको व्याघ्रो मार्जारः शश-शल्लकौ। सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः॥ १०॥

तिर्यक्सर्गापरितोषेण पुनर्ध्यायतो देवसर्गोऽभूदित्याह—'तमपी'ति त्रिभिः। ऊर्द्ध्वम् उपरि देहाद् बहिरेव स्रोत आहारस्य ग्रहणं यस्य सः, अमृतदर्शनादेव तृप्तेः। तथा च श्रुतिः—"न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति" इति। सात्त्विकोर्द्ध्वं सात्त्विकं सुखप्रकाशनादिकमूर्द्ध्वमधिकं यथा भवत्येवमवर्त्तत॥ ११॥

तदेवाह—'त' इति। सुखं विषयेन्द्रिययोगजम्, प्रीतिस्तन्निमित्तो हर्षः, सत्त्वाधिक्यात् सुखप्रीती बहुले येषां ते तथा॥ १२। १४॥

(ग) अष्टाविंशतिवधात्मकां इति वक्तव्ये अष्टाविंशद्वधात्मका इति प्रच्युतसंस्कारम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततोऽन्यं स तदा ददध्यौ साधकं सर्गमुत्तमम् ।
असाधकांस्तु तान् ज्ञात्वा मुख्यसर्गादिसम्भवान् ।१४।
तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः ।
प्रादुर्बभूव चाव्यक्तादर्व्वाक् स्रोतस्तु साधकम् ।१५।
यस्मादर्वाक् प्रवर्त्तन्ते ततोऽर्व्वाक्स्रोतसस्तु ते ।
ते च प्रकाशबहुलास्तमोद्रिक्ता(घ) रजोऽधिकाः ॥१६॥
तस्मात् ते दुःखबहुला भूयोभूयश्च कारिणः ।
प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते ॥१७॥
इत्येते कथिताः सर्गाः षडत्र मुनिसत्तम ।
प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥१८॥
तन्मात्राणां द्वितीयश्च भूतसर्गस्तु स स्मृतः ।
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः ॥१९॥
इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्व्वकः ।
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ॥२०॥
तिर्य्यक्स्रोतास्तु यः प्रोक्तस्तैर्य्यग्योन्यः स उच्यते ।
ऊर्ध्वस्रोतास्ततः षष्ठो देवसर्गस्तु स स्मृतः ॥२१॥
ततोऽर्व्वाक्स्रोतसः सर्गः सप्तमः स तु मानुषः ।
अष्टमोऽनुग्रहः सर्गः सात्त्विकस्तामसश्च सः ॥२२॥
पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः ।
प्राकृतो वैकृताश्चैव कौमारो नवमः स्मृतः ॥२३॥

सत्याभिध्यायिनः सत्यसंकल्पस्य भगवद्ध्यानशीलस्येति वा। अव्यक्तादिति मुख्यादिसर्गेष्वपि समानं, तेष्वपि कारणान्तरस्यानुक्तत्वात्। तथा च वायुः—"अव्यक्ताज्जायते वास्य मनसा यद् यदिच्छति। वशीकृतत्वात् त्रैगुण्यात् सापेक्षत्वात् स्वभावतः" ॥ इति ॥ १५ ॥

यस्मादर्वागधः प्रविष्टेनाहारेण प्रवर्त्तन्ते ॥ १६ ॥

तम उद्रेकाद् दुःखबहुलाः, रजोऽधिकत्वाद् भूयोभूयः कर्मशीलाः, प्रकाशबहुलत्वाद् बहिरन्तश्च प्रकाशाः प्रकृष्टज्ञानाः, साधकाः कर्मज्ञानाधिकारित्वात् ॥ १७ ॥

षडत्रेति—द्वितीयाध्यायोक्तैः सह षडेते सर्गाः। तथा हि इन्द्रियदेवतासर्गस्य बाह्यदेवतासर्गस्य च देवतासर्गत्वेनैक्यम् इन्द्रियसर्गेण सहाभेदश्च वक्ष्यते, अहंकाराविद्यासर्गयोश्च बुद्धिभेदत्वाद् बुद्ध्यात्मकमहत्तत्त्वान्तर्भावः, भौतिकब्रह्माण्डसर्गस्य भूतसर्गान्तर्भावः। एवञ्च सति महत्तत्त्वभूतेन्द्रियसर्गास्त्रयो मुख्यतिर्य्यङ्मनुष्यसर्गाश्च त्रय इत्येवं षडेते सर्गाः कथिता इत्यर्थः। तानेव किञ्चिदवान्तरभेदविवक्षया नवधा विवृण्वन्नाह—'प्रथमो महत' इत्यादिना। विराट् समस्तशरीराभिमानिनो ब्रह्मणो महत्तत्त्वं लिङ्गशरीरम्, अतोऽसौ ब्रह्मणः सर्गो विज्ञेय इत्यर्थः। यद्वा—ब्रह्म परमात्मा, तत्कर्त्तृकः सर्गो विज्ञेय इत्यर्थः ॥ १८ ॥

देवतासर्गाभेदविवक्षयेन्द्रियसर्ग एव वैकारिक इत्युच्यते ॥ १९ ॥

इत्येष प्राकृतः—प्रकृतीनां ब्रह्माण्डकारणानां सर्ग इत्यर्थः। अबुद्धिरविद्याख्यप्रकृतिस्तत्पूर्वकः सम्भूतः। यद्वा बुद्धिर्महत्तत्त्वं तत्पूर्वकस्तदादिरित्यर्थः ॥ २० ॥

तिर्यगेव योनिर्यस्य स तिर्यग्योनिः, स एव तैर्य्यग्योन्यः स्वार्थे ष्यञ्। स पञ्चमः सर्ग उच्यते इत्यर्थः ॥ २१ ॥

तत्र सात्त्विको देवसर्गः पूर्वमुक्तः, इदानीं सात्त्विकतमसोभयस्वभावमपरं देवसर्गमाह—'अष्टम' इति। स च वायुप्रोक्ते विवृतः—"अष्टमोऽनुग्रहः सर्गः स चतुर्धा व्यवस्थितः। विपर्य्ययेण चाशक्त्या सिद्धया तुष्ट्या तथैव च। स्थावरेषु विपर्य्यासात् तिर्यग्योनिष्वशक्तितः। सिद्ध्यात्मना मनुष्येषु तुष्ट्या देवेषु कृत्स्नशः" ॥ इति। विपर्य्यासाः पञ्च तमोमोह इत्यादयः, अशक्तिरेकादशेन्द्रियवैकल्यलक्षणा, सिद्धिरष्टविधा, तुष्टिश्च नवविधा प्रागेव प्रपञ्चिता। स्थावरादिष्वत्यन्तविपर्य्ययादिस्वभावेषु तत्तत्स्वभावानुग्राहको देवसर्गो हि अनुग्रहशब्देनोच्यते। स च

(घ) तमोद्रिक्ता इत्यत्र सन्धिरार्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्येते वै समाख्याता नव सर्गाः प्रजापतेः (ङ) ।
प्राकृता वैकृताश्चैव जगतो मूलहेतवः ।
सृजतो जगदीशस्य किमन्यत् श्रोतुमिच्छसि ॥२४॥

मैत्रेय उवाच ।

संक्षेपात् कथितः सर्गो देवादीनां मुने त्वया ।
विस्तराच्छ्रोतुमिच्छामि त्वत्तो मुनिवरोत्तम ॥२५॥

पराशर उवाच ।

कर्म्मभिर्भाविताः पूर्व्वैः कुशलाकुशलैस्तु ताः ।
ख्यात्या तया हयनिर्मुक्ताः संहारे ह्युपसंहृताः ।२६।
स्थावरान्ताः सुराद्यास्तु प्रजा ब्रह्मंश्चतुर्विधाः ।
ब्रह्मणः कुर्व्वतः सृष्टिं जज्ञिरे मानसास्तु ताः ॥२७॥

ततो देवासुरपितॄन् मानुषांश्च चतुष्टयम् ।
सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत् ॥२८॥
युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत् प्रजापतेः ।
सिसृक्षोर्ज्जघनात् पूर्व्वमसुरा जज्ञिरे ततः ॥२९॥
उत्ससर्ज्ज ततस्तान्तु तमोमात्रात्मिकां तनुम् ।
सा तु त्यक्ता ततस्तेन मैत्रेयाभूद् विभावरी ॥३०॥
सिसृक्षुरन्यदेहस्थः प्रीतिमाप ततः सुराः ।
सत्त्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज ॥३१॥
त्यक्ता सा तु तनुस्तेन सत्त्वप्रायमभूद् दिनम् ।
ततो हि बलिनो रात्रावसुरा देवता दिवा ॥३२॥
सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥३३॥

स्थावरेषु तिर्यक्षु च तमसः पोषकत्वात् तामसः। मनुष्येषु देवेषु च सिद्धितुष्ट्यनुरूपत्वोपबृंहकत्वात् सात्त्विक इत्यर्थः ॥ २२ ॥

पञ्चैते मुख्यसर्गादयो वैकृताः, विकृतीनां सर्गाः। महदादयः प्राकृताः। देवतासर्गान्तरमाह—'प्राकृता' इति। कौमारः नीललोहितरुद्रसनत्कुमारादीनां सर्गः। तत्र सनत्कुमारादिसर्गो वैकृतः, विकृतिभूतेन ब्रह्मणा कृतत्वात्। रुद्रसर्गस्तु प्राकृतः, प्रकृतितः स्वयमेवोद्भूतत्वादिति केचित्। तथा च वक्ष्यति—"प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः" इति। अन्ये त्वाहुः—रुद्रसर्गो विकृत्यन्तरजनकत्वात् प्राकृतः, सनत्कुमारादीनां नैष्ठिकानां सर्गो विकृत्यन्तरानुत्पादकत्वाद् वैकृत एवेति ॥ २३ ॥

जगत्सृजत ईश्वरस्य जगतो मूलहेतव एते नव सर्गाः समाख्याता इत्यर्थः ॥ २४ ॥

ब्रह्मणः शरीराद् विस्तारेण सृष्टिं वक्तुं कुमारादौ तावत् सनिमित्तां मानसीं सुरादिसृष्टिं पूर्वोक्तामनुदवति 'कर्मभि'-

---

(ङ) प्रजापतेरित्यत्र कर्त्तरि षष्ठी।

रिति द्वाभ्याम्। पूर्वैः कर्मभिर्भाविता अधिवासिताः। अतस्ताः प्रजाः संहारे उपसंहृता अपि तया ख्यात्या तत्तत्—कर्मानुसारिण्या बुद्ध्या अनिर्मुक्ता न नितरां वियुक्ताः, संस्काररूपेण स्थितयैव जज्ञिर इत्युत्तरेणान्वयः ॥ २६ ॥

सुराद्याः—सुर-नर-तिर्यक्-स्थावरा एवं चतुर्विधाः ॥२७॥

इदानीं शरीरात् सृष्टिमाह—'तत' इत्यादि यावदध्यायसमाप्तिः। देवादींश्चतुष्टयं चतुःसंख्यान् अम्भांसि अम्भःसंज्ञकान् सिसृक्षुरात्मानं मनोऽयूयुजत् समाधत्तेत्यन्वयः। "तानि वा एतानि चत्वार्य्यम्भांसि देवा मनुष्याः पितरोऽसुरा" इति श्रुतेर्देवादीनामम्भःसंज्ञा ॥ २८ ॥

तमसो मात्रा लेशः सृष्टादृष्टवशादुद्रिक्ता अभूत् ॥ २९ ॥

तमोमात्रात्मिकां तनुमिति विशेषणात् तमोमयं भावमुत्ससर्ज इत्यर्थः। एवमुत्तरत्रापि। विभावरी रात्रिः। श्रुतिश्च—"सा तमिस्राभवत्" इति ॥ ३० ॥

अन्यदेहस्थः सात्त्विके भावे स्थितः सन् सिसृक्षुः प्रीतिं सुखमवाप। मुखतः—"स मुखाद् देवान् सृजते" इति श्रुतेः ॥ ३१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्ससर्ज्ज पितॄन् सृष्ट्वा ततस्तामपि स प्रभुः ।
स चोत्सृष्टाऽभवत् सन्ध्या दिननक्तान्तरस्थितिः (च) ॥३४
रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः ।
रजोमात्रोत्कटा जाता मनुष्या द्विजसत्तम ॥३५॥
तामप्याशु स तत्याज तनुं सद्यः प्रजापतिः ।
ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याभिधीयते।३६
ज्योत्स्नायामेव बलिनो मनुष्याः पितरस्तथा ।
मैत्रेय सन्ध्यासमये तस्मादेते भवन्ति वै ॥३७॥
ज्योत्स्ना रात्र्यहनी सन्ध्या चत्वार्य्येतानि वै प्रभोः ।
ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्रयाणि तु ॥३८॥
रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
ततः क्षुद् ब्रह्मणो जाता जज्ञे कोपस्तया ततः ॥३९॥

क्षुत्क्षामानन्धकारेऽथ सोऽसृजद् भगवांस्ततः ।
विरूपाः श्मश्रु ला(छ) जातास्तेऽभ्यधावंस्ततः प्रभुम्।
मैवं भो रक्ष्यतामेष यैरुक्तम् राक्षसास्तु ते ।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात् ॥४१
अप्रियानथ तान् दृष्ट्वा केशाः शीर्य्यन्त वेधसः ।
हीनाश्च शिरसो भूयः समारोहन्त (झ) तच्छिरः ॥
सर्पणात् तेऽभवन् सर्पा हीनत्वादहयः स्मृताः ।
ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मनो विनिर्ममे ॥४३
वर्णेन कपिशेनोग्रा भूतास्ते पिशिताशनाः ।
धयन्तो गां समुत्पन्ना गन्धर्व्वास्तस्य तत्क्षणात् ॥४
पिबन्तो जज्ञिरे वाचं गन्धर्व्वास्तेन ते द्विज ।
एतानि सृष्ट्वा भगवान् ब्रह्मा तच्छक्तिनोदितः ।४

सत्त्वप्रायं प्रकाशात्मकम्। रात्रिरभूदित्यादिकथनस्योपयोगमाह—'ततो ही'ति। यतस्तमोमय्या रात्रिभूताया—स्तनोर्निर्गताः ततो ह्यसुरा रात्रौ बलिनः, अतस्तत्पूजा रात्रौ कार्येत्यर्थः। एवं दिवादिष्वपि द्रष्टव्यम्॥ ३२॥

अन्यां तनुं जगृहे, गृहीत्वा चात्मानं जगत् पितृवन्मन्यमानस्य पार्श्वाभ्यां पितरो जाताः। यथाह वायुः—"पितृवन् मन्यमानस्तु पुत्रान् प्रध्यायतः प्रभुः। स पितृनुपपक्षाभ्यां रात्र्यहोरन्तरेऽसृजत्" इति॥ ३३। ३४। ३५॥

सद्य इत्यनेन तत्तद् बुद्धिमन्तरेण स्वतनुत्यागो नास्तीति दर्शितम्। ज्योत्स्ना प्रभातम्॥ ३६॥

सन्ध्यासमये सन्ध्योपलक्षिते अपराह्ण इत्यर्थः। "अपराह्णः पितृणाम्। इति श्रुतेः॥ ३७॥

तस्मात् ज्योत्स्ना रात्र्यहःसन्ध्यासमया ब्रह्मणस्तु शरीराणीत्युपासनार्थमुक्तम्॥ ३८॥

तया क्षुधा॥ ३९॥

ततो व्याप्तः सन् अन्धकारे स्थिता असृजत्। अभ्यधावन् भक्षयितुमिति शेषः॥ ४०॥

तेषामेव मध्ये ये येऽन्ये खादामो जक्षाम इत्यूचुः, जक्षणात् भक्षणाध्यवसायाद् यक्षाः जक्ष भक्षहसनयोः जक्ष इति वक्तव्ये यकारः, परोक्षतार्थः। "परोक्षप्रिया इव हि देवाः "इति श्रुतेः॥ ४१॥

शीर्य्यन्त अशीर्य्यन्त (ज) अहीयन्तेत्यर्थः। शिरोहीनाः सन्तः पुनस्तस्य शिरः समारूढाः॥ ४२॥

सर्पणात्—शिरः समारोहणात्। क्रोधात्मनः—क्रोधात्मकान्॥ ४३॥

गां वाचं धयन्तः पिबन्तः गायन्त इत्यर्थः॥ ४४॥

गां पिबन्तो गायन्तो जज्ञिरे, तेन ते गन्धर्वाः। तच्छक्तिनोदितः—तेषां सृष्टानां शक्तिभिः प्राककर्मसंस्काररूपाभिः प्रयुक्तः सन्॥ ४५॥

(च) दिननक्तान्तरेत्यत्र मलोप आर्षः।
(छ) विरूपाः विकृतरूपाः। श्मश्रुलाः श्मश्रुधारिणः।
(ज) अशीर्य्यन्तेति वक्तव्ये शीर्य्यन्तेत्यार्षम्।
(झ) समारोहन्तेत्यत्रात्मनेपदमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोऽसृजत् ।
अवयो वक्षसश्चक्रे मुखतोऽजाः स सृष्टवान् ॥४३॥

सृष्टवानुदराद् गाश्च पार्श्वाभ्यां च प्रजापतिः ।
पद्भ्यामश्वान् समातंङ्गान् शरभान् गवयान् (ञ)
मृगान् ॥४७॥

उष्ट्रानश्वतरांश्चैव न्यङ्कूनन्यांश्च जातयः ।
ओषध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे ॥४८॥

त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तम ।
सृष्ट्वा पश्वोषधीः सम्यग् युयोज स तदाध्वरे ॥४९॥

गौरजः पुरुषा मेषा अश्वा अश्वतराः खराः ।
एतान् ग्राम्यान् पशून प्राहुरारण्यांश्च निबोध मे ॥५०॥

श्वापदो द्विखुरो हस्ती वानरः पक्षिपंचमः ।
औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ॥५१॥

गायत्रं च ऋचश्चैव त्रिवृत्स्तोमं रथन्तरम् ।
अग्निष्टोमं च यज्ञानां निर्म्ममे प्रथमान् मुखात् ॥५२॥

यजूंषि त्रैष्टुभं छन्दस्तोमं सप्तदशं तथा ।
बृहत् साम तथोक्थं च दक्षिणादसृजन् मुखात् ॥५३॥

सामानि जगतीछन्दःस्तोमं सप्तदशं तथा ।
वैरूपमतिरात्रं च पश्चिमादसृजन् मुखात् ॥५४॥

एकविंशमथर्व्वाणमाप्तोर्यामाणमेव च ।
अनुष्टुभं स वैराजम् उत्तरादसृजन्मुखात् ॥५५॥

उच्चावचानि भुतानि गात्रेभ्यस्तस्य जज्ञिरे !
देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥५६॥

ततः पुनः ससर्ज्जादौ स कल्पस्य पितामहः ।
यक्षान् पिशाचान् गन्धर्व्वांस्तथैवाप्सरसां गणान् ॥५७॥

नरकिन्नररक्षांसि वयः पशुमृगोरगान् ।
अव्ययं च व्ययं चैव यदिदं स्थाणुजंगमम् (ट) ॥५८॥

तत्तद्बुद्धिभिरेतानि सृष्ट्वा स्वच्छन्दतः तत्तत्कर्मवशादेवोत्पन्नया स्वेच्छया, वयसः देहावस्थाविशेषात्, वयांसि पक्षिणः, अवयः मेषाः ॥ ४६ । ४७ ॥

अश्वतरान् वेसरान् । न्यङ्कून् कृष्णसारादिवन्मृगविशेषान् । अन्याश्च जातयः तिर्यक्जातीयाः ॥ ४८ ॥

तदेवं कल्पस्यादावेव पशूनोषधीश्च सृष्ट्वा अनन्तरं त्रेतायुगमुखे प्राप्ते सति ग्राम्यारण्यव्यवस्थया तदा अध्वरे साधनतया युयोज । कृतयुगे यज्ञानामप्रवृत्तेः ॥ ४९ ॥

ग्राम्यारण्यभेदमेवाह—'गौ'रिति द्वाभ्याम् ॥ ५० ॥

श्वापदो व्याघ्रादिः, द्विखुरो गवयादिः, औदकाः कूर्म्मादयः, सरीसृपाः सर्प-गोधादयः ॥ ५१ ॥

पूर्वादिमुखेभ्यः सृष्टिमाह चतुर्भिः । गायत्रं छन्दः, ऋच ऋग्वेदं त्रिवृत्स्तोमं स्तोत्रसाधनभूतानामृचां समुदायम्, रथन्तरं साम, यज्ञानां मध्ये अग्निष्टोमं सोमयागसंस्थाविशेषम् ॥ ५२ ॥

यजूंषि यजुर्वेदम्, उक्थं सोमसंस्थाम् ॥ ५३ ॥

सामानि सामवेदम्, साम वैरूपम्, अतिरात्रं सोमसंस्थाम् ॥ ५४ ॥

एकविंशं स्तोमम्, अथर्वाणमथर्ववेदम् । आप्तोर्यामाणं सोमसंस्थाम् । अनुष्टुभं छन्दः । वैराजं साम ॥ ५५ ॥

सृष्टानां सर्वेषां भूतानां कर्मस्वभावादि वक्तुं पूर्वोक्तमेव सृष्टिप्रपञ्चमनुवदति—'उच्चावचानी'ति सार्द्धैस्त्रिभिः । उच्चावचानि उत्कृष्टनिकृष्टानि देवासुरादीनि ॥ ५६ । ५७ ॥

नर-किन्नरभेदश्च "नरोऽश्वजघनोऽपि स्यात् किन्नरोऽश्वमुखो नरः" इत्यभिधानोक्तेः । अव्ययं चिरकालावस्थायिप्रवाहनित्यं वा, व्ययं तद्विपरीतम् ॥ ५८ ॥

(ञ) शरभान् अष्टापदमृगविशेषान् । गवयान् गलकम्बलशून्यानवयवान्तरैर्गोसदृशान् पशुविशेषान् ।

(ट) स्थाणुजङ्गममित्यत्र समाहारद्वन्द्वादेकत्वम् । स्थावरजङ्गममित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत् ससर्ज्ज तदा ब्रह्मा भगवानादिकृद् विभुः ।
तेषां ये यानि कर्म्माणि प्राक् सृष्ट्यां प्रतिपेदिरे ॥५९
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः ।
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात् तत् तस्य रोचते (ठ) ॥६०
इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ।
नानात्वं विनियोगञ्च धातैव व्यसृजत् स्वयम् ॥६१।
नामरूपं च (ड) भूतानां कृत्यानां च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥६२॥
ऋषीणां नामधेयानि यथा वेदश्रुतानि वै ।
यथा नियोगयोग्यानि सर्वेषामपि सोऽकरोत् ॥६३॥
यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥६४॥
करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः ।
सिसृक्षाशक्तियुक्तोऽसौ सृज्यशक्तिप्रचोदितः ॥६५॥

इति श्रीविष्णुपुराणे प्रथमांशे पञ्चमोऽध्यायः ।

एवं सृष्टानां तेषां भूतानां मध्ये ॥ ५९ ॥

तान्येव च कर्माण्याह,—हिंस्रं मारकम्, अहिंस्रं तद्विपरीतम्, शारीरं कर्म मृदुसदयम्, क्रूरञ्च तद्विपरीतं मानसं कर्म, ऋतञ्चानृतञ्च वाचिकं कर्म, किञ्चिद्धिंस्रमपि धर्म एव यथाग्निषोमीयादि पश्वालम्भनम्। अहिंस्रमपि परस्त्रीगमनादिकमधर्मः। मृदुकर्माणि किञ्चिदधर्मः, यथा राज्ञां चौरादिरक्षणम्। क्रूरमपि किञ्चिद् धर्मः, यथा राज्ञां दुष्टशासनम्। सत्यमपि किञ्चिदधर्मः, यथा ब्राह्मणादेर्वधप्राप्तौ तदनुकूलम्। अनृतमपि ब्राह्मणादिरक्षणं धर्म एव, अतो धर्माधर्माविति तयोः पृथग् ग्रहणम्। तद्भाविताः तैर्हिंस्रादिकर्मभिर्वासिताः, तस्मादद्यापि यो यद्वासनावासितस्तस्मै तदेव रोचते ॥ ६० ॥

एवं तत्तद्वासनानुसारेणैव इन्द्रियार्थेषु नानात्वम् अमृतमन्नं फलं तृणमित्यादिभोग्यविषयविभागम्। भूतेषु नानात्वं जलस्थलचरादिविभागम्। शरीरेषु नानात्वं द्विपाच्चतुष्पादादिविभागं विनियोगञ्च। अनेन जीवभेदं कार्य्यमित्यादि तत्तत्कर्मानुसारेण स्वयमेवासृजत् ॥ ६१ ॥

नाम इन्द्रोऽग्निर्यम इत्यादि, रूपञ्च वज्रहस्तत्वादि, कृत्यानाञ्च वर्षणदहनसंयमादीनाम्, प्रपञ्चनं तत्तदवान्तरभेदः ॥ ६२ ॥

किञ्च ऋषीणां वशिष्ठादीनां नामानि। तस्माद् वाशिष्ठो ब्रह्मा कार्य्य इत्यादिनियोगे योग्यानि तत्तत्सूक्तमन्त्रादिदर्शनयोग्यानि च वेदे यथा श्रुतानि तथैव कृतवान् ॥ ६३ ॥

ननु देवादीनामनित्यानां कथं नित्येन वेदेनाभिधानमित्याशङ्क्य प्रवाहनित्यत्वं दृष्टान्तेन दर्शयति—'यथे'ति। यस्मिन् वसन्तादौ ऋतौ यानि ऋतुलिङ्गानि पुष्पफलादीनि पर्य्यये तस्य ऋतोः पुनरावृत्तौ तानि तानि तज्जातीयान्येव दृश्यन्ते, तथैव युगमन्वन्तरकल्पादिषु भावा देवादयः ॥६४॥ उपसंहरति—'करोती'ति। सिसृक्षा च शक्तिश्च सर्वविषया ताभ्यां युक्तः ॥ ६५ ॥

(ड) नामरूपञ्चेत्यत्र समाहारद्वन्द्वादेकत्वम्, नाम च रूपञ्चेत्यर्थः ।

(ठ) अत्र रुच्यर्थधातुयोगे चतुर्थ्यां प्राप्तायामपि तस्येति सम्बन्धसामान्यविवक्षया षष्ठी ।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे पञ्चमोऽध्यायः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठोऽध्यायः

[चातुर्वर्ण्यसृष्टिः, चातुर्वर्णस्थाननिरूपणञ्च ।]

मैत्रेय उवाच ।

अव्वाक्स्रोतस्तु कथितो भवता यस्तु मानुषः ।
ब्रह्मन् विस्तरतो ब्रूहि बह्मा तमसृजद् यथा ॥१॥
यथा च वर्णानसृजद् यद्गुणांश्च महामुने ।
यच्च तेषां स्मृतं कर्म्म विप्रादीनां तदुच्यताम् ॥२॥

पराशर उवाच ।

सत्याभिध्यायिनः पूर्व्वं सिसृक्षोर्ब्रह्मणो जगत् ।
अजायन्त द्विजश्रेष्ठ सत्त्वोद्रिक्ता मुखात् प्रजाः ॥३॥
वक्षसो रजसोद्रिक्तास्तथा वै ब्रह्मणोऽभवन् ।
रजसा तमसा चैव समुद्रिक्तास्तथोरुजाः ॥४॥
पद्भ्यामन्याः प्रजा ब्रह्मा ससर्ज्ज द्विजसत्तम ।
तमःप्रधानास्ताः सर्व्वाश्चातुर्व्वर्ण्यमिदं ततः ॥५॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ।
पादोरुवक्षःस्थलतो मुखतश्च समुद्गताः ॥६॥
यज्ञनिष्पत्तये सर्व्वमेतद् ब्रह्मा चकार वै ।
चातुर्व्वर्ण्यं महाभाग यज्ञसाधनमुत्तमम् ॥७॥
यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः ।
आप्याययन्ते धर्म्मज्ञ यज्ञाः कल्याणहेतवः ॥८॥
निष्पाद्यन्ते नरैस्तैस्तु स्वधर्म्माभिरतैस्ततः ।
विशुद्धाचरणोपेतैः सद्भिः सन्मार्गगामिभिः ॥९॥
स्वर्गापवर्गौ मानुष्यात् प्राप्नुवन्ति नरा मुने ।
यथाभिरुचितं स्थानं तद् यान्ति मनुजा द्विज ॥१०॥
प्रजास्ता ब्रह्मणा सृष्टाश्चातुर्वर्ण्यव्यवस्थितौ ।
सम्यक्श्रद्धासमाचारप्रवणा मुनिसत्तम ॥११॥
ययेच्छावासनिरताः सर्व्वबाधाविवर्जिताः ।
शुद्धान्तःकरणाः शुद्धाः सर्व्वानुष्ठाननिर्म्मलाः (क) १२

षष्ठोऽध्यायः ।

विस्तरतो ब्रूहीति यद् उक्तं, तदेव विवृणोति—'यथा चे'ति ॥ २ ॥

ताश्चतुर्विधा मुखादिभ्यः सृष्टाः प्रजाः । इदं—प्रसिद्धं चातुर्वर्ण्यं—चत्वारो वर्णाः ॥ ५ ॥

एतदेव विभागेन स्पष्टयति—'ब्राह्मणा' इति । पादोरुवक्षः-स्थलतो मुखतश्चेति ब्राह्मणादिभिः प्रातिलोम्येन सम्बन्धः ॥ ६ ॥

तत्सृष्टेः प्रयोजनमाह—यज्ञनिष्पत्तये सर्वमेतद् यज्ञ-साधनभूतम् उत्तमं चातुर्वर्ण्यं चकार इत्यन्वयः । यद्यपि "अध्ययनाद्यभावात् न कर्मणि स्यात्" इति सूत्रे जैमिनिः शूद्रस्य अध्ययनाद्यभावाद् यज्ञाधिकारं न मन्यते, तथापि द्विजशुश्रूषाद्वारेण तत्साधनत्वात्, "नमस्कारेण मन्त्रेण पञ्च यज्ञान् न हापयेत्" इत्यादिस्मृतेः पाकयज्ञादिषु साक्षाद-नधिकारान्न विरोधः ॥ ७ ॥

(क) शुद्धान्तःकरणाः अन्तःशुद्धाः । सर्वानुष्ठाननिर्मला इति—सर्वैरनुष्ठानैः बहिःशुद्धिसाधकक्रियाभिः सर्वेषां बहिः शुद्धि साधककर्मणाम् अनुष्ठानैरिति वा निर्मलाः बहिः शुद्धाः । एतद् विशेषणद्वयेनैव बहिः शुद्दद्धयन्तः शुद्ध्योर्द्वयोरेव प्रति पादनात् शुद्धा इति विशेषणमनर्थकं स्यादत एव शुद्धा इत्यस्य सत्-कुलीनो इत्यर्थमाह श्रीधरः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः कालात्मको योऽसौ स चांशः कथितो हरेः ।
स पातयत्यघं घोरमल्पमल्पाल्पसारवत् (ख) ॥१४॥

अधर्म्मबीजसंभूतं तमोलोभसमुद्भवम् ।
प्रजासु तासु मैत्रेय रागादिकमसाधकम् ॥१५॥

ततः सा सहसा सिद्धिस्तेषां नातीव जायते ।
रसोल्लासादयश्चान्याः सिद्धयोऽष्टौ भवन्ति याः ।१६।

तासु क्षीणास्वशेषासु वर्द्धमाने च पातके ।
द्वन्द्वाभिभवदुःखार्त्तास्ता भवन्ति ततः प्रजाः ॥१७॥

शुद्धे च तासां मनसि शुद्धेऽन्तःसंस्थिते हरौ ।
शुद्धं ज्ञानं प्रपश्यति विष्ण्वाख्यं येन तत्पदम् ॥१३॥

यज्ञनिष्पादनस्य उपयोगमाह—'यज्ञै'रिति । आप्यायिता-स्तर्पिता देवा वृष्ट्युत्सर्गेण ताः यज्ञकर्त्रीः प्रजाः तर्पयन्ति । "अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते । आदित्या-ज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति स्मृतेः, अतो यज्ञाः कल्याणहेतवः ॥ ८ ॥

तेषु श्रेष्ठानधिकारिणो दर्शयति 'निष्पाद्यन्त' इति । स्वधर्मेषु श्रौतेषु अभिरतैः विशुद्धाचरणं स्मृत्यादिविहितं तदुपेतैः । पाठान्तरे विरुद्धाचरणात् अपेतैः निवृत्तैः सद्-भिर्विद्वद्भिः सन्मार्गगामिभिर्मन्वादिसमानाचारानु-वर्त्तिभिः ॥९॥

अतो धर्माधिकारित्वान्मानुष्यं स्तौति—'स्वर्गापवर्गा'-विति । यथाभिरुचितं स्थानं सत्यलोकादि ॥ १० ॥

तदेवं चातुर्वर्ण्यव्यवस्थितये ताः प्रजाः सृष्टाः सम्यक् श्रद्धया यः समाचारस्तस्मिन् प्रवणाः ॥ ११ ॥

चातुर्वर्ण्यव्यवस्थाफलमाह—'यथेच्छे'ति द्वाभ्याम् । यथे-च्छया आवासः गिरिकन्दरादिस्थानं तस्मिन् निरताः । यतः सर्वबाधाभिः शीतोष्णादिपीड़ाभिर्विवर्जिताः । शुद्धाः सत्कुलीनाः ॥ १२ ॥

तासां शुद्धं ज्ञानं भवति येन ज्ञानेन तत्पदं प्रपश्यन्ति ॥ १३ ॥

तदेवं धर्मानुष्ठानफलम् उक्तम् । इदानीं कालवशेन तद्वैकल्यात् प्राणिनामनिष्टप्राप्तिमाह—'तत' इत्यादिना । ततः त्रेतायुगे किंचिदतिक्रान्ते सति, स प्रसिद्धः कालात्मकः योऽसौ हरेरंशः कथितः' सः अधं पापं रागादिकं विषयाभि-लाष-द्वेष-मात्सर्य्यादिकम्, असाधकं पुरुषार्थप्रतिबन्धकं तासु प्रजासु पातयति प्रतिक्षिपति इति द्वयोरन्वयः । कथम्भूतं घोरं बहुदुःखप्रदम् अल्पाल्पसारवत् अत्यल्पसुखदम् यद्वा अत्यल्पबलं उत्पत्तिसमय एव धृतिमता पुंसा जेतुं शक्यम् ॥ १४॥

अनन्तरं तु अधर्मस्य बीजभूतं तत्र हेतुस्तमोऽभिनिवेशः लोभस्तृष्णा तयोः समुद्भवो यस्मात् तत् ॥ १५ ॥

अतः किम् इत्यत आह—'तत' इति । सहजा स्वाभाविको सा सिद्धिः सर्वबाधाविवर्जिता इति अत्र उक्ता क्षुत्पिपा-सादिद्वन्द्वजयलक्षणा नातीव जायते । रसोल्लासादयः सिद्धयः स्कान्दादिप्रोक्ताः—"रसस्य स्वत एवान्तरुल्लासः स्यात् कृते युगे । रसोल्लासाख्या सा सिद्धिस्तया हन्ति क्षुधं नरः । क्रियादिनिरपेक्षेण सदा तृप्ताः प्रजास्तदा । द्वितीया सिद्धिरुद्दिष्टा सा तृप्तिर्मुनिसत्तमैः ।

अधमोत्तमत्वं नास्त्यासां सा तृतीयाभिधीयते । चतुर्थी तुल्यता तासामायुषः सुखरूपयोः । ऐकान्त्यबलबाहुल्यं विशोका नाम पञ्चमी । परमात्मपरत्वेन तपोध्यानादिनि-ष्ठता । षष्ठी निकामचारित्वं सप्तमी सिद्धिरुच्यते । अष्टमी च तथा प्रोक्ता यत्र क्वचन शायिता", इति ॥ १६ ॥

शीतोष्णादिद्वन्द्वैरभिभवाद् दुःखैः आर्त्ताः पीड़िताः ॥१७॥

(ख) अल्पम् अत्यल्पसुखदत्वात् हीनम् । अथवा अल्प-मल्पमात्रम् उत्तरत्र 'पापविन्दु'रिति वक्ष्यमाणत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो दुर्गाणि ताश्चक्रुर्वाक्षं पार्व्वतमौदकम् ।
कुत्रिमं च तथा दुर्गं पुरं खर्व्वटकादिकम् ॥१८॥
गृहाणि च यथान्यायं तेषु चक्रुः पुरादिषु ।
शीतातपादिबाधानां प्रशमाय महामुने ॥१९॥
प्रतीकारमिदं कृत्वा शीतादेस्ताः प्रजाः पुनः ।
वार्त्तोपायं ततश्चक्रुर्हस्तसिद्धिं च कर्मजाम् ॥२०॥
ब्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः ।
प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीकणाः ॥२१॥
माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढ़क्यश्चनकाश्चैव शणाः सप्तदशः स्मृताः ॥२२॥
इत्येताश्चौषधीनान्तु ग्राम्याणां जातयो मुने ।
ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश ॥२३॥
ब्रीहयः सयवा माषा गोधूमा अणवस्तिलाः ।
प्रियङ्गुसप्तमा ह्येता अष्टमास्तु कुलत्थकाः ॥२४॥
श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ।
तथा वेणुयवाः प्रोक्तास्तद्वत् मर्कटका मुने ॥२५॥
ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश ।
यज्ञनिष्पत्तये यज्ञस्तथासां हेतुरुत्तमः ॥२६॥
एताश्च सह यज्ञेन प्रजानां कारणं परम् ।
परापरविदः प्राज्ञस्ततो यज्ञान् वितन्वते ॥२७॥
अहन्यहन्यनुष्ठानं यज्ञानां मुनिसत्तम ।
उपकारकरं पुसां क्रियमाणस्य शान्तिदम् ॥२८॥

ततः चौरादिभयपरिहारार्थं दुर्गाणि शीतादिप्रतीकारार्थञ्च गृहाणि जीविकाद्यर्थञ्च कृषिवाणिज्यादीनि चक्रुरित्याह—'ततो दुर्गाणि'(ग) इत्यादिना। कृत्रिमं परिखाद्यावृतं प्राकारादि। पुरादीनां लक्षणं भृगुणोक्तम्—"नृपावासः पुरी प्रोक्ता विशां पुरमपीष्यते। एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम्। मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम्। विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति ते। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च। पण्यक्रयादिनिपुणैश्चातुर्वर्ण्यजनैर्युतम्। अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम्। सर्वदैवतसम्बद्धं नगरन्त्वभिधीयते" ॥ इति ॥ १८॥

गृहाणि च विश्वकर्मोक्तानि "ध्रुवं धन्यं जयं कान्तं विपुलं विजयं तथा। सुपक्षं सुमुखं नन्दं निधनञ्च मनोरमम्॥" इत्यादीनि। यथान्यायं अर्थनिमित्ताद्यनुसारेण यथा वास्तुशास्त्रम्॥ १९॥

वार्त्तोपायं जीविकासाधनं कृष्यादि, हस्तसिद्धिं-हस्ताभ्यां साध्यां सिद्धिं भृतिम्। तान् एवाह कर्मजां तत् तत्कर्मनिमित्ताम्॥ २०॥

तत्र कृषिफलं प्रपञ्चयति—'ब्रीहयश्चे'ति सार्द्धद्वाभ्याम्। अणवः क्षुद्रशालयः। प्रियङ्गुसदृशं तृणधान्यम्। प्रियङ्गवः उदारा दीर्घनालाः। कोरदूषाः कोद्रवाः। चीणका अणुतुल्याः॥ २१॥
निष्पावा शिम्बाः। आढ़क्यस्तु वर्य्यः शणा गोण्युपादानत्वचः। इत्येता ग्राम्याणां कृषिसाध्यानां जातयः सप्तदश॥ २२॥

तासु ब्रीह्याद्याः श्यामाकान्ता एकोनदश यज्ञियाः यज्ञसाधनभूताः। आरण्या नीवाराद्याः पञ्च यज्ञसाधनभूताः। अथवा श्यामाका अप्यारण्या एव तृणधान्यरूपत्वात्॥ २३। २४॥

नीवाराः आरण्याः ब्रीहयः। जर्त्तिलाः आरण्यास्तिलाः। गवेधुकाः कुसुम्भसदृशबीजाः। वेणुयवाः वेणुबीजानि, मर्कटकाः आरण्याः प्रियङ्गवः॥ २५॥

एताश्चतुर्दश यज्ञनिष्पत्तये स्मृता इत्यन्वयः। यज्ञश्च आसाम् ओषधीनां हेतुः वृष्टिद्वारेण॥ २६॥

प्रजानां परं कारणं वृद्धिहेतुत्वात्। परापरविदोः—यज्ञाः कारणं, प्रजास्तु कार्यमित्येवं विदः॥ २७॥

अहन्यहनि पञ्चमहायज्ञानमानुष्ठानं गृहस्थानां प्रत्यहं क्रियमाणस्य पञ्चसूनालक्षणस्य पापस्य शान्तिदं नाशकम्॥२८॥

(ग) धन्वदुर्गं महीदुर्गमवृदुर्गं वार्क्षमेव वा। नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्। इत्यनेन मनुरन्येषामपि दुर्गाणां नामान्याह।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येषान्तु कालरूपोऽसौ पापविन्दुर्महामते ।
चेतःसु ववृधे चक्रुस्ते न यज्ञेषु मानसम् ॥२९॥
वेदवादांस्तथा वेदान् यज्ञनिष्पादकं च यत् ।
तत्सर्व्वं निन्दमानास्ते यज्ञव्यासेधकारिणः ॥३०॥
प्रवृत्तिमार्गव्युच्छित्तिकारिणो वेदनिन्दकाः ।
दुरात्मानो दुराचारा बभूवुः कुटिलाशयाः ॥३२॥
संसिद्धायान्तु वार्त्तायां प्रजाः सृष्ट्वा प्रजापतिः ।
मर्य्यादां स्थापयामास यथास्थानं यथागुणम् ॥३२॥
वर्णानामाश्रमाणाञ्च धर्म्मान् धर्म्मभृतां वर ।
लोकांश्च सर्व्ववर्णानां सम्यग् धर्म्मानुपालिनाम् ॥३३
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वनिवर्त्तिनाम् ॥३४॥
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तिनाम् ।
गान्धर्व्वं शूद्रजातीनां परिचर्य्यानुवर्त्तिनाम् ॥३५॥
अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ।
स्मृतं तेषां मरुत्स्थानं तदेव गुरुवासिनाम् ॥३६॥
सप्तर्षीणान्तु यत् स्थानं स्मृतं तद्वै वनौकसाम् ।
प्राजापत्यं गृहस्थानां न्यासिनां ब्रह्मसंज्ञितम् ॥३७
योगिनाममृतं स्थानं यद्विष्णोः परमं पदम् ।
एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये ।
तेषां तत् परमं स्थानं यत् तु पश्यन्ति सूरयः ॥३८
गत्वा गत्वा निवर्त्तन्ते चन्दसूर्य्यादयो ग्रहाः ।

तदेवं ब्रह्मसृष्टानां यज्ञाङ्गभूतानाम् ओषधीनां कृष्यादिप्रवृत्त्या प्रवाहनित्यत्वमुक्तम्। यज्ञानाञ्च दुष्टादुष्टलक्षणं महत् फलमुक्तम्। तथापि तेषां कैश्चिदननुष्ठाने पूर्वोपक्षिप्तमेव रागादिकं कारणमाह—"येषान्तु" इति त्रिभिः। ते यज्ञेषु मानसं न चक्रुः ॥ २९ ॥

यज्ञानां व्यासेधकारिणः प्रतिहन्तारः ॥ ३० ॥

अत एव प्रवृत्तिमार्गोच्छेदकारिणः। यज्ञाननुष्ठाने देवैरवर्षणादन्नाभावेन प्रजावृद्धेरसिद्धेः ॥ ३१ ॥

तदेवं प्रजाः सृष्ट्वा तासां वार्त्तायां कृष्यादीनां सिद्धायां सत्यां यथागुणं सत्त्वोद्रेकाद्यनुसारेण ब्राह्मणादीनां वर्णानां गृहस्थाद्याश्रमाणाञ्च मर्यादाधर्मव्यवस्थां यथास्थानं तत् तत् स्वधर्मावस्थानानुसारेण लोकव्यवस्थाञ्च कृतवान् इत्यर्थः ॥ ३२ ॥

तदेवाह वर्णानामिति यावत् समाप्तिः ॥ ३३ ॥

क्रियावतां नित्यनैमित्तिकाग्निहोत्राद्यनुष्ठातॄणां प्राजापत्यं स्थानं पितृलोकः, "कर्मणा पितृलोकः" इति श्रुतेः ॥ ३४ ॥

मारुतं स्थानं देवलोकः (घ) ॥ ३५ ॥

गुरुवासिनां नैष्ठिकब्रह्मचारिणां जनलोकम्। ३६ ॥

वनौकसां वानप्रस्थानां तपोलोकम्। ब्राह्मणादीनां विशेषं वक्तुं गृहस्थानां पूर्वोक्तमेव स्थानं अनुवदति—'प्राजापत्यम्' इति। सन्न्यासिनां ब्रह्मसंज्ञितं सत्यलोकस्थानम् "सन्न्यासाद् ब्रह्मणः स्थानम्" इति वचनात् ॥ ३७ ॥

योगिनां ज्ञानिनाम्। तदेवं स्पष्टयति—'एकान्तिनः' इति ॥ ३८ ॥

(षष्ठश्लोकभाष्यस्य पादटीका) प्रातिलोम्येनेति उत्तरोत्तरभावेन क्रमिकान्वयमपहाय पूर्वपूर्वभावेन विपरीतक्रमेण इत्यर्थः। तथाहि प्रकृते षष्ठश्लोके ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च इत्येवं क्रमेण ब्राह्मणादिचतुर्वर्णसृष्टिः कथिता। तत्रैव-श्रुतिसिद्धब्राह्मणादिसृष्ट्यपादानभूतानि मुखादीनि तेनैव क्रमेणानिर्दिश्य विपरीतक्रमेण आदौ शूद्रसृष्ट्यपादानस्य पादस्य तदनन्तरं क्षत्रसृष्ट्यपादानस्य वक्षःस्थलस्य तदनन्तरं वैश्यसृष्ट्यपादानस्योरुस्थलस्य तदनन्तरञ्च ब्राह्मणसृष्ट्यपादानस्य मुखस्य निर्देशात् प्रतिलोमक्रमेण सम्बन्धो गृहीत इति ध्येयम्।

(घ) 'मरुतौ पवनामरा' विति कोषोक्तदेवतार्थक-'मरुत्' शब्दोत्तरं ष्णप्रत्ययेन मारुतशब्दनिष्पत्त्या तदर्थलाभ इति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अद्यापि न निवर्त्तन्ते द्वादशाक्षरचिन्तकाः (घ) ॥ ३९
तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
असिपत्रवनं घोरं कालसूत्रमवीचिमत् ॥४०॥

भगवदुपासकानामपि क्रममुक्त्वा तदेव स्थानमित्याशयेनाह—'गत्वा गत्वे'ति ॥ ३९ ॥

(घ) द्वादशाक्षरचिन्तका इति—समननं 'ॐ नमो भगवते वासुदेवाय' इति द्वादशाक्षरमन्त्रजापका इत्यर्थः ।

विनिन्दकानां वेदस्य यज्ञव्याघातकारिणाम् ।
स्थानमेतत् समाख्यातं स्वधर्म्मत्यागिनश्च ये ॥४१॥

स्वधर्मत्यागिनश्च ये तेषामपि वा ॥ ४१ ॥

श्री विष्णुपुराणे प्रथमेऽंशे षष्ठोध्यायः ।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे षष्ठोऽध्यायः ।

पाठान्तराणि—१८—ताश्चक्रुर्धान्वं । २१—सतीनकाः ।
३०—यज्ञकर्मादिकञ्च यत् । ३८—स्वात्मसन्तोषकारिणाम् ।

सप्तमोऽध्यायः ।

[मानसप्रजासृष्टिः, रुद्रादीनां सृष्टिः, चतुर्विधप्रलयवर्णनञ्च]

पराशर उवाच ।

ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः(क) प्रजाः ।
तच्छरीरसमुत्पन्नैः कार्य्यैस्तैः कारणैः सह ॥१॥
क्षेत्रज्ञाः समवर्त्तन्त गात्रेभ्यस्तस्य धीमतः ।
ते सर्व्वे समवर्त्तन्त ये मया प्रागुदीरिताः ॥२॥
देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषये स्थिताः ।
एवम्भूतानि सृष्टानि चराणि स्थावराणि च ॥३॥
यदास्य ताः प्रजाः सर्व्वा न व्यवर्द्धन्त धीमतः ।
अथान्यान् मानसान् पुत्रान् सदृशानात्मनोऽसृजत् ॥४
भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथ ।
मरीचिं दक्षमत्रिं च वशिष्ठं चैव मानसम् ॥५॥
नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ।
सनन्दनादयो ये च पूर्व्वं सृष्टातु वेधसा ॥६॥

सप्तमोऽध्यायः

अथ यौनसृष्टिं वक्ष्यन् पूर्वोक्तायां मानसशरीरसृष्टौ कञ्चिद् विशेषं वक्तुमाह—'तत' इति त्रिभिः । प्रागनुक्तविशेषोक्तेः तत इत्यपूर्वसृष्टिवत् प्रस्तावः, तत्रैवं शङ्क्यते, ननु मनसा संकल्पमात्रेण भूतोपादानं विना भौतिकानां देहानां कथं जन्म, कथं वा जड़ात् शरीरात् चेतनानां जन्म इति, तत्राह—तच्छरीरेति । तस्य ब्रह्मणः शरीरात् समुत्पन्नैः कार्य्यैर्देहैः कारणैः इन्द्रियैश्च सह मनसा निमित्तभूतेन मानस्यः प्रजा जज्ञिरे, ब्रह्मशरीरस्थभूतान्येव तद्देहानाम् अपादानकारणमित्यर्थः ॥ १ ॥

तथा धीमतः चेतनस्य समष्टिजीवस्य तस्य ब्रह्मणो जड़ेभ्योऽपि गात्रेभ्य उत्पद्यमानैर्देहैः तत्संकल्पमात्रादुद्बुद्धसंस्कारा व्यष्टिक्षेत्रज्ञाः समवर्त्तन्त आविर्भूता इत्यर्थः । तान् एवाह—'ते सर्वे' इति ॥ २ । ३ ॥

यौनसृष्टेः प्रयोजनमाह—'यदास्ये'ति । न व्यवर्धन्त पुत्रपौत्रादिरूपेण वृद्धिं न प्राप्ताः । अथ अन्यान् यौनसृष्टिप्रवर्त्तकान् भृग्वादीन् सृष्टवान् ॥ ४ । ५ ॥

(क) मानस्य इति वक्तव्ये मानसीरित्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न ते लोकेष्वसज्जन्त निरपेक्षाः प्रजासु ते ।
सर्वे ते ह्यागतज्ञाना वीतरागा विमत्सराः ॥७॥
तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ।
ब्रह्मणोऽभून्महाक्रोधस्त्रैलोक्यदहनक्षमः ॥८॥
तस्य क्रोधात् समुद्भुतज्वालामालाविदीपितम् ।
ब्रह्मणोऽभूत् तदा सर्व्वं त्रैलोक्यमखिलं मुने ॥९॥
भृकुटीकुटिलात् तस्य ललाटात् क्रोधदीपितात् ।
समुत्पन्नस्तदा रुद्रो मध्याह्नार्कसमप्रभः ॥१०॥
अर्द्धनारीनरवपुः प्रचण्डोऽतिशरीरवान् ।
विभजात्मानमित्युक्त्वा तं ब्रह्मान्तर्दधे ततः ॥११॥
तथोक्तोऽसौ द्विधा स्त्रित्वं पुरुषत्वं तथाकरोत् ।
बिभेद पुरुषत्वं च दशधा चैकधा च सः ॥१२॥
सौम्यासौम्यैस्तथा शान्ता शान्तैः स्त्रीत्वं च स प्रभुः ।
बिभेद बहुधा देवः स्वरूपैरसितैः सितैः ॥१३॥
ततो ब्रह्मात्मसम्भूतं पूर्व्वं सायम्भुवं प्रभुः ।
आत्मानमेव कृतवान् प्रजापाल्ये मनुं द्विज ॥१४॥
शतरूपां च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः ॥१५॥
तस्माच्च पुरुषाद् देवी सतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रसूत्याकूतिसंज्ञितम् ॥१६॥
कन्याद्वयञ्च धर्मज्ञ रूपौदार्य्यगुणान्वितम् ।
ददौ प्रसूतीं दक्षाय तथाकूतिं रुचेः(ख) पुरा ॥१७॥
प्रजापतिः स जग्राह तयोर्यज्ञः सदक्षिणः ।
पुत्रो जज्ञे महाभाग दाम्पत्यं मिथुनं ततः ॥१८॥
यज्ञस्य दक्षिणायान्तु पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवे मनौ ॥१९

आत्मनः सदृशान् इति यदुक्तं तदेव ब्रह्मसमाख्यया दर्शयति—'नव ब्रह्माण' इति। क्रोधाद् रुद्रसृष्टिं तत्रैव मनुसृष्टिं वक्तुं ब्रह्मणः क्रोधे कारणं दर्शयन्नाह—सनन्दनादय इति ॥ ६ ॥

आगतज्ञानाः प्राप्तज्ञानाः। पाठान्तरे (१) अनागतेऽप्यर्थे ज्ञानं येषाम् ॥ ७ ॥

एवं तेषु प्रजासृष्टौ निरपेक्षेषु महात्मनः सृष्टिविस्तारे प्रवृत्तस्य ब्रह्मणः क्रोधोऽभूत् ॥ ८ ॥

तस्य ब्रह्मणः क्रोधसमुद्भूतानां ज्वालानां मालाभिरभितो दीपितं त्रैलोक्यमभूद् इत्यन्वयः ॥ ९ । १० ॥

अर्द्धाभ्यां नारी च नरश्च वपुर्यस्य सः। प्रचण्डः अतिक्रोधनः। आत्मानं स्त्रीपुरुषाकारदेहं विभज्य, पृथक् कुरु इति तमुक्त्वा अन्तर्धानं गतः ॥ ११ । १२ ॥

सौम्यासौम्यैः इत्यस्यैव विवरणं शान्ताशान्तै रूपैरिति ॥१३॥

तत एकादशविभागतः क्रोधांशे निर्गते सति सात्त्विक-स्वभावं पूर्वम् आत्मनः स्वदेहात् सम्भूतम् अत एव "आत्मा वै पुत्रनामासि" इति श्रुतेरात्मानमेव तं मनुं प्रजापालनार्थमकरोदित्यर्थः ॥ १४ ॥

तां स्वदेहार्द्धभूतां नारीं पत्न्यर्थं जगृहे। तपसानिर्धूतकल्मषामिति च, देव इति च, विभुरिति च, सापिण्ड्यदोषपरिहारार्थमुक्तम् (२) ॥ १५ ॥

व्यजायत प्रसूता ॥ १६ । १७ ॥

स च रुचिः तां जग्राह। तयोर्दक्षिणासहितो यज्ञो मिथुनमेव पुत्रो जज्ञे ॥ १८ ॥

स्वायम्भुवे मनौ तन्मन्वन्तरे यामा इति देवाः समाख्याताः ॥ १९ । २० ॥

---

(१) पाठान्तर इति—'सर्वे ते ह्यागतज्ञाना' इत्यत्र 'सर्वे तेऽनागतज्ञाना' इति पाठान्तर इत्यर्थः।

(ख) रुचेरिति सम्बन्धसामान्यविवक्षया षष्ठी।

(२) 'सापिण्ड्यदोषपरिहारार्थमुक्त'मिति स्वामी। अत्र 'असपिण्डा च या मातुरसगोत्रा च या पितु' रित्यादि वचनैर्मातापितृसपिण्डायाः पत्नीत्वेन ग्रहणे दोषस्य सूचनात्तत्परिहारस्य कर्त्तव्यत्वेन अत्रापि तत्परिहारः कृत एवेति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिस्तथा ।
ससर्ज्ज कन्यास्तासान्तु सम्यङ् नामानि मे शृणु ॥२०
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्म्मेधा क्रिया तथा ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदश ।२३
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ।
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ॥२२।
ख्यातिः सत्यथ सम्भूतिः स्मृतिः प्रीतिः क्षमा तथा।
सन्नतिश्चानसूया च ऊर्ज्जा स्वाहा स्वधा तथा ।२३
भृगुर्भवो मरीचिश्च तथा चैवाङ्गिरा मुनिः ।
पुलस्त्यः पुलहश्चैव क्रतुश्चर्षिवरस्तथा ॥२४॥
अत्रिर्व्वशिष्ठो वह्निश्च पितरश्च यथाक्रमम् ।
ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तम ॥२५॥
श्रद्धा कामं चला दर्पं नियमं धृतिरात्मजम् ।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरसूयत ॥२६॥
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ॥२७॥
व्यवसायं प्रजज्ञे(ग) वै क्षेमं शान्तिरसूयत ।
सुखं सिद्धिर्यशः कीर्त्तिरित्येते(घ) धर्म्मसूनवः ॥२८॥
कामान् नन्दा सुतं हर्षं धर्म्मपौत्रमसूयत ।
हिंसा भार्या त्वधर्म्मस्य तस्यां जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥२९॥
माया च वेदना चैव मिथुनन्त्विदमेतयोः ।
तयोर्जज्ञेऽथ वै माया मृत्युं भूतापरिहारिणम् ॥३०
वेदना स्वसुतञ्चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिजराशोकतृष्णाक्रोधश्च जज्ञिरे ॥३१॥
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ।
नैषां भार्य्यास्ति पुत्रो वा ते सर्व्वे ह्यूर्ध्वरेतसः ।३२

तासां नामानि कथयन्नेव विवाहानाह—'श्रद्धा' इत्यादि-पञ्चभिः ॥ २१ । २२ । २३ ॥

धर्मपत्नीनां त्रयोदशानां पुत्रानाह—'श्रद्धा' इति त्रिभिः चला लक्ष्मीः ॥ २६ ॥

क्रिया त्रिगुणा, अतः तमोऽंशेन दण्डं, रजोऽंशेन नयं, सत्त्वांशेन विनयम् अनौद्धत्यरूपम् असूयत । लज्जा शारीरं विनयं, वपुःसंज्ञा व्यवसायात्मकं प्रजज्ञे ॥ २७ ॥

कीर्त्तिर्यशःसंज्ञं पुत्रमसूयत ॥ २८ ॥

नन्दा कामस्य भार्या । तदेवं धर्मभार्य्याणां वंशा उक्ताः, अन्यासां दक्षकन्यानां पुत्रान् "देवौ धाताविधातारौ भृगोः ख्यातिरसूयत" इत्यादिना उत्तराध्यायत्रये वक्ष्यति । तत्र तावद् धर्मवंशोक्त्या तत्प्रतियोगितया च बुद्धिस्थस्य अधर्मस्य वंशं प्रसक्तानुप्रसक्तेन च नित्यप्रलयादिकमाह—'हिंसा' इत्यादिना । धर्माधर्मौ च ब्रह्मणः पुत्रौ । "धर्मः स्तनाद् दक्षिणतो यत्र नारायणः स्वयम् । अधर्मः पृष्ठतो यस्मात् मृत्युलोकभयङ्करः" इति शुकोक्तेः निकृतिर्वञ्चनं ताभ्या-मनृतनिकृतिभ्यां भय-नरकाख्यं पुत्रद्वयं जज्ञे ॥ २९ ॥

एतयोस्तु भय-नरकयोर्यथाक्रमं माया च वेदना चेति मिथुनत्वसम्पादकं भार्याद्वयञ्च ताभ्यामेव जज्ञे इत्यर्थः । तयोर्मायावेदनयोर्मध्ये माया मृत्युं जज्ञे जनयामास भया-दित्यर्थसिद्धम् ॥३०॥

वेदना च दुःखं स्वसुतं स्वयोग्यं सुतं रौरवान्नरकाज्-जनयामासेत्यर्थः ॥३१॥

दुःखोत्तरा दुःखोदर्का यतोऽधर्मलक्षणाः पापरूपाः । यद्वा प्राचीनाधर्मज्ञापकाः, तत्फलत्वादेषां व्याध्यादीनाम् । ऊर्ध्वरेतसः कार्य्यानुत्पादकाः, चरमकार्यदुःखभोगा-त्पकत्वात् ॥३२॥

(ग) प्रजज्ञे इति—णिजर्थान्तर्भावात् जनयामासेत्यर्थः ।

(घ) सिद्धिः सुखमसूयत, कीर्त्तिः यशः असूयतेत्यन्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रौद्राणि तानि रूपाणि विष्णुर्मुनिवरात्मज ।
नित्यप्र लयहेतुत्वं जगतोऽस्य प्रयान्ति वै । ॥३३॥
दक्षो मरीचिरत्रिश्च भृग्वाद्याश्च प्रजेश्वराः ।
जगत्यत्र महाभाग नित्यसर्गस्य हेतवः ॥३४॥
मनवो मनुपुत्राश्च भूपा वीर्य्यधनाश्च ये (ङ) ।
सन्मार्गाभिरताः शूरास्ते नित्यस्थितिकारिणः ॥३५

मैत्रेय उवाच ।

येयं नित्या स्थितिर्ब्रह्मन् नित्यसर्गस्तथेरितः ।
नित्याभावाश्च तेषां वै स्वरूपं मम कथ्यताम् ॥३६

पराशर उवाच ।

सर्गस्थितिविनाशांश्च भगवान् मधुसूदनः ।
तैस्तैरूपैरचिन्त्यात्मा करोत्यव्याहतान् विभुः ॥३७॥

नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥३८॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः । (च)
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥३९॥
ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि ।
नित्यः सदैव जातानां यो विनाशो दिवानिशम् ॥४०॥
प्रसूतिः प्राकृतेर्या तु सा सृष्टिः प्राकृती स्मृता ।
दैनन्दिनी तथा प्रोक्ता यान्तरप्रलयादनु ॥४१॥
भूतान्यनुदिनं यत्र जायन्ते मुनिसत्तम ।
नित्यः सर्गः स तु प्रोक्तः पुराणार्थविचक्षणैः ॥४२॥
एवं सर्व्वशरीरेषु भगवान् भूतभावनः ।
संस्थितः कुरुते विष्णुरुत्पत्तिस्थितिसंयमान् (छ) ॥४३
सृष्टिस्थितिविनाशानां शक्तयः सर्व्वदेहिषु ।
वैष्णव्यः परिवर्त्तन्ते मैत्रेयाऽहर्निशं सदा ॥४४॥

नित्यप्रलयहेतुप्रसङ्गान्नित्यसर्गनित्यस्थितिहेतूनाह—'दक्ष' इति द्वाभ्याम् ॥३४।३५॥

ननु मन्वादीनां कादाचित्कानां कथं नित्यस्थित्यादिहेतुत्वमित्याशयेन पृच्छति—'येय'मिति । नित्याभावाः—नित्यप्रलयाः ॥३६॥

तैस्तैर्दक्षादिमन्वादिरूपैर्भगवानेव सर्गादीन् करोति, अतो न उक्तदोषप्रसङ्ग इत्यर्थः । अव्याहतान् अविच्छिन्नान् ॥३७॥

तत्र प्रलयं चतुर्धा प्रपञ्चयति—'नैमित्तिक' इति त्रिभिः ॥३८॥

यच्छेते - यदा शेते । ब्रह्मनिद्रानिमित्तो नैमित्तिकः । ब्रह्माण्डं यदा प्रकृतौ लयं प्रयाति, स प्राकृतिक इत्यर्थः ॥३९॥ ज्ञानात् परमात्मनि योगिनो लय आत्यन्तिकः, सदैव दीपज्वालावत् सान्तत्येन जातानां दिवानिशं यो विनाशः स नित्यः ॥४०॥

त्रिविधां सृष्टिमाह—'प्रसूति'रिति । (छ) महाप्रलयावसाने प्रकृतेः सकाशाद् या महदादिप्रसतिः, सा प्राकृती सृष्टिः । अवान्तरप्रलयादनन्तरं या चराचरसृष्टिः, सा दैनन्दिनी ॥४१॥

भूतानीति—अस्मदादिसृष्टिप्रवाहो नित्यसर्ग इत्यर्थः । आत्यन्तिकप्रलयवदात्यन्तिकसृष्टेरभावात् सृष्टिस्त्रिविधैव ॥४२॥

उपसंहरति—'एव'मिति ॥४३॥

तर्हि विष्णोः सर्वशरीरेषु सर्वदा स्थितत्वात् कालभेदेन उत्पत्त्यादयो न स्युः, तत्राह—'सृष्टी'ति । तथापि विष्णु

(ङ) वीर्य्यधना इति—वीर्य्यं धनं येषां ते वीर्यधना वीर्य्यवन्त इत्यर्थः ।

(च) जगतः पतिरिति ब्रह्मस्वरूपो भगवान् जनार्दनो वा ।

(छ) उत्पत्तिस्थितिसंयमान् सृष्टिस्थितिप्रलयान् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुणत्रयमयं ह्येतद् ब्रह्मन् शक्तित्रयं महत् ।
योऽतियाति स चात्येव परं नावर्त्तते पुनः ॥४५॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे सप्तमोऽध्यायः ।

शक्तीनां सत्त्वादीनां तत्र तत्र कालभेदेन सञ्चारान्नायं दोष इति भावः ॥४४॥

यस्मात् त्रिगुणात्मकविष्णुशक्तित्रयपरिवृत्त्या सृष्ट्यादि-प्रवाहो भवति, अतो गुणातीतस्य न पुनस्तत्प्रवाहपात इत्याह —'गुणत्रये'ति। योऽतियाति अतिक्रामति, स परं पदं यात्येव "न पुनरावर्त्तते" इति श्रुतेः ॥४५॥

इति श्रीविष्णुपुराणटीकायामात्मप्रकाशाभिधायां विष्णुपुराणरीकां प्रथमांशे सप्तमोऽध्यायः ॥

पाठान्तराणि :—१२ श्लोके,—चैकधा पुनः ।
१७ „ —आकूतिं रुचये पुरा ।
४१ „ —प्राकृता स्मृता ।

कश्चिदग्रन्थे पृथगूरूपेण षष्ठश्लोकस्यान्तिमपङ्क्तिम् अष्टमश्लोकस्यादिमपङ्क्तिञ्च निर्दिश्य निम्नलिखितं श्लोकद्वयमधिकं दृश्यते। तद् यथा—

नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ।
ख्यातिं भूतिञ्च सम्भूतिं क्षमां प्रीतिं तथैव च ॥६
सन्नतिञ्च तथैवोर्जामनसूयां तथैव च ।
प्रसूतिञ्च ततः सृष्ट्वा ददौ तेषां महात्मनाम् ॥७
पत्न्यो भवध्वमित्युक्त्वा तेषामेव तु दत्तवान् ।
सनन्दनादयो ये च पूर्व्वसृष्टास्तु वेधसा ॥८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टमोऽध्यायः ।

[लक्ष्म्युत्पत्तिकथनम्]

पराशर उवाच ।

कथितस्तामसः सर्गो ब्रह्मणस्ते (क) महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥१॥

कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः ॥२॥

रुदन् वै सुस्वरं (ख) सोऽथ द्रवंश्च द्विजसत्तम ।
किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच ह॥३॥

नाम देहीति (ग) तं सोऽथ प्रत्युवाच प्रजापतिम् ।
रुद्रस्त्वं देव नाम्नासि मा रोदीर्धैर्यमावह ॥४॥

एवमुक्तः पुनः सोऽथ सप्तकृत्वो (घ) रुरोद वै ।
ततोऽन्यानि तदौ तस्मै (ङ) सप्त नामानि वै प्रभुः ।
स्थानानि चैषामष्टानां(च) पत्नीः पुत्रांश्च वै प्रभुः ।५

भवं सर्व्वं महेशानं तथा पशुपतिं द्विज ।
भीममुग्रं महादेवं उवाच स पितामहः ॥६॥

चक्रे नामान्यथैतानि स्थानान्येषां चकार सः ।
सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥७॥

सुवर्चला तथैवोमा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहणी च यथाक्रमम् ॥८॥

सूर्य्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह ।
पत्न्यः स्मृता महाभाग तदपत्यानि मे शृणु ।
येषां सूतिप्रसूतैर्वा इदमापूरितं जगत् ॥९॥

शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः खर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुताः ।१०

अष्टमः अध्यायः ।

दक्षजामातुर्धर्मस्य वंशोक्तौ तत्प्रतियोगितया बुद्धिस्थस्याधर्मस्य नित्यप्रलयहेतुं तामसं वंशमुक्त्वा इदानीं तदनुवादपूर्वकं प्रस्तुतं दक्षकन्याद्वयमनुवर्तयितुं तत्कन्यापरिणेतुर्नीललोहितरुद्रस्य सर्गमाह – 'कथित' इति। यद्यपि "ख्यातिः सत्यथ सम्भूतिः" इत्युपदेशक्रमेण ख्यातेरन्वयः प्रथमं वक्तुं युक्तः, तथापि तत्कथा अतिविततत्वादनन्तरं वक्ष्यते (च)। यद्वा पुर्वोक्तात् तामसाद् रुद्रसर्गादन्योऽयं कुमारसर्गान्तर्भूतः सात्त्विको रुद्रसर्गः। तमिमं शृणुष्व इति सम्बन्धः ॥१॥

रुदन् द्रवंश्च प्रादुरासीद् इति रुद्रनामनिरुक्तिः। "एवमुक्तास्तु रुरुदुर्द्रुद्रुवुश्च समन्ततः। रोदनाद् द्रवणाच्चैव रुद्रा नाम्नेति विश्रुताः॥" इति वायूक्तेः ॥२।३॥

हे देव! त्वं रुद्रोऽसि रोदनाद् द्रवणाच्चेत्यर्थः ॥४॥

(क) ब्रह्मण इति कर्त्तरि षष्ठी।

(ख) सुस्वरमिति शोभनः स्वरः यत्र तत् तथाभूतम्। रोदनक्रियाविशेषणमिदम्। द्रवन् धावन्।

(ग) नाम देहि मह्यमिति शेषः। मम किमपि नाम कुरु इत्यर्थः।

(घ) सप्तकृत्वः सप्त वारान्।

(ङ) तस्मै सप्तवारं रोदनकारिणे नीललोहिताय कुमाराय।

(च) एषामष्टानामिति—प्रथमं 'रुद्रस्त्वं देव नाम्नासि' इत्यनेन तस्य कुमारस्य रुद्रेति नाम कृतम्। अनन्तरञ्च सप्तकृत्वो रोदनात् रोदनवारसंख्यामनुसृत्य भवादीनि सप्तनामानि कृतानि तदेवं समष्ट्या अष्ट नामानि जातानि। एकस्यापि तस्य रोदनादिनामोपाधिभेदादौपचारिकमष्टत्वमाश्रित्य 'एषामष्टानामित्युक्तिसङ्गतिः। अत एवात्र श्रीधरः—'रोदनादेर्नामनिरुक्तिहेतुत्वात् रोदनादिनामोपाधिभेदादष्टानामित्युच्यत' इति व्याचष्ट।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवम्प्रकारो रुद्रोऽसौ सतीं भार्य्यामविन्दत ।
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ॥११॥
हिमवद्दुहिता साभू-(छ)न्मेनायां द्विजसत्तम ।
उपयेमे पुनश्चोमामनन्यां भगवान् भवः ॥१२॥
देवौ धातृविधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥१३॥

मैत्रेय उवाच ।

क्षीराब्धौ श्रीः समुत्पन्ना श्रूयतेऽमृतमन्थने ।
भृगोः ख्यात्यां समुत्पन्नेत्येतदाह कथं भवान् ॥१४॥

पराशर उवाच ।

नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥१५॥
अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः ।
बोधो विष्णुरियं बुद्धिर्धर्म्मोऽसौ सत्क्रिया त्वियम् ॥१६
स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिर्भूधरो हरिः ।
सन्तोषो भगवान् लक्ष्मीस्तुष्टिर्मैत्रेय शाश्वती ॥१७॥
इच्छा श्रीर्भगवान् कामो यज्ञोऽसौ दक्षिणा तु सा ।
आज्याहुतिरसौ देवी पुरोडाशो जनार्द्दनः ॥१८॥
पत्नीशाला मुने लक्ष्मीः प्राग्वंशो मधुसूदनः ।
चितिर्लक्ष्मीर्हरिर्यूप इध्मा श्रीर्भगवान् कुशः ॥१९॥
सामस्वरूपी भगवानुद्गीतिः कमलालया ।
स्वाहा लक्ष्मीर्जगन्नाथो वासुदेवो हुताशनः ॥२०॥
शङ्करो भगवाञ्छौरिर्भूतिर्गौरी द्विजोत्तम ।
मैत्रेय केशवः सूर्य्यस्तत्प्रभा कमलालया ॥२१॥

परमेश्वरस्यापि सतो रोदनादि शिशुत्वनाट्यं लोकसंग्रहाय पितृपारतन्त्र्यद्योतनार्थम् । अत एव आश्चर्यत्वाद् रोदनादेर्नामनिरुक्तिहेतुत्वाद् रोदनादिनामोपाधिभेदादष्टानामित्युच्यते ॥५॥

अन्यानि सप्त नामानि ददावित्युक्तम्, तान्येवाह—'भव'मिति । तं भवादिनामानमुवाच—तस्य भवादिनामानि कृतवानित्यर्थः ॥६॥

तदेवाह—'चक्रे नामानी'ति । रुद्रभवादीनां सूर्यादीनि अष्ट स्थानानि । तान्येव अभिव्यक्तिस्थानत्वात् तनवो मूर्त्तय उच्यन्ते । दीक्षितो ब्राह्मण इति सधर्मानुष्ठातरि क्षेत्रज्ञे परमात्माभिव्यक्तेस्तन्मूर्त्तित्वम् । "आत्मा तस्याष्टमी मूर्त्तिः शिवस्य परमात्मनः । व्यापिकेतरमूर्त्तीनां विश्वं तस्माच्छिवात्मकम् । स्थानेष्वेतेषु ये रुद्रं ध्यायन्ति प्रणमन्ति च । तेषामष्टतनुर्देवो ददाति परमं पदम्" ॥ इति वायूक्तेः । सूर्यो जलं मही वायुर्वह्निरिति क्रमो द्रष्टव्यः । तथा सति सुवर्चलादीनां पत्नीनां यथाक्रमं सम्बन्धः । वायोः शिवा पत्नी, वह्नेः स्वाहेति सिध्यति, वक्ष्यमाणेऽपि पुत्रक्रमे वह्नेः स्कन्दः पुत्र इति उपपत्स्यते, अतो वह्निर्वायुरिति पाठक्रमो न विवक्षितः ॥७॥८॥

सूतिप्रसूतैः पुत्रैः पौत्रादिभिश्च ॥८॥१०॥

उक्तस्य रुद्रसर्गस्य प्रस्तुतोपयोगमाह—'एवम्प्रकार' इति । सतीं नाम दक्षस्य कन्याम्, दक्षकोपात्—पित्रा दक्षेण स्वयज्ञे रुद्रवर्जनोद्भूतात् । अतस्तस्याः सन्ततिर्नाभूदिति भावः ॥११॥

अनन्यां भवैकनिष्ठाम् ॥१२॥

श्रीः नारायणस्य पत्नी या तां श्रियं चासूयत ॥१३॥

प्रश्नः स्पष्टार्थः ॥१४॥

उत्तरस्यायं भावः,—तस्या उत्पत्तिमत्त्वे भवेदयं विरोधः । नित्याया एव सर्वगतायाः सर्वात्मिकायाश्च विष्णुशक्तेस्तस्याः कार्यवशेन विष्णोरिवाविर्भावमात्रम् । अतः पूर्वं भृगुसुता-

---

(छ) सा सती । हिममद्दुहिता—हिमवतः हिमालयस्य गिरेः दुहिता । मेनायां मेनकायां तदाख्यायां हिमवतो भार्य्यायाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुः पितृगणः पद्मा स्वधा शाश्वततुष्टिदा ।
द्यौः श्रीः सर्व्वात्मको विष्णुरवकाशोऽतिविस्तरः ॥२२

शशाङ्कः श्रीधरः कान्तिः श्रीस्तस्यैवानपायिनी ।
धृतिर्लक्ष्मीर्जगच्चेष्टा वायुः सर्व्वत्रगो हरिः ॥२३॥

जलधिर्द्विज गोविन्दस्तद्वेला श्रीर्महामते ।
लक्ष्मीस्वरूपमिन्द्राणी देवेन्द्रो मधुसूदनः ॥२४॥

यमश्चक्रधरः साक्षाद् धूमोर्णा कमलालया ।
ऋद्धिः श्रीः श्रीधरो देवः स्वयमेव धनेश्वरः ॥२५॥

गौरी लक्ष्मीर्महाभागा केशवो वरुणः स्वयम् ।
श्रीर्देवसेना विप्रेन्द्र देवसेनापतिर्हरिः ॥२६॥

अवष्टम्भो गदापाणिः शक्तिर्लक्ष्मीर्द्विजोत्तम ।
काष्ठा लक्ष्मीर्निमेषोऽसौ मुहूर्त्तोऽसौ कला तु सा ॥

ज्योत्स्ना लक्ष्मीः प्रदीपोऽसौ सर्व्वः सर्व्वेश्वरो हरि
लताभूता जगन्माता श्रीर्विष्णुर्द्रुमसंस्थितः ॥२८॥

विभावरी श्रीर्दिवसो देवश्चक्रगदाधरः ।
वरप्रदो वरोविष्णुर्वधूः पद्मवनालया ॥२९॥

नदस्वरूपी भगवाञ्छ्रीर्नदीरूपसंस्थितिः ।
ध्वजश्च पुण्डरीकाक्षः पताका कमलालया ॥३०॥

तृष्णा लक्ष्मीर्जगत्स्वामी लोभो नारायणः परः ।
रति-रागौ च धर्मज्ञ लक्ष्मीर्गोविन्द एव च (ज) ॥३

रूपेण आविर्भूताया दुर्वासःशापेन च तिरोभूतायाः पुनः क्षीराब्धावाविर्भावो न विरुध्यत इति। यद् एतदाह—'नित्यैव' इत्यादिना यावदुत्तराध्यायसमाप्ति ॥१५॥

लक्ष्मीनारायणयोः सर्वात्मकत्वं तथा तथोपासनार्थं प्रपञ्चयति—'अर्थो विष्णु'रित्यादिना यावदध्यायसमाप्ति। वाणी अर्थाभिधायिका वाक् इयं श्रीः। नीतिर्दण्डनीतिरेषा श्रीः, नयः सामाद्युपायः। बोधः आत्मप्रकाशः, बुद्धिस्तदभिव्यञ्जिका धीवृत्तिः। धर्मोऽपूर्वं, सत्क्रिया यागादिः ॥१६॥

भूधरो गिरिर्भूपतिर्वा । यदृच्छालाभैरलं प्रत्ययः सन्तोषः, तथानिर्वृतिस्तुष्टिः ॥ १७ ॥

इच्छा धनादिस्पृहा, कामस्तद्भोगाभिलाषः ॥ १८ ॥

चितिरिष्टिकाचयनम् ॥१९ ॥

सामस्वरूपी रथन्तरादिगानरूपः। उद्गीतिस्तद्गानव्यापारः, हुताशनो वासुदेवः, स्वाहा तु लक्ष्मीः ॥२०।२१॥

द्यौः श्रीः, अवकाशो विष्णुः ॥ २२ ॥

धृतिर्मेधादिधारणं, जगच्चेष्टा च लक्ष्मीः। तत्कर्त्ता वायुर्हरिः ॥ २३। २४ ॥

धूमोर्णा यमस्य भार्या। धनेश्वरः कुबेरः, ऋद्धिस्तस्य पत्नी ॥ २५ ॥

वरुणस्य भार्यापि गौरीसंज्ञा ॥ २६ ॥

अवष्टम्भः पुरुषकारः, शक्तिस्तत्सामर्थ्यम् ॥ २७ ॥

ज्योत्स्ना प्रभा, दीपो हरिः, हरेर्विशेषणं सर्वः सर्वेश्वश्चेति। द्रुमरूपः संस्थितो लताया आश्रयः ॥ २८ ॥

वधूर्जायां, वरः पतिः ॥ २९ । ३० ॥

इतस्ततः पुनरुपादित्सा तृष्णा, तत्प्राप्त्यार्थपर्याप्तिर्लोभः।

(ज) 'रतिरागौ लक्ष्मीः गोविन्द एव च' इत्यत्र रतिरागाभ्यां सह लक्ष्मीगोविन्दयोर्यथाक्रममन्वयः। तेन रतिर्लक्ष्मीः रागश्च गोविन्द इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किञ्चातिबहुनोक्तेन संक्षेपेणेदमुच्यते ।
देवतिर्य्यङ्मनुष्यादौ पुंनाम्नि भगवान् हरिः ।
स्त्रीनाम्नि लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम् (झ) ॥३२

इति श्रीविष्णुपुराणे प्रथमेऽंशे अष्टमोऽध्यायः ।

रागः कामः, रतिस्तत्पत्नी ॥ ३१ ॥

अनयोराभ्यां परमन्यन्न विद्यते ॥ ३२ ॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे अष्टमोऽध्यायः ।

पाठान्तराणि—१८—दक्षिणा त्वियम् ।
२१—गौरी लक्ष्मीर्द्विजोत्तम ।
२२—शाश्वतपुष्टिदा ।
३०—नदीरूपसंस्थिता ।
३१—तृष्णालक्ष्मीर्जगन्नाथो— ।
३२—पुन्नाम्नाभगवान् हरिः ।
स्त्रीनाम्नी — ।

नवमोऽध्यायः

[इन्द्रं प्रति दुर्वाससः शापः, ब्रह्मणः समीपे देवानां गमनम्, समुद्रमन्थनम्, इन्द्रस्य लक्ष्मीस्तुतिश्च]

पराशर उवाच ।

इदञ्च शृणु मैत्रेय यत् पृष्टोऽहमिह त्वया ।
श्रीसम्बद्धं मया ह्येतच्छ्रुतमासीन्मरीचितः ॥१॥
दुर्व्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम् ।
स ददर्श स्रजं दिव्यामृषिर्विद्याधरीकरे ॥२॥
सन्तानकानामखिलं यस्या गन्धेन वासितम् ।
अतिसेव्यमभूद् ब्रह्मन् तद्वनं वनचारिणाम् ॥३॥
उन्मत्तव्रतधृग् विप्रस्तां दृष्ट्वा शोभनां स्रजम् (क) ।
तां ययाचे वरारोहां विद्याधरवधूं ततः ॥४॥
याचिता तेन तन्वङ्गी मालां विद्याधराङ्गना ।
ददौ तस्मै विशालाक्षी सादरं प्रणिपत्य च (ख) ॥५॥

नवमोऽध्यायः ।

तदेवं मैत्रेयकृताक्षेपपरिहारार्थं सर्वात्मत्वप्रपञ्चनेन विष्णोरिव लक्ष्म्या अपि नित्यत्वमुक्तम्, इदानीम् आविर्भावतिरोभावाभ्यां तदुक्तं विरोधं परिहर्त्तुमाह इदञ्चेत्यादिना-पूर्वं भृगुसुता सतीत्यन्तेन ग्रन्थेन । भृगुसुतापि श्रीर्यथा क्षीराब्धौ जाता इत्युच्यते इदञ्च शृणु । मयापि एवमेव सन्दिहानेन मरीचेः सकाशाद् एतच् श्रुतमासीत् ॥१॥

तत्र प्रथमं भृगुसुतायाः सत्यास्तिरोधाने कारणं वक्तुमाह-उन्मत्तव्रतधृग्योगिनो हि जड़ोन्मत्तपिशाचा इव दुर्वासा इति । शङ्करस्यांश इत्यनेन तस्य शक्रशापसामर्थ्यम् अपराधासहिष्णुत्वञ्चोक्तम् । सन्तानो देवतरुः, तदीयानां पुष्पाणां स्रजं मालाम् । यस्या गन्धेन वासितं तद् वनं वनचारिणाम् अतिसेव्यमभूत् ॥२।३॥

(झ) पंनाम्ना पुंलिङ्गानुशिष्टतत्तत्—संज्ञया । स्त्रीनाम्ना स्त्रीलिङ्गानुशिष्टतत्तत्संज्ञया । नाममात्रेण भेदः, न तत्र पदार्थगतोऽपि विशेष इति भावो व्यज्यते ।

(क) उन्मत्तव्रतधृक्—उन्मत्तजनोचिताचरणपरायणः । तत्र हेतुः श्रीधरेण प्रोक्तः ।

(ख) तेन दुर्वाससा । तस्मै दुर्वाससे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तामादायात्मनो मूर्ध्नि स्रजमुन्मत्तरूपधृक् ।
कृत्वा स विप्रो मैत्रेय परिबभ्राम मेदिनीम् ॥६॥

स ददर्श समायान्तमुन्मत्तैरावतस्थितम् (ग) ।
त्रैलोक्याधिपतिं देवं सह देवैः शचीपतिम् ॥७॥

तामात्मनः स शिरसः स्रजमुन्मत्तषट्पदाम् (घ) ।
आदायामरराजाय चिक्षेपोन्मत्तवन्मुनिः ॥८॥

गृहीत्वामरराजेन स्रगैरावतमूर्द्धनि ।
न्यस्ता रराज कैलासशिखरे जाह्नवी यथा (ङ)॥९॥

मदान्धकारिताक्षोऽसौ गन्धाकृष्टेन वारणः ।
करेणाघ्राय चिक्षेप तां स्रजं धरणीतले ॥१०॥

ततश्चुक्रोध भगवान् दुर्वासा मुनिसत्तमः ।
मैत्रेय देवराजं तं क्रुद्धश्चैतदुवाच ह ॥११॥

दुर्वासा उवाच ।

ऐश्वर्यमत्त दुष्टात्मन्नतिस्तब्धोऽसि वासव ।
श्रियो धाम स्रजं यस्त्वं मद्दत्तां नाभिनन्दसि ॥१२॥

प्रसाद इति नोक्तं ते प्रणिपातपुरःसरम् ।
हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता ॥१३॥

मया दत्तामिमां मालां यस्मान्न बहु मन्यसे ।
त्रैलोक्यश्रीरतो मूढ़ विनाशमुपयास्यति ॥१४॥

मां मन्यतेऽन्यैः सदृशं न्यूनं शक्र भवान् द्विजैः ।
अतोऽवमानमस्माकं मानिना भवता कृतम् (च) ॥१५॥

मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले ।
तस्मात् प्रनष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति (छ) ॥१६॥

वर्त्तन्ते । तां स्रजं तां विद्याधरवधूं याचितवान् इति द्विकर्मको-याचतिः ॥४।५॥

तां स्रजं मूर्ध्नि कृत्वा मेदिनीं परिबभ्राम इत्यन्वयः ॥६।८॥

ऐरावतमूर्द्धनि न्यस्ता सा च कैलासशिखरे जाह्नवी इव रराज ॥९॥

मदेन अन्धकारिते सञ्जातान्धकारे अक्षिणी यस्य असौ । करेण आघ्राय इति—करिणः कररयैव घ्राणत्वात् ॥१०।११॥

अतिस्तब्धोऽसि गर्वितोऽसि । श्रियो धाम लक्ष्म निवासभूताम् ॥१२॥

ते त्वया हर्षेण उत्फुल्लौ विकसितौ कपोलौ यस्य तथा भूतेन सता त्वया ॥१३॥

त्रैलोक्यश्रीस्तव त्रैलोक्यैश्वर्य्यम् विनाशम्, अतो माला बहुमानाकरणदोषात् ॥१४।१५॥

गजेन क्षिप्ताया उपेक्षितत्वाद् भवतैव क्षिप्ता इत्युक्त तस्मान्मालाया धरणीतले प्रक्षेपदोषात् । त्वदीयं त्रैलोक्

(ग) उन्मत्तैरावतस्थितमिति-उन्मत्ते मदमत्ते ऐरावते तदाख्ये वासवस्य मातङ्गे स्थितम् अवस्थितमारूढ़मिति यावत् । शची-पतिम् शक्रम् ।

(घ) उन्मत्तषट्पदामिति—उन्मत्ताः तन्मालाघटकप्रसून-परिमललोभेनोन्मादग्रस्ताः षट्पदाः भ्रमरा यया तां तथाभूताम् । एतेन तन्मधुलोभेन सम्मिलितैः षट्पदैस्तस्य मुनेः सुतरामुपबृंहितत्वं-व्यज्यते ।

(ङ) कैलासशिखरस्य तथा जाह्नव्याः शुभ्रत्वात् शुभ्रस्यैरा वतशिरसः शुभ्रकुसुममालायाश्च ताभ्यां सादृश्यमुपपन्नम् ।

(च) मानिना अभिमानवता साहङ्कारेणेति यावत् अवमानम् अपमानः । पुंलिङ्गस्यापि अवमानशब्दस्य क्लीवलिङ्गे प्रयोग आर्षः । कृतम् कृतः । अत्रापि पूर्ववदार्षत्वम् । अथवा—माधातोरनट्प्रत्ययेन अवमानमिति निष्पाद्य धातूनामने कार्थत्वात् कथञ्चिदुपपत्तिः कार्य्या । तत्कल्पे अवमानं अप्रकृष्टं परि माणं कृतमिति वार्थः ।

(छ) प्रनष्टलक्ष्मीकमिति—प्रकर्षेण अतिशयेन नष्टा विलुप्ता लक्ष्मीः ऐश्वर्य्याधिष्ठात्री तदाख्या देवी यत्र तथाभूतमित्यर्थे बहु व्रीहिणा कप्रत्ययेन सिद्धम् । श्रीधरस्तु 'दारिद्र्याभिभूत' मित्यनेन तात्पर्य्यविवरणं कृतवान् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्य सञ्जातकोपस्य भयमेति चराचरम् ।
तं त्वं मामतिगर्वेण देवराजावमन्यसे ॥१७॥

पराशर उवाच ।

महेन्द्रो वारणस्कन्धादवतीर्य्य त्वरान्वितः ।
प्रसादयामास तदा दुर्वाससमकल्मषम् ॥१८॥
प्रसाद्यमानः स तदा प्रणिपातपुरःसरम् (ज) ।
प्रत्युवाच सहस्राक्षं दुर्व्वासा मुनिसत्तमः ॥१९॥

दुर्वासा उवाच

नाहं कृपालुहृदयो न च मां भजते क्षमा ।
अन्ये ते मुनयः शक्र दुर्व्वाससमवेहि माम् ॥२०॥
गौतमादिभिरन्यैस्त्वं गर्व्वमापादितो मुधा ।
अक्षान्तिसारसर्वस्वं दुर्वाससमवेहि माम् ॥२१॥
वसिष्ठाद्यैर्दयासारैः स्तोत्रं कुर्व्वद्भिरुच्चकैः ।
गर्व्वं गतोऽसि येनैवं मामप्यद्यावमन्यसे ॥२२॥
ज्वलज्जटाकलापस्य भृकुटीकुटिलं मुखम् (झ) ।
निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम् ॥२३॥
नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो ।
विड़म्बनामिमां भूयः करोष्यनुनयात्मिकाम् (ञ) ॥२४

पराशर उवाच ।

इत्युक्त्वा प्रययौ विप्रो देवराजोऽपि तं पुनः ।
आरुह्यैरावतं ब्रह्मन् प्रययावमरावतीम् ॥२५॥

प्रनष्टलक्ष्मीकं दारिद्र्याभिभूतं भविष्यति इति द्वितीयः शापः ॥१६।१७॥

अकल्मषं सापराधशापे दोषाभावात् ॥१८।१९॥

अन्ये ते मुनयः ये दयालवः । अहं तु न तथा ॥२०॥

तदेवाह, गौतमादिभिः स्वभार्याधर्षणाद्यपराधेऽपि त्वयि दाक्षिण्येन अनुग्रहपरैः मुधा वृथैव गर्वं प्रापितोऽसि । अक्षान्तौ एव सारस्तपोबलं, तदेव सर्वस्वं यस्य तं माम् ॥२१॥

उच्चैरुच्चकैः स्तुवद्भिः, यद्वा उच्चकैरुन्नमितैः शिरोभिरुच्चासनोपविष्टस्य एव स्तोत्रं कुर्वद्भिरित्यर्थः ॥२२॥

एवं सति । ज्वलज्जटेति, मम मुखं निरीक्ष्य यो भयं न गतः, स कः—न कोऽपीत्यर्थः ॥२३॥

विड़म्बनाम् अवहासम् ॥२४।२५॥

अपध्वस्तं नष्टप्रायम् ॥२६॥

निःसत्त्वाः धैर्यशून्याः अतो लोभादिभिः उपहतेन्द्रियाः अतः स्वल्पेऽप्यर्थे साभिलाषाः ॥२८॥

एतदेव स्पष्टयति यत इति । यतो यत्र सत्त्वं धैर्य्यं तत्र लक्ष्मीः । सत्त्वं भूत्यनुसारि लक्ष्म्या एवानुसारी लक्ष्म्या एवानुवर्त्ति एवं धैर्यलक्ष्म्योः परस्पराविनाभूतत्वात् श्रीनिवृत्त्या सत्त्वनिवृत्तिमाह निःश्रीकाणामिति । तेन सत्त्वेन विना गुणाः औदार्य्यसन्तोषक्षमाशीलादयः कुतः ॥२९॥

ततोऽनर्थपरम्परामाह बलेति । लङ्घनीयः अभिभाव्यः ॥३०॥

प्रथितः प्रख्यातः पुमान् लङ्घितः अवज्ञातः सन् अपध्वस्तमतिः नष्टप्रज्ञो भवति ॥३१।३२॥

रणं युद्धं इन्द्रापराधेन त्रैलोक्यस्य निःश्रीकत्वं प्राप्तम्

(ज) प्रणिपातपुरःसरमिति—प्रणिपातः प्रणतिः पुरःसरः पूर्ववर्त्ती यस्य तथाभूतमिति प्रसाद्यमान इत्यस्याः क्रियायाः विशेषणम् ।

(झ) ज्वलज्जटाकलापस्येति—ज्वलन् पिङ्गलवर्णत्वात् वह्निरिव भास्वरः जटाकलापो यस्य तस्य । तथा-त्वस्यापि भयहेतुत्वात् हेतुगर्भविशेषणमिदम् । भृकुटी कुटिलमिति-भ्रुकुट्या कोपप्रयुक्तयेति शेषः, कुटिलमित्यर्थः ।

(ञ) विड़म्बनामित्यादिः—यदादौ तथा अवमानं कृत्वा इदानीम् अनुनयं करोषि सेयं सुतरां विड़म्बनैव इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः प्रभृति निःश्रीकं सशक्रं भुवनत्रयम् ।
मैत्रेयासीदपध्वस्तं संक्षीणौषधिवीरुधम् (ट) ॥२६॥

न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः ।
न च दानादिधर्मेषु मनश्चक्रे तदा जनः ॥२७॥

निःसत्त्वा सकला लोका लोभाद्युपहतेन्द्रियाः ।
स्वल्पेऽपि हि बभूवुस्ते साभिलाषा द्विजोत्तम (ठ) ॥२८

यतः सत्त्वं ततो लक्ष्मीः सत्त्वं भूत्यनुसारि च ।
निःश्रीकाणां कुतः सत्त्वं विना तेन गुणाः कुतः ॥२९॥

बलशौर्य्याद्यभावश्च पुरुषाणां गुणैर्व्विना ।
लङ्घनीयः समस्तस्य बलशौर्य्य विवर्जितः ॥३०॥

भवत्यपध्वस्तमतिर्लङ्घितः प्रथितः पुमान् ।
एवमत्यन्तनिःश्रीके त्रैलोक्ये सत्त्ववर्ज्जिते ॥३१॥

देवान् प्रति बलोद्योगं चक्रुर्दैतेयदानवाः ।
लोभाभिभूता निःश्रीका दैत्याः सत्त्वविवर्जिताः ॥३२

श्रिया विहीनैर्निःसत्त्वैर्देवैश्चक्रुस्ततो रणम् ।
विजितास्त्रिदशा दैत्यैरिन्द्राद्याः शरणं ययुः ॥३३॥

पितामहं महाभागं हुताशनपुरोगमाः ।
यथावत् कथितो देवैर्ब्रह्मा प्राह ततः सुरान् ॥३४॥

ब्रह्मोवाच ।

परापरेशं शरणं व्रजध्वमसुरार्द्दनम् (ड)।
उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरम् ॥३५॥

प्रजापतिपतिं विष्णुमनन्तमपराजितम् ।
प्रधानपुंसोरजयोः कारणं कार्य्यभूतयोः ॥३६॥

प्रणतार्त्तिहरं विष्णुं स वः श्रेयो विधास्यति (ढ)।
एवमुक्त्वा सुरान् सर्व्वान् ब्रह्मा लोकपितामहः ।
क्षीरोदस्योत्तरं तीरं तैरेव सहितो ययौ ॥३७॥

स गत्वा त्रिदशैः सर्व्वैः समवेतः पितामहः ।
तुष्टाव वाग्भिरिष्टाभिः परापरपतिं हरिम् ॥३८॥

अतस्त्रैलोक्यान्तर्वर्त्तितया प्राप्नुवदपि तद्विपक्षेषु दैतेषु देवेषु इव नातिप्रभूतम् इति दैत्यानां जयः सङ्गच्छते ॥३३॥

हुताशनपुरोगमा इति अग्नेर्दूतत्त्वात् पुरोगमत्वम् "अग्निर्देवानां दूत आसीद्" इति श्रुतेः ॥३४॥

जगदुत्पत्त्यादीनां हेतुम् । स्वयम् अहेतुम् स्वत एव नित्यसिद्धम् ॥३५॥

अजयोः कार्यभूतयोरिति जन्मरहितयोरपि तयोः सर्गाभिमुखीकरणेन कार्यत्वम् ॥३६॥

उत्तरदिगवस्थितं तीरं परं कूलमिति वा ॥३७॥

इष्टाभिः पूजिताभिः अपेक्षितार्थद्योतिकाभिरिति वा परापराणाम् उत्कृष्टनिकृष्टानां सर्वजीवानां पतिम् ॥३८॥

नमाम इत्युत्तरश्लोकेऽपि सम्बन्धः । सर्वं सर्वस्वरूपं सर्वस्येश्वरञ्च । लोके ये धामधराः प्रभाववन्तस्तेषाम् आधारम् । इन्द्रादीनां प्रभावो यदाश्रय इत्यर्थः । अभेदिनं

(ट) निःश्रीकमिति—निः निर्गता श्रीः लक्ष्मीः यस्मात् तत् निःश्रीकम्, बहुव्रीहौ क-प्रत्ययः । संक्षीणौषधिवीरुधमिति संक्षीणाः सुतरां यं प्राप्ता ओषधयः वीरुधश्च यत्र ओषधिरूपा वीरुधो वा यत्र तथाभूतम् । अदन्तत्वमार्षम् ।

(ठ) स्वल्पेऽपि साभिलाषा बभूवुरित्यनेन स्वल्पधनादिलाभार्थं नरमारणादावपि प्रवृत्तिः सूचिता ।

(ड) परापरेशमिति—परेषां उत्तमानाम् अपरेषामधमानाञ्च ईशम् । अथवा परे तदितरे अपरे यस्मात् तथाभूतमीशम् इत्यर्थः ।

(ढ) प्रणतार्त्तिहरमिति—प्रणतानामार्त्तिं हरति यस्तमित्यर्थः । हेतुगर्भविशेषणमिदम् । यतः स प्रणतार्त्तिहर अतः प्रणतानां युष्माकं श्रेयो विधास्यतीति तात्पर्य्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मोवाच ।

नमाम सर्व्वं सर्व्वेशमनन्तमजमव्ययम् ।
लोकधामधराधारमप्रकाशमभेदिनम् ॥३९॥

नारायणमणीयांसमशेषाणानणीयसाम् ।
समस्तानां गरिष्ठं यद् भूरादीनां गरीयसाम् ॥४०॥

यत्र सर्व्वं यतः सर्व्वमुत्पन्नं सत्पुरःसरम् ।
सर्व्वभूतश्च यो देवः पराणामपि यः परः (द) ॥४१॥

परः परस्मात् पुरुषात् परमात्मस्वरूपधृक् ।
योगिभिश्चिन्त्यते योऽसौ मुक्तिहेतुर्म्मुक्षुभिः ॥४२॥

सत्तादयो न सन्तीशे यत्र च प्राकृता गुणाः ।
स शुद्धः सर्व्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥४३॥

कला-काष्ठा-निमेषादिकालसूत्रस्य गोचरे ।
यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः ॥४४॥

प्रोच्यते परमेशो हि यः शुद्धोऽप्युपचारतः ।
प्रसीदतु स नो विष्णुरात्मा यः सर्व्वदेहिनाम् ॥४५॥

यः कारणञ्च कार्य्यञ्च कारणस्यापि कारणम् ।
कार्य्यस्यापि च यः कार्य्यं प्रसीदतु स नो हरिः ।४६

कार्य्यकार्य्यश्य यः कार्य्यं तत्कार्यस्यापि यः स्वयम् ।
तत्कार्य्यकार्य्यभूतो यस्ततश्च प्रणताः स्म तम् ॥४७॥

निर्भेदम् (ण), अप्रकाशम् स्वव्यतिरिक्तप्रकाशशून्यम्(त) इत्यर्थः ॥३९।४०॥

यत्र सर्वमित्यादि यत् शब्दानां स आद्यः पुमान् प्रसीदतु इति तृतीयेन अन्वयः। पराणाम् अर्थादीनामपि यः परः पुरुषः तथा च श्रुतिः, "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तम् अव्यक्तात् पुरुषः परः, इति ॥४१॥

तस्मात् परस्माद् अव्यक्तप्रेरकात् कारणात्मनः पुरुषादपि यः परमात्मैव स्वरूपधृक् मूर्त्तिधारी अत एव योगिभिश्चिन्त्यते योऽसौ ॥४२।४३॥

कला-काष्ठा-निमेषादिकाल एव सूत्रवत् सूत्रं, जगच्चेष्टानियामकत्वात् तस्य गोचरे विषये यस्य शक्तिर्लक्ष्मीर्न वर्त्तते, स्वरूपाभिन्नत्वान्नित्यैव सा कालाधीना भवतीत्यर्थः।

(ण) निर्भेदम् भेदरहितम् अद्वितीयमिति यावत्।

(त) स्वव्यतिरिक्तप्रकाशशून्यं स्वयम्प्रकाशस्वरूपम्।

(थ) अत्र 'अणोरणीयान् महतो महीयान्' इत्यादयः श्रुतयः समनुसन्धेयाः।

(द) सर्वभूत इत्यत्र 'ऐतदात्म्यमिदं सर्व' मित्यादि श्रुतयो मानम्।

अत एव तस्याः स्वरूपभेदात् शुद्धस्य इत्युक्तम् ॥४४॥

ननु यदि लक्ष्मीस्तत्स्वरूपाभिन्ना कथं तर्हि लक्ष्म्याः पतिरुच्यते, तत्राह, प्रोच्यते इति। परा चासौ मा च लक्ष्मीः तस्या ईशः परमेशो यः शुद्धः केवलोऽपि उपचारतो भेदविवक्षया प्रोच्यते। द्वितीयो यच्छब्दः प्रसिद्धौ ॥४५।४६॥

पूर्वश्लोकार्थं प्रपञ्चयति -कार्यकायस्येति द्वाभ्याम्। प्रकृतिकार्यस्य महतो यत् कार्यमहङ्काराख्यं, तस्य कार्यं भूतसूक्ष्मवर्गः। तस्यापि कार्यं महाभूतवर्गः। तत्कार्यं ब्रह्माण्डम्। तस्य कार्यभूतो ब्रह्मदक्षादिवर्गः, ततश्च तत् पुत्रपौत्रप्रवाहभूतो यः स्वयमेव, तं प्रणताः इत्यन्वयः ॥४७॥

तथा कारणम् अर्वाक्सृष्टिर्ब्रह्मादि, तस्य कारणं ब्रह्माण्डम्, तस्य कारणम् महाभूतानि, तत्कारणं भूतसूक्ष्माणि, तत्कारणानाम् अहङ्कारमहत्सूत्राणां हेतुं प्रधानभूतं प्रणताः स्म इत्यर्थः। प्रकृतेर्गुणक्षोभात् प्रथमं क्रियाशक्तिसूत्रम् उत्पद्यते। ततो ज्ञानशक्ति महत्तत्त्वं ततोऽहङ्कार इति प्रक्रियायां तत्कारणानाम् इत्यनेन बहुवचनान्तेन अहङ्कारमहत्सूत्राणां ग्रहणम्। तदुक्तं "सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवम्" इति यद्वा प्रकृत्या सह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारणं कारणस्यापि तस्य कारणकारणम् ।
तत्कारणानां हेतुं त्वां प्रणताः स्म सुरेश्वरम् ॥४८॥
भोक्तारं भोज्यभूतञ्च स्रष्टारं सृस्टमेव च ।
कार्य्यं कर्म्मस्वरूपं तं प्रणताः स्म परं पदम् ॥४९॥
विशुद्धं बोधनं नित्यमजमक्षयमव्ययम् ।
अव्यक्तमविकारं यत् तद्विष्णोः परमं पदम् ॥५०॥
न स्थूलं न च सूक्ष्मं यन्न विशेषणगोचरम् ।
तत्पदं परमं विष्णोः प्रणमामः सदामलम् ॥५२॥
यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता ।
परं ब्रह्मस्वरूपं यत् प्रणमामस्तमव्ययम् ॥५२॥
यन्न देवा न मुनयो न चाहं न च शंकरः ।
जानन्ति (१) परमेशस्य तद्विष्णोः परम पदम् ॥५३॥
यद् योगिनः सदोद्युक्ताः पुण्यपापक्षयेऽक्षयम् ।
पश्यन्ति प्रणवे चिन्त्यं तद्विष्णोः परमं पदम् ॥५४॥
शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवादिकाः ।
भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदम् ॥५५॥
सर्व्वेश सर्व्वभूतात्मन् सर्व्व सर्वाश्रयाच्युत ।
प्रसीद विष्णो भक्तानां व्रज नो दृष्टिगोचरम् ॥५६॥
इत्युदीरितमाकर्ण्य ब्रह्मणस्त्रिदशास्ततः ।
प्रणम्योचुः प्रसीदेति व्रज नो दृष्टिगोचरम् ॥५७॥
यन्नायं भगवान् ब्रह्मा जानाति परमं पदम् ।
तन्नताः स्म जगद्धाम तव सर्व्वं गताच्युत ॥५८॥
इत्यन्ते वचसस्तेषां देवानां ब्रह्मणस्तथा ।
ऊचुर्देवर्षयः सर्व्वे बृहस्पतिपुरोगमाः ॥५९॥
आद्यो यज्ञपुमानिज्यो यः सर्व्वेषाञ्च पूर्व्वजः ।
तं नताः स्म जगत्स्रष्टुः स्रष्टारमविशेषणम् ॥६०॥
भगवन् भूतभव्येश जगन्मूर्त्तिधराव्यय ।
प्रसीद प्रणतानां त्वं सर्व्वेषां देहि दर्शनम् ॥६१॥
एष ब्रह्मा तथैवायं सह रुद्रैस्त्रिलोचनः ।
सर्वादित्यैः समं पूषा पावकोऽयं सहाग्निभिः ॥६२

तत्कारणानामिति बहुत्वसम्पाद्य तद्धेतुं प्रकृतिप्रेरकम् ईश्वरं प्रणताः स्म इति योजनीयम् ॥४८।४९॥

विशुद्धं बोधनं शुद्धं ज्ञानं वृत्तिज्ञानं व्यावर्त्तयन् शुद्धत्वं दर्शयति, अव्यक्तं व्यक्तं विषयः तद् रहितम् अधिकारञ्चेति । तदुपपादयति, नित्यम् इत्यादिना । अक्षयमनाधारं तद् विष्णोः परमं पदं प्रणमाम इत्युत्तरेण अन्वयः ॥५०।५१॥

यस्य अचिन्त्यानन्तशक्तेरयुतांशांशो मायाशक्तिलेशः तस्यांशो रजोगुणस्तस्मिन् इयं विश्वरचनाशक्तिः स्थिता, तं प्रणमाम इत्यस्य उत्तरश्लोकत्रयेऽपि अनुषङ्गः ॥५२।५३॥

पुण्यपापक्षये तत्प्रतिबन्धापगमे प्रणवे स्थितं महावाक्यार्थविषयत्वात् तस्य ॥५४॥

अभूतपूर्वस्य न भूतः कश्चिदपि पूर्वो यस्मात्, अनादेरित्यर्थः । "यस्मिन्नजातः परोऽन्योऽस्ति य आविवेश भुवनानि विश्वाः" इति श्रुतेः ॥५५॥

तदेवं स्तुत्वा प्रार्थयते सर्वेशेति ॥५६।५७॥

जगद्धाम जगतः प्रकाशकम् आश्रयभूतमिति वा ॥५८॥

प्रणतानां प्रसीद इत्युक्त्वा तानेवाहुः,—एष ब्रह्मेति त्रिभिः ॥६२॥

१। जानन्तीत्यत्र अस्मादौऽपि कर्तृत्वात् 'जानीम' इति वक्तव्ये 'जानन्ति' इति प्रयोग आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अश्विनौ वसवश्चेमे सर्वे चैते मरुद्गणाः ।
साध्या विश्वे तथा देवा देवेन्द्रश्चायमीश्वरः ॥६३॥
प्रणामप्रवणा नाथ दैत्यसैन्यपराजिताः ।
शरणं त्वामनुप्राप्ताः समस्ता देवतागणाः ॥६४॥

पराशर उवाच ।

एवं संस्तूयमानस्तु भगवाञ्छङ्खचक्रधृक् ।
जगाम दर्शनं तेषां मैत्रेय परमेश्वरः ॥६५॥
तं दृष्ट्वा ते तदा देवाः शङ्खचक्रगदाधरम् ।
अपूर्व्वरूपसंस्थानं (ध) तेजसां राशिमूर्ज्जितम् ॥६६॥
प्रणम्य प्रणताः पूर्व्वं संक्षोभस्तिमितेक्षणाः (न) ।
तुष्टुवुः पुण्डरीकाक्षं पितामहपुरोगमाः ॥६७॥

देवा ऊचुः ।

नमो नमोऽविशेषस्त्वं त्वं ब्रह्मा त्वं पिनाकधृक् ।
इन्द्रस्त्वमग्निः पवनो वरुणः सविता यमः ॥६८॥
वसवो मरुतः साध्या विश्वे देवगणा भवान् ।
योऽयं तवागतो देव समीपं देवतागणः ॥६९॥
स त्वमेव जगत्स्रष्टा यतः सर्व्वगतो भवान् ।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः प्रजापतिः ॥७०॥
वेद्यावेद्यञ्च सर्व्वात्मंस्त्वन्मयञ्चाखिलं जगत् ।
त्वामत्र शरणं विष्णो प्रयाता दैत्यनिर्ज्जिताः ॥७१॥
वयं (प) प्रसीद सर्वात्मंस्तेजस्याप्याययस्व नः ।
तावदार्त्तिस्तथा वाञ्छा तावन्मोहस्तथासुखम् ॥७२॥
यावन्नायाति शरणं त्वामशेषाघनाशनम् (फ) ।
त्वं प्रसादं प्रसन्नात्मन् प्रपन्नानां कुरुष्व नः ॥७३॥
तेजसां नाथ सर्वेषां स्वशक्त्याप्यायनं कुरु ॥७४॥

पराशर उवाच ।

एवं संस्तूयमानस्तु प्रणतैरमरैर्हरिः ।
प्रसन्नदृष्टिर्भगवानिदमाह स विश्वकृत् ॥७५॥

श्रीभगवानुवाच ।

तेजसो भवतां देवाः करिष्याम्युपबृंहणम् (ब) ।
वदाम्यहं यत् क्रियतां भवद्भिस्तदिदं सुराः ॥७६॥

अपूर्वं रूपसंस्थानं दैहिकः सन्निवेशो यस्य तम् ॥६६॥
पूर्वं प्रणता अपि भक्त्या पुनः प्रणम्य तुष्टुवुः ॥६७॥
अविशेषः शुद्धः परमात्मा त्वं ब्रह्मादिरूपश्च त्वमेव ॥६८-६९।७०।७१॥
तेजसा प्रभावादिना नोऽस्मान् अप्याययस्व संवर्धय। आर्त्तिः शत्रुपीड़ा, असुखं दुःखम् ॥७२।७३॥
स्वशक्त्या लक्ष्म्या ॥७४॥

भगवान् इदमाह इत्यादेर्भागवतोक्तोऽभिप्रायः। तदुक्तम् "एक एवेश्वरस्तस्मिन् सुरकार्ये सुरेश्वरः। विहर्त्तुकामस्तानाह समुद्रोन्मथनादिभिः" इति ॥७५।७६॥

(ध) अपूर्वरूपं अभूतपूर्वं संस्थानम् आकृतिर्यस्य तथाभूतम् इति वार्थः।

(न) संक्षोभस्तिमितेक्षणा इति-संक्षोभेण तेजःप्रतिघातेन स्तिमितानि स्थगितशक्तिकानि ईक्षणानि येषां तथाभूता इत्यर्थः।

(प) वयमित्यस्य त्वां शरणं प्रयाता इत्यनेन पूर्वेण सम्बन्धः।

(फ) अशेषाघनाशनमिति—अशेषाणां आर्त्त्यादिहेतुभूतानां तेषां सर्वेषामघानां दुरदृष्टानां नाशनम् निवर्त्तकम् इत्यर्थः। अतएव त्वां शरणं गतानां तत्तददृष्टरूपकारणनिवृत्त्या आर्त्त्यादि-रूपत-त्तत्कार्य्यनिवृत्तिरिति भावः।

(ब) उपबृंहणम् वर्द्धनम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आनीय सहिता दैत्यैः क्षीराब्धौ सकलौषधीः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥७७॥
मथ्यतामृतं देवाः सहाये मय्यवस्थिते ।
सामपूर्व्वञ्च दैतेयास्तत्र साहाय्यकर्मणि ॥७८॥
सामान्यफलभोक्तारो यूयं वाच्या भविष्यथ (भ) ।
मथ्यमाने च तत्राब्धौ यत् समुत्पद्यतेऽमृतम् (म) ॥७९
तत्पानाद् बलिनो यूयममराश्च भविष्यथ ।
तथा चाहं करिष्यामि यथा त्रिदशविद्विषः ।
न प्राप्स्यन्त्यमृतं देवाः केवलं क्लेशभागिनः ॥८०॥

पराशर उवाच ।

इत्युक्त्वा देवदेवेन सर्व्व एव ततः सुराः ।
सन्धानमसुरैः कृत्वा यत्नवन्तोऽमृतेऽभवन् ॥८१॥
नानौषधीः समानीय देव-दैतेयदानवाः ।
क्षिप्त्वा क्षिराब्धिपयसि शरदभ्रामलत्विषि ॥८२॥
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा च वासुकिम् ।
ततो मथितुमारब्धा मैत्रैय तरसामृतम् ॥८३॥
विबुधाः सहिताः सर्व्वे यतः पुच्छं ततः कृताः ।
कृष्णेन वासुकेर्दैत्याः पूर्व्वकाये निवेशिताः (य) ॥
ते तस्य फणनिःश्वास-वह्निनापहतत्विषः (र) ।
निस्तेजसोऽसुराः सर्व्वे बभुवुरमितद्युते ॥८५॥
तेनैव मुखनिःश्वास-वायुनास्तबलाहकैः
पुच्छप्रदेशे वर्षद्भिस्तथा चाप्यायिताः सुराः ॥८६॥
क्षीरोदमध्ये भगवान् कूर्म्मरूपी स्वयं हरिः ।
मन्थनाद्रेरधिष्ठानं भ्रमतोऽभून्महामुने (ल) ॥८७॥
रूपेणान्येन देवानां मध्ये चक्रगदाधरः ।
चकर्ष भौगिराजानं दैत्यमध्येऽपरेण च (व) ॥८८॥
उपर्य्याक्रान्तवान् शैलं बृहद्रूपेण केशवः (श) ।
तथापरेण मैत्रेय यन्न दृष्टं सुरासुरैः ॥८९॥

क्षीराब्धौ क्षिप्त्वेति शेषः । नेत्रं मन्थनरज्जुम् ॥७७॥

अमृतं मथ्यतां मथनेन अमृतं उत्पाद्यतामित्यर्थः ॥७८॥

सामपूर्वम् उपपत्तिपूर्वकं सामान्यं समानं यत् फलं तस्य भोक्तारो यूयञ्च भविष्यथ इति वाच्याः ॥७९॥

तर्हि तेऽपि तथा भविष्यन्तीति शङ्कमानान् प्रत्याह—तथा चेति । भो देवाः । ते युष्मद्द्विषः केवलं क्लेशभागिनो यथा भविष्यन्ति, तथा करिष्यामि ॥८०॥

अमृतेऽमृतार्थम् ॥८१॥

शरदभ्रस्येव अमला त्विट् दीप्तिर्यस्य तस्मिन् ॥८२॥

अमृतं मथितुम् आरब्धाः । कर्त्तरि क्तः आरब्धवन्त इत्यर्थः ॥८३।८५॥

येन असुराणां दुःसहो वह्निरुत्पादितः । 'तेनैव वासुकेर्मुखनिःश्वासवायुना अस्तबलाहकैः क्षिप्तैर्मेघैः ॥८६॥

सहाये मयि अवस्थित इति यदुक्तं, तत्साहाय्यमाह क्षीरोदमध्य इति चतुर्भिः ॥८७।९०॥

(भ) वाच्या इत्यस्य दैतेया इति पूर्वेणान्वयः ।

(म) समुत्पद्यत इत्यत्र भविष्यत्सामीप्ये लट् । तेन अमृतसमुत्पत्तेरचिरोत्तरभावित्वं प्रतिपद्यते ।

(य) यतः यस्यां दिशि पुच्छं वासुकेरिति शेषः । ततः तस्यां दिशि कृताः निवेशिताः । पूर्वकाये वासुकेः काय-पूर्वभागे मुखसन्निधावित्यर्थः ।

(र) फणनिःश्वासवह्निना—फणस्य निःश्वास एव वह्निः तापकत्वसाधर्म्यादग्निः तेन । अपहता विनाशिताः हि तेजांसि येषां ते, निर्वीर्य्याः कृता इत्यर्थः ।

(ल) मन्थनाद्रेः मन्थनदण्डभूतस्य मन्दरपर्वतस्य अधिष्ठानमाश्रयः ।

(व) भोगिराजानमित्यत्र समासान्तट्-चप्रत्ययाभाव आर्षः ।

(श) बृहद्रूपेणेति—महाकायविश्वम्भररूपेणेत्यर्थः । अन्यथा मन्थनदण्डस्य मन्थनवेलायामितस्ततश्चलनेन मन्थनव्याघातसम्भवादिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

0,22:222 15263

तेजसा नागराजानं तथाप्यायितवान् हरिः (ष) ।
अन्येन तेजसा देवान् उपबृंहितवान् विभुः ॥९०॥
मथ्यमाने ततस्तस्मिन् क्षीराब्धौ देव-दानवैः ।
हविर्धामाभवत् पूर्व्वं सुरभिः सुरपूजिता ॥९१॥
जग्मुर्म्मुदं ततो देवा दानवाश्च महामुने ।
व्याक्षिप्तचेतसश्चैव बभूवुस्तिमितेक्षणाः ॥९२॥
किमेतदिति सिद्धानां दिवि चिन्तयतां ततः ।
बभूव वारुणी देवी मदाघूर्णितलोचना (स) ॥९३॥
कृतावर्त्तात् ततस्तस्मात् क्षीरोदाद् वासयन् जगत् ।
गन्धेन पारिजातोऽभूद् देवस्त्रीनन्दनस्तरुः (ह) ॥९४॥
रूपौदार्य्यगुणोपेतस्ततश्चाप्सरसां गणः ।
क्षीरोदधेः समुत्पन्नो मैत्रय परमाद्भुतः ॥९५॥
ततः शीतांशुरभवज्जगृहे त्वं महेश्वरः ।
जगृहुश्च विषं नागाः क्षीरोदाच्च समुत्थितम् ॥९६॥
ततो धन्वन्तरिर्देवः श्वेताम्बधरः खयम् ।
विभ्रत्कमण्डलुं पूर्णममृतस्य समुत्थितः ॥९७॥
ततः स्वस्थमनस्कास्ते सर्व्वे दैतेय-दानवाः (क्ष) ।
बभूवुर्म्मुदिताः सर्व्वे मैत्रेय मुनिभिः सह (क) ॥९८
ततः स्फुरत्कान्तिमती विकासिकमले स्थिता ।
श्रीर्देवी पयसस्तस्मादुत्थिता भृतपंकजा (ख) ॥९९॥
तां तुष्टुवुर्म्मुदा युक्ताः श्रीसूक्तेन महर्षयः ।
विश्वावसुमुखास्तस्या गन्धर्वाः पुरतो जगुः ॥१००॥
घृताचीप्रमुखा ब्रह्मन् ननृतुश्चाप्सरोगणाः ।
गङ्गाद्याः सरितस्तोयैः स्नानार्थमुपतस्थिरे (ग) ॥१०१
दिग्गजा हेमपात्रस्थम् आदाय विमलं जलम् ।
स्नापयाञ्चक्रिरे देवीं सर्व्वलोकमहेश्वरीम् ॥१०२॥
क्षीरोदो रुपधृक् तस्यै मालामम्लानपङ्कजाम् ।
ददौ विभूषणान्यङ्गे विश्वकर्मा चकार च ॥१०३॥

1259

हविषः क्षीरदध्यादेर्धाम आश्रयभूता ॥९१॥
व्याक्षिप्तचेतसः तल्लोभाकृष्टमनसः ॥९२॥
वारुणी मदिराधिष्ठात्री देवी ॥९३॥
मन्दरभ्रमणेन कृता अम्भसाम् आवर्त्ता यस्मिन् तस्मात् ॥९४।९५॥
विषञ्च महेश्वरो जगृहे। तच्छेषञ्च नागा जगृहुः। तदुक्तं "प्रस्कन्नं पिवतः पाणेर्यत् किञ्चिज्जगृहुः स्म तत्। वृश्चिकाहिविषौषध्यो दन्दशूकाश्च ये परे" इति ॥९६॥
अमृतस्य कमण्डलुं तेनैव पूर्णं विभ्रन् समुत्थितः ॥९७॥
स्वस्थमनसो बभूवुः ॥९८।९९॥
श्रीसूक्तेन "हिरण्यवर्णाम्" इति पञ्चदशर्चेन ॥१००॥

(ष) नागराजानमित्यत्रापि समासान्तट्चप्रत्ययाभाव आर्षः।

(स) मदाघूर्णितलोचना—मदेन सुरापानजनितमत्ततया आघूर्णिते लोचने यस्याः तथाभूता।

(ह) वासयन् सुरभितं कुर्वन्। देवस्त्रीनन्दनः देवीनामानन्दजनकः।

(क्ष) स्वस्थानि शान्तियुक्तानि मनांसि येषां ते स्वस्थमनष्काः; बहुव्रीहौ कप्रत्ययः। स्वस्थमनस इति श्रीधरोक्तस्तदर्थः।

(क) मुदिता इति—पूर्वं स्वस्थमनसः इदानीं तथा धन्वन्तरेः क्षीरोदादुत्थानानन्तरम् आनन्दिता इत्यर्थः।

(ख) स्फुरन्ती कान्तिः तद्वती स्फुरत्कान्तिमतीत्यत्र यद्यपि न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदथप्रतिपत्तिकर इत्यनुशासनविरोध आपाततः स्फुरति, तथापि प्रकृते बहुव्रीह्यप्रतिपाद्यप्राशस्त्यनित्यसङ्गाद्यर्थप्रतिपादनार्थं मत्वन्वीयप्रत्यय इत्यदोषः। विकासिकमले प्रस्फुटिते पद्मे। भृतपङ्कजा करगृहीतारविन्दा।

(ग) तोयैः स्वैः स्वैरुदकैः स्नानार्थं अन्तर्भूतणिजर्थत्वात् स्नपनार्थमित्यर्थः।

❀ मुमुक्षु भवन वेद वेदाङ्ग पुस्तकालय ❀
1259 वाराणसी 1416
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्व्वदेवानां ययौ वक्षःस्थलं हरेः ॥१०४॥
तयावलोकिता देवा हरिवक्षःस्थलस्थया ।
लक्ष्म्या मैत्रेय सहसा परां निर्वृतिमागताः ॥१०५॥
उद्वेगं परमं जग्मुर्दैत्या विष्णुपराङ्मुखाः (घ) ।
त्यक्ता लक्ष्म्या महाभाग विप्रचित्तिपुरोगमाः ॥१०६॥
ततस्ते जगृहुर्दैत्या धन्वन्तरिकरे स्थितम् ।
कमण्डलुं महावीर्य्या यत्रास्ते तद् द्विजामृतम् ॥१०७
मायया लोभयित्वा तान् विष्णुः स्त्रीरूपमास्थितः ।
दानवेभ्यस्तदादाय देवेभ्यः प्रददौ विभुः ॥१०८
ततः पपुः सुरगणाः शक्राद्यास्तत् तदामृतम् ।
उद्यतायुधनिस्त्रिंशा दैत्यास्तांश्च समभ्ययुः (ङ) ॥१०९
पीतेऽमृते च बलिभिर्देवैर्दैत्यचमूस्तदा ।
वध्यमाना दिशो भेजे पातालं तु विवेश वै ॥११०
तदा देवा मुदा युक्ताः शङ्खचक्रगदाभृतम् ।
प्रणिपत्य यथापूर्वम् आशासत त्रिविष्टपम् (च) ।१११
ततः प्रसन्नभाः सूर्य्यः प्रययौ स्वेन वर्त्मना ।
ज्योतींषि च यथामार्गं प्रययुर्मुनिसत्तम ॥११२

जज्वाल भगवांश्चोच्चैराग्नेयीर्मूर्त्तिर्बिभावसुः ।
धर्म्मे च सर्व्वभूतानां तदा मतिरजायत ॥११३॥
त्रैलोक्यञ्च श्रिया जुष्टं बभूव मुनिसत्तम ।
शक्रश्च त्रिदशश्रेष्ठः पुनः श्रीमानजायत ॥११४॥
सिंहासनगतः शक्रः सम्प्राप्य त्रिदिवं पुनः ।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः ॥११५

इन्द्र उवाच

नमस्ये सर्व्वभूतानां जननीमब्जसम्भवाम् ।
श्रियमुन्निद्रपद्माक्षीं विष्णोर्वक्षःस्थलस्थिताम् ॥११६
त्वं सिद्धिस्त्वं सुधा स्वाहा स्वधा त्वं लोकपावनि
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥११७
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥११८
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्त्वमेव च।
सौम्यासौम्यैर्ज्जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥११९
का त्वन्या त्वामृते देवि सर्व्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥१२०

पश्यतां सर्वदेवानां तान् अनादृत्येत्यर्थः ॥१०४॥

प्रसन्नभाः स्पष्टदीप्तिः सन् स्वेन वर्त्मना दक्षिणोत्तरायण-नियमेन। ज्योतींषि ताराग्रहभौमादयो यथामार्गं वक्रातिचारं विना ॥११२॥

दुर्वासःशापपातेन पुनर्मा भूदियं तथा। इत्यभिप्रायतः शक्रस्तुष्टाव श्रियमानतः ॥११५॥

नमस्ये नमामि सर्वभूतानां जननीं त्वाम् ॥११६॥

त्वं सिद्धिरणिमादिः। प्रभा दिवसः ॥११७॥

यज्ञविद्या कर्मविद्या। महाविद्या विश्वरूपासना। गुह्यविद्या तद्वाचकद्वादशाक्षरादिरहस्य-मन्त्रविद्या। आत्मविद्या ब्रह्मविद्या। एवं कर्मविद्यादिरूपेण विमुक्तिफलदायनी त्वमेव ॥११८॥

किञ्च आन्वीक्षिकी तर्कविद्या त्वमेव। त्रयी वेदत्रयं वार्त्ता शिल्पशास्त्रायुर्वेदादिः। दण्डनीतिः सामाद्युपायप्रतिपादकराजनीतिः। एवम् अन्यैरपि सौम्यासौम्यैरूपैस्त्वदीयैः एतज्जगत् पूरितम् ॥११९॥

अतस्तव सौभाग्यम् अत्याश्चर्यम् इत्याह, का त्विति। का पुनस्त्वदन्या गदाभृतो वपुरध्यास्ते तद्वक्षसि वसतीत्यर्थः ॥१२०॥

(घ) विष्णुपराङ्मुखाः विष्णुविद्वेषिणः।

(ङ) समभ्ययुः युद्धार्थमभिजग्मुः।

(च) त्रिविष्टपं सुरलोकं स्वर्गलोकमिति यावत्। अशासतेत्यत्रात्मनेपदमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥१२१

दाराः पुत्रास्तथागारं सुहृद् धान्यधनादिकम् ।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥१२२

शरीरारोग्यमैश्वर्य्यमरिपक्षक्षयः सुखम् ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्ल्लभम् (छ)।१२३

त्वं माता सर्व्वभूतानां देवदेवो हरिः पिता ।
त्वयैतद् विष्णुना चाद्य जगद्व्याप्तं चराचरम् ॥१२४

मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ।
मा शरीरं कलत्रञ्च त्यजेथाः सर्व्वपावनि (ज) ॥१२५

मा पुत्रान् मा सुहृद्वर्गं मा पशून् मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णोर्व्वक्षःस्थलालये ॥१२६

सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले ॥१२७

त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्य्यैश्च मुह्यन्ते पुरुषा निर्गुणा अपि (झ) ॥१२८

स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः ।१२९

सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः ।
पराङ्मुखी जगद्धात्रि यस्य त्वं विष्णुवल्लभे ॥१३०॥

न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥१३१

पराशर उवाच ।

एवं श्रीः संस्तुता सम्यक् प्राह देवी शतक्रतुम् ।
शृण्वतां सर्वदेवानां सर्व्वभूतस्थिता द्विज ॥१३२॥

श्रीरुवाच ।

परितुष्टास्मि देवेश स्त्रोत्रेणानेन ते हरे ।
वरं वृणीष्व यस्त्विष्टो वरदाहं तवागता ॥१३३॥

इन्द्र उवाच ।

वरदा यदि मे देवि वरार्हो यदि वाप्यहम् ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥१३४

स्त्रोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसम्भवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ।१३५

श्रीरुवाच ।

त्रैलोक्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ।
दत्तो वरो मया यस्ते स्तोत्राराधनतुष्टया ॥१३६॥

अतस्तदुपेक्षानुकम्पयोरीदृशं फलं दृष्टमित्याह, त्वयेति । समेधितं संवर्धितम् ॥१२१॥

तच्चैतत् चित्रमित्याह, दारा इति त्रिभिः ॥१२२।१२४॥ अतो मा त्वं नोऽस्माकं कोशादिकं त्यजेथाः । परिच्छदं परिकरम् ॥१२५।१२६॥

त्वया च परित्यक्तानाम् अनिष्टं भवतीत्याह, सद्य इति । वैगुण्यं दोषत्वम् ॥१३०॥

अतस्तद्गुणस्तुतौ न कोऽपि शक्तः, कृपयैव केवलं प्रसीदेति प्रार्थयते,—न त इति । वेधसोऽपि जिह्वा न शक्तेत्यन्वयः ॥१३१॥

हरे ! इन्द्र ॥१३३॥

(छ) दृश्यते अनया इति दृष्टिः चक्षुरिन्द्रियं तेन दृष्टानां प्रत्यक्षीकृतानाम् ।

(ज) त्यजेथा इत्यात्मनेपदमार्षम् ।

(झ) मुह्यन्त इत्यन्तर्भूतणिजर्थत्वात् साधु ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ।१३७

पराशर उवाच ।

एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता ॥१३८॥

भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वमुदधेः पुनः ।
देव-दानवयत्नेन प्रसूतामृतमन्थने ॥१३९॥

एवं यथा जगत्स्वामी देवदेवो जनार्द्दनः ।
अवतारं करोत्येष तथा श्रीस्तत्सहायिनी ॥१४०॥

पुनश्च पद्मादुद्भूता आदित्योऽभूद् यदा हरिः ।
यदा तु भार्गवो रामस्तदाभूद् धरणी त्वियम् ॥१४१॥

राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥१४२॥

देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ॥१४३॥

यश्चैतच्छृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युतिस्तस्य गृहे यावत् कुलत्रयम् ॥१४४॥

पठ्यते येषु चैवैष गृहेषु श्रीस्तवो मुने ।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥१४५॥

एतत् ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्व्वं भृगुसुता सती ॥१४६॥

इति सकलविभूत्यवाप्तिहेतुः (ञ)

स्तुतिरियमिन्द्रमुखोद्गता हि लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यैः—
वसति न तेषु कदाचिदप्यलक्ष्मीः ॥१४७

इति श्रीविष्णुपुराणे प्रथमेऽंशे नवमोऽध्यायः ।

प्रकृतं श्रियोऽवतारद्वयं निगमयन् प्रसङ्गादन्यानपि तदवतारानाह, भृगोरित्यादि यावदध्यायसमाप्ति ॥१३६॥

तत्सहायिनी तदनुवर्त्तनशीला ॥१४०॥

यदा हरिरादित्यो वामनोऽभूत्। भार्गवो जामदग्न्यः ॥१४१॥

कलहाधारा कलह आधारो यस्याः सा कलहोऽपि तेषु न भवतीत्यर्थः ॥१४५॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे नवमोऽध्यायः ॥

(ञ) सकलेत्यादिः—सकला विभूतयः ऐश्वर्य्याणि तासाम् अवाप्तेः हेतुः। अथवा सकलानां तत्स्तवकारिणां सर्वेषां विभूत्यवाप्तेः हेतुरित्यर्थः।

पाठान्तराणि—

३५ श्लोके, परावरेशं—।
७१ „ विद्या वेद्यञ्च—।
„ „ त्वामार्त्ताः—।
८० „ —ते यथा त्रिदशद्विषः।

कस्मिंश्चिद् ग्रन्थे ७७ श्लोकस्यान्तिमपङ्क्तिर्निम्नलिखितरूपेण दृश्यते—

"प्रक्षिप्यात्रामृतार्थं ताः सकला दैत्यदानवैः।"

११३ श्लोकस्यानन्तरं निम्नलिखितः श्लोकोऽधिको दृश्यते—

"पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणाम्।
वन्दे पद्ममुखीं देवीं पद्मनाभप्रियामहम्॥"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दशमोऽध्यायः

[भृगुसर्गादीनां पुनः कथनम्]

मैत्रेय उवाच ।

कथितं मे त्वया सर्व्वं यत्पृष्टोऽसि महामुने ।
भृगुसर्गात् प्रभृत्येष सर्गो मे कथ्यतां पुनः ॥१॥

पराशर उवाच ।

भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीर्विष्णुपरिग्रहः ।
तथा धातृविधातरौ ख्यात्यां जातौ सुतौ भृगोः ॥२॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ।
धातृविधात्रोस्ते भार्य्ये तयोर्जातौ सुतावुभौ ॥३॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
ततो वेदशिरा जज्ञे प्राणस्यापि सुतं शृणु ॥४॥
प्राणस्य कृतिमान् पुत्रो राजवांश्च ततोऽभवत् ।
ततो वंशो महाभाग विस्तारं भार्गवो गतः ॥५॥
पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ।
विरजाः सर्व्वगश्चैव तस्य पुत्रौ महात्मनः ॥६॥

वंशसंकीर्त्तने पुत्रान् वदिष्येऽहं तयोर्द्विज (क) ।
स्मृतिश्चाङ्गिरसः पत्नी प्रसूताः कन्यकास्तथा ॥७॥
सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ।
अनुसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् (ख)॥८॥
सोमं दुर्व्वाससञ्चैव दत्तात्रेयञ्च योगिनम् ।
प्रीत्यां पुलस्त्यभार्य्यायां दत्तोलिस्तत्सुतोऽभवत् ॥९॥
पूर्व्वजन्मनि योऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ।
कर्दमश्चावरीयांश्च सहिष्णुश्च सुतत्रयम् ॥१०॥
क्षमा तु सुषुवे भार्य्या पुलहस्य प्रजापतेः ।
क्रतोश्च सन्नतिर्भार्य्या बालखिल्यानसूयत ॥११॥
षष्टिर्यानि सहस्राणि यतीनामूर्द्ध्वरेतसाम् ।
अङ्गुष्ठपर्व्वमात्राणां जलद्भास्करतेजसाम् ॥१२॥
ऊर्জ্জायाञ्च वशिष्ठस्य सप्ताजायन्त वै सुताः ।
रजोगात्रोर्ध्वबाहुश्च सवनश्चानघस्तथा ॥१३॥

दशमोऽध्यायः

पुनर्भृगुसर्गात् प्रभृति भृगुसुतानुवादपूर्वकमेष भृगोर्वंशः कथ्यताम्, अन्यथा पुर्वापरकथासम्बन्धाप्रतीतेरित्यर्थः ॥१॥

अतो भृगोः सुतानुवदति भृगोरिति । विष्णोः परिग्रहः पत्नी ॥ २ ॥

ताभ्यां तयोरायति-नियत्योः प्रत्येकं प्राणाश्च मृकण्डश्चेत्येवम् उभौ सुतौ जातावित्यन्वयः । प्राणस्य वेदशिरा यज्ञे इत्यन्वयः ॥ ३।४ ॥

तस्यैव पुत्रान्तरमाह प्राणस्येति ॥ ५ ॥

तदेवं चतुर्विंशतिदक्षकन्यानां मध्ये श्रद्धादीनां त्रयोदशानां धर्मभार्य्याणां वंशाः कथिताः । अनन्तरञ्च ख्यातिः सत्यथ सम्भूतिरित्युद्दिष्टानाम् एकादशानां भृगुमरीच्यादिभार्य्याणां मध्ये ख्यात्यां भृगोर्वंशो निरूपितः । सत्याश्च भवभार्याया दक्षकोपाद् अप्रौढाया एव देहत्यागोक्त्या तस्या वंशो नाभूदित्यर्थादुक्तम् । अथ क्रमप्राप्तं मरीचेः सम्भूत्यां जातं वंशमाह पत्नी मरीचेरिति ॥ ६ ॥

वंशसंकीर्त्तन इति । मरीचेरेव कश्यपोऽन्यः पुत्रः, तत्पुत्रा विवस्वदादयः इत्यस्मिन्नेवांशे अन्ते वंशकीर्त्तने वक्ष्ये विवस्वतः श्राद्धदेवादयः । श्राद्धदेवस्य इक्ष्वाकुप्रमुखा इत्यादि तत्तत् पुत्रान् विस्तरतो वंशकीर्त्तने चतुर्थांशे वक्ष्ये । अत्र तु स्वल्पत्वात् पौर्णमासान्वयमात्रमुक्तम् इत्यर्थः ॥७॥

ताः कन्या निर्दिशति सिनीवालीति ॥८॥

सप्तर्षयस्तृतीये मन्वन्तरे । अभिमानी देवः न तु ज्वलन-

(क) वदिष्य इत्यात्मनेपदमार्षम् ।

(ख) जज्ञ इत्यत्र जनिरन्तर्भूतनिजर्थः । जनयामासेत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुतपाः शुक्र इत्येते सर्व्वे सप्तर्षयोऽमलाः ।
योऽसावग्निरभिमानी ब्रह्मणस्तनयोऽग्रजः ॥१४॥
तस्मात् स्वाहा सुतांल्लेभे त्रीणुदारौजसो द्विज ।
पावकं पावमानञ्च शुचिञ्चापि जलाशिनम् ॥१५॥
तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च ।
एवमेकोनपञ्चाशद् वह्नयः परिकीर्त्तिताः ॥१६॥
कथ्यन्ते वह्नयश्चैते पिता पुत्रत्रयञ्च यत् ।
पितरो ब्रह्मणा सृष्टा व्याख्याता ये मया तव ॥१७॥

अग्निष्वात्ता बर्हिषदोऽनग्नयः साग्नयश्च ये (ग) ।
तेभ्यः स्वधा सुते जज्ञे मेनां वैधारिणीं तथा ॥१८॥
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज (घ) ।
उत्तमज्ञानसम्पन्ने सर्व्वैः समुदितैर्गुणैः ॥१९॥
इत्येषा दक्षकन्यानां कथितापत्यसन्ततिः ।
श्रद्धावान् संस्मरन्नेताम् अनपत्यो न जायते ॥२०॥

इति श्रीविष्णुपुराणे प्रथमांशे दशमोऽध्यायः *

मात्ररूपः "ब्रह्मणस्तनयोऽग्रजः मुखादग्निरजायत" इति श्रुतेः ॥१४॥

उदारौजसः अतितेजस्विनः जलाशिनं सूर्यस्थत्वात् । तथा च कौर्मे "निर्मथ्यः पवमानः स्याद् वैद्युतः पावकः स्मृतः। यश्चासौ तपते सूर्य्ये शुचिरग्निरसौ स्मृतः" इति ॥१५॥

तेषां त्रयाणां प्रत्येकं पञ्चदश, पञ्चचत्वारिंशद् वह्नयः । पिता ब्रह्मपुत्र एकस्तत् पुत्रत्रयं पावकादि । एवमेकोनपञ्चाशत् ॥१७

अग्निष्वात्ता अनघयो जाताः । बर्हिषदः साग्नयो यज्वानः । "ये वा अयज्वानो गृहमेधिनः ते पितरोऽग्निष्वाताः, ये वै यज्वानस्ते पितरो बर्हिषदः" इति श्रुतेः ॥१८॥

तयोर्विवाहादिकं न अभूद् इत्याशयेन आह, ते उभे इति ॥१९।२०॥

(ग) अत्रापि जनिरन्तर्भूतणिजर्थः ।

(घ) ते उभे—मेना वैधारिणी चेति द्वे ।

इति श्रीधरस्वमिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे दशमोऽध्यायः ॥

---

*कस्मिंश्चिद् ग्रन्थे १६ श्लोकस्यान्तिमपङ्क्तिस्थले १७ श्लोकस्यादिमपङ्क्तिर्दृश्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकादशोऽध्यायः ।

[ध्रुवोपाख्यानम्]

पराशर उवाच ।

प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्य्यौ (क) धर्म्मज्ञौ कथितौ तव ॥१॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद् ब्रह्मन् पितुरत्यन्तवल्लभः (ख) ॥२॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ।
स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद् ध्रुवः सुतः (ग) ॥३
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥४॥
प्रत्यक्षं भूपतिस्तस्याः सुरुच्या नाभ्यनन्दत (घ) ।
प्रणयेनागतं पुत्रमुत्सङ्गारोहणोत्सुकम् (ङ) ॥५॥

मैत्रेय उवाच ।

सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पितुः पुत्रं तदारूढ़ं सुरुचिर्वाक्यमब्रवीत् ॥६॥
क्रियते किं वृथा वत्स महानेष मनोरथः ।
अन्यस्त्रीगर्भजातेन असम्भूय (च) ममोदरे ॥७॥

एकादशोऽध्यायः ।

मनोः कन्यान्वयः प्रोक्तः पुत्रवंशोऽधुनोच्यते । तत्राध्याय-द्वयेनाह ध्रुवस्य चरितं महत् । मनोर्द्वौ पुत्रौ द्वे च कन्ये । तत्र कन्ययोर्वंश उक्तः । इदानीं पुत्रद्वयानुवादपूर्वकमुत्तान-पादवंशमाह, प्रियव्रतेत्यादिना ॥१॥

तस्य सुरुचिः सुनीतिश्चेति द्वे भार्ये । तत्र सुरुच्याम् अभीष्टायां प्रेयस्याम् उत्तमो नाम सुतोऽभूत ॥२॥

राजासनस्थितस्य पितुरङ्कम् उत्सङ्गमाश्रितं भ्रातरम् उत्तमं दृष्ट्वा, तमङ्कम् आरोढुं ध्रुवो मनोरथं चक्रे इत्यन्वयः ॥४॥

सुरुच्याः प्रेयस्याः प्रत्यक्षं समक्षं तत्प्रणयभङ्गभयाद् ध्रुवं न अभ्यनन्दत् ॥५॥

तं ध्रुवं पितुरङ्कारोहणोत्सुकं दृष्ट्वा तथा स्वपुत्रञ्च तद-ङ्कारूढ़ं दृष्ट्वा सुरुचिरब्रवीत् इत्यन्वयः ॥६॥

सुरुच्या दुरुक्तिम् असहमानो ध्रुवः स्त्रीजितं पितरं विहाय मातुः समीपं गत्वा दुःखितायास्तस्या अनुमत्या पुरान्-निर्गत्य सप्तर्षीणाम् उपदेशेन मधुवने भगवन्तम् आराध्य सर्वोत्तमं पदं प्राप्त इति क्रमेण कथयिष्यन् सुरुच्या गर्वोक्ति-माह, क्रियते किमिति चतुर्भिः ॥७॥

(क) सुमहत् अतिमात्रं वीर्य्यं बलं ययोः तौ प्रभूतशक्ति-सम्पन्नावित्यर्थः ।

(ख) सुरुच्यां सुरुचिनामधेयायां महिष्याम् । अभीष्टाया-मिति तद्विशेषणम् तत्सुते उत्तमे वक्ष्यमाण-प्रीत्यतिशयोपपाद-नार्थम् । उत्तमः उत्तमाख्यः । अत्यन्तवल्लभः सुतरां प्रेयान् ।

(ग) सः राजा उत्तानपादः । तस्यां सुनीत्याख्यायां महिष्याम् । नातिप्रीतिमान् न प्रगाढ़प्रणयशाली । तस्याः सुनीतेः । ध्रुवः ध्रुवनामकः सुतः अभूदिति शेषः ।

(घ) नाभ्यनन्दतेत्यार्षम् ।

(ङ) उत्सङ्गेत्यादिः—उत्सङ्गारोहणाय अङ्काधिश्रयणाय उत्सुकं साग्रहमित्यर्थः । पुत्रं ध्रुवनामानमात्मजम् ।

(च) असम्भूय जन्म अलब्ध्वा । अन्या मदितरा स्त्री सुनीतिरूपा तस्या गर्भजातेन त्वयेति शेषः । तथाहि यदि मद्गर्भे जनिमग्रहीष्यस्तदैव ते तादृशस्य महतो मनोरथस्य साफल्य-सम्भावना समभविष्यदिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि ।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः ॥८॥
एतद् राजासनं सर्व्वभूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥९॥
उच्चैर्मनोरथस्तेऽयं मत्पुत्रस्येव किं वृथा ।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ॥१०॥

पराशर उवाच ।

उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितम् (छ) ।
जगाम कुपितो मातुर्निजाया (ज) द्विज मन्दिरम् ॥११॥
तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरम् (झ) ।
सुनीतिरङ्कमारोप्य मैत्रेयैतदभाषत ॥१२॥
वत्स कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥१३॥

पराशर उवाच ।

इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमपि गर्विता ॥१४॥
विनःश्वस्येति कथिते तस्मिन् पुत्रेण दुर्मनाः ।
श्वासक्षामेक्षणा दीना सुनीतिर्व्वाक्यमब्रवीत् ॥१५॥

सुनीतिरुवाच ।

सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि (ट) पुत्रक ।
न हि पुण्यवतां वत्स सपत्नैरेवमुच्यते ॥१६॥
नोद्वेगस्तात कर्त्तव्यः कृतं यद् भवता पुरा ।
तत् कोऽपहर्त्तुं (ठ) शक्नोति दातुं कश्चाकृतं त्वया ॥१७॥
राजासनं तथाच्छत्रं वराश्वा वरवारणाः ।
यस्य पुण्यानि तस्यैते मत्वैतच्छाम्य पुत्रक ॥१८॥
अन्यजन्मकृतैः पुण्यैः सुरुच्यां सुरुचिर्नृपः ।
भार्येति प्रोच्यते चान्या मद्विधा भाग्यवर्ज्जिता ॥१९॥

अविवेको मन्दमतिः ॥८॥

एतद् राजासनं सर्वभूभृतां संश्रयस्य चक्रवर्त्तिनः केतनं स्थानं, मत्पुत्रस्यैव योग्यं न हि राजपुत्रतामात्रलभ्यम् एतत् किन्तु मद्गर्भसम्भवसौभाग्यलभ्यम् ॥९॥

अतस्तव अयमुच्चैः उत्कृष्टैश्वर्य्यमनोरथो वृथैव, इत्यति-गर्वोक्तिः ॥१०॥

(छ) मातृभाषितम् विमातुः सुरुच्याः निरुक्तरूपं परुषं वाक्यमित्यर्थः ।

(ज) निजाया मातुः सुनीतेः ।

(झ) ईषत्प्रस्फुरितः विमातृवचनजन्य-मनःक्षोभेण मृदु कम्पितः अधरः यस्य तथाभूतम् । तादृशाधरकम्पनदर्शनादेव सुनीत्या पुत्रस्य कुपितभावो निर्णीत इति ध्येयम् ।

(ञ) तवावज्ञादिरूपे अपराधे समनुष्ठिते राजा दोष-कारिणस्तस्य शासनं कर्त्तुं शक्त इत्येवं राजशक्तेरनभ्युपमस्तव पितुरेवावज्ञानमिति भावः ।

यस्ते अपराध्यति अपराधं करोति, स तव पितरमेव अवजानाति (ञ) । स चैवम्भूतः कः इत्यर्थः ॥१३॥

तस्मिन् सुरुच्या वचसि कथिते सति श्वासेन अत्युष्णेन क्षामे म्लाने ईक्षणे नेत्रे यस्याः ॥१५॥

उद्वेगः क्षोभः ॥१७॥

एतन्मत्वा अवबुध्य शाम्य उपशमं भज ॥१८॥

सुरुच्यां नृपः सुरुचिः अतिप्रीतिमान् । मद्विधा मादृशी तु केवलं भाग्येति प्रोच्यते ॥१९॥

(ट) स्वल्पं अत्यल्पमात्रं भाग्यं शुभादृष्टं यस्य तथाभूतः । सपत्नैः शत्रुभिः । एवम्—यथा ते विमाता त्वां प्रत्याह तथेत्यर्थः । न उच्यते तथाहि त्वं पुण्यवान् नासि, अत एव तव विमात्रा तथा कथितमिति भावः ।

(ठ) केनाप्यपहर्त्तुमशक्यस्य स्वकृतस्य दुष्कृतस्येदं फलं त्वयानुभूयते, यच्च काम्यते तस्य हेतुभूतं सुकृतं ते नास्ति, न तत् केनापि तुभ्यं शक्यं दातुमित्येवं मत्वैव सन्तोष्टव्यमिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुण्योपचयसम्पन्नस्तस्याः पुत्रस्तथोत्तमः ।
मम पुत्रस्तथा जातः स्वल्पपुण्यो ध्रुवो भवान् ॥२०॥
तथापि दुःखं न भवान् कर्तुमर्हति पुत्रक ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥२१॥
यदि वा दुःखमत्यर्थं सुरुच्या वचसा तव ।
तत् पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे (ड) ॥२२॥
सुशीलो भव धर्म्मात्मा मैत्रः प्राणिहिते रतः ।
निम्नं यथापः प्रवणाः पात्रमायान्ति सम्पदः (ढ) ॥२३

ध्रुव उवाच ।

अम्ब यत् त्वमिदं प्राह प्रशमाय वचो मम ।
नैतद् दुर्वचसा भिन्ने हृदये मम तिष्ठति ॥२४॥
सोऽहं तथा यतिष्यामि यथा सर्वोत्तमोत्तमम् ।
स्थानं प्राप्स्याम्यशेषाणां जगतामपि पूजितम् ॥२५॥
सुरुचिर्दयिता राज्ञस्तस्या जातोऽस्मि नोदरात् ।
प्रमावं पश्य मेऽम्ब त्वं वृद्धस्यापि तवोदरे ॥२६॥
उत्तमः स मम भ्राता यो गर्भे न धृतस्त्वया ।
स राजासनमाप्नोतु पित्रा दत्तं तथास्तु तत् ॥२७॥
नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्म्मणा ।
इच्छामि तदहं स्थानं यन्न प्राप पिता मम ॥२८॥

पराशर उवाच ।

निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निष्क्रम्य ततस्तद् बाह्योपवनं ययौ ॥२९॥
स ददर्श मुनींस्तत्र सप्त पूर्वागतान् ध्रुवः ।
कृष्णाजिनोत्तरीयेषु विष्टरेषु समास्थितान् ॥३०॥
स राजपुत्रस्तान् (ण) सर्वान् प्रणिपत्याभ्यभाषत ।
प्रश्रयावनतः सम्यगभिवादनपूर्वकम् ॥३१॥

ध्रुव उवाच ।

उत्तानपादतनयं मां निबोधत सत्तमाः ।
जातं सुनीत्यां निर्वैदाद् युष्माकं प्राप्तमन्तिकम् ॥३२

ऋषय ऊचुः ।

चतुःपञ्चाब्दसम्भूतो बालस्त्वं नृपनन्दन ।
निर्वेदकारणं किञ्चित् तव नाद्यापि विद्यते ॥३३॥

यस्य यावदेव प्राप्तं स तेन तुष्यति ॥२१॥
मैत्रो मित्रधर्मा । प्रवणाः निम्नदेशाभिमुख्यः सत्यः पात्रं सगुणं नरम् ॥२३॥
अम्ब ! हे मातः ! मम प्रशमाय नोद्वेगस्तात कर्त्तव्य इत्यादि सप्तश्लोकीरूपं यद् वचः प्राह ब्रवीषि, तद् भिन्ने भाण्डे पय इव मम हृदये न तिष्ठति ॥२४॥
वृद्धस्य वृद्धिं प्राप्तस्यापि ॥२६॥
किन्तु स्वकर्मणा प्राप्तुमेव इच्छामि ॥२८॥
पूर्वागतान् स्वानुग्रहाय ततः पूर्वमेव तत्रागतान् कृष्णाजिनम् उत्तरीयमुपरि आस्तरणं येषां तेषु विष्टरेषु कुशासनेषु उपविष्टान् ॥३०॥
निर्वेदात् दुःखात् प्राप्तं जानीत इत्यर्थः ॥३२॥

(ड) सर्वफलप्रदे निखिलकाम्यफलप्रदानसमर्थे पुण्योपचये सुकृतस्य वृद्धौ यत्नं कुरु । तथाहि यदि यत्नेन सर्वफलदायी पुण्योपचयः कर्त्तुं शक्यस्तदा सुखेनैव लभ्यं तव काम्यफलमिति भावः ।

(ढ) सामान्येनार्थान्तरेणोपमासंसृष्टेन प्रागुक्तं विशेषार्थं समर्थयितुमाह—निम्नमित्यादि । तथाहि यदि सौशील्यादिभिर्गुणैस्त्वं सत्पात्रभूतः स्यास्तदा त्वां सम्पदः प्राप्नुयुर्यतः सम्पदः पात्रमायान्तीति नियमः ।

(ण) स राजपुत्रः राज्ञः उत्तानपादस्य पुत्रः ध्रुवः । प्रश्रयावनतः विनयेनातिनम्रः । सम्यगभिवादनेत्यत्राभिवादनदस्य सम्यक्त्वं भक्तिश्रद्धातिशयादिगुणयुक्तत्वम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न चिन्त्यं भवतः किञ्चिद् म्रियते भूपतिः पिता ।
न चैवेष्टवियोगादि तव पश्यामि बालक ॥३४॥

शरीरे न च ते व्याधिरस्माभिरुपलक्ष्यते ।
निर्वेदः किं निमित्तं ते कथ्यतां यदि विद्यते ॥३५॥

पराशर उवाच ।

ततः स कथयामास सुरुच्या यदुदाहृतम् ।
तन्निशम्य ततः प्रोचुर्मुनयस्ते परस्परम् ॥३६॥

अहो क्षात्रं परं तेजो बालस्यापि यदक्षमा ।
सपत्न्या मातुरुक्तस्य हृदयान्नापसर्पति ॥३७॥

भो भो क्षत्रियदायाद निर्वेदाद् यत् त्वयाधुना ।
कर्त्तुं व्यवसितं तन्नः कथ्यतां यदि रोचते ॥३८॥

यच्च कार्यं तवास्माभिः साहाय्यममितद्युते ।
तदुच्यतां विवक्षुस्तमस्माभिरुपलक्ष्यसे ॥३९॥

ध्रुव उवाच ।

नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः ।
तत्स्थानमेकमिच्छामि भुक्तं नान्येन यत् पुरा ॥४०॥

एतन्मे क्रियतां सम्यक् कथ्यतां प्राप्यते यथा ।
स्थानमग्र्यं समस्तेभ्यः स्थानेभ्यो मुनिसत्तमाः ॥४१॥

मरीचिरुवाच ।

अनाराधितगोविन्दै- (त) र्नरैः स्थानं नृपात्मज ।
न हि सम्प्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥४२॥

अत्रिरुवाच ।

परः पराणां पुरुषो यस्य तुष्टो जनार्दनः ।
स प्राप्नोत्यक्षयं स्थानमेतत् सत्यं मयोदितम् ॥४३॥

अङ्गिरा उवाच ।

यस्यान्तः (थ) सर्वमेवेदमच्युतस्याव्ययात्मनः ।
तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि ॥४४॥

पुलस्त्य उवाच ।

परं ब्रह्म परं धाम योऽसौ ब्रह्म तथा परम् ।
तमाराध्य हरिं याति मुक्तिमप्यतिदुर्ल्लभाम् (द) ॥४५॥

चत्वारः पञ्च वा अब्दा यस्य, स चासौ सम्भूतश्च सम्यग्-भूतः सौकुमार्येण जातः । अल्पवयाः कोमलतरश्चेत्यर्थः ॥३३॥

चिन्त्यं कुटुम्बादिविषयं भवतः किञ्चिन्नास्ति, यतः पिता म्रियते जीवति । स च भूपतिः ॥३५॥

अक्षमा मानभङ्गासहनम् ॥३७॥

क्षत्रियदायाद ! क्षत्रियपुत्र ॥३८॥

विवक्षुः किञ्चिद् वक्तुमिच्छुः ॥३९।४०॥

एतत् साहाय्यं क्रियताम् । साहाय्यप्रकारमेवाह सम्यक् कथ्यतामिति ॥४१॥

(त) न आराधितः उपासितः गोविन्दः यैः तथाभूतैः नरैः श्रेष्ठं सर्वोत्कृष्टं स्थानं न प्राप्यते, अपि तु आराधित-गोविन्दैरेव, तस्मादिति भावः ।

(थ) यस्य अव्ययात्मनः नित्यस्वरूपस्य अच्युतस्य नारायणस्य अन्तः अभ्यन्तरे एतत् सर्वमेव निखिलं चराचर-मेवेत्यर्थः ।

(द) अतिदुर्लभां अतिकष्टेन लभ्यां मुक्तिमपि याति, का कथा काम्यफलान्तरस्येत्यर्थापत्तिलभ्यम् । अतस्त्वं तथाविधं हरिमाराधय, तेनैव त्वं काम्यमग्र्यं स्थानमवश्यमेव लप्स्यस इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रतुरुवाच ।

यो यज्ञपुरुषो यज्ञे योगे यः परमः पुमान् ।
तस्मिंस्तुष्टे (ध) यदप्राप्यं किं तदस्ति जनार्दने ॥४६॥

पुलह उवाच ।

ऐन्द्रमिन्दः परं स्थानं यमाराध्य जगत्पतिम् ।
प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ॥४७॥

वसिष्ठ उवाच ।

प्राप्नोत्याराधिते विष्णौ मनसा यद् यदिच्छति ।
त्रैलोक्यान्तर्गतं स्थानं किमु वत्सोत्तमोत्तमम् ॥४८॥

ध्रुव उवाच

आराध्यः कथितो देवो भवद्भिः प्रणतस्य मे ।
मया तत् परितोषाय यजूंजप्तव्यं तदुच्यताम् ॥४९॥
यथा चाराधनं तस्य मया कार्य्यं महात्मनः ।
प्रसादसुमुखास्तन्मे कथयन्तु महर्षयः ॥५०॥

ऋषय ऊचुः ।

राजपुत्र यथा विष्णोराराधनपरैर्नरैः ।
कार्य्यमाराधनं तन्मे यथावच्छ्रोतुमर्हसि ॥५१॥
बाह्यार्थानखिलांश्चित्तं त्याजयेत् प्रथमं नरः ।
तस्मिन्नेव जगद्धाम्नि ततः कुर्वीत निश्चलम् ॥५२॥
एवमेकाग्रचित्तेन तन्मयेन धृतात्मना ।
जप्तव्यं यन्निबोधैतत् त्वं नः पार्थिवनन्दन ॥५३॥
हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे ।
ॐ नमो वासुदेवाय शुद्धज्ञानस्वभाविने ॥५४॥
एतज्जजाप भगवान् जप्यं स्वायम्भुवो मनुः ।
पितामहस्तव पुरा तस्य तुष्टो जनार्दनः ॥५५॥
ददौ यथाभिलषिताम् ऋद्धिं त्रैलोक्यदुर्ल्लभाम् ।
तथा त्वमपि गोविन्दं तोषयैतत् सदा जपन् ॥५६॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे एकादशोऽध्यायः ।

मनसा यद् यदिच्छति, सत्यलोकादि तदपि प्राप्नोति । त्रैलोक्यान्तर्गतमुत्तमं प्राप्नोतीति किमु वक्तव्यम् ॥४८॥

कृष्णाराधनमेवैकं पुंसां सर्वफलप्रदम् । सर्वैरप्येवमेवोक्ते तदुपायं बुभुत्सते । आराध्यः कथित इति द्वाभ्याम् ॥४३।५१।

बाह्यार्थानित्यादिना अष्टाङ्गयोगसाध्यचित्तसमाधानपूर्वकं मन्त्रजपम् उपदिशन्ति । तत्र प्रथमं बाह्यार्थान् चितं त्याजयेत् इति त्यागानुकूलप्राथमिकप्रयत्नविधानेन यथार्हं यमनियमासनप्राणायामपूर्वकः प्रत्याहार उक्तः । तस्मिन्नेव निश्चलं कुर्वीतेति धारणोक्ता ॥५२॥

एवमनेन प्रकारेण एकाग्रचित्तेन इति पूर्वोक्तषडङ्गसाध्यं ध्यानमुक्तम् । तथा च वक्ष्यति "तद्रूप प्रत्ययैवैका सन्ततिश्चान्यनिस्पृहा । तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ।" इति तन्मयेनेति समाधिरुक्तेः । धृतात्मनेति पुनर्लयविक्षेपप्राप्तौ तत्परिहाराय चित्तस्थैर्य्ये प्रयत्नः उक्तः तदुक्तं गीतासु "यतो यतो निःसरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ।" इति ॥५३॥

हिरण्यगर्भो ब्रह्मा, पुरुषो विष्णुः प्रधीयते प्रक्षीप्यते प्रकृतौ विश्वमनेनेति प्रलयहेतुः शिवः प्रधानसंज्ञः अव्यक्तस्तेषां त्रयाणां नियन्ता त्रिगुणमायाशक्तिकारणात्मा । पाठान्तरे व्यक्तं विश्वम् । एतानि रूपाणि सन्ति यस्य तस्मै । एवमौपाधिकेषु रूपेषु सत्स्वपि शुद्धज्ञानात्मकः स्वभावोऽप्रच्युत एवास्ति यस्य तस्मै । ओंकारप्रतिपाद्याय वासुदेवाय नम इति मन्त्रार्थः ॥५४॥

(ध) तस्मिन् जनार्दने तुष्टे प्रीते सति यत् वस्तु अप्राप्यम् अलभ्यं तत् किं वस्तु अस्ति ? अपितु न किमपि तथाभूतमस्ति । अतः तवाराधनया तस्मिन् तुष्टे तवापि काम्यमग्र्यं स्थानमवश्यमेव प्राप्तव्यमिति भावः ।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे एकादशोऽध्यायः ॥

पाठान्तराणि—६—श्लोक, स्वपुत्रञ्च तथारूढं—। २५—श्लोक, जगतामभिपूजितम् ।
१४— „ , प्रत्यक्षमतिगर्व्विता । २६— „ , यो गर्भेण धृतस्त्वया ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वादशोऽध्यायः ।

[ध्रुवस्य वरलाभः]

पराशर उवाच ।

निशम्य तदशषेण मैत्रेय नृपतेः सुतः (क) ।
निर्जगाम वनात् तस्मात् प्रणिपत्य स तानृषीन् ॥१॥
कृतकृत्यमिवात्मानं मन्यमानस्ततो द्विज ।
मधुसंज्ञं (ख) महापुण्यं जगाम यमुनातटम् ॥२॥
पुनश्च मधुसंज्ञेन दैत्येनाधिष्ठितं यतः ।
ततो मधुवनं नाम्ना ख्यातमत्र महीतले ॥३॥
हत्वा च लवणं (ग) रक्षो मधुपुत्रं महाबलम् ।
शत्रुघ्नो मथुरां नाम पुरीं यत्र चकार वै ॥४॥
यत्र वै देवदेवस्य सान्निध्यं हरिमेधसः ।
सर्व्वपापहरे तस्मिन् तपस्तीर्थे चकार सः (घ) ॥५॥
मरीचिमुख्यैर्मुनिभिर्यथोद्दिष्टमभूत् तथा ।
आत्मन्यशेषदेवेशं स्थितं विष्णुममन्यत ॥६॥
अनन्यचेतसस्तस्य ध्यायतो भगवान् हरिः ।
सर्व्वभूतगतो विप्र सर्वभावगतोऽभवत् ॥७॥
मनस्यवस्थिते तस्य विष्णौ मैत्रेय योगिनः ।
न शशाक धरा भारमुद्वोढुं भूतधारिणी ॥८॥
वामपादस्थिते तस्मिन् ननामार्द्धेन मेदिनी ।
द्वितीयश्च ननामार्द्धं क्षितेर्दक्षिणसंस्थिते ॥९॥
पादाङ्गुष्ठेन संपीड्य यदा स वसुधां स्थितः ।
तदा सा वसुधा विप्र चचाल सह पर्वतैः ॥१०॥

द्वादशोऽध्यायः ।

तस्मात् पुरोपवनाद् निर्जगाम ॥१।२॥

हरतीति हरिः । सर्वदुःखहारिणी यद्विषया मेधा स हरिमेधाः । नित्यमसि च प्रजामेधयोरिति सान्तत्वम् ॥५

मरीचिमुख्यैर्मरीचिप्रमुखैः । यथा उद्दिष्टम् उपदिष्टम् । अमन्यत दध्यौ ॥ ६॥

सर्वभावगतः सर्वभावेन विश्वरूपेण तच्चित्तत्वं गतः प्राप्तोऽभवत् ॥७॥

ततश्च तस्य भारमुद्वोढुं भूर्नाशक्नोदित्याह, मनस्यवस्थित इति त्रिभिः ॥८॥

वामेन पादेन स्थिते तस्मिन् अर्द्धेन अर्द्धं वामभागं मेदिनी ननाम अवनताभूत् । दक्षिणेन पादेन स्थिते तस्मिन् क्षितेर्द्वितीयं दक्षिणमर्धं ननाम ॥९॥

यदा च पादाङ्गुष्ठेन वसुधां मध्यतः सम्पीड्य आक्रम्य स्थितः तदा समस्ता वसुधा चचाल ॥१०॥

(क) नृपतेः उत्तानपादस्य राज्ञः । सुतः पुत्रः ध्रुव इत्यर्थः । तस्माद् वनाद् बाह्योपवनादित्यर्थः । अस्य यमुनातटं जगामेत्युत्तरश्लोकस्थेनान्वयः ।

(ख) मधुसंज्ञं मधुवननामकम् यमुनातटम् यमुनातीरम् । यमुनातीरस्य वनावृतो यो भागः मधुवनसंज्ञयाभिहितः, तं भागं जगामेत्यर्थः ।

(ग) लवणं लवणाख्यम् । मधुपुत्रं मधुसंज्ञस्य दैत्यस्य तनयम् ।

(घ) स ध्रुवः । सर्वपापहरे तस्मिन् तीर्थे तपः चकार । तस्य तीर्थस्य सर्वपापहर इति विशेषणेन विशेषणात् मातृसूचितपूर्वस्य दुरदृष्टस्य तत्रैव तपश्चरणेन क्षयं सम्भाव्य तत्र तपश्चकारेति व्यज्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नद्यो नदाः समुद्राश्च संक्षोभं परमं ययुः ।
तत्क्षोभादमराः क्षोभं परं जग्मुर्महामुने ॥११॥

यामा नाम तदा देवा मैत्रेय परमाकुलाः ।
इन्द्रेण सह संमन्त्र्य ध्यानभङ्गं प्रचक्रमुः (ङ) ॥१२॥

कुष्माण्डा विविधै रूपैः सहस्रेण महामुने ।
समाधिभङ्गमत्यन्तमारब्धाः कर्त्तुमातुराः ॥१३॥

सुनीतिर्नाम तन्माता सास्रा तत्पुरतः स्थिता ।
पुत्रेति करुणां वाचमाह मायामयी तदा ॥१४॥

पुत्रकास्मान्निवर्त्तस्व शरीरव्ययदारुणात् ।
निर्बन्धतो (च) मया लब्धो बहुभिस्त्वं मनोरथैः ॥१५

दीनामेकां परित्यक्तुमनाथां न त्वमर्हसि ।
सपत्नीवचनाद् वत्स अगतेस्तं गतिर्मम ॥१६॥

क च त्वं पञ्चवर्षीयः क चैतद् दारुणं तपः ।
निवर्त्त्यतां मनः कष्टान्निर्बन्धात् फलवर्ज्जितात् ॥१७

कालः क्रीड़नकानां ते तदन्तेऽध्ययनस्य च ।
ततः समस्तभोगानां तदन्ते चेष्यते तपः ॥१८॥

कालक्रीड़नकानां यस्तव बालस्य पुत्रक ।
तस्मिंस्त्वमित्थं तपसि किं नाशयात्मनो रतः ॥१९

मत्प्रीतिः परमो धर्म्मो वयोऽवस्थाक्रियाक्रमम् ।
अनुवर्त्तस्व सा मोहं निवर्त्तास्मादधर्मतः (छ) ॥२०

परित्यजति वत्साद्य यद्येतन्न भवांस्तपः ।
त्यक्ष्याम्यहमपि प्राणांस्ततो वै पश्यतस्तव ॥२१॥

पराशर उवाच ।

तां विलापवतीमेवं वाष्पाबिल-विलोचनाम् ।
समाहितमना विष्णौ पश्यन्नपि न दृष्टवान् ॥२२॥

वत्स वत्स सुघोराणि रक्षांस्येतानि भीषणे ।
वनेऽभ्युद्यतशस्त्राणि समायान्त्यपगम्यताम् ॥२३॥

इत्युक्त्वा प्रययौ साथ रक्षांस्याविर्बभुस्ततः (ज) ।
अभ्युद्यतोग्रशस्त्राणि ज्वालामालाकुलैर्मुखैः ॥२४॥

ततो नादानतीवोग्रान् राजपुत्रस्य ते पुरः ।
मुमुचुर्दीप्तशस्त्राणि भ्रामयन्तो निशाचराः ॥२५॥

नद्यादयश्च क्षोभं प्राप्ताः ॥११॥

ततो देवैरनेकधा विघ्ने क्रियमाणेऽपि तत्समाधेरव्युत्थान-लक्षणं मतिदार्ढ्यम् आह यामा नामेत्यादिना । एवं सर्वासु मायास्वित्यतः प्राक्तनेन ग्रन्थेन ॥१२॥

कुष्माण्डाः केचिदुपदेवाः ॥१३॥

सास्रा अश्रुमुखी सती ॥१४॥

शरीरस्य व्ययेन दारुणात् तीव्रादस्मात् तपोनिर्बन्धात् निवर्त्तस्व ॥१५

सपत्नीवचनात् क्रुद्धः सन् मां त्यक्तुं न अर्हसीत्यर्थ ॥१६॥

यतो मत्प्रीतिर्मत्तोषणं तव परो धर्मः, अतः कालः क्रीड़नकानां ते इत्यादि मदुक्तं वयोऽवस्थानुरूपं क्रियाणां क्रमम् अनुवर्त्तस्व, मोहं दुराग्रहं मा अनुवर्त्तस्व । भाविमहद्-दुःखहेतुत्वाद् अस्मादकालतपोनिर्बन्धलक्षणाद् अधर्माद् निवर्त्तस्व । मत्प्रीतिपरमम् इति पाठे मत्प्रीत्या परम उत्कृष्टो यो भवेत् तं वयोऽवस्थाक्रियाक्रमयुक्तं धर्ममनु-वर्त्तस्वेत्यर्थः ॥२०॥

वाष्पैरश्रुभिराविले क्लिन्ने विलोचने यस्यास्तां पश्यन्नपि उन्मीलितनेत्रोऽपि ॥ २२ ॥

(ङ) प्रपूर्वकस्य क्रमेरारम्भेऽर्थ आत्मनेपदस्यानुशासनिक-त्वात् प्रचक्रमुरिति परस्मैपदमार्षम् ।

(च) अस्मादिति निर्बन्धत इत्यस्य विशेषणम् । निर्बन्धत इति सुदृढ़ादाग्रहादित्यर्थः ।

(छ) निवर्त्तेति परस्मैपदमार्षम् ।

(ज) आविर्बभुरिति भाधातो रूपम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवाश्च शतशो नेदुः सज्वालाकवलैर्मुखैः ।
त्रासाय तस्य बालस्य योगयुक्तस्य सर्व्वशः ॥२६॥

हन्यतां हन्यतामेष छिद्यतां छिद्यतामयम् ।
भक्ष्यतां भक्ष्यताञ्चायमित्यूचुस्ते निशाचराः ॥२७॥

ततो नानाविधान् नादान् सिंहोष्ट्रमकराननाः ।
त्रासाय राजपुत्रस्य नेदुस्ते रजनीचराः ॥२८॥

रक्षांसि तानि ते नादाः शिवास्तान्यायुधानि च ।
गोविन्दासक्तचित्तस्य ययुर्नेन्द्रियगोचरम् ॥२९॥

एकाग्रचेताः सततं विष्णुमेवात्मसंश्रयम् ।
ददृष्टवान् पृथिवीनाथपुत्रो नान्यत् कथञ्चन ॥३०॥

ततः सर्व्वासु मायासु विलीनासु पुनः सुराः ।
संक्षोभं परमं जग्मुस्तत्पराभवशङ्किताः ॥३१॥

ते समेत्य जगद्योनिमनादिनिधनं हरिम् ।
शरण्यं शरणं यातास्तपसा तस्य तापिताः ॥३२॥

देवा ऊचुः ।

देव देव जगन्नाथ परेश पुरुषोत्तम ।
ध्रुवस्य तपसा तप्तास्त्वां वयं शरणं गताः ॥३३॥

दिने दिने कलालेशैः शशाङ्कः पूर्य्यते यथा ।
तथायं तपसा देव प्रयात्यृद्धिमहर्निशम् ॥३४॥

औत्तानपादितपसा वयमित्थं जनार्दन (ञ) ।
भीतास्त्वां शरणं यातास्तपसस्तं निवर्त्तय ॥३५॥

न विद्मः किं स शक्रत्वं किं सूर्य्यत्वमभीप्सति ।
वित्तापाम्बुपसोमानां साभिलाषः पदे नु किम् ॥३६॥

तदस्माकं प्रसीदेश हृदयाच्छल्यमुद्धर ।
उत्तानपादतनयं तपसः सन्निवर्त्तय ॥३७॥

भगवानुवाच ।

नेन्द्रत्वं न च सूर्य्यत्वं नैवाम्बुपधनेशताम् ।
प्रार्थयत्येष यं कामं तं करोम्यखिलं सुराः ॥३८॥

यात देवा यथाकामं स्वस्थानं विगतज्वराः ।
निवर्त्तयाम्यहं बालं तपस्यासक्तमानसम् ॥३९॥

परशर उवाच

इत्युक्ता देवदेवेन प्रणम्य त्रिदशास्ततः
प्रययुः स्वानि धिष्णानि शतक्रतुपुरोगमाः ॥४०॥

शिवाः, ज्वाला एव कवलं ग्रासस्तत्सहितैर्मुखैर्नादं चक्रुः ॥ २६ ॥

सिंहोष्ट्रमकराणामिव आननानि येषां ते (झ) ॥२८॥३०॥

तस्माद् यः पराभवः स्वपदापहारलक्षणस्तस्मात् शङ्किताः सन्तः ॥ ३१ ॥

कलालेशैः एध्याभिः स्वकलाभिः ॥ ३४ ॥
हृदयात् शल्यं पराभवाशङ्कालक्षणम् उद्धर उत्पाटय ॥३७॥
काममभेप्सितमर्थम् ॥ ३८ ॥

विगतज्वराः निःशङ्काः ॥ ३९ ॥

स्वानि धिष्णानि स्वस्थानानि ॥ ४० ॥

(झ) केचित् सिंहमुखाः केचिदुष्ट्रमुखाः केचिच्च मकरमुखा इत्यर्थः । रजनीचरा इत्यस्य विशेषणमिदम् ।

(ञ) औत्तानपादितपसेति-उत्तानपादस्य अपत्यम् औत्तानपादिः, उत्तानपादशब्दादपत्यार्थे इन् प्रत्ययः तस्य तपसेत्यर्थः ।

(ट) वित्तपाम्बुपसोमानामिति—वित्तं धनं पाति इति वित्तपः धनेशः कुबेरः, अम्बु पातीति अम्बुपः जलाधिपतिः वरुणः, सोमः सुधानिधिश्चन्द्रः तेषामित्यर्थः ।

(ठ) प्रार्थनं प्रार्थः तं करोतीत्यर्थे इन् प्रत्ययेन प्रार्थीति पदं सिद्धम्, अर्थधातोरात्मनेपदित्वादन्यथा तत्पदसाधुत्वं सम्भवात् । यं काममित्यस्यापि प्रार्थयतीत्यनेन सम्बन्धः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भगवानपि सर्वात्मा तन्मयत्वेन (ड) तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥४१

श्रीभगवानुवाच

उत्तानपादे भद्रं ते तपसापिरतोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ॥४२॥

बाह्यार्थनिरपेक्षं ते मयि चित्तं यदाहितम् ।
तुष्टोऽहं भवतस्तेन तद् वृणीष्व वरं परम् ॥४३॥

पराशर उवाच ।

श्रुत्वा तद् गदितं तस्य देवदेवस्य बालकः ।
उन्मीलिताक्षो ददृशे ध्यानदृष्टं (ढ) हरिं पुरः ॥४४॥

शङ्खचक्रगदाशार्ङ्गवरासिधरमच्युतम् ।
किरीटिनं समालोक्य जगाम शिरसा महीम् ॥४५॥

रोमाञ्चिताङ्गः सहसा साध्वसं परमं गतः ।
स्तवाय देवदेवस्य स चक्रे मानसं ध्रुवः ॥४६॥

किं वदामि स्तुतावस्य केनोक्तेनास्य संस्तुतिः ।
इत्याकुलमतिर्देवं तमेव शरणं ययौ ॥४७॥

ध्रुव उवाच ।

भगवन् यदि मे तोषं तपसा परमं गतः ।
स्तोतुं तदहमिच्छामि वरमेतं (ण) प्रयच्छ मे ॥४८॥

ब्रह्माद्यैर्व्वेदवेदज्ञैर्ज्ञायते यस्य नो गतिः ।
तं त्वां कथमहं देव स्तोतुं शक्नोमि बालकः ॥४९॥

त्वद्भक्तिप्रवणं ह्येतत् परमेश्वर मे मनः ।
स्तोतुं प्रवृत्तं त्वत्पादौ तत्र प्रज्ञां प्रयच्छ मे ॥५०॥

पराशर उवाच ।

शङ्खप्रान्तेन गोविन्दस्तं पस्पर्श कृताञ्जलिम् ।
उत्तानपादतनयं द्विजवर्य्य जगत्पतिः ॥५२॥

अथ प्रसन्नवदनस्तत्क्षणान्नृपनन्दनः ।
तुष्टाव प्रणतो भूत्वा भूतधातारमच्युतम् ॥५२॥

ध्रुव उवाच ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
भूतादिरादिप्रकृतिर्यस्य रूपं नतोऽस्मि तम् ॥५३॥

यद् यस्मदाहितं समाहितम् ॥ ४३ ॥

चतुर्षु भुजेषु शङ्खादिधरं कक्षादौ च वरासिधरं श्रेष्ठ-खड्गधरम्। शिरसा महीं जगाम दण्डवत् प्रणतो बभूव ।४५।

स्तवाय मानसं चक्रे ॥ ४६ ॥

ततश्च ब्रह्मादिभिरविज्ञातगतेरस्य स्तुतौ विषये बालोऽहं किं वदामि। केन वा सर्वात्मत्वेन केवलत्वेनोक्तेन वास्य स्तुतिर्भवेदिति व्याकुलमतिस्तमेव शरणं ययौ ॥ ४७ ॥

सर्ववेदमयस्य शंखस्य प्रान्तेन वेदान्तभागेन परमेश्वर-तत्त्वप्रतिपादकेन पस्पर्श "ब्रह्ममयेन कम्बुना पस्पर्श" इति शुकोक्तेः ॥ ५१॥

प्रसन्नवदनः प्राप्तज्ञानत्वात् "शोभा तस्य मुखे य एवं वेदेति। ब्रह्मविद इव ते सौम्य मुखमाभाति" इति श्रुतेः। भूतानां धातारमच्युतं तुष्टाव सर्वाश्रयभूतस्थिरस्थानार्थि-तत्त्वात् ॥५३॥

(ड) तन्मयत्वेन—जनार्दनैकान्तत्वेन ध्रुवस्येति शेषः। चत्वारो भुजा यत्र तादृशं वपुर्यस्य सः।

(ढ) ध्यानदृष्टम् ध्यानेन पुरा स्वीये अन्तःकरणे अवलोकि-तम्। एतेन तदा तत्र स्वीयाराध्यभगवद्बुद्धिर्व्यज्यते।

(ण) एतं वरमिति मया भवदीयस्तवस्य वरमित्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुद्धः सूक्ष्मोऽखिलव्यापी प्रधानात् परतः पुमान् ।
यस्य रूपं नमस्तस्मै पुरुषाय गुणाशिने ॥५४॥
भूरादीनां समस्तानां गन्धादीनाञ्च शाश्वतः ।
बुध्यादीनां प्रधानस्य पुरुषस्य च यः परः ॥५५॥
तं ब्रह्मभूतमात्मानमशेषजगतः परम् ।
प्रपद्ये शरणं शुद्धं तद्रूपं परमेश्वरम् ॥५६॥
बृहत्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितम् ।
तस्मै नमस्ते सर्वात्मन् योगिचिन्त्याविकारवत् ॥५७॥
सहस्रशीर्षा पुरुष सहस्राक्षः सहस्रपात् ।
सर्व्वव्यापी भुवः स्पर्शादत्यतिष्ठद् दशाङ्गुलम् ॥५८॥
यद्भूतं यच्च वै भाव्यं पुरुषोत्तम तद् भवान् ।
त्वत्तो विराट् स्वराट् सम्राट् त्वत्तश्चाप्यधिपूरुषः ॥
अत्यरिच्यत सोऽधश्च तिर्यक् चोर्ध्वञ्च वै भुवः ।
त्वत्तो विश्वमिदं जातं त्वत्तो भूतभविष्यती ॥६०॥
त्वद्रूपधारिणश्चान्तर्भूतं सर्व्वमिदं जगत् ।
त्वत्तो यज्ञः सर्व्वहुतः पृषदाज्यं पशुर्द्विधा ॥६१॥
त्वत्तो ऋचोऽथ सामानि त्वत्तश्छन्दांसि जज्ञिरे ।
त्वत्तो यजूंष्यजायन्त त्वत्तोऽश्वाश्चैकतोदतः ॥६२॥
गावस्त्वत्तः समुद्भूतास्त्वत्तोऽजा अवयो मृगाः ।
त्वन्मुखाद् ब्राह्मणास्त्वत्तो बाह्वोः क्षत्रमजायत ॥६३॥
वैश्यास्तवोरुजाः शूद्रास्तव पद्भ्यां समुद्गताः ।
अक्ष्णोः सूर्य्योऽनिलः श्रोत्राच्चन्द्रमा मनसस्तव ॥६४॥

भूम्यादीनि स्थूलसूक्ष्मरूपाणि भूतानि दश, मन इत्येकादशेन्द्रियोपलक्षणम्। बुद्धिर्महत्तत्त्वं, भूतादिरहङ्कारः, आदिप्रकृतिरित्येवं चतुर्विंशतितत्त्वानि यस्य रूपं तं नतोऽस्मि ॥५३

प्रधानात् परतः परः प्रथमान्तात् तसिः। गुणाशिने गुणसाक्षिणे ॥५६॥

बृहत्त्वात् सर्वगतत्वात् कारणतया संवर्द्धिकत्वात्। विकारवन्न विभाति अविकारवत्। योगिचिन्त्यश्च तदविकारवच्च। हे योगिचिन्त्य इति पृथक् पदं वा ॥५७॥

बृहत्त्वं बृंहणत्वञ्च विष्णुवन् पुरुषसूक्तार्थरूपेण स्तौति। सहस्रशीर्षेत्यादिना। सहस्रमित्यपरिमितं नाम। अपरिमितानि शीर्षाणि यस्य विश्वरूपस्य सः। सहस्रमक्षीणि यस्य सः। सहस्रं पादा यस्य। स भुवः स्पर्शाद् भूशब्देन ब्रह्माण्डं तस्य स्पर्शादिति ल्यब्लोपे पञ्चमी। दशाङ्गुलमित्याधिक्यमात्रपरम् अतोऽयमर्थः। सावरणं ब्रह्माण्डं सृष्टवा अभिव्याप्य तदतिक्रम्य निरवधिर्भवान् स्थित इति ॥५८॥

स्पर्शश्चात्र न संयोगमात्रं, किन्तु कारणत्वेन तद्व्याप्तिः। अतः कार्यात् कारणस्याधिक्यं युक्तमिति पूर्वोक्तं समर्थयते यद् भूतमित्यादिना। विराट् ब्रह्माण्डं, स्वराट् ब्रह्मा, सम्राट् मनुः। अधिपुरुषश्च एषामधिष्ठाता महापुरुषः ॥५९॥

यस्मादेते तत्तो जातास्तस्मात् स भवान् भुवोऽधश्च तिर्यक् चोर्ध्वञ्च परितश्च अतिरिक्तोऽभूत्। भूशब्दोक्तस्य विश्वस्य तत्कार्यत्वेन तदन्तर्वर्त्तित्वात्। ततो न्यूनत्वमाह त्वत्तो विश्वमिति। भूतञ्च भविष्यच्च भूत-भविष्यती ॥६०॥

त्वद्रूपधारिणश्चेति। चकारोऽप्यर्थे। तवैव कारणभूतस्य रूपं सद्रूपं धारयति न तु पृथक्सत्वं यस्य तत् त्वद्रूपधारि ब्रह्माण्डं तस्याप्यन्तः सर्वमिदं जगदन्तर्भूतं किं पुनर्वक्तव्यं तवान्तर्भूतमिति। सर्वभूतमिति पाठे सर्वाणि भूतानि यस्मिन् तज्जगद्ब्रह्माण्डस्यान्तस्तिष्ठतीत्यर्थः। सर्वभूतादिति पाठे सर्वात्मकत्वद्रूपधारिणो ब्रह्माण्डस्यान्तरिदं जगत् तिष्ठतीत्यर्थः। किञ्च त्वत्तो यज्ञः सर्वे चरुपुरोडाशादीनां हुतं हवनमस्मिन् इति सर्वहुतः नानाद्रव्यक इत्यर्थः।

यज्ञादिति पाठे सर्वे हूयन्तेऽस्मिन् इति सर्वहुतं तस्मात् यज्ञादिति ल्यब्लोपे पञ्चम्यौ। सर्वहुतं यज्ञमुद्दिश्य तत्साधनं पृषदाज्यादि त्वत्तो जातमित्यर्थः। पृषदाज्यं दधिमिश्रं घृतं पशुर्द्विधा ग्राम्यारण्यभेदेन ॥ ६१ ॥

छन्दांसि गायत्र्यादीनि। त्वत्तोऽश्वा उभयतो दन्ता एकदन्ताश्च ॥ ६२ ॥

तानेवाह गाव इति ॥ ६३ । ६७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राणो नः शुषिराज्जातो मुखादग्निरजायत ।
नाभितो गगनं द्यौश्च शिरसः समवर्त्तत ॥६५॥

दिशः श्रोत्रात् क्षितिः पद्भ्यां त्वत्तः सर्व्वमभूदिदम् ।
न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः ॥६६॥

संयमे (त) विश्वमखिलं बीजभूते तथा त्वयि ।
बीजादङ्कुरसम्भूतो न्यग्रोधः सुसमुत्थितः ॥६७॥

विस्तारञ्च यथा याति त्वत्तः सृष्टौ तथा जगत् ।
यथा हि कदली नान्या त्वक्पत्राद् वाथ दृश्यते ॥६८॥

एवं विश्वस्य नान्यत्वं तत्स्थायीश्वर दृश्यते ।
ह्लादिनी सन्धिनी सम्बित् त्वय्येका सर्व्वसंस्थितौ ॥६९

ह्लादतापकरी मिश्रा त्वयि नो गुणवर्ज्जिते ।
पृथग्भूतैकभूताय भूतभूताय ते नमः ॥७०॥

प्रभूतभूतभूताय तुभ्यं भूतात्मने नमः ।
व्यक्तप्रधानपुरुषविराट् सम्राट् स्वराट् तथा ॥७१॥

विभाव्यतेऽन्तःकरणैः पुरुषेष्वक्षयो भवान् ।
सर्व्वस्मिन् सर्व्वभूतस्त्वं सर्व्वः सर्व्वस्वरूपधृक् ॥७२॥

सर्व्वं त्वत्तस्ततश्च त्वं नमः सर्व्वात्मनेऽस्तु ते ।
सर्व्वात्मकोऽसि सर्वेश सर्व्वभूतस्थितो यतः ॥७३॥

त्वत्तो जातं विश्वं त्वत्तो भिन्नं न भवतीति दृष्टान्तेनाह यथा त्वचः पत्राद् वा अन्या पृथग्भूता कदली न दृश्यते। एवं त्वक्पत्रस्थानीयात् त्वत्तो विश्वस्य नान्यत्वम् ॥६८॥

यतस्त्वत्स्थायि त्वय्येव स्थातुं शीलमस्येति त्वत्स्थायि तथा भूतमेव सन् घटः सन् पट इत्येवं दृश्यते न तु पृथक्। भो ईश्वर सर्वजीवनियामक पाठान्तरेष्वपि अयमेवार्थः। ईश्वरत्वमेव जीवेश्वरवैलक्षण्येण दर्शयन् आह, ह्लादिनीति ह्लादिनी आह्लादकरी सन्धिनी सन्तता, संवित् विद्याशक्तिः। एका मुख्या अव्यभिचारिणी स्वरूपभूतेति यावत्। सा सर्वसंस्थितौ सर्वस्य सम्यक् स्थितिर्यस्मिन् तस्मिन् सर्वाधिष्ठानभूते त्वय्येव न तु जीवेषु। या गुणमयी त्रिविधा संवित् सा त्वयि नास्ति ॥६९॥

तानेवाह ह्लादतापकरी मिश्रेति। ह्लादकरी मनसः प्रसादात् सात्त्विकी। तापकरीविषयवियोगादिषु दुःखकरी तामसी। तदुभयमिश्रा च विषयजन्या राजसी। तत्र हेतुः सत्त्वादिगुणैर्वर्जिते। तदुक्तं सर्वज्ञसूक्तौ ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः। स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः" इति। ऐश्वर्यमेव विभूतिभिः प्रपञ्चयति। पृथग्भूतैकभूताय, कार्यात्मना पृथग्रूपाय। कारणात्मना चैकरूपाय। भूतभूताय भूतसूक्ष्मरूपाय ॥७०॥

प्रभूतानि भूतानि महाभूतानि तद्रूपाय भूतात्मने चराचरप्राणिरूपाय च तुभ्यं नमः। किञ्च पूर्वोक्तव्यक्तप्रधानादिविभूतिरूपतयान्तःकरणैर्योगिभिर्भवान् विभाव्यते चिन्त्यते ॥७१॥

तथा पुरुषेषु क्षेत्रज्ञेषु उपाध्यभिमानेन क्षीणमाणेष्वपि भवान् परमात्मा अक्षयो विभाव्यते। किञ्च सर्वस्मिन् देवादिशरीरे सर्वभूतः तत्र केवलक्षेत्रज्ञरूपस्त्वं सर्वश्च त्वं क्षेत्ररूपश्च त्वमेव। क्षेत्रक्षेत्रज्ञरूपत्वमेकस्य विरुद्धमित्याशङ्क्याह, सर्वस्वरूपधृक्। चेतनाचेतनस्वरूपं त्वमेव धत्से। "सर्वं खल्विदं ब्रह्म" इति श्रुतेरित्यर्थः ॥७२॥

तदेवोपपादयति सर्वं त्वत्तः। त्वत्तो हि सर्वं जायते। अतः सर्वस्वरूपधृक् त्वमेव। ननु प्रथमं कार्यं हिरण्यगर्भादिकं मत्तो जायताम्। तत्र पुत्रादिद्वारा यदन्यज्जायते तत् कथं मत्तो जातं स्यात्, तत्राह, ततश्च त्वम्। त्वत्तो जाताद् हिरण्यगर्भादेस्तत् पुत्रादिरूपेण त्वमेव जायसे। अतस्तद्द्वारा जायमानं सर्वं त्वत्त एवेत्यर्थः। स्तुतिं निगमयति, एवं सर्वात्मने नमोऽस्त्विति। स्वमनोरथं सूचयन्नाह, सर्वात्मकोऽसीति ॥७३॥

(त) संयमे प्रलये।

(थ) सुलभमपीति—यं प्रति त्वं प्रसन्नः तेनेति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथयामि ततः किं ते सर्व्वं वेत्सि हृदि स्थितम् ।
सर्व्वात्मन् सर्व्वभूतेश सर्व्वसत्वसमुद्भव ॥७४॥

सर्व्वभूतो भवान् वेत्ति सर्व्वभूतमनोरथम् ।
यो मे मनोरथो नाथ सफलः स त्वया कृतः ।
तपश्च तप्तं सफलं यद् दृष्टोऽसि जगत्पते ॥७५॥

श्रीभगवानुवाच ।

तपसस्तु फलं प्राप्तं यद् दृष्टोऽहं त्वया ध्रुव ।
मद्दर्शनं हि विफलं राजपुत्र न जायते ॥७३॥

वरं वरय तस्मात् त्वं यथाभिमतमात्मनः ।
सर्व्वं संपद्यते पुंसां मयि दृष्टिपथं गते ॥७७॥

ध्रुव उवाच ।

भगवन् सर्व्वभूतेश सर्व्वस्यास्ते भवान् हृदि ।
किमज्ञातं तव स्वामिन् मनसा यन्मयेप्सितम् ॥७८॥

तथापि तुभ्यं देवेश कथयिष्यामि यन्मया ।
प्रार्थ्यते दुर्व्विनीतेन हृदयेनातिदुर्ल्लभम् ॥७९॥
किं वा सर्व्वजगत्स्रष्टः प्रसन्ने त्वयि दुर्ल्लभम् ।
त्वत्प्रसादफलं भुङ्क्ते त्रैलोक्यं मघवानपि ॥८०॥

नैतद् राजासनं योग्यमजातस्य ममोदरात् ।
इति गर्व्वादवोचन्मां सपत्नी मातुरुच्चकैः ॥८१॥

आधारभूतं जगतः सर्व्वेषामुत्तमोत्तमम् ।
प्रार्थयामि (द) प्रभो स्थानं त्वत्प्रसादादतोऽव्ययम् ॥

श्रीभगवानुवाच ।

यत त्वया प्रार्थितं स्थानम् एत्तत् प्राप्स्यति वै भवान्
त्वयाहं तोषितः पूर्व्वमन्यजन्मनि बालक ॥८३॥

त्वमासीर्ब्राह्मणः पूर्व्वं मय्येकाग्रमतिः सदा ।
मातापित्रोश्च शुश्रूषुर्निजधर्म्मानुपालकः ॥८४॥

एतदेव विवृण्वनाह, सर्वात्मन्! सर्वेषामात्मभूत! अन्तर्यामिन्! सर्वेषां सत्त्वानां समुद्भवो यस्मात् सर्वप्राणिजनक॥७४॥

सर्वभूतश्च भवान्, अतः सर्वेषां सत्त्वानां मनोरथं वेत्ति। न केवलं मदीयमेवेत्यर्थः। यो मे मनोरथः त्वत्स्तुतिविषयः स स्तुतिशक्तिदानेन त्वया सफलः कृतः। अतो मया यदर्थं तपस्तप्तं, तदपि सफलं जातमेवेति विज्ञायते यतस्त्वं दृष्टोऽसि ॥७५॥

यत् त्वया आकांक्षितं तपसः फलं तत् त्वया प्राप्तमेव। किं तत् प्रार्थनेन? यतो मद्दर्शनं विफलं न जायते ॥७६॥

अपि च तस्मात् प्राप्तादान्यदपि वरं मत्सालोक्यादिकं यथेच्छं वृणीष्वेत्यर्थः ॥७७॥

ध्रुवस्त्वाह—भगवन्! ममाद्यापि त्वत्सालोक्याद्यपेक्षा नास्ति, किन्तु अन्यद्देवेप्सितमस्ति, तच्च भवानन्तर्यामी जानात्येव ॥७८॥

तथापि दुर्विनीतेन मया हृदये यत् प्रार्थ्यते, तत् कथयिष्यामि। कथं भूतं नातिदुर्लभम् अनतिदुर्लभं सुलभमपि ॥७९॥

सुलभत्वमेवाह किञ्चेति ॥८०॥

ब्रह्मादिदुर्लभं तत्सालोक्यादि विहाय त्रैलोक्यान्तर्वर्ति स्थानं स्वप्रार्थ्यं सहेतुकमाह नैतदिति द्वाभ्याम् ॥८१॥

भगवद्वाक्यन्तु एवं विधं स्थानं पूर्वजन्मतपसैव त्वया प्राप्तुं शक्यम् अन्तरायेण तु केनचित् त्वं राजपुत्रोऽसि तथाप्ययं तवापरितोषो मत्तोषणप्रभावादेवाभूत्। अतः किञ्चित् कालं राज्यभोगान् भुक्त्वा ततश्चाकल्पान्तं ध्रुवेण जनन्या सह स्थित्वा पश्चाद् मोक्षं प्राप्स्यसीति तदाह, यत्त्वयेति पुण्यं भविष्यतीत्यन्तेन ॥८३॥

(द) प्रार्थयामीत्येतदपि पूर्ववत् करोत्यर्थेनैना सिद्धम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कालेन गच्छता मित्रं राजपुत्रस्तवाभवत् ।
यौवनेऽखिलभोगाढ्यो दर्शनीयोज्ज्वलाकृतिः ॥८५॥

तत्संगात् तस्य तामृद्धिमवलोक्यातिदुर्लभाम् ।
भवेयं राजपुत्रोऽहम् इति वाञ्छा त्वया कृता ॥८६॥

ततो यथाभिलषिता प्राप्ता ते राजपुत्रता ।
उत्तानपादस्य गृहे जातोऽसि ध्रुव दुर्लभे ॥८७॥

अन्येषां तद् वरं स्थानं कुले स्वायम्भुवस्य यत् ।
तस्यैतदवरं बाल येनाहं परितोषितः ॥८८॥

मामाराध्य नरो मुक्तिमवाप्नोत्यविलम्बिताम् ।
मय्यर्पितमना बाल किमु स्वर्गादिकं पदम् ॥८९॥

त्रैलोक्यादधिके स्थाने सर्वताराग्रहाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद् भवान् ध्रुव ॥९०॥

सूर्य्यात् सोमात् तथा भौमात् सोमपुत्राद् बृहस्पते ।
सितार्कतनयादीनां सर्वर्क्षाणां तथा ध्रुवम् ॥९१॥

सप्तर्षीणामशेषाणां ये तु वैमानिकाः सुराः ।
सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ॥९२॥

केचिच्चतुर्युगं यावत् केचिन्मन्वन्तरं सुराः ।
तिष्ठन्ति भवतो दत्ता मया वै कल्पसंस्थितिः ॥९३॥

सुनीतिरपि ते माता त्वदासन्नातिनिर्म्मला ।
विमाने तारका भूत्वा तावत् कालं निवत्स्यति ॥९४

ये च त्वां मानवाः प्रातः सायञ्च सुसमाहिताः ।
कीर्त्तयिष्यन्ति तेषाञ्च महत् पुण्यं भविष्यति ॥९५॥

पराशर उवाच ।

एवं पूर्वं जगन्नाथाद् देवदेवाज्जनार्दनात् ।
वरं प्राप्य ध्रुवः स्थानमध्यास्ते स महामते ॥९६॥

तस्यापि मानमृद्धिञ्च महिमानं निरीक्ष्य च ।
देवासुराणामाचार्य्यः श्लोकमत्रोशना जगौ ॥९७॥

अहोऽस्य तपसो वीर्य्यमहोऽस्य तपसः फलम् ।
यदेनं पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ॥९८॥

ध्रुवस्य जननी चेयं सुनीतिर्नाम सूनृता ।
अस्याश्च महिमानं कः शक्तो वर्णयितुं भुवि ॥९९॥

त्रैलोक्याश्रयतां प्राप्तं परं स्थानं स्थिरायति ।
स्थानं प्राप्ता वरं कृत्वा या कुक्षिविवरे ध्रुवम् ॥१००

स्वायम्भुवस्य कुले यद् जन्म अन्येषां तापसानां तद् वरं श्रेष्ठमेव स्थानम् । येन त्वया पूर्वमहं परितोषितः । तस्य तव भक्तस्यैतदवरं तुच्छं जातम् ॥८८।९०॥

सोमपुत्राद् बुधात् । सितः शुक्रः । अर्कतनयः शनैश्चरः ॥९१।९२।९३॥

सुनीतिरपि ते मातेति । त्वन्मातृत्वादेव तत्र निवत्स्यतीत्यर्थः ॥९४।९५।९६॥

कचद्वारा ज्ञेयमाचार्यत्वम् ॥९७॥

सुनृता तत् पुण्योपचये यत्नं कुरुष्वेत्यादिहितसत्यवादिनी । "धर्मस्य कन्या सुश्रोणी सुनृता नाम विश्रुता । उत्पन्ना वाजिमेधेन ध्रुवस्य जननी श्रुता" इति हरिवंशोक्तेः । पूर्वनाम वा ॥९९

त्रैलोक्याश्रयतां प्राप्तं यत् परं विष्णुपदाख्यं स्थानम् । स्थिरायति स्थिरा नित्या मुक्तिरूपा आयतिरुत्तरकाले भावि फलं यस्मिंस्तथाभूतं स्थानं निवासं प्राप । "आयतिस्तु स्त्रियां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यश्चैतत् कीर्त्तयेन्नित्यं ध्रुवस्यारोहणं दिवि ।
स सर्वपापनिर्म्मुक्तः स्वर्गलोके महीयते ॥१०१॥

स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्वकल्याणसंयुक्तो दीर्घकालञ्च जीवति ॥१०२॥

इति श्रीविष्णुपुराणे प्रथमेंऽशे द्वादशोऽध्यायः ।

दैवे प्रभावागामिकालयोः" इत्यभिधानात्। प्राप्नेति वा पाठः। कथं प्राप्ना वरं श्रेष्ठं विष्णुभक्तं ध्रुवं कुक्षिविवरे गर्भे कृत्वा या वरं स्थानं प्राप्ना, तस्या महिमानं वर्णयितुं कः शक्त इत्यर्थः ॥१००॥

इति श्रीधरस्वामिकृतायां स्वात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे द्वादशोऽध्यायः ॥

पाठान्तराणि—

८ श्लोके, मनस्यवस्थिते तस्मिन्—।
९ „ क्षितेर्दक्षिणतः स्थिते—।
१० „ तदा समस्ता वसुधा—।
२२ „ वाष्पाकुलिलोचनाम्—।
४४ „ श्रुत्वेत्थं गदितं—।

त्रयोदशोऽध्यायः ।

[वेणनृप-पृथुनृपोपाख्यानम् ।]

ध्रुवाच्छिष्टिश्च भव्यश्च भव्याच्छम्भुर्व्यजायत ।
शिष्टेराधत्त सुच्छाया पञ्च पुत्रानकल्मषान् ॥१॥

रिपुं रिपुञ्जयं विप्रं वृकलं वृकतेजसम् ।
रिपोराधत्त बृहती चाक्षुषं सर्वतेजसम् ॥२॥

अजीजनत् पुष्करिण्यां वारुण्यां चाक्षुषो मनुम् ।
प्रजापतेरात्मजायामरण्यस्य महात्मनः ॥३॥

मनोरजायन्त दश नद्वलायां महौजसः ।
कन्यायां जगतां श्रेष्ठ वैराजस्य प्रजापतेः ॥४॥

ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः ।
अग्निष्टोमोऽतिरात्रश्च सुद्युम्नश्चेति ते नव ॥५॥

अभिमन्युश्च दशमो नद्वलायां महौजसः ।
ऊरोरजनयत् पुत्रान् षडाग्नेयी महाप्रभान् ॥६॥

त्रयोदशोऽध्यायः ।

भव्यादुद्भवार्हात्। ध्रुवात् शम्भुर्नाम तद्भार्यां शिष्टिं भव्यञ्च जनयामासेत्यर्थः। भार्य्यां शम्भुरिति केचित् पठन्ति ॥१॥

वारुण्यां वरुणसन्तानजातायामरण्यस्य प्रजापतेरात्मजायां पुष्करिण्यां चाक्षुषो मनं षष्ठमन्वरतपतिं जनयामासेत्यन्वयः ॥३॥

वैराजस्य प्रजापतेः कन्यायां नद्वलायां मनोर्महौजसो दश पुत्रा अजायन्तेत्यन्वयः ॥४।७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अङ्गं सुमनसं स्वातिं क्रतुमङ्गिरसं शिवम् ।
अङ्गात् सुनीथापत्यं वै वेणमेकमजायत ॥७॥

प्रजार्थमृषयस्तस्य ममन्थुर्दक्षिणं करम् ।
वेणस्य पाणौ मथिते सम्बभूव महामुने ॥८॥

वैण्यो नाम महीपालो यः पृथुः परिकीर्त्तितः ।
येन दुग्धा मही पूर्वं प्रजानां हितकारणात् ॥९॥

मैत्रेय उवाच ।

किमर्थं मथितः पाणिर्वेणस्य परमर्षिभिः ।
यत्र यज्ञे महावीर्य्यः स पृथुर्मुनिसत्तमः ॥१०॥

पराशर उवाच ।

सुनीथा नाम या कन्या मृत्योः प्रथमतोऽभवत् ।
अङ्गस्य भार्या सा दत्ता तस्यां वेणो व्यजायत (क) ॥११

स मातामहदोषेण तेन मृत्योः सुतात्मजः ।
निसर्गादेव मैत्रेय दुष्ट एव व्यजायत ॥१२॥

अभिषिक्तो यदा राज्ये स वेणः परमर्षिभिः ।
घोषयामास स तदा पृथिव्यां पृथिवीपतिः ॥१३॥

न यष्टव्यं न होतव्यं न दातव्यं कदाचन ।
भोक्ता यज्ञस्य कस्त्वन्यो ह्यहं यज्ञपतिः प्रभुः ॥१४॥

ततस्तमृषयः पूर्वं संपूज्य जगतीपतिम् ।
ऊचुः सामकलं सम्यङ् मैत्रेय समुपस्थिताः ॥१५॥

ऋषय ऊचुः ।

भो भो राजन् शृणुष्व त्वं यद् वदामस्तव प्रभो ।
राज्यदेहोपकाराय प्रजानाञ्च हितं परम् ॥१६॥

दीर्घसत्रेण देवेशं सर्व्वयज्ञेश्वरं हरिम् ।
पूजयिष्याम (ख) भद्रं ते तस्यांशस्ते भविष्यति ॥१७

यज्ञेन यज्ञपुरुषो हरिः संप्रीणितो नृप ।
अस्माभिर्भवतः कामान् सर्वानेव प्रदास्यति ॥१८॥

यज्ञैर्यज्ञेश्वरो येषां राष्ट्रे संपूज्यते हरिः ।
तेषां सर्वेप्सितावाप्तिं ददाति नृप भूभृताम् ॥१९॥

वेण उवाच ।

मत्तः कोऽभ्यधिकोऽन्योऽस्ति यश्चाराध्यो ममापरः ।
कोऽयं हरिरिति ख्यातो योऽयं यज्ञेश्वरो मतः ॥२०

ब्रह्मा जनार्दनः शम्भुरिन्द्रो वायुर्यमो रविः ।
हुतभुग् वरुणो धाता पूषा भूमिर्निशाकरः ॥२१॥

एते चान्ये च ये देवाः शापानुग्रहकारिणः ।
नृपस्यैते शरीरस्थाः सर्व्वदेवमयो नृपः ॥२२॥

नद्वलायां महौजस इति पुनरुक्तिस्तु नद्वलायां महौजसो ये दशेत्यनुवादेन त एते इति विधानार्थः ॥१४॥

सामकलं नाम्ना कलं मधुरं वाक्यमूचुः ॥१५॥

राज्यदेहयोरुपकाराय क्षेमाय ॥१६॥

दीर्घसत्रेण सहस्रसंवत्सरेण । अंशः षष्ठो भागः । "पुण्य-षड्भागमादत्ते न्यायेन परिपालयन्" इति स्मृतेः ॥१७॥

(क) अजायतेत्यन्तभूतणिजर्थम्, अजनयदित्यर्थः ।

(ख) पूजयिष्यामेत्यत्र विसर्गलोप आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतज्ज्ञात्वा मयाज्ञप्तं यथावत् क्रियतां तथा ।
दातव्यं न होतव्यं न यष्टव्यञ्च वो द्विजाः ॥२३॥

भर्तृशुश्रूषणं धर्म्मो यथा स्त्रीणां परो मतः ।
ममाज्ञापालनं धर्म्मो भवताञ्च तथा द्विजाः ॥२४॥

ऋषय ऊचुः ।

देह्यनुज्ञां महाराज मा धर्म्मो यातु संक्षयम् ।
हविषां परिणामोऽयं यदेतदखिलं जगत् ॥२५॥

पराशर उवाच ।

इति विज्ञाप्यमानोऽपि स वेणः परमर्षिभिः ।
यदा ददाति नानुज्ञां प्रोक्तः प्रोक्तः पुनः पुनः ॥२६॥

ततस्तु मुनयः सर्वे कोपामर्षसमन्विताः ।
हन्यतां हन्यतां पाप इत्यूचुस्ते परस्परम् ॥२७॥

यो यज्ञपुरुषं देवमनादिनिधनं प्रभुम् ।
विनिन्दत्यधमाचारो न स योग्यो भुवः पतिः ॥२८॥

इत्युक्त्वा मन्त्रपूतैस्तैः कुशैर्मुनिगणा नृपम् ।
निजघ्नुर्निहतं पूर्वं भगवन्निन्दनादिना ॥२९॥

ततश्च मुनयोः रेणुं ददृशुः सर्वतो द्विज ।
किमेतदिति चासन्नं पप्रच्छुस्ते जनं तदा ॥३०॥

आख्यातञ्च जनैस्तेषां चैरीभूतैरराजके ।
राष्ट्रे तु लोकैरारब्धं परस्वादानमातुरैः ॥३२॥

तेषामुदीर्णवेगानां चौराणां मुनिसत्तमाः ।
सुमहान् दृश्यते रेणुः परवित्तापहरिणाम् ॥३२॥

ततः संमन्त्र्य ते सर्व्वे मुनयस्तस्य भूभृतः ।
ममन्थुरूरुं पुत्रार्थम् अनपत्यस्य यत्नतः ॥३३॥

मथ्यतश्च समुत्तस्थौ तस्योरोः पुरुषः किल ।
दग्धस्थूणाप्रतीकाशः खर्बटास्योऽतिह्रस्वकः ॥३४॥

किं करोमीति तान् सर्व्वान् विप्रान् प्राह त्वरान्वितः ।
निषीदेति तमूचुस्ते निषादस्तेन सोऽभवत् ॥३५॥

ततस्तत्सम्भवा जाता विन्ध्यशैलनिवासिनः ।
निषादा मुनिशार्दूल पापकर्मोपलक्षणाः ॥३६॥

तेन द्वारेण तत् पापं निष्क्रान्तं तस्य भूपतेः ।
निषादास्ते ततो जाता वेणकल्मषनाशनाः ॥३७॥

मया यथा यदाज्ञप्तं तत् तथैव क्रियतां तदेवाह, न दातव्यमिति ॥२३।२४॥

हविषां परिणामो वृष्ट्यादिद्वारा (ग) ॥२५।२६॥

कोपश्च अमर्षश्च भगवन्निन्दाद्यसहनं ताभ्यां समन्विताः ॥२७।३०।३३॥

मथ्यत इति पाठे मथ्यमानादित्येवार्थः । दग्धस्थूणाप्रतीकाशः दग्धस्तम्भतुल्यः कृष्णवर्ण इत्यर्थः । खर्वटास्यः ह्रस्वमुखः चिपिटनासिकवक्त्र इत्यर्थः । खर्वटाख्य इति पाठः । केचित् तु खर्वटाक्ष इति पठित्वा गवाक्षे इव अक्षिणी यस्येति व्याचक्षते ॥३४॥

अत्यन्तासम्भवे तथाभूतमप्यभिषेक्तुं निषीदेति तमूचुः । पापरूपं कर्मैवोपलक्षणं चिह्नं येषां ते ॥३६॥

तेन द्वारेण निषादरूपेण ॥३७॥

(ग) तदेवाह मनुः—अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः । इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततोऽस्य दक्षिणं हस्तं ममन्थुस्तस्य ते द्विजाः ।
मथ्यमाने च तत्राभूत् पृथुर्वैण्यः प्रतापवान् ॥३८॥
दीप्यमानः स वपुषा साक्षादग्निरिव ज्वलन् ।
आद्यमाजगवं नाम खात् पपाग ततो धनुः ॥३९॥
शराश्च दिव्या नभसः कवचञ्च पपात ह ।
तस्मिन् जाते तु भूतानि सम्प्रहृष्टानि सर्व्वशः ॥४०
सत्पुत्रेण च जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात् त्रातः स तेन सुमहात्मना ॥४१॥
तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्व्वशः ।
तोयानि चाभिषेकार्थं सर्व्वाण्योवोपतस्थिरे ॥४२॥
पितामहश्च भगवान् देवैराङ्गिरसैः सह ।
स्थावराणि च भूतानि जंगमानि च सर्व्वशः ॥४३॥
समागम्य तदा वैण्यमभ्यषिञ्चन् नराधिपम् ।
हस्ते तु दक्षिणो चक्रं दृष्ट्वा तस्य पितामहः ॥४४॥
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ।
विष्णुचिह्नं करे चक्रं सर्व्वेषां चक्रवर्त्तिनाम् ॥४५॥
भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ।
महता राजराज्येन पृथुर्व्वैण्यः प्रतापवान् ॥४६॥
सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः ।
पित्रा परञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः (घ) ॥४७॥
अनुरागात् ततस्तस्य नाम राजेत्यजायत ।
आपस्तस्तम्भिरे चास्य समुद्रमभियास्यतः ॥४८॥
पर्व्वताश्च ददुर्मार्गं ध्वजभङ्गश्च नाभवत् ।
अकृष्टपच्या (ङ) पृथिवी सिध्यन्त्यन्नानि चिन्तया ॥४९
सर्व्वकामदुधा (च) गावः पुटके पुटके मधु ।
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे ॥५०॥
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः ।
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥५१॥
प्रोक्तौ तदा मुनिवरैस्तावुभौ सुतमागधौ ।
स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान् ॥५२॥

अग्निरिवेति यथा काष्ठे मथ्यमाने धूमरूपेण तस्य मले निष्क्रान्ते पश्चादग्निरुत्पद्यते, तथा निषादरूपेण वेणकल्मषे निष्क्रान्ते पश्चादग्निरिव देदीप्यमानः पृथुरुत्पन्न इत्यर्थः । आद्यं शार्वं पिनाकसंज्ञं धनुः ॥३६॥

पुन्नाम्न इति "पुन्नाम्नो नरकाद् यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा" इति वचनात् ॥४१।४२॥

स्थावराणि चेति तदभिमानिदेवताः ॥४३॥

चक्रमिति रेखान्तरानाकुलं रेखामयं चक्रं दृष्ट्वेत्यर्थः । तदुक्तं "यस्याः प्रतिहतं चक्रमंशः स परमेष्ठिनः" इति ॥४४॥

राजराज्येन चक्रवर्त्तित्वेन ॥४६॥

अपरं जिताः क्लेशिताः ॥४७।४८॥

ध्वजभङ्गश्च वनेषु गच्छतो नाभवत् । अकृष्टपच्या कृषिं विनैव सफला ॥४९॥

पुटकं पर्णादिसंस्थानविशेषः । यून एव पृथोर्जातत्वाज्जातमात्रस्य यज्ञ इत्युच्यते । "पृथुरेवाभवत् तस्मात् ततः पृथुरजायत" इति मत्स्यात्तेः । पैतामहे पितामहदैवत्ये पृथोरेव यज्ञे न तु पितामहकर्तृके । यथाह वायुः "वैण्यस्य हि पृथोर्यज्ञे वर्त्तमाने महात्मनः सूतः सूत्यां समुत्पन्नः" इति ॥५०॥

सूत्यामिति सूतिरभिषूति अभिषूयते कण्ड्यते सोमोऽस्यामिति सूतिः । सोमाभिषवभूमिः, तस्याम् । सौत्येऽहनि तस्मिन्नेव दिने ॥५१।५२॥

(घ) अत एव 'राजा प्रकृतिरञ्जना'दिति श्रूयते ।

(ङ) अकृष्टपच्येति निपातनात् साधु ।

(च) सर्वान् कामान् अभिलषितार्थान् स्वयमेव दुग्धे इति सर्वकामदुघा । सर्वकाम्यफलप्रदा । दुहेः कौ घश्चेति साधु ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्म्मैतदनुरूपं वां पात्रं स्तोत्रस्य चाप्ययम् ।
ततस्तावूचतुर्व्विप्रान् सर्व्वानेव कृताञ्जली ॥५३॥
अद्य जातस्य नो कर्म ज्ञायतेऽस्य महीपतेः ।
गुणा न चास्य ज्ञायन्ते न चास्य प्रथितं यशः ।
स्तोत्रं किमाश्रयञ्चास्य कार्य्यमस्माभिरुच्यताम् ॥५४

ऋषय ऊचुः ।

करिष्यत्येष यत् कर्म्म चक्रवर्त्ती महाबलः ।
गुणा भविष्या ये चास्य तैरयं स्तूयतां नृपः ॥५५॥

पराशर उवाच ।

ततः स नृपतिस्तोषं तछ्रुत्वा परमं ययौ ।
सद्गुणैः श्लाघ्यतामेति स्तव्याश्चाभ्यां गुणा मम ॥५६
तस्माद् यदद्य स्तोत्रेण गुणनिर्व्वर्णनं त्विमौ ।
करिष्येते करिष्यामि तदेवाहं समाहितः ॥६७॥
यदिमौ वर्ज्जनीयञ्च किञ्चिदत्र वदिष्यतः ।
तदहं वर्ज्जयिष्यामीत्येवञ्चक्रे मतिं नृपः ॥५८॥
अथ तौ चक्रतुः स्तोत्रं पृथोर्वैण्यस्य धीमतः ।
भविष्यैः कर्मभिः सम्यक् सुस्वरौ सूतमागधौ ॥५९
सत्यवाग् दामशीलोऽयं सत्यसन्धो नरेश्वरः ।
ह्रीमान् मैत्रः क्षमाशीलो विक्रान्तो दुष्टशासनः (ज)॥
धर्मज्ञश्च कृतज्ञश्च दयावान् प्रियभाषकः ।
मान्यमानयिता (झ) यज्वा ब्रह्मण्यः साधुसम्मतः॥
समः शत्रौ च मित्रे च व्यवहारे स्थितो नृपः ।
सूतेनोक्त न् गुणानित्थं स तदा मागधेन च ॥६२॥
चकार हृदि तादृक् च कर्मणा कृतवानसौ ।
ततः स पृथिवीपालः पालयन् वसुधामिमाम् ॥६३
इयाज विविधैर्य्यज्ञै र्महद्भिर्भूरिदक्षिणैः ।
तं प्रजाः पृथ्वीनाथमुपतस्थुः क्षुधार्दिताः ॥६४॥
ओषधीषु (ञ) प्रनष्टासु तस्मिन् काले ह्यराजके ।
तमूचुस्तेन ताः पृष्टास्तत्रागमनकारणम् ॥६५॥

प्रजा ऊचुः ।

अराजके नृपश्रेष्ठ धरित्र्या सकलौषधीः (ट) ।
ग्रस्तास्ततः क्षयं यान्ति प्रजाः सर्व्वाः प्रजेश्वर ॥६
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः (ठ)।

वां युवयोः (छ) ॥५३॥

अस्माभिरिति अस्मदोर्द्वयोश्चेति बहुवचनम् ॥५४॥

चक्रवर्त्ती दक्षिणहस्ते तच्चिह्नस्य चक्रस्योपलब्धेः । महाबलश्च विष्ण्वंशत्वात् । अतः सर्व्वेऽप्यस्य गुणाः सत्कर्माणि च भविष्यन्त्येव, अतो भविष्यैरेव गुणकर्मभिरेष स्तूयताम् अयं भावः । "नीचो नियुज्यते दण्डैरुत्तमस्तु प्रियोक्तिभिः" । इति न्यायादयं गुणकर्मस्तुत्यैव स्वकार्यं विज्ञापनीय इति ॥५५

पृथुरपि हृष्यन् अनेन स्तुतिमिषेण ममायमृषिभिरुपदेश एव क्रियत इति मत्वा तथैव कर्त्तुमध्यवसितवानित्याह,—ततः स इति त्रिभिः ॥५६॥

(छ) युवयोः सूतमागधयोः ।

सत्यसन्धः सत्यप्रतिज्ञः सत्यमर्यादो वा । ह्रीमान् अकार्य्ये जुगुप्सावान् ॥६०॥

तस्मिन् काले वेणपृथुराज्ययोः सन्धौ ॥६५॥

(ज) दुष्टशासनः दुष्टस्य शासनकर्त्ता ।

(झ) मान्यस्य माननीयस्य जनस्य मानयिता सम्मानक

(ञ) ओषधीषु धान्यादिषु ।

(ट) सकलौषधीरिति प्रथमास्थाने द्वितीयाप्रयोग आ सर्वा ओषध्य इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽन्वधावद् वसुन्धराम् ॥६८
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादीन् तत्वासादगमन्महीं ॥६९
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥७०॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् (ङ) ।
प्रवेपमाणा तद्वाणपरित्राणपरायणा ॥७१॥

पृथिव्युवाच ।

स्त्रीवधे त्वं महापापं किं नरेन्द्र न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥७२॥

पृथु रुवाच ।

एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदौ वधः ॥७३॥

पृथिव्युवाच ।

प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानां ते नृपश्रेष्ठ भविष्यति ॥७४॥

पृथु रुवाच ।

त्वं हत्वा वसुधे वाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥७५॥

पराशर उवाच ।

ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी (ठ) परमं साध्वसं समुपागता ॥७६॥

पृथिव्युवाच ।

उपायतः समारब्धाः सर्वे सिध्यन्त्युपक्रमाः ।
तस्माद् वदाम्युपायं ते तत् कुरुष्व यदिच्छसि ॥७७
समस्तास्ता मया जीर्णा नरनाथ महौषधीः (ण) ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥७८॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतां वर ।
तं तु वत्सं प्रयच्छ त्वं क्षरेयं येन वत्सला (त) ॥७९
समाञ्च कुरु सर्वत्र येन क्षीरं समन्ततः ।
वरौषधी बीजभूतं वीर सर्वत्र भावये ॥८०॥

सकला ओषधीः ओषध्यो ग्रस्ताः ॥६७।६८॥

ननाश पलायत ॥६९।७४॥

आत्मनो योगबलेन पृथ्वीभावं प्राप्य धारयिष्यामि । तथा च हरिवंशे "आत्मानं प्रथयित्वेमा धारयिष्याम्यहं प्रजाः "इति ॥७७।७८॥

क्षरेयं क्षीररूपेणौषधीः स्रवेयम् ॥७९॥

माञ्च सर्वत्र समां कुरु । येन समस्थलत्वेन क्षीरं सर्वत्र भावये धास्यामि ॥८०॥

विवर्द्धिताः एकैकत्रोच्चतराः कृताः ॥ ८१ ॥

पूर्वे विसर्गे पृथूत्पत्तेः पूर्वसृष्टौ ॥ ८२ ॥

(ठ) जीवनौषधीरिति जीवनसाधिका ओषधीः, याभिरस्माकं प्राणा रक्षिताः स्युस्तथाभूता ओषधीरिति यावत् ।

(ङ) पृथुः विशालः पराक्रमो वीर्य्यं यस्य तं महावीर्य्यमित्यर्थः । तस्य पृथोः वाणात् शरात् यत् परित्राणं स्वं रक्षणं तदेव परं श्रेष्ठं केवलं वा अयनं आश्रयः उद्देश्यमिति यावत् यस्याः तथाभूता ।

(ढ) प्रवेपिताङ्गी कम्पिताङ्गी, साध्वसं भयम् ।

(ण) महौषधीरिति द्वितीयान्तप्रयोग आर्षः । क्षीरपरिणामिनीरिति—क्षीरस्य परिणामः विपाकः तद्वतीः, यदीयं क्षीरमेव महौषधीरूपेण परिणतं भविष्यतीति भावः । अतएवोत्तरत्र 'वरौषधीबीजभूत'मिति क्षीरविशेषणमुपात्तम् ।

(त) वत्सं प्रति वात्सल्येन गावं क्षीरं स्रावयन्तीति स्वभावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

तत उत्सारयामास शैलान् शतसहस्रशः ।
धनुःकोट्या तदा वैण्यस्ततः शैला विवर्ज्जिताः ॥८१॥

न हि पूर्वविसर्गे वै विषमे पृथिवीतले ।
प्रविभागः पुराणां वा ग्रामाणां वा तदाभवत् ॥८२॥

न शस्यानि न गोरक्षं न कृषिर्न वणिक्पथः ।
वैण्यात्प्रभृति मैत्रेय सर्वस्यैतस्य सम्भवः ॥८३॥

यत्र यत्र समं तस्या भूमेरासीन्नराधिपः ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥८४॥

आहारः फलमूलानि प्रजानामभवत् तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वौषधीषु वै ॥८५॥

स कल्पयित्वा वत्सं तु मनुं स्वायम्भुवं प्रभुः ।
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥८६॥

शस्यजातानि सर्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात वर्त्तन्तेऽद्यापि नित्यशः ॥८७॥

प्राणप्रदानात् स पृथुर्यस्माद् भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥८८॥

ततश्च देवैर्मुनिभिर्दैत्यैरक्षोभिरद्रिभिः ।
गन्धर्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥८९॥

तत् तत् पात्रमुपादाय तत् तद् दुग्धा मुने पयः ।
वत्सदोग्धृविशेषाश्च तेषां तद्योनयोऽभवन् ॥९०॥

सैषा धात्री विधात्री च धारिणी पोषिणी तथा ।
सर्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥९१॥

एवं प्रभावः स पृथुः पुत्रो वेणस्य वीर्य्यवान् ।
जज्ञे महीपतिः पूर्वो राजाभूज्जनरञ्जनात् ॥९२॥

तदा पृथोः पूर्वमराजके काले सोऽपि फलाद्याहारः कृच्छ्रेण सम्पाद्योऽभवत् ॥ ८५ ॥

स पृथुस्तं प्रजासन्तानप्रवर्त्तकं मनुं वत्सं कृत्वा स्वपाणिरूपे पात्रे शस्यजातानि पृथिवीं दुदोहेत्यन्वयः ॥८६।८७॥

प्राणप्रदानादभयप्रदानाद् भूमेः पिताभूत्। यथाहुः "जनकश्चोपनेता च यश्च विद्यां प्रयच्छति। अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः" इति ॥ ८८ ॥

देवादिभिर्दशभिर्वर्गैस्तत् तत् स्वाभिमतं पात्रमुपादाय तत् तत् स्वाभिमतं पयो भूमिर्दुग्धा। तदेषां देवादीनां तद्योगबलात् तज्जातीया एव वत्सविशेषा दोग्धृविशेषाश्चाभवन्। तमेव देवादिषु दोग्धृवत्सादिक्रमं हरिवंशमत्स्ययुक्तं संक्षेपेण वक्ष्यामः। देवानामिन्द्रो वत्सः, मिं दोग्धा, सौवर्णं पात्रं, बलं क्षीरम्। मुनीनां सोमो वत्स बृहस्पतिर्दोग्धा, छन्दांसि पात्रम्, तपो ब्रह्म च क्षीरं दैत्यानां विरोचनो वत्सः, द्विमूर्धा दोग्धा, आयसं पात्रं माया क्षीरम्। राक्षसानां सुमाली वत्सः, जतुनाभ दोग्धा, कपालं पात्रम्, रुधिरं क्षीरम्। अद्रीणां हिमवा वत्सः, मेरुर्दोग्धा, शिलामयं पात्रम्, ओषधीरत्नं क्षीरं गन्धर्वाणां चित्ररथो वत्सः, विश्वावसुर्दोग्धा, पद्मं पात्रं गन्धः क्षीरम्। उरुगाणां तक्षको वत्सः, धृतराष्ट्रो दोग्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

य इदं जन्म वैण्यस्य पृथोः कीर्त्तयते नरः ।
न तस्य दुष्कृतं किञ्चित् फलदायी प्रजायते ॥९३॥

दुःस्वप्नोपशमं नृणां शृण्वतां चैतदुत्तमम् ।
पृथोर्जन्म प्रभावश्च करोति सततं नृणाम् ॥९४॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे त्रयोदशोऽध्यायः ।

अलावुः पात्रम्, विषं क्षीरम्। यक्षाणां कुबेरो वत्सः, सुकर्णो दोग्धा, आमं मृण्मयं पात्रम्, अन्तर्धानं क्षीरम्। पितॄणां यमो वत्सः, अन्तको दोग्धा, राजतं पात्रम्, स्वधा क्षीरम्। तरूणां प्लक्षो वत्सः, शालवृक्षो दोग्धा, पालाशं पात्रम्, छिन्नसंरोहणं क्षीरम्। तदुक्तं हरिवंशे "देवा मित्रेन्द्रसौवर्णैर्बलं तु, मुनयस्तथा। बृहस्पतीन्दुवेदैश्च तपो, दैत्या द्विमूर्द्धतः। विरोचनायसानाञ्च मायां रक्षोगणा अपि। जतुनाभसुमालिभ्यामस्था रक्तं, ततोऽद्रयः। मेरुहिमाद्रिशैलैस्तु रत्नं, गन्धर्वजातयः। सुरुक्चित्ररथाम्भोजैर्गन्धन्तु, भुजगास्ततः। धृतराष्ट्रतक्षकालावुभिश्च विषमुल्वणम्। यक्षाः सुकर्णधनदाऽऽमैरन्तर्द्धिं, पितृव्रजाः। अन्तकप्रेतराटरौप्यैः स्वधामथ, महीरुहाः। शालप्लक्षपलाशैश्च छिन्नसंरोहणं मुहुः। स्वदोग्धृवत्सपात्रैस्ते तत् तद् दुदुहुरुर्वराम्" इति ॥९०॥ धात्री माता, विधात्री कर्त्री, धारिणी आधारः। पोषणी पोषणकर्त्री, "पद्भ्यां भूमिः" इति श्रुतेः ॥

इति श्रीधरस्वमिकृतायां स्वात्मप्रकाशाभिधायां श्रीविष्णुपुराणटीकायां प्रथमांशे त्रयोदशोऽध्यायः ॥

पाठान्तराणि—३—वीरणस्य महात्मनः
४—कन्यायां तपतां श्रेष्ठ—
३८—तस्यैव दक्षिणं हस्तं ममन्थुस्ते ततो द्विजाः ।
४१—सुतेन सुमहात्मना ।
८४—भूमेरासीद् द्विजोत्तम ।

चतुर्दशोऽध्यायः

[प्रचेतसां तपस्या]

पृथोः पुत्रौ महावीर्यौ जज्ञातेऽन्तर्द्धिपालिनौ (क) ।
शिखण्डिनी हविर्द्धानमन्तर्द्धानाद् व्यजायत ॥१॥
हविर्द्धानात् षडाग्नेयी धिषणाजनयत् सुतान् ।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ ॥२॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः ।
हरिर्ध्यानान्महाराजो येन संवर्द्धिता प्रजाः ॥३॥
प्राचीनाग्राः कृशास्तस्य पृथिव्यामभवन् मुने ।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः ॥४॥

चतुर्दशोऽध्यायः ।

अन्तर्द्धिरेवान्तर्द्धानं तस्माद् भार्या शिखण्डिनी हविर्धानं पुत्रमसूयत ॥१॥

आग्नेयी अग्निवंशजा धिषणा नाम्नी ॥ २ ॥

प्राचीनाग्राः कुशाः सर्वत्र यज्ञानुष्ठानात्। तदुक्तं "यस्येदं देवयजनम् अनुयज्ञं वितन्वतः। प्राचीनाग्रैः कुशैरासीद् आस्तृतं वसुधातलम्" इति ॥ ४ ॥

(क) अन्तर्धिपालिनौ अन्तर्धिः पाली चेति द्वौ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समुद्रतनयायां तु कृतदारो महीपतिः ।
महतस्तपसः पारे सवर्णायां महीपतेः ॥५॥
सवर्णाधत्त सामुद्री दश प्राचीनबर्हिषः ।
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः ॥६॥
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महातपः ।
दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥७॥

मैत्रेय उवाच ।

यदर्थं ते महात्मानस्तपस्तेपुर्महामुने ।
प्रचेतसः समुद्राम्भस्येतदाख्यातुमर्हसि ॥८॥

पराशर उवाच ।

पित्रा प्रचेतसः प्रोक्ता प्रजार्थममितात्मना ।
प्रजापतिनियुक्तेन बहुमानपुरःसरम् ॥९॥

प्राचीनबर्हिरुवाच ।

ब्रह्मणा देवदेवेन समादिष्टोऽस्म्यहं सुताः ।
प्रजाः संवर्द्धनीयास्ते मया चोक्तं तथेति तत् ॥१०॥
तन्मम पीयते पुत्राः प्रजावृद्धिमतन्द्रिताः (ख) ।
कुरुध्वं माननीया वः समाज्ञा च प्रजापतेः ॥११॥

पराशर उवाच ।

ततस्ते तत्पितुः श्रुत्वा वचनं नृपनन्दनाः ।
तथेत्युक्त्वा तु तं भूयः पप्रच्छुः पितरं मुने ॥१२॥

प्रचेतस ऊचूः ।

येन तात प्रजावृद्धौ समर्थाः कर्म्मणा वयम् ।
भवामस्तत् समस्तं नः कर्म्म व्याख्यातुमर्हसि ॥१३॥

पितोवाच ।

आराध्यं वरदं विष्णुमिष्टप्राप्तिमसंशयम् ।
समेति नान्यथा मर्त्त्यः किमन्यत् कथयामि वः ॥१४॥
तस्मात् प्रजाविवृद्ध्यर्थं सर्व्वभूतप्रभुं हरिम् ।
आराधयत (ग) गोविन्दं यदि सिद्धिमभीप्सथ ॥१५॥
धर्म्ममर्थञ्च कामञ्च मोक्षञ्चान्विच्छता सदा ।
आराधनीयो भगवान् अनादिः पुरुषोत्तमः ॥१६॥
यस्मिन्नाराधिते सर्गं चकारादौ प्रजापतिः ।
तमाराध्याच्युतं वृद्धिः प्रजानां वो भविष्यति ॥१७॥

पराशर उवाच ।

इत्येवमुक्तास्ते पित्रा पुत्राः प्रचेतसो दश ।
मग्नाः पयोधिसलिले तपस्तेपुः समाहिताः ॥१८॥

तपसः पारे सवर्णासंज्ञायां कृतदारः । तपस्तप्त्वानन्तरं तां परिणीतवानित्यर्थः । तमस इति पाठे तमसो नरकस्य पारे निमित्ते पुत्रोत्पत्या नरकतारणार्थमित्यर्थः ॥५॥

सवर्णा दश प्रचेतसोऽधत्त असूयत ॥६॥

अपृथग्धर्मचरणाः समानधर्मचारिणः । एतच्च तेषां वक्ष्यमाणमेकभार्यत्वं सम्भावयितुमुक्तम् । समुद्रसलिलेशयाः, तत्र निमग्नाः सन्तः ॥ ७।८।९ ॥

(ख) अतन्द्रिताः अनलसता । समाज्ञा आदेशः ।

ते त्वया प्रजाः संवर्द्धनीया इत्यादिष्टोऽस्मि ॥१०॥

अन्विच्छता धर्माद्यनन्तरं मोक्षमपीच्छता पुंसा ॥१६॥

यस्मिन् आराधिते यमाराध्येत्यर्थः । तमाराध्य तस्मिन्नाराधित इत्यर्थः ॥१७॥

प्रचेतस एव प्राचेतसाः ॥१८।२०

(ग) आराध्येत्यनन्तरं स्थित्यादिक्रियाध्याहारेण ल्यप्प्रत्ययोपयोग्येककर्त्तृकत्वोपपत्तिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दशवर्षसहस्राणि न्यस्तचित्ता जगत्पतौ ।
नारायणे मुनिश्रेष्ठ सर्व्वलोकपरायणे (घ) ॥१९॥
तत्रैव ते स्थिता देवमेकाग्रमनसो हरिम् ।
तुष्टुवुर्य स्तुतः कामान् स्तौतुरिष्टान् प्रयच्छति ॥२०

मैत्रेय उवाच ।

स्तवं प्रचेतसो विष्णोः समुद्राम्भसि संस्थिताः ।
चक्रुस्तन्मे मुनिश्रेष्ठ सुपुण्यं वक्तुमर्हसि ॥२१॥

पराशर उवाच ।

शृणु मैत्रेय गोविन्दं यथा पूर्व्वं प्रचेतसः ।
तुष्टुवुस्तन्मयीभूताः समुद्रसलिलेशयाः ॥२२॥

प्रचेतस ऊचुः ।

नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती ।
तमाद्यं तमशेषस्य जगतः परमं प्रभुम् ॥२३॥
ज्योतिराद्यमनौपम्यमनन्तरमपारवत् ।
योनिभूतमशेषस्य स्थावरस्य चरस्य च ॥२४॥

पराशर उवाच ।

यस्याहः प्रथमं रूपमरूपस्य ततो निशा ।
सन्ध्या च परमेशस्य तस्मै कालात्मने नमः ॥२५॥
भुज्यतेऽनुदिनं देवैः पितृभिश्च सुधात्मकः ।
जीवभूतः समस्तस्य तस्मै सोमात्मने नमः ॥१६॥
यस्तमो हन्ति तीव्रात्मा स्वभाभिर्भासयन् नभः ।
घर्म्मशीताम्भसां योनिस्तस्मै सूर्य्यात्मने नमः ॥२७॥
काठिन्यवान् यो विभर्ति जगदेतदशेषतः ।
शब्दादिसंश्रयो व्यापी तस्मै भूम्यात्मने नमः (ङ)॥२८
यद्योनिभूतं जगतो बीजं यत् सर्वदेहिनाम् ।
तत् तोयरूपमीशस्य नमामो हरिमेधसः ॥२९॥
यो मुखं सर्वदेवानां हव्यभुक् कव्यभुक् तथा (च) ।
पितृणाञ्च नमस्तस्मै विष्णवे पावकात्मने ॥३०॥
पञ्चधावस्थितो (छ) देहे यश्चेष्टां कुरुतेऽनिशम् ।
आकाशयोनिर्भगवान् (ज) तस्तै वाय्वात्मने नमः॥३१

यं स्तवं चक्रुस्तं वक्तुमर्हसि ॥ २१।२२ ॥

"जगद्बीजतया नत्वा चतूरूप विभागतः । शुद्धरूप-प्रणामेन तुष्टो विष्णुः प्रचेतसाम्" ॥ तत्र प्रथमं जगत्कारण-तया प्रणमन्ति "नताः स्म" इति द्वाभ्याम् ॥२३॥

अनौपम्यं सूर्याद्युपमानशून्यं चिद्रूपमित्यर्थः । अनन्तरं निर्भेदम् । अपारवत् अवधिशून्यम् ॥२४॥

कालरूपेण प्रणमन्ति, यस्याहरिति ॥२५

विश्वरूपेण प्रणमन्ति, भुज्यते इत्यादि दशभिः । जीवभूतः जीवनरूपः ॥२६॥

घर्मस्तापः शीतश्च अम्भश्च तेषां योनिः कारणम् ॥२७॥

शब्दादीनां पञ्चानामपि गुणानां संश्रयः ॥२८॥

योनिभूतं शोणितरूपेण, बीजञ्च शुक्ररूपेण ॥२९॥

यो हव्यभुग्देवानां मुखं कव्यभुक् पितृणाञ्च मुखम् ॥३०॥

पञ्चधा प्राणादिरूपेण ॥३१॥

(घ) सर्वलोकपरायणे सर्वेषां लोकाणां परे श्रेष्ठे अयने शरणभूते सर्वेषामभीष्टफलानां सिद्ध्यर्थमेकाश्रयभूत इत्यर्थः ।

(ङ) भूमेः शब्दाश्रयत्वं सांख्यदर्शनादि तन्त्रसिद्धम् ।

(च) 'हव्यकव्ये दैवपित्र्ये अन्ने' इति कोषात् हव्यं देवार्थमन्नम्, कव्यञ्च पितृलोकार्थमन्नं बोध्यम् ।

(छ) प्राणादिरूपेण प्राणापानसमानोदानव्यानरूपेण ।

(ज) आकाशयोनिः आकाशप्रभवः अवकाशस्थानव्यतिरेके वायोरुद्भवाभावादिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवकाशमशेषाणां भूतानां यः प्रयच्छति ।
अनन्तमूर्त्तिमान् शुद्धस्तस्मै व्योमात्मने नमः ॥३२॥

समस्तेन्द्रियवर्गस्य यः सदा स्थानमुत्तमम् ।
तस्मै शब्दादिरूपाय नमः कृष्णाय वेधसे ॥३३॥

गृह्णाति विषयान् नित्यमिन्द्रियात्माक्षराक्षरः ।
यस्तस्तै ज्ञानमूलाय नताः स्मो हरिमेधसे ॥३४॥

गृहीतानिन्द्रियैरर्थान् आत्मने यः प्रयच्छति ।
अन्तःकरणभूताय तस्मै विश्वात्मने नमः ॥३५॥

यस्मिन्ननन्ते सकलं विश्वं यस्मात् तथोद्गतम् ।
लयस्थानञ्च यस्तस्मै नमः प्रकृतिधर्म्मिणे ॥३६॥

शुद्धः संलक्ष्यते भ्रान्त्या गुणवानिव योऽगुणः (झ) ।
तमात्मरूपिणं देवं नताः स्म पुरुषोत्तमम् ॥३७॥

अविकारमजं शुद्धं निर्गुणं यन्निरञ्जनम् ।
नताः स्म तत्परं ब्रह्म यद् विष्णोः परमं पदम् ॥३८॥

अदीर्घह्रस्वमस्थूलमनण्वग्र्यमलोहितम् ।
अस्नेहच्छायमनणुमसक्तमशरीरिणम् ॥३९॥

अनाकाशमसंस्पर्शमगन्धमरसञ्च यत् ।
अचक्षुः श्रोत्रमचलमवाक्प्राणममानसम् (ञ) ॥४०॥

अनामगोत्रममुखमतेजस्कमहेतुकम् ।
अभयं भ्रान्तिरहितमनिन्द्यमजरामरम् ॥४१॥

अरजोऽशब्दममृतमप्लुतं यदसंवृतम् ।
पूर्वापरे न वै यस्मिन् तद् विष्णोः परमं पदम् ॥४२॥

परमीशित्वगुणवत् सर्व्वभूतमसंश्रयम् ।
नताः स्म तत् पदं विष्णोर्जिह्वादृग्गोचरं न यत् ॥४३॥

अन्तश्च मूर्त्तिश्च अन्तमूर्त्ति, तद्वान् न भवतीति अनन्त—मूर्त्तिमान् ॥३२॥

स्थानम् आलम्बनं विषय इत्यर्थः ॥३३॥

क्षरः स्थूलदेहावच्छेदेन। अक्षरो लिङ्गदेहस्थत्वेन। ज्ञानमूलाय शब्दादिज्ञानसाधनाय ॥३४।३५॥

प्रधानरूपेण प्रणमन्ति, यस्मिन्निति। यस्मिन् अनन्ते विश्वं तिष्ठति। प्रकृते धर्माः सत्त्वादयो गुणा सन्त्यस्येति प्रकृतधर्मी, तस्मै ॥३६॥

पुरुषरूपेण प्रणमन्ति शुद्ध इति। गुणवानिव गुणप्रेरक-त्वेन तेष्वासक्त इव। आत्मरूपिणं प्रत्यग्रूपम् ॥३७॥

शुद्धं रूपं प्रणमन्ति, अविकारमिति षड्भिः। शुद्धं स्वभावत एव निर्मलं, निरञ्जनम् आगन्तुकमलशून्यम् ॥३८।४०॥

अनिन्द्यं निरवद्यम् ॥४१॥

अप्लुतं गतिशून्यम्। पूर्वापरे दिक्कालकृते ॥४२॥

परं निरूपाधिकम् ईशित्वगुणवत् स्वाभाविकषड्गुणैश्वर्ययुक्तम्। मायया सर्वभूतमपि असंश्रयं निराधारम्। अतएव यज्जिह्वाया दृशश्च गोचरं न भवति तं नताः स्मः ॥४३॥

(झ) न विद्यते गुणो यस्य सः अगुणः गुणरहितः निर्गुण इति यावत्।

(ञ) अत्र 'अपाणिपादो जवनो ग्रहीता, पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादि श्रुतयोऽनुसन्धेयाः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

एवं प्रचेतसो विष्णुं स्तुवन्तस्तत्समाधयः ।
दशवर्षसहस्राणि तपश्चेरुर्महार्णवे ॥४४॥
ततः प्रसन्नो भगवांस्तेषामन्तर्जले हरिः ।
ददौ दर्शनमुन्निद्रनीलोत्पलदलच्छविः (ट) ॥४५॥
पतत्त्रिराजमारूढ़मवलोक्य प्रचेतसः ।
प्राणिपेतुः शिरोभिस्तं भक्तिभारावनामितैः ॥४६॥
ततस्तानाह भगवान् व्रियतामीप्सतो वरः ।
प्रसादसुमुखोऽहं वो वरदः समुपस्थितः ॥४७॥
ततस्तमूचुर्वरदं (ठ) प्रणिपत्य प्रचेतसः ।
यथा पित्रा समादिष्टं प्रजानां वृद्धिकारणम् ॥४८॥
स चापि देवस्तं दत्त्वा यथाभिलषितं वरम् ।
अन्तर्द्धानं जगामाशु ते च निश्चक्रमुर्जलात् ॥४९॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे चतुर्दशोऽध्यायः ।

तस्मिन्नेव समाधिश्चित्तैकाग्र्यं येषां ते तत्समाधयः ॥४४॥

(ट) उन्निद्रं प्रस्फुटितं यत् नीलोत्पलम् तस्य दलस्य छविरिव छविर्यस्य सः ।

(ठ) ऊचुरिति तदिति शेषः ।

इति श्रीधरस्वामिकृतायां स्वात्मप्रकाशाभिधायां विष्णुपुराणटीकायां प्रथमांशे चतुर्दशोऽध्यायः

पाठान्तराणि :—

३ । हविर्धानान्महाभाग— ।
४ । पृथिव्यां विश्रुता मुने— ।
११ । सम्यगाज्ञा प्रजायते— ।

पञ्चदशोऽध्यायः ।

[कण्डुमुनिचरितम्, म्यैथुनधर्म्मेण दक्षस्य प्रजासृष्टिश्च ।]

पराशर उवाच ।

तपश्चरत्सु पृथिवीं प्रचेतः सु महीरुहाः ।
अरक्ष्यमाणामाबव्रुर्बभूवाथ प्रजाक्षयः ॥१॥
नाशकन्मारुतो वातु वृतं खमभवद् द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितं प्रजाः ॥२॥
तद् दृष्ट्वा जलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः । (क)
मुखेभ्यो वायुमग्निञ्च तेऽसृजन् जातमन्यवः ॥३॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ।
तानग्निरदहद् घोरस्तत्राभूद् द्रुमसंक्षयः ॥४॥

पञ्चदशोऽध्यायः ।

प्रचेतःसु तपश्चरत्सु तत्पितरि च नादात् तत्त्वज्ञानं प्राप्य राज्यं त्यक्त्वा वनं गते सति इति द्रष्टव्यम् । तदुक्तम् । "प्राचीनबर्हिषं क्षत्रकर्मस्वासक्तचेतसम् । नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत्" इत्यादिना पुरञ्जनाख्यानेन । अतोऽरक्ष्यमाणां पृथिवीं कर्षणाद्यभावाद् महीरुहा आवृतवन्तः ॥१।३॥

(क) जातमन्यवः जातदैन्याः, न तु क्रुद्धा इति तदर्थः, क्रुद्धा इति विशेषणेनैव तस्य प्राप्तत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपागम्यब्रवीदेतान् राजा सोमः प्रजापतीन् ॥५॥

कोपं यच्छत राजानः शृणुध्वञ्च वचो मम ।
सन्धानं (ख) वः करिष्यामि सह क्षितिरुहैरहम् ॥६॥

रत्नभूता च कन्येयं वार्क्षेयी (ग) वरवर्णिनी ।
भविष्यं जानता पूर्व्वं मया गोभिर्व्विवर्द्धिता ॥७॥

मारिषा नाम नान्नैषा वृक्षाणामिति निर्म्मिता ।
भार्या वोऽस्तु महाभागा ध्रुवं वंशविवर्द्धिनी ॥८॥

युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥९॥

मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
अग्निनाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥१०॥

कण्डुर्नाम मुनिः पूर्व्वमासीद् वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥११॥

तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तमृषिं सा शुचिस्मिता ॥१२॥

क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः ॥१३॥

सा त्वं प्राह महात्मानं गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन् अनुज्ञां दातुमर्हसि ॥१४॥

तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः (घ) ।
दिनानि कतिचिद् भद्रे स्थीयतामित्यभाषत ॥१५॥

एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥१६॥

वायोरग्नेः सृष्टेः प्रयोजनमाह उन्मूलानीति ॥४॥

सोमो वृक्षाणां राजा । प्रजापतीन् इत्यनेन कन्दमूल-फलादिभिः प्रजावृद्धिकारिणां वृक्षाणां दाहः प्रजापालकानां युष्माकम् अनुचित इति सामोपायः सूचितः ॥५॥

कोपं यच्छत नियमयत ॥६॥

तपःप्रदानेन सन्धानं करोति, रत्नभूतेति । वार्क्षेयी वृक्षजा । भविष्यत्, इयं युस्माकं पत्नी भविष्यति, अस्यां दक्षो जनिष्यते ; तद्वंशेन च त्रिलोकी पूरयिष्यत इत्यादि जानता मया गोभिः सुधामयैरश्मिभिः संवर्द्धिता ॥७॥

नान्ना मारिषा वृक्षाणामेषा कन्या इति नाम । एवं हि प्रसिद्धा निर्मिता निष्पन्नेत्यन्वयः ॥८॥

युष्माकं तपोमयस्य तीव्रस्य तेजसोऽर्द्धेन शीतैर्मदीयैर्गोभिः संवृद्धत्वादस्या मम च तेजसोऽर्द्धेन संयुक्तोऽस्यामुत्पत्स्यते ॥९॥

एवञ्च सौम्येन ममांशेन युष्मत्तेजोमयेन चाग्निना संयुक्तोऽग्निसामात्मकः सन् अग्निसमः अप्रधृष्यो भूत्वा प्रजाः संवर्द्धयिष्यतीत्यर्थः ॥१०॥

न चैवं शङ्कनीयं दशानां कथमेको भार्या स्यादिति यस्मादियं कण्डोस्तपःसंस्तुतेन वीर्य्येण अप्सरोगर्भसम्भवा महाप्रभावा च अयोनिजा च देवी, न तु मानुषी । न च बहूनामेकाप्सरःसम्भोगो विरुध्यते, विष्णोः प्रसादात् चाल्पा बहवः पतयो न दुष्यन्तीति वर्णयिष्यन् तस्या जन्मादि वक्तुमाह कण्डुर्नाम इत्यादिना युष्मत्पत्नी नृपात्मजा इत्यन्तेन ॥११॥

तस्य क्षोभाय चित्तविकारेण तपो नाशाय ॥१२॥१८॥

(ख) सन्धानं सन्धि सम्मेलनं कौटुम्बसम्पर्कमिति यावत् ।

(ग) वृक्षाणामपत्यं स्त्री वार्क्षेयी वृक्षशब्दादपत्यार्थे ष्णेय-प्रत्ययेन निष्पन्नमिदं पदम्, वृक्षकन्येत्यर्थः ।

(घ) प्रणयस्मितेन प्रेममूलकमृदुहास्येन शोभनं मुखं यथा स्यात्तथेति आह क्रियाया विशेषणम् । अनेन तया मुनेर्नयो व्यज्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुज्ञां देहि भगवन् व्रजामि त्रिदिवालयम् ।
उक्तस्तथेति स मुनिः स्थीयतामित्यभाषत ॥१७॥

पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयस्मितशोभनम् ॥१८॥

उक्तस्तयैवं स मुनिरुपगुह्यायतेक्षणाम् ।
प्राहास्यतां (ङ) क्षणं सुभ्रु चिरं कालं गमिष्यसि ॥१९

तच्छापभीता शुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किञ्चिदूनं वर्षाणामन्वतिष्ठत (च)॥२०॥

गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥२१॥

तं सा शापभयाद् भीता दाक्षिण्येण च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्ति वेदनी न जहौ मुनिम् ॥२२॥

तया च रमतस्तस्य (ज) महर्षेस्तदहर्निशम् ।
नवं नवमभूत् प्रेम मन्मथाविष्टचेतसः ॥२३॥

एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्कामन्तञ्च कृत्रेति गम्यते प्राह सा शुभा ॥२४॥

इत्युक्तः स तया प्राह परिवृतमहः शुभे ।
सन्ध्योपास्तिं करिस्यामि क्रियालोपोऽन्यथा भवेत् ।२५

ततः प्रहस्य मुदिता तं सा प्राह महामुनिम् ।
किमद्य सर्व्वधर्म्मज्ञ परिवृत्तमहस्तव ॥२६॥

बहूनां विप्र वर्षाणां परिणाममहस्तव ।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम् ॥२७॥

मुनिरुवाच ।

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम् ॥२८॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥२९॥

उपगुह्य प्राह, इत्यनेन सम्भोगातिरेकादनुरागातिरेकं दर्शयति। चिरकालं गमिष्यसि, गता सती शीघ्रं नागमिष्यसीत्यर्थः ॥१६॥

अन्वतिष्ठत् अनन्तरमतिष्ठदित्यर्थः ॥२०॥

देवराजनिवेशनम्। प्रतिगमनाय ॥२१॥

दक्षिणेति। "या गौरवं भयं प्रेम सद्भावं पूर्वनायके।
न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैः" ॥ तत्स्वभावो दाक्षिण्यं तेन ॥ २२ ।२३॥

उटजात् पर्णशालातः ॥२४॥

परिवृत्तं अस्तासन्नं जातम् ॥२५॥

विस्मयेन प्रहस्य सर्वधर्मज्ञेति सोपालम्भं सम्बोध्य। किमद्य तवाहः परिवृत्तम् ? इत्याह ॥२६॥

विस्मयहेतुं स्वयमेव स्फुटयति, बहूनामिति एतत् बहुभिर्वर्षैः परिणामं गतं तवातिदीर्घमहः कस्य विस्मयं न कुरुते तदिदं कथ्यताम् ॥२७।२८॥

सद्भावः परमार्थः ॥२९॥

(ङ) प्राहास्यतामिति—आस्यतां स्थीयतामित्यादि प्राह प्रोवाचेत्यन्वयः।

(च) अन्वतिष्ठतेत्यार्षम्।

(छ) प्रोक्ता तेन मुनिनेति शेषः। प्रणयभङ्गेन प्रार्थनावैफल्येन या आर्त्तिः दुःखं तद्वेदनी तदभिज्ञा। एतेन तस्या मुनौ दया व्यज्यते। तस्य मुनेस्तदार्त्तिपरिजिहीर्षयैव न तं मुनिं जहाविति भावस्य प्रतीतेः।

(ज) आत्मनेपदिनो रमेः शतृप्रत्यय आर्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रम्लोचोवाच ।

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥३०॥

सोम उवाच ।

ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणाम् ।
कथ्यतां भीरु कः कालस्तया मे रमतः(फ)सह ॥३१॥

प्रम्लोचोवाच ।

सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥३२॥

ऋषिरुवाच ।

सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे ।
दिनमेकमहं मन्ये (ब) त्वया सार्द्धं महासितम् ॥३३

प्रम्लोचोवाच ।

वदिष्याम्यनृतं ब्रह्मन् कथमत्र तवान्तिके ।
विशेषेणाद्य भवता पृष्टा मार्गानुवर्त्तिना ॥३४॥

सोम उवाच ।

निशम्य तद् वचः सत्यं स मुनिर्नृपनन्दनाः ।
धिङ् मां धिङ् मामतीवेत्थं निनिन्दात्मानमात्मना ॥३

मुनिरुवाच ।

तपांसि मम नष्टानि हतं ब्रह्मविदां धनम् ।
हतो विवेकः केनापि योषिन्मोहाय निर्मिता ॥३६

ऊर्म्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन धिक् तं काममहाग्रहम् ॥३७॥

व्रतानि वेदविद्यास्तिकारणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापहृतानि मे ॥३७॥

विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥३९॥

गच्छ पापे यथाकामं यत् कार्य्यं तत्कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः ॥४०॥

न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना (ट) ।
सतां साप्तपदं मैत्रमुषितोऽहं त्वया सह ॥४१॥

यस्मिन् प्रत्यूषःकालेऽहमागाता तस्य कालस्य ॥३०॥

कर्मलोपापराधेन ससाध्वसो विप्रस्तां पप्रच्छ, कः कालः कियान् गतः कालः ॥३१।३२॥

इहासितम् अत्र स्थितम् ॥३३॥

एतावन्तं कालमतिविस्रम्भार्हा सती कथमद्यानृतं वदिष्यामि । कर्मलोपशङ्काव्याकुलेन च पुनः सन्मार्गानुवर्त्तिना पृष्टा सती ॥३४॥

धिग्धिङ्मामिति गर्हायाम् । धिगित्यव्ययं तद्योगे च द्वितीया ॥३५॥

ब्रह्मविदां वेदज्ञानां तच्च मम हतं नष्टम् ॥३६॥

"क्षुत्तृष्णे शोकमोहौ च जरामृत्युषडुर्मयः" इत्येवं प्रोक्तं यदूर्म्मिषट्कं तदतिक्रम्य स्थितम् । ब्रह्म मया मनोजयेन ज्ञेयमित्येवं कृतैषा मतिर्येन हृता तम् ॥३७।३९॥

भावः प्रेमभावस्तद्गर्भैश्चेष्टितैः, सस्मितैर्भ्रुभङ्गादिभिर्मम क्षोभं कुर्वन्त्या त्वया देवराजस्य यत् कार्यं तत् कृतमित्यन्वयः ॥४०॥

मार्गसप्तपदानि सह गच्छतां मैत्रं प्रसिद्धम् । अथ पुनस्त्वया बहुकालमुषितः स्थितः । अतस्त्वां शापाग्निना नाहं भस्मीकरिष्यामि ॥४१।४२॥

(फ) अत्रापि रमत इति शतृप्रत्यय पूर्ववदार्षः ।

(ब) दिनमेकमित्यत्रात्यन्तसंयोगे द्वितीया ।

(ट) क्रोधतीव्रेणेत्यत्र तीव्रक्रोधेनेति पाठः समीचीनो भाति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथवा तव को दोषः किं वा कुप्याम्यहं तव (ठ) ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥४२॥
यया शक्रप्रियार्थिन्या कृतो मे तपसो व्ययः ।
त्वया धिक् त्वां महामोहमञ्जूषां सुजुगुप्सिताम् ॥४३

सोम उवाच ।

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद् गलत्स्वेदजला सा बभूवातिवेपथुः (ड) ॥४४
प्रवेपमाणां सततं स्विन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥४५॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः ॥४६॥
वृक्षाद् वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्म्मार्ज्जमाना (ढ) गात्राणि गलत्स्वेदजलानि वै ॥४७
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्जगाम स रोमाच्च स्वेदरूपी तदङ्गतः ॥४८॥

सोम उवाच

तं वृक्षा जगृहुर्गर्भमेकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे शनैः ॥४९॥
वृक्षाग्रगर्भसंभूता भारिषाख्या वरानना (ढ) ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम् ॥५०
करण्डोरपत्यमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचातनया च सा ॥५१॥
स चापि भगवान् करण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥५२॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः ।
ऊर्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दनाः ॥५३॥

प्रचेतस ऊचुः ।

ब्रह्मपारं मुनेः श्रोतुमिच्छामः परमं स्तवम् ।
जपता करण्डुना देवो येनाराध्यत केशवः ॥५४॥

अजितेन्द्रियस्यापि स्वचित्तक्षोभे तदागमनं निमित्तम् अतस्तामेव पुनर्निभर्त्सयति, ययेति, यया त्वया सम्भोगादिभिर्मे तपसो व्ययः कृतः, तां त्वां महामोहस्य मञ्जुषा पेटिकाभूतां धिगित्यन्वयः ॥४३॥

गलन्ति स्वेदजलानि घर्मबिन्दवो यस्याः सा, अतिशयेन वेपथुः कम्पो यस्यास्तथा भूता च बभूव ॥४४॥

गात्रमेव लता कोमलत्वादिगुणैः स्विन्ना स्वेदयुक्ता गात्रलता यस्यास्ताम् ॥४५॥

(ठ) कोपार्थ कधातुयोगे चतुर्थ्यां प्राप्तायां तवेत्यत्र सम्बन्धविवक्षामात्रेण ।

(ड) शापभयादेव प्रम्लोचायास्तथात्वमनुसन्धेयम् ।

(ढ) निर्मार्जमानेत्यार्षम् ।

तदेवं तस्या गर्भसम्भवहेतुं कण्डुना सम्भोगं तद्गर्भस्य च योनिद्वारं विनैव निःसरणमार्गं स्वेदोद्गममुक्त्वा तत्कन्याया वृक्षादिकन्यात्वहेतुं वक्तुमाह, सा तु निर्भर्त्सितेति षड्भिः ॥४६॥

समाहितः सम्यगाहितो निषिक्तः ॥४८-५१॥

तर्हि योगभ्रष्टस्य कन्येयमित्यनादरं वारयितुं पुनः कण्डोर्योगप्रभाहमाह, स चापीति सार्द्धद्वाभ्याम् ॥५२॥

ब्रह्मशब्दः पारशब्दश्च विशिष्टार्थपरः प्रचुरो यस्मिन् तद् ब्रह्मपारमयम् । यद्वा ब्रह्मणो वेदस्य पारो वेदान्तास्तन्मयं तत्परिणामभूतम् ॥५३॥

आराध्यत आराधितः ॥५४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोम उवाच ।

पारं परं विष्णुपारापारः
परः परेभ्यः परमार्थरूपी ।
स ब्रह्मपारः परपारभूतः
परः पराणामपि पारपारः ॥५५॥

स कारणं कारणतस्ततोऽपि
तस्यापिहेतुः परहेतुहेतुः ।
कार्य्येषु चैवं सह कर्म्मकर्त्तृ
रूपैरशेषैरवतीह सर्व्वम् ॥५६॥

"संकीर्त्य तत्त्वं त्रिश्लोक्या प्रार्थना च चतुर्थतः । ब्रह्मपारस्तवेनैवं कण्डोस्तुष्टोऽचिराद् हरिः" ॥ पारं परमित्यादित्रिभिः श्लोकैर्विष्णोस्तत्त्वं संकीर्त्य चतुर्थेन रागादिदोषोपशमः प्रार्थ्यते । परं निरतिशयम् आवृत्तिशून्यं संसाराध्वनः पारमवधिर्विष्णुः । "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति श्रुतेः । अतः अपारपारो दुरन्तस्य संसाराध्वनः पारत्वात् अपारो दुष्प्रापः पारो यस्य स वा । पारतीरसमाप्ताविति धातुः । तर्हि दीर्घेण कालेन प्राप्यः स्यात् ? तत्राह, परः परेभ्य इति परेभ्य आकाशादिभ्योऽपि परः अनन्त इत्यर्थः । "महतो महीयान्" इति श्रुतेः । अतएव परमार्थरूपी । सत्यस्वरूपः । यद्वा अर्थः प्रयोजनं परमपुरुषार्थः परमानन्दः स एव । ननु तस्य दुष्प्रापत्वे कथं परमपुरुषता कथं वा "सोऽध्वनः परमाप्नोतीति" श्रुतिः ? तत्राह—स ब्रह्म वेदः तपो वा सहितास्तन्निष्ठाः सन्ब्रह्माणः तेषां पारः प्राप्तुं शक्यः । तत् कुतः ? इत्यत्राह, परपारभूतः परस्यानात्मभूतप्रपञ्चस्य पारभूतः अवधिरूपः ॥

तत्र हेतुः । परः पराणामपीति आत्माध्यासाद् आत्मत्वेन प्रतीतानामिन्द्रियादीनां परः निरुपाधिकः । परमात्मा "इन्द्रियेभ्यः परा ह्यर्थाः" इत्युपक्रम्य "पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इति श्रुतेः । अयं भावः । नहि ग्रामादिवद् गत्या तत्प्राप्तिः, येन दुरन्तसंसाराध्वपारत्वादनन्तत्वाच्च न प्राप्येत । किन्तु अयं ततोऽतिदूरीभूतोऽपि तपोविशुद्धचित्तैर्वेदोत्पन्नज्ञानेन अज्ञानकृतानात्मप्रपञ्चादन्तः प्राप्तुं शक्य इति अत एवोपाधिपरिच्छेदाभावान्निरङ्कुशाचिन्त्यपरमैश्वर्येण पारपारः । पारश्चासौ पारश्चेति समासः । पॄपालनपूरणयोरिति धातोः पार इति रूपम् । स्वभक्तानां पालनात् परः । अपेक्षितैर्वरैः पूरणात् पार इति द्वितीयपार शब्दस्यार्थः । यद्वा पाराः पालकाः पूरकाश्च ये इन्द्रब्रह्मादयस्तेषामपि पालकः पूरकश्चेत्यर्थः ॥५५॥

तदेवं विशुद्धरूपेण स्तुत्वा सार्वात्म्येन स्तौति, स कारणमिति । कारणत इति षष्ठ्यर्थे तसिल् । स विष्णुः कारणस्यापि कारणं तस्यापि कारणमित्येवं चराचरकारणं ब्रह्माण्डमारभ्य मूलकारणपर्यन्तं कारणमालात्मकः । यथोक्तं ब्रह्मस्तुतौ "कारणं कारणस्यापि तस्य कारणम्" इत्यादि । कार्येषु चैवमित्यनेन प्रकृतिकार्यं महत्तत्त्वमारभ्य चरमकार्यपर्यन्तं कार्यमालात्मको विष्णुरेवोत्युक्तम् । तदेवं सृष्टिक्रियायां उपादानकारणत्वेन तत्कार्यत्वेन च सार्वात्म्यमुक्त्वा पालनक्रियायां पाल्यरूपकर्मतया तत्कर्तृतया वा सार्वात्म्यमाह, स इति । निपातोऽवधारणार्थः । स विष्णुरेव धर्मादिरूपैः पालनीयैस्तत्पालकैश्च कर्तृरूपैरशेषैः स्वीयैरुपलक्षितः सन् सर्वमवतीति । यद्वा अशेषैः कर्मरूपैः कर्तृरूपैश्च । सहैवमिति कर्मकर्तृरूपमालान्तरात्मकश्चातिदेशः । तत्र "कर्तुरीप्सिततमं कर्म" इति स्मृतेः । कर्तुः क्रियया ग्रामगमनादिकरणिकया भावनाख्यया यदीप्सिततमं सुखं, तदेव मुख्यं कर्म अत्र गृह्यते । ग्रामादेस्तु धात्वर्थकर्मतैव न भावनाकर्मता । अत एवास्ते शेते इत्यादिषु अकर्मकेष्वपि प्रत्ययांशे भावनाप्रतीतेर्भाव्यं विना भावनाभावाच्च । सुखकाम आसीत् स्वाध्यकामः शयीतेत्येवमादिप्रयोगेष्वासनेन सुखं भावयेदित्येवमादिवचनव्यक्त्या सुखादेर्भावनाकर्मत्वम् अभ्युपगम्यते । ततुक्तं भट्टैः । "अस्त्यादावपि कर्त्रंशे भाव्यमस्त्येव भावना । अन्यत्रांशे च नातात्त न तथा सा प्रभासते" इति

यद्येवमकर्मकेष्वपि भाव्यं स्यात्, कस्तर्हि सकर्मका-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्म प्रभुर्ब्रह्म स सर्व्वभूतो
ब्रह्म प्रजानां पतिरच्युतोऽसौ ।
ब्रह्माक्षरं नित्यमजं स विष्णु-
रपक्षयाद्यैरखिलैरसङ्गि ॥५७॥

ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तमः ।
तथा रागादयो दोषाः प्रयान्तु प्रशमं मम ॥५८॥

सोम उवाच ।

एतद् ब्रह्मा पराख्यं वै संस्तवं परमं जपन् ।
अवाप परमां सिद्धिं समाराध्य स केशवम् ॥५९॥

इयञ्च मारिषा पूर्व्वमासीद् या तां ब्रवीमि वः ।
कार्य्यगौरवमेतस्याः कथने फलदायि वः ॥६०॥

अपुत्रा प्रागियं विष्णुं मृते भर्त्तरि सत्तमाः ।
भूपपत्नी महाभागा तोषयामास भक्तितः ॥६१॥

आराधितस्तया विष्णुः प्राह प्रत्यक्षतां गतः ।
वरं वृणीष्वेति शुभा सा च प्राहात्मवाञ्छितम् ॥६२

भगवन् बालवैधव्याद् वृथाजन्माहमीदृशी ।
मन्दभाग्या समुत्पन्ना विफला च जगत्पते ॥६३॥

भवन्तु पतयः श्लाघ्या मम जन्मनि जन्मनि ।
त्वत्प्रसादात् तथा पुत्रः प्रजापतिसमोऽस्तु मे ॥६४॥

रूपसम्पत्समायुक्ता सर्व्वस्य प्रियदर्शना ।
अयोनिजा च जायेयं त्वत्प्रसादादधोक्षज ॥६५॥

कर्मयोर्भेद इत्याक्षिप्य परिहारश्चोक्तः। साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक्। सकर्मकः स धातुः स्यात् पारम्पर्ये त्वकर्मकः" इति। अत्रोक्तकर्मशब्देन ईप्सिततमसुखवाचिना मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तपुरुषार्थसाधकोऽपि विष्णुरेवेत्युक्तम्। तदेवं कारणकार्यकर्मकर्तृरूपैः सृष्टिलयक्रियाप्रतियोगिभिस्तत्तत्सम्बन्धिसार्वात्म्यमुक्तम्। एतैरेव रूपैः पालनक्रियाप्रतियोगिभिस्तत्तत्सम्बन्धिसार्वात्म्यमाह, अशेषैरेतै रूपैः स विष्णुः सर्वं भवतीति ॥५६॥

ननु यदि शुद्धं ब्रह्मैवासौ विष्णुस्तर्हि कथमशेषै रूपैरवतीत्युच्यते ? अथ सर्वात्मकस्तर्हि सर्वभावविकारप्राप्तेः कुतोऽस्य विशुद्धता। इत्याशङ्क्याह, ब्रह्मेति। स विष्णुः शुद्धं ब्रह्मैव सन् प्रभुः सर्वनियन्ता ब्रह्मैव सन् सर्वभूतश्च। ब्रह्मैव सन् प्रजानां पतिश्च पालकः। ननु ब्रह्मस्वरूपाप्रच्युत्या यतोऽसावच्युतः प्रसिद्धः अतः स विष्णुः व्यापनशीलः। सर्वात्मकोऽपि सन् अक्षरं ध्रुवं नित्यमजम् अपक्षयाद्यैरसङ्गिअपरिक्षयविपरिणामवृद्धिसङ्गरहितश्च ब्रह्मैव अचिन्त्यस्वाधीनमायया सर्वात्मतया स विवर्त्तते अतो नायं विरोधः इति भावः ॥५७॥

उक्तं तत्त्वम् अनुस्मरन् दोषोपशमं प्रार्थयते ब्रह्माक्षरमिति। यथा निर्विकारं ब्रह्मैवासौ पुरुषोत्तमः, तथा तदनुस्मरणेन तत्प्रसादाल्लब्धात् स्वरूपाविर्भावाद् मम रागादयः राग आदिकारणं येषां क्रियालोपयोगभङ्गादिदोषाणां ते सर्वे दोषाः प्रकर्षेण समूलं शमं नाशं प्रयान्तु ॥५८।५९॥

इदानीमस्या बहुपतित्वं भगवतैव प्रसादीकृतम् इति नास्याः युष्माकं वा कश्चिद् दोष इति वक्तुमाह इयञ्चेत्यादिना। कार्यगौरवं सत्पुत्रलाभाख्यम्। एतस्याः कथने सति वो युष्माकं वंशविस्ताराख्यफलदं भविष्यतीत्यर्थः ॥६०॥

प्राग् जन्मनि भूपस्य पत्नीयम्। तस्मिन् भूपे मर्त्तरि मृते सति, विष्णं तोषयामास इत्यन्वयः ॥६१।६२॥

वृथैव जन्म यस्याः सा वृथाजन्मा। विफला च अपुत्रा ॥६३॥

श्लाघ्याः प्रख्यातकर्माणः ॥६४॥

रूपेण सम्पदा च समायुक्ता ॥६५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोम उवाच ।

तयैवमुक्तो देवेशो हृषीकेश उवाच ताम् ।
प्रणामनम्रामुत्थाप्य वरदः परमेश्वरः ॥६६॥

देवदेव उवाच ।

भविष्यन्ति महावीर्य्या एकस्मिन्नेव जन्मनि ।
प्रख्यातोदारकर्म्माणो भवत्याः पतयो दश ॥६७॥

पुत्रञ्च सुमहात्मानम् अतिवीर्य्यपराक्रमम् ।
प्रजापतिगुणैर्युक्तं त्वमवाप्स्यसि शोभने ॥६८॥

वंशानां तस्य कर्त्तृत्वं जगत्यस्मिन् भविष्यति ।
त्रैलोक्यमखिलं सूतिस्तस्य चापूरयिष्यति ॥६९॥

त्वञ्चाप्ययोनिजा साध्वी रूपौदार्य्यगुणान्विता ।
मनःप्रीतिकरी नृणां मत्प्रसादाद् भविष्यसि ॥७०॥

इत्युक्त्वान्तर्दधे देवस्तां विशालविलोचनाम् ।
सा चेयं मारिषा जाता युष्मत्पत्नी नृपात्मजाः ॥७१

पराशर उवाच ।

ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः ।
संहृत्य कोपं वृक्षेभ्यः पत्नीं धर्मेण मारिषाम् ॥७२॥

दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ।
जज्ञे दक्षो महायोगो यः पूर्व्वं ब्रह्मणोऽभवत् ॥७३

स तु दक्षो महाभागः सृष्ट्यर्थं सुमहामते ।
पुत्रान् उत्पादयामास प्रजासृष्ट्यर्थमात्मनः ॥७४॥

अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदान् ।
आदेशं ब्रह्मणः कुर्व्वन् सृष्ट्यर्थं समुपस्थितः ॥७५॥

स सृष्ट्वा मनसा दक्षः पश्चादप्यसृजत् स्त्रियः ।
ददौ स दशधर्म्माय कश्यपाय त्रयोदश ॥७६॥

कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ।
तासु देवास्तथा दैत्या नागा गावस्तथा खगाः ॥७७

गन्धर्व्वाप्सरसश्चैव दानवाद्याश्च जज्ञिरे ।
ततः प्रभृति मैत्रेय प्रजा मैथुनसम्भवाः ॥७८॥

संकल्पाद् दर्शनाद् स्पर्शाद् पूर्व्वेषामभवत् प्रजाः ।
तपोविशेषैः सिद्धानां तदात्यन्ततपस्विनाम् ॥७९॥

मैत्रेय उवाच ।

अङ्गुष्ठाद् दक्षिणाद् दक्षः पूर्व्वं जातः श्रुतं मया ।
कथं प्राचेतसो भूयः स सम्भूतो महामुने ॥८०॥

प्रणामेण नम्राम् ॥६६॥

जन्मभेदेन तया बहुपतिप्रार्थने वृतोऽपि स्वभक्तानां पुनर्जन्मासहमानो विष्णुरेकस्मिन्नेव जन्मनि तं वरं ददौ । तदाह—एकस्मिन्नन्तर एव जन्मनीति ॥६७।६८॥

सूतिः सन्ततिः ॥६९॥

साध्वी पतिव्रता ॥७०।७१।७२॥

यः पूर्व्वं ब्रह्मणः पुत्रो बभूव, स दक्षो मारिष्यां जज्ञे ॥७३॥

सृष्ट्यर्थं प्राजापत्यसृष्टिवृद्ध्यर्थम् आत्मनश्च प्रजासृष्ट्यर्थं सन्तानार्थम् ॥७४॥

अवरान् नीचान् वरान् श्रेष्ठान् अचरांश्च चरांश्चेति वा पाठः ॥७५॥

पश्चात् हर्यश्वादिपुत्रनाशान्तरं स्त्रियः कन्याः षष्टिं सृजत् । तासां मध्ये पञ्चाशत्कन्यानां विवाहान् वंशप्रदर्शनार्थमुपक्षिपति, ददाविति द्वाभ्याम् ॥७६॥

कालस्य नयेन परिवर्त्तने युक्ता नियुक्ताः कृत्तिकाद्याः तदुक्तम् "कृत्तिकादीनि नक्षत्राणि इन्दोः पत्न्यस्तु भारत" इति ॥७७॥

ततो दक्षात् प्रभृति ॥७८॥

दक्षात् पूर्वेषान्तु सङ्कल्पादिमात्रात् प्रजा अभवन् । यथा प्राचेतसाद् दक्षात् पूर्वमपि मैथुनसृष्टिरस्त्येव । तथा बाहुल्याभिप्रायेणैतदुच्यत इत्यविरोधः ॥७९।८०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुद्धिपत्रम्

श्रीराम-नवमीदिवसे सनातनशास्त्रस्य प्रकाशने सत्वरतानिवन्धन-मुद्राकरप्रमादेन कानिचन स्खलितानि समापतितानि। सहृदयपाठकान् प्रति अस्माकं सनिर्वन्धानुरोधो यत्, ते शुद्धिपत्र-मिदमनुसृत्य स्खलितानि संशोध्य पठेयुरिति। अतः परमत्र वयमवहिता भविष्यामः।

स्थाने	अशुद्धम्	शुद्धम्
सुधाधारा-मध्ये—४ श्लोके	नरी नारी पुशुः	नरो नारी पशुः
७ ,,	स्रोतस्विनी	स्रोतस्विनी
वाणीमध्ये—१२ पङ्क्तौ	पर्य्यगृह्णात्	पर्य्यगृह्णात्
१३ ,,	सस्प्रति	सम्प्रति
२६ ,,	भूया·····शतम्	भूयान्·····शम्
निवेदने २८ ,,	महाग्रन्याः	महाग्रन्थाः
प्रशस्तिमध्ये २य श्लोकस्य २य चरणे	·····नावर्त्तयन्॥	·····नावर्त्तयन् योजयन्
,, ४र्थ चरणे	वर्ग·····मृक्षि···॥	वर्ण·····मृषि···॥
श्रीगौरीनाथशास्त्रिणो लेखमध्ये ३य पङ्क्तौ	स्वादेव	स्यादेव
श्रीविष्णुवन्दनमध्ये ८ ,,	पुर्णविहारं	पूर्णविहारं
विष्णुपुराणस्य टीकायां १ पृष्ठे १६ पङ्क्तौ	तत्प्रवृत्तिहेतुत्वात्,	तत्प्रवृत्तिनिवृत्तिहेतुत्वात्,
,, ३ ,, २० ,,	महाकल्पान्	महाकल्पान् कल्पविकल्पान्
,, ,, २५ ,,	स ॅ	सर्वं
,, ४ ,, २० श्लोके	तया	तथा
,, ५ ,, ३३ ,,	प्रश्नाखिलं	प्रश्नादखिलं
,, टीकायां १२ पङ्क्तौ	पू ॅ	पूर्वं
,, ८ ,, २३ श्लोके	प्रधानिकं	प्राधानिकं
,, ६ ,, २४ ,,	रूपान्तरं यत् तद्	रूपान्तरं तद्
,, ६ ,, २६ टीकायां	कथम्भतौ	कथम्भूतौ
,, १० ,, ३० टीकायां	··त्युक्त्वा···सक्रियस्वं	··त्युक्त्या···सक्रियत्वं
३१ श्लोके	क्षोभश्च	क्षोभ्यश्च
,, ,, ३४ ,,	प्राधान	प्रधान
,, १२ ,, ५५ ,,	मेरुरुन्न	मेरुरुत्व
,, ,, ५६ टीकायां	टह्माण्डं	ब्रह्माण्डं
१४ ,, ७ ,,	अक्षिपक्ष	अक्षिपक्ष्म
१४ ,, १० ,,	षष्ट्युत्तर त्रिंशता	षष्ट्युत्तरत्रिंशता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे		अशुद्धम्	शुद्धम्
१५ पृष्ठे	१६ टीकायाम्	मत्वन्तरमानं	मन्वन्तरमानं
१७ ,,	१-२ ,,	मैत्रय	मैत्रेय
१८ ,,	१३ श्लोके	तन्मायाहं	तन्मयाहं
२० ,,	३१ ,,	नाशस्थिहेतु	नाशस्थितिहेतु
२१ ,,	पादटीका (द)	युस्मादः	युष्मदः
२२ ,,	४४ श्लोके	तेह्य—	देह्य
२२ ,,	४५ ,,	क्षिप्त	क्षिप्रं
२३ ,,	५१ ,,	सृज्यनां	सृज्यतां
२३ ,,	५२ ,,	मुक्त्वकं	मुक्त्वैकं
२४ ,,	६ ,,	ध्यायतो प्रति	ध्यायतोऽप्रति
२५ ,,	टीका-दक्षिणांशे १ पङ्क्तौ	···सिद्धि।	···सिद्धिः।
२६ ,,	४७ श्लोके	समातंज्ञान्	समातङ्गान्
३२ ,,	१३ टीकायां	ज्ञनेन	ज्ञानेन
३२ ,,	१६ श्लोके	सहसा	सहजा

१३ श्लोको मुद्राकरप्रमादात् स्थानविपर्य्यासेन १७ श्लोकात् परं मुद्रितः।

,,	१३ श्लोके	प्रपश्यति	प्रपश्यन्ति
३२ ,,	१६ टीकायां	स्वाभाविको	स्वाभाविकी
३३ ,,	१८ श्लोके	कुत्रिमं	कृत्रिमं
,, ,,	२१ ,,	सचीकणा	सचीणका
,, ,,	२२ ,,	सप्तदशः	सप्तदश
,, ,,	२७ ,,	प्राज्ञ	प्राज्ञा
,, ,,	२१ टीकायां	प्रियङ्गवः	प्रियङ्गवः कङ्गवः
,, ,,	२७ ,,	परापरविदोः	परापरविदः
,, ,,	२८ ,,	यज्ञानमानुष्ठानं	यज्ञानामनुष्ठानं
३६ ,,	६ श्लोके	समुद्भुत	समुद्भूत
,, ,,	१२ ,,	स्त्रित्वं	स्त्रीत्वं
,, ,,	१४ ,,	सायम्भुव	स्वायम्भुव
,, ,,	१६ ,,	सतरूपा	शतरूपा
,, ,,	१७ ,,	प्रसूतीं	प्रसूतिं
३७ ,,	२३ ,,	सन्तितिं	सन्ततिं
,, ,,	३१ ,,	क्रोधश्च	क्रोधाश्च
,, ,,	३२ टीकायां	भोगात्पकत्वात्	भोगात्मकत्वात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे		अशुद्धम्	शुद्धम्
३८ पृष्ठे	३३ श्लोके	विष्णुः	विष्णोः
,, ,,	४१ टीकायां	महदादिप्रसतिः	महदादिप्रसूतिः
३९ ,,	४५ श्लोके	चात्येव	यात्येव

३९ पृष्ठस्थ-टीकापुष्पिकायां 'विष्णुपुराणरीकाम्' इत्यत्र श्रीधरस्वामिकृतायामिति तथा पाठान्तरमध्ये कश्चिद् इत्यत्र कस्मिंश्चिदिति पठितव्यम्।

४० पृष्ठे	१ श्लोके	शृगु	शृणु
,, ,,	८ ,,	रोहणी	रोहिणी
,, ,,	१० ,,	खर्गोऽथ	सर्गोऽथ
,, ,, पादटीकायाः	६ पङ्क्तौ	सङ्गतः	सङ्गतिः
४३ ,, टीकायाः	३ ,,	पूवं	पूर्वं

तत्रैव पृष्ठे वामांशगतटीकाचरमपङ्क्तिः परपृष्ठस्थ ४-५ टीकाया उपरि सन्निवेश्य पठनीया।

४६ पृष्ठे (ट) पादटीकायाः	३ पङ्क्तौ	सुतरां यं	सुतरां क्षयं
,, ,, (ठ) ,,	२ ,,	सचिता	सूचिता
,, ,,	४० श्लोके	मशेषाणानणीयसाम्	मशेषाणामणीयसाम्
,, ,,	४२ ,,	र्म्मुन्नुभिः ॥	र्म्मुमुक्षुभिः ॥
,, ,,	४३ ,,	सत्तादयो	सत्त्वादयो
४८ ,,	४९ ,,	सृस्टमेव	सृष्टमेव
,, ,,	६० ,,	पुमानिड्यो	पुमानीड्यो
,, ,,	६२ ,,	रुद्रैः	रुद्रैः
४९ ,,	७२ ,,	तेजस्याप्याययस्व	तेजसाप्याययस्व
,, ,,	७२ टीकायां	अप्याययस्व	आप्याययस्व
,, ,,	(ब) पादटीकायां	उपबृहणम्	उपबृंहणम्
५० ,,	८१ श्लोके	इत्युक्त्वा	इत्युक्ता
,, ,,	८२ ,,	क्षिराब्धि	क्षीराब्धि
,, ,,	८५ ,,	बभुवु	बभूबु
,, ,,	८९ ,,	मैत्रय	मैत्रेय
,, ,,	८६ टीकायां	मंख	मुंख
५१ ,,	९६ श्लोके	त्वं	तं
,, ,,	९७ ,,	श्वेताम्बधरः	श्वेताम्बरधरः
५१ ,, (क्ष) पादटीकायाः	२ पङ्क्तौ	मनष्का	मनस्का
,, ,, (ख) ,,	,,	श्चेदथ···	श्चेदर्थ···
,, ,, ,,	,,	४ पङ्क्तौ ···पादनाथं मत्वन्वीय···	पादनार्थं मत्वर्थीय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे		अशुद्धम्	शुद्धम्
५२ पृष्ठे	११० श्लोके	चमु	चमू
,,	११८ टीकायां	द्वादशक्षरादि···दायनी	द्वादशाक्षरादि···दायिनी
५५ ,,	सर्गसंक्षेपे	पुनं	पुनः
,,	२ श्लोके	धातृविधातरौ	धातृविधातारौ
,,	१० ,,	सूतत्रयम्	सुतत्रयम्
,,	४ टीकायाः २ पङ्क्तौ	यज्ञे	जज्ञे
५६ ,,	१५ श्लोके	पावमानश्च	पवमानश्च
,,	१८ टीकायाः १ पङ्क्तौ	अनघयो	अनग्नयो
५८ ,,	(ञ) पादटीकायाः २ पङ्क्तौ	—रनभ्युपम	रनभ्युपगम
५९ ,,	२६ श्लोके	प्रमावं	प्रभावं
,,	(ण) पादटीकायाः २ पङ्क्तौ	—भिवादनदस्य	—भिवादनस्य
,,	३० टीकायाः १ पङ्क्तौ	पू भेव	पूर्वमेव
६० ,,	३९ श्लोके	विवक्षुस्त	विवक्षुस्त्व
६१ ,,	५१ ,,	यथावच्छ्रुतु	यथावच्छ्रोतु
६२ ,,	१ ,,	तदशषेण	तदशेषेण
,,	५ टीकायाः २ पङ्क्तौ	नित्यमसि च	नित्यमसिच्
६३ ,,	१९ श्लोके	कालक्रीड़नकानां	कालः क्रीड़नकानां
,,	,,	नाशयात्मनो	नाशायात्मनो
६३ ,,	२० श्लोके	सा	मा
६४ ,,	३६ ,,	वित्तापाम्बुप	वित्तपाम्बुप
,, ,,	४० ,,	परशर	पराशर
६५ ,,	४२ ,,	पिरतोषितः।	परितोषितः।
,, ,,	४३ टीकायां	यस्मदाहितं	यस्मादाहितं
,, ,,	५३ श्लोके	नतोऽस्ति	नतोऽस्मि
६६ ,,	५५ ,,	बुध्या	बुद्धया
६८ ,,	८३ टीकायामन्तिमपङ्क्तौ	त्ययेति	त्वयेति
६९ ,,	९१ श्लोके	बृहस्पते	बृहस्पतेः
,, ,,	१०० टीकायाः १ पङ्क्तौ	स्थानर्म	स्थानम्
७० ,,	२२-पाठान्तरमध्ये	वाष्पाकुविलोचनाम	वाष्पाकुलविलोचनाम्
,, ,,	३ टीकायाः २ पङ्क्तौ	मनं षष्ठमन्वरतपतिं	मनुं षष्ठमन्वन्तरपतिं
७१ ,,	१५ टीकायां	नाम्ना	साम्ना
	७१ पृष्ठे एकादशश्लोकस्थं (क) चिह्नं सप्तमश्लोके ज्ञेयम्		
७२ ,,	··· ३१ श्लोके	चैरी···	चौरी···

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे		अशुद्धम्	शुद्धम्
७२ पृष्ठे	३२ श्लोके	वित्तापहरिणाम्	वित्तापहारिणाम्
७३ ,,	३६ ,,	पपाग	पपात
,, ,,	४४ ,,	दक्षिणो	दक्षिणे
,, ,,	५० टीकायाः ३ पङ्क्तौ	मत्स्याक्तेः	मत्स्योक्तेः
,, ,,	५२ श्लोके	सुतमागधौ	सूत-मागधौ
७४ ,,	५६ ,,	तछ्रुत्वा	तच्छ्रुत्वा
,, ,,	६२ श्लोके	सूतेनोक्तन्	सूतेनोक्तान्
,, ,,	६५ ,,	प्रनष्टाषु	प्रनष्टासु
७५ ,,	६६ ,,	तत्वासाद्	तत्त्रासाद्
,, ,,	७३ ,,	पुण्यप्रदौ	पुण्यप्रदो
,, ,,	७५ ,,	त्वं हत्वा	त्वां हत्वा
,, ,,	(ण) पादटीकायाम्	ओरत्र	उत्तरत्र
,, ,,	(त) ,,	गावं	गावः
,, ,,	,,	विवर्जिताः	विवर्द्धिताः
,, ,,	८५ ,,	प्रनष्टास्वौषधीषु	प्रणष्टास्वोषधीषु
,, ,,	९० टीकायाम्	उरुगाणां	उरगाणां
७७ ,,	९३ श्लोके	फलदायी	फलदायि
,, ,,	टीकावामभागे ८ पङ्क्तौ	मस्था	मस्थ्ना
,, ,,	३ श्लोके	हरिर्धानान्	हविर्धानान्
,, ,,	४ ,,	कृशास्तस्य	कुशास्तस्य
७८ ,,	११ ,,	पीयते	प्रीतये
,, ,,	१४ ,,	आराध्यं	आराध्य

प्रथमांशस्य चतुर्दशाध्यायगतपञ्चदशश्लोकस्थं (ग) चिह्नं चतुर्दशश्लोके ज्ञातव्यम्।

८० ,,	३६ टीकायाम्	प्रकृते	प्रकृतेः
८१ ,,	४६ श्लोके	प्राणिपेतुः	प्रणिपेतुः
,, ,,	४७ ,,	··मीप्सातो	··मीप्सितो
,, ,,	सर्गसंक्षेपे	म्यैथुन	मैथुन
,, ,,	२ श्लोके	वातु	वातुं
,, ,,	,,	चेष्टितं	चेष्टितुं
,, ,,			
,, ,,	पञ्चदशाध्यायस्य १-३ टीकायाः		
	प्रथमपङ्क्तौ	नादात्	नारदात्
८२ ,,	५ श्लोके	उपगम्यब्रवी	उपगम्याब्रवी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे		अशुद्धम्	शुद्धम्
८२ पृष्ठे	८ श्लोके	नान्मैषा	नाम्नैषा
,, ,,	८ टीकायां १ पङ्क्तौ	नान्ना	नाम्ना
,, ,,	१४ श्लोके	त्वं	तं
अत्रैव पृष्ठे १५ श्लोकस्थं (घ) चिह्नं १२ श्लोके ज्ञातव्यम् ।			
८३ ,,	२० श्लोके	शुश्रोणी	सुश्रोणी
,, ,,	२५ ,,	करिस्यामि	करिष्यामि
८४ ,,	३० टीकायां	मागाता	मागता
८५ ,,	४६ श्लोके	निर्भत्सिता	निर्भर्त्सिता
८६ ,,	५२ टीकायां	प्रभाह	प्रभाव
८६ ,,	५५ श्लोके	विष्णुपारापारः	विष्णुरपारपारः
,, ,,	टीकाया दक्षिणांशे २६ पङ्क्तौ	स्वाध्यकामः	स्वास्थ्यकामः
,, ,,	,, २८ ,,	ततुक्तं	तदुक्तं
८७ ,,	६१ श्लोके	भत्तरि	भर्त्तरि
,, ,,	६१ ६२ टीकायां	विष्णं	विष्णुं
८८ ,,	७८ श्लोके	गप्धर्व्वा	गन्धर्व्वा
,, ,,	७० टीकायां	पतिप्रता	पतिव्रता
,, ,,	७७ ,,	नयेन	नयने

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एष मे संशयो ब्रह्मन् सुमहान् हृदि वर्त्तते ।
यद् दौहित्रः स सोमस्य पुनः श्वशुरतां गतः ॥८१॥

पराशर उवाच ।

उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु सत्तम ।
ऋषयोऽत्र न मुह्यन्ति ये चात्र दिव्यचक्षुषः ॥८२॥
युगे युगे भवन्त्येते दक्षाद्या मुनिसत्तमाः ।
पुनश्चैवं निरुध्यन्ते विद्वांस्तत्र न मुह्यति ॥८३॥
कानिष्ठ्यं ज्यैष्ठ्यमप्येषां पूर्व्वं नाभूद् द्विजोत्तम ।
तप एव गरीयोऽभूत् प्रभावश्चैव कारणम् ॥८४॥

मैत्रेय उवाच ।

देवानां दानवानाञ्च गन्धर्वोरगरक्षसाम् ।
उत्पत्तिं विस्तरेणेह मम ब्रह्मन् प्रकीर्त्तय ॥८५॥

पराशर उवाच ।

प्रजाः सृजेति व्यादिष्टः पूर्व्वं दक्षः स्वयम्भुवा ।
यथा ससर्ज भूतानि तथा शृणु महामते ॥८६॥
मानसानि तु भूतानि पूर्व्वं दक्षोऽसृजत् तदा ।
देवानृषीन् सगन्धर्व्वान् असुरान् पन्नगांस्तथा ॥८७॥
यदास्य द्विज मानस्यो नाभ्यवर्द्धन्त ताः प्रजाः ।
ततः सञ्चिन्त्य स पुनः सृष्टिहेतोः प्रजापतिः ॥८८॥
मैथुनेनैव धर्मेण सिसृक्षुर्विविधाः प्रजाः ।
असिक्नीमावहत् (ण) कन्यां वीरणस्य प्रजापतेः ॥८९॥
सुतां सुतपसा युक्तां महतीं लोकधारिणीम् ।
अथ पुत्रसहस्राणि वैरण्यां (त) पञ्च वीर्य्यवान् ॥९०॥
असिक्न्यां जनयामास सर्गहेतोः प्रजापतिः ।
तान् दृष्ट्वा नारदो विप्रः संविवर्द्धयिषून् प्रजाः ।
सङ्गम्य प्रियसंवादो देवर्षिरिदमब्रवीत् ॥९१॥

नारद उवाच ।

हे हर्य्यश्वा महावीर्य्याः प्रजा यूयं करिष्यथ ।
ईदृशो लक्ष्यते यत्नो भवतां श्रूयतामिदम् ॥९२॥
बालिशा बत यूयं वै नास्या जानीथ वै भुवः ।
अन्तरूर्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः ॥९३॥

सोमदुहितुर्मारिषायाः पुत्रत्वात् सोमस्य दौहित्रः । पुनश्च सप्तविंशतिमिन्दवे ददावित्युक्तेः श्वशुरताञ्च गत इति यत्, एषोऽन्यः संशय इत्यर्थः । दौहित्रस्येति पाठे दक्षकन्यायामनसूयायाम् अत्रेः सोमस्योत्पत्तेर्दक्षस्य दौहित्रः । सोमस्य पुनर्दक्षः श्वशुरतां कथं गतः ? इति ॥८१॥

नित्यौ प्रवाहरूपेणाविच्छिन्नौ ॥८२॥

दक्षाद्या इत्यादिशब्देन सोमो गृह्यते । एते युगे युगे भवन्ति, सम्प्रति बुद्धवद् भवन्ति । निरुध्यन्ते सुषुप्तवल् लीयन्त इत्यर्थः । युगे युगे इति युज्यन्तेऽस्मिन् अहा एकं स्थानं यान्तीति युगमत्र कल्पमन्वन्तरादिः कालः । स्वायम्भुवमन्वन्तरे जातस्य दक्षस्य पुनश्चाक्षुषमन्वन्तरे प्रचेतोभ्योजन्मप्रसिद्धेः । एवमेवात्रेः सकाशाज्जातस्य सोमस्य पुनः क्षीराब्धेः सकाशाज्जन्मप्रसिद्धेर्न विरोधः ॥८३॥

न चात्यन्तकनिष्ठे श्वशुरे पूज्यपूजाव्यतिक्रमाशङ्क्येत्याह— कानिष्ठ्यमिति । गरीयो गुरुतरं तपश्च प्रभावश्च ज्यैष्ठ्यकारणमभूत्, न तु वयोमात्रम् इत्यर्थः ॥८४॥

दक्षसृष्टिं विस्तरेण जिज्ञासुः पृच्छति—देवानामिति । इह अस्मिन् प्राचेतसे दक्षे या देवादीनामुत्पत्तिस्तां विस्तरेण प्रकीर्त्तयेत्यर्थः ॥८५।९०॥

प्रजाः सम्यग् विवर्द्धयितुमिच्छून् तान् दृष्ट्वा अभिसंगम्य अब्रवीत् ॥९१।९२॥

बालिशा वतेत्यादेरयं वास्तवोऽर्थः । बतेति खेदे । तेषां तत्त्वविमर्षं विना प्रजासृष्ट्यादिक्लेशप्राप्तेः । अहो ! यूयं बालिशाः अज्ञाः । यतोऽस्या भुवः संसाराङ्कुरप्रसवक्षेत्रस्य लिङ्गशरीरस्याधः उपक्रमम्, ऊर्द्ध्वमवसानम्, अन्तः मध्यञ्च न जानीथ । अतो मोक्षमार्गम् अज्ञात्वा कथं

(ण) असिक्नीं तदाख्यां कन्याम्, आवहत् पत्नीत्वेन जग्राह ।

(त) वैरण्यां वीरणस्य प्रजापतेः कन्यायाम्, वीरणशब्दात् ष्णप्रत्ययेनेदं सिद्धम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऊर्द्ध्वं तिर्य्यगधश्चैव यदा प्रतिहता गतिः ।
तदा कस्माद् भुवो नान्तं सर्व्वं द्रक्ष्यथ बालिशाः ।९४

पराशर उवाच ।

ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥९५॥
हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः ।
वैरण्यामथ पुत्राणां सहस्रमसृजत् प्रभुः ॥९६॥
विवर्द्धयिषवस्ते तु शवलाश्वाः प्रजाः पुनः ।
पूर्व्वोक्तं वचनं ब्रह्मन् नारदेन प्रचोदिताः ॥९७॥
अन्योऽन्यमूचुस्ते सर्व्वे सम्यगाह महामुनिः ।
भातॄणां पदवी चैव गन्तव्या नात्र संशयः ॥९८॥
ज्ञात्वा प्रमाणं पृथ्व्याश्च प्रजाः स्रक्ष्यामहे ततः ।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम् ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥९९॥
ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज ।
प्रयातो नश्यति तथा तन्न कार्य्यं विजानता ॥१००॥

तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः ।
क्रोधं चक्रे महाभागो नारदं स शशाप च ॥१०१॥
सर्गकामस्ततो विद्वान् स मैत्रेय प्रजापतिः ।
षष्टिं दक्षोऽसृजत् कन्या वैरण्यामिति नः श्रुतम् ॥१०२॥
ददौ स दश धर्म्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमिने ॥१०३॥
द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा ।
द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु ॥१०४॥
अरुन्धती वसुर्य्यामी लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च ता दश ॥१०५॥
धर्म्मपत्न्यो दश त्वेतास्तदपत्यानि मे शृणु ।
विश्वेदेवास्तु विश्वायाः साध्या साध्यान् व्यजायत (थ) ॥१०६॥
मरुत्वत्या मरुत्वन्तो वसोस्तु वसवः स्मृताः ॥१०७॥

प्रजाः स्रक्ष्यथ । व्यर्थं संसारोपपादकं प्रजासर्गं किमिति करिष्यथ ॥९३॥

यूयञ्च विशुद्धबुद्धित्वात् तत्त्वज्ञानाधिकारिण एवेत्याह—ऊर्द्ध्वमिति । ऊर्द्ध्वं तिर्यगधश्च सर्वतस्तत्त्वविचारे यदा इदानीं नृजन्मनि युष्माकं गतिर्बुद्धिरप्रतिहता वर्त्तते, तदा कस्माद् भुवो लिङ्गशरीरस्यान्तं न द्रक्ष्यथ ? लिङ्गभङ्ग-पर्यन्ते तत्त्वज्ञाने किमिति यत्नं न करिष्यथेत्यर्थः । तदुक्तं षष्ठस्कन्धे हर्यश्वैर्नारदोक्तिविवरणे,—"भूः क्षेत्रं बीजसंज्ञं यद् अनादिनिजबन्धनम् । अदृष्ट्वा तस्य निर्वाणं किम-सत्कर्मभिर्भवेत्" ? इत्यादि ॥९४॥

सर्वतो दिशं प्रयाताः असङ्गत्तया सर्वासु दिक्षु स्वैरं व्यचरन् । ततश्च मुक्तत्वात् नाद्यापि निवर्त्तन्ते ॥९५॥

नष्टेषु यत्र क्वापि गतेषु ॥९६॥

पूर्वोक्तं 'बालिशा वते'त्यादिवचनं प्रचोदिताः श्राविताः सन्त ऊचुः । भ्रातॄणां ज्येष्ठानां गुरूणां पदवी मोक्षमार्गः ।

पृथ्व्याः प्रमाणं लिङ्गशरीरावसानं ज्ञात्वा, ततः पञ्च पित्राज्ञापालनेन संग्रहार्थं प्रजाः स्रक्ष्यामह इति वास्तवोऽ कथारूपोऽर्थः स्पष्ट एव ॥९९॥

तदभिप्रायेणैवाह—ततः प्रभृतीति । नश्यति अद याति ॥१००॥

नारदशापश्च भागवतोक्तः "तस्माल्लोकेषु ते मूढ! भवेद् भवतः पदम्" इति ॥१०१॥

कन्यानां वंशान् वक्तुमाह—ददावित्यादिना । 'स विंशति' इति द्वितीयालोप आर्षः ॥१०३।१०४॥

पूर्वोक्ताः श्राद्धाद्यास्त्रयोदश धर्मस्य पत्न्यः स्वायम्भुव दक्षस्य कन्याः । एतास्त्वरुन्धत्याद्या दश प्राचेतस दक्षस्येत्यविरोधः ॥१०५।१०७॥

(थ) व्यजायतेत्यत्र जनिरन्तर्भूतणिजर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भानोस्तु भानवः पुत्रा मुहूर्त्तायां मुहूर्त्तजाः ।
लम्बायाश्चैव घोषोऽथ नागवीथी तु यामिजा ॥१०८
पृथिवीविषयं सर्व्वमरुन्धत्यां व्यजायत ।
संकल्पायान्तु सर्व्वात्मा जज्ञे संकल्प एव तु ॥१०९॥
ये त्वनेकवसुप्राणा देवा ज्योतिःपुरोगमाः ।
वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम् ॥११०
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभावश्च वसवो नामभिः स्मृताः ॥१११॥
आपस्य पुत्रो वैतण्ड्यः श्रमः श्रान्तो ध्वनिस्तथा ।
ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः ॥११२॥
सोमस्य भगवान् वर्च्चा वर्च्चस्वी येन जायते ।
धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥११३॥
मनोहरायाः शिशिरः प्राणोऽथ वरुणस्तथा ।
अनिलस्य शिवा भार्य्या तस्याः पुत्रो मनोजवः ॥११४
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य च ।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत ॥११५॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः ।
अपत्यं कृत्तिकानान्तु कार्त्तिकेय इति स्मृतः ॥११६॥
प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाथ देवलम् ।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ ॥११७॥
बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत ॥११८॥
प्रभासस्य तु सा भार्य्या वसूनामष्टमस्य च ।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे प्रजापतिः ॥११९॥
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः (द) ।
भूषणानाञ्च सर्वेषां कर्त्ता शिल्पवतां वरः ॥१२०॥
यः सर्व्वेषां विमानानि देवतानां चकार ह ।
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ॥१२१
तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्बध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ।
त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महायशाः ॥१२२॥

मुहूर्त्तजास्तत्तन्मुहूर्त्ताभिमानिनो देवाः, घोषस्तदभिमानी देवः, नागवीथी देवयानोत्तरवीथ्यभिमानिनी देवता ॥१०८॥

पृथिव्येव विषयः स्थानं यस्य चराचरप्राणिजातस्य तत् सर्वम् । सर्वात्मा सर्ववस्तुविषयः ॥१०९॥

वसूनामष्टानां नामपूर्वकं वंशान् वक्तुमाह—'विश्वरूपो महायशा' इत्यन्तेन । अनेकं नानाविधं वसु तेजस्तदेव प्राणो बलं येषां ते अनेकवसुप्राणा इति वसूनाम-निरुक्त्यर्थमुक्तम् । ज्योतिःपुरोगमा अग्निमुख्याः, "वसूनां पावकश्चास्मि" इति स्मृतेः ॥११०।१११॥

आपस्य वैतण्ड्यादयश्चत्वारः पुत्राः । लोकप्रकालनस्तत्-संहर्त्ता ॥११२॥

येन वर्चसा वर्चस्वी कान्तिमान् पुरुषो जायेत सः । धरस्य भार्या मनोहरा, पुत्राश्च द्रविणादयः पञ्च । हुतं हव्यं वहतीति तथा ॥११३।११४॥

शरो मुञ्जस्तस्य स्तम्बे ॥११५॥

पृष्ठजाः अनुजाः कुमारव्यूहरूपाः । तदुक्तं शल्यपर्वणि-"ततोऽभवच्चतुर्मूर्त्तिः क्षणेन भगवान् गुहः" इति । कुमार एव कार्त्तिकेय इति स्मृतेः ॥११६।११७॥

बृहस्पतेर्भगिनी प्रभासस्य भार्या । असक्ता सङ्गवर्जिता ॥११८॥

तस्यां विश्वकर्मा ॥११८।१२०।१२१॥

अजैकपादादयश्चत्वारो जज्ञिरे ॥१२२॥

(द) 'तक्षा तु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतट्' इति कोषाद् वर्द्धकिः तक्षा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥१२३॥
मृगव्याधश्च शर्व्वश्च कपाली च महामुने ।
एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ॥१२४॥
शतं त्वेवं समाख्यातं रुद्राणाममितौजसाम् ।
अदितिर्दितिर्दनुः काला अरिष्टा सुरसा तथा ॥१२५
सुरभिर्विनता चैव तम्रा क्रोधवशा इरा ।
कद्रुर्मुनिश्च धर्मज्ञ तदपत्यानि मे शृणु ॥१२६॥
पूर्व्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः ।
तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे ॥१२७॥
उपस्थितेऽतियशसश्चाक्षुषस्यान्तरे मनोः ।
समवायीकृताः सर्व्वे समागम्य परस्परम् ॥१२८॥
आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै ।
मन्वन्तरे प्रसूयामस्तन्नः(घ) श्रेयो भविष्यति ॥१
एवमुक्त्वा तु ते सर्व्वे चक्षुषस्यान्तरे मनोः ।
मारीचात् कश्यपाज्जातास्ते दित्या दक्षकन्यया ॥
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च ।
अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च ॥१३
विवस्वान् सविता चैव मित्रो वरुण एव च ।
अंशो भगश्चादितिजा आदित्या द्वादश स्मृताः ॥
चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः ।
वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः ॥१
याः सप्तविंशतिः प्रोक्ताः सोमपत्न्योऽथ सुव्रताः ।
सर्व्वा नक्षत्रयोगिन्यस्तन्नाम्न्यश्चैव ताः स्मृताः ॥१
तासामपत्यान्यभवन् दीप्तान्यमिततेजसा ।
अरिष्टनेमिपत्नीनामपत्यानीह षोड़श ॥१३५॥

त्वष्टुरनुजस्य रुद्रस्यैकादशधा विभागमाह—'हरश्चे'ति द्वाभ्याम् ॥१२३॥

एषामेवैकादशानां प्रत्येकं शतं भेदानाह—'शतं त्वेव'मिति ॥१२४॥

यद्वा एतद्विभूतिरूपाणामानन्त्यमुच्यते, शतशब्दस्य अपरिमितवचनत्वात् । असंख्याताः सहस्राणि ये रुद्राः "अधिभूम्याम्' इति श्रुतेश्च । तदेवं धर्मभार्याणां वंशा उक्ताः । इदानीं कश्यपाय त्रयोदशेत्युक्तानां वंशान् वक्तुमाह—'अदिति'रित्यादिना ॥१२५।१२६॥

तत्र तुषिता एवादितेः पुत्रा जाता इति कथापूर्वकमाह । पूर्वमन्वन्तरे चाक्षुषे ये तुषिता नाम देवा आसन्, ते चाक्षुषस्य मनोरन्तरे वर्त्तमाने वैवस्वतमन्वन्तरे चोपस्थिते भाविनि सति परस्परं समागम्य अन्योऽन्यं पार्श्वं गत्वा समवायीकृता मिलिताः सन्तोऽन्योन्यमूचुरिति द्वयोरन्वयः ॥१२७॥

अतियशसः प्रख्यातवीर्याः ॥१२८॥

किमूचुस्तदाह—'आगच्छते'ति । वैवस्वतमन्वन्तरं प्रसूयाम प्रसूयेमहि । किमर्थमित्यत्राहुः—तत् ततः पुत्रा देवाधिकारप्राप्त्या नः श्रेयो भद्रं भविष्यतीति ॥१२९॥

चाक्षुषस्य मनोरन्तरे एवमुक्त्वा वैवस्वतमन्वन्तरे अदिति निमित्तभूतया कश्यपाज्जाता इत्यर्थः ॥१३०।१३२॥

अतस्तुषिता एव द्वादशादित्याः स्मृता इत्युपसंहरति ॥१

एवं तावदष्टौ वसव एकादश रुद्रा द्वादशादित्या इत्यादि श्रुतिक्रमेणादित्यानामुपस्थानाददित्या वंश उक्तः । इदं अदितिरिति कश्यपभार्योद्देशानुसारेण दित्या वंशं क्र प्राप्तमपि प्रह्लादचरितादि बहुविस्तरत्वेन पश्चाद् वक्ष आदौ तावदल्पत्वादन्यासां दक्षकन्यानां वंशानाह 'याः सप्तविंशतिः प्रोक्ता' इत्यादि—सार्द्धपञ्चभिः ॥१३४॥

तासामतितेजसा दीप्तिमन्त्यपत्यान्यभवन् । पाठान्त अमिततेजसो हेतोर्दीप्तान्यभवन्नित्यर्थः । चतसृणा नेमय इत्युक्तानां वंशमाह—'अरिष्टनेमी'ति ॥१३५॥

(घ) प्रसूयाम इत्यत्र परस्मैपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ।
प्रत्यङ्गिरसजाः श्रेष्ठा ऋचो ब्रह्मर्षिसत्कृताः ॥१३६
कृशाश्वस्य तु देवर्षे र्देवप्रहरणाः स्मृताः ।
एते युगसहस्रान्ते जायन्ते पुनरेव हि ॥१३७॥
सर्व्वे देवगणास्तात त्रयस्त्रिंशत् तु छन्दजाः ।
तेषामपीह सततं निरोधोत्पत्तिरुच्यते ॥१३८॥
यथा सूर्य्यस्य मैत्रेय उदयास्तमयाविह ।
एवं देवनिकायास्ते संभवन्ति युगे युगे ॥१३९॥
दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम् ।
हिरण्यकशिपुश्चैव हिरण्याक्षश्च दुर्जयः ॥१४०॥
सिंहिका चाभवत् कन्या विप्रचित्तेः परिग्रहः ।
हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः ॥१४१॥
अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव बुद्धिमान् ।
संह्लादश्च महावीर्य्या दैत्यवंशविवर्द्धनाः ॥१४२॥
तेषां मध्ये महाभाग सर्व्वत्र समदृग् वशी ।
प्रह्लादः परमां भक्तिं य उवाह जनार्दने ॥१४३॥
दैत्येन्द्रदीपितो वह्निः सर्व्वाङ्गोपचितो द्विज ।
न ददाह च यं विप्र वासुदेवे हृदि स्थिते ॥१४४॥
महार्णवान्तः सलिले स्थितस्य चलतो मही ।
चचाल सकला यस्य पाशबद्धस्य धीमतः ॥१४५॥
न भिन्नं विविधैः शस्त्रैर्यस्य दैत्येन्द्रपातितैः ।
शरीरमद्रिकठिनं सर्व्वत्राच्युतचेतसः ॥१४६॥
विषानलोज्ज्वलमुखा यस्य दैत्यप्रचोदिताः ।
नान्ताय सर्पपतयो बभूवुरुतेजसः ॥१४७॥
शैलैराक्रान्तदेहोऽपि यः स्मरन् पुरुषोत्तमम् ।
तत्याज नात्मनः प्राणान् विष्णुस्मरणदंशितः ॥१४८
पतन्तमुच्चादवनिर्यमुपेत्य महामतिम् ।
दधार दैत्यपतिना क्षिप्तं स्वर्गनिवासिना ॥१४९॥
यस्य संशोषको वायुर्देहे दैत्येन्द्रयोजितः ।
अवाप संक्षयं सद्यश्चित्तस्थे मधुसूदने ॥१५०॥
विषाणभङ्गमुन्मत्ता मदहानिञ्च दिग्गजाः ।
यस्य वक्षःस्थले प्राप्ता दैत्येन्द्रपरिणामिताः ॥१५१॥

'द्वे चैव बहुपुत्राय' इत्युक्तयोर्वंशमाह—'बहुपुत्रस्ये'ति। चतस्रो विद्युतस्तु—"वाताय कपिला विद्युदातपायातिलोहिता। पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्" इति ज्योतिःशास्त्रे प्रसिद्धाः। 'द्वे चैवाङ्गिरस' इत्युक्तयोर्वंशमाह—'प्रत्यङ्गिरसजा' इति। अङ्गिरसे प्रत्यागते प्रत्यङ्गिरसे ताभ्यां जाताः प्रत्यङ्गिरसाख्या ऋचः "यान् कल्पयन्ति" इत्यादि पञ्चत्रिंशन्मन्त्राभिमानिदेवताः ॥१३६॥

'द्वे कृशाश्वाये'त्युक्तयोर्वंशमाह—'कृशाश्वस्ये'ति। देवप्रहरणाः देवशस्त्रदेवताः ॥१३७॥

त्रयस्त्रिंशत्—अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः। प्रजापतिश्च वषट्कारश्चेति श्रुत्युक्ताः। छन्दतः स्वेच्छातो जायन्त इति छन्दजाः। निरोधसहिता उत्पत्तिर्निरोधोत्पत्तिः ॥१३८॥

उत्पत्तिनिरोधयोरिच्छा कथं स्यादित्यत आह—'यथा सूर्यस्ये'ति। युगे युगे प्रतिकल्पं मन्वन्तरादिषु ॥१३९॥

दितेर्वंशमाह—'दित्या' इत्यादिना यावदेकविंशाध्याये दनोर्वंशोक्तिः ॥१४०॥

प्रतिग्रहो भार्या ॥१४१॥

"प्रह्लादवन्नृसिंहैकभक्तिलाभाय देहिनाम्। आवहन् श्रवणौत्सुक्यं तत्प्रभावमसूचयत्"। तेषां मध्ये इत्यादिना यावत्समाप्ति ॥१४७॥

विष्णोः स्मरणेन दंशितः सन्नद्धः ॥१४८-१५०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्य चोत्पादिता कृत्या(न) दैत्यराजपुरहितैः ।
बभूव नान्ताय पुरा गोविन्दासक्तचेतसः ॥१५२॥
शम्बरस्य (प) च मायानां सहस्रमतिमायिनः ।
यस्मिन् प्रयुक्तं चक्रेण कृष्णस्य वितथीकृतम् ॥१५३
दैत्येन्द्रसूदोपहृतं यस्तु हालाहलं विषम् ।
जारयामास (फ) मनिमानविकारममत्सरी ॥१५४॥
समचेता जगत्यस्मिन् यः सर्वेष्वेव जन्तुषु ।
यथात्मनि तथान्यत्र परं मैत्रगुणान्वितः ॥१५५॥
धर्म्मात्मा सत्यशौचादिगुणानामाकरस्तथा ।
उपमानमशेषाणां साधूनां यः सदाभवत् ॥१५६॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे पञ्चदशोऽध्यायः ।

दैत्येन्द्रेण परिणामिताः दन्तैः प्रहर्तुं गजशिक्षाक्रमेणोद्योजिताः ॥१५१।१५३॥
दैत्येन्द्रस्य सूदैः सूपकारैः उपहृतं दत्तं हालाहलम् । "हलाहला नाम नदी हिमवत्यतिदारुणा । यत्तु तत्तीरसम्भूतं विषं हालाहलं स्मृतम्" इति । अविकारं रोमाञ्चस्वेदवक्त्रशोषादिविकारशून्यं यथा भवत्येवं जारयामास ॥१५४।१५६॥

(न) कृत्या आभिचारिकी क्रिया ।
(प) शम्बरस्य इन्द्रजालप्रयोक्तुः तदाख्यासुरस्य ।
(फ) जारयामास जीर्णतां लम्भयामास । तेन तस्य न कोऽप्यपकारः समजनिष्टेति भावः ।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां प्रथमांशे पञ्चदशोऽध्यायः ।

षोड़शोऽध्यायः ।

[मैत्रेयस्य प्रह्लादचरितविषयकः प्रश्नः ।]

मैत्रेय उवाच ।

कथितो भवता वंशो मानवानां महामुने ।
कारणञ्चास्य जगतो विष्णुरेव सनातनः ॥१॥
यच्चैतद् भगवानाह प्रह्लादं दैत्यसत्तमम् ।
ददाह नाग्निर्नास्त्रैश्च क्षुण्णस्तत्याज जीवितम् ॥२॥
जगाम वसुधा क्षोभं प्रह्लादे सलिले स्थिते ।
बन्धबद्धे विचलति विक्षिप्ताङ्गैः समाहता ॥३॥
शैलैराक्रान्तदेहोऽपि न ममार च यः पुरा ।
त्वयैवातीव माहात्म्यं कथितं यस्य धीमतः ॥४॥

षोड़शोऽध्यायः ।

उक्तानुवादपूर्वकं (ब) प्रह्लादचरितं पृच्छति—'कथित' इत्यादिना । मानवानां उत्तानपादध्रुवादीनाम् ॥१॥

ददाह यन्नाग्निः (भ) । अस्त्रैः क्षुण्णः प्रहृतोऽपि ॥२॥

(ब) उक्तस्य कथितपूर्वस्य वस्तुनः अनुवादः अनुकथनमेवं पूर्वं यत्र तद् यथा स्यादित्यर्थः ।

(भ) अग्निः प्रह्लादं न ददाह इत्येतद् यद्भगवानाहेत्यन्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्य प्रभावमतुलं विष्णोर्भक्तिमतो मुने ।
श्रोतुमिच्छामि यस्यैतच्चरितं दीप्ततेजसः ॥५॥

किं निमित्तमसौ शस्त्रैर्विक्षतो दितिजैर्मुने ।
किमर्थञ्चाब्धिसलिले निक्षिप्तो धर्म्मतत्परः (क) ॥६॥

आक्रान्तः पर्व्वतैः कस्मात् कस्माद्दष्टो महोरगैः ।
क्षिप्तः किमद्रिशिखरात् किं वा पावकसञ्चये (ख) ॥७

दिग्दन्तिनां दन्तभूमिं स च कस्मान्निरूपितः । (ग)
संशोषकोऽनिलश्चास्य प्रयुक्तः किं महासुरैः ॥८॥

कृत्याञ्च दैत्यगुरवो (घ) युयुजुस्तत्र किं मुने ।
शम्बरश्चापि मायानां सहस्रं किं प्रयुक्तवान् ॥९॥

हालाहलं विषमहो दैत्यसूदैर्महात्मनः ।
कस्माद् दत्तं विनाशाय यद् जीर्णं तेन धीमता ॥१०

एतत् सर्व्वं महाभाग प्रह्लादस्य महात्मनः ।
चरितं श्रोतुमिच्छामि महामाहात्म्यसूचकम् ॥११॥

न हि कौतूहलं तत्र यद् दैत्यैर्न हतो हि सः ।
अनन्यमनसो विष्णौ कः शक्नोति निपातने ॥१२॥

तस्मिन् धर्म्मपरे नित्यं केशवाराधानोद्यते ।
स्ववंशप्रभवैर्दैत्यैः कर्त्तुं द्वेषोऽतिदुष्करः ॥१३॥

धर्म्मात्मनि महाभागे विष्णुभक्ते विमत्सरे ।
दैतेयैः प्रहृतं यस्मात् तन्ममाख्यातुमर्हसि ॥१४॥

प्रहरन्ति महात्मानो विपक्षा अपि नेदृशे ।
गुणैः समन्विते साधौ किं पुनर्यः स्वपक्षजः ॥१५॥

तदेतत् कथ्यतां सर्व्वं विस्तरान्मुनिसत्तम ।
दैत्येश्वरस्य चरितं श्रोतुमिच्छाम्यशेषतः ॥१६॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे षोड़शोऽध्यायः ।

यत्र यस्मिन् प्रह्लादे बन्धैर्बद्धे विचलति सति तस्य विक्षिप्तैरङ्गैः समाहता सती वसुधा क्षोभं जगाम । विक्षिप्ताङ्गः समाहिता इति पाठे तु उत्तरेणान्वयः । वन्धवद्धो विचरतीति पाठे पृथग् एतद् वाक्यम् ॥३॥

शिष्टाः प्रश्नाः स्पष्टार्थाः ॥१६॥

(क) 'धर्मतत्पर' इति—तस्याधर्मपरत्वे तेन हेतुना तस्य तथा तथा निग्रहो युक्तः सममविष्यत्, किन्तु तदभावेऽपि कथं तस्य तथा निग्रह इति प्रश्नार्थः ।

(ख) पावकसञ्चये महति वह्नौ किं वा कथं वा क्षिप्त इति सम्बन्धः ।

(ग) दिग्दन्तिनां दिग्गजानाम् । दन्तभूमिं दन्तसन्निकृष्टां भूमिम् । निरूपितः प्रापितः दिग्गजानां दन्ताग्रभूमौ निक्षिप्त इत्यर्थः ।

(घ) दैत्यगुरवः दैत्यपुरोहिताः । कृत्यां आभिचारिकक्रियाम् । युयुजुः प्रयुक्तवन्त इत्यर्थः ।

(ङ) दैत्यसूदैरिति—दैत्यानां सम्बन्धिनः ये सूदाः सूपकारा अन्नपाचकाः तैरित्यर्थः । अथवा दैत्याः सूदाः दैत्यसूदास्तैः । तेषां दैत्यत्वादेव हिरण्यकशिपुवश्यत्वात् तत्कृत्ये प्रवृत्तिरिति भावः ।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाभिधायां वा विष्णुपुराणटीकायां प्रथमांशे षोडशोऽध्यायः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तदशोऽध्यायः ।

[प्रह्लादचरितकथनम्]

पराशर उवाच ।

मैत्रेय श्रूयतां सम्यक् चरितं तस्य धीमतः ।
प्रह्लादस्य सदोदारचरितस्य महात्मनः ॥१॥

दितेः पुत्रो महावीर्य्यो हिरण्यकशिपुः पुरा ।
त्रैलोक्यं वशमानिन्ये ब्रह्मणो वरदर्पितः ॥२॥

इन्द्रत्वमकरोद् दैत्यः स चासीत् सक्ति स्वयम् (क) ।
वायुरग्निरपां नाथः सोमश्चाभून्महासुरः ॥३॥

धनानामधिपः सोऽभूत् स एवासीत् स्वयं यमः ।
यज्ञभागानशेषांस्तु स स्वयं बुभुजेऽसुरः (ख) ॥४॥

देवाः स्वर्गं परित्यज्य तत्त्रासान्मुनिसत्तम ।
विचेरुरवनौ सर्व्वे बिभ्राणा मानुषीं तनुम् ॥५॥

जित्वा त्रिभुवनं सर्व्वं त्रैलोक्यैश्वर्य्यदर्पितः ।
उपगीयमानो गन्धर्वैर्बुभुजे विषयान् प्रियान् ॥६॥

पानासक्तं महात्मानं हिरण्यकशिपुं तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्धगन्धर्वपन्नगाः ॥७॥

अवादयञ्जगुश्चान्ये जयशब्दानथापरे ।
दैत्यराजस्य पुरतश्चक्रुः सिद्धा मुदान्विताः ॥८॥

तत्र प्रनृत्याप्सरसि स्फटिकाभ्रमयेऽसुरः ।
पपौ पानं (ग) मुदा युक्तः प्रासादे सुमनोहरे ॥९॥

तस्य पुत्रो महाभागः प्रह्लादो नाम नामतः ।
पपाठ बालपाठ्यानि गुरुगेहे गतोऽर्भकः ॥१०॥

एकदा तु स धर्म्मात्मा जगाम गुरुणा सह ।
पानासक्तस्य पुरतः पितुर्दैत्यपतेस्तदा (घ) ॥११॥

पादप्रणामावनतं तमुत्थाप्य पिता सुतम् ।
हिरण्यकशिपुः प्राह प्रह्लादममितौजसम् ॥१२॥

सप्तदशोऽध्यायः

भगवद्द्वेष एव तद्भक्तत्वपुत्रद्वेषेऽपि कारणमिति वक्ष्यन् हिरण्यकशिपोर्वृत्तान्तमाह—'दितेः पुत्र' इत्यादिना ॥१॥

"भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो ।" इत्याद्यनेकवरप्रार्थने कृते सति तथैव ब्रह्मणा दत्तैर्वरैर्दर्पितः सन् ॥४॥

तत्त्रासात् हिरण्यकशिपोर्भयात् ॥५।६॥

महात्मानं अद्भुतप्रभावम् ॥७॥

अवादयन् वाद्यादीनि, जगुर्गीतम् ॥८॥

प्रकृष्टं नृत्यं यासां ता अप्सरसो यस्मिन् तस्मिन् प्रासादे स्फटिकाभ्रमये स्फटिकशिलाभिः अभ्रकशिलाभिश्च रचिते पीयत इति पानं मदिरादि ॥९॥

तदेवं तस्य परमैश्वर्यम् उक्त्वापुत्रद्वेषकारणं वक्तुमाह 'तस्य पुत्र' इत्यादिना ॥१०।११॥

(क) स चासीत् सविता स्वयमित्यादिः—सर्वेषां सूर्य्यादीनामधिकारं स एव परिजग्राहेत्यर्थः ।

(ख) 'अशेषान् यज्ञभागान् बुभुज' इत्यनेन देवानां सर्वेषां स्व-स्वयज्ञभागेभ्य एकान्ततः प्रच्युतिर्व्यज्यते ।

(ग) पीयत इति पानमिति कर्मणि अनट्प्रत्ययेन पानं कर्मभूतमित्यर्थः ।

(घ) दैत्यपतेः हिरण्यकशिपोः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हिरण्यकशिपुरुवाच ।

पठ्यतां भवता वत्स ! सारभूतं सुभाषितम् ।
कालेनैतावता यत् ते सदोद्युक्तेन शिक्षितम् (घ)।१३

प्रह्लाद उवाच ।

श्रूयतां तात ! वक्ष्यामि सारभूतं तवाज्ञया ।
समाहितमना भूत्वा यन्मे चेतस्यवस्थितम् (ङ)॥१४॥

अनादिमध्यान्तमजमवृद्धिक्षयमच्युतम् ।
प्रणतोऽस्मि महात्मानं सर्व्वकारणकारणम् ॥१५॥

पराशर उवाच ।

एवं निशम्य दैत्येन्द्रः क्रोधसंरक्तलोचनः ।
विलोक्य बद्गुरुं प्राह स्फुरिताधरपल्लवः (च) ॥१६॥

हिरण्यकशिपुरुवाच ।

ब्रह्मबन्धो ! किमेतत् ते विपक्षस्तुतिसंहितम् ।
असारं ग्राहितो बालो मामवज्ञाय दुर्मते ! ॥१७॥

गुरुरुवाच ।

दैत्येश्वर ! न कोपस्य वशमागन्तुमर्हसि ।
ममोपदेशजनितं नायं वदति ते सुतः ॥१८॥

हिरण्यकशिपुरुवाच ।

अनुशास्तोसि (छ) केनेदृग् वत्स ! प्रह्लाद कथ्यताम् ।
ममोपदिष्टं नेत्येष प्रब्रवीति गुरुस्तव ॥१९॥

प्रह्लाद उवाच ।

शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः ।
तमृते परमात्मानं तात ! कः केन शास्यते (ज)॥२०

हिरण्यकशिपुरुवाच ।

कोऽयं विष्णुः सुदुर्बुद्धे ! यं ब्रवीषि पुनः पुनः ।
जगतामीश्वरस्येह पुरतः प्रसभं मम ॥२१॥

प्रह्लाद उवाच ।

न शब्दगोचरे यस्य योगिध्येयं परं पदम् ।
यतो यश्च स्वयं विश्वं स विष्णुः परमेश्वरः ॥२२॥

तत्र हेतुः—सर्वकारणानां कारणम् । प्रणतोऽस्म्यन्तसन्तान-मिति पाठे, अन्तयति इत्यन्तः संहर्त्ता, सन्तन्यतेऽनेनेति सन्तानः स्थितिकर्त्ता, तम् । पाठान्तरं सुगमम् ॥१६॥

ब्रह्मबन्धो ! ब्राह्मणाधम ! ते त्वया विपक्षस्तुत्या संहितं सम्बद्धं किमेतद् ग्राहितः शिक्षितः ॥१७।२०॥

प्रसभं निःशङ्कम् ॥२१॥

(घ) कालेनैतावतेत्यत्रापवर्गे तृतीया । ते इत्यत्र तृतीयार्थे षष्ठीप्रयोग आर्षः । सदोद्युक्तेन त्वयेत्यर्थः । अथवा ते इत्यत्र सम्बन्धविवक्षया षष्ठी ; उद्युक्तमुद्योगः तेन उद्यमेनेत्यर्थः । यत् शिक्षितम् तत् पठ्यतामिति सम्बन्धः । अथवा सदोद्-युक्तेन तव गुरुणा ते तव यत् शिक्षितं यदुपदिष्टमित्यर्थः, तत् पठ्यतामित्यन्वयः । अत्र कल्पे शिक्षतिर्णिजन्तः ।

(ङ) समाहितमना इति,—समाहितम् एकाग्रं मनो यस्य सः । एतेन यदहं वक्ष्यामि तत् अवधानपूर्वकमेव वक्ष्यामि, न त्वनवधानपूर्वमिति व्यज्यते ।

(च) क्रोधेन संरक्ते अतिलोहिते लोचने यस्य सः । स्फुरितः क्रोधेन कम्पितः अधरपल्लवः पल्लवतुल्यः अधरः यस्य सः । तद्गुरुं तस्य प्रह्लादस्य गुरुं शिक्षकम् ।

(छ) अनुशास्तोऽसीत्यार्षम्, अनुशिष्टोऽसीति साधु ।

(ज) शास्यत इत्यार्षम्, शिष्यत इति साधु ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हिरण्यकशिपुरुवाच ।

परमेश्वरसंज्ञोऽज्ञ ! किमन्यो मय्यवस्थिते ।
तवास्ति मर्त्तुकामस्त्वं प्रब्रवीषि पुनः पुनः (ङ)॥२३॥

प्रह्लाद उवाच ।

न केवलं तात ! मम प्रजानां
स ब्रह्मभूतो भवतश्च विष्णुः ।
धाता विधाता परमेश्वरश्च
प्रसीद कोपं कुरुषे किमर्थम् ॥२४॥

हिरण्यकशिपुरुवाच ।

प्रविष्टः कोऽस्य हृदये दुर्बुद्धे रतिपापकृत् ।
येनेदृशान्यसाधूनि वदत्याविष्टमानसः (ञ) ॥२५॥

प्रह्लाद उवाच ।

न केवलं मद्हृदयं स विष्णु—
राक्रम्य लोकान् सकलानवस्थितः ।
स मां त्वदादींश्च पितः ! समस्तान्
समस्तचेष्टासु युनक्ति सर्वगः (ट) ॥२६॥

हिरण्यकशिपुरुवाच ।

निष्काम्यतामयं दुष्टः शास्यताञ्च गुरोर्गृहे ।
योजितो दुर्म्मतिः केन विपक्षवितथस्तुतौ ॥२७॥

पराशर उवाच ।

इत्युक्तोऽसौ तदा दैत्यैर्नीतो गुरुगृहं पुनः ।
जग्राह विद्यामनिशं गुरुशुश्रूषणोद्यतः ॥२८॥

कालेऽतीते च महति प्रह्लादमसुरेश्वरः ।
समाहूयाब्रवीत् पुत्र ! गाथा काचित् प्रगीयताम्।

प्रह्लाद उवाच ।

यतः प्रधानपुरुषौ यतश्चैतच्चराचरम् ।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु ॥३०॥

हिरण्यकशिपुरुवाच ।

दुरात्मा बध्यतामेष नानेनार्थोऽस्ति जीवता ।
स्वपक्षहानिकर्त्तृत्वाद् यः कुलाङ्गारतां गतः (ठ)॥

यतो विश्वं, विश्वरूपः स परमेश्वरो विष्णुः ॥२२।२३॥

न केवलं ममैव, किन्तु प्रजानां सर्वासां भवतश्च धाता धारयिता, विधाता कर्त्ता च परमेश्वरः स एव ॥२४।२५॥

आक्रम्य अधिष्ठायावस्थितः । युनक्ति प्रवर्त्तयति । "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" इति श्रेतेः ॥२६।२७॥

जग्राह, विद्या गुरोरुपकारार्थमेव, अन्यथा तदवृत्ति लोपप्रसङ्गात् ॥२८॥

गाथा गद्यपद्यादिः ॥२९॥

यतः प्रधानपुरुषौ आविर्भूतौ ॥३०॥

कुलस्याङ्गारतां दाहकताम् ॥३१॥

(ङ) मयि परमेश्वरे अवस्थिते सति अन्यः मद्व्यतिरिक्तः परमेश्वरसंज्ञः किं तव अस्ति ? किं त्वया तादृगन्यो मन्यत इत्यर्थः । अज्ञेति—सम्बोधनेन तव तादृशस्य मदन्यस्य सत्त्व-कल्पनमज्ञानस्य फलं स्वीयविनाशफलकञ्चेति भावो व्यज्यते ।

(ञ) आविष्टम् अभिभूतं मानसं यस्य सः, अभिभूतचित्तः । ईदृशानि पूर्वोक्तरूपाणि असाधूनि वचनानीति शेषः । वदती-त्यन्वयः ।

(ट) स विष्णुः न केवलं मद्हृदयं आक्रम्य अवस्थि किन्तु सकलान् लोकान् आक्रम्य अवस्तित इत्यन्वयः । त्वदादी त्वत्प्रमुखान् । समस्तचेष्टासु सर्व्वासु क्रियासु । तथाहि त्व मपरे च सर्वे यत्किञ्चन कुर्मः सर्वं सर्वहृदयाधिष्ठानस्य त प्रवर्त्तनयेति भावः ।

(ठ) अर्थो नास्ति प्रयोजनं नास्तीत्यर्थः, अर्थोऽभिधेय वस्तु-प्रयोजन-निवृत्तिष्विति कोषात् । स्वपक्षस्य आत्मीयप हानिः अपकर्षरूपा क्षतिः तत्कर्त्तृत्वात् सत्सम्पादकत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

इत्याज्ञप्तास्ततस्तेन प्रगृहीतमहायुधाः ।
उद्यतास्तस्य नाशाय दैत्याः शतसहस्रशः (ड) ॥३२॥

प्रह्लाद उवाच ।

विष्णुः शस्त्रेषु युष्माकं मयि चासौ यथा स्थितः ।
दैतेयास्तेन सत्येन मा क्रामन्त्वायुधानि मे (ढ) ॥३३॥

पराशर उवाच ।

ततस्तैः शतशो दैत्यैः शस्त्रौघैराहतोऽपि सन् ।
नावाप वेदनामल्पामभूच्चैव पुनर्नवः ॥३४॥

हिरण्यकशिपुरुवाच ।

दुर्बुद्धे ! विनिवर्त्तस्व वैरिपक्षस्तवादतः ।
अभयं ते प्रयच्छामि मातिमूढ़मतिर्भव ॥३५॥

प्रह्लाद उवाच ।

भयं भयानामपहारिणि स्थिते
मनस्यनन्ते मम कुत्र तिष्ठति ।
यस्मिन् स्मृते जन्मजरान्तकादि—
भयानि सर्व्वाण्यपयान्ति तात ॥३६

हिरण्यकशिपुरुवाच

भो भोः सर्पा ! दुराचारमेनमत्यन्तदुर्मतिम् ।
विषज्वालाकुलैर्व्वक्त्रैः सद्यो नयत संक्षयम् ॥३७॥

पराशर उवाच ।

इत्युक्तास्तेन ते सर्पाः कुहकास्तक्षकान्धकाः ।
अदशन्त समस्तेषु गात्रेष्वतिविषोल्वणाः (त) ॥३८॥

स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः ।
न विवेदात्मनो गात्रं तत्स्मृत्याह्लादसंस्थितः (थ) ।३९

सर्पा ऊचुः ।

दंष्ट्रा विशीर्णा मणयः स्फुटन्ति
फणेषु तापो हृदयेषु कम्पः ।
नास्य त्वचः स्वल्पमपीह भिन्नं
प्रशाधि दैत्येश्वर ! कार्य्यमन्यत् (द) ॥४०

यस्मिन् स्मृते एव जन्मादीन्यपि भयान्यपयान्ति, तस्मिन् मनसि नित्यं स्थिते सति भयं कुत्र तिष्ठति ॥३६।३७॥

अदशन्त दष्टवन्तः ॥३८।३९॥

एतदशक्यम्, अन्यत् कार्यं प्रशाधि आदिश ॥४०॥

(ड) तेन हिरण्यकशिपुना । प्रगृहीतानि सम्यग् गृहीतानि महान्ति आयुधानि यैः ते तथाभूताः । तस्य हिरण्यकशिपु-पुत्रस्य प्रह्लादस्य ।

(ढ) आयुधानि युष्माकमिति शेषः । 'मे' इत्यत्र सम्बन्ध-वित्रक्षया षष्ठी । मा आक्रामन्तु मामाक्रम्य मम क्षतिं मा जनयन्तु इत्यर्थः ।

(ण) अतः अस्मात् वैरिपक्षस्तवात् वैरिपक्षभूतस्य विष्णोः स्तवात् गुणकीर्त्तनात् । 'अभयं ते प्रयच्छामि' इति—यदि त्वं तस्य विष्णोः स्तवात् निवर्त्तेथाः, तदा ते भाव्यनिष्टसम्भावना नास्तीति ज्ञापयामीति भावः । मातिमूढ़मतिर्भवेति—अति-मोहादिदमननुसन्धाय विपन्नो मा भूरिति तात्पर्य्यम् ।

(त) अतिविषेण उल्वणाः उत्कटाः ।

(थ) स प्रह्लादस्तु कृष्णे आसक्ता मतिर्यस्येति हेतुगर्भ-विशेषणम् । तस्य कृष्णस्य स्मृत्या य आह्लादः तेन संस्थितः सुष्ठु स्थितः स्वस्थ एव स्थित इत्यर्थः । एतदपि हेतुगर्भविशेषणम् । तथात्वादेव आत्मनः गात्रं न विवेदेत्यभिसन्धिः । विषज्वाला-दीनां गात्रावच्छेदेनैव वेदनाद् गात्रानुसन्धानाभावे विषज्वालाया अप्यनुसन्धानाभाव इति भावः ।

(द) दंष्ट्राः विशीर्णा इत्यादिः अस्माकं सर्पाणामिति शेषः । अस्य तव सुतस्य प्रह्लादस्येत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हिरण्यकशिपुरुवाच ।

हे दिग्गजाः । सङ्कटदन्तमिश्रा !
घ्नतैनमस्मद्रिपुपक्षभिन्नम् (ध) ।
तज्जा विनाशाय भवन्ति तस्य
यथारणेः प्रज्वलितो हुताशः ॥४१॥

पराशर उवाच ।

ततः स दिग्गजैर्बालो भूभृच्छिखरसन्निभैः ।
पातितो धरणीपृष्ठे विषाणैरवपीड़ितः ॥४२॥
स्मरतस्तस्य गोविन्दमिभदन्ताः सहस्रशः ।
शीर्णा वक्षःस्थलं प्राप्य स प्राह पितरं ततः (न) ।४३
दन्ता गजानां कुलिशाग्रनिष्ठुराः
शीर्णा यदेते न बलं ममैतत् ।
महाविपत्पापविनाशनोऽयं
जनार्दनानुस्मरणानुभावः (प) ॥४४॥

संकटैः संकीर्णैर्दन्तैर्मिश्रा मिलिताः सन्तः घ्नत मारयत । अस्मद्रिपुपक्षैर्वैष्णवैः सामाद्युपायेन अस्मत्तो भिन्नं पृथक्-कृतम् । तस्माज् जाता अपि तस्य विनाशाय क्वचिद् भवन्ति । यथा अरणेर्जातो हुताशोऽरणेर्नाशाय ॥४१॥

विषाणैर्दन्तैः ॥४२।४३॥

(ध) एनं मत्पुत्रं प्रह्लादम् । घ्नत हत यूयमिति शेषः । हतेति वक्तव्ये घ्नतेति प्रयोग आर्षः ।

(न) तस्य प्रह्लादस्य, वक्षःस्थलमित्यनेनान्वयः । स प्रह्लादः ।

(प) जनार्दनानुस्मरणस्य विष्णुस्मरणस्य अनुभावः प्रभावः ।

हिरण्यकशिपुरुवाच ।

ज्वाल्यतामसुरा ! वह्निरपसर्पत दिग्गजाः ।
वायो समेधयाग्निं त्वं दह्यतामेष पापकृत् (फ) ॥
पराशर उवाच ।
महाकाष्ठचयच्छन्नमसुरेन्द्रसुतं ततः ।
प्रज्वाल्य दानवा वह्निं ददहुः खामिनोदिताः (ब) ॥
प्रह्लाद उवाच ।
तातैष वह्निः पवनेरितोऽपि
न मां दहत्यत्र समन्ततोऽहम् ।
पश्यामि पद्मास्तरणास्तृतानि
शीतानि सर्व्वाणि दिशां मुखानि ॥
पराशर उवाच ।
अथ दैत्येश्वरं प्रोचुर्भार्गवस्यात्मजा द्विजाः ।
पुरोहिता महात्मानः साम्ना संस्तूय वाग्मिनः ॥

पितुरवि भगवद्भक्तिमुत्पादयितुं तत्स्मरणप्रभावमा 'दन्ता' इति । कुलिशं वज्रं तस्याग्रमिव निष्ठुराः दृढ़ तीक्ष्णाः, महतीर्विपदस्तन्मूलभूतानि पापानि च विनाश तीति तथा ॥४४॥

भार्गवस्यात्मजाः शण्डात्मजाः शण्डामर्कादयः ॥४५॥

(फ) हे असुराः ! वह्निः ज्वाल्यतां युष्माभिरिति शेष समेधय वर्द्धय । दह्यतामिति कर्मकर्त्तरि प्रयोगः । समेधि अग्निना स्वयमेव दग्धो भवत्वित्यर्थः ।

(ब) स्वामिना प्रभुणा हिरण्यकशिपुना, उदिताः कथिताः आज्ञप्ता इति यावत् । देहुरिति वक्तव्ये ददहुरित्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरोहिता ऊचुः ।

राजन् ! नियम्यतां कोपो बालेऽत्र तनयेऽनुजे (भ) ।
कोपो देवनिकायेषु यत्र ते सफलो यतः ॥४९॥
तथा तथैनं बालं ते शासितारो वयं नृप ।
यथा विपक्षनाशाय विनीतस्ते भविष्यति (म) ॥५०॥
बालत्वं सर्व्वदोषाणां दैत्यराजास्पदं यतः ।
ततोऽत्र कोपमत्यर्थं योक्तुमर्हसि नार्भके ॥५१॥
न त्यक्ष्यति हरेः पक्षमस्माकं वचनाद् यदि ।
ततः कृत्यां वधायास्य करिष्यामो निवर्त्तिनीम् ॥५२

पराशर उवाच ।

एवमभ्यर्थितस्तैस्तु दैत्यराजः पुरोहितैः ।
दैत्यैर्निष्काशयामास पुत्रं पावकसञ्चयात् ॥५३॥
ततो गुरुगृहे बालः स वसन् बालदानवान् ।
अध्यापयामास मुहुरुपदेशान्तरे गुरोः ॥५४॥

प्रह्लाद उवाच ।

श्रूयतां परमार्थो मे दैतेया दितिजात्मजाः ।
न चान्यथैतन्मन्तव्यं नात्र लोभादिकारणम् ॥५५॥
जन्म बाल्यं ततः सर्वो जन्तुः प्राप्नोति यौवनम् ।
अव्याहतैव भवति ततोऽनुदिवसं जरा ॥५६॥
ततश्च मृत्युमभ्येति जन्तुर्दैत्येश्वरात्मजाः ।
प्रत्यक्षं दृश्यते चैतदस्माकं भवतां तथा ॥५७॥
मृतस्य च पुनर्जन्म भवत्येतच्च नान्यथा ।
आगमोऽयं तथा तत्र नोपादानं विनोद्भवः ॥५८॥

निवर्त्तिनीं हिंस्राम्, अनिवर्त्तिनीमिति वा च्छेदः । दुष्प्रतीकारामित्यर्थः ॥५२।५३।

पितुर्विषयासक्तेर्विष्णुभक्तिर्न भवति, एषां तु भविष्यतीति बालदानवान् गुरोरुपदेशस्याध्यापनस्यान्तरे विच्छेदे तन्मध्ये मुहुर्मुहुः स्वयमध्यापयामास उपदिदेश ॥५४॥

"संसारे नित्यदुःखानि विष्णुभक्तौ परं सुखम्। इत्थं प्रह्लादवाक्यार्थं बुद्ध्वा विष्णुं भजेद् बुधः।" हे दितिजात्मजाः! मद्भ्रातरः! दैतेयास्तदन्ये! परमार्थतत्त्वं श्रूयताम्। मे मत्तः। अन्यथा मिथ्येत्येतत् न मन्तव्यं, यतोऽस्य गुरोरुपदेश इव मदुक्तौ लोभादिकारणं नास्ति ॥५५॥

बाल्यादारभ्य बन्धमुक्तये विष्णुभक्तिरेव कर्त्तव्येति वक्तुं प्रवृत्तिमार्गे जन्मादिसर्वावस्थासु नित्यं दुःखमेवेति दर्शयन्नाह—'जन्मे'त्यादि—'सर्वं दुःखमयं जग'दित्यन्तैश्चतुर्दशभिः ॥५६।५७॥

मृतस्य पुनर्जन्म भवतीत्ययमेतदर्थप्रतिपादकः प्रमाणभूतश्रुतिस्मृत्यादिरूप आगमोऽस्ति। "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्ये तु संयान्ति यथाकर्म यथाश्रुतम्" इति, "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" इत्यादि। एतदनुकूलं तर्कमप्याह—तच्च तथैव मन्तव्यम्, यस्माज्जीवाद्यधिष्ठितशुक्रशोणितरूपम् उपादानकारणं विना देहस्योद्भवो न घटते इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति। यद्वा जीवन्मुक्तव्यावृत्त्यर्थमाह—नेति। उपादीयते निमित्ततया स्वीक्रियते पुनर्जन्मार्थम् इत्युपादानं पुण्यपापादि। तद्विना उद्भवो जन्म नास्ति, किन्तु तत्सद्भावे, अतो जीवन्मुक्ते नातिप्रसङ्ग इत्यर्थः ॥५८॥

(भ) अस्य श्लोकस्योत्तरश्लोकेनान्वयसमाप्त्या युग्मकम्, द्वाभ्यान्तु युग्मकं प्रोक्तमित्यनुशासनात्। अनुजे कनिष्ठे। बाल इति अनुज इति च विशेषणद्वयं हेत्वर्थगर्भम्, अस्य बालत्वात् कनिष्ठत्वाच्च कोपो नियन्तव्य इति भावः।

(म) वयं शासितास्म इत्येवं लुटि उत्तमपुरुषेण प्रयोगे कर्त्तव्ये वयं शासितार इति प्रथमपुरुषोचितक्रियया प्रयोग आर्षः। ते तव, विपक्षनाशाय भविष्यति अयमिति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गर्भवासादि यावत् तु पुनर्जन्मोपपादनम् ।
समस्तावस्थकं तावद् दुःखमेवावगम्यताम् (य) ॥५९॥

क्षुत्तृष्णोपशमं तद्वच्छीताद्युपशमं सुखम् ।
मन्यते बालबुद्धित्वाद् दुःखमेव हि तत् पुनः ॥६०॥

अत्यन्तस्तिमिताज्ञानां व्यायामेन सुखैषिणाम् ।
भ्रान्तिज्ञानावृताक्षाणां प्रहारोऽपि सुखायते ॥६१॥

क्व शरीरमशेषाणां श्लेष्मादीनां महाचयः ।
क्व कान्ति-शोभा-सौरभ्य-कमनीयादयो गुणाः ॥६२॥

मांसाऽसृक्पूयविण्मूत्रस्नायुमज्जाऽस्थिसंहतौ ।
देहे चेत् प्रीतिमान् मूढो नरके भवितापि सः ॥६३॥

अग्नेः शीतेन तोयस्य तृषा भक्तस्य च क्षुधा ।
क्रियते सुखकर्तृत्वं तद् विलोमस्य चेतरैः ॥६४॥

करोति हे दैत्यसुता ! यावन्मात्रं परिग्रहम् ।
तावन्मात्रं स एवास्य दुःखं चेतसि यच्छति ॥६५॥

यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥६६॥

यद् यद् गृहे तन्मनसि यत्र तत्रावतिष्ठतः ।
नाशदाहापहरणं तत्र तस्यैव तिष्ठति (र) ॥६७॥

ततः किमत आह—'गर्भवासादी'ति । पुनर्जन्मन उपपादनं प्रापणं यावद् तावद् दुःखमेव । यद्वा वामदेवगर्भवास-व्यावृत्त्यर्थमाह—'पुनर्जन्मे'ति ॥५९॥

अन्नपानादिजनितसुखमप्यस्ति, कुतो दुःखमेवोच्यते ? इति चेत्, तत्राह—'क्षुदि'ति । क्षुत्पिपासादिकृतदुःखोपशमं मूढो भ्रान्तः सुखं मन्यते । तद् हि पुनरन्नपानादिसम्पादन-प्रयासाद् दुःखमेव ॥६०॥

दुःखत्वेन प्रसिद्धेऽपीच्छयाङ्गप्रहारादौ सुखभ्रमं दृष्टान्त-त्वेनाह—'अत्यन्ते'ति । वातादिदोषेण अत्यन्तं जड़ीभूत-गात्राणां व्यायामेन गमनादिश्रमेण सुखमिच्छतां व्यायामो-ऽपि सुखमिव भवति, भ्रान्तिज्ञानावृताक्षाणाञ्च मोहपिहित-दृष्टीनां कामिनां प्रणयकुपितकामिनीनूपुररणत्कारचरण-प्रहारोऽपि सुखवत् प्रतीयते ॥६१॥

तदेव कामिनां सुखम् । निन्दति—क्वेति । महाचयः स्थूलसंघातः, कान्तिर्गौरत्वादिः अङ्गच्छाया, शोभा भूषणादि-कृता, सौरभ्यं सौगन्ध्यं, कमनीयं सौन्दर्यम्, एवमादयो-गुणाश्च क्व ॥६२॥

देहे चेदहं—ममकारास्पदे प्रीतिमान् भवेत्, तर्हि नरकेऽपि प्रीतिमान् भविष्यति ? तस्यापि नारकिभोग्यमांसादि-संघातत्वाविशेषात् ॥६३॥

किञ्च न वस्तुतः किञ्चित् सुखसाधनमस्ति, सुखसाधन-स्यैव कदाचिद् दुःखदर्शनादित्याह—'अग्ने'रिति । शीतेन पूर्वभाविना अग्नेः सुखकर्तृत्वं क्रियते । शीताभावे शीतं अग्नेर्दुःसहत्वात् । एवं पूर्वभाविन्या तृषा तोयस्य, क्षुधा च भक्तस्यान्नस्य, तयोरभावे तोयान्नयोरतिप्रतिकूलत्वात् तद्-विलोमस्याग्न्यादिप्रतियोगिनः शीतादेः, इतरैरग्न्यादिभिः अग्निना सन्तापे सति शीतस्य, तोये सति तृषः, अन्ने सति क्षुधः सुखहेतुत्वम्, अन्यथा तेषामेव दुःखहेतुत्वात् ॥६४॥

किञ्च 'करोती'ति ॥६५॥

कलत्र-पुत्र-मित्रादिसम्बन्धोऽपि दुःखहेतुरेवेत्याह—'यावत' इति । शोकरूपाः शङ्कवः कीलकानि खन्यन्ते निपात्यन्ते । तेषामपगमेऽपि तन्नाशादिशोकानपगमादित्यर्थः ॥६६॥

एतत् स्पष्टयति—'यद् यदि'ति । यद् यद् गृहेऽस्ति धनादि, तद् यत्र तत्र देशान्तरेऽपि अवतिष्ठमानस्य मनसि नित्यं चिन्तयतस्तिष्ठति, तस्य तु धनादेर्नाशो दाहोऽपहरणं वा तत्रैव गृहे एव तिष्ठति, न तु मानसे स्मर्यमाणतया स्थितं

(य) समस्ता अवस्था यस्य तत् समस्तावस्थं तदेव समस्तावस्थकम् सर्वावस्थासम्बन्धीत्यर्थः ।

(र) अवतिष्ठत इत्यत्र शतृप्रत्यय आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जन्मन्यत्र महद् दुःखं म्रियमाणस्य चापि तत् ।
यातनासु यमस्योग्रं गर्भसंक्रमणेषु च ॥६८॥

गर्भे च सुखलेशोऽपि भवद्भिरनुमीयते ।
यदि तत् कथ्यतामेवं सर्वं दुःखमयं जगत् ॥६९॥

तदेवमतिदुःखानामास्पदेऽत्र भवार्णवे ।
भवतां कथ्यते सत्यं विष्णुरेकः परायणम् (ल) ७०॥

मा जानीत वयं बाला देही देहेषु शाश्वतः ।
जरा-यौवन-जन्माद्या धर्म्मा देहस्य नात्मनः ॥७१॥

बालोऽहं तावदिच्छातो यतिष्ये श्रेयसे युवा ।
युवाहं वार्द्धके प्राप्ते करिष्याम्यात्मनो हितम् ॥७२॥

वृद्धोऽहं मम कर्म्माणि समस्तानि न गोचरे ।
किं करिष्यामि मन्दात्मा समर्थेन न यत् कृतम् ॥७३

एवं दुराशयाक्षिप्तमानसः पुरुषः सदा ।
श्रेयसोऽभिमुखं याति न कदाचित् पिपासितः ॥७४॥

बाल्ये क्रीड़नकासक्ता यौवने विषयोन्मुखाः ।
अज्ञा नयन्त्यशक्त्या च वार्द्धकं समुपस्थितम् ॥७५॥

तस्माद् बाल्ये विवेकात्मा यतेत श्रेयसे सदा ।
बाल्य-यौवन-वृद्धाद्यैर्देहभावैरसंयुतः ॥७६॥

धनादेर्नाशादि भवति, मनसि स्थितस्य तु न भवतीति कुतः ? अहो चित्रं ! गृहे नष्टमपि धनादि यत्र कुत्रचिद् देशान्तरे स्थितमपि परिग्रहणं व्यर्थयितुमेव मानसवासना-रूपेण तिष्ठति । अतस्तद्वासनापरित्यागे विशोको भवति, न तद् वियोगमात्र इति भावः । पाठान्तरेष्वपि अयमेव तात्पर्य्यार्थः ॥६७॥

एवं सर्वावस्थास्वपि दुःखमनुसन्धेयमित्याह-'जन्मनो'ति-द्वाभ्याम् ॥६८।६९॥

तदेवं प्रवृत्तिमार्गे दोषोक्त्या विरक्तिमुत्पाद्य विष्णुसेवायां प्रवर्त्तयन्नाह-'तदेव'मिति ॥७०॥

तथाप्यस्माकं बालानां नात्राधिकार इत्याशङ्कां व्यावर्त्त-यति-'जानीते'ति । तत्तत्परिणामभेदेन भिन्नेष्वपि बाल-युवादिदेहेषु देहिनः प्रतिसन्धानाद् देही शाश्वतो नित्यः । अतो जराद्या धर्मा देहस्यैव, न त्वात्मनः । देहात्मविवेक-शून्यानाम् अविरक्तानामेवात्रानधिकारः । तद्विवेकवतां तु विरक्तानां सुतरामेवाधिकारः । "देहावस्था त्वकारणं यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इत्यादिश्रुतेरिति भावः ॥७१॥

किञ्चिद्विवेकवतामपि अविरक्तानां श्रेयसि प्रवृत्तौ काल-प्रतीक्षया वृथैव जीवितं यातीत्याह—'बालोऽह'मिति त्रिभिः । इच्छातो विचरिष्यामीति शेषः ॥७२।७३॥

दुराशया विषयासक्त्या आक्षिप्तमानसः आकृष्टचित्तः । पिपासितः भोगतृष्णाकुलः । अनेन च रजकादिदृष्टान्तः सूचितः । रजको हि जाह्नवीजलस्थोऽपीदं प्रक्षाल्य जलं पास्यामीदमिदञ्चेत्येवं पिपासया यथा म्रियते । जालिकश्च इमञ्चामुञ्च परञ्च मत्स्यं धृत्वा तोयं पास्यामीत्येवं पिपासित एव यथा म्रियते तद्वदित्यर्थः ॥७४॥

अज्ञास्तु पशुवदेवायुः क्षपयन्तीत्याह—'बाल्य' इति । समुपस्थितं प्राप्तं वार्द्धकञ्चाशक्त्या नयन्ति यापयन्ति, न तु तदापि श्रेयोजिज्ञासा तेषामित्यर्थः ॥७५॥

अतः श्रेयसे विलम्बो न कर्त्तव्य इत्याह—'तस्मा'दिति । विवेकात्मा विवेकयुक्तचित्तः । तमेव विवेकं स्मारयति 'बाल्ये'ति ॥७६॥

(ल) परायणम् उत्तम आश्रयः, सर्वदुःखपरिशून्यत्वादिति भावः ।

(व) वृद्धाद्यैरित्यत्र वृद्धेति-भावप्रधाननिर्देशाद् वृद्धत्वाद्यै-रित्यर्थः । वृद्धयाद्यैरिति वा पाठः, वृद्धिः वृद्धत्वमित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदेतद् वो मयाख्यातं यदि जानीत नानृतम् ।
तदस्मत्प्रीतये विष्णुः स्मर्य्यतां बन्धमुक्तिदः ॥७७॥

आयासः स्मरणे कोऽस्य स्मृतो यच्छति शोभनम् (श) ।
पापक्षयश्च भवति स्मरतां तमहर्निशम् ॥७८॥

सर्व्वभूतस्थिते तस्मिन् मतिर्मैत्री दिवानिशम् ।
भवतां जायतामेवं सर्वक्लेशान् प्रहास्यथ ॥७९॥

तापत्रयेणाभिहतं यदेतदखिलं जगत् ।
तदा शोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः ॥८०॥

अथ भद्राणि भूतानि हीनशक्तिरहं परम् ।
मुदं तथापि कुर्व्वीत हानिर्द्वेषफलं यतः ॥८१॥

बद्धवैराणि भूतानि द्वेषं कुर्व्वन्ति चेत् ततः ।
शोच्यान्यहोऽतिमोहेन व्याप्तानीति (ष)
मनीषिणा ॥८२॥

एते भिन्नदृशा दैत्या विकल्पाः कथिता मया ।
कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ॥८३॥

विस्तारः सर्व्वभूतस्य विष्णोर्विश्वमिदं जगत् ।
द्रष्टव्यमात्मवत् तस्मादभेदेन विचक्षणैः ॥८४॥

समुत्सृज्यासुरं भावं तस्माद् यूयं तथा वयम् ।
तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिम् (स)॥८५॥

या नाग्निना न वार्केण नेन्दुना नैव वायुना ।
पर्जन्यवरुणाभ्यां वा न सिद्धैर्न च राक्षसैः ॥८६॥

यद्यपि युष्माकमत्र नेच्छा, तथाप्यस्मत्प्रीतये विष्णुः स्मर्यताम् ॥७७॥

युष्माकमपि विष्णुभक्तावेव प्रवृत्तिर्युक्ता सुकरत्वान् महाफलत्वाच्च इत्याह—'आयास' इति ॥७८॥

विष्णुभक्त्यैव सर्वत्र विष्णुदृष्टिः सर्वभूतमैत्री च मुख्यं कारणमित्याह—'सर्वे'ति । सर्वभूतेषु अन्तर्यामितया स्थिते तस्मिन् विष्णौ मतिर्भवतामस्तु । अत एव तदधिष्ठाने भूतमात्रे मैत्री चाहर्निशमस्तु । एवमनेन प्रकारेण रागद्वेषादि-कृतसर्वक्लेशान् प्रहास्यथेत्यर्थः ॥७९॥

ननु सर्वभूतेषु मैत्री दुष्करा, मत्सरादिभिः सन्तप्य-मानेषु धनविद्यादिगर्वितेषु वृथैव बद्धवैरेषु च द्वेषस्य दुष्परिहरत्वादित्यत्राह-'तापत्रयेणे'ति त्रिभिः । तापत्रयेणा-ध्यात्मिकादिदुःखत्रयेण मदमत्सरादिना जगदेतदभिहतमिति यदा बुद्धिः, तदा शोच्येषु कृपाविषयेषु भूतेषु कः प्राज्ञो द्वेषं करोति ॥८०॥

अथैवं मतिः,—भूतानि भद्राणि धनविद्यादिसम्पदा दृष्टानि, अहमेव केवलं धनाद्यर्जने हीनशक्तिरिति,—तथापि तेषु मुदं प्रीतिमेव कुर्वीत, न तु द्वेषं, यतो द्वेषस्य फलं हानिरेव; तथा हि न्यायविदः—"इष्टसाधनज्ञानस्य रागत उपादान फलम् ।" अनिष्टसाधनज्ञानस्य च द्वेषतो हानिः फलम् इति वर्णयन्ति । अतो हानिफलत्वाद् द्वेषो न कार्य इत्यर्थः ॥८१॥

यदि चेद् वृथैव बद्धवैराणि स्वस्मिन् द्वेषं कुर्वन्ति, तद मनीषिणा तान्यतीव मोहव्याप्तानीति शोच्यानि अनु कम्प्यानि । तेषु सर्वथा द्वेषो न युक्त इत्यर्थः ॥८२॥

एते च द्वेषोपशमप्रकारा मन्दाधिकारिणामेवोक्ता न तु उत्तमाधिकारिणामित्याह—'एत' इति । भिन्नदृ भेददृष्ट्या । भिन्नदृशामिति वा पाठः । तत्र भेददृश्यङ्गी कारम् कृत्वा एते विकल्पाः द्वेषोपशमप्रकारभे कथिताः । उत्तमानां तु परमार्थसंक्षेपो मत्तः श्रूयताम् ॥८

तमेवाह—'विस्तार' इति ॥८४॥

आसुरं भावं रागद्वेषादिस्वभावं सम्यगुत्सृज्य यू वयञ्च निर्वृतिं यथा येन प्रकारेण प्राप्स्यामस्तथा करिष्यामः ॥८५॥

(श) अस्य अनन्तरोक्तस्य विष्णोः । 'स्मृति' इत्यादिः—अत्र तत्स्मरणे स्वल्पायाससम्भवेऽपि तस्य बलवदनिष्टाननुबन्धि-प्रकृष्टेष्टसाधकत्वात्तदनुसन्धानेन तत्र प्रवृत्तिरेव युक्तेति भावः ।

(ष) प्राप्स्याम इत्यत्र विसर्गलोप आर्षः ।

(स) 'अहोऽतिमोहेनेत्यत्र सन्धिरार्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न यक्षैर्न च दैत्येन्द्रैर्नोरगैर्न च किन्नरैः ।
न मनुष्यैर्न पशुभिर्दोषैर्नैवात्मसम्भवैः ॥८७॥
ज्वराक्षिरोगाऽतीसार-प्लीह-गुल्मादिकैस्तथा ।
द्वेषैर्ष्यामत्सराद्यैर्वा रागलोभादिभिः क्षयम् ॥८८॥
न चान्यैर्नीयते कैश्चिन्नित्या ह्यत्यन्तनिर्म्मला ।
तामाप्नोति मलं त्यक्त्वा केशवे हृदि संस्थिते(ष) ॥८९
असारसंसारविवर्त्तनेषु
मा यात तोषं प्रसभं ब्रवीमि ।
सर्व्वत्र दैत्याः समतामुपेत
समत्वमाराधनमच्युतस्य ॥९०॥
तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं
धर्म्मार्थकामैरलमल्पकास्ते ।
समाश्रिताद् ब्रह्मतरोरनन्ता-
न्निःसंशयं प्राप्स्यथ वै महत् फलम् (स) ॥९१

इति श्रीविष्णुपुराणे प्रथमेऽंशे सप्तदशोऽध्यायः ।

तामेव निर्वृतिं तत्प्रयत्नञ्च विशिनष्टि—'ये'ति चतुर्भिः । या निर्वृतिर्मोक्षाख्या अग्न्यादिनान्यैरपि कैश्चित् क्षयं न नीयते, तां निर्वृतिं केशवे हृदयं न्यस्य प्राप्नोतीति चतुर्थेनान्वयः । तत्र नाग्न्यादिनेति आधिदैविकैरुपघातैः क्षयो वार्यते ॥८६॥

न मनुष्यैर्न पशुभिरित्याधिभौतिकैः । दोषैर्नैवात्मसम्भवैरिति शारीरमानसभेदेनाध्यात्मिकैः ॥८७॥

तत्र शारीरैर्ज्वरादिभिर्मानसैर्द्वेषादिभिश्च ॥८८॥

अन्यैश्च तन्मूलभूतैरविद्याकर्मादिभिर्या क्षयं न प्राप्यते तां निर्वृतिं केशवं स्मृत्वा प्राप्नोतीत्यर्थः ॥८९॥

सर्वोपदेशसारमाह—'असारे'ति । असारो यः संसारः तत्र विवर्त्तनानि देवमनुष्यतिर्यगादिजन्मानि तेषु तत्तदुचितैर्भोगैस्तोषं मा यात न प्राप्नुत, किन्तु सर्वभूतेषु समदर्शिताम् उपेत प्राप्नुत । तदेव अच्युतस्याराधनं प्रीणनम् ॥९०॥

ततः किमत आह—'तस्मिन्नि'ति । तस्मिन् प्रसन्ने प्रीते न किञ्चिद् दुर्लभम् । तथापि तुच्छत्वात् त्रिवर्गो न प्रार्थ्यः, मोक्षोऽपि न प्रार्थ्यः । चूतमूलमाश्रितस्योपरि यथा तत्फलं पतति, तथैव ब्रह्मतरुलक्षणादनन्तात् सम्यगाश्रितान् प्रति मुक्तिफलप्रपातस्यावश्यम्भावित्वादित्यर्थः ॥९१

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाभिधायां वा विष्णुपुराणटीकायां प्रथमांशे सप्तदशोऽध्यायः ।

(ष) नित्या अत्यन्तनिर्मला या निर्वृतिः अग्न्यादिभिः समुल्लिखितैरन्यैश्च कैश्चित् कारणैः क्षयं न नीयत इति सम्बन्धः ।

(स) यतस्ते धर्मार्थकामाः अल्पकाः अतिक्षुद्रा अतस्तैरलमित्यर्थः । इन्द्रवज्रोपेन्द्रवज्रेन्द्रवंशानां साङ्कर्य्यादुपजातिवृत्तम् ।

पाठान्तराणि—

(४६—१) महाकाष्ठचयस्थं तम्— ।
(४९—२) वालेऽपि तनये निजे— ।
(६१—३) दुःखमेव सुखायते ।
(६२—४) क्व कान्ति-शोभा-सौन्दर्य्य-रमणीयादयो— ।
(६७—५) नाशदाहोपकरणं— ।
(७८—६) प्रयासः— ।
(८२—७) सुशोच्यान्यतिमोहेन— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टादशोऽध्यायः

[प्रह्लादस्य विनाशाय दैत्यान् प्रति हिरण्यकशिपोरादेशः ।]

पराशर उवाच ।

तस्यैवं दानवाश्चेष्टां दृष्ट्वा दैत्यपतेर्भयात् ।
आचचक्षुः स चोवाच सूदानाहूय सत्वरः (क) ॥१॥

हिरण्यकशिपुरुवाच ।

हे सूदा मम पुत्रोऽसावन्येषामपि दुर्म्मतिः !
कुमार्गदेशको दुष्टो हन्यतामविलम्बितम् ॥२॥
हालाहलं विषं तस्य सर्व्वभक्ष्येषु दीयताम् ।
अविज्ञातमसौ पापो हन्यतां मा विचार्य्यताम् ॥३॥

पराशर उवाच ।

ते तथैव ततश्चक्रुः प्रह्लादाय महात्मने ।
विषदानं यथाज्ञप्तं पित्रा तस्य महात्मनः ॥४॥
हालाहलं विषं घोरमनन्तोच्चारणेन सः ।
अभिमन्त्र्य सहान्नेन मैत्रेय बुभुजे तदा ॥५॥

अविकारं स तद् भुक्त्वा प्रह्लादः स्वस्थमानसः ।
अनन्तख्यातिनिर्वीर्य्यं जरयामास तद्विषम् ॥६॥
ततस्तदा भयत्रस्ता (२) जीर्णं दृष्ट्वा महद्विषम् ।
दैत्येश्वरमुपागम्य प्रणिपत्येदमब्रुवन् (ख) ॥७॥

सूदा ऊचुः ।

दैत्यराज ! विषं दत्तमस्माभिरतिभीषणम् ।
जीर्णं तेन सहान्नेन प्रह्लादेन सुतेन ते ॥८॥

हिरण्यकशिपुरुवाच ।

त्वर्य्यतां त्वर्य्यतां हे हे सद्यो दैत्यपुरोहिताः ।
कृत्यां तस्य विनाशाय उत्पादयत मा चिरात् (३)॥

पराशर उवाच ।

सकाशमागम्य ततः प्रह्लादस्य पुरोहिताः ।
सामपूर्व्वमथोचुस्ते प्रह्लादं विनयान्वितम् ॥१०॥

अष्टादशोऽध्यायः ।

चेष्टाम् उपदेशरूपाम् ॥१॥
कुमार्गस्य देशकः उपदेष्टा ॥२॥
पूर्वं शस्त्रसर्पगजादीन् दृष्ट्वा अनेन कोऽपि मन्त्रादिः प्रतीकारः कृतः । तस्मादविज्ञातं यथा भवत्येवं सर्वभक्ष्येषु खण्डलड्डुकादिषु विषं दत्त्वा हन्यतामित्यर्थः ॥४॥

अनन्तस्य नाम्ना भक्ष्यभोज्यादि सर्वम् अभिमन्त्र्य तस्मै निवेद्य तदुच्छिष्टं प्रसादरूपेण नित्यमसौ भुङ्क्ते अतस्तदासौ विषमुग्रं तथैव बुभुजे ॥५॥

तस्मादनन्तस्य ख्यात्या कीर्त्त्या निर्वीर्यत्वादविकारं यथा भवत्येवं जारयामास ॥६।८॥

सर्वस्माद् ब्रह्मशक्तिरधिकेति मत्वा ब्राह्मणान् नियुङ्क्ते 'त्वर्यता'मिति ॥६।११॥

(क) दानवाः तस्य प्रह्लादस्य एवं चेष्टां पूर्वोक्तोपदेशक्रियारूपां चेष्टां दृष्ट्वा भयात् हिरण्यकशिपुप्रयुक्तस्वानिष्टाशङ्कया दैत्यपतेः हिरण्यकशिपोः तत्समीपं इत्यर्थः । आचचक्षुः कथयामासुः तत्पुत्रचेष्टामिति शेषः । चक्षेरात्मनेपदिन 'आचचक्षु'रिति परस्मैपदप्रयोग आर्षः ।

(ख) अब्रुवन् सूदा इति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरोहिता ऊचुः ।

जातस्त्रैलोक्यविख्यात आयुष्मन् ! ब्रह्मणः कुले ।
दैत्यराजस्य तनयो हिरण्यकशिपोर्भवान् ॥११॥
किं देवैः किमनन्तेन किमन्येन तवाश्रयः ।
पिता ते सर्व्वलोकानां त्वं तथैव भविष्यसि ॥१२॥
तस्मात् परित्यजैनां त्वं विपक्षस्तवसंहिताम् ।
वाचं पिता समस्तानां (३) गुरूणां परमो गुरुः (ग) ॥१३

प्रह्लाद उवाच ।

एवमेतन्महाभागाः ! श्लाघ्यमेतन्महाकुलम् ।
मरीचेः सकलेऽप्यस्मिन् त्रैलोक्ये कोऽन्यथा वदेत् ॥१४
पिता च मम सर्व्वस्मिन् जगत्युत्कृष्टचेष्टितः ।
एतदप्यवगच्छामि सत्यमत्रापि नानृतम् ॥१५॥
गुरूणामपि सर्व्वेषां पिता परमको गुरुः ।
यदुक्तं भ्रान्तिरत्रापि स्वल्पापि हि न विद्यते ॥१६॥
पिता गुरुर्न सन्देहः पूजनीयः प्रयत्नतः ।
तत्रापि नापराध्यामीत्येवं मनसि मे स्थितम् ॥१७॥
यदेतत् किमनन्तेनेत्युक्तं युष्माभिरीदृशम् ।
को ब्रूवीति यथायुक्तं किन्तु नैतद् वचोऽर्थवत् ॥१८
इत्युक्त्वा सोऽभवन्मौनी तेषां गौरवयन्त्रितः (घ) ।
प्रहस्य च पुनः प्राह किमनन्तेन साध्विति ॥१९॥
साधु भोः किमनन्तेन साधु भो गुरवो मम ।
श्रूयतां यदनन्तेन यदि खेदं न यास्यथ ॥२०॥
धर्म्मार्थकाममोक्षाख्याः पुरुषार्था उदाहृताः ।
चतुष्टयमिदं यस्मात् तस्मात् किं किमिदं वृथा ॥२१॥
मरीचिमिश्रैर्दक्षेण (४) तथैवान्यैरनन्ततः ।
धर्म्मः प्राप्तस्तथैवान्यैरर्थः कामस्तथापरैः ॥२२॥
तत्तत्त्ववेदिनो भूत्वा ज्ञानध्यानसमाधिभिः ।
अवापुर्मुक्तिमपरे पुरुषा ध्वस्तबन्धनाः ॥२३॥
सम्पदैश्वर्य्यमाहात्म्यज्ञानसन्ततिकर्म्मणाम् ।
विमुक्तेश्चैकतालभ्यं मूलमाराधनं हरेः (५) ॥२४॥
यतो धर्म्मार्थकामाख्यं मुक्तिश्चापि फलं द्विजाः ।
तेनापि हि किमेत्येवमनन्तेन किमुच्यते ॥२५॥

ते पिता सर्वलोकानामाश्रयः ॥१२।१३॥
ब्रह्मणः मरीचेः कुले ॥१४।१५।१६॥
नापराध्यामि नान्यथा करोमि ॥१७॥
यथा यैर्यैर्दोषैरेतदयुक्तम्, तथा सर्वान् दोषान् को ब्रवीति ? दोषानन्त्यान्न कोऽपि वक्तुं शक्नोतीत्यर्थः। तथापि किञ्चिद् वक्ष्यामीत्याह—'किन्त्वे'ति ॥१८॥
किमनन्तेन साध्वितीत्यादि पुनरुक्तिः सोपालम्भाक्षेपार्था ॥१९।२०॥
इदं पुरुषार्थचतुष्टयं यस्मादनन्ताद् भवति। तस्मात् किं स्यादिति इदं निरर्थकवाक्यं किमिति वृथैवोच्यते इत्यर्थः ॥२१॥
पुरुषार्थचतुष्टय-प्राप्तिमेवोदाहरन्नाह—'मरीचिमिश्रै'रिति चतुर्भिः। मिश्रशब्दस्य पूज्ये प्रयोगात् मरीचिमिश्रैर्मरीचिमुख्यैरित्यर्थः ॥२२।२३॥
एकतालभ्यं समदृष्टिमात्रसुलभं हरेराराधनमेव सम्पदादीनां विमुक्तेश्च मूलम् ॥२४॥
यतो धर्मादि चतुर्विधं फलं तेनापि अनन्तेन। किमित्येव किमिदमुच्यते ॥२५॥

(ग) विपक्षस्य तव पितृशत्रोः विष्णोः स्तवसंहितां स्तुतियुक्तामुत्कर्षप्रतिपादिकां वाचं वाणीम्।

(घ) तेषां पुरोहितानां गौरवेण गुरुत्वेन उत्कर्षेण मान्यतया वा यन्त्रितः नियमितः चालित इति यावत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किञ्चात्र बहुनोक्तेन भवन्तो गुरवो मम ।
वदन्तु साधु वाऽसाधु विवेकोऽस्माकमल्पकः ॥२६॥

पुरोहिता ऊचुः ।

दह्यमानस्त्वमस्माभिरग्निना बाल रक्षितः ।
भूयो न वक्ष्यसीत्येवं नैव ज्ञातोऽस्यबुद्धिमान् (ङ) ॥२७

यदास्मद्वचनान्मोहग्राहं न त्यक्ष्यते भवान् ।
ततः कृत्यां विनाशाय तव स्रक्ष्याम दुर्म्मतेः (च)॥२८

प्रह्लाद उवाच ।

कः केन हन्यते जन्तुर्जन्तुः कः केन रक्ष्यते ।
हन्ति रक्षति चैवात्मा ह्यसत् साधु समाचरन्(छ)॥२९

पराशर उवाच ।

इत्युक्तास्तेन ते क्रुद्धा दैत्यराजपुरोहिताः ।
कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम् ॥३०

अतिभीमा समागम्य पादन्यासक्षतक्षितिः ।
शूलेन सा सुसंक्रुद्धा (६) तं जघानाशु वक्षसि (ज)॥३१

तत् तस्य हृदयं प्राप्य शूलं बालस्य दीप्तिमत् ।
जगाम खण्डितं भूमौ तत्रापि शतधा गतम् ॥३२॥

यत्रानपायी भगवान् ह्यास्ते हरिरीश्वरः ।
भङ्गो भवति वज्रस्य तत्र शूलस्य का कथा ॥३३॥

अपाये तत्र पापैश्च पातिता तत्र याजकैः (७) ।
तानेव सा जघानाशु कृत्या नाशं जगाम च (झ)॥३४

कृत्यया दह्यमानांस्तान् विलोक्य स महामतिः ।
त्राहि कृष्णेत्यनन्तेति वदन्नभ्यवपद्यत ॥३५॥

प्रह्लाद उवाच ।

सर्व्वव्यापिन् जगद्रूप जगत्स्रष्टर्जनार्दन ।
पाहि विप्रानिमानस्माद् दुःसहान्मन्त्रपावकात् ॥३६

सोपालम्भोक्तिं निगमयति—'किञ्चे'ति ॥२६॥

एवं विपक्षस्तुतियुक्तं वाक्यं भूयो न वक्ष्यसीति मत्वा पूर्वमस्माभिस्त्वं रक्षितोऽसि । अबुद्धिमान त्वमिति तु नैव ज्ञातोऽसि ॥२७॥

मोहग्राहम् अबुद्धिकृतं दुराग्रहम् ॥२८॥

असत् समाचरन् आत्मैवात्मानं हन्ति । साधु सम चरन्नात्मैव आत्मानं रक्षति चेत्यन्वयः ॥२९।३०॥

पादयोर्न्यासैर्निक्षेपैः, क्षता क्षितिर्यस्याः तथा ॥३१

खण्डितं भग्नं सत् भूमौ जगाम पपात ॥३३।३४॥

अभ्यवपद्यत रक्षणार्थं तदभिमुखम् अधावदित्यर्थः ॥३५।३६॥

(ङ) नैवेत्यादिः—अबुद्धिमान् नैव ज्ञातोऽसि, किन्तु बुद्धिमानेव ज्ञातोऽसि, अतः बुद्धिमतस्ते भूयस्तथा विपक्षस्तव-संहिताया वाचः समुच्चारणं नोपयुक्तमिति भावः ।

(च) स्रक्ष्यामेति निर्विसर्गप्रयोग आर्षः ।

(छ) आत्मैव हन्ति रक्षति च जन्तोरात्मानमिति शेषः ।

(ज) तं प्रह्लादं । वक्षसि वक्षोदेशे । अवच्छेदे सप्तमी ।

(झ) सा पूर्वोक्ता ज्वालामालोज्ज्वलाकृतिः कृ आभिचारिकी देवता ; तानेव पुरोहितानेव । जघान हन्तुं प्रववृते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा सर्व्वेषु भूतेषु सर्व्वव्यापी जगद्गुरुः ।
विष्णुरेव तथा सर्व्वे जीवन्त्वेते पुरोहिताः (ञ) ॥३७
यथा सर्व्वगतं विष्णुं मन्यमानो न पावकम् (ट) ।
चिन्तयाम्यरिपक्षेऽपि जीवन्त्वेते पुरोहिताः ॥३८॥
ये हन्तुमागता दत्तं यैर्विषं यैर्हुताशनः ।
यैर्द्दिग्गजैरहं क्षुण्णो दष्टः सर्पैश्च यैरपि ॥३९॥
तेष्वहं मित्रभावेन समः पापोऽस्मि न क्वचित् (ट)।
तथा तेनाद्य सत्येन जीवन्त्वसुरयाजकाः ॥४०॥

पराशर उवाच ।

इत्युक्तास्तेन ते सर्व्वे संस्पृष्टाश्च निरामयाः ।
समुत्तस्थुर्द्विजा भूयस्तञ्चोचुः प्रश्रयान्वितम् (ठ) ॥४१

पुरोहिता ऊचुः ।

दीर्घायुरप्रतिहत-बलवीर्य्यसमन्वितः ।
पुत्र-पौत्र-धनैश्वर्य्ययुक्तो वत्स ! भवोत्तम ॥४२॥

पराशर उवाच ।

इत्युक्त्वा तं ततो गत्वा यथावृत्तं पुरोहिताः ।
दैत्यराजाय सकलमाचचक्षुर्महामुने (ड) ॥४३॥

इति श्रीविष्णुपुराणे प्रथमेंऽशेऽष्टादशोऽध्यायः ।

स्पष्टमन्यत् ॥४३॥

(ञ) यथेति यत इत्यर्थः। तथेति तत इत्यर्थः।

(ट) पापः विद्वेषवान् न अस्मि।

(ठ) प्रश्रयेण विनयेन अन्वितं प्रश्रयेण प्रीतिमूलक-प्रार्थनया वा अन्वितं तं प्रह्लादम्, अथवा क्रियाविशेषणमिदम्।

(ड) आचचक्षुरित्यत्र परस्मैपदमसार्षम्।

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाभिधायां वा विष्णुपुराणटीकायां प्रथमांशे अष्टादशोऽध्यायः ॥

पाठान्तराणि :—

(७—१) ततः सूदा भयत्रस्ता— ।
(९—२)—उत्पादयत मा चिरम्।
(१३—३) श्लाघ्यः पिता समस्तानां— ।
(२२—४) मरीचिमिश्रैर्दक्षाद्यैः— ।
(२४—५) विमुक्तैश्चैकतो लभ्यं— ।

३१ श्लोकात् परं कश्चित् श्लोकोऽधिको दृश्यते, स यथा—

कर्म्मणा जायते सर्व्वं कर्म्मैव गतिसाधनम् ।
तस्मात् सर्व्वप्रयत्नेन साधुकर्म्म समाचरेत् ॥

(३१—६) शूलेन साधु संक्रुद्धा— ।
(३४—७) —पतिता दैत्ययाजकैः ।
(३८—८) —मन्यमानोऽनपायिनम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकोनविंशोऽध्यायः ।

[प्रह्लादं प्रति हिरण्यकशिपोरुक्तिः, प्रह्लादस्य विष्णुस्तवश्च ।]

पराशर उवाच ।

हिरण्यकशिपुः श्रुत्वा तां कृत्यां वितथीकृताम् ।
आहूय पुत्रं पप्रच्छ प्रभावस्यास्य कारणम् (क) ॥१॥

हिरण्यकशिपुरुवाच ।

प्रह्लाद ! सुप्रभावोऽसि किमेतत् ते विचेष्टितम् ।
एतन्मन्त्रादिजनितमुताहो सहजं तव ॥२॥

पराशर उवाच ।

एवं पृष्टस्तदा पित्रा प्रह्लादोऽसुरबालकः ।
प्रणिपत्य पितुः पादाविदं वचनमब्रवीत् ॥३॥

प्रह्लाद उवाच ।

न मन्त्रादिकृतं तात ! न वा नैसर्गिकं मम ।
प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि ॥४॥
अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा ।
तस्य पापागमस्तात ! हेत्वभावान्न विद्यते (ख) ॥५॥
कर्म्मणा मनसा वाचा परपीड़ां करोति यः (ग) ।
तद्बीजजन्म फलति प्रभूतं तस्य चाशुभम् ॥६॥
सोऽहं न पापमिच्छामि न करोमि वदामि वा ।
चिन्तयन् सर्व्वभूतस्थमात्मन्यपि च केशवम् ॥७॥
शारीरं मानसं दुःखं दैवं भूतभवं तथा ।
सर्व्वत्र शुभचित्तस्य तस्य मे जायते कुतः (घ) ॥८॥
एवं सर्व्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्त्तव्या पण्डितैर्ज्ञात्वा सर्व्वभूतमयं हरिम् (ङ) ॥९॥

पराशर उवाच ।

इति श्रुत्वा स दैत्येन्द्रः प्रासादशिखरे स्थितः ।
क्रोधान्धकारितमुखः प्राह दैतेयकिङ्करान् ॥१०॥
दुरात्मा क्षिप्यतामस्मात् प्रासादाच्छतयोजनात् ।
गिरिपृष्ठे पतत्वस्मिन् शिलाभिन्नाङ्गसंहतिः ॥११॥

एकोनविंशोऽध्यायः ।

सहजं नैसर्गिकम् ॥१।२।३॥

सामान्यः समानः ॥४॥

किञ्च अन्येषां यः पापानि तत्फलानि दुःखानि न चिन्तयति, तस्य पापागमो दुःखागमो नास्ति ॥५॥

यतस्तत् पीड़ाकारणमेव बीजं तस्माद् जन्म यस्य तद् पापं, तस्य कर्त्तुः । अत्यधिकं फलति दुःखफलाल च ते ॥६।८॥

एवं सर्वभूतमयं हरिं ज्ञात्वा सर्वेषु भूतेषु तद्भ कर्त्तव्या ॥९॥

क्रोधेनान्धकारितं जातान्धकारमिव दुष्प्रेक्ष्यं यस्य सः ॥१०॥

(क) वितथीकृतां विफलीकृताम् । अस्य कृत्यावैफल्य-प्रयोजकस्य प्रभावस्य सामर्थ्यस्य । कारणं पप्रच्छ । कुतः कारणात् त्वमेवं कृत्यामपि मत्पुरोहितप्रयुक्तां विफलीकर्त्तुं समर्थ इति पृष्टवानित्यर्थः ।

(ख) हेत्वभावादिति—हेतोः परपापचिन्तनरूपस्य कारणस्य अभावात् विरहात् । हेत्वभावे फलाभावनियमादिति भावः ।

(ग) परपापचिन्तनस्य तत्करणस्य च पापागमहेतु प्रकटयति कर्मणेत्यादिना ।

(घ) स्वस्य निरुक्तपापागमहेत्वभावादेव शारीरादि विरहमुपपादयति सोऽहमित्यादिना कुत इत्यन्तेन ।

(ङ) भक्तिरिति—सर्वभूतमये हराविति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततस्तं चिक्षिपुः सर्व्वे बालं दैतेयदानवाः (च) ।
पपात सोऽप्यधः क्षिप्तो हृदयेनोद्वहन् हरिम् ॥१२॥
पतमानं जगद्धात्री जगद्धातरि केशवे ।
भक्तियुक्तं दधारैनमुपसंगम्य मेदिनी (छ) ॥१३॥
ततो विलोक्य तं स्वस्थमविशीर्णास्थिपञ्जरम् ।
हिरण्यकशिपुः प्राह शम्बरं मायिनां वरम् ॥१४॥

हिरण्यकशिपुरुवाच ।

नास्माभिः शक्यते हन्तुमसौ दुर्बुद्धिबालकः ।
मायां वेत्ति भवांस्तस्मान्मायययैनं निषूदय ॥१५॥

शम्बर उवाच ।

सूदयाम्येष दैत्येन्द्र पश्य मायाबलं मम ।
सहस्रमात्रं मायानां यस्य कोटिशतं तथा ॥१६॥

पराशर उवाच ।

ततः स ससृजे मायां प्रह्लादे शम्बरोऽसुरः ।
विनाशमिच्छन् दुर्बुद्धिः सर्व्वत्र समदर्शिनि ॥१७॥
समाहितमतिर्भूत्वा शम्बरेऽपि विमत्सरः ।
मैत्रेय ! सोऽपि प्रह्लादः सस्मार मधुसूदनम्(ज) ॥१८
ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् ।
आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम् (झ) ॥१९
तेन मायासहस्रं तच्छम्बरस्याशुगामिना ।
बालस्य रक्षता देहमैकैकश्येन सूदितम् ॥२०॥
संशोषकं तथा वायुं दैत्येन्द्रस्त्विदमब्रवीत् ।
शीघ्रमेष ममादेशाद् दुरात्मा नीयतां क्षयम् ॥२१॥
तथेत्युक्त्वा तु सोऽप्येनं विवेश पवनो लघु ।
शीतोऽतिरूक्षः शोषाय तद्देहस्यातिदुःसहः(ञ) ॥२२
तेनाविष्टमथात्मानं स बुद्ध्वा दैत्यबालकः ।
हृदयेन महात्मानं दधार धरणीधरम् (ट) ॥२३॥
हृदयस्थस्ततस्तस्य तं वायुमतिभीषणम् ।
पपौ जनार्द्दनः क्रुद्धः स ययौ पवनः क्षयम् ॥२४॥
क्षीणासु सर्व्वमायासु पवने च क्षयं गते ।
जगाम सोऽपि भवनं गुरोरेव महामतिः ॥२५॥

शस्त्रविषाग्निकृत्यादीनां मणिमन्त्रादिभिः स्तम्भनं सम्भवति, पतने तु न किञ्चित् प्रभवति इत्याशयेन दैत्यान् आदिशति—'दुरात्मा क्षिप्यता'मिति ॥१४॥

वास्तवैरुपायैर्हन्तुमशक्यत्वात् तद्वधे मायाविनं नियुङ्क्ते—'नास्माभि'रिति । निषूदय विनाशय ॥१५।१८॥

सुदर्शनं शुद्धज्ञानमयम् ॥१९॥

अतस्तेन मायासहस्रं प्रत्येकं विनाशितम् ॥२०॥

दृश्येषु बधोपायेषु प्रतिघातमसौ करोतीति अदृश्यं वायं नियुङ्क्ते इत्याह—'संशोषक'मिति ॥२१॥

लघु शीघ्रम् । लघुरिति पाठे लघुवान् शीतोऽतिरूक्षश्च शीतज्वरप्रायः ॥२२॥

तेनाविष्टं व्याप्तम् । धरणीधरम् वायुभक्ष्यं शेषस्वरूपम् ॥२३।२८॥

(च) दैतेय-दानवाः दितिजा दनुजाश्च ।

(छ) पतमानमित्यत्र शानच्प्रत्यय आर्षः ।

(ज) समाहिता निरुद्धबहिर्वृत्तिः मतिः चित्तं यस्य तथाभूतः । शम्बरेऽपि अपकारकारिणि तस्मिन् मायाप्रयोक्तरि शम्बरासुरेऽपि विमत्सरः द्वेषशून्यः ।

(झ) भगवता विष्णुना समाज्ञप्तमिति सम्बन्धः ।

(ञ) अतिदुःसह इति नैष्ठिककृत्प्रत्यययोगेऽपि तद्-देहस्येति सम्बन्धसामान्यविवक्षया षष्ठी । तद्देहस्य प्रह्लाद-शरीरस्येत्यर्थः ।

(ट) धरणीधरमित्यत्र टीकायां 'धरणी-धरं वायुभक्ष्यं शेष-स्वरूप' मिति स्वामी । अत्र वायुः भक्ष्यः यस्य तम् । शेष-स्वरूपम् अनन्तनागस्वरूपम् । विष्णोः सर्वदेवमयत्वात् सर्वभूतमय-त्वाद् वा । शेषनागस्य वायुभुक्त्वञ्च नागत्वात्—'उरगः पन्नगो भोगी जिक्षगः पवनाशन' इति कोषाच्च तत्सिद्धेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहन्यहन्यथाचार्य्यो नीतिं राज्यफलप्रदाम् ।
ग्राहयामास तं बालं राज्ञामुशनसा कृताम्(ठ) ॥२६॥
गृहीतनीतिशास्त्रं तं विनीतञ्च यदा गुरुः ।
मेने तदैनं तत्पित्रे कथयामास शिक्षितम् ॥२७॥

आचार्य्य उवाच

गृहीतनीतिशास्त्रस्ते पुत्रो दैत्यपते ! कृतः ।
प्रह्लादस्तत्त्वतो वेत्ति भार्गवेण यदीरितम् (ड) ॥२८॥

हिरण्यकशिपुरुवाच ।

मित्रेषु वर्त्तेत कथमरिवर्गेषु भूपतिः ।
प्रह्लाद ! त्रिषु कालेषु मध्यस्थेषु कथं चरेत् ॥२९॥
कथं मन्त्रिष्वमात्येषु बाह्येष्वभ्यन्तरेषु च ।
चारेषु चौरवर्गेषु शङ्कितेष्वितरेषु च ॥३०॥
कृत्याकृत्यविधानेषु (ढ) दुर्गाटविकसाधने ।
प्रह्लाद कथ्यतां सम्यक् तथा कण्टकशोधने ॥३१॥
एताञ्चान्यच्च सकलमधीतं भवता यथा ।
तथा मे कथ्यतां ज्ञातुं तवेच्छामि मनोगतम् ॥३२॥

पराशर उवाच ।

प्रणिपत्य पितुः पादौ तथा प्रश्रयभूषणः ।
प्रह्लादः प्राह दैत्येन्द्रं कृताञ्जलिपुटस्तथा ॥३३॥

प्रह्लाद उवाच ।

ममोपदिष्टं सकलं गुरुणा नात्र संशयः ।
गृहीतञ्च मया किन्तु न सदेतन्मतं मम ॥३४॥
साम चोपप्रदानञ्च भेददण्डौ तथापरौ ।
उपायाः कथिताः सर्व्वे मित्रादीनाञ्च साधने ॥३५॥
तानेवाहं न पश्यामि मित्रादींस्तात ! मा क्रुधः ।
साध्याभावे महाबाहो ! साधनैः किं प्रयोजनम् ॥३६॥
सर्व्वभूतात्मके तात ! जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥३७॥

त्रिषु कालेषु क्षयवृद्धितत्साम्यसमयेषु ॥२९॥

मन्त्रिषु बुद्धिसहायेषु । अभ्यन्तरेषु अन्तःपुरमहानसादावधिकृतेषु दूतेषु वा । शङ्कितेषु जित्वा बलाद्दासीकृतेषु भूतेषु इतरेषु असत्सङ्गिषु च ॥३०॥

कृत्याकृत्यविधानम्—सन्धिविग्रहादिषु कुत्र किं कृत्यं, कुत्र किमकृत्यमित्येष प्रकारः । यद्वा कृत्याः (ढ) शत्रुभिर्भेद्याः, तेषामकृत्यविधानम् अभेद्यत्वकरणं दुर्गपर्वतोदकादि । आटविकाः महारण्यनिवासिनः । पुलिन्दाः म्लेच्छादयः साधनं वशीकरणम् । कण्टकाः चोराः गूढ़शत्रवो वा तेषां शोधनं निरसनम् ॥३१॥

अन्यच्च सामभेदादि ॥३२॥

प्रश्रय एव भूषणं यस्य सः ॥३३।३४॥

कुपितस्य स्तुत्यादिभिः साधनं साम । ऐकमत्यं स्थितानां भयजननादिना पृथक्करणं भेदः ।

भूमिधनादिसमर्पणमुपादानम्, अर्थापहारादिदण्ड इति उपायाः ॥३५॥

मा क्रुधः क्रोधं मा कार्षीः ॥३६॥

सर्वभूतात्मके सर्वेषां भूतानामात्मनि परमात्मनि सर्वजीवनियन्तरि ॥३७॥

(ठ) राज्ञां राज्यफलप्रदां राज्यरूपफलनिर्वर्त्तिकामिति सम्बन्धः । उशनसा दैत्यगुरुणा शुक्राचार्य्येण कृतां नीतिं शुक्रनीतिमित्यर्थः । ग्राहयामास शिक्षयामास ।

(ड) कृत इति अस्माभिरिति शेषः । भार्गवेण शुक्राचार्य्येण यत् ईरितं कथितम् ।

(ढ) कृत्याः शत्रुभिर्भेद्या इत्यत्र कृत्या इति कृन्तते रूपम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्यस्ति भगवान् विष्णुर्मयि चान्यत्र चास्ति सः ।
ततोऽयं मित्रं मे शत्रुश्चेति पृथक् कुतः ॥३८॥

दृष्टारम्भैरलमत्यर्थं दुष्टारम्भोक्तिविस्तरैः ।
विद्यान्तर्गतैर्यत्नः कर्त्तव्यस्तात ! शोभने ॥३९॥

द्धाबुद्धिरविद्यायामज्ञानात् तात ! जायते ।
लोऽग्निं किं न खद्योतमसुरेश्वर ! मन्यते ॥४०॥

त् कर्म्म यन्न बन्धाय सा विद्या या विमुक्तये ।
यासायापरं कर्म्म विद्यान्या शिल्पनैपुणम् ॥४१॥

तदवगम्याहमसारं सारमुत्तमम् ।
शामय महाभाग ! प्रणिपत्य ब्रवीमि ते ॥४२॥

चिन्तयति को राज्यं को धनं नाभिवाञ्छति ।
प्राप्ति भाव्यमेवैतदुभयं प्राप्यते नरैः ॥४३॥

सर्व एव महाभाग ! महत्त्वं प्रति सोद्यमाः ।
तथापि पुंसां भाग्यानि नोद्यमा भूतिहेतवः ॥४४॥

जड़ानामविवेकानामसुराणामपि प्रभो ।
भोग्यभोज्यानि राज्यानि सन्त्यनीतिमतामपि ॥४५॥

तस्माद् यतेत पुण्येषु य इच्छेन्महतीं श्रियम् ।
यतितव्यं समत्वे च निर्व्वाणमपि चेच्छता ॥४६॥

देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ॥४७॥

एतद्विजानता सर्व्वं जगत् स्थावरजङ्गमम् ।
द्रष्टव्यमात्मवद् विष्णुर्यतोऽयं विश्वरूपधृक् ॥४८॥

एवं ज्ञाते स भगवाननादिः परमेश्वरः ।
प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः(ण) ॥४९॥

तदेवाह—'त्वय्यस्ती'ति । पृथग् भेदः कुतः ॥३८॥

दुष्ट रागद्वेषादिपूर्वका ये आरम्भा उद्यमाः तेषामुक्तिनैर्नीतिशास्त्रैरलम् । दृष्टारम्भेति पाठे, दृष्टा ऐहिकार्थारम्भाः । शोभने निष्कामे आत्मविद्यायाञ्च ॥३९॥

ननु च—"आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः । ज्ञास्त्रचतुर्थास्तु विद्या अष्टादशैव तु" इति स्मृतेर्दण्डनीत्यादिभिरपि विद्यैव, कथमविद्यान्तर्गतैरित्युच्यते ? तत्राह—'बालबुद्धि'रिति । बालः खद्योतमग्निं किं न मन्यते ? किन्तु मन्यते एव, तद्वत् ॥४०॥

शोभने यत्नः कर्त्तव्य इति यदुक्तं तदेव शोभनकर्मादिकमाह—'तत् कर्मे'ति । अपरं अर्थकामाद्यर्थं कर्म आयासाय श्रमायैव । अन्या विद्या अर्थशास्त्रादिः । शिल्पनैपुणम् चित्रालिकादिशिल्पविद्यावत् कौशलमात्रमेव, तुच्छफलमित्यर्थः ॥४१॥

तदेतद् राज्यादिसाध्यसमारम्भं तुच्छं ज्ञात्वा उत्तमं साध्यं यत् प्रकर्षेण ब्रवीमि तन्निशामय इत्यन्वयः ॥४२॥

किञ्च राज्यादेः श्रेष्ठफलत्वेऽपि तदर्थं पुण्ये यत्नः कार्यः, न केवलं दृष्टार्थोद्यममात्रे । तस्य व्यभिचारित्वादित्याह—'नै'ति त्रिभिः । भाव्यं प्राक्तनपुण्यवशाद् भवितव्यमेव । तदुभयं राज्यं धनञ्च प्राप्यते ॥४३॥

महत्त्वं राज्यधान्यादिविभूतिं प्रति, भाग्यान्येव भूतेः राज्यादिश्रियो हेतवः । न तु उद्यमाः ॥४४॥

तैर्विनापि राज्यादेर्दृश्यमानत्वादित्याह—'जड़ाना'मिति—अनुद्यमानाम् नष्टानष्टविवेकशून्यानां राज्यानि सन्ति ॥४५।४६॥

समत्वदृष्ट्या निर्वाणमाह—'देवा' इति त्रिभिः ॥४७।५०॥

(ण) तस्मिन् अच्युते प्रसन्ने सतीति शेषः । भावे सप्तमी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

एतच्छ्रुत्वा तु कोपेन समुत्थाय वरासनात् ।
हिरण्यकशिपुः पुत्रं पदा वक्षस्यताड़यत् ॥५०॥

उवाच च स कोपेन सामर्षः प्रज्वलन्निव ।
निष्पिष्य पाणिना पार्णिं हन्तुकामो जगद् यथा ॥५१

हिरण्यकशिपुरुवाच ।

हे विप्रचित्ते ! हे राहो ! हे बलेष महार्णवे ।
नागपाशैर्दृढ़ैर्बद्ध्वा क्षिप्यतां मा विलम्ब्यताम् ॥५२॥

अन्यथा सकलो लोकस्तथा दैतेयदानवाः ।
अनुयास्यन्ति मूढ़स्य मतमस्य दुरात्मनः ॥५३॥

बहुशो वारितोऽस्माभिरयं पापस्तथापरैः(१) ।
स्तुतिं करोति दुष्टानां वध एवोपकारकः(त) ॥५४॥

पराशर उवाच ।

ततस्ते सत्वरा दैत्या बद्ध्वा तं नागबन्धनैः ।
भर्त्तुराज्ञां पुरस्कृत्य चिक्षिपुः सलिलालये(२)(थ)॥५५

ततश्चचाल चलता प्रह्लादेन महार्णवः ।
उद्वेलोऽभूत् परं क्षोभमुपेत्य च समन्ततः(छ) ॥५६

भूर्लोकमखिलं दृष्ट्वा प्लाव्यमानं महाम्भसा ।
हिरण्यकशिपुर्दैत्यानिदमाह महामते ॥५७॥

हिरण्यकशिपुरुवाच ।

दैतेयाः सकलैः शैलैरत्रैव वरुणालये ।
निश्छिद्रैः सर्वशः सर्वैश्चीयतामेष दुर्म्मतिः ॥५८॥

नाग्निर्दहति नैवायं शस्त्रैश्छिन्नो न चोरगैः ।
क्षयं नीतो न वातेन न विषेण न कृत्यया ॥५९॥

न मायाभिर्न चैवोच्चात् पातितो न च दिग्गजैः ।
बालोऽतिदुष्टचित्तोऽयं नानेनार्थोऽस्ति जीवता ॥६०

तदेष तोयधावत्र समाक्रान्तो महीधरैः ।
तिष्ठत्वब्दसहस्रान्तं प्राणान् हास्यति दुर्म्मतिः(ध)॥६१

ततो दैत्या दानवाश्च पर्व्वतैस्तं महोदधौ(३) ।
आक्रम्य चयनं चक्रुर्योजनानि सहस्रशः ॥६२॥

सामर्षः असहनः ॥५१॥

अयं तावत् सर्वैरुपायैर्न हन्तुं शक्यते, उपेक्षितश्चेत् सकलं लोकं विष्णुभक्तिं कृत्वा नाशयेत् । अतो नागपाशैर्बद्ध्वा समुद्रे क्षिप्त्वा पर्वतैराक्रमणीयः । ततः कालेन मरिष्यतीत्याह—'हे विप्रचित्ते इति' ॥५२।५३॥

दोषोपशान्तिहेतुत्वाद् वधो दुष्टानामपि उपकार एव ॥५४।५७॥

वरुणालये समुद्रे, निरन्तरैः पर्वतैश्चीयताम् उपर्युपरि निक्षिप्तैराक्रम्यताम् ॥५८।६२॥

(त) तथा अपरैः अस्मद्व्यतिरिक्तैः पुरोहितादिभिरपि वारितः तथापीति शेषः । स्तुतिं करोति मम शत्रोरिति शेषः । अतः अस्य दुष्टस्य वध एवोचित इति भावः । तत्समर्थनार्थमाह —'दुष्टाना'मित्यादि ।

(थ) सलिलालये महार्णवे ।

(द) चलता चाञ्चल्यं श्रयता अङ्गान्युत्क्षिपतेति यावत् । उद्वेलः अतिक्रान्तवेलाभूमिः अभूत् ।

(ध) अत्र तोयधौ समुद्रे । महीधरैः पर्वतैः । अब्दसहस्रान्तं वर्षसहस्रकालपर्य्यन्तम् । प्राणान् हास्यति तत्कालाभ्यन्तरे कदाचिदिति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चित्तः पर्व्वतैरन्तः समुद्रस्य महामतिः ।
आह्निकवेलायामेकाग्रमतिरच्युतम् ॥६३॥

प्रह्लाद उवाच ।

नमस्ते पुण्डरीकाक्ष ! नमस्ते पुरुषोत्तम ।
नमस्ते सर्व्वलोकात्मन् ! नमस्ते तिग्मचक्रिणे ॥६४॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥६५॥

ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते पुनः ।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्त्तये ॥६६॥

देवा यक्षासुराः सिद्धा नागा गन्धर्व्वकिन्नराः ।
पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा ॥६७॥

क्षिणः स्थावराश्चैव पिपीलिकाः सरीसृपाः ।
भूमिरापो नभो वायुः शब्दः स्पर्शस्तथा रसः ॥६८॥

रूपं गन्धो मनो बुद्धिरात्मा कालस्तथा गुणाः ।
एतेषां परमार्थश्च सर्व्वमेतत् त्वमच्युत ॥६९॥

विद्याविद्ये भवान् सत्यमसत्यं त्वं विषासृते ।
प्रवृत्तञ्च निवृत्तञ्च कर्म्म वेदोदितं भवान्(न) ॥७०॥

समस्तकर्म्मभोक्ता च कर्म्मोपकरणानि च ।
त्वमेव विष्णो ! सर्व्वाणि सर्व्वकर्म्मफलञ्च यत् ॥७१॥

मय्यन्यत्र तथाशेषभूतेषु(४) भुवनेषु च ।
तवैव व्याप्तिरैश्वर्य्यगुणसंसूचिका प्रभो ॥७२॥

त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च यज्विनः(५) ।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्(प) ॥७३॥

रूपं महत् ते स्थितमत्र विश्वं
ततश्च सूक्ष्मं जगदेतदीश ।
रूपाणि सर्व्वाणि च भूतभेदा-
स्तेष्वन्तरात्माख्यमतीव सूक्ष्मम् ॥७४॥

आह्निकवेलायाम् अहरहःकर्त्तव्यभोजनादिसमये ॥६३।६४॥

ब्रह्मण्यानां देवाय श्रेष्ठाय ॥६५।६६॥

विश्वरूपत्वेन स्तौति—'देवा' इति सप्तभिः । देवा इत्यादौ 'सर्वं त्वमेवे'ति तृतीयेनान्वयः । यक्षाश्चासुराश्च ॥६७॥

आत्मा अहंकारः । गुणाः सत्त्वादयः । एतेषां परमार्थः सत्यं कारणम् ॥६८।७१॥

ऐश्वर्यं सामर्थ्यातिशयम् । गुणांश्च सत्यसंकल्पत्वादीन् संसूचयतीत्यैश्वर्य्यगुणसंसूचिका तवैव सच्चिद्रूपस्य व्याप्तिः ॥७२॥

अत एव त्वामेव योगिनश्चिन्तयन्ति । त्वामेव च याजका यजन्ति । (त्वमेव) पितृदेवस्वरूपधृक् ॥७३॥

उक्तं प्रापञ्चिकम् अनुवदन् शुद्धस्वरूपमाह—'रूप'मिति द्वाभ्याम् । विश्वरूपं सावरणं ब्रह्माण्डं एतज्जगद्ब्रह्माण्डान्तर्वर्त्तिविराड्रूपम् । 'रूपं महत्ते स्थितमत्र विश्व'मिति पाठे महद् रूपं विश्वं ब्रह्माण्डम् अत्र स्थितं जगदेतत् ततश्च सूक्ष्मं रूपमित्यन्वयः । ततोऽपि सूक्ष्माणि रूपाणि भूतभेदाः जरायुजादि चतुर्विधा देहाः । तेष्वपि अन्तरात्माख्यं क्षेत्रज्ञसंज्ञमतीव सूक्ष्मं रूपम् ॥७४॥

(न) प्रवृत्तं प्रवृत्तिलक्षणं, निवृत्तं निवृत्तिलक्षणम् । तदुक्तं मनुना—प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम् । इति ।

(प) हव्यं देवोद्देश्यकं हविः, कव्यं पितृपुरुषोद्देश्यकं हविः, ते भुङ्क्त इति हव्यकव्यभुक् । पितॄणां पितृपुरुषाणां देवानाञ्च स्वरूपधृक्, तथाहि पितृस्वरूपं धृत्वा कव्यं देवस्वरूपं धृत्वा च हव्यं त्वमेव भुङ्क्ते इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्माच्च सूक्ष्मादिविशेषणाना-
मगोचरे यत् परमात्मरूपम् ।
किमप्यचिन्त्यं तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय ॥७५॥

सर्व्वभूतेषु सर्व्वात्मन् ! या शक्तिरपरा तव ।
गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर ॥७६॥

यातीतगोचरा वाचां मनसाञ्चाविशेषणा ।
ज्ञानिज्ञानपरिच्छेद्या तां वन्दे चेश्वरीं पराम् ॥७७॥

ॐ नमो वासुदेवाय तस्मै भगवते सदा ।
व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः ॥७८

नमस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने ।
नामरूपं न यस्यैको योऽस्तित्वेनोपलभ्यते ॥७९॥

यस्यावताररूपाणि समर्च्चन्ति दिवौकसः ।
अपश्यन्तः परं रूपं नमस्तस्मै महात्मने ॥८०॥

योऽन्तस्तिष्ठन्नशेषस्य पश्यतीशः शुभाशुभम् ।
तं सर्व्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम् ॥८१॥

नमोऽस्तु विष्णवे तस्मै यस्याभिन्नमिदं जगत् ।
ध्येयः स जगतामाद्यः प्रसीदतु ममाव्ययः ॥८२॥

यत्रोतमेतत् प्रोतञ्च विश्वमक्षरमव्ययम् ।
आधारभूतः सर्व्वस्य स प्रसीदतु मे हरिः ॥८३॥

तस्मादपि परं सूक्ष्मादिविशेषणानाम् अविषये वर्त्तमानं तव किमप्यचिन्त्यं रूपमस्ति, तस्मै पुरुषोत्तमाख्याय ते रूपाय नमः। "यस्मात् क्षरमतीतोऽहम् अक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम" इति स्मृतेः ॥७५॥

नन्वेवम्भूतस्य कुतः स्थूलसूक्ष्माद्यनेकरूपत्वमित्याशङ्क्य तदुपपादकं शक्तिद्वयं प्रणमति—'सर्वेषु भूतेष्विति द्वाभ्याम्। अपरा जड़शक्तिः प्रकृत्याख्या ॥७६॥

वाचां मनसाश्च या अतीतगोचरा अतिक्रान्तो गोचरो यया सा। यस्मादविशेषणा जातिगुणादिविशेषणशून्या। ज्ञानिनां क्षेत्रज्ञानां यानि शब्दादिविषयाणि प्रादेशिकानि ज्ञानानि तैः परिच्छेद्या सर्वतः प्रसरद्भिर्निर्झरोदकैर्महासरोवत् सर्वगतत्वेनावगम्या। यद्वा ज्ञानी जीवः ज्ञानं बुद्धिः, तदुभयमपि परिच्छेद्यं वाह्यघटादिवत् प्रकाश्यं यस्याः सा, तस्याः सर्वभासकत्वात्। तामीश्वरीम् ईश्वरस्य तव स्वरूपभूतां परां चिच्छक्तिं वन्दे। "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविको ज्ञानबलक्रिया च" इति श्रुतेः। अत एवम्भूतशक्तिद्वयेनाचिन्त्यनिरतिशयैश्वर्यात् शुद्धत्वम् स्थूलसूक्ष्माद्यनेकरूपत्वञ्च सङ्गच्छत एवेति ॥७७॥

द्वादशाक्षरमन्त्रप्रतिपाद्यरूपेण प्रणमति —'ओं नम' इति द्वाभ्याम् ॥७८॥

'नमस्तस्मै' इति त्रिभिः पुनरुक्त्या 'रूपं मह'दिति श्लोकोक्तचैतन्योपाधिभूतैर्विश्वरूपजगद्रूपभूतरूपैः प्रणामः। नामरूपं न यस्य तस्मै नम इत्यनुषङ्गात् शुद्धक्षेत्रज्ञरूपेण एकोऽस्तित्वेनोपलभ्यते। तस्मै महात्मने नमः इति पूर्णब्रह्मरूपेण च प्रणाम इति द्रष्टव्यम् ॥७९॥

नन्वेवं केवलश्चेत् परमेश्वरस्तर्हि तस्याविषयत्वात् अर्चनादिकं न घटते इत्याशङ्क्याह— 'यस्ये'ति ॥८०॥

नन्वेवं परमेश्वर एव चेदर्चनीयः, तर्हि इन्द्रादीनां पूज्यता कथमित्याशङ्क्य तेषामन्तर्यामिस्वरूपेणैव पूज्यतेत्याशयेनाह—'योऽन्त'रिति ॥८१॥

जड़स्यापि जगतः परमेश्वरात्मत्वेन उपास्यत्वमस्ति, किं पुनर्दैवतानामित्याशयेनाह—नमोऽस्त्व'ति। अभिन्नत्वे हेतुः जगतामाद्यः कारणमिति ॥८२॥

तदुपपादयन् आह—'अत्रे'ति। यस्मिन् ओतं विश्वं दीर्घतन्तुषु पटवद् ग्रथितम्, प्रोतञ्च तिर्यक् तन्तुषु पट इवानुस्यूतम्। अव्ययं प्रधानमहदादिरूपम् ॥८३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मोऽस्तु विष्णवे तस्मै नमस्तस्मै पुनः पुनः ।
त्र सर्व्वं यतः सर्व्वं यः सर्व्वं सर्व्वसंश्रयः ॥८४॥

र्व्वगत्वादनन्तस्य स एवाहमवस्थितः ।
ताः सर्व्वमहं सर्वं मयि सर्वं सनातने ॥८५॥

अहमेवाक्षयो नित्यः परमात्मात्मसंश्रयः ।
ब्रह्मसंज्ञोऽहमेवाग्रे तथान्ते च परः पुमान् ॥८६॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे एकोनविंशोऽध्यायः ।

उक्तं सर्वात्मत्वं संक्षेपतः स्मरन् प्रणमति—'नम' इति । सर्वं प्रलये तस्मै नमः । यतः सर्वं सृष्टौ तस्मै नमः । यः सर्वं स्थितौ पुनस्तस्मै नमः । अत एव यः सर्वस्य संश्रयः धारः पुनस्तस्मै नमः इत्यवतारस्यावस्थाभेदान्नमस्कारा-वृत्तिः ॥८४॥

तदेवं विष्णोर्ब्रह्मतया सर्वात्मत्वं भावयन् स्वस्यापि ब्रह्मत्वाविर्भावेण तदभेदं पश्यन्नाह— 'सर्वगत्वा'दिति द्वाभ्याम् ॥८५॥

अग्रे सृष्टेः पूर्वम्, अन्ते च प्रलयानन्तरम् ॥८६॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां प्रथमांशे एकोनविंशोऽध्यायः ।

पाठान्तराणि—

(५४—१) पापस्तथाप्यरेः ।
(५५—२) सलिलार्णवे ।
(६२—३) तोयमधे ।
(७२—४) तथान्येषु ।
(७३—५) त्वां यजन्ति च याजकाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विंशोऽध्यायः

[श्रीभगवत आविर्भावः, हिरण्यकशिपुवधश्च]

पराशर उवाच ।

एवं सञ्चिन्तयन् विष्णुमभेदेनात्मनो द्विज ।
तन्मयत्वमवाप्याग्र्यं मेने चात्मानमच्युतम् ॥१॥
विसस्मार तथात्मानं नान्यत् किञ्चिदजानत ।
अहमेवाव्ययोऽनन्तः परमात्मेत्यचिन्तयत्(क) ॥२॥
तस्य तद्भावनायोगात् क्षीणपापस्य वै क्रमात् ।
शुद्धेऽन्तःकरणे विष्णुस्तस्थौ ज्ञानमयेऽच्युतः ॥३॥
योगप्रभावात् प्रह्लादे जाते विष्णुमयेऽसुरे ।
चलत्युरगबन्धैस्तैर्मैत्रेय त्रुटितं क्षणात्(ख) ॥४॥
भ्रान्तग्राहगणः सोर्म्मिर्मयौ क्षोभं महार्णवः ।
चचाल च मही सर्वा सशैलवनकानना ॥५॥
स च तं शैलसम्पातं दैत्यैर्न्यस्तमथोपरि ।
प्रक्षिप्य तस्मात् सलिलान्निश्चक्राम महामतिः(ग) ॥६॥
दृष्ट्वा च स जगद् भूयो गगनाद्युपलक्षणम् ।
प्रह्लादोऽस्मीति सस्मार पुनरात्मानमात्मना ॥७॥
तुष्टाव च पुनर्धीमाननादिं पुरुषोत्तमम् ।
एकाग्रमतिरव्यग्रो यतवाक्कायमानसः (घ) ॥८॥

प्रह्लाद उवाच ।

ॐ नमः परमार्थार्थ स्थूलसूक्ष्मक्षराक्षर ।
व्यक्ताव्यक्त कलातीत सकलेश निरञ्जन(ङ) ॥९॥

विंशोऽध्यायः ।

आत्मानं प्रह्लादोऽहमिति विस्मृतवान् ॥१।२॥

क्षीणपापस्य ध्वस्तसमस्तकर्मवासनामलस्य ॥३॥

त्रुटितं छिन्नं, भावे क्तः ॥४॥

भ्रान्तो ग्राहगणो यस्मिन् सः । सोर्मिः ऊर्मिभिः सह वर्त्तमानः ॥५।८॥

हे परमार्थज्ञानरूप ! हे अर्थदृश्यरूप ! 'ज्ञानस्वरूपमत्यन्त-निर्मलं परमार्थतः । तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्' इत्युक्तत्वात् स्थूलजाग्रद्दृश्यरूप ! कलातीत निरवय ! सकल सावयव ! ईश नियामक ! निरञ्जन निर्लेप ॥९॥

(क) अजानतेत्यार्षम् । अन्यत् विष्णुव्यतिरिक्तम् अपरं किञ्चित् न अजानत । अथवा किञ्चित् किमपि स्वशरीरादिकं वस्तु अन्यत् विष्णुव्यतिरिक्तं न अजानत । सर्वमेव विष्णुस्वरूपमपश्यदित्यर्थः ।

(ख) उरगबन्धैः नागबन्धनैः । त्रुटितमित्यस्य भावे क्तप्रत्ययान्तस्य कर्त्तृपदमिदम् ।

(ग) 'भावे विहितः कृत्प्रत्ययो द्रव्यवत् प्रकाशते' इति न्यायेन शैलसम्पातं सम्पतितं शैलमित्यर्थः । उपरि प्रह्लादस्येति शेषः । महती मतिः बुद्धिर्यस्य सः सर्वत्र विष्णोरभेदप्रकारक-प्रशस्तबुद्धिसम्पन्नः । प्रह्लादस्यानेन विशेषणेन तस्य तादृशी महती मतिरेव प्रकृतशैलप्रक्षेपसामर्थ्ये बीजमभूदिति भावो व्यज्यते ।

(घ) एकाग्रा विषयान्तरव्यावृत्त्या विष्णुमात्रस्पर्शिनी मतिः यस्य तथाभूतः । यतानि संयमं प्राप्तानि वाक्कायमानसानि यस्य सः ।

(ङ) अत्र 'हे परमार्थ ज्ञानरूपे'ति स्वामी ।—ज्ञानरूपेति आत्मतत्त्वज्ञानरूप विष्णुस्वरूपदर्शनाद्यात्मकज्ञानरूपेति वा तस्यैव परमपुरुषार्थमोक्षसाधनतया परमार्थत्वौचित्यात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञान गुणाधार निर्गुणात्मन् गुणस्थिर ।
र्तामूर्त्त महामूर्त्ते सूक्ष्ममूर्त्ते स्फुटास्फुट ॥१०॥

रालसौम्यरूपात्मन् विद्याविद्यालयाच्युत ।
सद्रूप सद्भाव सदसद्भावभावन ॥११॥

त्यानित्यप्रपञ्चात्मन् निष्प्रपञ्चामलाश्रित ।
नेक नमस्तुभ्यं वासुदेवादिकारण ॥१२॥

स्थूलसूक्ष्मः प्रकटः प्रकाशो
यः सर्व्वभूतो न च सर्व्वभूतः ।
त्वं यतश्चैतदविश्वहेतो-
र्नमोऽस्तु तस्मै पुरुषोत्तमाय ॥१३॥

पराशर उवाच ।

त तच्चेतसो देवः स्तुतिमित्थं प्रकुर्वतः ।
विर्बभूव भगवान् पीताम्बरधरो हरिः ॥१४॥

ससम्भ्रमस्तमालोक्य समुत्थायाकुलाक्षरम् (च) ।
नमोऽस्तु विष्णवेत्यतद् व्याजहारासकृद् द्विज ॥१५॥

प्रह्लाद उवाच ।

देव प्रपन्नार्त्तिहर प्रसादं कुरु केशव (छ) ।
अवलोकनदानेन भूयो मां पावयाच्युत ॥१६॥

श्रीभगवानुवाच ।

कुर्व्वतस्ते प्रसन्नोऽहं भक्तिमव्यभिचारिणीम् ।
यथाभिलषितो मत्तः प्रह्लाद व्रियतां वरः ॥१७॥

प्रह्लाद उवाच ।

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ॥१८॥

या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु ॥१९॥

गुणान् अनक्ति स्वसत्ताप्रकाशाभ्यामनुरञ्जयतीति वा। नामाधार। गुणेषु स्थिर। परस्थितेति पाठे परमव्यक्तं स्थितेत्यर्थः। भक्तानां स्फुट, अन्येषामस्फुट ॥१०॥

रालसौम्यरूपाणामात्मन्! सदसद्रूपयोः कार्यकारणसद्भाव उत्पत्तिर्यस्मात् तावेव च सदसद्भावौ भावयति जनयतीति तथा ॥११॥

अमलैर्ज्ञानिभिराश्रित परमार्थेत्यादिषु आदिकारणेत्यन्तेषु षट्त्रिंशत्सम्बोधनेषु तुभ्यं नम इत्यनुषङ्गेन प्रत्येकं नमस्समाप्तिः कर्तव्या ॥१२॥

सर्वेषां भूतानां यः प्रकटः प्रकाशश्चिद्रूपत्वात्। अविश्वस्य सर्वकारणव्यतिरिक्तत्वात् ॥१३॥

तस्मिन् हरावेव चेतो यस्य ॥१४॥

विष्णवेति सन्धिरार्षः ॥१५॥

अवलोकनं प्रत्यक्षं दर्शनं तस्य दानेन ॥१६।१७॥

हे अच्युत! त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु, एकान्तभक्तिः परमप्रीत्यधीनेति तां प्रीतिं प्रार्थयते—'ये'ति यादृशी प्रीतिर्विषयेषु आसक्तानां, सा तादृशी प्रीतिर्मे हृदयात् मा अपसर्पतु मा अपयातु हृदये सदा तिष्ठत्वित्यर्थः। यद्वा हे माप लक्ष्मीपते! सा विषयप्रीतिस्त्वामनुस्मरतो हृदयात्

(च) आकुलानि सम्भ्रमेण पर्य्याकुलभूतानि अक्षराणि यत्र तद् यथा स्यात् तथेति व्याजहार—क्रियाया विशेषणमिदम्।

(छ) प्रपन्नस्य शरणागतस्य आर्त्तिं दुःखं हरति यस्तत्स्वरूपेत्यर्थः!

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीभगवानुवाच ।

मयि भक्तिस्तवास्त्येव भूयोऽप्येवं भविष्यति ।
वरस्तु मत्तः प्रह्लाद व्रियतां यस्तवेप्सितः ॥२०॥

प्रह्लाद उवाच ।

मयि द्वेषानुबन्धोऽभूत् संस्तूतावुद्यते तव(ज) ।
मत्पितुस्तत्कृतं पापं देव तस्य प्रणश्यतु ॥२१॥

शस्त्राणि पातितान्यङ्गे क्षिप्तो यच्चाग्निसंहतौ ।
दंशितश्चोरगैर्दत्तं यद्विषं मम भोजने (झ) ॥२२॥

बद्ध्वा समुद्रे यत् क्षिप्तो यच्चितोऽस्मि शिलोच्चयैः !
अन्यानि चाप्यसाधूनि यानि यानि कृतानि मे ॥२३॥

त्वयि भक्तिमतो द्वेषादघं तत्सम्भवञ्च यत् ।
त्वत्प्रसादात् प्रभो सद्यस्तेन मुच्येत मे पिता ॥२४

श्रीभगवानुवाच ।

प्रह्लाद सर्व्वमेतत् ते मत्प्रसादाद् भविष्यति ।
अन्यच्च ते वरं दद्मि व्रियतामसुरात्मज (ञ) ॥२५॥

प्रह्लाद उवाच ।

कृतकृत्योऽस्मि भगवन् वरेणानेन यत् त्वयि ।
भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणी ॥२६॥

धर्म्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ॥२७॥

श्रीभगवानुवाच ।

यथा ते निश्चलं चेतो मयि भक्तिसमन्वितम् ।
तथा त्वं मत्प्रसादेन निर्व्वाणं परमाप्स्यसि ॥२८॥

पराशर उवाच ।

इत्युक्त्वान्तर्दधे विष्णुस्तस्य मैत्रेय ! पश्यतः ।
स चापि पुनरागम्य ववन्दे चरणौ पितुः ॥२९॥

तं पिता मूर्द्ध्न्युपाघ्राय परिष्वज्य च पीडितम् ।
जीवसीत्याह वत्सेति बाष्पार्द्रनयनो द्विज(ट) ॥३०॥

प्रीतिमांश्चाभवत् तस्मिन्ननुतापी महासुरः ।
गुरुपित्रोश्चकारैवं शुश्रूषां सोऽपि धर्म्मवित् ॥३१॥

पितर्य्युपरतिं नीते नरसिंहस्वरूपिणा ।
विष्णुना सोऽपि दैत्यानां मैत्रेयाभूत् पतिस्ततः ॥३२॥

सर्पंतु निर्गच्छतु। तत् प्रीतौ सत्यां त्वदनुस्मरणायोगादित्यर्थः ॥१८।१९।२२॥

शिलोच्चयैः पर्वतौघैश्चितोऽस्मि ॥२३॥

(ज) तव संस्तुतौ उद्यते मयि मत्पितुः द्वेषानुबन्धः द्वेषानुवृत्तिः उत्तरोत्तरं द्वेषः अभूत् । इत्यन्वयः ।

(झ) अङ्गे ममेति शेषः । क्षिप्तः अहमिति शेषः । दंशितः अहमिति शेषः । भोजने भोज्यद्रव्ये ।

(ञ) ददामीति वाच्ये दद्मीति प्रयोग आर्षः ।

तेन पापेन मे पिता मुच्येत ॥२४।२५॥

वैष्णवानुभावदर्शनात् प्रीतिमांश्च तदा तस्मिन् अभवत् ॥३१॥

पुनश्च कालान्तरे ब्रह्मशापवशाद् उद्भूतेन विष्णुद्वेषणादिक्रोधात् तं हन्तुमुद्यते तत्पितरि नरसिंहस्वरूपेण विष्णुना उपरतिं नीते सति प्रह्लादो दैत्यानां पतिरभूत् ॥३२॥

(ट) वाष्पेण कृतानुशोचनजनितेन स्नेहजनितेन वा अश्रुणा आर्द्रे नयने यस्य सः । वत्स ! जीवसि इत्याह इत्यन्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकविंशः अध्यायः ।

[प्रह्लादवंशकथनम्]

पराशर उवाच ।

संह्लादपुत्र आयुष्मान् शिविर्वाष्कल एव च ।
विरोचनस्तु प्राह्लादिर्बलिर्ज्जज्ञे विरोचनात्(क) ॥१

बलेः पुत्रशतन्त्वासीद् बाणज्येष्ठं महामुने !
हिरण्याक्षसुताश्चासन् सर्व्व एव महाबलाः ॥२॥

उत्कुरः शकुनिश्चैव भूतसन्तापनस्तथा ।
महानाभो महाबाहुः कालनाभस्तथापरः ॥३॥

अभवन् दनुपुत्राश्च द्विमूर्द्धा शङ्करस्तथा ।
अयोमुखः शङ्कुशिराः कपिलः शम्बरस्तथा ॥४॥

एकचक्रो महाबाहुस्तारकश्च महाबलः ।
स्वर्भानुर्वृषपर्व्वा च पुलोमा च महाबलः ॥५॥

एते दनोः सुताः ख्याता विप्रचित्तिश्च वीर्य्यवान् ।
स्वर्भानोस्तु प्रभा कन्या शर्म्मिष्ठा वार्षपर्व्वणी(ख)

उपदानवी-हयशिराः (१) प्रख्याता वरकन्यकाः ।
वैश्वानरसुते चोभे पुलोमा कालका तथा ॥७॥

उभे सुते महाभागे मरीचेस्तु परिग्रहः ।
ताभ्यां पुत्रसहस्राणि षष्टिर्दानवसत्तमाः ॥८॥

पौलोमा कालकेयाश्च मारीचतनयाः स्मृताः ।
ततोऽपरे महावीर्य्या दारुणास्त्वतिनिर्घृणाः(ग) ॥९

सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा ।
व्यंशः शल्यश्च बलवान् नभश्चैव महाबलः ॥१०॥

वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा ।
अञ्जको नरकश्चैव(२) कालनाभस्तथैव च ॥ ११

एकोविंशोऽध्यायः

प्राह्लादिः प्रह्लादस्य पुत्रः ॥१॥

वाणो ज्येष्ठो यस्मिन् ॥२।३॥

एवं तावददितेर्दितेश्च वंशावुक्तौ। इदानीं क्रमप्राप्तानाम् अन्यासां कश्यपभार्याणां वंशान् वक्ष्यन् दनोर्वंशमाह—'अभवन्' इति सार्द्धनवभिः ॥४।५॥

एते प्रख्याता इति विशेषणेन हरिवंशमत्स्यादिषु दनोः सुतशते गणिता वैश्वानरादयश्च सूचिताः। शर्मिष्ठा वृषपर्वणः कन्या ॥६॥

उपदानवी च हयशिराश्च तस्यैव कन्या इति केचित् अन्यदीये इत्यन्ये, "वैश्वानरसुतायास्तु चतस्रश्चारुदर्शनाः उपदानवी हयशिराः पुलोमा कालका तथा" इति भागवताद्युक्तेः ॥७॥

मरीचेः कश्यपस्य परिग्रहो भार्या ॥८।९॥

सिंहिकायां हिरण्यकशिपोर्भगिन्यां विप्रचित्तेर्दनुसुताः ॥१०।१२॥

(क) संह्लादस्य तदाख्यस्य हिरण्यकशिपुपुत्रस्य पुत्रः। प्रह्लादस्य अपत्यं प्राह्लादिः। प्रह्लादशब्दात् अपत्यार्थे इण् प्रत्ययः।

(ख) वृषपर्वणः अपत्यं स्त्री वार्षपर्वणीति ष्णप्रत्ययान्तात् वृषपर्वन्—शब्दात् स्त्रियामीपि सिद्धम्।

(ग) दारुणाः भीषणाः, अतिनिर्घृणाः अतिनिष्ठुरप्रकृतयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वर्भानुश्च महावीर्य्यश्चक्रयोधी(३) महाबलः ।
एते ते दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः ॥१२॥

एतेषां पुत्रपौत्राश्च शतशोऽथ सहस्रशः ।
प्रह्लादस्य तु दैत्यस्य निवातकवचाः कुले ॥१३॥

समुत्पन्नाः सुमहता तपसा भावितात्मनः ।
षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्त्तिताः ॥१४॥

शुकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिका ।
शुकी शुकानजनयदुलूकी प्रत्युलूककान् ॥१५॥

श्येनी श्येनांस्तथा भासी भासान् गृध्रांश्च गृध्रयपि ।
शुच्यौदकान् पक्षिगणान् सुग्रीवी तु व्यजायत(घ)।१६

अश्वानुष्ट्रान् गर्द्दभांश्च ताम्रावंशः प्रकीर्त्तितः ।
विनतायास्तु पुत्रौ द्वौ विख्यातौ गरुड़ारुणौ ॥१७॥

सुपर्णः पततां श्रेष्ठो दारुणः पन्नगाशनः ।
सुरसायां सहस्रन्तु सर्पाणाममितौजसाम् ॥१८॥

अनेकशिरसां ब्रह्मन् खेचराणां महात्मनाम् ।
काद्रवेयास्तु बलिनः सहस्रममितौजसः ॥१९॥

सुपर्णवशगा ब्रह्मन् जज्ञिरे नैकमस्तकाः ।
तेषां प्रधानभूतास्तु शेषवासुकितक्षकाः ॥२०॥

शङ्खः श्वेतो महापद्मः कम्बलाश्वतरौ तथा ।
एलापत्रस्तथा (४) नागः कर्कोटक-धनञ्जयौ ॥२१॥

एते चान्ये च बहवो दन्दशूका विषोल्वणाः ।
गणं क्रोधवशं विद्धि तस्याः सर्व्वे च दंष्ट्रिणः(ङ)।२२

स्थलजाः पक्षिणोऽब्जाश्च दारुणाः पिशिताशनाः ।
क्रोधा तु जनयामास पिशाचांश्च महाबलान् ॥२३॥

सिंहावलोकनन्यायेन पुनराह—'प्रह्लादस्ये'ति । भावितात्मनः प्रह्लादस्येत्यन्वयः ॥१३॥

ताम्राया वंशमाह—'षडि'ति त्रिभिः । सुताः कन्याः ॥१४

ता एवाह—'शुकी'ति । सुग्रीवी वा शुचिर्वापि उलूकान् प्रत्युलूकांश्च सैवाजनयदित्यर्थः । न पुनरुलूकी संज्ञा अन्या अनिर्दिष्टत्वात् । "शुकी शुकानजनयदुलूको प्रत्युलूककान्" इति मात्स्योक्तेश्च ॥१५॥

शुच्यौदकान—शुचिरेव शुचौ सा औदकान् जलजान् पक्षिगणान् व्यजायत । सुग्रीवी तु अश्वादीन् व्यजायतेत्यन्वयः ॥१६॥

ताम्राया वंशः प्रकीर्त्तितः इत्युपसंहरति ॥१७॥

गरुड़ं विशिनष्टि 'सुपर्ण' इति । पततां पक्षिणां सहस्रन्तु जज्ञे इति शेषः ॥१८॥

कद्रोर्वंशमाह—'काद्रवेया' इति त्रिभिः ॥१९॥

नैकमस्तकाः अनेकफणाः ॥२०।२१॥

क्रोधवशाया वंशमाह—'गण'मिति । क्रोधवशं गणं क्रोधवशाया जातं विद्धीत्यर्थः । तद्गणस्थान् विशिनष्टि,—ते सर्वे दंष्ट्रिणः राक्षसाः सर्पाश्च । "रक्षोगणं क्रोधवशा स्वनामानमजीजनत् । दंष्ट्रिणां नियुतं तेषां भीमसेनात् क्षयं गतम्" इति मत्स्योक्तेः । व्यालगणा क्रोधवशादहीन्द्र भागवतोक्तेश्च ॥२२॥

स्थलजाश्च अब्जाश्च जलजा मांसाशिनो दारुणाः पक्षिणस्तस्या जाता इत्यपि त्वं विद्धीत्यन्वयः ॥२३॥

(घ) व्यजायतेति व्यजनयदित्यर्थः ; अन्तर्भूतणिजर्थमिदम् ।

(ङ) दन्दशूकाः पुनःपुनः दंशनशीलाः । विषेण उल्वणाः उत्कटाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गास्तु वै जनयामास सुरभिर्म्महिषांस्तथा ।
इरा वृक्ष-लता-वल्लीस्तृणजातीश्च सर्व्वशः ।
खसा तु यक्षरक्षांसि मुनिरप्सरसस्तथा ॥२४॥
अरिष्टा तु महासत्त्वान् गन्धर्व्वान् समजीजनत् ।
एते कश्यपदायादाः कीर्त्तिताः स्थाणु-जङ्गमाः ॥२५॥
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ।
एष मन्वन्तरे सर्गो ब्रह्मन् स्वारोचिषे स्मृतः ॥२६॥
वैवस्वते च महति वारुणे विततेऽ क्रतौ ।
जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते ॥२७॥
पूर्व्वं यत्र तु सप्तर्षीनुत्पन्नान् सप्त मानसान् ।
पुत्रत्वे(५) कल्पयामास स्वयमेव पितामहः ॥२८॥
गन्धर्व्वभोगिदेवानां दानवानाञ्च सत्तम !
दितिर्व्विनष्टपुत्रा वै तोषयामास कश्यपम् ॥२९॥
तया चाराधितः सम्यक् कश्यपस्तपतां वरः ।
वरेण च्छन्दयामास सा च वव्रे ततो वरम् ॥३०॥
पुत्रमिन्द्रवधार्थाय समर्थममितौजसम् ।
स च तस्मै वरं प्रादाद् भार्य्यायै मुनिसत्तम ॥३१॥
दत्त्वा च वरमत्युग्रं कश्यपस्तामुवाच ह ।
शक्रं पुत्रो निहन्ता ते यदि गर्भं शरच्छतम् ॥३२॥
समाहितातिप्रयता शुचिनी (६) धारयिष्यसि ।
इत्येवमुक्त्वा तां देवीं सङ्गतः कश्यपो मुनिः ॥३३॥
दधार सा च तं गर्भं सम्यक् शौचसमन्विता ।
गर्भमात्मवधार्थाय ज्ञात्वा तं मघवानपि ॥३४॥
शुश्रूषुस्तामथागच्छद् विनयादमराधिपः ।
तस्याश्चैवान्तरं प्रेप्सुरतिष्ठत् पाकशासनः ॥३५॥
ऊने वर्षशते चास्या ददर्शान्तरमात्मना ।
अकृत्वा पादयोः शौचं दितिः शयनमाविशत् ॥३६॥
निद्राञ्चाहारयामास तस्याः कुक्षिं प्रविश्य सः ।
वज्रपाणिर्म्महागर्भं चिच्छेदाथ स सप्तधा ॥३७॥

सुरभेरिरायाः खसाया मुनेररिष्टायाश्च पञ्चानां वंशानाह—'गास्त्विति द्वाभ्याम् ॥२४॥

वैवस्वते च महति मन्वन्तरे वारुणे वरुणकर्त्तृके ॥२७॥

पूर्वमन्वन्तरोत्पन्नान् देवान् सप्तर्षीन् गन्धर्वादीनां पितामहो ब्रह्मापुत्रत्वे प्रजा सर्गाधिकारे कल्पयामास, नत्वन्यान् ससर्ज। स्वयं तद्यज्ञे व्याप्तत्वात् पितृत्वे कल्पयामासेति पाठे गन्धर्वादीनां पितृत्वे तत्सृष्टौ न्ययुङ्क्तेत्यर्थः। अतः कश्यपादिभ्यो देवदानवादयः पूर्वं जाताः वैवस्वतमन्वन्तरे तु ऋषिभ्योऽपि जाता इत्युक्तं भवति ॥२८।२९॥

एकोनपञ्चाशत् मरुतो देवा अपि दितेः पुत्रा बभूवुरिति कथापूर्वकमाह—'दिति'रित्यादिना यावत्समाप्ति

छन्दयामास प्रलोभितवान् ॥३०॥

समाहिता श्रीविष्णुध्यानपरा । शुचिनी शौचवती शरच्छतं वर्षशतं यदि गर्भं धारयिष्यसि, तर्हि तव पुत्रः शक्रं हनिष्यति। शौचादिनियमवैकल्ये तु विष्णुध्यानशून्यचित्तायाः देवबन्धुरमरः पुत्रो भविष्यतीति गूढोऽभिप्रायः। शौचादिनियमाश्च मात्स्ये प्रोक्ताः। "सन्ध्ययोर्नैव भोक्तव्यं गर्भिण्यां वरवर्णिनि। न स्नातव्यं न भोक्तव्यं वृक्षमूलेषु सर्वदा। वर्जयेत् कलहं लोके गात्रभङ्गं तथैव च। नो मुक्तकेशी तिष्ठेच्च नाशुचिः स्यात् कदाचन" इत्याद्याः। भाग वते—च "न हिंस्यात् सर्वभूतानि न नश्येन्नानृतं वदेत्" इत्याद्याः ॥३३।३४॥

अन्तरप्रेप्सुः शौचादिशून्यकालं दिदृक्षुः ॥३५॥

अन्तरमाह—'अकृत्वे'ति। आहारयामास तामाप्तवती ॥३६।३७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स पीड्यमानो (७) वज्रेण प्ररुरोदातिदारुणम् ।
मा रोदीरिति तं शक्रः पुनः पुनरभाषत ॥३८॥
सोऽभवत् सप्तधा गर्भस्तमिन्द्रः कुपितः पुनः ।
एकैकं सप्तधा चक्रे वज्रेणारिविदारिणा ॥३९॥
मरुतो नाम देवास्ते बभूवुरतिवेगिनः ।
यदुक्तं वै मघवता तेनैव मरुतोऽभवन् ।
देवा एकोनपञ्चाशत् सहाया वज्रपाणिनः ॥४०॥
इति श्रीविष्णुपुराणे प्रथमेंऽशे एकविंशोऽध्यायः ॥

पीड्यमानः छिद्यमानः यदुक्तं 'मा रोदी'रिति तेन मरुतोऽभवन् इत्यक्षरसाम्यात् निरुक्तिः। वज्रोपलक्षितः पाणिर्वज्रपाणीः, सोऽस्यास्तीति वज्रपाणीः, तस्य व्रीह्यादिभ्यश्चेति णिप्रत्ययः ॥४१॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां प्रथमांशे एकविंशोऽध्यायः ।

पाठान्तराणि :—

(७—१) उपदानी हयशिराः
(११—२) अन्धको नरकश्चैव— ।
(१२—३)—महावीर्यो वक्त्रयोधी महासुरः ।
(२१—४) एलापुत्रस्तथा नागः—
(२८—५) पितृत्वे— ।
(३३—६)—शौचिनी— ।
(३८—७) सम्पीड्यमानो— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वाविंशः अध्यायः ।

[श्रीभगवतो विष्णोश्चतुर्विधविभूतिवर्णनम्]

श्रीपराशर उवाच ।

यदाभिषिक्तः स पृथुः पूर्व्वं राज्ये महर्षिभिः ।
ततः क्रमेण राज्यानि ददौ लोकपितामहः ॥१॥

नक्षत्र-ग्रह-विप्राणां वीरुधाञ्चाप्यशेषतः ।
सोमं राज्येऽदधाद् ब्रह्मा यज्ञानां तपसामपि ॥२॥

राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम् (क) ॥३॥

प्रजापतीनां दक्षन्तु वासवं मरुतामपि ।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ ॥४॥

पितॄणां धर्म्मराजं तं यमं राज्येऽभ्यषेचयत् ।
ऐरावतं गजेन्द्राणाम् अशेषाणां पतिं ददौ ॥५॥

पतत्रिणाञ्च गरुड़ं देवानामपि वासवम् ।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि ॥६॥

शेषन्तु नागराजानं मृगाणां सिंहमीश्वरम् ।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् (ख) ॥७॥

एवं विभज्य राज्यानि दिशां पालाननन्तरम् ।
प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः ॥८॥

पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशः पालं सुधन्वानं सुतं वै सोऽभ्यषेचयत् ॥९॥

दक्षिणस्यां दिशि तथा कर्द्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥१०॥

द्वाविंशोऽध्यायः

एवं तावद् देवादीनां सृष्टिरुक्ता, इदानीं तत्तदधिपकथनमुखेन विष्णोर्विभूतीर्वक्तुमाह—'यदे'त्यादिना यावत्समाप्ति ॥१॥

नक्षत्रादीनां तपोऽन्तानां राज्ये सोममदधात् ॥२॥

राज्ञां राज्ये वैश्रवणं कुबेरमदधादित्यनुषङ्गः ॥३॥

मरुतां दितिपुत्राणां वासवमधिपं ददौ ॥४।५॥

अन्येषामपि देवानां वासवमेव ददौ ॥६॥

सिंहमीश्वरं पतिम् ॥७॥

दिशां पालान् दिकपालकान् ॥८।१०॥

(क) राज्ञां यक्षाणां । अतएव कुबेरपर्य्याये 'राजराजो धनाधिप' इत्यमरकोषकारः प्राह ।

(ख) नागानां राजा तम् । अत्र समासान्तटच्प्रत्ययेन नागराजमिति वक्तव्ये टचप्रत्ययाभावेन नागराजानमिति प्रयोगः आर्षः । प्लक्षम् अश्वत्थपादपम् ।

कस्मिंश्चिद्ग्रन्थे ७ श्लोको नास्ति, परन्तु कतिपयश्लोका अधिका दृश्यन्ते, ते यथा,—

मृगाणाञ्चैव सर्वेषां राज्ये सिंहं ददौ प्रभुः ।
शेषन्तु दन्दशूकानामकरोत्पतिमव्ययः ॥
हिमालयं स्थावराणां मुनीनां कपिलं मुनिम् ।
नखिनां दंष्ट्रिणाञ्चैव मृगाणां व्याघ्रमीश्वरम् ॥
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ।
एवमेवान्यजातीनां प्राधान्येनाकरोत्प्रभून् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् (१)॥११॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानमभ्यषेचयत् ॥१२॥
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मतः परिपाल्यते(ग) ॥१३॥
एते सर्व्वे प्रवृत्तस्य स्थितौ विष्णोर्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥१४॥
ये भविष्यन्ति ये भूताः सर्व्वे भूतेश्वरा द्विज ।
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ॥१५॥
ये तु देवाधिपतयो ये च दैत्याधिपास्तथा ।
दानवानाञ्च ये नाथा ये नाथाः पिशिताशिनाम् ॥१६
पशूनां ये च पतयः पतयो ये च पक्षिणाम् ।
मनुष्याणाञ्च सर्पाणां नागानाञ्चाधिपाश्च ये ॥१७॥
वृक्षाणां पर्व्वतानाञ्च ग्रहाणाञ्चापि येऽधिपाः ।
अतीता वर्त्तमानाश्च ये भविष्यन्ति चापरे ॥१८॥
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशसमुद्भवाः ।
न हि पालनसामर्थ्यमृते सर्व्वेश्वरं हरिम्(घ) ॥१९॥
स्थितौ स्थिरं महाप्राज्ञ भवत्यन्यस्य कस्यचित् ॥२०॥
सृजत्येष जगत्सृष्टौ स्थितौ पाति सनातनः ।
हन्ति चैवान्तकत्वे च रजः-सत्त्वादिसंश्रयः(ङ) ॥२१॥
चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्दनः ॥२२॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान् ।
मरीचिमिश्राः पतयः प्रजानामन्यभागतः ॥२३॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः ।
इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः ॥२४॥
एकांशेन स्थितौ विष्णुः करोति प्रतिपालनम् ।
मन्वादिरूपश्चान्येन कालरूपोऽपरेण च ॥२५॥
सर्व्वभूतेषु चान्येन संस्थितः कुरुते रतिम् ।
सत्त्वं गुणं समाश्रित्य जगतः पुरुषोत्तमः ॥२६॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा पुनः ।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः ॥२७॥

अच्युतमिति केतुमतो विशेषणम् ॥११॥

पर्जन्यस्य प्रजापतेः पुत्रमित्यनुषङ्गः ॥१२।१३॥

उक्तानामनुक्तानाञ्च तत्तत्पतीनां भगवद्-विभूतित्वमाह-'एत' इति सार्द्धैः पञ्चभिः। स्थितौ प्रवृत्तस्य विष्णोर्विभूतिभूताः ॥१४।१९॥

(ग) यथाप्रदेशम् लोकपितामहनिर्दिष्टतत्तद्राज्यमनतिक्रम्येत्यर्थः ।

(घ) अंशसमुद्भवा इति अंशात् समुद्भवः उत्पत्तिर्येषां ते इति व्यधिकरणबहुव्रीहिः । तदुक्तं वामनेन—'अग्रह्यो व्यधिकरणबहुव्रीहिर्जन्माद्युत्तरपदे' इति ।

अत्र हेतुर्न हीति ॥२०॥

अत एव मुख्यः सृष्ट्यादिकर्त्ता स एवेत्याह—'सृजत्येष' इति ॥२१॥

तदेव सृष्ट्यादिकर्त्तृत्वं चतुर्धा विभजते —'चतुर्विभाग' इत्यष्टभिः । संसृष्टौ सम्यक् सृष्टौ चतुर्विभागः सन्निति क्वचित् पाठः ॥२२॥

रज एव गुणो यस्य स एव रजोगुणः ॥२४।२९॥

(ङ) रजःसत्त्वादिसंश्रयः —रजोगुणसत्त्वगुणतमोगुणसमालम्बन इत्यर्थः । तथा हि रजोगुणसमाश्रयः सृजति, सत्त्वगुणसमाश्रयः पालयति, तमोगुणसमाश्रयश्च संहरतीत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते ।
कालस्वरूपो भागोऽन्यः सर्वभूतानि चापरः ॥२८॥
विनाशं कुर्वतस्तस्य चतुर्धैवं महात्मनः ।
विभागकल्पना ब्रह्मन् कथ्यते सार्वकालिकी ॥२९॥
ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ।
विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥३०॥
विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज !
स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥३१॥
रुद्रकालान्तकाद्याश्च समस्ताश्चैव जन्तवः ।
चतुर्धा प्रलयायैता जनार्द्दनविभूतयः ॥३२॥
जगदादौ तथा मध्ये सृष्टिरा प्रलयाद् द्विज ।
धात्रा मरीचिमिश्रैश्च क्रियते जन्तुभिस्तथा ॥३३॥
ब्रह्मा सृजत्यादिकाले मरीचिप्रमुखास्ततः ।
उत्पादयन्त्यपत्यानि जन्तवश्च प्रतिक्षणम् ॥३४॥
न कालेन विना ब्रह्मा सृष्टिनिष्पादको द्विज ।
न प्रजापतयः सर्वे न चैवाखिलजन्तवः ॥३५॥
एवमेव विभागोऽयं स्थितावप्युपदिश्यते ।
चतुर्धा देवदेवस्य मैत्रेय प्रलये तथा ॥३६॥
यत्किञ्चित् सृज्यते येन सत्त्वजातेन वै द्विज ।
तस्य सृज्यस्य संभूतौ तत् सर्वं वै हरेस्तनुः ॥३७॥
हन्ति वा यत् क्वचित् किञ्चिद् भूतं स्थावरजंगमम् ।
जनार्दनस्य तद् रौद्रं मैत्रेयान्तकरं वपुः ॥३८॥
एवमेव जगत्स्रष्टा जगत्पाता तथैव च ।
जगद् भक्षयता चेशः समस्तस्य जनार्दनः ॥३९॥
सर्गस्थित्यन्तकालेषु त्रिधैवं सम्प्रवर्त्तते ।
गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् ॥४०॥
तत्त्वज्ञानमयं वापि स्वसंवेद्यमनौपमम् ।
चतुःप्रकारं तदपि स्वरूपं परमात्मनः ॥४१॥

मैत्रेय उवाच ।

चतुःप्रकारतां तस्य ब्रह्मभूतस्य वै मुने ।
ममाचक्ष्व यथान्यायं यदुक्तं परमं पदम् ॥४२॥

पराशर उवाच ।

मैत्रेय कारणं प्रोक्तं साधनं सर्व्ववस्तुषु ।
साध्यञ्च वस्तुभिमतं यत्साधयितुमात्मनः ॥४३॥

एते च ब्रह्मादयो हरेरेव विभूतय इत्याह—'ब्रह्मे'ति त्रिभिः । सार्वकालिकी सर्वकल्पगता ॥३०।३२॥

ब्रह्मादिभगवद्विभूतीनां कालभेदेन 'स्रष्टृत्वमाह—'जगदादा'विति द्वाभ्याम् ॥३३।३४॥

कालाख्यविभूतेस्तु सर्वदा सृष्टिनिमित्तत्वमाह-'न कालेने'ति ॥३५॥

एतदेव स्थितिप्रलययोरप्यतिदिशति—'एवमेवे'ति ॥३६॥

उत्पादयन्त्यपत्यानीत्यपहरणं सृज्यमात्रोपलक्षणमिति दर्शयन्नाह 'यत्किञ्चि'दिति । सत्त्वजातेन प्राणिमात्रेण पालनेऽप्येतद् द्रष्टव्यम् ॥३७।३८॥

उक्तं ब्रह्मादीनां विष्णुविभूतित्वमुपसंहरन्नाह—'एव'मिति द्वाभ्याम् ॥३९॥

गुणप्रवृत्त्या गुणानां क्षोभेण त्रिविधः ब्रह्मादिरूपः सन् सृष्ट्यादौ सम्प्रवर्त्तते ॥४०॥

तस्य तु परमं पदमगुणम् अतो महत् पूर्णं तत्स्वरूपप्राप्तिप्रकारोपदेशार्थं चातुर्विध्यमुपक्षिपति,—'तत्त्वे'ति ॥४१॥

अगुणस्य ज्ञानस्य निर्भेदत्वात् कथं चातुर्विध्यमिति पृच्छति—'चतुःप्रकार'मिति ॥४२॥

निर्गुणः ब्रह्मप्राप्तेः प्रागेव तत्प्राप्त्युपायभूतसाधनाद्यालम्बनमनोवृत्त्यभिव्यङ्ग्यावस्थाभेदाज्ज्ञानस्य चातुर्विध्यं न स्वतोणेति वक्तुमाह—मैत्रेयेत्यष्टभिः । सर्वेष्वपि वस्तुषु यत् कारणं तत्साधनं प्रोक्तं, तच्चात्मनः साधयितुमभिमतं वस्तु तत्साध्यं प्रोक्तमित्यन्वयः ॥४३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगिनो मुक्तिकामस्य प्राणायामादिसाधनम् ।
साध्यञ्च परमब्रह्म पुनर्नावर्त्तते यतः (च) ॥४४

साधनालम्बनं ज्ञानं मुक्तये योगिनो हि यत् ।
स भेदः प्रथमस्तस्य ब्रह्मभूतस्य वै मुने ॥४५॥

युञ्जतः क्लेशमुक्त्यर्थं साध्यं यद् ब्रह्म योगिनः ।
तदालम्बनविज्ञानं द्वितीयोंऽशो महामुने ॥४६॥

उभयोस्त्वविभागेन साध्य-साधनयोर्हि यत् ।
विज्ञानमद्वैतमयं तद्भागोऽन्यो मयोदितः ॥४७॥

ज्ञानत्रयस्य चैतस्य विशेषो यो महामुने ।
तन्निराकरणद्वारा दर्शितात्मस्वरूपवत् ॥४८॥

निर्व्यापारमनाख्येयं व्याप्तिमात्रमनौपमम् ।
आत्मसम्बोधविषयं सत्तामात्रमलक्षणम् ॥४९॥

प्रशान्तमभयं शुद्धमविभाव्यमसंश्रितम् (१) ।
विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम् (२) ॥५०

तत्रान्यज्ञानरोधेन (३) योगिनो यान्ति ये लयम् ।
संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विज ॥५१॥

प्रस्तुते च मुक्तिकामस्य योगिनो मुक्तेः साधनं देहात्मविवेकात्मरूपं, त्वम्पदार्थशुद्धिं विना मुक्तेरसम्भवात् । साध्यञ्च तत्पदलक्ष्यं परमं ब्रह्म नित्यसुखात्मकत्वात् ॥४४॥

ततः किमत आह—'साधने'ति । साधनं देहात्मविवेकेन त्वम्पदार्थशुद्धिः । तदालम्बनं शुद्धत्वं पदार्थविषयं ज्ञानं स एव चतुर्भेदज्ञानभूतस्य ब्रह्मणः प्रथमो भेदः ॥४५॥

क्लेशमुक्त्यर्थं युञ्जतः योगमभ्यस्यतो योगिनो यत्साध्यं ब्रह्म, तद्विषयं सच्चिदानन्दं ब्रह्मेति तत्पदलक्ष्यार्थस्य विशेषणज्ञानं द्वितीयोऽंशः ॥४५॥

उभयोस्त्वविभागेन परस्परैक्येन ब्रह्मैवाहम् अहमेव ब्रह्मेति विशिष्टं यज्ज्ञानं सोऽन्यस्तृतीयो भागो मयोदितः ॥४०॥

एतस्य त्वंपदार्थ-तत्पदार्थ-तदैक्यविषयस्य ज्ञानत्रयस्य यो विशेषः देहादिविलक्षणोऽहमिति सच्चिदानन्दरूपं ब्रह्माहमिति यस्तत्र तत्र विशेषः, तस्य निराकरणं परित्यागः, तद्द्वारेण दर्शितं यन्निर्विशेषमात्मस्वरूपं तद्वत् । तदेकाकारं समाध्यवस्थं विष्णोर्ज्ञानमयस्य परमपदाख्यं ज्ञानं चतुर्थमुक्तमिति तृतीयेनान्वयः ॥४७॥

तदेव द्वादशभिः पदैर्विशिनष्टि,— निर्व्यापारं ध्यानादिसर्वव्यापरशून्यम्, अत एव अनाख्येयं निर्देशानर्हं, किन्तु व्याप्तिमात्रं मनसा ब्रह्माकारतामात्ररूपम् । अनौपमं निरुपमं सर्वज्ञानलक्षणत्वात् । तदेवाह—आत्मनः सम्बोधः प्रकाशस्तद्विषयं स्वप्रकाशमित्यर्थः । तत्रापि सत्तामात्रम् आत्मस्वरूपभूतसत्यज्ञानानन्दादिविशेषशून्यं, तत्र हेतुः,—अलक्षणं लक्ष्यतेऽनेनेति लक्षणं मनोवृत्तिस्तद्रहितम् । यदुक्तं योगप्रदीपे—"मनसो वृत्तिशुन्यस्य ब्रह्माकारतया स्थितिः । या सम्प्रज्ञातनामासौ समाधिरभिधीयते"इति ॥४८॥

मनोवृत्त्यभावादेव प्रशान्तं रागादिशून्यम्, अत एवाभयं द्वैतास्फूर्त्तेः । शुद्धं निर्विषयम्, अत एव दुर्विभाव्यम् अवितर्क्यं निर्विषयत्वादेव । असंश्रयम् आश्रयशून्यम् । असंश्रितमिति पाठेऽपि स एवार्थः । वृत्तिप्रतियोगित्वादाश्रयविषययोः । तदुक्तं कापिलयोगे—"मुक्ताश्रयं (?) निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथाब्धिः । आत्मानमत्र पुरुषो व्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः" इति ॥४९

एवम्भूतज्ञानस्वरूपे लीनाः कृतार्था भवन्तीत्याह—'तत्रे'ति । तत्र चतुर्थज्ञानस्वरूपे ब्रह्मणि ज्ञाननिरोधेन अविद्यानाशेन ये लयम् ऐक्यं यान्ति । अज्ञाननिरोधेनेति पाठे पूर्वोक्तज्ञानत्रयविशेषतिरस्कारेणेत्यर्थः ॥५०॥

संसारकर्षणोप्तौ—संसार एव कृष्यते इति कर्षणं क्षेत्रं तस्मिन्नुप्तिर्बीजावापकर्मकरणं तस्मिन्निर्बीजतां निर्वासनतां यान्ति निरहंकारैर्ज्ञानोत्तरकालीनैः कर्मभिर्भोगैश्च न संसरन्तीत्यर्थः ॥५१॥

(च) न पुनरावर्त्तते न पुनः संसरतीत्यर्थः । 'न स पुनरावर्त्तत' इति श्रुतेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवम्प्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तभेदरहितं(४) विष्ण्वाख्यं परमं पदम्(छ) ॥५२
तद् ब्रह्म परमं योगी यतो नावर्त्तते पुनः ।
अपुण्यपुण्योपरमे(५) क्षीणक्लेशोऽतिनिर्म्मलः(ज) ॥५३
द्वे रूपे ब्रह्मणस्तस्य मूर्त्तञ्चामूर्त्तमेव च ।
क्षराक्षरस्वरूपे ते सर्व्वभूतेष्ववस्थिते ॥५४॥
अक्षरं तत् परं ब्रह्म क्षरं सर्व्वमिदं जगत् (झ) ।
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ॥५५॥
परस्य ब्रह्मणः शक्तिस्तदेतदखिलं जगत् ।
तत्राप्यासन्नदूरत्वाद् बहुत्वस्वल्पतामयः ॥

ज्योत्स्नाभेदोऽस्ति तच्छक्तेस्तद्वन्मैत्रेय विद्यते ॥५६
ब्रह्म-विष्णु-शिवा ब्रह्मन् प्रधाना ब्रह्मशक्तयः ।
ततश्च देवा मैत्रेय न्यूना दक्षादयस्ततः ॥५७॥
ततो मनुष्याः पशवो मृग-पक्षि-सरीसृपाः ।
न्यूना न्यूनतराश्चैव वृक्ष-गुल्मादयस्ततः ॥५८॥
तदेतदक्षरं नित्यं जगन्मुनिवराखिलम् ।
आविर्भाव-तिरोभाव-जन्म-नाश–विकल्पवत् ॥५९॥
सर्व्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणोऽपरम् ।
मूर्त्तं यद् योगिभिः पूर्व्वं योगारम्भेषु चिन्त्यते ॥६०

तर्हि योगी किं भवतीत्यत आह—'एव'मिति द्वाभ्याम् । एवम्प्रकारं परमं ब्रह्मैव योगी प्राप्नोतीति शेषः ॥५२।५३॥

तत्प्राप्तिसाधनभूतोपासनार्थमाह—'द्वे रूपे' इति । मूर्त्तामूर्त्ते एव दर्शयन्नाह—'क्षराक्षरे'ति ॥५४॥

क्षराक्षरे रूपे व्याचष्टे—'अक्षर'मिति । क्षरं सर्वमिदम् अचेतनात्मकं जगत् । वक्ष्यति हि—"आश्रयश्चेतसो ब्रह्मन् द्विधा तच्च स्वभावतः । रूपं मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ।" इति । नन्वक्षरस्य परब्रह्मणस्तद्विलक्षणं क्षरं रूपं कथं स्यादित्याशङ्क्य दृष्टान्तेनोपपादयति—'एकदेशे'ति । प्रादेशिकस्याप्यग्नेर्दीपादेर्दाहकस्यापि तद्विलक्षणा ज्योत्स्ना प्रभा यथा तत्प्रकाशशक्तिविस्तारः॥५५॥

तथा ब्रह्मणः शक्तिकृतो विस्तार इदमखिलं ब्रह्मादिरूपं जगत् । अग्निदृष्टान्तेनैव ब्रह्मादिजीवतारतम्यमपि सङ्गच्छत इत्याह । तत्रापि दृष्टान्तभूतेऽग्नावपि आसन्नत्वाद् बहुत्वम्, दूरत्वादल्पत्वमित्येवंरूपो यथा ज्योत्स्नाभेदोऽस्ति ॥५६॥

तद्वद् ब्रह्मशक्तेरपि क्षेत्ररूपाया ब्रह्मादिस्थावरान्तेषु क्षेत्रेष्वविद्यावरणस्याल्पत्वबहुत्ववशात् तारतम्यं विद्यत इत्यर्थः । वक्ष्यति च—'तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल ! तारतम्येन लक्षितः । इति । तदेवाह—'ब्रह्मे'ति द्वाभ्याम् ॥५७।५८॥

अस्य च तारतम्यौस्यपाधिकत्वात् सर्वमिदं जगद् ब्रह्मेत्येवोपासितव्यम् इत्याशयेनाह—'तदेत'दिति । आविर्भावतिरोभावौ आधिक्यन्यूनभावौ जन्मनाशौ च उपाधिवशादेवम्भूतविकल्पवदपि तदेतज्जगद्वस्तुतोऽक्षरं न्यूनाधिकत्वशून्यं नित्यञ्च ब्रह्मैवेत्यर्थः ॥५९॥

तदेवं स्थूलविश्वरूपोपासनया शुद्धचित्तस्य तत्कारणभूतपरमेश्वरोपासनं प्रस्तौति—'सर्वशक्तिमय' इति । सृष्टादिसर्वशक्त्याश्रयो विष्णुर्मूर्त्त विशुद्धोर्जितसत्त्वात्मकं ब्रह्मण एव । अपरं न विद्यते परं यस्मात् तदपरं श्रेष्ठं रूपम् । तदेवाह — यद् योगिभिः समाधेः पूर्वं योगारम्भेषु चिन्त्यते ॥६०॥

(छ) समस्तभेदरहितम्—सजातीयविजातीयसर्वप्रकारभेदशून्यम् । नित्यं विनाशरहितम्, आद्यन्तशून्यं वा । न विद्यते क्षयः निलयः आधार इति यावत् यस्य तम् अनाधारमित्यर्थः ।

(ज) अपुण्यपुण्योपरमे धर्माधर्मरूपद्विविधकर्मक्षये । क्षीणाः क्षयं प्राप्ताः क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशास्याः पञ्च योगशास्त्रोक्तक्लेशाः यस्य सः, अत एव अतिनिर्मलः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सालम्बनो महायोगः सबीजो यत्र संस्थितः ।
मनस्यव्याहते सम्यग् युञ्जतां जायते मुने ॥६१॥

स परः सर्व्वशक्तीनां (७) ब्रह्मणः समनन्तरः ।
मूर्त्तं ब्रह्म महाभाग सर्व्वब्रह्ममयो हरिः ॥६२॥

तत्र सर्व्वमिदं प्रोतमोतञ्चैवाखिलं जगत् ।
ततो जगज्जगत् तस्मिन् स जगच्चाखिलं मुने ॥६३॥

क्षराक्षरमयो विष्णुर्विभर्त्त्यखिलमीश्वरः ।
पुरुषाव्याकृतमयं भूषणास्त्रस्वरूपवत् ॥६४॥

मैत्रेय उवाच ।

भूषणास्त्रस्वरूपस्थं यच्चैतदखिलं जगत् ।
बिभर्ति भगवान् विष्णुस्तन्ममाख्यातुमर्हसि॥६५॥

पराशर उवाच ।

नमस्कृत्वाप्रमेयाय विष्णवे प्रभविष्णवे ।
कथयामि यथाख्यातं वशिष्ठेन ममाभवत्(ञ) ॥६६॥

आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ॥६७॥

श्रीवत्ससंस्थानधरमनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥६८॥

तच्चिन्ताप्रयोजनमाह—'सालम्बन' इति। यत्र यस्मिन् सम्यङ् मनस्यव्याहते एकाग्रे सति सालम्बनो वैष्णवः। सबीजो मन्त्रजपादिसहितो महायोगो युञ्जतां योगिनां संस्थितः संस्थिरः समाधिपर्यन्तो जायत इत्यन्वयः ॥६१॥

यत्रेत्यनेन यच्छब्देनोक्तस्य हरेः सर्वश्रेष्ठत्वमाह—'स पर' इति द्वाभ्याम्। ब्रह्मणः शक्तीनां मध्ये स परः श्रेष्ठः। यतः समनन्तरः अतिनिकटः। यतो मूर्त्तं घनीभूतं ब्रह्मैव सः। तत्र हेतुः—सर्वब्रह्ममयः कृत्स्नब्रह्मरूपः, न तु ब्रह्मादिवत् तदंशः॥६२॥

तत्र हेतुमाह—'तत्रे'ति। तस्मिन् अखिलं जगत् ओतञ्च प्रोतञ्च तन्तुषु पटवत् सर्वतोऽनुस्यूतम्। कुत इत्यत्राह—ततो जगत् तस्मिंस्तिष्ठति, जगच्चाखिलं स एव, कारणात्मकत्वात् कार्यस्य ॥६३॥

तदेवं हरेः श्रैष्ठ्यमुक्त्वेदानीं तदुपासनाप्रकारमुपक्षिपति—'क्षराक्षरमय' इति। कार्यकारणात्मको विष्णुः पुरुषाव्याकृतमयं पुरुषप्रकृत्यात्मकमिदं जगद् भूषणास्त्रस्वरूपेण विभर्त्ति ॥६४॥

अतिरहस्यत्वाद् विशेषतो बुभुत्सुः पृच्छति—'भूषणे'ति ॥६५॥

प्रभविष्णवे प्रभवनशीलाय भक्तचिन्तनमात्रेण सर्वपुरुषार्थदानसमर्थायेत्यर्थः। यथा मम विशिष्टेनाख्यातमभवत्, तथा तव कथयिष्यामि ॥६६॥

अस्य जगत आत्मानं पुरुषं शुद्धं क्षेत्रज्ञम् ॥६७॥

प्रधानञ्च श्रीवत्ससंस्थानधरं सत् अनन्ते समाश्रितम् आस्त इत्यन्वयः। श्रीवत्सरूपञ्च गारुड़पुराणे प्रोक्तम्। "प्रदक्षिणावर्त्तविचित्ररोम श्रीवत्समद्विम्बविभूषितान्तम्। वक्षो विचिन्त्यम्" इति। बुद्धिसहितं प्रधानमपि गदारूपेणास्ते ॥६८॥

(ञ) अत्र नमः कृत्वेति पाठः साधुः, अत्र वैयाकरणाः—यदा नमःशब्दात् परः कृञ् भवति, तदा साक्षात्प्रभृतीनि चेति पाणिनिसूत्रेण नमःशब्दस्य पक्षे गतिसंज्ञा विधीयते। गतिश्च द्योतक इत्यर्थः। ततश्च गतिसंज्ञापक्षे नमःशब्दः कृञ्योरे प्रादिवद् द्योतको भवति। तत्र करोतेः क्रियासामान्यवाचित्वात् तस्य नतिरूपो योऽर्थस्तं द्योतयति। तत्र नारायणं नमस्कृत्येत्यादिष्विव नमःशब्दयोगेऽपि द्वितीयैव क्रियाव्याप्यत्वात्। यदा तु नमःशब्द एव नमस्कारवाची करोतिक्रियायाः कर्मभावमापन्नस्तदा नमश्चकार देवेभ्य इत्यादिष्विव चतुर्थी।

यदा नमःशब्दस्य करोत्यर्थप्रणामद्योतकता, तदैव गतिसंज्ञायां सत्यां नमःपुरसोर्गत्योरिति सूत्रेण विसर्गस्य सकारः।

नमःशब्दो यदा नमस्कारस्य वाचको, न तु द्योतकः, तदा गतिसंज्ञाया अभावात् सत्वं यप् च न स्यात्। यदि द्योतकः स्यात्, तदा सत्वादिसिद्धावपि तद्योगे चतुर्थी न स्यात्। यदि नमःशब्दो वाचकः स्यात्, तदा नमः कृत्वेति सविसर्गः त्वान्त एव पाठ इत्याहुः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूतादिमिन्द्रियादिञ्च द्विधाहंकारमीश्वरः ।
बिभर्त्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम् ॥६९॥

बलस्वरूपमत्यन्तजवेनान्तरितानिलम् (८) ।
चक्रस्वरूपञ्च मनो धत्ते विष्णुः करे स्थितम् ॥७०॥

पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
सा भूतहेतुसंघातो भूतमाला च वै द्विज ॥७१॥

यानीन्द्रियाण्यशेषाणि बुद्धिकर्म्मात्मकानि वै ।
शररूपाण्यशेषाणि तानि धत्ते जनार्दनः ॥७२॥

बिभर्त्ति यच्चासिरत्नमच्युतोऽत्यन्तनिर्म्मलम् ।
विद्यामयन्तु तज्ज्ञानमविद्याकोशसंस्थितम् ॥७३॥

इत्थं पुमान् प्रधानञ्च बुद्ध्यहङ्कारमेव च ।
भूतानि च हृषीकेशे मनः सर्व्वेन्द्रियाणि च ।
विद्याविद्ये च मैत्रेय सर्व्वमेतत् समाश्रितम् ॥७४॥

अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितः ।
बिभर्त्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः ॥७५॥

सविकारं प्रधानञ्च पुमांश्चैवाखिलं जगत्(९) ।
बिभर्त्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः ॥७६॥

या विद्या या तथाऽविद्या यत् सद् यच्चासदव्ययम् ।
तत् सर्व्वं सर्व्वभूतेशे मैत्रेय मधुसूदने ॥७७॥

कला-काष्ठा-निमेषादि-दिनर्त्वयन-हायनैः ।
कालस्वरूपो भगवानपरो हरिरव्ययः(१०) ॥७८॥

भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनिसत्तम !
महर्जनस्तपः सत्यं सप्तलोका इमे विभुः ॥७९॥

भूतादिं तामसम्, इन्द्रियादिञ्च राजसं, द्विधा अहंकारं यथाक्रमं शंखस्वरूपेण शार्ङ्गस्वरूपेण च स्थितं बिभर्त्ति ॥६९

वातस्वरूपम् अतिशीघ्रगम् अत एव जवेनान्तरितः अतिक्रान्तोऽनिलो येन तन्मनः सात्त्विकाहंकारात्मकं चक्रस्वरूपं धत्ते ॥७०॥

पञ्चरूपा मुक्तामाणिक्यमरकतेन्द्रनीलवज्रसमानवर्णा हरेर्या वैजयन्त्याख्या माला सा भूतहेतूनां पञ्चतन्मात्राणां संघातः पङ्क्तिः, भूतमाला च महाभूतपङ्क्तिश्च सूक्ष्मस्थलभूतमपीत्यर्थः । पाठान्तरेऽप्ययमेवार्थः ॥७१॥

अविद्यैव धर्मज्ञानावरकः कोशः, तत्र संस्थितम् ॥७३॥

उक्तमेव भूषणादिस्वरूपमनुवदन् तद्धारणे प्रयोजनमाह-'इत्थ'मिति सार्द्धद्वाभ्याम् ॥७४॥

अस्त्रभूषणसंस्थानस्वरूपं समाश्रितमेतत् सर्वं बिभर्त्तीत्यन्वयः । श्रेयसे उपासकानां सर्वपुरुषार्थसिद्धये ॥७५॥

उक्तं भूषणाद्युपासनं निगमयति—'सविकार'मिति द्वाभ्याम् ॥७६।७७॥

इदानीं हरौ सर्वात्मदृष्टिदार्ढ्याय तच्छक्तिकालरूपेण तत्सृष्टलोकरूपेण तत्तल्लोकस्थभूतरूपेण च चतुर्धोपासनमाह-'कला काष्ठे'ति सप्तभिः ॥७८॥

सप्तलोकानिति पाठे व्याप्येति शेषः ॥७९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोकात्ममूर्त्तिः सर्व्वेषां पूर्व्वेषामपि पूर्व्वजः ।
आधारः सर्व्वविद्यानां स्वयमेव हरिः स्थितः ॥८०॥

देव-मानुष-पश्वादिस्वरूपैर्बहुभिः स्थितः ।
ततः सर्व्वेश्वरोऽनन्तो भूतमूर्त्तिरमूर्त्तिमान्(अ) ॥८१॥

ऋचो यजूंषि सामानि तथैवाथर्व्वणानि वै ।
इतिहासोपवेदास्तु वेदान्तेषु तथोक्तयः ॥८२॥

वेदाङ्गानि समस्तानि मन्वादिगदितानि च(च) ।
शस्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च ये
क्वचित् (११) ॥८३॥

काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्त्तिधरस्यैतद् वपुर्विष्णोर्म्महात्मनः ॥८४॥

यानि मूर्त्तान्यमूर्त्तानि यान्यत्रान्यत्र वा क्वचित् ।
सन्ति वै वस्तुजातानि तानि सर्व्वाणि तद्वपुः ॥८५॥

अहं हरिः सर्वमिदं जनार्द्दनो
नान्यत् ततः कारणकार्य्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगदा भवन्ति ॥८६॥

इत्येष तेऽंशः प्रथमः पुराणस्यास्य वै द्विज !
यथावत् कथितो यस्मिन् श्रुते पापैः प्रमुच्यते ॥८७॥

कार्त्तिक्यां पुष्करस्नाने द्वादशाब्देन यत् फलम्(ठ) ।
तदस्य श्रवणात् सर्वं मैत्रेयाप्नोति मानवः ॥८८॥

लोकात्मिका मूर्त्तिर्यस्य स लोकात्ममूर्त्तिः ॥८०॥

ऋगादयो वेदाः । इतिहासो भारतादिः । उपवेदाः आयुर्वेदादयः ॥८२॥

मन्वादिगदितानि धर्मशास्त्राणि । आख्यानानि पुराणानि । अनुवाकाः कल्पसूत्रादयः ॥८३॥

किं बहुनोक्तेन, सर्वाणि वस्तुजातानि तन्मूर्त्तिरेवेत्याह—'सन्ती'ति ॥८४॥

उपदेशसर्वस्वं तत्फलञ्चाह—'अह'मिति । भवतीति भवो देहस्तस्माद् भवन्तीति भवोद्भवाः द्वन्द्वगदाः रागद्वेषादयो हृद्रोगा न भवन्ति ॥८५॥

(अ) अत्र भगवत्यनन्ते भूतमूर्त्तित्वामूर्त्तिमत्त्वयोर्विरोधो भागवतमहिम्नैव समाधेयः । अवच्छेदकीभूतकालभेदाद् वा तत्परीहारः ।

(ट) वेदाङ्गानि-शिक्षा-कल्प-व्याकरण—निरुक्त-च्छन्दो-ज्योतिषरूपाणि षट् । मन्वादीत्यादिपदेन अन्यादीनां ग्रहणम् ।

(ठ) द्वादशानाम् अब्दानां वर्षाणां समाहारः द्वादशाब्दं तेनेति समाहारद्विगुसमासेन साधुत्वम् । अत्र पात्रादेराकृतिगणत्वात् तदन्तर्गतत्वाभ्युपगमेन न नदादित्वादीप् प्रत्ययः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवर्षिपितृगन्धर्वयक्षादीनाञ्च सम्भवम् ।
भवन्ति शृणवतः पुंसो देवाद्या वरदा मुने ॥८९॥

इति श्रीविष्णुपुराणे प्रथमेऽंशे द्वाविंशोऽध्यायः ।

प्रथमोऽंशः सम्पूर्णः

स्पष्टमन्यत् ॥८६॥

संश्रितश्रीपरानन्दनृहरिः श्रीधरो यतिः ।
अंशं प्राथमिकं व्याख्यत् स्वप्रकाशाख्यटीकया (ङ) ॥

इतिश्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां प्रथमांशे द्वाविंशोऽध्यायः ॥

प्रथमोऽंशः सम्पूर्णः ॥

(ङ) भगवता श्रीधरस्वामिना स्वीयविष्णुपुराणटीकायाः प्रारम्भे प्रतिज्ञाश्लोके यद्यपि 'आत्मप्रकाशाभिधां श्रीमद्विष्णुपुराण-सारविवृतिं कर्त्तां यतिः श्रीधरः' इत्यनेन स्वीयटीकाया 'आत्म-प्रकाशे'त्यभिधानं प्रकटितं, तथापि विष्णुपुराणप्रथमांश-चरम-भागे—

'संश्रितश्रीपरानन्दनृहरिः श्रीधरो यतिः
अंशं प्राथमिकं व्याख्यत् स्वप्रकाशाख्यटीकया ।' इत्यनेन तथा द्वितीयांशटीकायाः प्रारम्भे—

संश्रितश्रीपरानन्दनृहरिः श्रीधरो यतिः ।
'पुराणं वैष्णवं व्याख्यत् स्वप्रकाशाख्यटीकया ।

इत्यनेन च असकृदेव स्वटीकायाः स्वप्रकाशेत्याख्यायाः समुल्ले-खात् स्वप्रकाशेति संज्ञायामपि तस्य सम्मतिरिति प्रतिपद्यते। अतः अस्माभिः प्रत्यध्यायटीकान्ते 'आत्मप्रकाशाभिधायां स्वप्रकाशाभिधायां वा' इत्येवमभिहितम् । ये तु टीकायाः स्व-स्वप्रकाशेत्यास्व्यामेव मन्यन्ते, तेषां पक्षे प्रारम्भश्लोके यदात्म-प्रकाशेत्यभिधाभिधानं तच्छन्दोऽनुरोधादिति प्रतिपत्तव्यम् ।

पाठान्तराणि—

११—१)—राजानं सोऽभ्यषेचयत् ।
२१—२) हन्ति चैवान्तकत्वेन— ।
(४६—३)—दुर्विभाव्यमसंश्रयम् ।
(४६—४)—ब्रह्मसंज्ञितम् ।
(५०—५) तत्र ज्ञाननिरोधेन— ।
(५१—६) समस्तहेयरहितं— ।
(५२—७) श्रयत्यपुण्योपरमे— ।
(५५—८)—शक्तिस्तथेदमखिलं जगत् ।
(६१—९) स परः परशक्तीनां— ।
(६६—८) चलत्स्वरूपमत्यन्तं जवेनान्तरितानिलम् ।
(७५—९)—पुमांसमखिलं जगत् ।
(७७—१०)—भगवानपापो हरिरव्ययः ।
(८२—११) शास्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयः अंशः

प्रथमः अध्यायः ।

[प्रियव्रतस्य पुत्राणां विवरणं, भरतवंशकथनञ्च ।]

मैत्रेय उवाच ।

भगवन् सम्यगाख्यातं ममैतदखिलं त्वया ।
जगतः सर्गसम्बन्धि यत् पृष्टोऽसि गुरो मया ॥१॥

योऽयमंशो जगत्सृष्टिसम्बद्धो गदितस्त्वया ।
तत्राहं श्रोतुमिच्छामि भूयोऽपि मुनिसत्तम ॥२॥

प्रियव्रतोत्तानपादौ सुतौ स्वायम्भुवस्य यौ ।
तयोरुत्तानपादस्य ध्रुवः पुत्रस्त्वयोदितः ॥३॥

प्रियव्रतस्य नैवोक्ता भवता द्विज सन्ततिः ।
तामहं श्रोतुमिच्छामि प्रसन्नो वक्तुमर्हसि(क) ॥४॥

पराशर उवाच ।

कर्द्दमस्यात्मजां कन्यामुपयेमे प्रियव्रतः ।
सम्राट् कुक्षी च तत्कन्ये दश पुत्रास्तथापरे ॥५॥

महाप्राज्ञा महावीर्य्या विनीता दयिताः पितुः ।
प्रियव्रतसुताः ख्यातास्तेषां नामानि मे शृणु ॥६॥

अग्नीध्रश्चाग्निबाहुश्च वपुष्मान् द्युतिमांस्तथा ।
मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च ॥७॥

ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतोऽभवत् ।
प्रियव्रतस्य पुत्राणां प्रख्यातो(१) बलवीर्य्यतः ॥८॥

मेधाग्निबाहु-पुत्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभाग न राज्याय मनो दधुः ॥९॥

निर्म्ममाः(२) सर्वकालन्तु समस्तार्थेषु वै मुने ।
चक्रुः क्रिया यथान्यायमफलाकाङ्क्षिणो हि ते(ख) ॥१०

प्रियव्रतो ददौ तेषां सप्तानां मुनिसत्तम !
विभज्य सप्त द्वीपानि मैत्रेय सुमहात्मनाम् ॥११॥

प्रथमाध्यायः

संश्रितश्रीपरानन्दनृहरिः श्रीधरो यतिः ।
पुराणं वैष्णवं व्याख्यत् स्वप्रकाशाख्यटीकया ॥१॥
द्वितीयेऽंशे सृष्टिशेषप्रसङ्गे नानुवर्ण्यते ।
भूमण्डलं सपातालज्योतिश्चक्रादिलक्षणम् ॥२॥

उक्तानुवादपूर्वकं प्रागुक्तं प्रियव्रतवंशं पृच्छति—'भगवन्नि'ति चतुर्भिः । सर्गसम्बन्धि यथा जगद् बभूवेत्यादि यत् पृष्टोऽसि ॥१॥

जगत्सृष्टौ वाच्यायां वाचकत्वेन सम्बन्धः ॥२॥

ध्रुवो वंशप्रवर्त्तकस्त्वयोक्तः ॥३।४॥

आत्मजाम् औरसीं कन्यां कन्यासंज्ञामिति वा ॥५।६।७॥

तेषां मध्ये ज्योतिष्मान् सत्यनामा अन्वर्थसंज्ञः तेजस्वीत्यर्थः ॥८।१०॥

तेषां विरक्तव्यतिरिक्तानां विभज्य द्वीपानि ददौ रथचक्रेण परिखातैः परिखाभूतैः समुद्रैर्द्वीपानि स्वयं विभक्तानि

(क) तां प्रियव्रतस्य सन्ततिम् ।

(ख) निर्ममाः ममताशून्या विरक्ता इति यावत् । अफलाकाङ्क्षिणः फलाकाङ्क्षारहिताः निष्कामा इति यावत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जम्बूद्वीपं महाभाग सोऽग्नीध्राय ददौ पिता ।
मेधातिथेस्तथा प्रादात् प्लक्षद्वीपमथापरम्(३) ॥१२॥

शाल्मले च वपुष्मन्तं नरेन्द्रमभिषिक्तवान् ।
ज्योतिष्मन्तं कुशद्वीपे राजानं कृतवान् प्रभुः ॥१३॥

द्युतिमन्तञ्च राजानं क्रौञ्चद्वीपे समादिशत् ।
शाकद्वीपेश्वरञ्चापि भव्यञ्चक्रे च स प्रभुः(४) ॥१४॥

सवनं पुष्करद्वीपे राजानं समकारयत्(५) ॥१५॥

जम्बूद्वीपेश्वरो यस्तु अग्नीध्रो मुनिसत्तम ।
तस्य पुत्रा बभुवुस्ते प्रजापतिसमा नव ॥१६॥

नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च ॥१७॥

केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत् ।
जम्बूद्वीपविभागांश्च तेषां विप्र निशामय ॥१८॥

पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम् ।
हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥१९॥

तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ।
इलावृताय प्रददौ मेरुर्यत्र तु मध्यगः ॥२०॥

नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता ।
श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते ॥२१॥

यदुत्तरं शृङ्गवतो वर्षं तत् कुरवे ददौ ।
मेरोः पूर्व्वेण यद् वर्षं भद्राश्वाय प्रदत्तवान्(ग) ॥२२॥

गन्धमादनवर्षन्तु केतुमालाय दत्तवान् ।
इत्येतानि ददौ तेभ्यः पुत्रेभ्यः स नरेश्वरः ॥२३॥

वर्षेष्वेतेषु तान् पुत्रानभिषिच्य स भूमिपः ।
शालग्रामं महापुण्यं मैत्रेय तपसे ययौ(घ) ॥२४॥

यानि किम्पुरुषादीनि वर्षाण्यष्टौ महामुने ।
तेषां स्वाभाविकी सिद्धिः सुखप्राया ह्ययत्नतः(ङ) ॥२५॥

विपर्य्ययो न तेष्वस्ति जरामृत्युभयं न च ।
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ॥२६॥

न तेष्वस्ति युगावस्था क्षेत्रेष्वष्टासु सर्व्वदा ।
हिमाह्वि यस्य वै वर्षं नाभेरासीन्महात्मनः ॥२७॥

तस्यर्षभोऽभवत् पुत्रो मेरुदेव्यां महाद्युतिः ।
ऋषभाद् भरतो जज्ञे ज्येष्ठः पुत्रशतस्य सः ॥२८॥

कृत्वा ददाविति भागवतोक्तरीत्या द्रष्टव्यम् । जम्बूद्वीपादिसन्निवेशश्चोत्तराध्याये वक्ष्यति ॥११।१७॥

हिमाह्वं हिमवतो दक्षिणं भारतं वर्षं नाम । तच्च यथासुखं वासस्थानम् । तदुक्तं मात्स्ये—'वसत्यृषन्त्यो वर्षेषु प्रजा येषु चतुर्विधाः । वर्षमित्येव रमणं वर्षत्वं तेन तेषु च' । इति ।१८

हेमकूटं हिमवदुत्तरम् । हेमकूटादुत्तरं नैषधं निषधगिरेर्दक्षिणम् ॥१९॥

निषधादुत्तरम् इलावृतं वर्षम् इलावृताय प्रददौ । यत्र मध्ये मेरुस्तिष्ठति । इलावृतादुत्तरो नीलाचलस्तदाश्रितं तदुत्तरम् ॥२०॥

तस्मात् श्वेतगिरेरुत्तरं वर्षम् ॥२१॥

गन्धमादनवर्षं मेरोः पश्चिमम् ॥२३॥

विपर्ययोऽसुखमकालमृत्युश्च । तेषु धर्माधर्मौ च न स्तः, तेषां भौमस्वर्गत्वेन धर्माद्यनधिकारात् । युगावस्था देहादिह्रासलक्षणा ॥२६।२७॥

(ग) प्रदत्तवान् तद्वर्षमिति शेषः ।

(घ) महापुण्यं परमपवित्रम् प्रकृष्टसुकृतसाधकं वा, ग्रामं तदाख्यं पुलस्त्यस्याश्रमक्षेत्रम् ।

(ङ) सुखप्राया सुखबहुला ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्वा राज्यं स्वधर्म्मेण तथेष्ट्वा विविधान् मखान् ।
अभिषिच्य सुतं ज्येष्ठं(६) भरतं पृथिवीपतिम् ॥२९॥

तपसे स महाभागः पुलस्त्यस्याश्रमं ययौ ।
वानप्रस्थविधानेन तत्रापि कृतनिश्चयः(च) ॥३०॥

तपस्तेपे यथान्यायं यदा च स(७) महीपतिः ।
तपसा कर्शितोऽत्यर्थं कृशो धमनिसन्ततः ॥३१॥

नग्नो वीटां मुखे दत्त्वा वीराध्वानं(८) ततो गतः ।
ततश्च भारतं वर्षमेतल्लोकेषु गीयते ॥३२॥

भरताय यतः पित्रा दत्तं प्रातिष्ठता वनम् ।
सुमतिर्भरतस्याभूत् पुत्रः परमधार्म्मिकः(छ) ॥३३॥

कृत्वा सम्यग् ददौ तस्मे राज्यमिष्टमखः पिता ।
पुत्रसंक्रामितश्रीस्तु भरतः स महीपतिः ॥३४॥

योगाभ्यासरतः प्राणान् शालग्रामेऽत्यजन्मुने !
अजायत च विप्रोऽसौ योगिनां प्रवरे कुले ॥३५॥

मैत्रेय ! तस्य चरितं कथयिष्यामि ते पुनः ।
सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो व्यजायत ॥३६॥

परमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ।
प्रतिहर्त्तेति विख्यात उत्पन्नस्तस्य चात्मजः ॥३७॥

भुवस्तस्मात् तथोद्गीथः(९) प्रस्तारस्तत्सुतो विभुः ।
पृथुस्ततोऽभवन्नक्तो(१०) नक्तस्यापि गयः सुतः ॥३८॥

नरो गयस्य तनयस्तत्पुत्रोऽभूद् विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥३९॥

महान्तस्तत्सुतश्चाभून्मनस्युस्तस्य चात्मजः ।
त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत् सुतः ॥४०॥

शतजिद्रजसस्तस्य जज्ञे पुत्रशतं मुने !
विश्वग्ज्योतिःप्रधानास्ते यैरिमा वर्द्धिताः प्रजाः ॥४१॥

तैरिदं भारतं वर्षं नवभेदमलङ्कृतम् ।
तेषां वंशप्रसूतैश्च भुक्तेयं भारती पुरा ॥४२॥

स ऋषभो राज्यं कृत्वा तपस्तप्तुं पुलहस्याश्रमं शालग्रामक्षेत्रं ययावित्युत्तरेणान्वयः ॥२९।३०॥

धमनिभिः शिराभिः सन्ततो व्याप्तः, तपसा कृशदेहत्वात् । वीटां कन्दुकसदृशाश्मकबलम् ॥ "आस्ये कृताश्मकबलः" इति भागवतोक्तेः । वीराध्वानं महाप्रस्थानम् ॥३१-३२॥

ततश्च ऋषभानन्तरं भरतेन पालितत्वाद् भारतमेतद् वर्षं गीयते । प्रातिष्ठता प्रस्थानं कुर्वतेत्यर्थः

इष्टमखः पूजितयज्ञः सम्यक् राज्यं कृत्वा पश्चात् तस्मै पुत्राय तद् राज्यं ददौ ॥३३॥

पुत्रे संक्रामिता श्रीः राज्यश्रीर्येन सः ॥३३-३४॥

पुनः कथयिष्यामि इत्यस्य अयं भावः—स्थूलत्वेन सुग्रहत्वात् प्रस्तुतभुवनकोशं शृणु । ततश्च "स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेत्" इति भागवतोक्तक्रमेण ग्रहणयोग्यं सूक्ष्मात्मतत्त्वसम्बद्धभरतस्य चरितं पश्चाद् वक्ष्यामीति ॥

तस्माद् भरतानन्तरं सुमतेस्तेजसो वीर्यादिन्द्रद्युम्नो जातः ॥३६॥

तदन्वयः प्रतिहारस्य पुत्रः प्रतिहर्त्ता ॥३७॥

शतजितः पुत्रशतम् । विश्वज्योतिःप्रधाना विश्वज्योतिः प्रधानो मुख्यो येषां ते ॥४१॥

नवभेदं नव भेदा यस्मिंस्तत् । भेदांस्तृतीयाध्याये वक्ष्यति ॥४२॥

(च) वानप्रस्थविधानेन वानप्रस्थाश्रमोक्तविध्यनुसारेण ।

(छ) प्रपूर्वस्य आतिष्ठतेरिदं रूपम्, आङा व्यवधानाद् रूचादित्वाभावेन शतृप्रत्ययो न दुष्टः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतत्रेतादिसर्गेण युगाख्या ह्येकसप्ततिः ॥४३॥

एष स्वायम्भुवः सर्गो येनेदं पूरितं जगत् ।

वाराहे तु मुने ! कल्पे पूर्वमन्वन्तराधिपः ॥४४॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे प्रथमोऽध्यायः ।

ननु त्वया पूर्वमुत्तानपादादयोऽपि सार्वभौमाः प्रोक्ताः, इदानीं प्रियव्रतादयोऽपि सार्वभौमा एवोच्यन्ते, तच्च समकाले न संगच्छते, अतः क्रमो वक्तव्य इत्यत्राह—'तेषा'मिति । तेषां प्रियव्रतान्वयप्रसूतानां वंशे प्रसूतैः पुरा प्रथममियं भारती भूमिर्भुक्ता, पश्चादुत्तानपादादिभिः कियन्तं कालमियं भुक्तेत्यत आह—कृतत्रेतादीनां सर्गेण प्रवृत्त्या युगाख्या चतुर्युगैराख्यायते या एकसप्ततिमन्वन्तराख्यः कालः । तावन्तं कालमित्यर्थः । कृतत्रेतादिसंज्ञेयमिति पाठेऽप्येवमेव योज्यम् । युगाख्यामेकसप्तति पाठे स्फुटोऽयमर्थः ॥४३॥

एतदेवमेव स्पष्टयति—'एष' इति । वाराहेऽस्मिन् कल्पे यदा स्वायम्भुवः पूर्वस्य प्रथममन्वन्तरस्याधिपोऽभूत्, तदा एष प्रियव्रतवंशानां राज्ञां सर्गः, ततः स्वारोचिषादावुत्तानपादवंश्यानामित्यर्थः । अत एव उत्तानपादवंश्यस्य प्राचेतसदक्षकन्यायामादित्यानां जन्म वैवस्वतमन्वन्तरे प्रोक्तम् । सप्तम्यन्तपाठे प्रथममन्वन्तराधिपे स्वायम्भुवे वर्त्तमाने स्वायम्भुवोऽंशभूतात् तस्मादेव मनोरेष प्रियव्रतादिसर्गः प्रथमं प्रवृत्त इत्यर्थः । यद्वा पूर्वोक्तसर्वसृष्टिनिगमनमेतत् 'एष' इति ॥४४॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां द्वितीयांशे प्रथमोऽध्यायः ॥

पाठान्तराणि—

(८—१) —पुत्रास्ते प्रख्याता ।
(१०—२) —निर्म्मत्ताः ।
(१२—३)—प्रादात्सप्तद्वीपं तथापरम् ।
(१४—४)—भव्यं चक्रे प्रियव्रतः ।
(१५—५) पुष्कराधिपतिं चक्रे सवनं चापि स प्रभुः ।
(२६—६) —सुतं वीरं—।
(३१—७)—यथान्यायमियाज स— ।
(३२—८) —कृत्वा महाध्वानं— ।
(३८—९) भवस्तस्मादथोद्गीथः— ।
(३८—१०) पृथुस्ततस्ततो नक्तो— ।
(४२—११)—नवभागैरलङ्कृतम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयोऽध्यायः ।

(जम्बूद्वीपवर्णनम्)

मैत्रेय उवाच ।

कथितो भवता ब्रह्मन् ! सर्गः स्वायम्भुवश्च मे ।
श्रोतुमिच्छाम्यहं त्वत्तः सकलं मण्डलं भुवः ॥१॥

यावन्तः सागरा द्वीपास्तथा वर्षाणि पर्व्वताः ।
वनानि सरितः पुण्र्यो देवादीनां तथा मुने ॥२॥

यत्प्रमाणमिदं सर्व्वं यदाधारं यदात्मकम् ।
संस्थानमस्य च मुने ! यथावद् वक्तुमर्हसि ॥३॥

पराशर उवाच ।

मैत्रेय श्रूयतामेतत् संक्षेपाद् गदतो मम ।
नास्य वर्षशतेनापि वक्तुं शक्यो हि विस्तरः ॥४॥

जम्बू-प्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज ।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥५॥

एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ।
लवणेक्षु-सुरा-सर्पिर्दधि-दुग्ध-जलैः समम् ॥६॥

जम्बूद्वीपः समस्तानाम् एतेषां मध्यसंस्थितः ।
तस्यापि मेरुर्म्मैत्रेय ! मध्ये कनकपर्व्वतः ॥७॥

चतुराशीतिसाहस्रो योजनैरस्य चोच्छ्रयः ।
प्रविष्टः षोड़शाधस्ताद् द्वात्रिंशन्मूर्द्ध्नि विस्तृतः ॥८॥

मूले षोड़शसाहस्रो विस्तारस्तस्य सर्व्वशः ।
भूपद्मस्यास्य शैलेशः कर्णिकाकारसंस्थितः ॥९॥

हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे ।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः ॥१०॥

द्वितीयः अध्यायः ।

उक्तानुवादेन भुवनकोशं सविशेषं बुभूत्सुः पृच्छति—'कथित' इति । स्वयम्भुवोऽशत्वान्मनुरत्र स्वयम्भूः । तदीयः प्रियव्रतादिसर्गः कथितः । तत्कथनेन च द्वीपवर्षादिविभागोक्त्या सचितं भूमण्डलादिकं श्रोतुमिच्छामि ॥१॥

देवादीनां पुण्र्यो नगण्र्यो यावत्यः ॥२॥

इदं मण्डलं संस्थानं रचनाविशेषम् आकारमिति यावत् । एवमेते द्वादश प्रश्नाः । एतेषाञ्च यत्प्रमाणैस्तत्तत्संख्या-संस्थानादिभिर्यथायोगमुत्तराणि द्रष्टव्यानि ॥३।५॥

जम्ब्वादिसप्तद्वीपाः सप्तभिर्लवणादिसंज्ञैः समुद्रैः समं यथा भवत्येवं सर्वत आवृताः ॥६।७॥

अशीतिरेव आशीतिः सहस्रमेव साहस्रम् । चतुरधिकान्यशीति सहस्राणि प्रमाणं यस्य स मेरोरुच्छ्रयः लक्षयोजनप्रमाणो मेरुस्तस्योच्छ्रयो बहिश्चतुरशीतियोजनसहस्रो दृश्यते । षोडशसहस्राणि अधस्ताद् भूम्यां प्रविष्टः खातः, द्वात्रिंशद् योजनसहस्राणि मूर्ध्नि विस्तृतः ॥८

अत एव मूर्ध्नि विस्तृतत्वान्मूले संकुचितत्वाद् भूमध्यावस्थानाच्च भूरूपस्य पद्मस्य कर्णिकाकारेण संस्थितः ॥९॥

भारतं वर्षमारभ्य मेरोर्दक्षिणोत्तरतः स्थितानां षण्णां वर्षाणां मर्यादापर्वतानाह—'हिमवा'निति । वर्षाणां व्यवच्छेदकाः पर्वताः ॥१०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे ।
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ॥११॥
भारतं प्रथमं वर्षं ततः किम्पुरुषं स्मृतम् ।
हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विज ॥१२॥
रम्यकञ्चोत्तरे वर्षं तस्यैवानु हिरण्मयम् ।
उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥१३॥
नवसाहस्रमेकैकमेतेषां द्विजसत्तम !
इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः (क) ॥१४॥
मेरोश्चतुर्दिशं तत्तु नवसाहस्रविस्तृतम् ।
इलावृतं महाभाग ! चत्वारश्चात्र पर्व्वताः ॥१५॥
विष्कम्भा रचिता मेरोर्योजनायुतमुच्छ्रिताः (ख)॥१६॥
पूर्व्वेण मन्दरो नाम दक्षिणो गन्धमादनः ।
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥१७॥
कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च ।
एकादशशतायामाः पादपा गिरिकेतवः ॥१८॥
जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्महामुने ।
महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै ॥१९॥
पतन्ति भूभृतः पृष्ठे शीर्य्यमाणानि सर्वतः ।
रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै ॥२०॥
सरित् प्रवर्त्तते सा च पीयते तन्निवासिभिः ।
न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः ॥२१॥
तत्पानात् स्वच्छमनसां जनानां तत्र जायते ।
तीरमृत् तद्रसं प्राप्य सुखवायुविशोषिता ।
जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् (ग)॥२२॥

लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ। यद्यपि जम्बूद्वीपस्य मण्डलाकारस्य लक्षयोजनप्रमाणत्वात् तन्मध्ये रेखायामेव मुख्यलक्षप्रमाणत्वं, निषधनीलौ तु तन्मध्यरेखातो दक्षिणश्चोत्तरश्च सलक्षयोजनसहस्रान्तरितत्वादीषन्न्यूनौ तथापि स्थूलदृष्ट्या लक्षप्रमाणावित्युक्तम्। अपरे तु हेमकूटादयो दशहीनाः दशांशन्यूनाः हेमकूटश्वेतौ नवतियोजनसहस्रप्रमाणौ। हिमवच्छृङ्गिणे चैकाशीतियोजनसहस्रप्रमाणौ। तदुक्तं वाराहे—'द्वीपस्य मण्डलीभावाद्ह्रासवृद्धी प्रकीर्त्तिते'। इति ॥११॥

यथा वै भारतमिति द्वीपमण्डलप्रान्तवर्त्तित्वाद् धनुराकारं कुरुवर्षमित्यर्थः ॥१३॥

एतेषां हिमवदादिमर्यादयावस्थितानां भारतादीनां मध्ये एकैकं वर्षं विस्तरतो नवसहस्रयोजनप्रमाणं इलावृतञ्च नवसाहस्रम्। विस्तारसाम्येऽपि तत्र कश्चिद् विशेषमाह—तन्मध्ये इति। तदाह,—वायुः धनुः संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे। दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् इति ॥१४॥

किञ्च इलावृते अन्ये चत्वारः पर्वता मेरोश्चतुर्दिशम् ॥१५

विष्कम्भा दाढ्यार्थमवष्टम्भा ईश्वरेण रचिताः। अन्या मूलभागादूर्ध्वभागस्य द्विगुणविस्ताराद् गौरवेण भङ्गप्रसङ्ग ॥१६॥

तेष्ववष्टम्भपर्वतेषु पूर्वादिक्रमेण चत्वारः पादपा एकादशशतयोजनाच्छाया गिरेः केतवो ध्वजा इव रचिताः ॥१८॥

नामहेतुर्नामप्रवृत्तिहेतुः। फलप्रमाणे विशोषश्च वायुनोक्तः,—अरत्नीनां शतान्यष्टरेकषष्ट्यधिकानि तु। फलप्रमाणं संख्यातमृषिभिस्तत्त्वदर्शिभिः इति ॥१९।२०॥

सुखस्पर्शो वायुः सुखवायुः तेन विशोषिता सती तत्तीरमृत्तिका सिद्धानां भूषणं सुवर्णं भवति ॥२२॥

(क) सौवर्णः कनकमयः।

(ख) योजनायुतमिति योजनानाम् अयुतम् अयुतयोजनपरिमाणमित्यर्थः

(ग) तीरमृत् तस्याः सरितस्तीरमृत्तिका, तद्रसं तस्या नद्या रसं जलं शीर्य्यमाणफलप्रस्तुतरसविशेषं वा प्राप्य।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भद्राश्वं पूर्व्वतो मेरोः केतुमालञ्च पश्चिमे ।
वर्षे द्वे तु मुनिश्रेष्ठ ! तयोर्म्मध्ये इलावृतम्(१) ॥२३
वनं चैत्ररथं पूर्व्वे दक्षिणे गन्धमादनम् ।
वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम् ॥२४॥
अरुणोदं महाभद्रमसितोदं समानसम् ।
सरांस्येतानि चत्वारि देवभोग्यानि सर्व्वदा ॥२५॥
शीतान्तश्चक्रमुञ्जश्च(२) कुररी माल्यवांस्तथा ।
वैकङ्कप्रमुखा मेरोः पूर्व्वतः केशराचलाः ।
त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा ॥२६॥
निषधाद्या दक्षिणतस्तस्य केसरपर्व्वताः ।
शिखिवासाः सवैदूर्य्यः कपिलो गन्धमादनः ।
जारुधिप्रमुखास्तद्वत् पश्चिमे केसराचलाः ॥२७॥
मेरोरनन्तराङ्गेषु जठरादिष्ववस्थिताः ।
शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः ।
कालञ्जराद्याश्च(३) तथा उत्तरे केशराचलाः ॥२८॥
चतुर्दशसहस्राणि योजनानां महापुरी ।
मेरोरुपरि मैत्रेय ! ब्रह्मणः प्रथिता दिवि ॥२९॥
तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च ।
इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः (घ)॥३०॥
विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् ।
समन्ताद् ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः ॥३१॥
सा तत्र पतिता दिक्षु चतुर्धा प्रतिपद्यते ।
सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात् ॥३२॥
पूर्व्वेण शैलात् सीता तु शैलं यात्यन्तरिक्षगा ।
ततश्च पूर्व्ववर्षेण भद्राश्वेनैति सार्णवम् ॥३३॥
तथैवालकनन्दापि दक्षिणेनैत्य भारतम् ।
प्रयाति सागरं भूत्वा सप्तभेदा महामुने ॥३४॥

तयोर्मध्ये इत्यनुवादः तत्रस्थ-विष्कम्भादिसानुषु चैत्ररथादिवनानामरुणोदादिसरसाञ्च कथनार्थः ॥२३

उक्तानां वक्ष्यमाणानाञ्च केसराचलानां स्थानान्याह—'मेरो'रिति। मेरोरनन्तराणि सन्निहितानि यान्यङ्गानि मूलसमीपस्थानानि तान्येव जठरादीनि पूर्व-दक्षिण-पश्चिमोत्तरदेशवर्त्तितया जठर-दक्षिणपार्श्व-पृष्ठ-वामपार्श्व-साम्यात्, 'तेष्ववस्थिता मेरोः कर्णिकाया इव केसरभूताः मूलदेशे परितः उपक्लृप्ता' इति शुकोक्तेः ॥२८।२९॥

लोकपालानां पुरः सार्द्धद्विसहस्रयोजनाः "तामनुपरितो लोकपालानाम् अष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टा उपक्लृप्ताः।' इति शुकोक्तेः ॥३०॥

तत्र गङ्गागमनमाह—'विष्णुपादे'ति। त्रिधा विक्रामतो विष्णोर्वामपादाङ्गुष्ठनख निर्भिन्नोर्ध्वाण्डकटाह विवरेणान्तः-प्रविष्टा बाह्यजलधारा हि ब्रह्मदत्तार्घ्यजलघर्मद्रवसंयुता गङ्गा, सा च विष्णोः पादाद् विनिष्क्रान्ता सती दिवोऽन्तरीक्षाद् ब्रह्मणः पुर्य्यां पतति ॥३१॥

सा तत्र पतिता सती चतुर्धा भेदं प्राप्नोति ॥३२॥

शैलाच्छैलं यातीत्यत्र शुकोक्तिः—'सीता तु ब्रह्मसदनात केसराचलादिशिखरेभ्योऽधः पतन्ती' इत्यादिः। वायुनोक्तं—'सीता तु शिखरपृष्ठे'त्युपक्रम्य 'एवं शतसहस्राणि दारयन्ती महानदी। निपपात तदा सीता जठरे सिद्धसेविते। तस्मादुपगता शैलं देवकूटं तरङ्गिणी' इत्यादि ॥३३॥

'तथैवालकनन्दापी'ति—केसराचलादिक्रमेण निषधहेम-कूटहिमवतोऽतिक्रम्येत्यर्थः। सप्तभेदा भूत्वेति—ते च भेदा मात्स्ये प्रोक्ताः—'नलिनी ह्लादिनी चैव प्लाविनी चैव प्राच्यगाः। सीता च चक्षुः सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः। सप्तमी त्वन्वगाद् गङ्गा दक्षिणेन भगीरथम्'। इति ॥३४॥

(घ) दिशासु विदिशासु चेत्यार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः ।
पश्चिमं केतुमालाख्यं वर्षं गत्वैति सागरम् ॥३५॥

भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून् ।
अतीत्योत्तरमम्भोधिं समभ्येति महामुने ॥३६॥

आनीलनिषधायामौ माल्यवद्-गन्धमादनौ ।
तयोर्म्मध्यगतो मेरुः कर्णिकाकारसंस्थितः ॥३७॥

भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा ।
पत्राणि लोकपद्मस्य मर्य्यादा शैलबाह्यतः ॥३८॥

जठरो देवकूटश्च मर्य्यादापर्व्वतावुभौ ।
तौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥३९॥

गन्धमादन-कैलासौ पूर्व्वपश्चायतावुभौ ।
अशीतियोजनायामावर्णवान्तर्व्यवस्थितौ ॥४०॥

निषधः पारिपात्रश्च(४) मर्य्यादापर्व्वतावुभौ ।
मेरोः पश्चिमदिग्भागे यथा पूर्व्वौ तथा स्थितौ ॥४१॥

त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्व्वतौ ।
पूर्व्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥४२॥

इत्येते मुनिवर्य्योक्ता मर्य्यादापर्व्वतास्तव ।
जठराद्याः स्थिता मेरोस्तेषां द्वौ द्वौ चतुर्दिशम् ॥४३॥

मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्व्वताः ।
शीतान्ताद्या मुने ! तेषामतीव हि मनोरमाः ॥४४॥

शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः ।
सुरम्याणि तथा तासु काननानि पुराणि च ॥४५॥

लक्ष्मी-विष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम ।
तास्वायतनवर्षाणि जुष्टानि वरकिन्नरैः ॥४६॥

गन्धर्व्वयक्षरक्षांसि तथा दैतेयदानवाः ।
क्रीड़न्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम् ॥४७॥

एवं तावद् दक्षिणोत्तरतो हिमादिभिः षड़्भिर्मर्य्यादागिरिभिर्विभक्तानि भारतादीनि सप्तवर्षाण्युक्तानि इलावृतमेरुमूर्द्धाचलाविशेषगङ्गागमनप्रकाराश्चोक्ताः, इदानीं तु 'भद्राश्वं पूर्वतो मेरोः केतुमालश्च पश्चिमे' इति पूर्वोत्तरयोर्वर्षयोर्मर्यादापर्वतावाह—'आनीले'ति। उत्तरो नीलः,—दक्षिणो निषधः, तत्पर्यन्त आयामो दैर्घ्यं ययोस्तौ आनीलनिषधायामौ। 'तत्र पश्चिमे माल्यवान् पूर्वे गन्धमादनः तथैवेलावृतम् अपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ' इति शुकोक्तेः। केचित् त्वनयोर्वैपरीत्यमाहुः—तयोर्मध्यगतो मेरुरिलावृतेन सहितः इति द्रष्टव्यम्। 'मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् इलावृतम्' इत्युक्तत्वात्। अनेन चतुस्त्रिंशद्योजनसहस्रायामौ तावित्युक्तं भवति। तदाह वायुः—"चतुस्त्रिंशत् सहस्राणि गन्धमादनपर्वतः। उदग् दक्षिणतश्चैव आनीलनिषधायतः" इत्यादि ॥३७॥

लोको जम्बूद्वीपं तदेव पद्मं तस्य पत्राणि। भारतकुरुवर्षयोर्भद्राश्वकेतुमालयोश्च परस्परं समानत्वादाभिमुख्यावस्थानाच्च पत्रसादृश्यम् ॥३८॥

इदानीं मेरोश्चतुर्दिक्षु द्वौ द्वौ परिधिपर्वतौ प्रमाणसंस्थानाभ्यां दर्शयति--'जठर' इति पञ्चभिः। इलावृतस्यैवावान्तरविभागहेतुत्वान्मर्यादापर्वताविति चोक्तं नवसाहस्रमर्यादापर्वतानां पूर्वमुक्तत्वात्। अन्यस्य वर्षस्यात्रासम्भवाच्च ॥३९॥

अशीतियोजनानि आयामो विस्तारो ययोस्तौ माल्यवद्गन्धमादनयोर्मध्यादर्णवस्यान्तर्व्यवस्थितौ ॥४०॥

पूर्वौ जठरदेवकूटौ यथा आनीलनिषधायतौ तथा उभावपि स्थितौ ॥४१॥

त्रिशृङ्गो जारुधिश्चैव उत्तरौ यथा दक्षिणौ तथा स्थितौ तदाह शुकः—"अष्टाभिरेतैः परिस्तृतोऽग्निरिव परितश्चकाञ्चनगिरिः।" इति ॥४२।४३।४४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भौमा ह्येते स्मृताः स्वर्गा धर्म्मिणामालया मुने !
नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि (ङ)॥४८॥

भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज !
वराहः केतुमाले तु भारते कूर्म्मरूपधृक् ॥४९॥

मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते जनार्द्दनः ।
विश्वरूपेण सर्व्वत्र सर्व्वः सर्व्वेश्वरो (५) हरिः ॥५०

सर्व्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः ।
यानि किम्पुरुषादीनि वर्षाण्यष्टौ महामुने !
न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम्॥५१॥

सुस्थाः (६) प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः ।
दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः ॥५२॥

न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै ।
कृत-त्रेतादिका नैव तेषु स्थानेषु कल्पना (च)॥५३॥

सर्व्वष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ।
नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम ॥५४॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे द्वितीयोऽध्यायः ।

तेषां शैलानामन्तरे मध्ये द्रोण्यः दरीविशेषाः सन्ति। सिद्धाः अणिमाद्यैश्वर्य्ययुक्ताः, चारणा देवगायकाः, तैः-सेवितः ॥४७।५१॥

निरातङ्काः नीरोगाः। वर्षाणां सहस्राणि दश वा द्वादश वा स्थिरायुष इति किलोक्तिरिलावृतादिदेशभेदव्यवस्थायाम् ॥५२॥

तेषु देवो न वर्षति यतो भौमान्येवाम्भांसि नित्यं सन्ति ॥५३॥

कुलाचला मुख्याः पर्वतास्तेभ्यः प्रसूता या नद्यस्ताश्च शतशः सन्ति ॥५४॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयांशे द्वितीयोऽध्यायः ॥

(ङ) पापं पापजनकं येषां कर्म ते पापकर्माणः अधर्म्याचारा इत्यर्थः ।

(च) वर्षत इत्यत्रात्मनेपदमार्षम्। कृतत्रेते सत्यत्रेतायुगे आदौ यत्र कल्पनायां तथाभूता इति कल्पनाविशेषणं कृत-त्रेतादिकेति। अत्र कृतत्रेतादीनां कल्पनासम्बन्धित्वं विषयिता-सम्बन्धेन बोद्धव्यम् ।

पाठान्तराणि—

(२३—१) —तयोर्मध्यमिलावृतः ।
(२६—२) शीताम्भश्च कुमुन्दश्च —।
(२८—३) कालञ्जाद्याश्च—।
(४१—४)—पारियात्रश्च— ।
(५०—५) —सर्व्वत्रगो—।
(५२—६) स्वस्थाः—।
(६—७) —कसेरुश्च ताम्रपर्णो—।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृतीयोऽध्यायः

[भारतवर्षवर्णनम्]

पराशर उवाच

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः (क)॥१॥

नवयोजनसाहस्रो विस्तारोऽस्य महामुने !
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् (ख) ॥२॥

महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः ॥३॥

अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै ।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने ॥४॥

इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्यानां कर्म्म भूमौ विधीयते ॥५॥

भारतस्यास्य वर्षस्य नव भेदान् निशामय ।
इन्द्रद्वीपः कशेरुमान् ताम्रवर्णो (७) गभस्तिमान्
नागद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः ॥६॥

अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ॥७॥

पूर्व्वे किराता यस्य स्युः (८) पश्चिमे यवनाः स्थि
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः

तृतीयः अध्याय

जम्बूद्वीपस्य संस्थानमुक्तं वर्षविभागतः, तत्रापि भारतं श्रेष्ठमाह, तत्र च पुंवपुः । भारती भरतस्य सन्ततिः ॥१॥

अत्रैव श्रेयःसाधनमनुष्ठेयमन्यत्र तदसम्भवादिति दर्शयन्नाह—'कर्मभूमि'रिति । स्वर्गमपवर्गञ्च गच्छतां पुंसामुभयसाधनभूतानां प्रवृत्तनिवृत्तकर्मणां भूमिरियम् । किम्पुरुषादिवर्षाष्टके पुष्करद्वीपे च कर्मण एवाभावात् ।

प्लक्षादिद्वीपपञ्चके केवलं निवृत्तमेव कर्म, नान्यत् । वक्ष्यति हि—'यथोक्तकर्मकर्तृत्वात् स्वाधिकारक्षयाय हि । तत्र ते तु कुशद्वीपे ब्रह्मभूतं जनार्दनम् । यजन्तः क्षपयन्त मधिकारं फलप्रदम्' । इति ॥२॥

समस्तपुरुषार्थसाधनगङ्गादिपुण्यनदीनां जन्म शैलाश्चात्रैव सन्तीत्याह—'महेन्द्र' इति ॥३॥

तस्मात् सर्वं शुभाशुभमत्रेति अनेनैव कर्मणा प्रा इत्याह—'अत' इति । अतोऽस्माद् वर्षात् स्वर्ग सम्प्राप्यते । क्रममुक्तिश्चास्मात् प्रयान्ति ॥४॥

स्वर्गश्च भौम इलावृतादिः । मोक्षश्च सद्योमु मध्यमान्तरीक्षलोकाः । अन्तः पातालादिरित एव र नान्यतः, तत्साधनस्यात्रैव सुलभत्वात् । यस्मादन्यत्र वर्षान्तरादौ शास्त्रेण कर्म न विधीयते ॥५।६॥

अयन्त्विति । समुद्रप्रान्तवर्त्ती द्वीपः समुद्रेणैक सागरेण सगरसुतखातेन संवृत इति ज्ञेयम् । 'सामा सगरसुतखातसागरसंवृतत्वम् सहस्रयोजनान्तरत

(क) भरतस्य इयमित्यर्थे भरत शब्दादन् प्रत्ययेन भारतीति पदसिद्धिः, भरतसम्बन्धिनीत्यर्थः ।

(ख) कर्मभूमिः पुण्यपापजनककर्मोपयुक्ताभूमिरित्यर्थः । स्वर्गमित्यादि—अत्र प्रवृत्तिलक्षणैः सकामकर्मविशेषैः स्वर्गः निवृत्तिलक्षणैः निष्कामकर्मविशेषैश्चापवर्ग इति ध्येयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इज्या-युद्ध-वाणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः ।
शतद्रू चन्द्रभागाद्या हिमवत्पादनिर्गताः ॥९॥

वेद-स्मृतिमुखाद्याश्च पारिपात्रोद्भवा मुने ।
नर्मदा सुरसाद्याश्च नद्यो विन्ध्याद्रिनिर्गताः ॥१०॥

तापी-पयोष्णी-निर्व्विन्ध्याप्रमुखा ऋक्षसम्भवाः ।
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ॥११॥

सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ।
कृतमाला-ताम्रपर्णीप्रमुखा मलयोद्भवाः ॥१२॥

त्रिसामाचार्य्यकुल्याद्या महेन्द्रप्रभवाः स्मृताः ।
ऋषिकुल्या-कुमार्य्याद्याः(१) शुक्तिमत्पादसम्भवाः।१३

आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ।
तास्विमे कुरुपाञ्चाला मध्यदेशादयो जनाः ॥१४॥

पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ।
पुण्ड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्व्वशः ॥१५

तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्ब्बुदाः ।
कारूषा माल्यवांश्चैव पारिपात्रनिवासिनः ॥१६॥

सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः (२) ।
मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा ॥१७॥

आसां पिबन्ति सलिलं वसन्ति सरितां (३) सदा ।
समीपतो महाभागा हृष्टपुष्टजनाकुलाः ॥१८॥

चत्वारि भारते वर्षे युगान्यत्र महामुने ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ॥१९॥

तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः ।
दानानि चात्र दीयन्ते परलोकार्थमादरात् (ग) ॥२०॥

पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते ।
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ॥२१॥

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः (घ)॥२२॥

कृते इलावृतमन्येषामपि अस्त्येव । यदाह वायुः— "भारतस्यास्य वर्षस्य नव भेदान् निबोधत । पर्वतान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम्" । इति ॥७।१२॥

क्रमाविवक्षया शुक्तिमत्यादिनिःसृतानां नदीनां पश्चान्निर्देशः ॥१३॥

'तास्वि'ति—इमे कुरुपाञ्चालादिनानादेशवर्त्तिनो जनास्तासु नदीषु वसन्ति, आसां जलानि पिबन्ति चेति चतुर्थेनान्वयः ॥१४-१८॥

'चत्वारी'ति—कृते युगे चतुष्पाद् धर्मः, त्रेतायां पादन्यूनः, द्वापरे द्विपात्। कलौ पादावशेष इत्यादिचतुर्युगव्यवस्था नान्यत्रेत्यर्थः ॥१९।२०॥

यज्ञपुरुषरूपो विष्णुरत्रेज्यते । अन्यद्वीपेषु प्लक्षादिषु अन्यथा सोमवायुसूर्यादिरूपः ॥२१।२२॥

स्वर्गदेवत्वप्राप्तेरपि अत्र मनुष्यत्वं दुर्लभमित्यस्मिन्नर्थे देवगीतं प्रमाणयति—'गायन्ती'ति ।

(ग) जुह्वत इत्यत्र परस्मैपदिनो जुहोतेरात्मनेपदमार्षम् । कर्मण्यनट् प्रत्ययेन दानानि देयवस्तूनीत्यर्थः ।

(घ) कर्मभूः सदसत्कर्मानुष्ठानयोग्या भूमिः । ततः भारतात् अन्या भोगभूमयः । सुखदुःखसाक्षात्काररूपस्य भोगस्य स्थानानि । अत्रैवानुष्ठितेन विहितकर्मणा धर्मः निषिद्धेन च कर्मणा अधर्मो जायते, ताभ्याञ्च यथाक्रमं सुखदुःखे तद्भोगश्च, न त्वन्यत्र समनुष्ठितेन कर्मणा तथेति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ।
कदाचिल्लभते जन्तुर्म्मानुष्यं पुण्यसञ्चयात् ॥२३॥

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् (ङ) ॥२४॥

कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्म्ममहीमनन्ते (च)
तस्मिँल्लयं ये त्वमलाः प्रयान्ति ॥२५॥

जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीणाः (छ) ॥२६॥

नववर्षं तु मैत्रेय ! जम्बूद्वीपमिदं मया ।
लक्षयोजनविस्तारं संक्षेपात् कथितं तव ॥२७॥

जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्ब्बहिः (ज) ॥२८॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे तृतीयोऽध्यायः ।

स्वर्गश्चापवर्गश्च आस्पदं स्थानं तस्य मार्गभूते भारताख्ये भूमिभागे ये पुरुषा भवन्ति, ते तु सुरत्वात् सुरत्वं प्राप्ता-नस्मानपि अपेक्ष्य भूयोऽधिकं धन्याः सुकृतिन इत्यर्थः ॥२४॥

तत्र हेतुमाहुः—'कर्माणी'ति । तां कर्ममहीम् अवाप्य । न संकल्पितानि तानि प्रसिद्धानि दृष्टादृष्टानि फलानि येषां तान्यसंकल्पिततत्फलानि निष्कामाणि कर्माणि विष्णौ सन्न्यस्य समर्प्य ये अमलाः सन्तस्तमेवालयं स्थानं प्रयान्ति । पाठान्तरे तस्मिन् लयमैक्यं प्रयान्ति ते धन्या इति पूर्वेण सम्बन्धः ॥२५॥

युष्माकमपि स्वर्गभोगानन्तरं भारते जन्म भविष्यतीति चेत् तत् तु न ज्ञायत इत्याहुः—'जानीमे'ति । स्वर्गप्रदे कर्मणि भोगेन विलीने सति क्व देहबन्धं जन्म प्राप्स्याम इति न जानीम । ये त्वद्य भारते मनुष्या जाताः सन्ति ते खल्वनिश्चितधन्याः अनायासेन मोक्षप्राप्ताः । तदाहुः—नेन्द्रियविप्रहीनाः अन्धपङ्ग्वादयो यदि न भवन्ति इन्द्रियवत्त्वमात्रेण तत्र मोक्षः सुसाध्य इति भावः ॥२६।२८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा विष्णुपुराणटीकायां द्वितीयांशे तृतीयोऽध्यायः ।

(ङ) भूय इति बहुशब्दादियसुन् प्रत्यये बहोर्यादिर्भूश्चेति साधु ।

(च) तां कर्ममहीं भारताख्यां कर्मभूमिम् ।

(छ) प्राप्स्यामेत्यत्र विसर्गलोप आर्षश्छन्दोऽनुरोधात् । इन्द्रियविप्रहीणाः 'इन्द्रियैः चक्षुरादिभिः विशेषतो रहिताः विप्रहीणेति विपूर्वक प्रपूर्वकजहातेरूपम् ।

(ज) समावृत्य वेष्टयित्वा । क्षारोदधिः लवणसमुद्रः । वलयस्य कटकस्य आकार इव आकारो यस्य सः ।

पाठान्तराणि—

(१३—१) —कुमाराद्याः—।
(१७—२) —कोशलवासिनः ।
(२७—३) —सहिताः सदा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थः अध्यायः ।

[षड्द्वीपवर्णनम् , लोकालोकपर्व्वतकथनञ्च]

पराशर उवाच ।

क्षारोदेन यथा द्वीपो जम्बूसंज्ञोऽभिवेष्टितः ।
संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥१॥

जम्बूद्वीपस्य विस्तारः शतसाहस्रसम्मितः ।
स एव द्विगुणो ब्रह्मन् ! प्लक्षद्वीप उदाहृतः ॥२॥

सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै ।
ज्येष्ठः शान्तभयो नाम (१) शिशिरस्तदनन्तरम् ॥३॥

सुखोदयस्तथानन्दः(२) शिवः क्षेमक एव च ।
ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा हि ते ॥४॥

पूर्व्वं शान्तभयं वर्षं शिशिरं सुखदं(३) तथा ।
आनन्दञ्च शिवञ्चैव क्षेमकं ध्रुवमेव च ॥५॥

मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्व्वताः ।
सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम (क) ॥६॥

गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा ।
सोमकः सुमनाश्चैव वैभ्राजश्चैव सप्तमः ॥७॥

वर्षाचलेषु रम्येषु सर्व्वेष्वेतेषु (४) चानघाः (ख) ।
वसन्ति देवगन्धर्व्वसहिताः सततं प्रजाः ॥८॥

तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः ।
नाधयो व्याधयो वापि सर्व्वकालसुखं हि तत् (ग)॥९॥

तेषां नद्यस्तु सप्तैव वर्षाणाञ्च समुद्रगाः ।
नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः॥१०॥

चतुर्थः अध्यायः ।

अथ प्लक्षादिकान् द्वीपान् वर्षाद्रिसरिदब्धिभिः । वर्णरूपादिभेदेन वर्णयत्याकटाहतः ॥१॥

तथा बलयत्वेन ॥२।३।

अत्र च जम्बूद्वीपो लवणाब्धिश्च विस्तारतो लक्षयोजनप्रमाणौ । एतमुत्तरोत्तरं द्वीपाब्धियुग्मं पूर्वस्माद् द्वितीयाब्धियुग्माद् द्विगुणं द्रष्टव्यम् । प्लक्षादिद्वीपपञ्चके च द्वीपविस्तारप्रमाणैरुभयतः समुद्रस्पर्शिभिः सप्तसप्तभिर्मर्यादागिरिभिर्भक्तान्युभयतः समुद्रस्पर्शानि सप्त सप्त वर्षाणि । पुष्करद्वीपे तु मध्यतो बलयाकारेण मानसोत्तरेण विभक्ते द्वे वर्षे । सर्वत्र वर्षाधिपतिसंज्ञाभिरेव वर्षाणां संज्ञा । शैलनद्यादयश्च स्व-स्व-संज्ञाभिरेव सर्वत्र स्पष्टं निर्दिष्टाः । तदेवं स्थिते तत्र किञ्चिद् व्याख्यायते प्लक्षद्वीपेश्वराः पूर्वादिवर्षक्रमेण ॥४॥

तदाह—'पूर्व'मिति ॥५।८॥

(क) मर्य्यादाकारकाः सीमाकारकाः । तेषां स्वस्वाधिपतिनामभिरेव ख्यातानां सप्तानां शान्तभयादिवर्षाणाम् । शृणुष्वेत्यात्मनेपदमार्षम् ।

(ख) वर्षाचलेषु वर्षपर्वतेषु ।

(ग) तत् तस्मात् आधीनां व्याधीनाञ्च तेष्वभावादित्यर्थः । सर्वकालसुखं सर्वं कालं व्याप्य सुखं तत्रेति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुतप्ता शिखी चैव विपाशा त्रिदिवा क्रमुः(५) ।
अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥११॥

एते शैलास्तथा नद्यः प्रधानाः कथितास्तव ।
क्षुद्रशैलास्तथा नद्यस्तत्र सन्ति सहस्रशः ॥१२॥

ताः पिबन्ति सदा हृष्टा नदीर्ज्जनपदास्तु ते ।
अपसर्पणी(६) न तेषां वै न चैवोत्सर्पिणी द्विज ॥१३

न त्वेवास्ति युगावस्था तेषु स्थानेषु सप्तसु ।
त्रेतायुगसमः कालः सर्व्वदैव महामते ॥१४॥

प्लक्षद्वीपादिषु ब्रह्मन् ! शाकद्वीपान्तिकेषु वै ।
पञ्चवर्षसहस्राणि जना जीवन्त्यनामयाः ॥१५॥

धर्म्माः पञ्च त्वथैतेषु वर्णाश्रमविभागजाः (७) ।
वर्णाश्च तत्र चत्वारस्तान् निबोध वदामि ते ॥१६॥

आर्य्यकाः कुरवश्चैव विविंशा भाविनश्च ये (८) ।
विप्र-क्षत्रिय-वैश्यास्ते शूद्राश्च मुनिसत्तम ॥१७॥

जम्बूवृक्षप्रमाणस्तु तन्मध्ये सुमहांस्तरुः ।
प्लक्षस्तन्नामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम ॥१८॥

इज्यते तत्र भगवांस्तैर्वर्णैरार्य्यकादिभिः ।
सोमरूपी जगत्स्रष्टा सर्व्वः सर्व्वेश्वरो हरिः ॥१९॥

प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपः समावृतः ।
तथैवेक्षुरसोदेन परिवेशानुकारिणा ॥२०॥

इत्येवं तव मैत्रेय ! प्लक्षद्वीप उदाहृतः ।
संक्षेपेण मया भूयः शाल्मलं मे निशामय ॥२१॥

शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु ।
तेषान्तु नामसंज्ञानि सप्त वर्षाणि तानि वै ॥२२॥

श्वेतोऽथ हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव सुप्रभश्च महामुने ॥२३॥

शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षु रसोदकः ।
विस्तारादि्गुणेनाथ सर्व्वतः संवृतः स्थितः ॥२४॥

तत्रापि पर्व्वताः सप्त विज्ञेया रत्नयोनयः ।
वर्षान्तव्यञ्जका(९)ये तु तथा सप्त च निम्नगाः॥२५

कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः ।
द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः ॥२६॥

कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा ।
ककुद्मान् पर्व्वतवरः सरिन्नामानि मे शृणु ॥२७॥

चिरात् पञ्चवर्षसहस्रान्ते म्रियते ॥६।१२॥

अपसर्पिणी ह्रासावस्था उत्सर्पिणी वृद्धावस्था। भारते हि कृतादित्रेतान्तं प्रजा उत्तरोत्तरं वर्द्धन्ते। ततो द्वापरादि-कलियुगान्तं ह्रसन्ति, तत् तेषां नास्तीत्यर्थः। युगावस्थेति कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया इति सूर्यसिद्धान्तादिप्रोक्ता युगावस्था च तेषु नास्ति। त्रिपाद् धर्म्मः शास्त्रादि-समृद्धिः यागाद्यनुष्ठानमित्यादिना त्रेतायुगसमः कालः ॥१४।१७॥

तस्य प्लक्षस्य नाम्ना संज्ञा यस्य स तन्नामसंज्ञः ॥१८।२०॥

'विशल्यकरणी चैव मृतसञ्जीवनी तथा। सुवर्णकरणी चान्या सन्धिनी च महौषधिः'। इत्याद्या महौषध्यो यत्र सन्ति यश्च हनुमता आनीय प्रतिनीतः स द्रोणश्चतुर्थः ॥२६॥

(घ) ते जनपदाः तद्वासिनो जना इत्यर्थः। कलिङ्गः साहसिक इत्यादि वल्लक्षणा। हृष्टाः सन्तः ताः पूर्वोद्दिष्टा नदीः पिबन्तीत्यन्वयः। नदीनां जलमयत्वादेव तत्पान मुपपद्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योनी तोया वितृष्णा च चन्द्रा शुक्ला(१०) विमोचनी।
निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशान्तिदाः ॥२८

श्वेतश्च हरितश्चैव वैद्युतं मानसं तथा।
जीमूतरोहिते चैव सुप्रभञ्चातिशोभनम् ॥२९॥

सप्तैतानि तु वर्षाणि चातुर्व्वर्ण्ययुतानि वै।
शाल्मले ये तु वर्णाश्च वसन्त्येते महामुने ॥३०॥

कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति ते ॥३१॥

भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम्।
वायुभूतं मखैः श्रेष्ठैर्यज्विनो यज्ञसंस्थितिम्(ङ) ॥३२॥

देवानामत्र सान्निध्यमतीव सुमनोहरे।
शाल्मलिः सुमहान्वृक्षो नाम्ना निर्वृतिकारकः ॥३३॥

एष द्वीपः समुद्रेण सुरोदेन समावृतः(च)।
विस्ताराच्छाल्मलस्येव समेन तु समन्ततः ॥३४॥

सुरोदकः परिवृतः कुशद्वीपेन सर्व्वतः।
शाल्मलस्य तु विस्ताराद् द्विगुणेन समन्ततः ॥३५॥

ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः श्रृणुष्व तान्।
उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः ॥३६॥

प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः।
तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः ॥३७॥

तथैव देव-गन्धर्व्व-यक्ष-किम्पुरुषादयः।
वर्णास्त्रापि चत्वारो निजानुष्ठानतत्पराः ॥३८॥

दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने।
ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चानुक्रमोदिताः ॥३९॥

यथोक्तकर्मकर्तृत्वात् स्वाधिकारक्षयाय ते।
तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्द्दनम् ॥
यजन्तः क्षपयन्त्युग्रमधिकारं फलप्रदम् ॥४०॥

विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा,।
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः।
वर्षाचलास्तु तत्रैते सप्त द्वीपे महामुने ॥४१॥

नद्यस्तु सप्त तासान्तु श्रृणु नामान्यनुक्रमात्।
धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा ॥४२॥

विद्युदम्भा मही चान्या सर्व्वपापहरास्त्विमाः।
अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः ॥४३॥

यज्ञानां सम्यक् स्थितिर्यस्मिन् तं यज्ञसंस्थितिम् ॥३२।३६॥

(ङ) यज्ञसंस्थितिमित्यत्र श्रीधरप्रदर्शितो व्यधिकरणबहुव्रीहिरार्षत्वादगर्ह्यः।

(च) सुरा मदिरा सैव उदकं यस्य तथाभूतेन मद्यरसवाहिनेत्यर्थः।

तेषां नामान्येव नामानि यस्याः सा तन्नामा वर्षपद्धतिर्वर्षाणां पङ्क्तिः ॥३७।३९॥

स्वाधिकारक्षयाय सत्त्वशुद्ध्यात्मज्ञानेन कर्माधिकारनिवृत्त्यर्थमधिकारम् अधिक्रियतेऽनेनेत्यधिकारोऽहंङ्कारस्तम् उग्रं रागद्वेषादिहेतुं क्षपयन्ति। एतच्च प्लक्षादिषु पञ्चस्वपि द्रष्टव्यम्। 'धर्मः पञ्चस्वथैतेषु' इति पञ्चानां साधर्म्यस्योक्तत्वात् ॥४०।४३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतम् ।
तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः ॥४४॥

घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः ।
क्रौञ्चद्वीपो महाभाग ! श्रूयताञ्चापरो महान् ॥४५॥

कुशद्वीपस्य विस्ताराद् द्विगुणो यस्य विस्तरः ।
क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त(१२) महात्मनः ॥४६

तन्नामानि च वर्षाणि तेषां चक्रे महीपतिः ॥४७॥

कुशलो मन्दगश्चोष्णः पीवरोऽप्यन्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता मुने ॥४८॥

तत्रापि देवगन्धर्व्वसेविताः सुमनोहराः ।
वर्षाचला महाबुद्धे ! तेषां नामानि मे शृणु ॥४९॥

क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ।
देवावृत् पञ्चमश्चात्र तथान्यः पुण्डरीकवान् ।
दुन्दुभिश्च महाशैलो द्विगुणास्ते परस्परम् ॥५०॥

द्वीपा द्वीपेषु ये शैला यथा द्वीपानि(१३)ते तथा ॥५१

वर्षेष्वेतेषु रम्येषु तथा शैलवरेषु च ।
निवसन्ति निरातङ्काः सह देवगणैः प्रजाः ॥५२॥

पुष्कराः पुष्कला धन्यास्तिष्याख्याश्च महामुने ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ॥५३॥

ते तत्र नदी मैत्रेय ! याः पिबन्ति शृणुष्व ताः ।
सप्तप्रधाना शतशस्तत्रान्याः क्षुद्रनिम्नगाः ॥५४॥

गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
क्षान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः ॥५५

तत्रापि विष्णुर्भगवान् पुष्कराद्यैर्ज्जनार्द्दनः ।
यागै रुद्रस्वरूपश्च इज्यते यज्ञसन्निधौ ॥५६॥

क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।
आवृतः सर्व्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥५७॥

दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्ताराद् द्विगुणेन महामुने ॥५८॥

शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः ।
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः ॥५९॥

जलदश्च कुमारश्च सुकुमारो मनीचकः ।
कुसुमोदश्च मौदाकिः सप्तमश्च महाद्रुमः ॥६०॥

तत्संज्ञान्येव तत्रापि सप्त वर्षाण्यनुक्रमात् ।
तत्रापि पर्व्वताः सप्त वर्षविच्छेदकारिणः ॥६१॥

पूर्व्वस्तत्रोदयगिरिर्ज्जलाधारस्तथापरः ।
तथा रैवतकः श्यामस्तथैवास्तो गिरिर्द्विजः ॥६२॥

आञ्जिकेयस्तथा (१४) रम्यः केसरी पर्व्वतोत्तमः ।
शाकस्तत्र महावृक्षः सिद्ध-गन्धर्व्वसेवितः ॥६३॥

यत्रत्यवातसंस्पर्शादाह्लादो जायते परः ।
तत्र पुण्या जनपदाश्चातुर्व्वर्ण्यसमन्विताः ॥६४॥

तत् कुशद्वीपनाम ॥४४॥

प्रथमः शैलः क्रौञ्चस्तेनैव द्वीपः प्रोक्त इत्यप्यनुसन्धेयम् । अन्योऽपरः पुण्डरीकः पञ्चमः, सप्तमो महाशैलः । पञ्चमश्चैत्ररथ इति पाठे महाशैल इति दुन्दुभेर्विशेषणम् । पूर्वस्मात् परस्परमुत्तरोत्तरं द्वीपाद् द्विगुणाः ॥५०॥

तेषु द्वीपेषु ये शैलास्तेऽपि यथा द्वीपानि तथोत्तरोत्तरं द्विगुणा इत्यर्थः ॥५१।५७॥

दध्नो मण्डः सारस्तदेवोदकं यस्मिंस्तेन ॥५८।६२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नद्यश्चात्र महापुण्याः सर्व्वपापभयापहाः ।
सुकुमारी कुमारी च नलिनी धेनुका च या ॥६५॥

इक्षुश्च वेणुका चैव गभस्ती सप्तमी तथा ।
अन्यास्त्वयुतशस्तत्र क्षुद्रनद्यो महामुने ॥६६॥

महीधरास्तथा सन्ति शतशोऽथ सहस्रशः ।
ताः पिबन्ति मुदा युक्ता जलदादिषु ये स्थिताः ॥६७॥

वर्षेषु ते जनपदाः स्वर्गादभ्येत्य मेदिनीम् (छ) ।
धर्म्महानिर्न तेष्वस्ति न संघर्षः परस्परम् ॥६८॥

मर्यादाव्युत्क्रमो नास्ति तेषु देशेषु सप्तसु ।
मृगाश्च(१५) मागधाश्चैव मानसामन्दगास्तथा ॥६९॥

मृगा (१६) ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तथा ।
वैश्यास्तु मानसास्तेषां शूद्रास्तेषान्तु मन्दगाः ॥७०॥

शाकद्वीपे तु तैर्विष्णुः सूर्य्यरूपधरो मुने !
यथोक्तैरिज्यते सम्यक् कर्म्मभिर्नियतात्मभिः ॥७१॥

शाकद्वीपस्तु मैत्रेय ! क्षीरोदेन समन्ततः ।
शाकद्वीपप्रमाणेन बलयेनेव वेष्टितः ॥७२॥

क्षीराब्धिः सर्व्वतो ब्रह्मन् ! पुष्कराख्येन वेष्टितः ।
द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः ॥७३॥

पुष्करे सबलस्यापि महावीरोऽभवत् सुतः ।
धातकिश्च तयोस्तत्र द्वे वर्षे नामचिह्निते ॥७४॥

महावीरं तथैवान्यं धातकीखण्डसंज्ञितम् ।
एकश्चात्र महाभाग प्रख्यातो बर्षपर्व्वतः ॥७५॥

मानसोत्तरसंज्ञो वै मध्यतो बलयाकृतिः ।
योजनानां सहस्राणि ऊर्ध्वं पञ्चाशदुच्छ्रितः ॥७६॥

तावदेव च विस्तीर्णः सर्व्वतः परिमण्डलः ।
पुष्करद्वीपबलयं मध्येन विभजन्निव ॥७७॥

स्थितोऽसौ तेन विच्छिन्नं जातं तद्वर्षकद्वयम् ।
बलयाकारमेकैकं तयोर्व्वर्षं तथा गिरिः ॥७८॥

दशवर्षसहस्राणि तत्र जीवन्ति मानवाः ।
निरामया विशोकाश्च रागद्वेषादिवर्ज्जिताः ॥७९॥

अधर्मोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज ।
नेर्ष्यासूया भयं द्वेषो दोषो लोभादिको न च ॥८०॥

महावीरं बहिर्व्वर्षं धातकीखण्डमन्त्रतः ।
मानसोत्तरशैलस्य देवदैत्यादिसेवितम् ॥८१॥

सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिते ।
न तत्र नद्यः शैला वा द्वीपे वर्षद्वयान्विते ॥८२॥

शाको वृक्षविशेषः यस्य पत्राण्यन्तःखरस्पर्शानि बहिर्मृदुस्पर्शानि । "अन्तःखरा बहिः स्निग्धाः स्त्रियः शाकदलोपमाः" इति वशिष्ठोक्तेः ॥६३।६४।६७॥

स्वर्गादभ्येत्येति स्वर्गभोगानन्तरं पुण्यशेषेण मेदिनीम् अभ्येत्य ये जलदादिवर्षेषु स्थिता जाता जनपदा लोकास्ते ता नदीः पिबन्तीत्यन्वयः । संघर्षः कलहः ॥६८।६९॥

ब्राह्मणभूयिष्ठाः पूर्वोक्तेषु सर्वेषु ब्राह्मणेषु मध्ये श्रेष्ठाः ॥७०।७१।७२।७३।७४।७९।८०॥

अन्ततो मानसोत्तराद्रन्तरित्यर्थः ॥८१।८२॥

(छ) 'ते तं भुक्त्वा स्वर्गलोकं विशालं, क्षीणे पुण्ये मर्त्यलोकं विशन्ती'ति शास्त्रम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तुल्यवेशास्तु मनुजा देवास्तत्रैकरूपिणः ।
वर्णाश्रमाचारहीनं धर्म्माहरणवर्ज्जितम् (१७)॥८३॥

त्रयीवार्त्तादण्डनीतिशुश्रूषारहितञ्च तत् ।
वर्षद्वयन्तु मैत्रेय ! भौमस्वर्गोऽयमुत्तमः ॥८४॥

सर्व्वस्य सुखदः कालो जरारोगादिवर्ज्जितः ।
धातकीखण्डसंज्ञेऽथ महावीरे च वै मुने ॥८५॥

न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् ।
तस्मिन्निवसति ब्रह्मा पूज्यमानः सुरासुरैः ॥८६॥

स्वादूदकेनोदधिना पुष्करः परिवेष्टितः ।
समेन पुष्करस्यैव विस्तारान्मण्डलं तथा
एवं द्वीपाः समुद्रैश्च सप्त सप्तभिरावृताः ॥८७॥

द्वीपश्चैव समुद्रैश्च समानौ द्विगुणौ परौ ॥८८॥

पयांसि सर्व्वदा सर्व्व-समुद्रेषु समानि वै ।
न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ॥८९॥

स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा ।
तथेन्दुवृद्धौ सलिलमम्भोधौ मुनिसत्तम ॥९०॥

न न्यूना नातिरिक्ताश्च वर्द्धन्त्यापो ह्रसन्ति च (ज)
उदयास्तमयेष्विन्दोः पक्षयोः शुक्लकृष्णयोः ॥९१॥

दशोत्तराणि पञ्चैव अन्दुलानां शतानि वै ।
अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने (झ) ॥९२॥

भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् ।
षड्रसं भुञ्जते विप्र ! प्रजाः सर्व्वाः सदैव हि ॥९३॥

'तुल्यवेशा' इति पाठे वेशो भोगः, तुल्यसुखा इत्यर्थः। नित्यनैमित्तिकैरावश्यकैर्वर्णाश्रमाचारैर्हीनं धर्माचरणं काम्यधर्मानुष्ठानं तेन वर्जितम् ॥८३।८५॥

न्यक् तिर्यक् समन्ताद् भूमिं रुणद्धीति न्यग्रोधो बृहत्, पुष्करमेव स प्रजापतिरेकः पुष्करपर्णे समभवत् इति श्रुतेः। "न्यग्रोधः पुष्करद्वीपे पुष्करस्तेन संस्मृत" इति मत्स्योक्तेश्च। यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपात्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम् इति शुकोक्तेश्च ॥८६।८७॥

'द्वीपश्चे'ति। जम्बूद्वीपश्च लवणसमुद्रश्च समानौ लक्षयोजनविस्तारौ, ततः परौ द्वीपसमुद्रौ उत्तरोत्तरं द्विगुणावित्यर्थः ॥८८।८९॥

यथा स्थालीस्थं प्रस्थादिपरिमितमेव सलिलं तीव्राग्निसंयोगादुद्रेकि विरलावयवं समुद्रेकयुक्तं भवति, अग्निसंयोगोपरमे च यथापूर्वं तिष्ठति, तथेन्दुवृद्धौ पौर्णमास्यामम्भोधौ सलिलमत्यन्तमुद्रिच्यते। अमावस्यायाश्च यथापूर्वं तिष्ठति ॥९०॥

तथा शुक्लकृष्णयोः पक्षयोः प्रत्यहम् इन्दोरुदयेषु अनतिरिक्ता एवापः किञ्चित् किञ्चिद् वर्द्धन्ते। इन्दोरस्तमयेषु चान्यूना एवं किञ्चित् ह्रसन्तीत्यर्थः ॥९१॥

परमवृद्धिह्रासयोः प्रमाणमाह — 'दशे'ति — सार्द्धद्विचत्वारिंशद्वितस्तिपरिमितौ सामुद्रीणामपां वृद्धिक्षयौ शास्त्रतो दृष्टौ, यद्वा तीरस्थान्वयव्यतिरेकाभ्यां दृष्टौ ॥९२॥

भुज्यते इति भोजनं भक्ष्यभोज्यादिचतुर्विधमन्नशाकादिकं तत् प्रयत्नं विना स्वयमेवोपस्थितं भुञ्जते। पड्रसा यथा— मधुरकटूम्ललवणतिक्तकषाया इति प्रसिद्धाः षड्रसा यस्मिंस्तत् ॥९३॥

(ज) वर्द्धन्त्यापो ह्रसन्ति चेत्यत्र वर्द्धन्तीति क्रियापदं परस्मैपदमार्षम्।

(झ) समुद्रस्य इमाः आपः सामुद्र्यः तासाम् अपां सम्बन्ध्यर्थे ष्णप्रत्ययान्तसमुद्रशब्दात् स्त्रियामीप्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वादूदकस्य परतो दृश्यतेऽलोकसंस्थितिः ।
द्विगुणा काञ्चनी भूमिः सर्व्वजन्तुविवर्जिता ॥९४॥
लोकालोकस्तथा शैलो योजनायुतविस्तृतः ।
उच्छ्रायेणापि तावन्ति सहस्राण्यचलो हि सः ॥९५॥
ततस्तमः समावृत्य तं शैलं सर्व्वतः स्थितम्(अ) ।
तमश्चाण्डकटाहेन समन्तात् परिवेष्टितम् ॥९६॥
पञ्चाशत्कोटिविस्तारा सेयमुर्व्वी महामुने !
सहैवाण्डकटाहेन सद्वीपाब्धिमहीधरा ॥९७॥
सेयं धात्री विधात्री च सर्व्वभूतगुणाधिका ।
आधारभूता सर्व्वेषां मैत्रेय ! जगतामिति ॥९८॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे चतुर्थोऽध्यायः ।

अलोकसंस्थितिरिति च्छेदः । न विद्यते लोकस्य जननिवासभूतस्य संस्थितिर्यस्यां सा समस्तप्राणिविवर्जिता । ससागरसप्तद्वीपवत्याः पूर्वोक्ताया भूमेर्द्विगुणा शुद्धोदकसमुद्रात् परतः काञ्चनी भूमिर्योगिभिर्दृश्यते ९४।

तावन्ति तावत्संख्यापूरकाणि सहस्राणि योजनायुतमेवोच्छ्रित इत्यर्थः । यद्वा तावन्ति अयुतसंख्यानि सहस्राणीत्यर्थः "यस्मात् सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीन् लोकानावितन्वाना न कदाचित् पराचीना भवितुमुत्सहन्ते । तावदुन्नहनायाम" इति शुकोक्तेः । अत्रायं गणनात् क्रमः ।

"पूर्वोक्तद्वीपाद् हि द्वैगुण्यक्रमेण मेरोः सर्वतः सप्तलक्षाधिकपञ्चकोटिप्रमाणा साब्धिसप्तद्वीपवती भूमिः, ततो द्विगुणा चतुर्दशलक्षोत्तरदशकोटिप्रमाणा काञ्चनी भूमिर्मेरोरेकत उभयतस्त्वष्टविंशतिलक्षाधिकविंशतिकोटिप्रमाणा, तदेवं साब्धिद्वीपभूम्या सह काञ्चनी भूमिः पञ्चयत्रिंशल्लक्षोत्तरपञ्चविंशतिकोटिप्रमाणा सम्पद्यते । ततो लोकालोकः शैलः अयुतयोजनविस्तारः सर्वतो वलयाकृतिः ॥९५॥

"ततस्तं शैलं सर्वतस्तम आवृत्य तिष्ठति, तच्च विंशतिसहस्राधिकपञ्चत्रिंशल्लक्षन्यूनपञ्चविंशतिकोटिपरिमितम् । एतेन द्युलोकपरिमाणञ्च व्याख्यातम्" इति शुकोक्तेः । तदेवं पञ्चाशत्कोटिविस्तारेयमुर्वी । ततोऽण्डकटाहः सर्वतः समवर्त्तुलोऽन्तः पञ्चाशत्कोटिविस्तारः । "अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः ।" इति शुकोक्तेः । क्वचित् क्वचित् पुराणेषु विरोधो यदि लक्ष्यते । कल्पभेदादिभिस्तत्र व्यवस्था सद्भिरिष्यते ॥९६॥

सहैवाण्डकटाहेनेति तन्मध्यवर्त्तिनीत्यर्थः ॥९७॥

धात्री पालयित्री, विधात्री जनयित्री, इत्येतैः पालनादिभिः सर्वेभ्यो भूतेभ्य आकाशादिभ्यो गुणाधिकाचेत्यर्थः ॥९८॥

(अ) तं शैलमित्यत्र तसन्तसर्वशब्दयोगे 'तसन्तोभयाभिपरिसर्वै'रिति द्वितीया ।

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायमात्मप्रकाशाख्यायां वा विष्णुपुराणटीकायां द्वितीयांशे चतुर्थोऽध्यायः ॥

पाठान्तराणि—

(३—१)—शान्तहयो नाम— ।
(४—२)—सुखदश्च तथानन्दः— ।
(५—३)—शान्तहयं वर्षं शिशिरं च सुखं— ।
(८—४)—वर्षेष्वेतेषु— ।
(११—५)—त्रिदिवाक्रमा ।
(१३—६)—अपसर्पिणी— ।
(१६—७)—वर्णाश्रमविभागशः ।
(१७—८)—आर्य्यकाः कुरराश्चैव विदिश्या भाविनश्च ते ।
(२५—९)—वर्षाभिव्यञ्जका— ।
(२८—१०)—मुक्ता— ।
(३२—११)—वायुभूतं मखश्रेष्ठैर्यज्वानो— ।
(४६—१२)—पुत्रास्तस्य— ।
(५२—१३)—द्वीपेषु— ।
(६३—१४)—आम्बिकेयस्तथा— ।
(६९—१५)—वङ्गाश्च— ।
(७०—१६)—वङ्गा— ।
(८३—१७)—धर्म्माचरणवर्जितम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चमः अध्यायः ।

[सप्तपातालविवरणम्, अनन्तस्य गुणवर्णनञ्च]

पराशर उवाच ।

विस्तार एष कथितः पृथिव्या भवतो मया ।
सप्ततिस्तु सहस्राणि द्विजोच्छ्रायोऽपि कथ्यते ॥१॥

दशसाहस्रमेकैकं पातालं मुनिसत्तम !
अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ।
महाख्यं सुतलञ्चाग्र्यं पातालञ्चापि सप्तमम् ॥२॥

शुक्ला कृष्णारुणा पीता शर्करा शैलकाञ्चनाः ।
भूमयो यत्र मैत्रेय ! वरप्रासादमण्डिताः ॥३॥

तेषु दानवदैतेया यक्षाश्च शतशस्तथा ।
निवसन्ति महानागजातयश्च महामुने ॥४॥

स्वर्लोकादपि रम्याणि पातालानीति नारदः ।
प्राह स्वर्गसदां मध्ये पातालेभ्यो गतो दिवि(क) ॥५

आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः ।
नागैराभ्रियमाणासु (१) पातालं केन तत् समम् ॥६

दैत्यदानवकन्याभिरितश्चेतश्च शोभिते ।
पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते ॥७॥

दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपम् ।
शशिनश्च न(२)शीताय निशि द्योताय केवलम्(ख)

भक्ष्यभोज्यमहापानमुदितैरतिभोगिभिः ।
यत्र न ज्ञायते कालो गतोऽपि दनुजादिभिः ॥९॥

वनानि नद्यो रम्याणि सरांसि कमलाकराः ।
पुंस्कोकिलाभिलापाश्च मनोज्ञान्यपराणि च(३)॥१

भूषणान्यतिरम्याणि (४) गन्धाढ्यश्चानुलेपनम् ।
वीणावेणुमृदङ्गानां स्वनास्तूर्य्याणि च द्विज ॥११॥

पञ्चमः अध्यायः ।

सप्तभूमिकविस्तार-प्रासादवदधोभुवः । सप्तपाताल-पङ्क्तिस्तु वर्ण्यतेऽनन्तमस्तके ॥१।२॥

'दशसाहस्र'मिति—प्रत्येकं सहस्रयोजनोच्छ्रिता भूमिकाः । ततो नवसहस्रोच्छ्रितमेकैकं पातालं भूविवरमित्यर्थः । सहस्र-योजनान्येषां जलान्यन्तरनेमयः । प्रत्येकशोऽन्तराण्येषां सहस्राणि नवाध्वानम् इति शिवरहस्योक्तेर्महाख्यं महातलम् ॥३।४॥

(क) स्वर्गसदां स्वर्गलोकनिवासिनां मध्ये ।

पातालेभ्यो दिवमभ्यागतः सन् स्वर्गसदां देवानां मध्ये प्राह ॥५॥

शुभ्राः शुद्धा मणयो नागैराभ्रियमाणासु धार्यमाणासु भूषासु यत्र तत् पातालं केन समं ? न केनापि, निरुपमित्यर्थः ॥६॥

विमुक्तस्य वीतरागस्यापि ॥७।६॥

पुंस्कोकिलानामभिलापाः कूजितानि ॥१०॥

तूर्याणि नृत्यगीतवादित्राणि ॥११॥

(ख) आतपं तापकरं किरणम् । शशिनः चन्द्रस्य रश्मयः इति शेषः, न शीताय तादर्थ्यचतुर्थ्या न शैत्यजनका इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एतान्यन्यानि चोदारभाग्यभोग्यानि दानवैः ।
दैत्योरगैश्च भुज्यन्ते पातालान्तरगोचरैः ॥१२॥
पातालानामधश्चास्ते विष्णोर्य्या तामसी तनुः ।
शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः ॥१३
योऽनन्तः पठ्यते सिद्धैर्देवी देवर्षिपूजितः ।
स सहस्रशिरा व्यक्तस्वस्तिकामलभूषणः ॥१४॥
फणामणिसहस्रेण यः स विद्योतयन् दिशः ।
सर्व्वान् करोति निर्वीर्य्यान् हिताय जगतो-
ऽसुरान् (ग)॥१५॥
मदाघूर्णितनेत्रोऽसौ यः सदैवैककुण्डलः ।
किरीटी स्नग्धरो भाति साग्निः श्वेत इवाचलः (घ)।१६।
नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः ।
साभ्रगङ्गाप्रवाहोऽसौ कैलासाद्रिरिवोन्नतः (ङ-५)।१७।
लाङ्गलासक्तहस्ताग्रो बिभ्रन्मुषलमुत्तमम् (च) ।
उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्त्तया ॥१८॥
कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः ।
सङ्कर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम् ॥१९॥
स बिभ्रच्छेखरीभूतमशेषं क्षितिमण्डलम् ।
आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः ॥२०॥
तस्य वीर्य्यं प्रभावश्च स्वरूपं रूपमेव च ।
न हि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि (छ)॥२१॥
यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ।
आस्ते कुसुममालेव कस्तद्वीर्य्यं वदिष्यति (ज)॥२२॥
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः ।
तदा चलति भूरेषा साद्रितोयाब्धिकानना (झ-६)॥२३॥
गन्धर्व्वाप्सरसः सिद्धाः किन्नरोरगचारणाः ।
नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः (ञ)॥२४॥

उदारैरुत्कृष्टैर्भाग्यैः पुण्यैर्भोग्यानि । पातालानामन्तरं मध्यं गोचरो विषयो येषां तैः ॥११।१३॥

स्वस्तिकं फणस्य रेखाचिह्नविशेषः । व्यक्तं स्वस्तिकमेवामलं भूषणं यस्य सः ॥१४।१५॥

(ग) असुरवीर्य्यस्य जगदहितकारित्वात् तेषां निर्वीर्य्यता-सम्पादनं जगतो हितायैवेति भावः ।

(घ) मदेन वारुणीसेवाजनितमत्ततया आघूर्णितं नेत्रं यस्य सः । साग्निः श्वेत इवाचल इति—तस्य भास्वरकुण्डल-किरीटादिमत्त्वात् शुभ्रत्वाच्च साग्निना श्वेताचलेन साम्यमिति ध्येयम् ।

(ङ) अभ्रगङ्गा आकाशगङ्गा मन्दाकिनीति यावत्, तस्याः प्रवाहेण सह वर्त्तमानः यः उन्नतः कैलासाद्रिः कैलासपर्वतः स इव । अत्र श्वेतहारे गङ्गाप्रवाहसादृश्यं, शेषस्य शुभ्रे वपुषि च कैलाससादृश्यम् ।

कान्त्या श्रिया वारुण्या च मदिराधिष्ठात्र्या देवतया ॥१८।१९॥

शेखरीभूतं मुकुटवत् स्थितम् ॥२०॥

वीर्यं बलं, प्रभावः प्रतापः, स्वरूपं तत्त्वम् । रूपमाकारः ॥२१।२४॥

(च) लाङ्गले हले आसक्तं संलग्नं हस्ताग्रं करः यस्य सः । हलधर इत्यर्थः ।

(छ) त्रिदशैरपि दैवैरपि का कथा अन्येषामित्यर्थापत्ति-बललभ्यम् ।

(ज) यस्य शेषस्य भगवतः फणामणीनां फणास्थितानां मणिविशेषाणां शिखाभिः ज्वालाभिः अरुणा रक्तवर्णा ।

(झ) अद्रिः पर्वतः तोयं जलसामान्यं अब्धिः समुद्रः काननम् अरण्यं तैः सह वर्त्तमाना भूः ।

(ञ) गुणानां तस्येति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्य नागवधूहस्तैर्लगितं (७) हरिचन्दनम् ।
मुहुः श्वासानिलापास्तं याति दिक्षूदवासताम् ॥२५॥
यमाराध्य पुराणर्षिर्गर्गो ज्योतींषि तत्त्वतः ।
ज्ञातवान् सकलञ्चैव निमित्तपठितं फलम् ॥२६॥
तेनेयं नागवर्य्येण शिरसा विधृता मही ।
बिभर्त्ति मालां लोकानां सदेवासुरमानुषाम् ॥२७॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे पञ्चमोऽध्यायः ।

लगितं चर्चितम् अनुलिप्तं, यस्य श्वासानिलैरपास्तं विक्षिप्तं दिक्षु उदवासतां जलसुगन्धीकरणचूर्णतां यातीत्यर्थः । दिक्क्षोदवासतामिति पाठे दिशां क्षोदवासताम् अधिवासनचूर्णत्वम् । यद् वा क्षोदाः क्रीड़ापांशवस्तेषां वासतां स्थानताम् दिक्कन्यानां क्रीड़ार्थे हरिद्रादि रजःस्थानीयं भवतीत्यर्थः । दिक्पटवासतामिति पाठः ॥२५॥

ज्योतींषि ग्रहनक्षत्रादीनि निमित्ते उत्पातशकुनादौ पठितं शुभाशुभलक्षणं फलञ्च ज्ञातवान् ॥२६॥

देवासुरमानुषैः सहितां लोकानां पातालादीनां माला श्रेणीं, तेन विधृता सतीयं मही बिभर्त्ति । लोकाधारभूतायाः भूमेरपि स आधार इत्यर्थः ॥२७॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां द्वितीयांशे पञ्चमोऽध्यायः

पाठान्तराणि—

(६—१) नागाभरणभूषासु— ।
(८—२) शशिरश्मिर्न— ।
(१०—३)—मनोज्ञान्यम्बराणि च ।
(११—४) भूषणान्यतिशुभ्राणि— ।
(१७—५)—कैलासाद्रिरिवापरः ।
(२३—६)—साब्धितोया सकानना ।
(२५—७) यस्य नागवधूहस्तैर्लेपितं— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठोऽध्यायः

[नरकवर्णनम्, हरिस्मरणेन सर्व्वप्रायश्चित्तकथनञ्च]

पराशर उवाच ।

ततश्च नरकान् विप्र ! भुवोऽधः सलिलस्य च ।
पापिनो येषु पात्यन्ते तान् शृणुष्व महामुने ॥१॥

रौरवः शूकरो रोधस्तालो विशसनस्तथा ।
महाज्वालस्तप्तकुम्भः श्वसनोऽथ (१) विमोहनः ॥२॥

रुधिरान्धो वैतरणी क्रिमीशः क्रिमिभोजनः । (२)
असिपत्रवनं कृष्णो लालभक्षश्च दारुणः ॥३॥

तथा पूयवहः पापो वह्निज्वालो ह्यधःशिराः ।
सन्दंशः कालसूत्रश्च तमश्चावीचिरेव च ॥४॥

श्वभोजनोऽथाप्रतिष्ठश्चावीचिश्च (३) तथापरः ।
इत्येवमादयश्चान्ये नरका भृशदारुणाः ॥५॥

यमस्य विषये घोराः शस्त्राग्निभयदायिनः ।
पतन्ति येषु पुरुषाः पापकर्म्मरतास्तु ये ॥६॥

कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥७॥

भ्रूणहा पुरहर्त्ता च गोघ्नश्च मुनिसत्तम !
यान्ति ते नरकं रोधं यश्चोच्छ्वासनिरोधकः (क)॥८॥

सुरापो ब्रह्महा स्तेयी (४) सुवर्णस्य च शूकरे ।
प्रयाति नरके यश्च तैः संसर्गमुपैति वै (ख)॥९॥

राजन्यवैश्यहा ताले तथैव गुरुतल्पगः ।
तप्तकुण्डे स्वसृगामी हन्ति राजभटांश्च यः (ग)॥१०॥

षष्ठः अध्यायः

भारते कृतपुण्यानामुक्ताः स्वर्गप्रदा भुवः । तत्रैव कृतपापानां यातना च तथोच्यते । सलिलस्य चेति तमोगर्त्तोदकस्याधः ब्रह्माण्डगतगर्भोदकादूर्द्ध्वं मेव । दिशि दक्षिणस्यामधस्ताद् भूमेरुपरिष्टाज्जलादिति शुकोक्तेः ॥१।३॥

जानन्नप्यवदन् अन्यथा वा वदन् कूटसाक्षी । यश्च धर्माधिकृतः सन् असम्यग् अन्याय्यं वदेत् । यश्चान्यदपि अनृतं वक्ति ॥७॥

भ्रूणहा गर्भहन्ता पुरहर्त्ता पुरविलुम्पकः ॥८॥

'तैः संसर्ग'मिति—संवत्सरेण पतति सह शय्यासनाशनैः । याजनाध्यापनाद् यौनात् सद्यः पतति तत्समः' । इति । तैः सह संसर्गम् ॥९॥

राज्ञो भटान् दूतान् ॥१०॥

(क) रोधं रोधनामकम् ।

(ख) सुरां पिबतीति सुरापः सुरापानकारी । ब्रह्महा ब्राह्मणघाती ब्रह्महत्याकारीत्यर्थः । स्तेयं चौर्य्यं तत् अस्यास्तीति स्तेयी, अत्र सुवर्णपदस्य नियतसम्बन्धिबोधकपदत्वादेकदेशान्वयो न दोषाय । तदुक्तं—'प्रतियोगिपदादन्यद् यदन्यत् कारकादपि । वृत्तिशब्दैकदेशेन सम्बन्धस्तस्य नेष्यते' । इति । अत्र प्रतियोगिपदं नियतसम्बन्धिपरम् । शूकरे शूकराख्ये नरके । तैः सुरापप्रभृतिभिः ।

(ग) गुरुतल्पगः गुरोः तल्पं शय्या तं गच्छति यः स गुरुदारगामीत्यर्थः । ताले तालाख्ये नरके प्रयातीत्यन्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साध्वीविक्रयकृद्वद् बद्धपालः केशरिविक्रयी ।
तप्तलोहे पतन्त्येते यश्च भक्तं परित्यजेत् ॥११॥

स्नुषां सुताञ्चपि गत्वा महाज्वाले निपात्यते ।
अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः (घ) ॥१२

वेददूषयिता यश्च वेदविक्रयिकश्च यः ।
अगम्यगामी यश्च स्यात् ते यान्ति लवणं द्विज ॥१३।

चौरो विमोहे पतति मर्य्यादादूषकस्तथा ।
देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ।
स याति क्रिमिभक्षे वै क्रिमीशे च दुरिष्टकृत्(ङ) ।१४

पितृदेवातिथीन् यश्च पर्य्यश्नाति नराधमः ।
लालभक्षे स यात्युग्रे शरकर्त्ता च वेधके ॥१५॥

करोति कर्णिनो यश्च यश्च खड्गादिकृन्नरः ।
प्रयान्त्येते विशसने नरके भृशदारुणे ॥१६॥

असत्प्रतिग्रहीता तु नरके यात्यधोमुखे ।
अयाज्ययाजकश्चैव तथा नक्षत्रसूचकः ॥१७॥

क्रिमिपूयवहश्चैको (५) याति मिष्टान्नभुङ् नरः ।
लाक्षा-मांस-रसानाञ्च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ॥१८॥

मार्ज्जार-कुक्कुटच्छाग-श्व–वराह–विहङ्गमान् ।
पोषयन्नरकं याति तमेव द्विजसत्तम ॥१९॥

रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।
सूची माहिषिकश्चैव पर्व्वकारी च यो द्विजः ॥२०॥

आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥२१॥

मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।
रेतःपातादिकर्त्तारो मर्य्यादाभेदिनो हि ये ।
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये ॥२२॥

साध्वी भार्या तस्या विक्रयकर्त्ता । बद्धपालः कारागृहरक्षकः, केशरिविक्रयी अश्वानां विक्रेता ॥११।१२॥

वेददूषयिता वेदनिन्दकः । यद्वा भृतकाध्यापकः ॥१३॥

मर्यादादूषकः शिष्टाचारनिन्दकः । दुरिष्टकृत् अभिचारकर्त्ता ॥१४॥

पर्यश्नाति परित्यज्य आदौ भुङ्क्ते ॥१५॥

कर्णिनो वाणविशेषान् ॥१६॥

नक्षत्रसूचकः नक्षत्रगणकः ॥१७।

पुत्रादीन् वञ्चयित्वा एक एव मिष्टान्नभुक् । वेगी साहसकारी तमेव क्रिमियुक्तं पूयवहमेव ॥१८।१९॥

रङ्गोपजीवी नटमल्लादिवृत्तिः । कैवर्त्तः धीवरवृत्तिः । पत्यौ जीवति जाराज्जातः कुण्डः, तदन्नभोजी कुण्डाशी । सूची पिशुनः । माहिषिको महिषोपजीवी । यद्वा "महिषीत्युच्यते भार्या भगेनोपार्जयेद्धनम् । उपजीवति यत्तस्य स वै माहिषिकः स्मृतः । इति स्मृतिप्रोक्तः । पर्वकारी धनादि लोभेनापर्वस्वसावास्यादिक्रियाप्रवर्तकः । पर्वगामीति पाठे पर्वसु स्त्रीगामी ॥२०॥

शाकुनिः पक्षजीवी शुभाशुभनिमित्तशकुनोपजीवी वा ग्रामयाजक ग्रामार्थे यष्टा ॥२१॥

मर्यादाभेदिनः क्षेत्रादिसीमातिक्रमकारिणः । कुहकः परवञ्चनम् इन्द्रजालादिकं वा जीवो वृत्तिर्येषां ते । कालसूत्रे ॥२२॥

(घ) आक्रोष्टा कटूक्तिकारी ।

(ङ) दुरिष्टंदुष्टः श्येनादियागः तत् करोतीति दुरिष्टकृत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असिपत्रवनं याति वनच्छेदी वृथैव यः ।
औरभ्रिका मृगव्याधा वह्निज्वाले पतन्ति वै ॥२३॥

यान्त्येते द्विज ! तत्रैव ये चापाकेषु वह्निदाः ।
व्रतानां लोपको यश्च स्वाश्रमाद् विच्युतश्च यः ॥२४

सन्दंशयातनामध्ये पततस्तावुभावपि ।
दिवास्वप्ने च स्कन्दन्ते ये नरा ब्रह्मचारिणः ।
पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥२५॥

एते चान्ये च नरकाः शतशोऽथ सहस्रशः ।
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनागताः ॥२६॥

यथैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगौचरैः ॥२७॥

वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ।
कर्म्मणा मनसा वाचा निरयेषु पतन्ति ते ॥२८॥

अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः ।
देवाश्चाधोमुखान् सर्व्वानधः पश्यन्ति नारकान् ॥२९॥

स्थावराः क्रिमयोऽब्जाश्च पक्षिणः पशवो नराः ।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥३०॥

सहस्रभागाः प्रथमा द्वितीयानुक्रमास्तथा ।
सर्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥३१॥

यज्ञार्थे समित्पात्रादिकार्य्यं विना वृथैव वनच्छेदी च असिपत्रवनं याति। ओरभ्रिको मेषोपजीवी। मृगव्याधश्च ॥२३॥

आपाकेषु वह्निदाः वह्निज्वाले पतन्ति आपाका दाह्यमृद्भाण्डेष्टकादिसञ्चयाः। 'यान्त्ये ते' इति—एते पूर्वोक्ता वक्ष्यमाणाश्च पापिनस्तत्तदसाधारणनरकभोगानन्तरं पापशेषेण वह्निज्वालं यान्तीत्यर्थः। शिवधर्म्मोत्तरादिषु पापाधिक्यात् पापिनां क्रमेणानेकनरकपातोक्तेः ॥२४॥

स्कन्दन्ते रेतो विकिरन्ति ॥२५।२६॥

वर्णाश्रमविरुद्धं गीतनृत्यादिव्यसनरूपं कर्म। निरयेषु तत्तन्नरकेषु ॥२८॥

नरकस्थानां दुःखातिशयं दर्शयितं स्वर्गस्थदेवदर्शनं देवानाञ्च वैराग्यार्थं नरकदर्शनमाह—'अधःशिरोभि'रिति ॥२९

पापिनां नरकभोगानन्तरं स्थावराद्यासु उत्तरोत्तरमुत्कृष्टासु नवधा भिन्नासु योनिषु जन्मक्रममाह—'स्थावरा' इति। अब्जा मत्स्यादयः। धार्मिकाः नरेष्वेव पुण्यविशेषेण केचित् मोक्षिणश्च मुमुक्षवो यथाक्रमं भवन्तीति शेषः ॥३०॥

तेषाञ्च पूर्वपूर्वबाहुल्यम् उत्तरोत्तराल्पत्वञ्चाह—'सहस्रे'ति द्वितीयानुक्रमाः द्वितीयोऽनुक्रम उद्देशो येषां ते द्वितीयस्थानेऽनुक्रान्ता ये क्रिमयः ते सहस्रभागक्रिमयः प्रथमाः सहस्रभागाः सहस्रगुणाः प्रथमाः प्रथमं निर्दिष्टाः स्थावरा येषां ते क्रिमिभ्यः सहस्रगुणमधिकाः स्थावरास्तत्सहस्रतमभागाः क्रिमय इत्यर्थः।

पञ्चम्यन्तपाठेऽपि द्वितीयास्थानेऽनुक्रान्तात् क्रिमिवर्गात् सहस्रगुणमधिकाः स्थावरा इत्येवार्थः। तथा 'सर्वे ह्येते' इति—यथा स्थावरा एवं पक्ष्यादिष्वपि द्रष्टव्यम्। मुक्तिं सम्यगाश्रयन्त इति मुक्तिसमाश्रया मुमुक्षवो ज्ञाननिष्ठाः। तत्पर्यन्तमेव पूर्वपूर्वादुत्तरोत्तरन्यूनत्वे जन्मक्रमः, ततः परं मुक्तिः। एतच्च संसारजीवबाहुल्यकथनं मोक्षस्य दुर्लभतासूचनार्थम्। अयञ्च नवधा निर्दिष्टो जन्मक्रमः प्रायिक एव। तदुक्तं—मादित्यपुराणे—"व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात्। विचित्रा गतयः पंसां कर्मणां गुरुलाघवैः"। इति ॥३१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः (च) ।
पापकृद् याति नरकं प्रायश्चित्तपराङ्मुखः ॥३२॥

पापानामनुरूपाणि प्रायश्चित्तानि यद् यथा ।
तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः ॥३३॥

पापे गुरूणि गुरुणि स्वल्पान्यल्पे च तद्विदः ।
प्रायश्चित्तानि मैत्रेय ! जगुः स्वायम्भुवादयः ॥३४॥

प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥३५॥

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परम् ॥३६॥

प्रातर्निशि तथा सन्ध्या-मध्याह्नादिषु संस्मरन् ।
नारायणमवाप्नोति सद्यः पापक्षयं नरः ॥३७॥

तदेवं नारकाः सर्वे तद्भोगानन्तरं स्थावरादिजन्मक्रमेण पापस्य क्षयात् पुण्यवशात् कदाचित् त्रिदशा भवन्ति, इदानीं त्रिदशा अपि सर्वे पुण्यक्षयात् पापवशाच्च कदाचिन्नारका भवन्तीति। वैराग्यार्थमाह—'यावन्त' इति। नरकौकसः भवन्ति इति शेषः। इदानीं पापिनोऽपि नरकपरिहारोपायमाह—'पापकृदि'ति। प्रायश्चित्तं यो न करोति, स एव नरकं याति, न तु कृतप्रायश्चित्तः ॥३२॥

तच्च प्रायश्चित्तं कर्मभक्तिज्ञानरूपेण त्रिविधम्। तत्र पापतारतम्येन कर्मात्मकप्रायश्चित्ततारतम्यमाह—'पापाना'मिति। यत् पापं महदल्पं वा यथा ज्ञात्वाज्ञात्वा वा तथैव तदनुरूपाणि प्रायश्चित्तानि वेदार्थं संस्मृत्य प्रोक्तानि महर्षिभिः ॥३३।३४॥

मन्वादिभिर्विधेयैः प्रायश्चित्तैर्निःशेषसर्वपापक्षयाभावात् सर्वोत्कृष्टं सुकरञ्च श्रीकृष्णभक्तिरूपं सर्वप्रायश्चित्तमाह—'प्रायश्चित्तानी'ति। तपांसि कृच्छ्रादीनि, कर्माणि च दानजपादीनि, तदात्मकानि यानि प्रायश्चित्तानि तेभ्यः सर्वेभ्यः कृष्णस्यानुस्मरणं परं श्रेष्ठम् ॥३५॥

श्रेष्ठत्वमाह—'कृत' इति। पापे कृते यस्य पुंसोऽनुतापः प्रकर्षेण जायते, तस्यैव मन्वाद्युक्तानां तपोदानादीनां मध्ये एकं किञ्चित् तदनुरूपं प्रायश्चित्तम् अननुतप्तस्य तेष्वनधिकारात्। हरिसंस्मरणं तु परमनुतापमनपेक्ष्यापि निःशेषपापक्षयहेतुत्वात्। 'अवशेनापि यन्नाम्नि कीर्त्तिते' इति वक्ष्यमाणत्वात् ॥३६॥

किञ्च देशकालादिविशेषमनपेक्षं सद्यः पापक्षयहेतुत्वात् हरिसंस्मरणं श्रेष्ठमित्याह—'प्रात'रिति। प्रातर्वा निशि वा सन्ध्यायां वा मध्याह्ने वा आदिशब्दात् देशवयोऽवस्थादिनियमं वारयति। नर इत्याश्रमादिनियमञ्च, देशकालादिनियमं विनैव यथा कथञ्चित् नारायणं संस्मरन्नेव सद्यस्तत्क्षणात् पापक्षयमवाप्नोति, न तु संस्मरणं कृत्वा। एतदुक्तं भवति—द्वादशाब्दादिकं हि देशकालाधिकारिनियमाद्यपेक्षं यथावदनुष्ठितं कालान्तरे पापक्षयहेतुः, इदं तु न तथा। अतः सर्वश्रेष्ठमिति। अयं भावः—शास्त्रगम्यं हि फलं यथाशास्त्रं देशकालादिनियमेन यथोक्तेनैवाधिकारिणानुष्ठितात् साधनान्निष्पद्यते, हरिसंस्मरणादिफलन्तु तु वस्तुसामर्थ्यप्रभवत्वात् न देशकालाधिकारादिनियमापेक्षितमिति। तथा च विष्णुधर्मादिषु वस्तुशक्तिमेव पुरस्कृत्योक्तम्—"चक्रायुधस्य नामापि सदा सर्वत्र कीर्त्तयेत्। नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः। हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः। अज्ञानादथवा ज्ञानात् दुत्तमश्लोकनाम यत्। संकीर्त्तितमिदं पंसो दहेदेधो यथानलः।' इत्यादि। न चैवं सति द्वादशाब्दादिस्मृतेरानर्थक्यं शङ्कनीयं नामादौ श्रद्धाशून्यानां तत्रैव प्रवृत्तेः। विस्तरस्तु तद् भागवतभावार्थदीपिकायां प्रपञ्चितमित्युपरम्यते ॥३७॥

(च) नरकः ओकः स्थानं येषां ते नरकवासिन इत्यर्थः। प्रायश्चित्तं तत्तत्पापक्षयाय विहितं चान्द्रायणव्रतादि तत्पराङ्मुखः तदनुष्ठानरहितः। एतेन तत्तत्पापकर्मकारिणोऽपि विहितप्रायश्चित्तानुष्ठातारश्चेत् तदा न तेषां तत्तन्नरकभोग इति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विष्णुसंस्मरणात् क्षीणसमस्तक्लेशसञ्चयः ।
मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते ॥३८॥

वासुदेवे मनो यस्य जपहोमार्च्चनादिषु ।
तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् ॥३९॥

क नाकपृष्ठगमनं पुनरावृत्तिलक्षणम्(छ) ।
ख जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥४०॥

तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने !
न याति नरकं मर्त्यः संक्षीणाखिलपातकः ॥४१॥

मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्य्ययः ।
नरक-स्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ॥४२॥

वस्त्वेकमेव दुःखाय सुखायेष्यो(ख)ध्रुवाय च (६) ।
कोपाय च यतस्तस्माद् वस्तु वस्त्वात्मकं कुतः ॥४३॥

तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय ततः प्रसादाय च जायते ॥४४॥

तस्माद् दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम् ।
मनसः परिणामोऽयं सुखदुःखादिलक्षणः ॥४५॥

किञ्च हरिस्मरणं द्वादशाब्दादिवन्न पापक्षयमात्रोपक्षीणं, किन्तु मुक्तेरपि हेतुरित्याह—'विष्णुसंस्मरणा'दिति। क्षीणः समस्तक्लेशानां पापमूलानां रागादीनां सञ्चयः समूहो यस्य स नरो मुक्तिमवाप्नोति। स्वर्गप्राप्तिस्तु तस्यातितुच्छत्वाद् विघ्नप्रायैवेत्यर्थः ॥३८॥

किञ्च जपहोमादि षाड्गुण्यार्थमपि कृतं हरिसंस्मरणादिकं मुक्तावेव पर्यवस्यतीत्याशयेनाह—'वासुदेवे मन' इति। तस्य मोक्षं प्राप्स्यतः पुंसो जपहोमादिसाध्यदेवेन्द्रत्वादिकं फलमतितुच्छत्वादन्तरायो विघ्न एव ॥३९॥

तदेवाह—'क्वे'ति। नाकपृष्ठं स्वर्गलोकः, तद्गमनमपि पुनरावृत्तिकलङ्कित्वाद् वासुदेवेति जपस्य कीर्त्तितस्य नित्यपरमानन्दफलस्य नानुरूपं, किं पुनर्देवेन्द्रत्वादिकमित्यर्थः। अत्र च हरिसंस्मरणजपयोर्ग्रहणं श्रवणादिनवविधभक्त्युपलक्षणार्थम्। वक्ष्यति हि—'हन्ति कलुषं श्रोत्रं स जातो हरि'रित्यादि ॥४०॥

अतो मोक्षफलं विष्णुस्मरणं कुर्वन् नरकं न यातीति किं वक्तव्यमित्युपसंहरति—'तस्मा'दिति ॥४१॥

तदेवं हरिभक्तिरूपं सर्वेषां सुलभं सर्वप्रायश्चित्तमुक्तम्। इदानीं विदुषामेव योग्यं ब्रह्मज्ञानात्मकं सर्वप्रायश्चित्तमुररीकृत्य पूर्वोक्तस्य स्वर्गनरकतत्साधनादिसर्वप्रपञ्चस्य मिथ्यात्वमाह—'मनःप्रीती'ति सार्द्धैः पञ्चभिः। तद् विपर्ययः मनोदुःखकरः। अतः स्वप्नगतमनःप्रीतिदुःखकरवस्तुवत् स्वर्गनरकौ मिथ्यैवेति भावः।

मिथ्याभूतनरकस्वर्गहेतुत्वात् पापपुण्ये अपि मिथ्यैव इत्याशयेनाह—'नरके'ति। आयुर्घृतमिति साधने साध्यवदुपचारात् पापपुण्ये एव नरकस्वर्गसंज्ञे इत्युक्तम् ॥४२॥

सुखदुःखसाधनानां स्रक्चन्दनवनितादीनामस्थिरवस्तुत्वमाह—'वस्त्वेकमेवे'ति। वस्तु स्रक्चन्दनादिकं, वस्त्वात्मकं नियतस्वभावम्। कुतःदेशकालभोक्तृभेदनियतस्वभावत्वान्न परमार्थतः सुखदुःखसाधनं किञ्चिदस्तीत्यर्थः ॥४३॥४४॥

मनसः परिणामः स्वप्नमनोरथादिवन्मनोविलासमात्र इत्यर्थः ॥४५॥

(छ) पुनरावृत्तिलक्षणमिति—तथा च शास्त्रं—'ते तं भुक्त्वा स्वर्गलोकं विशालं, क्षीणे पुण्ये मर्त्यलोकं विशन्ति'इति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।
ज्ञानात्मकमिदं विश्वं न ज्ञानाद् विद्यते परम् ।
विद्याविद्ये ति मैत्रेय ! ज्ञानमेवावधारय ॥४६॥

पातालानि च सर्व्वाणि तथैव नरका द्विज ॥४७॥
समुद्राः पर्व्वताश्चैव द्वीपवर्षाणि निम्नगाः ।
सङ्क्षेपात् सर्व्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥४८॥

एवमेतन्मया ख्यातं भवतो मण्डलं भुवः ।

इति श्रीविष्णुपुराणे द्वितीयेंऽशे षष्ठोऽध्यायः ।

किं तर्हि सत्यम् इत्यत्राह—'ज्ञानमि'ति । ज्ञानात्मकं परं ब्रह्मैव परमार्थं इति शेषः । एवं चेत् कुतोऽस्य बन्धमोक्षौ ? तत्राह—'ज्ञान'मिति । अविद्यया अहङ्कारादिरूपेण प्रतीतं ज्ञानमेव बन्धायेष्यते । च-शब्दात् ज्ञानमेव विद्यया तन्निरासेन मोक्षाय चेष्यत इत्यर्थः । न चाध्यसनीयं निरसनीयं वा अहङ्कारादि तद्व्यतिरिक्तमस्तीत्याह—'ज्ञानात्मक'मिति । तदध्यासापवादहेतू विद्याविद्ये अपि न ततः पृथग् विद्यते इत्याह 'विद्याविद्ये'ति । तदेवमविद्याध्यस्तकर्तृकर्मफलादिरहितात्मानुसन्धानं यावदपरोक्षज्ञानं परं प्रायश्चित्तम् । अपरोक्षज्ञाने तु न पापशङ्का, न च प्रायश्चित्तम् । "यथा वै पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवैवं विदित्वा पापं कर्मणः श्लिष्यते । कर्मणा लिप्यते पातकेन" इत्यादि श्रुतेः । यद्वा—मनःप्रीतिः स्वर्ग इत्यादेरेवं सम्बन्धः । यद्यपि स्वर्गनरकौ धर्माधर्मप्राप्यौ विविधसुखदुःखभूयिष्ठौ मयोक्तौ, तथापि न प्राप्तिपरिहारयोरतीव यत्नः कार्यः, तयोस्तत्साधनानाञ्चापरमार्थत्वात् परं ब्रह्मैवैकं सत्यम् । अतस्तत्प्राप्तये मनीषिभिर्ज्ञानाभ्यास एव यत्नः कार्य इति ॥४६॥

तदेवं नरकप्रसङ्गप्राप्तं प्रायश्चित्तं समाप्य प्रकृतमुपसंहरन्नाह—'एव'मिति द्वाभ्याम् ॥४७।४८॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा विष्णुपुराणटीकायां द्वितीयांशे षष्ठोऽध्यायः ॥

पाठान्तराणि—

(२—१) —लवणोऽथ— ।
(३—२) रुधिराम्भो वैतरणिः कृमीशः कृमिभोजनः ।
(५—३) श्वभोजनोऽथाप्रतिष्ठश्चाप्रचिश्च— ।
(६—४) —हर्त्ता— ।
(१८—५) वेगी पूयवहे चैको— ।
(४३—६) —सुखायेष्यांगमाय च ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तमोऽध्यायः

[सूर्य्यादिग्रहाणां सप्त-लोकानाञ्च संस्थानम्]

मैत्रेय उवाच ।

कथितं भूतलं ब्रह्मन् ममैतदखिलं त्वया ।
भुवर्लोकादिकान् लोकान् श्रोतुमिच्छाम्यहं मुने ॥१॥
तथैव ग्रहसंस्थानं प्रमाणानि यथा तथा ।
समाचक्ष्व महाभाग मह्यं त्वं परिपृच्छते ॥२॥

पराशर उवाच ।

रवि-चन्द्रमसोर्यावन्मयूखैरवभासते (१) ।
ससमुद्रसरिच्छैला तावती पृथिवी स्मृता ॥३॥
यावत्प्रमाणा पृथिवी विस्तारपरिमण्डलात् ।
नभस्तावत्प्रमाणं वै व्यासमण्डलतो द्विज ॥४॥
भूमेर्य्योजनलक्षे तु सौरं मैत्रेय ! मण्डलम् ।
लक्षाद् दिवाकरस्यापि मण्डलं शशिनः स्थितम् ॥५॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात् ।
नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते ॥६॥
द्वे लक्षे चोपरि ब्रह्मन् बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः ॥७॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः ।
लक्षद्वयेन भौमस्य स्थितो देवपुरोहितः (क) ॥८॥
सौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे सम्यगास्थितः(२) ।
सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तम ॥९॥
ऋषिभ्यस्तु सहस्राणां शतादूर्द्धं व्यवस्थितः ।
मेधीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ॥१०॥
त्रैलोक्यमेतत् कथितमुत्सेधेन महामुने !
इज्याफलस्य भूरेषा इज्या चात्र व्यवस्थिता(३)–॥११॥

सप्तमः अध्यायः ।

ग्रहाणां संस्थानं कस्योपरि को ग्रहोऽस्तीति तेषां सन्निवेशं, प्रमाणानि तेषामन्तरान्तरयोजनसंख्याः ॥२॥

भूर्लोकमानेनैव भुवर्लोक इति वक्तुं संस्थानं तावदाह—'रवी'ति। पृथिवी स्मृतेति—भूर्लोकः स्मृत इत्यर्थः ॥३॥

विस्तारो लोकालोकाचलावधिः, परिमण्डलं वृत्तगमनसंख्यानम्, तयोर्द्वन्द्वैक्यं तस्माद् व्यासमण्डलतः विस्तारमण्डलाभ्यां नभो भुवर्लोकाख्यं द्यावापृथिव्योर्लोकालोकपरिच्छिन्नयोरन्तरालवर्त्ती भुवर्लोकोऽपि तावानेवेत्यर्थः। यदाह शुकः। "एतावानेव भूबलयस्य सन्निवेशः। एतेनैव हि दिवो मानं तद्विद उपदिशन्ति। यथा द्विदलयोर्निष्पारादीनां ते अन्तरेणान्तरीक्षं तदुपसन्धितम्" इति ॥४॥

स्वर्लोकमाह—'भूमे'रित्यादि—षड्भिः ॥५॥

शतसहस्रे लक्षे पूर्णे ॥६।८॥

सौरिः शनैश्चरः ॥९॥

मेधीभूत इति धान्याक्रमणपशूनामाश्रयः। खनमध्यनिखातस्तम्भो मेधिः तद्वत् स्थितः ॥१०॥

उत्सेधेन उच्छ्रायेण पञ्चदशलक्षप्रमाणेन। इज्याफलस्य भोगस्य भूमिरेषा त्रैलोक्यरक्षणात्। त्वर्थे चकारः। इज्या त्वत्र भारतवर्ष एव प्रतिष्ठिता समाप्ता। उक्तं हि "यतो हि कर्मभूरेषा अतोऽन्या भोगभूमयः"। इति। अतोऽत्र लब्धजन्मना पंसा नित्यं धर्मे यतितव्यमिति भावः ॥११॥

(क) देवपुरोहितः सुरगुरुः बृहस्पतिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्रुवादूर्द्ध्वं महर्लोको यत्र ते कल्पवासिनः ।
एकयोजनकोटिस्तु यत्र ते कल्पवासिनः ॥१२॥
द्वे कोट्यौ तु जनो लोको यत्र ते ब्रह्मणः सुताः ।
सनन्दनाद्याः कथिता मैत्रेयामलचेतसः ॥१३॥
चतुर्गुणोत्तरे चोर्द्ध्वं जनलोकात् तपः स्मृतम् (४) ।
वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः ॥१४॥
षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्म्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥१५॥
पादगम्यन्तु यत्किञ्चित् वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ॥
भूमिसूर्य्यान्तरं यत्तु सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम (ख)॥
ध्रुवसूर्य्यान्तरं यच्च नियुतानि चतुर्दश ।
स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः (ग)॥
त्रैलोक्यमेतत् कृतकं मैत्रेय ! परिपठ्यते ।
जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् (घ)॥१९॥
कृतकाकृतयोर्म्मध्ये महर्लोक इति स्मृतः ।
शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति ॥२०॥

कल्पं ब्रह्मदिनपर्यन्तमेव महर्लोके वसन्ति । कल्पान्ते तु जनलोकं यान्तीति कल्पवासिनो भृग्वादयः । "त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना । यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः" इति शुकोक्तेः । तस्योच्छ्रयमाणमाह—'एके'ति । यत्रेत्यादिपादस्य पुनरुक्तिः ध्रुवतस्तदुच्छ्रयविधानार्था । पाठान्तरं सुगमम् ॥१२॥

महर्लोकानन्तरमुच्छ्रयेण ध्रुवादेव द्वे कोटी जनलोकः । यत्र ते कथिताः प्रख्याताः सनन्दनाद्याः सन्ति ॥१३॥

जनलोकाच्चतुर्गुणोत्तरे अष्टकोट्युच्छ्रये आकाशे व्याप्तस्तपोलोकः स्मृतः ॥१४॥

जनलोकापेक्षयैव षड्गुणेन द्वादशकोट्युच्छ्रयेण तपोलोकादनन्तरं सत्यलोकः । न तु तपोलोकापेक्षयेति मन्तव्यम् । तथा सत्यष्टचत्वारिंशत्कोट्युच्छ्रयत्वेन ब्रह्माण्डे तस्यावकाशाभावात् । अपुनर्मारकाः पुनर्मृत्युशून्याः । सत्यलोक एव कक्षाभेदेन ब्रह्मधिष्ण्यात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च भूतलादूर्द्ध्वं पञ्चदशलक्षोत्तरं त्रयोविंशतिकोट्यो भवन्ति । सत्यलोकादूर्द्ध्वं षोड़शलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम् । "सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः" । इत्युक्तेः ॥१५॥

महर्लोकादीनामुत्सेधमानमुक्तम् । भूरादिलोकत्रयस्य प्रत्येकमुत्सेधव्यवस्थामाह—'पादगम्य'मिति त्रिभिः । चरणसञ्चारयोग्यं गिरिशिखरादि यावत् तावदुत्सेधो भूर्लोक इत्यर्थः । विस्तारोऽस्य मयोदितः सर्वलोकालोकवर्षिपञ्चविंशतिकोटिप्रमाणः ॥१६।१७॥

नियुतानि लक्षाणि ॥१८॥

त्रैलोक्यं कृतकं प्रतिकल्पं कार्यत्वात् । जनलोकादित्रयमकृतकं प्रतिकल्पमकार्यत्वात् ॥१९॥

महर्लोकस्य कृतकाकृतकत्वे हेतुमाह—'शून्य' इति । जनैः शून्यः ॥२०॥

(ख) भूमिसूर्य्ययोः भूर्लोकसूर्य्ययोः अन्तरं अवकाशस्थानम् ।

(ग) ध्रुवसूर्य्ययोः ध्रुवलोकसूर्य्ययोः अन्तरं अवकाशस्थानं लोकानां भुवनानां यत् संस्थानं तच्चिन्तकैः । 'लोकस्तु भुवने जने' इति कोषात् ।

(घ) अत्र त्रैलोक्यं कृतकं प्रतिकल्पं कार्य्यत्वादिति स्वामी । न चात्र सिद्धसाधनं कार्य्यत्वेन हेतुना कार्य्यत्वरूपस्यैव कृतकत्वसाधनादिति वाच्यम्, साध्यहेत्वोः कृतकत्वकार्य्यत्वयोरेकस्वरूपसम्बन्धविशेषरूपत्वेन द्वितीयस्य च प्रागभावप्रतियोगिरूपत्वेनोत्पाद प्रतियोगित्वादिरूपत्वेन वा द्वयोर्विशेषात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एते सप्त मया लोका मैत्रेय ! कथितास्तव ।
पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः ॥२१॥

एतदण्डकटाहेन तिर्य्यक् चोर्द्ध्वमधस्तथा ।
कपित्थस्य यथा बीजं सर्व्वतो वै समावृतम् ॥२२॥

दशोत्तरेण पयसा मैत्रेयाण्डञ्च तद् वृतम् ।
सर्व्वोऽम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः ॥२३॥

वह्निश्च वायुना वायुर्मैत्रेय ! नभसा वृतः ।
भूतादिना नभः सोऽपि महता परिवेष्टितः (ङ) ॥२४॥

दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै ।
महान्तञ्च समावृत्य प्रधानं समवस्थितम् ॥२५॥

अनन्तस्य न तस्यान्तः संख्यानञ्चापि विद्यते ।
तदनन्तमसंख्यातप्रमाणं व्यापि वै यतः ॥२६॥

हेतुभूतमशेषस्य प्रकृतिः सा परा मुने !

अण्डानान्तु सहस्राणां सहस्राण्ययुतानि च ।
ईदृशानां तथा तत्र कोटिकोटिशतानि च ॥२७॥

दारुण्यग्निर्यथा तैलं तिले तद्वत् पुमानपि ।
प्रधानेऽवस्थितो व्यापी चेतनात्मात्मवेदनः (च) ॥२८॥

प्रधानञ्च पुमांश्चैव सर्व्वभूतात्मभूतया ।
विष्णुशक्त्या महाबुद्धे ! वृतौ संश्रयधर्म्मिणौ ॥२९॥

तयोः सैव पृथग्भावकारणं संश्रयस्य च ।
क्षोभकारणभूता च सर्गकाले महामते ॥३०॥

एतच्चतुर्दशभुवनात्मकं जगत् अण्डकटाहेन समावृतं, तदेव च पृथिव्यावरणम्, स च कटाहः कोटियोजनविस्तारः। "सप्तसागरमानस्तु गर्त्तोदस्तदनन्तरम्। कोटियोजनमानस्तु कटाहः स व्यवस्थितः"। इति स्वच्छन्दभैरवतन्त्रोक्तेः ॥२२॥

कटाहाद् दशोत्तरेण दशगुणेन। अम्बुपरिधानः पयोवेष्टितः ॥२३।२४॥

'दशोत्तराणि सप्ते'ति छत्रिन्यायेनोक्तम्, पृथिव्यावरणस्य दशोत्तरत्वाभावात्। "एतद् भगवतो रूपं स्थूलं ते व्याहृतं मया। महाद्यादिभिश्चावरणैरष्टभिर्बहिरावृतम्"। इति शुकाद्य क्तेः ॥२५॥

अष्टममप्यावरणं प्रसिद्धम्। उत्पत्तिनाशवन्ति परिच्छिन्नानि च पृथिव्यादिसप्तावरणानि,— प्रधानन्तु न तथेत्याह 'अनन्तस्ये'ति। सर्वगतस्य तस्यान्तो नाशो नास्ति। संख्यानञ्च दशगुणात्मकं यतस्तदनन्तं नित्यम् असंख्यातमप्रमाणञ्च, न विद्यते संख्यातं प्रमाणं यस्य तथाभूतञ्च वै प्रसिद्धम् "परास्य शक्तिः" इत्यादि श्रुतिपुराणेषु ॥२६॥

अतः कार्यस्य समस्तस्य हेतुभूतम्। अनादित्वात् सर्वगतत्वं व्यनक्ति—'अण्डानाञ्चे'ति ॥२७॥

तच्च पुरुषाधिष्ठितमेव जगतो हेतुरित्याह—'दारुणी'ति। काष्ठे यथा तत्प्रकाशकतया अग्निरवस्थितः, तिले च तैलं यथा। आत्मवेदनः स्वप्रकाशः ॥२८॥

तयोरपि परमेश्वराधिष्ठितत्वमाह—'प्रधानञ्चे'ति द्वाभ्याम्। विष्णोः स्वरूपभूतया चिच्छक्त्यावृतौ अधिष्ठितौ संश्रयधर्मिणौ नियम्य नियन्तृभावेन स्थितौ ॥२९॥

सैव कालात्मना स्थिता सती तयोः प्रलयकाले पृथग्भावे कारणम्। स्थितिकाले संश्रयस्य च कारणम्। सर्गकाले क्षोभकारणभूता चेत्यर्थः ॥३०॥

(ङ) सोऽपि भूताऽदिरपि।

(च) चेतनात्मा चेतनस्वरूपः। आत्मना स्वेनैव वेदनं प्रकाशः यस्य सः, अथवा आत्मनः वेदनः प्रकाशकः। स्वेतराप्रकाश्य इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा शैत्यं(५) जले वातो बिभर्त्ति कणिकाशतम् ।
जगच्छक्तिस्तथा विष्णोः प्रधानपुरुषात्मिका(६) ॥३१

यथा च पादपो मूलस्कन्धशाखादिसंयुतः ।
आदिबीजात् प्रभवति बीजान्यन्यानि वै ततः ॥३२॥

प्रभवन्ति ततस्तेभ्यः सम्भवन्त्यपरे द्रुमाः ।
तेऽपि तल्लक्षणद्रव्यकारणानुगता मुने ॥३३॥

एवमव्याकृतात् पूर्व्वं जायन्ते महदादयः ।
विशेषान्तास्ततस्तेभ्यः सम्भवन्त्यसुरादयः ॥३४॥

तेभ्यश्च पुत्रास्तेषाञ्च पुत्राणामपरे सुताः ।
बीजाद् वृक्षप्ररोहेण यथा नापचयस्तरोः ।
भूतानां भूतसर्गेण नैवास्त्यपचयस्तथा ॥३५॥

सन्निधानाद् यथाकाशकालाद्याः कारणं तरोः ।
तथैव परिणामेन(७) विश्वस्य भगवान् हरिः ॥३६॥

व्रीहिबीजे यथा मूलं नालं पत्राङ्कुरौ तथा ।
काण्डं कोषस्तथा पुष्पं क्षीरं तद्वच्च तण्डुलाः ॥३७॥

तुषाः कणाश्च सन्तो वै यान्त्याविर्भावमात्मनः ।
प्ररोहहेतुसामग्रीमासाद्य मुनिसत्तम (छ) ॥३८॥

तथा कर्म्मस्वनेकेषु देवाद्याः समवस्थिताः ।
विष्णुशक्तिं समासाद्य प्ररोहमुपयान्ति वै (ज) ॥३९

स च विष्णुः परं ब्रह्म यतः सर्व्वमिदं जगत् ।
जगच्च यो यत्र चेदं यस्मिंश्च लयमेष्यति ॥४०॥

एवञ्च प्रधानपुरुषद्वारा तत्कार्यभूत—जगदाश्रयत्वेऽपि चिच्छक्तेर्निर्लेपत्वं दृष्टान्तेनाह—'यथे'ति। जले स्थितं कणिकाशतं परमाणुस्तोमः असक्तं यथा भवत्येवं वातो यथा बिभर्ति तथा प्रधानपुरुषात्मकं जगत्। तत्रैव स्थितत्वाद् आत्मन्यसक्तमेव विष्णु शक्तिर्बिभर्त्ति। पाठान्तरे तु जलस्थितं शैत्यं कणिकाद्वारेणागतं यथा वातो विभर्त्ति तथा जलस्थानीयं जगत्कर्णिकास्थानीयमहदादिद्वारेणागतं वातस्थानीया विष्णोः शक्तिर्बिभर्त्तीत्यर्थः ॥३१॥

एतदेव दृष्टान्तेन प्रपञ्चयन् सर्वेषां कार्याणां मूलकारणानुगतिमाह—'यथा चे'ति सार्धैस्त्रिभिः। अन्यानि बीजानि, ततः पादपात् प्रकर्षेण भवन्ति ॥३२॥

तेभ्यो बीजेभ्योऽन्ये द्रुमाः प्रभवन्ति। तद्बीजेभ्यश्चापरे द्रुमाः, तल्लक्षणं पूर्वद्रुमसजातीयं यच्चूतादिद्रव्यं तदेव कारणं तेनानुगता व्याप्ताः ॥३३॥

विशेषान्ताः पृथिव्यन्ताः ॥३४॥

बहुकार्योत्पादकानानपि देवादीनामपक्षयाभावं दृष्टान्तेनाह—'बीजाद् वृक्षे'ति ॥३५॥

सर्वकारणभूतस्यापि हरेर्निर्विकारत्वं दृष्टान्तेनाह—'सन्निधाना'दिति। उपादानत्वमपि हरेः प्रकृतिद्वारैव, न स्वरूपेणेति भावः ॥३६॥

एवमव्याकृतात् पूर्वं जायन्त इत्यादिवाक्यात् प्राप्तमसत्कार्यवादशंकां दृष्टान्तेन वारयन्नाह—'व्रीहीं'त्रिभिः ॥३७

व्रीहिबीजे सन्त एव मूलनालादय आत्मनः स्वस्य प्ररोहहेतु-सामग्र्यम् अभिव्यक्तिकारणपौष्कल्यभूमिजलादिसंयोगं प्राप्य यथाविर्भावं यान्ति, न पुनरत्यन्तमसन्त एव जायन्ते 'सदेव सौम्येदमग्र आसीदित्यादिश्रुतेरित्यर्थः ॥३८॥

ननु सर्वकारणं व्रीह्यैव श्रुतिप्रसिद्धं, न तु विष्णुः, तत्राह 'स चे'ति। स विष्णुः परं ब्रह्मैव, तत् कुत इत्यपेक्षायां विष्णोः सकाशाद् उद्भूतं तज्जगत् तत्रैव स्थितमित्यादि पूर्वोक्तं विष्णोः स्वरूपमनुस्मारयति—'यतः सर्वमि'ति ॥४०॥

(छ) आविर्भावं अभिव्यक्तिं यान्ति प्राप्नुवन्ति। 'नासतो विद्यते भाव' इत्यादिसत्कार्य्यवादोऽनुसन्धेयः।

(ज) प्ररोहम् आविर्भावम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद् ब्रह्म तत् परं धाम सदसत् परमं पदम् ।
यस्य सर्व्वमभेदेन यतश्चैतच्चराचरम् (क) ॥४१॥

स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च सः (ख) ।
तस्मिन्नेव लयं सर्व्वं याति तत्र च तिष्ठति ॥४२॥

कर्त्ता क्रियाणां स च इज्यते क्रतुः
स एव तत्कर्म्मफलञ्च तस्य तत् ।
स्रुगादि यत् साधनमप्यशेषतो—
हरेर्न किञ्चिद् व्यतिरिक्तमस्ति वै (ट) ॥४३॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे सप्तमोऽध्यायः ।

ब्रह्म च विष्णोरेव स्वरूपमित्याह—'तद्ब्रह्मे'ति । तत् श्रुतिप्रसिद्धं ब्रह्म, तस्य विष्णोः, परं धाम स्वरूपं, यतः सदसतोः परमं पदं यत् यस्य चाभेदेन सर्वमेतद् जगद् भवति तद् ब्रह्म । अतो विष्णुब्रह्मणोर्लक्षणाभेदाद् ब्रह्मैव विष्णुः ॥४१॥

अतः स एव सर्वकारणमित्येतत् सिद्धमित्याह—'स एवे'ति ॥४२॥

सर्वकर्मफलं तत्साधनादिरूपश्च स एवेति दर्शयन् उक्तं सर्वात्मत्वं निगमयति—'कर्त्ते'ति ॥४३॥

इति श्रीविष्णुपुराऽटीकायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा द्वितीयांशे सप्तमाध्यायः ॥

(क) चराचरं स्थावरजङ्गमात्मकम् ।

(ख) स एव विष्णुरेवं मूलप्रकतिः अव्यक्तरूपं प्रधानम् ।

(ट) हरेः नारायणात् किञ्चिद् व्यतिरिक्तं भिन्नं नास्ति । तदात्मकमेवेदं सर्वमिति भावः, 'ऐतदात्म्यमिदं सर्व'मित्यादिश्रुतेः ।

पाठान्तराणि—

(३—१) रविचन्द्रमसोर्यावन्मयूखैरवभास्यते ।
(६—२)—समवस्थितः ।
(११—३)—प्रतिष्ठिता ।
(१४—४)—स्थितम् ।
(३१—५)—सक्तं— ।
(३१—६) शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्मकम् ।
(३६—७) तथैवापरिणामेन— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टमोऽध्यायः ।

सूर्य्यरथसंस्थानादिकथनम्, कालस्य निरूपणम्, गङ्गाया उत्पत्तिश्च ।

पराशर उवाच ।

व्याख्यातमेतद् ब्रह्माण्डसंस्थानं तव सुव्रत !
ततः प्रमाणसंस्थाने सूर्य्यादीनां शृणुष्व मे (क) ॥१॥
योजनानां सहस्राणि भास्करस्य रथो नव ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ॥२॥
सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि वै ।
योजनानान्तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् ॥३॥
त्रिनाभिमति पञ्चारे षण्णेमिन्यक्षयात्मके ।
संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम् ॥४॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो विवस्वतः ।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य महामते ॥५॥
अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः ।
ह्रस्वोऽक्षस्तद्युगार्द्धेन ध्रुवाधारो रथस्य वै ।
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ॥६॥

अष्टमः अध्यायः ।

विवृतं विस्तरेणेदं ज्योतिश्चक्रं विचक्षणैः । मया तु स्वीयबोधाय संक्षेपेणोपवर्ण्यते ॥१॥

ईषादण्डः अक्षयुगयोः सन्धानार्थो दण्डः, द्विगुणः अष्टादशयोजनसहस्रः ॥२॥

'सार्द्धकोटि'रिति — मेरुमानसोत्तराचलयोर्यावदन्तं तावदेवाक्षस्य मानम् । "तस्याक्षो मेरोर्मूर्द्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रवन्मानसोत्तरगिरौ परिभ्रमति" । इति शुकोक्तेः ॥३॥

चक्रमुपासनार्थं विशिनष्टि—'त्रिनाभिमती'ति । नाभिः ध्रुवः । यत्राक्षः प्रोतः स च त्रिमेखलः । अहः एवात्र नाभित्वेनोपास्यत्वात् मेखलारूपास्तिस्रो नाभयः पूर्वाह्णमध्याह्नापराह्णास्तद्युक्ते पञ्चारे पञ्च संवत्सरपरिवत्सरादयः अराः शलाका यस्मिन् । षण्णेमिनि षट् ऋतवो नेमयः प्रान्तबलयानि तद्वति । कालात्मकत्वात् अक्षयात्मके संवत्सरमये संवत्सरविकारत्वात् संवत्सरत्वेनोपास्यत्वाच्च तन्मयत्वम् । तदुक्तं मात्स्ये — "अहस्त्रिनाभिसूर्यस्य एष चक्रस्य वै स्मृतम् । अराः संवत्सराः पञ्च नेमयः षड् ऋतवः स्मृताः" इति । तस्मिन् कालचक्रं कालोपमानकृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितम् आश्रितम्, सूर्यगत्यधीनत्वात् कालचक्रपटलस्य ॥४॥

अक्षान्तरमाह—'चत्वारिंशदि'ति । सार्द्धपञ्चचत्वारिंशत् सहस्रप्रमाण इत्यर्थः ॥५॥

महाक्षप्रमाणं युगेऽप्यतिदिशति—'अक्षे'ति । ईषा तिर्यङ्निबद्धोऽश्वयोजनार्थो दण्डो युगम् । अक्षस्य प्रमाणं तदेव युगार्द्धयोः संहत्य प्रमाणम् । युगस्य प्रमाणमिति च वक्तव्ये युगार्द्धयोरित्युक्तम् । तत्रायं भावः—यस्मि उभयतोऽश्वा बध्यन्ते तद्युगमीषाग्रयुक्तमध्यस्थानादुभयसमं भवति । अत्र त्वेकत एव सप्ताश्वाः, न तूभयतः "असङ्गैस्तुरगैर्युक्ते यतश्चक्रं ततः स्थितैः" । इति लिङ्गेके अतोऽश्वयुक्ते भागे युगस्य दैर्घ्यम् अन्यतो ह्रस्वत्वमिति शङ्का मा भूदित्येतदर्थं युगार्द्धयोः समयोः संहत्य तत्प्रमाणमित्युक्तम् । युक्तञ्चाक्षयुगयोरेकप्रमाणत्वमिति । ह्रस्वाक्षस्योपयोगं दर्शयन्नाह—'ह्रस्वोऽक्ष' इति । सार्द्धपञ्चचत्वा

(क) प्रमाणं परिमाणं संस्थानं आकारः ते । शृणुष्वेत्यात्मनेपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हयाश्च सप्त च्छन्दांसि तेषां नामानि मे शृणु ।
गायत्री स बृहत्युष्णिग् जगती त्रिष्टुबेव च ।
अनुष्टुप् पंक्तिरित्युक्ताश्छन्दांसि हरयो रवेः ॥७॥
मानसोत्तरशैले तु पूर्व्वतो वासवी पुरी ।
दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य च ।
उत्तरेण च सोमस्य तासां नामानि मे शृणु ॥८॥
वस्वौकसारा शक्रस्य याम्या संयमनी तथा ।
पुरी सुखा जलेशस्य सोमस्य च विभावरी ॥९॥
काष्ठां गतो दक्षिणतः क्षिप्तेषुरिव सर्पति ।
मैत्रेय ! भगवान् भानुर्ज्योतिषां चक्रसंयुतः ॥१०॥
अहोरात्रव्यवस्थानकारणं भगवान् रविः ।
देवयानः परः पन्था योगिनां क्लेशसंक्षये ॥११॥
दिवसस्य रविर्म्मध्ये सर्व्वकालं व्यवस्थितः ।
सर्व्वद्वीपेषु मैत्रेय ! निशार्द्धस्य च सम्मुखः ॥१२॥

र्विंशत्सहस्रो ह्रस्वोऽक्षस्तस्य रथस्य युगार्द्धेन सह वायुरश्मिनिबद्धो ध्रुवाधारोऽस्ति। तथा शुकः—"तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तैलयन्त्राक्षवद् ध्रुवे कृतोपरिभागः" इति—मात्स्ये चोक्तम्। "युगाक्षकोटिस्थौ तस्य दक्षिणे स्यन्दनस्य तु। ध्रुवेण च गृहीतौ तौ रश्मी यौ नयतो रविम्"। इति निरन्तरोक्तह्रस्वाङ्कपेक्षया द्वितीये तु महाक्षे तथा चात्र रथप्रक्रिया—भूतलाद् योजनलक्षे सूर्यः, पञ्चदशलक्षे ध्रुवः, चतुरशीतियोजनसहस्रोच्छ्रयो मेरुः, अर्द्धलक्षोच्छ्रायो मानसोत्तराचलः, तदुपर्यर्द्धलक्षोच्छ्रयो मेरोश्चोपरि षोड़शयोजनसहस्रोच्छ्रये वायुस्कन्धे सार्द्धसप्तलक्षोत्तरसार्द्धकोटिप्रमाणो रविरथस्याक्षो मानसोत्तरप्रान्तप्रोतैकचक्रस्तिर्यग् विततोऽस्ति। तस्मिंश्चाक्षे चक्रप्रान्ते निबद्धभूलो ह्रस्वोऽक्षो वायुरश्मियुक्तो ध्रुवाधारोऽस्ति। युगश्च दक्षिणार्धे वायुरश्मिसंबद्धं ध्रुवाधारं तथैवास्ति। प्रवाहादिवायुवशाच्च द्वादशराश्यात्मकं ज्योतिश्चक्रं प्रत्यहं मेरुं प्रदक्षिणीकुर्वत् परिभ्रमति। तद्वेगवशाच्च सूर्यः प्रत्यहं मेरुं प्रदक्षिणीकुर्वन्नपि स्वगत्या राश्यभिमुखमपि किञ्चित् किञ्चित् प्रचलति। तत्र दक्षिणायनादिषु ध्रुवगृहीतवायुपाशप्रसारणाकर्षणाभ्यां रवेर्गतिवैचित्र्याद् यथायथमहोरात्राणि ह्रस्वदीर्घसमानि भवन्ति। एवं चन्द्रादीनामपि ज्योतिश्चक्रवशात् प्रत्यहं मेरुं प्रदक्षिणीकुर्वतामपि नक्षत्राभिमुखी स्वकीया गतिरन्यैव अश्विन्यां दृष्टानां भरण्यादौ दर्शनात्। एतच्च दर्शनात्। एतच्च तत्र श्लोकव्याख्याने स्फुटीभविष्यति ॥६॥

तत्र त्रय्यात्मनः सूर्यस्य गायत्र्यादिच्छन्दोरूपेणोपास्यान् हयानाह हयाश्चेति। पंक्तिरित्येतानि छन्दांसि रवेर्हरयो हया उक्ता इत्यन्वयः ॥७॥

मेरोश्चतुर्दिशमुदयास्तमयाद्युपलक्षणभूतं पुरचतुष्टयमाह—'मानसोत्तरे'ति। पूर्वत इत्यादि भारतवर्षस्थानापेक्षयोच्यते। पूर्वादिविभागस्य सूर्यदर्शनाद्यपेक्षत्वेनानियमस्य वक्ष्यमाणत्वात्। याम्या यमस्य पुरी ॥८॥९॥

तत्र तावदैन्द्रीमवधिं कृत्वा सूर्यस्य उदयास्तमनादिकं वक्ष्यन् उत्तरायणान्तेऽत्यन्तमुत्तरां दिशं गतस्य दक्षिणतः परावृत्तिमाह—'काष्ठा'मिति। दक्षिणतो या काष्ठा तां गतः दक्षिणायनं प्रविष्टः सन् क्षिप्त इषुर्यथा तथा शीघ्रं गच्छति ॥१०॥

ततश्चैन्द्रीप्रभृति तासु पुरीषु संसारिणाम् अहोरात्रव्यवस्थानकारणं रविर्भवति। क्लेशानां रागादीनां संक्षये सति योगिनां क्रममुक्तिभाजां देवयानः परः श्रेष्ठः अपुनरावृत्तिकरः पन्थाश्च स एव भवति। "सूर्यद्वारेण ते विरजाः प्रयान्ति, स यावदिच्छेन् मनस्तावदादित्यं गच्छति"। इत्यादिश्रुतेः ॥११

येन प्रकारेण अहोरात्र्यादिव्यवस्थाकारणं रविस्तदाह—'दिवसस्ये'ति पञ्चभिः। यथास्मिन् द्वीपे भारतवर्षे मध्याह्ने लक्षयोजनोच्छ्रिते व्योम्नि तीव्रस्फुटशुक्लातपेन रविः प्रतपन् वर्त्तते, तथा सर्वकालम् उदयास्तमयादिष्वपि सर्वद्वीपेष्वपि नीचैर्भूलग्नवद्दर्शनस्य मन्दातपत्वादीनाञ्च दूरत्वादिनिबन्धनत्वात्। यथाह—"वायुः विदूरभावाच्चार्कस्य प्रोद्यतस्य विरश्मिता रक्तता च, विरश्मित्वाद् रक्तत्वाच्चाप्यनुष्णता"। इति। यदा यस्मिन् द्वीपवर्षादौ मध्याह्ने वर्त्तते, तदा तत्समानसूत्रस्य द्वीपान्तरादिषु जायमानस्य निशार्द्धस्य अर्द्धरात्रस्य सम्मुखो भवति ॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदयास्तमने चैव सर्व्वकालन्तु सम्मुखे ।
विदिशासु त्वशेषासु तथा ब्रह्मन् ! दिशासु च ॥१३

यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।
तिरोभावश्च यत्रैति तत्रैवास्तमनं रवेः ॥१४॥

नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः ।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥१५॥

शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ।
विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान्द्वे पुरे तथा ॥१६

उदितो वर्द्धमानाभिरा मध्याह्नात् तपन् रविः ।
ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति ॥१७॥

उदयास्तमनाभ्याञ्च स्मृते पूर्व्वापरे दिशौ ।
यावत् पुरस्तात् तपति तावत् पृष्ठे च पार्श्वयोः ।

उदयास्तमने सर्वकालं भवतः । ते च परस्परं सम्मुखे रवेः समानसूत्रस्थे भवतः ॥१३॥

तत्र हेतुमाह—'यैर्यत्रे'ति । सुखौ तु उदयास्तमयौ । सर्वदा मध्याह्ने एव सतोऽर्कस्य नास्त एव ॥१४॥

अतो रवेरुदयास्तमनाख्यं दर्शनादर्शनमात्रमेव ॥१५॥

दर्शनादर्शनयोरवधिमाह—'शक्रादीनामि'ति । इन्द्राद्यन्यतमस्य पुरे मध्याह्ने तिष्ठन् तदेकं पुरम् अभितः पुरद्वयञ्चेत्येवं पुरत्रयं तदन्तरालस्थौ द्वौ च विकर्णौ कोणौ उदयाद्यवस्थाभिः स्पृशति स्वरश्मिभिर्भासयति । तथा विकर्णस्थः अग्न्याद्यन्यतमस्य कोणे मध्याह्ने स्थितस्तत्कोणमभितः स्थितं कोणद्वयञ्चेत्यवं त्रीन् कोणान् तन्मध्यवर्त्तिनी द्वे च पुरे तथैवोदयाद्यवस्थाभिः स्पृशति । भूवलयस्यार्द्धं प्रतपन् दृश्यते तावदाह । अर्धे तु न दृश्यते तावती रात्रीरित्यर्थः ।

तथा हि ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठति, तदा सौम्य-पुरस्थानामस्तमयः, ईशानकोणस्थानां तृतीयो यामः ।—

अग्निकोणस्थानां प्रथमो यामः । याम्यस्थितानामुदयः, एवं यदा याम्ये मध्याह्ने तिष्ठति, तदा ऐन्द्रेऽस्तमयः, अग्निकोणे तृतीयो यामः, निर्ऋतिकोणे प्रथमो यामः, वारुणे उदयः, यदा च वारुणे मध्याह्नस्तदा याम्ये अस्तमयः, निर्ऋतिकोणे तृतीयो यामः, वायव्ये प्रथमः, सोम्ये उदयः । यदा च सौम्ये मध्याह्नस्तदा वारुणेऽस्तमयः, वायव्ये तृतीयो यामः, ईशकोणे प्रथमो यामः, ऐन्द्र उदयः । एवमग्निकोणे वा मध्याह्नः, तदा ईशानकोणे अस्तमयः, इन्द्रपुरे तृतीयो यामः, यमपुरे प्रथमः, निर्ऋतिकाणे उदय इत्यादि योज्यम् । मेरोः सर्वतः परिभ्रमन् सूर्योऽर्द्धं भूवलयं प्रकाशयन् दर्शनाद्यपेक्षयाहोरात्रव्यवस्थाकारणमित्युक्तं भवति ॥१५॥

सन्निधानव्यवधानकृतमेव रश्मीनां वृद्धिह्रासतीव्रमन्दत्व-दिकमपीत्याह—'उदित' इति । गोभिः रश्मिभिः ॥१७॥

दिग्विभागोऽपि उदयास्तमयनिमित्त एवेत्याह—'उदयै-यत्र यस्योदेति, सा तस्य पूर्वा दिक् । यत्रास्तमेति सा प्रतीची । तथा च श्रुतिः-"तस्मादसावादित्यः सर्वाः प्रत्यगुदेति । तस्मात् सर्व एव मन्यते मां प्रत्युदगात्" । पुरस्तादुद्यन्तं सूर्यं पश्यतश्च दक्षिणवामपार्श्वभागौ दक्षि-त्तरे दिशाविति दर्शयन् रश्मिविस्तारावधिमाह 'यावदि'ति । चतुर्दिक्षु लोकालोकाचलपर्यन्तं त्यर्थः ॥१८॥

(ख) विदिशासु दिशासु चेत्याषत्त प्रयोग आर्षः ।

(ग) यैर्यत्रेत्यादि—तेषां दर्शकानां सम्बन्धे, नत्वन्येषामपीति भावः । अत एव विभिन्नेषु देशेषु समयभेदेन सूर्य्यस्योदयास्तमयादि व्यवहार उपपद्यते । यदैव पृथिव्याः पूर्व प्रान्तवास्तव्याः सूर्य्यः समुदेतीति भ्ववहरन्ति तदैव पश्चिमान्तवास्तव्याः सूर्य्यः अस्तं यातीति व्यपदिशन्ति । भास्वानिति रवेरिति च ग्रहान्तरादीनामप्युपलक्षणम् । स इति दर्शनादर्शनरूप इत्यर्थः । सूर्य्यादीनां दर्शनमदर्शनञ्च यथाक्रममुदयत्वेनास्तमयत्वेन च व्यपदिश्यत इतिभावः । अदेव विवृतमुत्तरश्लोकेन ।

(घ) 'उदयास्तमयाख्यं हि दर्शनादर्शनं रवे' रित्यत्र यथाक्रममन्वयः । दर्शनादर्शनमित्यत्र समाहारद्वन्द्वः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋतेऽमरगिरेर्मेरोरुपरि ब्रह्मणः सभाम् ।
ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम् ।
ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै ॥१९॥

तस्माद्दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि ।
सर्व्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः ॥२०॥

प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे ।
विंशत्यग्निमतो रात्रौ वह्निर्दूरात् प्रकाशते(ङ) ॥२१॥
वह्निपादस्तथा भान्तं दिनेष्वाविशति द्विज !

अतीव वह्निसंयोगादतः सूर्य्यः प्रकाशते ॥२२॥

तेजसी भास्करानेये प्रकाशोष्णस्वरूपिणी ।
परस्परानुप्रवेशादाप्यायेते दिवानिशम् ॥२३॥

दक्षिणोत्तरभूम्यर्द्धे समुत्तिष्ठति भास्करे ।
अहोरात्रं विशत्यम्भस्तमः प्राकाश्यशीलवत् ॥२४॥

आताम्रा हि भवन्त्यापो दिवा नक्तप्रवेशनात् ।
दिनं विशति चैवाम्भो भास्करेऽस्तमुपेयुषि ।
तस्माच्छुक्लीभवन्त्यापो नक्तमम्भःप्रवेशनात्(च) ॥२५॥

मेरौ तु विशेषमाह—'ऋत' इति। ब्रह्मसभावर्ज्जं मेरोरुपर्यपि सर्वतस्तपति, न तु ब्रह्मसभां भासयति। तत्र हेतुमाह—'ये ये मरीचय' इति ॥१९॥

मेरोः सर्वतोऽपि विशेषान्तरमाह—'तस्मादि'ति। यतो यस्मात् सर्वेषां द्वीपानां वर्षाणाञ्च मेरुरुत्तरत एव स्थितः। तस्मान्मेरोरुत्तरस्यां दिशि सदा दिवापि। अन्येषां दिनेऽपि नित्यं रात्रिरेव। अयं भावः,—मेरुं प्रदक्षिणीकुर्वन्तं सूर्यं ये यत्र पश्यन्ति, सा च तेषां प्राची, तेषाञ्च वामभाग एव मेरुः। अतः सर्वेषां सर्वदा मेरुरुत्तर एव। दक्षिणभागे च लोकालोकाचलः॥ तस्मादुत्तरस्यां दिशि सदा रात्रिः। दक्षिणस्याञ्च सदा दिनमिति। यद्वा भारतादिवर्षस्थानां सम्मुखे सूर्यमुद्यन्तं पश्यताम् उत्तरस्यां दिशि वामभागे मेरोरेकतः सदा दिनम्, अन्यतश्च सदा रात्रिः। दक्षिणभागे तु सदा दिनमेवेत्येतदर्थादुक्तं भवति ॥२०॥

उदयास्तमयनिर्णयप्रसङ्गात् तत्कालानुगाग्निहोत्रे मिश्रलिङ्गमन्त्रविशेषब्राह्मणोक्तमग्निसूर्ययोः परस्पराऽनुप्रवेशमुपासनार्थमाह—'प्रभेति' त्रिभिः ॥२१॥

(ङ) प्रकाशत इति प्रकर्षेण दीप्यते दिवापेक्षयेति शेषः।

वह्निः पादश्चतुर्थांशो दिनेषु भानुं विशति। अतस्तावन्मात्रप्रवेशाद् भानोरुष्णत्वेऽप्यदाहकत्वं, वह्नेश्चाहि दाहकत्वमविरुद्धम्। तथा च "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेत्येव सायं होतव्यं, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः"। इत्येतद्विधिविशेषे श्रूयते। "अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तम्। उद्यन्तं वावादित्यमग्निरनुसमारोहति तस्माद् धूम एवाग्नेर्दिवा दृश्यते"। इति ॥२२।२३॥

अहोरात्रप्रसङ्गात् तयोरप्सु प्रवेशमुपासनार्थमाह—'दक्षिणे'ति। मेरोर्दक्षिणभूम्यर्द्धे भास्करे समुत्तिष्ठति सति दिने तमःशीला रात्रिः अम्भः प्रविशति, मेरोरुत्तरभूम्यर्धे च भास्करे तिष्ठति रात्रौ प्राकाश्यशीलम् अहः अम्भो विशतीत्यर्थः। प्राकाश्यं प्रकाशकत्वम् ॥२४॥

एतदेवोपपादयति—'आताम्रा हो'ति सार्द्धेन। आ ईषत् ताम्राः दिवा दिने। नक्तप्रवेशनाद् रात्रेः प्रवेशादित्यर्थः। अस्तमुपेयुषि अस्तं गते सति। नक्तं रात्रौ। तथा च श्रुतिः,—"यद्वै दिवा भवत्यपो रात्रिः प्रविशति तस्मात् ताम्रा आपो दिवा दृश्यन्ते। यन्नक्तं भवत्यपोऽहः प्रविशति तस्मात् शुक्ला आपो नक्तं दृश्यन्ते" इति ॥२५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवं पुष्करमध्ये तु यदा याति दिवाकरः ।
त्रिंशद्भागन्तु मेदिन्यास्तदा मौहूर्त्तिकी गतिः ॥२६॥
कुलालचक्रपर्य्यन्तो भ्रमन्नेष दिवाकरः ।
करोत्यहस्तथा रात्रिं विमुञ्चेन्मेदिनीं द्विज ॥२७॥
अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
ततः कुम्भञ्च मीनञ्च राशे राश्यन्तरं द्विज ॥२८॥
त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् ।
प्रयाति सविता कुर्व्वन्नहोरात्रं ततः समम् ।
ततो रात्रिः क्षयं याति वर्द्धतेऽनुदिनं दिनम् ॥२९
ततश्च मिथुनस्यान्त्ये पराकाष्ठामुपागतः ।
राशं कर्कटकं प्राप्य कुरुते दक्षिणायनम् ॥३०॥

कुलालचक्रपर्य्यन्तो यथा शीघ्रं प्रवर्त्तते
दक्षिणे प्रक्रमे सूर्य्यस्तथा शीघ्रं प्रवर्त्तते(च) ॥३१॥
अतिवेगितया कालं वायुवेगबलाच्चलन् ।
तस्मात् प्रकृष्टां भूमिन्तु कालेनाल्पेन गच्छति ॥३२
सूर्य्यो द्वादशभिः शैघ्र्यान् मुहूर्त्तैर्दक्षिणायने ।
त्रयोदशार्द्धमृक्षाणामह्ना तु चरति द्विज !
मुहूर्त्तैस्तावदक्षाणि नक्तमष्टादशैश्चरन् ॥३३॥
कुलालचक्रमध्यस्थो यथा मन्दं प्रसर्पति ।
तथोदगयने सूर्य्यः सर्पते मन्दविक्रमः (छ) ॥३४॥

एवं मेरुं प्रदक्षिणीकुर्वतो रवेर्मुहूर्त्तगम्यं मार्गं कथयन् उत्तरायणविषुवदक्षिणायनगतिभिरहोरात्राणां दैर्घ्यसाम्यलघुत्वानि निरूपयति—'एवमि'त्यादिना । उषा रात्रिरित्यतः प्राक्तनेन ग्रन्थेन । पुष्करद्वीपमध्ये रथचक्राधारभूतमानसोत्तरपरिमण्डलोपलक्षिताया मेदिन्यास्त्रिंशत्तमं भागं रविर्यदा याति, तदा मुहूर्त्तसम्बन्धिनी गतिः । तदाह वायुः—"नव कोट्यः समाख्याता योजनैः परिमण्डलम् । तथा शतसहस्राणि चत्वारिंशच्च पञ्च च । अहोरात्रात् पतङ्गस्य गतिरेषा विधीयते ।" चत्वारिंशच्च पञ्च चेति चकारात् षड्लक्षणानि ज्ञेयानि । अन्यथा परिमण्डलापूर्त्तेः । किञ्च "पूर्णाः शतसहस्राणामेकत्रिंशत् तु ताः स्मृताः । पञ्चाशत् तु तथान्यानि सहस्राण्यधिकानि च । मौहूर्त्तिकी गतिर्ह्येषा सूर्यस्य त्वभिधीयते" । इति । अधिकानि चेति विंशतिसहस्राणीति ज्ञेयम् ॥२६॥

जन्तोः कुलालचक्रसंबद्धत्वात् कुलालचक्रपर्यन्ते स्थितो जन्तुर्यथेत्यर्थः । तद्वत् दक्षिणायनावसाने ज्योतिश्चक्रावसाने भ्रमंस्त्वेकैकमुहूर्त्तेन मेदिन्यास्त्रिंशद्भागं विमुञ्चन् क्रम उत्तरायणमारभ्याहश्च रात्रिञ्च पूर्ववैपरीत्येन करोति ॥२७॥

तदेव प्रत्यहमहर्वृद्ध्या रात्रिह्रासेन च दर्शयन्नाह—'अयनस्ये'ति सार्द्धद्वाभ्याम् ॥२८॥

उत्तरायणमध्य एव मेषराशिं विषुवत्सम्बन्धिनीं गतिं ततो विषुवदनन्तरम् ॥२९॥

दक्षिणायने तु अहो ह्रासं रात्रेश्च वृद्धिं दर्शयितुमाह—'नक्तञ्चे'ति सार्द्धैश्चतुर्भिः । परां काष्ठाम् उत्तरायणस्यान्तम् ॥३०॥

कुलालचक्रपर्यन्ते स्थिते जन्तुर्यथेत्यर्थः ॥३१॥

कालं कालोपलक्षणं मार्गम् ॥३२॥

ऋक्षाणां त्रयोदशार्द्धं सार्धत्रयोदशनक्षत्रोपलक्षितं ज्योतिश्चक्रार्द्धमित्यर्थः । तावदक्षाणि सार्द्धत्रयोदशनक्षत्राणि नक्तं रात्रावष्टादशभिश्चरन् इदञ्च द्वादशाष्टादशमुहूर्तत्वं महोरात्रयोर्देशविशेषापेक्षयोक्तं, न सर्वत्रेति ज्ञेयम् ॥३३॥

उत्तरायणे त्वहोरात्रयोः पूर्ववैपरीत्यं दर्शयति 'कुलालचक्रमध्यस्थ' इति सार्धैस्त्रिभिः । मध्यस्थः नाभिनेम्यन्तरालस्थः ॥३४॥

(च) दक्षिणे प्रक्रमे दक्षिणायने ।

(छ) उदगयने उत्तरायणे । मन्दविक्रमः मन्दगतिः सर्पत इत्यात्मनेपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्माद् दीर्घेण कालेन भूमिमल्पान्तु गच्छति ।
अष्टादशमुहूर्त्तं यदुत्तरायणपश्चिमम् ।
अहर्भवति तच्चापि चरते मन्दविक्रमः ॥३५॥
त्रयोदशार्द्धमह्ना तु ऋक्षाणां चरते रविः ।
मुहूर्त्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ॥३६॥
अथो मन्दतरं नाभ्यां चक्रं भ्रमति वै यथा ।
मृत्पिण्ड इव मध्यस्थो ध्रुवो भ्रमति वै तथा ॥३७॥
कुलालचक्रनाभिस्तु यथा तत्रैव वर्त्तते ।
ध्रुवस्तथा हि मैत्रेय ! तत्रैव परिवर्त्तते ॥३८॥
उभयोः काष्ठयोर्मध्ये भ्रमतो मण्डलानि तु ।
दिवा नक्तञ्च सूर्य्यस्य मन्दा शीघ्रा च वै गतिः ॥३९॥
मन्दाह्नि यस्मिन्नयने शीघ्रा नक्तं तदा गतिः ।
शीघ्रा निशि यदा चास्य तदा मन्दा दिवा गतिः॥४०
एकप्रमाणमेवैष मार्गं याति दिवाकरः ।
अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज ॥४१॥
षड़ेव राशयो भुङ्क्ते रात्रावन्यांश्च षड् दिवा ।
राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने ।
तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता ॥४२॥
दिनादेर्दीर्घह्रस्वत्वं तद्भोगेनैव जायते ।
उत्तरे प्रक्रमे शीघ्रा निशि मन्दा गतिर्दिवा ।
दक्षिणे त्वयने चैव विपरीता विवस्वतः(ज) ॥४३॥
उषा रात्रिः समाख्याता व्युष्टिश्चाप्युच्यते दिनम् ।
प्रोच्यते च तथा सन्ध्या उषा-व्युष्ट्योर्यदन्तरम् ॥४४

उत्तरायणे पश्चिममन्त्यदिनम् ॥३५।३६॥

ध्रुवस्य तु तथा गतिवैषम्यं नास्तीत्याह—'अथो' इति द्वाभ्याम्। कुलालचक्रं नाभ्यां मन्दतरं यथा भ्रमति अतस्तत्रस्थो मृत्पिण्डोऽपि यथा मन्दतरमेव भ्रमति, तथा ज्योतिश्चक्रनाभिस्तत्रस्थो ध्रुवश्च ॥३७॥

यथा च नाभिस्तत्रैव परिवृत्तेर्नाभिस्थो मृत्पिण्डस्तत्स्थानं न त्यजति, तथैव ध्रुवः परिभ्रमन्नपि तत्स्थानं न त्यजतीत्यर्थः ॥३८॥

एवं तावन्नक्षत्रमुहूर्त्तभेदैरहोरात्रवैचित्र्यमुक्तम्। इदानीं तदेव राशिभागवशात् प्रपञ्चयन्नाह—'उभयोरि'ति षड्भिः ॥३९॥

अहोरात्रगम्यमार्गस्य समानत्वेऽपि राशिप्रमाणभेदात् तद्वैचित्र्यं घटत इत्याह—'एकप्रमाणमेव'ति। राशयः राशीनित्यर्थः ॥४१।४२॥

राशिप्रमाणभेदस्याहोरात्रवैचित्र्ये हेतुत्वमाह—'दिनादे'रिति। तद्भोगेनैव ज्योतिश्चक्रद्वादशोऽंशः सपादनक्षत्रद्वयात्मक एकैको राशिः। तत्र च प्रायशो मीन-मेषौ ह्रस्वौ। वृष-कुम्भौ ततः किञ्चिदधिकौ। मकर-मिथुने ततः किञ्चिद्दीर्घे। सिंह-वृश्चिकौ दीर्घतरौ। कर्कट-चापे दीर्घतमे। समे कन्या-तुले। तत्रार्काक्रान्तराशिं समारभ्य षड्राशिक्षेत्रदर्शनकालो दिनम्। इतरराशिषट्कदर्शनकालो रात्रिः। तदात्र राशिप्रमाणाधीनौ दिन—रात्रिवृद्धिह्रासावित्यादि—ज्योतिःशास्त्रप्रक्रियापि पुराणाविरुद्धा चानुसन्धेयेति। 'मन्दाह्नि यस्मिन्नयन' इत्यनेनोक्तं गतिवैचित्र्यं विशेषतो दर्शयति—'उत्तर' इति ॥४३॥

अहोरात्रप्रसङ्गात्तयोः सन्धौ कार्यं सन्ध्योपास्त्यादिकं वक्तुमाह—'उषा रात्रिरि'त्यादिना 'पालनोद्यत' इत्यन्तेन। यत्र श्रुतिप्रयुक्तौ उषाव्युष्टिशब्दौ प्रस्तुतरात्रिदिनपरावित्याह—'उषा' इति। 'रात्रिर्वा उषा अहर्व्युष्टिः'। इति श्रुतेः ॥४४॥

(ज) उत्तरे प्रक्रमे उत्तरायणे। विपरीतेति—निशि गतिर्मन्दा, दिवा च गतिः शीघ्रेति भावः। अत एव तदा रात्रेर्दीर्घत्वं दिनस्य च ह्रस्वत्वमुपपद्यत इति तात्पर्य्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सन्ध्याकाले तु सम्प्राप्ते रौद्रे परमदारुणे ।
मन्देहा राक्षसा घोराः सूर्य्यमिच्छन्ति खादितुम् ॥४५
प्रजापतिकृतः शापस्तेषां मैत्रेय ! रक्षसाम् ।
अक्षयत्वं शरीराणां मरणञ्च दिने दिने ॥४६॥
ततः सूर्य्यस्य तैर्युद्धं भवत्यत्यन्तदारुणम् ।
ततो द्विजोत्तमास्तोयं यत् क्षिपन्ति(९) महामुने ॥४७
ओङ्कारब्रह्मसंयुक्तं गायत्र्या चाभिमन्त्रितम् ।
तेन दह्यन्ति ते पापा वज्रभूतेन वारिणा(ऋ) ॥४८॥
अग्निहोत्रे हूयते या समन्त्रा प्रथमाहुतिः ।
सूर्य्यो ज्योतिःसहस्रांशुस्तया दीप्यति भास्करः(ऌ)।४९
ओङ्कारो भगवान् विष्णुस्त्रिधामा वचसां पतिः ।
तदुच्चारणतस्ते तु विनाशं यान्ति राक्षसाः ॥५०॥
वैष्णवोंऽशः परं सूर्य्यो योऽन्तर्ज्योतिरसंप्लवम् ।
अभिधायक ओङ्कारस्तस्य तत्प्रेरकः परः ॥५१॥
तेन सम्प्रेरितं ज्योतिरोङ्कारेणाथ दीप्तिमत् ।
दहत्यशेषरक्षांसि मन्देहाख्यानि तानि वै ॥५२॥
तस्मान्नोल्लङ्घनं कार्य्यं सन्ध्योपासनकर्म्मणः ।
स हन्ति सूर्य्यं सन्ध्यायां नोपास्तिं कुरुते तु यः(ट)॥५३
ततः प्रयाति भगवान् ब्राह्मणैरभिरक्षितः ।
बालखिल्यादिभिश्चैव जगतः पालनोद्यतः ॥५४॥
काष्ठा निमेषा दश पञ्च चैव ।
त्रिंशच्च काष्ठा गणयेत् कलाञ्च ।
त्रिंशत् कलाश्चैव भवेन्मुहूर्त्त-
स्तैस्त्रिंशता राज्यहनी समेते ॥५५॥

तत्र सन्ध्योपास्तिमकुर्वतः सूर्यहत्यादोषः स्यादिति निन्दार्थवादपूर्वकं सन्ध्योपास्तिप्रकारमाह —'सन्ध्याकाले त्वि'ति चतुर्भिः ॥४५॥

प्रजापतिदत्तो वरोऽपि दुःखफलत्वात् शाप उच्यते । तथा च श्रुतिः,—रक्षांसि ह वा पुरोनुवाके तपोग्रमतिष्ठन्त, तान् प्रजापतिर्वरेणोपामन्त्रयत तानि वरं वृणीतादित्यो नो योद्धा हति तान् प्रजापतिरब्रवीद् योधयध्वम् इत्यादि ॥४६।४७॥

दह्यन्ति दह्यन्ते । द्विजैः प्रक्षिप्तेन वारिणा ॥४८॥

रवेर्वैरिजयमुक्त्वा होमाद्दीप्तिप्रकर्षमाह — 'अग्निहोत्रे' इति । सूर्य्यो ज्योतिरिति प्रातरग्निहोत्रमन्त्रप्रतीकोक्तिः ॥४९

त्रिधामा त्रीणि ऋग्-यजुः-सामरूपाणि धामानि तेजांसि स्वरूपाणि वा यस्य सः, अत एव वचसां वेदानां पतिः । तथा च श्रुतिः,—'सैषा त्रय्येव विद्या तत्पतिर्य एष आदित्यो हिरण्मयः पुरुषः' इति ॥५०॥

ओंकारोच्चारणाद् राक्षसानां नाशे हेतुमाह—'वैष्णवोंऽश' इति द्वाभ्याम् । असंप्लवं निर्विकारम् । तत्प्रेरकस्तस्य ज्योतिषो रक्षोवधे प्रवर्त्तकः । तत्प्रेरकमिति पाठे स ओंकारः प्रेरको यस्यान्तर्ज्योतिषः तत्तत्प्रेरकम् ॥५१॥

तेन हेतुना अघानीति पाठे पापात्मकानीत्यर्थः । रक्षो वधे सहकारित्वात् ॥५२॥५४॥

अथ कालगणनापूर्वकं सन्ध्याकालनिर्णयमाह—'काष्ठा' द्वाभ्याम् ॥५५॥

(क) द्वाभ्यामन्वयसमाप्त्या युग्मकमिदम्, 'द्वाभ्यान्तु युग्मकं प्रोक्त' मित्यनुशासनात् ।

तैः मन्देहाख्यराक्षसैः सहेति शेषः ।

सकलजगदुपकारकस्यापि सूर्य्यस्य विरोधेन वर्त्तनात् तेषां मन्देहत्वमुपपद्यते, मन्दा निन्दनीया ईहा चेष्टा येषामिति व्युत्पत्तेः ।

ते मन्देहा नाम राक्षसाः । कर्मणि वाच्ये प्रयुक्तस्यापि दह्यन्तीत्यस्य परस्मैपदे प्रयोग आर्षः ।

(ऌ) तया अग्निहोत्रे हुतया समन्त्रया प्रथमाहुत्या । दीप्यतीत्यत्र परस्मैपदप्रयोग आर्षः ।

(ट) उपास्तिम् उपासनाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्रासवृद्धी त्वहर्भागैर्दिवसानां यथाक्रमम् ।
सन्ध्या मुहूर्त्तमात्रा वै ह्रासवृद्धौ समा स्मृता ॥५६

लेखात् प्रभृत्यथादित्ये त्रिमुहूर्त्तगते तु वै(१०) ।
प्रातः स्मृतस्ततः कालो भागश्चाह्नः स पञ्चमः ॥५७॥

ततः प्रातस्तनात् कालात् त्रिमुहूर्त्तस्तु सङ्गवः(ठ) ।
मध्याह्नस्त्रिमुहूर्त्तस्तु तस्मात् कालात् तु सङ्गवात् ॥५८

तस्मान्माध्याह्निकात् कालादपराह्ण इति स्मृतः ।
त्रय एव मुहूर्त्तास्तु कालभागः स्मृतो बुधैः ।
अपराह्णे व्यतीते तु कालः सायाह्न एव च ॥५९॥

दशपञ्चमुहूर्त्ताहे(११) मुहूर्त्तास्त्रय एव च ।
दशपञ्चमुहूर्त्तं वै अहर्वैषुवतं स्मृतम् ॥६०॥
वर्द्धतेऽहो ह्रसेच्चैवाप्ययने(१२) दक्षिणोत्तरे(ड) ।
अहस्तु ग्रसते रात्रिं रात्रिर्ग्रसति वासरम् ॥६१॥
शरद्वसन्तयोर्म्मध्ये विषुवन्तु विभाव्यते ।
तुलामेषगते भानौ समरात्रिदिनन्तु तत् ॥६२॥
कर्कटावस्थिते भानौ दक्षिणायनमुच्यते ।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे(ढ) ॥६३॥
त्रिंशन्मुहूर्त्तं कथितमहोरात्रन्तु यन्मया ।
तानि पञ्चदश ब्रह्मन् ! पक्ष इत्यभिधीयते ॥६४॥
मासः पक्षद्वयेनोक्तो द्वौ मासौ चार्कजावृतुः ।
ऋतुत्रयञ्चाप्ययनं द्वे ऽयने वर्षसंज्ञितम्(ण) ॥६५॥

अहर्भागैः प्रातरादिभिः सह दिवसानां ह्रासे वृद्धौ च तद्भागानामपि ह्रासवृद्ध्योरवश्यम्भावित्वात् । सन्ध्या तु मुहूर्त्तमात्रा अर्द्धोदयात् पूर्वं प्रातः, सन्ध्या नाड़ीद्वयप्रमाणा । अर्धास्तमयानन्तरं सायंसन्ध्या नाड़ीद्वयप्रमाणेवेत्यर्थः ॥५६॥

प्रातराद्यहर्भागानां वृद्धिह्रासौ वक्तुं तेषां ध्रुवभूतं वैषुवतं मानं तावदाह—'लेखे'ति सार्द्धैस्त्रिभिः । अर्धोदयोऽत्र लेखा तामारभ्य प्रत्येकं तु मुहूर्त्तत्रयेण प्रातरादिरेकैकः कालः । तथा च स्मृतिः,—मुहूर्त्तत्रितयं प्रातस्तावानेव च सङ्गवः । मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः । सायाह्नस्त्रिमुहूर्त्तश्च सर्वकर्मसु गर्हितः' । इति ॥५७।५८॥

एते च मुहूर्त्ताः पञ्चभागाः दशपञ्चमुहूर्त्ताहे त्रिंशन्नाड़िकेऽहि भवन्ति । अन्यदा तु मुहूर्त्तास्त्रय एव हि क्रमेण-वृद्धिह्रासगोचरा भवन्तीति शेषः ॥६०॥

एतत् प्रपञ्चयति—'दशपञ्चमुहूर्त्तमि'ति सार्धैस्त्रिभिः ॥६१

'शरद्वसन्तयोर्मध्य' इति—आश्विन-कार्त्तिकौ शरत् । तयोर्मध्ये तुलाख्यविषुवं भवति । चैत्र-वैशाखौ वसन्तः तयोर्मध्ये मेषाख्यमित्यर्थः ॥६२।६३॥

अथ सूर्यगतिप्रसङ्गात् तत्कृतं संवत्सरादिपञ्चकं चक्रमाह—'त्रिंशदि'ति सार्धैश्चतुर्भिः । लोकप्रसिद्धैः सावनैर्दिन-पक्ष-मासैरप्रसिद्धा अदूरविप्रकर्षादर्कजा एव दिनादयो-लक्ष्यन्ते, अर्कगत्यैव ऋत्वयनाद्यभिधानात् ॥६४।६५॥

(ठ) प्रातस्तनादिति प्रातर्भवादित्यर्थे प्रातःशब्दादव्ययात्-ट्यनट्प्रत्ययेन सिद्धम् ।

(ड) दक्षिणोत्तरे अयने दक्षिणायने उत्तरायणे चेत्यर्थः । अहर्ह्रसेदिति सन्धिप्रक्रियया वक्तव्ये 'अहो ह्रसेदिति सन्धि-प्रक्रिया आर्षत्वात् सोढ़व्या । दक्षिणायने अहः वर्द्धते उत्तरायणे च ह्रसेदिति यथाक्रममन्वय इति । ग्रसतीति परस्मैपद-प्रयोग आर्षः ।

(ढ) भानौ सूर्य्ये कर्कटावस्थिते कर्कटराशौ वर्त्तमाने सति, तत्कालादारभ्येत्यर्थः, श्रावणमासादारभ्येति यावत् । स्थूल-गणनयेदमुक्तम् । दिवाकरे सूर्य्ये मकरस्थे मकरराशौ स्थिते सति माघे मासीत्यर्थः, तत्कालादारभ्येति यावत् । एतदपि स्थूल-गणनयोक्तम् । वक्ष्यमाण-षट्सप्ततितमश्लोके दक्षिणोत्तरायणयो-स्तथैव तपस्तपस्यावित्यादिना स्पष्टं निर्देशो लभ्यते ।

(ण) अर्कजो अर्कात् सूर्य्याज्जातौ सौरावित्यर्थः । द्वे ऽयने इत्यत्र सन्धिरार्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संवत्सरादयः पञ्च चतुर्मासविकल्पिताः ।
निश्चयः सर्व्वकालस्य युगमित्यभिधीयते ॥६६॥

संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ।
वत्सरः पञ्चमश्चात्र कालोऽयं युगसंज्ञितः ॥६७॥

यः श्वेतस्योत्तरः शैलः शृङ्गवानिति विश्रुतः ।
त्रीणि तस्य तु शृङ्गाणि यैरसौ शृङ्गवान् स्मृतः ॥६८

दक्षिणञ्चोत्तरञ्चैव मध्यं वैषुवतं तथा ।
शरद्वसन्तयोर्म्मध्ये तद्भानुः प्रतिपद्यते ॥६९॥

मेषादौ च तुलादौ च मैत्रेय ! विषुवत् स्थितः ।
तदा तुल्यमहोरात्रं करोति तिमिरापहः ।
दशपञ्चमुहूर्त्तं वै तदेतदुभयं स्मृतम् ॥७०॥

प्रथमे कृत्तिकाभागे यदा भास्वांस्तथा शशी ।
विशाखानां चतुर्थेंऽशे मुने ! तिष्ठत्यसंशयम् ॥७१॥

विशाखानां यदा सूर्य्यश्चरत्यंशं तृतीयकम् ।
तदा चन्द्रं विजानीयात् कृत्तिकाशिरसि स्थितम् ॥७२॥

तदैव विषुवाख्यो वै (१३) कालः पुण्योऽभिधीयते ।
तदा दानानि देयानि देवेभ्यः प्रयतात्मभिः ॥७३॥

ब्राह्मणेभ्यः पितृभ्यश्च मुखमेतत् तु दानजम् ।
दत्तदानस्तु विषुवे कृतकृत्योऽभिजायते (त) ॥७४॥

चतुर्मासविकल्पिता इति। 'दर्शादर्शश्चान्द्रः त्रिंशद्-दिवसस्तु सावनो मासः। सौरोऽर्कराशिः नाक्षत्रश्चेन्दुमण्डलतः।' इत्येवंलक्षणाश्चान्द्रसावनसौरनाक्षत्रैश्चतुर्विधैर्मासैर्विविधतया कल्पिताः पञ्च संवत्सरादयः एकं युगम्। 'सावनञ्चापि सौरञ्च चान्द्रं नाक्षत्रमेव च। चत्वार्येतानि नामानि यैर्युगं प्रविभज्यते।' इति वृद्धगर्गोक्तेः। सर्वकालस्य मलमासादेर्निश्चयः निर्णयहेतुः। तथा हि —'यदा शुक्ले प्रतिपदि एकस्मिन्नक्षत्रे चन्द्रेण सह स्थिते सूर्यसंक्रान्तिर्भवति, तदा चतुर्विधा मासा युगपत् प्रवर्त्तन्ते। तथा च सौरमासे नववर्षे षड् दिनानि वर्द्धन्ते, ह्रसन्ति चन्द्रमासेन षड् दिनानि। एवं चन्द्रार्कयोर्व्यवधानतारतम्यात् पञ्चवर्षात्मके युगे सौराः षष्टिर्मासाः, सावना एकषष्टिः, चान्द्रा द्विषष्टिः, नाक्षत्राः सप्तषष्टिः। तन्मध्ये च मलमासद्वयं भवतीत्येवं सर्वकालनिश्चयो भवति। ततश्च षष्ठे वर्षे तथैव चन्द्रार्कयोर्योगाद्युगमित्यभिधीयत इत्यर्थः॥६६।६७॥

अथ शृङ्गवतः संस्थानकथनपूर्वकं विषुवत्कालं लक्षयति 'यः श्वेते'ति सार्द्धैस्त्रिभिः ॥६८-६९॥

तदेति मेषतुलयोः प्रथमे दिने — उभयं 'अहः रात्रिश्च ॥७०॥

इदानीं मेषाख्यं विषुवाख्यं कालं तत्प्राशस्त्यं चाह। 'प्रथ इति चतुर्भिः। प्रथमे कृत्तिकाभागे मेषान्ते विशाखा चतुर्थे अंशे वृश्चिकोपक्रमे तदा शशी असंशयं हि तिष्ठति॥

यदा चन्द्रार्कयोरपि षड्राशिव्यवधाने विषुवावस्थित महाविषुवं विशाखानां तृतीयमंशन्तु तुलान्तरम्। कृत्तिका शिरसि मेषान्ते चन्द्रं तदा विजानीयात् ॥७२॥

तर्हि तथैव महाविषुवाख्यः पुण्यकालः। अयञ्च कदा चिदेव भवति, न सर्वदा ॥७३॥

तस्मादतिविशिष्टमेतत्तु दानजं मुखं दानार्थजातं वि देवादीनां मुखम्। 'मुखमेतत्तु दैवतमि'ति वायुक्ते अस्मिन् काले दत्तं साक्षाद्देवादीनां मुखे हुतं भवतीत्य ॥७४॥

(त) दत्तं दानं देयं वस्तु येन सः। दत्तं कृतं दानं त्या येन स इति वार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहोरात्राधिमासौ तु(१४) कलाकाष्ठाक्षणास्तथा ।
पौर्णमासी तथा ज्ञेया अमावस्या तथैव च ।
सिनीवाली कुहूश्चैव राका चानुमतिस्तथा ॥७५॥
तपस्तपस्यौ मधुमाधवौ च
शुक्रः शुचिश्चायनमुत्तरं स्यात् ।
नभो नभस्योऽथ इषश्च सोर्ज्जः (१५)
सहः सहस्याविति दक्षिणं स्यात् ॥७६॥
लोकालोकश्च यः शैलः प्रागुक्तो भवतो मया ।
लोकपालास्तु चत्वारस्तत्र तिष्ठन्ति सुव्रताः ॥७७॥
सुधामा शङ्खपाच्चैव कर्द्दमस्यात्मजो द्विज ।
हिरण्यरोमा चैवान्यश्चतुर्थः केतुमानपि ॥७८॥
निर्द्वन्द्वा निरभिमाना निस्तन्द्रा निष्परिग्रहाः ।
लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशम् ॥७९
उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानः स वै पन्था वैश्वानरपथाद्बहिः ॥८०॥
तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः ।
भूतारम्भकृतं ब्रह्म शंसन्त ऋत्विगुद्यताः ॥८१॥

पुण्यकालप्रसङ्गात् यागादिपुण्यकालज्ञापनार्थम् अहोरात्रादिविभागः सम्यक् ज्ञातव्य इत्याह। अहोरात्रेति सार्द्धेन। दृष्टचन्द्रा सिनीवाली, नष्टचन्द्रा कुहूः इत्येतावमावास्याभेदौ। पूर्णचन्द्रा राका कलाहीनचन्द्रानुमतिरिति पौणमासीभेदौ ॥७५॥

ऋतुत्रयं चाप्ययनमित्यनेनोक्तमयनद्वयं विविच्याह। तप इति। माघादिद्विद्विमासैरृतुत्रयम् उत्तरायणम्। श्रावणादिद्विद्विमासैरृतुत्रयम् दक्षिणायनमित्यर्थः। एतच्च स्थूलदृष्ट्यैवोक्तम् ॥७६॥

लोकालोकोत्तरशृङ्गादगस्त्यस्थानात् पितृयानादिकं कथयिष्यन् प्रथमं तावद्बुद्धिस्थान् लोकालोकस्यानुलोकपालानाह लोकालोक इति त्रिभिः। तदुक्तं मात्स्ये,—लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशम्। उत्तरं यदगस्त्यस्य शृङ्गं देवर्षिपूजितम् इति ॥७७।७९॥

तत्र पितृयानमाह,—'उत्तरमि'ति सार्द्धैः पञ्चभिः। तत्र ज्योतिश्चक्रे वीथीक्रमो वायुनोक्तः,— "सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तम। स्थानं जारोद्गवं मध्यं तथैरावतमुत्तरम्। वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः।" तदेवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते। तथाहि। त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम्। आर्षभागे वीथी जारोद्गवी चेति वैषुवतमध्यममार्गे वीथीत्रयम्। अजवीथी मृगवीथी वैश्वानरी चेति। दक्षिणमार्गे वीथीत्रयम्। तदुक्तं तत्रैव—"अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता। रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते। पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता। एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते। तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभीमता। हस्ता चित्रा तथा स्वाती गोवीथीति तु शब्दिता। ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता। एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते। मूलाषाढोत्तराषाढ़ा अजवीथ्यभिशब्दिता। श्रवणा च धनिष्ठा च मार्गो शतभिषक् तथा। वैशानरी भाद्रपदे रेवती चैव कीर्त्तिता। एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते" ॥ इति। याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः। मार्गो मृगवीथी एवं स्थिते आगस्त्यादुत्तरमजवीथ्याश्च दक्षिणम्। अगस्त्यस्य निकटवर्त्तिनो वैश्वानरपथाद् बहिः। वैश्वानरवीथीं वर्जयित्वा मृगवीथीमात्रं पितृयानमित्यर्थः ॥८०॥

भूतारम्भः प्रजोत्पादनं कृतं कृतिः कार्यं यस्य तद्ब्रह्म शंसन्तः प्रवृत्तिकर्मविधायकवेदभागं स्तुवन्तः ऋत्विगुद्यताः युगान्तरे यज्ञविच्छेदे सति ऋत्विग्भावेन यज्ञानुष्ठानायोद्यताः कर्माणि प्रारभन्तेत्यर्थः ॥८१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रारभन्ते तु ये लोकास्तेषां पन्थाः स दक्षिणः ।
चलितं ते पुनर्ब्रह्म स्थापयन्ति युगे युगे ॥८२॥
सन्तत्या तपसा चैव मर्य्यादाभिः श्रुतेन च ।
जायमानास्तु पूर्व्वे च पश्चिमानां गृहेषु वै ॥८३॥
पश्चिमाश्चैव पूर्व्वेषां जायते निधनेष्विह ।
एवमावर्त्तमानास्ते तिष्ठन्ति नियतव्रताः ।
सवितुर्दक्षिणं मार्गं श्रिता ह्याचन्द्रतारकम् ॥८४॥
नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणम् ।
उत्तरः सवितुः पन्था देवयानश्च स स्मृतः ॥८५॥
तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः ।
सन्ततिं ते जुगुप्सन्ति तस्मान्मृत्युर्जितश्च तैः(थ) ॥८६

अष्टाशीतिसहस्राणां मुनीनामूर्ध्वरेतसाम् ।
उदक्पन्थानमर्य्यम्णः स्थिता ह्याभूतसंप्लवम्(१६)॥
तेऽसंप्रयोगाल्लोभस्य मैथुनस्य च वर्जनात् ।
इच्छाद्वेषाप्रवृत्त्या च भूतारम्भविवर्ज्जनात् ॥८८॥
पुनश्चाकामसंयोगाच्छब्दादेर्दोषदर्शनात् ।
इत्येभिः कारणैः शुद्धास्तेऽमृतत्वं हि भेजिरे ॥८९॥
आभूतसंप्लवं स्थानममृतत्वं हि भाव्यते (१७) ।
त्रैलोक्यस्थितिकालोऽयमपुनर्म्मार उच्यते ॥९०॥
ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतो विधिः ।
आभूतसंप्लवं स्थानं (१८) फलमुक्तं तयोर्द्विज ॥९१॥

चलितं विच्छिन्नसम्प्रदायं ब्रह्मवेदं स्थापयन्ति ॥८२॥

सन्तत्या वंशप्रवर्त्तनेन मर्यादाभिः वर्णाश्रमादि—व्यवस्थाभिः, श्रुतेन शास्त्रप्रवर्त्तनेन च पूर्वे पितरः पश्चिमानां पुत्राणां, पश्चिमाः पुत्राश्च पूर्वेषां स्वपुत्रत्वेनोत्पन्नानां पितॄणां निधनेषु गृहेषु केनचिदंशेन स्वाधिकारवशात् जायन्ते। "पिता पुत्रेण पितृमान्यो वियोनौ" इति श्रुतेः। तथा च वायुः। "प्राप्ते त्रेतायुगे चैव पुनः सप्तर्षयस्त्विह। प्रवर्त्तयन्ति तान् वर्णानाश्रमांश्च पृथक् पृथक्। तेषामेवान्वये धीरा उत्पद्यन्ते पुनः पुनः। जायमानः पिता पुत्रे पुत्रः पितरि चैव हि॥ एवमावर्त्तमानास्ते द्वापरेषु पुनः पुनः। कल्पानां भाष्यविद्यानां ज्ञानशास्त्रकृतश्च ये" इति ॥८३॥

सवितुर्दक्षिणं धूमादिमार्गं श्रिताः। श्रुतिश्च अथ ये ग्राम इष्टापूर्त्तेदत्तामत्युपासते॥ ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रिरपक्षीयमाणपक्षम्" इत्यादि ॥८४॥

देवयानमाह — 'नागवीथी'ति षड्भिः। उत्तरमार्गस्योत्तरावीथी नागवीथी तस्या उत्तरं सप्तर्षिभ्यश्च दक्षिणतः देवयानः पन्थाः ॥८५॥

वशिनः जितेन्द्रियाः ॥८६॥

चार्य्यम्णः सवितुरुदक् पन्थानम् उत्तरं मार्गं श्रितानि। आकारश्छान्दसः ॥८७॥

लोभस्यासम्प्रयोगात् तृष्णावियोगात् इच्छाद्वेषाभ्यां प्रवृत्त्या च कर्माकरणेन ॥८८॥

पुनश्चाकामसंयोगात् योगभ्रंशाभावात् अमृतत्वस्य द्वारभूतं चिरकालावस्थायित्वं भेजिरे ॥८९॥

तदाह —'आभूतसम्प्लवमि'ति। ब्रह्माहःपर्यन्तं स्थानं तदेवामृतत्वमुपचारादुच्यते। उपचारबीजमाह 'त्रैलोक्येति। अपुनर्मारः पुनर्मृत्युरहितः। क्रममुक्तिस्थात्वादिति भाव ॥९०॥

भूतसंप्लवान्तस्थानोक्तिप्रसङ्गादन्यदप्याह —'ब्रह्महत्याश्वमेधाभ्याम् उपलक्षितं यत्पापपुण्यञ्च ततकृतः तन्निमित्तः विधिः विधीयतेऽस्मिन्'। फलविधिः फलभोगकालः तमेवाह—'आभूतसंप्लवान्तमिति भूतसंप्लवो रूपो योऽवधिः प्रलयः तत्पर्यन्तं तयो पापपुण्ययोः फलमुक्तमित्यर्थः। यद्वा ब्रह्महत्याश्वमेधाभ्याम् उपलक्षितं यत् पापं पुण्यं वा तत्कृतः पुंसोऽयं फलभोगकाल इत्यर्थः। पाठेऽपि तावानेवार्थः ॥९१॥

(थ) जुगुप्सन्तीत्यत्रात्मनेपदिनो निन्द्यर्थं स्तुपे परस्मैपदमार्षम्। अत्र आत्मने पदप्रयोगेऽपि छन्दोभङ्गादिशङ्काभावात् परस्मैपदप्रयोगे महर्षिः किमाकूतमिति न विद्मः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यावन्मात्रे प्रदेशे तु मैत्रेयावस्थितो ध्रुवः।
क्षयमायाति तावत् तु भूमेराभूतसंप्लवे (१९) ॥९२॥
ऊर्द्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः।
एतद् विष्णुपदं दिव्यं तृतीयं व्योम्नि भास्वरम् ॥९३॥
निर्धूतदोषपङ्कानां यतीनां संयतात्मनाम्।
स्थानं तत् परमं विप्र पुण्यपापपरिक्षये(द) ॥९४॥
अपुण्यपुण्योपरमे क्षीणाशेषार्त्तिहेतवः (२०)।
यत्र गत्वा न शोचन्ति तद् विष्णोः परमं
पदम्(ध) ॥९५
धर्म्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः।
तत्साङ्ख्योत्पन्नयोगेऽङ्गस्तद्विष्णोः परमं
पदम् (२१)॥९६॥
यत्रोतमेतत् प्रोतञ्च यद्भूतं सचराचरम्।
भव्यञ्च विश्वं मैत्रेय तद् विष्णोः परमं पदम् ॥९७॥
दिवीव चक्षुराततं योगिनां तन्मयात्मनाम्।
विवेकज्ञानदृष्टञ्च तद् विष्णोः परमं पदम्(न) ॥९८॥
यस्मिन् प्रतिष्ठितो भास्वान् मेधीभूतः स्वयं ध्रुवः।
ध्रुवे च सर्व्वज्योतींषि ज्योतिःष्वम्भोमुचो द्विज ॥९९॥
मेघेषु सन्तता वृष्टिर्वृष्टेश्चापोऽथ पोषणम् (२२)।
आप्यायनञ्च सर्व्वेषां देवादीनां महामुने ॥१००॥

सप्तर्षिभ्यो दक्षिणतो देवयानन्त्विति उक्तम्। तदूर्ध्वान्तरतो विष्णुपदस्थितिमाह उर्द्ध्वेति यावत् समाप्ति। ऊर्ध्वं तदुपरि तदुत्तरञ्च। सप्तर्षिभ्यः उत्तरस्यां दिश्यूर्ध्वं यत्र ध्रुवस्तिष्ठति तद्ध्रुवस्याश्रयभूतं विष्णुपदाख्यं भूम्यपेक्षयादिव्यं तृतीयं स्थानमित्यर्थः ॥९३॥

तद्धि वैराजस्य हृदयनाड़ीस्थानम् अतस्तदन्तर्यामिनो-

(द) निर्धूतः निःशेषेण क्षालितः दोषः हिंसाद्वेषादिदोषरूपः पङ्कः यैर्येषां वा तेषाम्।

(ध) अपुण्यम् अधर्मं पापमिति यावत् पुण्यं धर्मः तयोरुपरमे निवृत्तौ विध्वंसे सतीत्यर्थः।

क्षीणाशेषार्त्तिहेतव इत्यस्य क्षीणा अशेषार्त्तेर्नानादेहप्राप्तेर्हेतवः येषां ते इत्यर्थमाह स्वामी। तत्र अशेषा आर्त्तिर्यत इति व्युत्पत्त्या अशेषार्त्तिशब्दः नानादेहप्राप्तिरूपमर्थं प्रतिपादयति, किञ्च आर्त्तीनामवच्छेदकीभूतदेहव्यतिरेकेणोत्पत्त्यभावात् तत्सत्त्वनियतसत्ताकत्वाच्च देहप्राप्तेरार्त्तिहेतुत्वमुपपन्नम्। नानादेहप्राप्तेर्हेतवश्च धर्माधर्मादयः।

अन्यच्च एकस्य जीवस्याशेषाणामार्त्तीनामेकदेहावच्छेदेन नोत्पत्तिर्भवति किन्तु नानादेहावच्छेदेनैव, अत एवाशेषार्त्तीनां नानादेहप्राप्तिमूलत्वमिति भावः।

स्थानत्वेन वर्णयति —'निर्धूतदोषे'ति पञ्चभिः ॥९४॥

क्षीणा अशेषार्त्तेर्नानादेहप्राप्तेर्हेतवो येषां ते ॥९५॥

तत् साम्यात् तेन विष्णुना समानैश्वर्येण इन्द्रियादिवशीकारसामर्थ्येनोत्पन्नो यो योगः समाधिः तेनेद्धाः दीप्ताः। ऐश्वर्य्याद् विहितो योगो योगादैश्वर्यमिष्यते। कथञ्चिन्नोपपद्यते इति हरिवंशोक्तेः ॥९६॥

दिवि आततं सर्वप्रकाशं सूर्यरूपं चक्षुरिव महात्मनां विततं सर्वभासकत्वेन प्रततं विवेकज्ञानेन प्रपञ्चवैलक्षण्यज्ञानेन वृद्धञ्च अपरिच्छिन्नतया ज्ञातमित्यर्थः। अनेन च तद्विष्णोरिति मन्त्रार्थः सूचितः ॥९८॥

यत्रोतमेतत् प्रोतं चेत्यनेन विश्वस्य कारणमाश्रयश्चेत्युक्तम्। इदानीं ध्रुवाश्रयत्वेन तद्द्वारा विश्वपोषकत्वमाह। यस्मिन्निति चतुर्भिः। भास्वान् तेजस्वी। अम्भोमुचो मेघाः ॥९९॥

वृष्टेर्हेतोः ओषधिद्वारा सृष्टेः पोषणं वृद्धिः आप्यायनञ्च तृप्तिः ॥१००॥

(न) दिवीवेत्यादिश्लोके 'तद्विष्णो' रिति मन्त्रार्थः सूचित इति स्वामी। अत्र 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्' इत्यस्य मन्त्रस्यार्थ इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततश्चाज्याहुतिद्वारा पोषितास्ते हविर्भुजः ।
वृष्टेः कारणतां यान्ति भूतानां स्थितये पुनः ॥१०१॥

एवमेतत् पदं विष्णोस्तृतीयममलात्मकम् ॥१०२॥

आधारभूतं लोकानां त्रयाणां वृष्टिकारणम् ।
ततः प्रवर्त्तते ब्रह्मन् सर्व्वपापहरा सरित् ।
गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा ॥१०३॥

वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गता ।
विष्णोर्बिभर्त्ति यां भक्त्या शिरसाऽहर्निशं ध्रुवः ॥१०४॥

ततः सप्तर्षयो यस्याः प्राणायामपरायणाः ।
तिष्ठन्ति वीचिमालाभिरुह्यमानजटा जले ॥१०५॥

वार्य्योघैः सन्ततैर्यस्याः प्लावितं शशिमण्डलम्(प) ।
भूयोऽधिकतमां कान्तिं वहत्येतदुपक्षयम् (२३)॥१०६॥

मेरुपृष्ठे पतत्युच्चैर्निष्क्रान्ता शशिमण्डलात् ।
जगतः पवनार्थाय या प्रयाति चतुर्द्दिशम् ॥१०७॥

सीता चालकनन्दा च चक्षुर्भद्रा च संस्थिता ।
एकैव या चतुर्भेदा दिग्भेदगतिलक्षणा ॥१०८॥

भेदश्चालकनन्दाख्यं यस्याः सर्व्वोऽपि दक्षिणम् ।
दधार शिरसा प्रीत्या वर्षाणामधिकं शतम् ॥१०९॥

शम्भोर्जटाकलापाच्च विनिष्क्रान्तास्थिशर्कराः ।
प्लावयित्वा दिवं निन्ये पापाढ्यान् सगरात्मजान् (२४) ॥११०॥

स्नातस्य सलिले यस्याः सद्यः पापं प्रणश्यति ।
अपूर्व्वपुण्यप्राप्तिश्च सद्यो मैत्रेय जायते ॥१११॥

दत्ताः पितृभ्यो यत्रापस्तनयैः श्रद्धयान्वितैः ।
समात्रयं (२५) प्रयच्छन्ति तृप्तिं मैत्रेय दुर्लभाम् ॥११२॥

वृष्टेः कारणतां यान्तीति । एतदुक्तं गीतासु । "देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ" ॥ इति ॥१०१॥

विश्वपावनत्वञ्च विष्णुपदस्य दर्शयन्नाह—'ततः' इत्यादिना । ततः विष्णुपदस्थानाद् गंगाप्रकर्षेण भवति । त्रिविक्रमपदोद्भिन्नब्रह्माण्डसुषिरोद्भवत्वात्ततः प्रागेव जातापि तत आरभ्य देवादिसेव्यत्वेन प्रकटी भवतीत्यर्थः ।

तदेवाह—'देवाङ्गनानामङ्गानां जलकेलिषु क्षालितानि यान्यनुलेपनानि कंकुमादिनि तैः । पिञ्जरा पिपङ्गलवर्णा ॥१०२।१०३॥

विष्णोर्वामपादाम्बुजम् अम्बुजसदृशो यो वामपादः तस्याङ्गुष्ठनखात् स्रोतोरूपेण विनिर्गताम् ॥१०४॥

सप्तर्षयो यस्य जले अघमर्षणं कुर्वन्तस्तिष्ठन्ति उह्यमाना इतस्ततश्चाल्यमाना जटा येषां ते ॥१०५।१०६॥

दिक्षु चतसृषु भेदेन या गतिः सैव चतुर्भेदेन गतिः यस्याः सा ॥१०८।१०९॥

अस्थिशर्करा अस्थिचूर्णानि । पापाढ्यान् अशेषान् हतानपि वर्णत्रयम् ॥११०।१११॥

समात्रयं वर्षत्रयम् ॥११२॥

(प) यस्याः गङ्गायाः । वारीणाम् ओघः अम्भसां रयैः, 'अघो वृन्देऽम्भसां रये' इति नानार्थकोषात् । ओघशब्दस्याप्रस्तुतार्थशङ्काव्यपोहनार्थं वारिशब्दोपन्यासः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्यामिष्टा महायज्ञैर्यज्ञेशं पुरुषोत्तमम् ।
द्विजभूताः (१९) परामृद्धिमवापुर्दिवि चेह च ॥११३॥
स्नानाद्विधूतपापाश्च यज्जले यतयस्तथा ।
केशवासक्तमनसः प्राप्ता निर्वाणमुत्तमम् ॥११४॥
श्रुताऽभिलषिता दृष्टा स्पृष्टा पीताऽवगाहिता ।
या पावयति भूतानि कीर्तिता च दिने दिने ॥११५॥
गङ्गा गङ्गेति यैर्नाम योजनानां शतेष्वपि ।
स्थितैरुच्चरितं हन्ति पापं जन्मत्रयार्जितम् ॥११६॥
यतः सा पावनायालं त्रयाणां जगतामपि ।
समुद्भूता परं तत्तु तृतीयं भगवत्पदम् ॥११७॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे अष्टमोऽध्यायः ।

प्रस्तुतं विष्णुपदं निगमयति –'यत' इति। यतः स्थानात् समुद्भूता प्राकट्यं प्राप्ता, तत् भगवत्पदम् इति ॥ ॥११७॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयेंऽशे अष्टमोऽध्यायः ॥

पाठान्तराणि—

(१५—८)—नक्तमह्नः प्रवेशनात् ।
(३३—१) त्रयोदशार्द्धं नृक्षाणामह्ना— ।
(४७—२)—संक्षिपन्ति— ।
(५७—३) रेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तगते रवौ ।
(६०—४) दशपञ्चमुहूर्त्ता वै— ।
(६१—५) वर्द्धते ह्रसते चैवाप्ययने— ।
(७२—६) तदैव विषुवाख्योऽयं— ।
(७५—७) अहोरात्रार्द्धमासास्तु— ।
(७६—८) नभोनभस्यौ च इषस्तथोर्ज्जे— ।
(८७—९)—स्थितान्याभूतसम्प्लवम् ।
(९०—१०) —विभाव्यते ।
(९१—११) आभूतसम्प्लवान्तन्तु— ।
(९२—१२)—भूमेराभूतसम्प्लवात् ।
(९५—१३)—क्षीणाशेषाघहेतवः ।
(९६—१४) तत्साष्टर्थोत्पन्नयोगेद्धास्तद्विष्णोः— ।
(१०९—१५) मेघेषु सङ्गता वृष्टिर्वृष्टेः सृष्टेश्च पोषणम् ।
(१०६—१६) भूयोऽधिकतरां कान्तिं वहत्येतदुह क्षये ।
(११०—१७) —या पापान्सगरात्मजान् ।
(११२—१८) समाशतं— ।
(११३—१९) द्विज भूपाः— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नवमोऽध्यायः

(आधारभूतं लोकानां त्रयाणां वृष्टिकारणम्)

पराशर उवाच ।

तारामयं भगवतः शिशुमाराकृति प्रभोः ।
दिवि रूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः ॥१॥

सैष भ्रमन् भ्रामयति चन्द्रादित्यादिकान् ग्रहान् ।
भ्रमन्तमनु तं यान्ति नक्षत्राणि च चक्रवत् ॥२॥

सूर्याचन्द्रमसौ(क) तारा नक्षत्राणि ग्रहैः सह ।
वातानीकमयैर्बन्धैर्ध्रुवे बद्धानि तानि वै ॥३॥

शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि ।
नारायणः परं(१) धाम्नां तस्याधारः स्वयं हृदि ॥४॥

उत्तानपादपुत्रस्तु तमाराध्य प्रजापतिम् ।
स ताराशिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः ॥५॥

आधारः शिशुमारश्च सर्वाध्यक्षो जनार्दनः ।
ध्रुवस्य शिशुमारश्च ध्रुवे भानुर्व्यवस्थितः ॥६॥

नवमः अध्यायः

विष्णुपदं ध्रुवादीनां सर्वेषामाश्रयो विष्ण्वादिकारणश्चेत्युक्तम्—"यस्मिन् प्रतिष्ठितो भास्वान् मेधीभूतः स्वयं ध्रुव" इत्यादिना । तदेव केन प्रकारेणेत्यपेक्षायां तत्प्रकारविशेषनिरूपणार्थमध्यायारम्भः । 'तारामयमि'ति । नक्षत्रपुञ्जात्मकं शिशुमाराकृति, शिशुमारः सरट-गोधाद्याकारो जलचरसत्त्वविशेषः । तस्याकृतिरिवाकृतिर्यस्य तद्भगवतो रूपं तस्य प्रदक्षिणावर्तकुण्डलीभूतदेहस्योत्तम्भित-पुच्छस्य पुच्छाग्रे ध्रुवः स्थित इत्यर्थः ॥१॥

'सैष' इति । सोऽचि लोपे चेत्पादपूरणमिति सुलोपः । स एष ध्रुवः शिशुमारवशेन भ्रमन् ग्रहान् भ्रामयति । नक्षत्राणि च तं भ्रमन्तं ध्रुवमनुयान्ति ॥२॥

तत्र हेतुमाह—'सूर्याचन्द्रमसा'विति । नक्षत्राण्यश्विन्यादीनि इतरास्ताराः बुधादिभिः ग्रहैः सह वातसमूहमयैर्बन्धैः बध्यन्ते एभिरिति बन्धाः पाशास्तैर्ध्रुवे बद्धानि वै यतस्तमनुयान्तीत्यर्थः । वाताश्च कूर्मोक्ताः-"आवहः प्रवहश्चैव तथैवानुवहः परः । संवहो विवहश्चैव तदूर्ध्वं स्यात् परावहः । तथा परिवहश्चोर्द्ध्वं वायवः सप्त नेमयः" ॥ इति । स्थानानि च तेषामुक्तानि—"मध्ये भू-मेघयोर्वायुरावहः प्रवहस्ततः । मेघ-भास्करयोः सूर्य-शशिनोरुद्वहः स्थितः । चन्द्र-नक्षत्रगणयोः संवहो विवहस्ततः । नक्षत्रगृहमध्यस्थो ग्रह-सप्तर्षिमध्यगः । परावहः परिवहः सप्तर्षि-ध्रुवमध्यगः । इत्येते वायवः सप्त वहन्ति भुवनत्रयम्" ॥ इति ॥३॥

शिशुमारस्याश्रयं दर्शयन्नाह—'शिशुमारे'ति । ज्योतिषां नक्षत्राणां धाम्नां च सूर्यादिस्थानानामयनं दिवि शिशुमाराकृति यद्रूपं प्रोक्तं तस्य हृदि स्थितः स्वयं नारायण एव तारारूपस्तस्याधार इत्यन्वयः । पाठान्तरे धाम यद्रूपं प्रोक्तं यन्नारायणाश्रयम् । कथमित्यत आह—हृदि स्थितः स्वयं नारायणस्तस्याधार इति ॥४॥

स उत्तानपादपुत्रो ध्रुवस्तं प्रजापतिं नारायणमाराध्य तारामयस्य शिशुमारस्य पुच्छे व्यवस्थितः ॥५॥

तदेतत् स्पष्टयति—"आधार" इति ॥६॥

(क) सूर्याचन्द्रमसाविति देवताद्वन्द्वे दीर्घः, यथा अग्नीषोमावित्यादौ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदाधारं जगच्चेदं सदेवासुरमानुषम् ।
येन विप्र ! विधानेन तन्ममैकमनाः शृणु ॥७॥

विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः ।
वर्षत्यम्बु ततश्चान्नमन्नादप्यखिलं जगत् ॥८॥

विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम् ।
सोमं पुष्यत्यथेन्द्रश्च वायुनाड़ीमयैर्दिवि ॥९॥

नालैर्विक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु(ग) ।
न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः ॥१०॥

अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः ।
संस्कारं कालजनितं मैत्रेयासाद्य निर्मलाः (घ) ॥११॥

सरित्समुद्रभौमास्तु तथापः प्राणिसम्भवाः ।
चतुःप्रकारा भगवानादत्ते सविता मुने (ङ) ॥१२॥

आकाशगङ्गासलिलं तदादाय गभस्तिमान् ।
अनभ्रगतमेवोर्व्यां सद्यः क्षिपति रश्मिभिः ॥१३॥

तस्य संस्पर्शनिर्धूतपापपङ्को द्विजोत्तम !
न याति नरकं मर्त्यो दिव्यस्नानं हि तत् स्मृतम्(च) ॥१४

दृष्टसूर्यं हि यद्वारि पतत्यभ्रैर्विना दिवः ।
आकाशगङ्गासलिलं तद् गोभिः क्षिप्यते रवेः(छ) ॥१५॥

कृत्तिकादिषु ऋक्षेषु विषमेष्वम्बु यद्दिवः ।
दृष्टार्कं पतति ज्ञेयं तद् गाङ्गं दिग्गजोज्झितम् ॥१६

युग्मर्क्षेषु च यत्तोयं पतत्यर्कोज्झितं दिवः ।
तत् सूर्यरश्मिभिः सद्यः समादाय निरस्यते ॥१७॥

'तदाधारं' भान्वाश्रयं,(ख) तदेवाह—येनेति सार्धेन ॥७॥

सूर्यादन्ननिष्पादकवृष्टिप्रकारमाह — 'विवस्वानष्टभि'रिति चतुर्भिः ॥८,९॥

धूमाग्न्यनिलमयानामपि मेघानां जलाधारत्वमभ्रसमाख्ययोपपादयति—'न भ्रश्यन्ती'ति ॥१०॥

संस्कारं माधुर्यरूपमतिशयम् ॥११॥

अभ्रगर्भावस्थानात् पूर्वं त्वापो नानारसा इत्याह ।—'सरित्-समुद्रभौमास्त्विति'—सरित्समुद्रगता भूमिगताश्चेत्यर्थः । प्राणिसम्भवा देहस्थाः ॥१२॥

प्रसङ्गाद् वृष्टिविशेषाद् दिव्यं स्नानमाह—'आकाशगङ्गे'ति षड्भिः ॥१३॥

कृत्तिकामृगशीर्षादिविषमनक्षत्रेषु स्थितेऽर्के दृष्टार्कम् अनभ्रं यदम्बु पतति ॥१६॥

(ख) तदाधारमित्यादिश्लोके तदाधारं भान्वाश्रयमिति स्वामी । अत्र स भानुरेव आधारः यस्य भानुरेव आश्रयो यस्येति बहुव्रीहिभ्यां सूर्याश्रितमित्यर्थः ।

(ग) धूमश्च अग्निश्च अनिलश्च मूर्त्तिर्येषां तेषु । एतेनाभ्राणां धूमज्योतिर्वायुमयत्वं 'न भ्रश्यन्ति यतस्तेभ्यो जलानी'त्यनेन सलिलमयत्वमपि प्राप्तम् । तदुक्तं मेघदूते खण्डकाव्ये कालिदासेन—'धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः' इति ।

(घ) समुदीरिताः सम्प्रेरिताः ।

(ङ) सरित्समुद्रभूमीनामिमा इत्यर्थे सरित्समुद्रभूमिशब्दात् ष्णप्रत्यये उत्तरपदमात्रवृद्धया सरित्समुद्रभौमेति सिध्यति । ततः ष्णप्रत्ययान्तत्वात् स्त्रियामीपि कर्तव्ये आप् प्रत्यय आर्षः ।

(च) तस्य आकाशगङ्गासलिलस्य मन्दाकिनीजलस्येति यावत् । संस्पर्शेन निर्धूतः निःशेषं दूरीकृतः पापमेव पङ्कः कलुषरूपः पङ्को यस्य सः ।

(छ) 'आतिष्ठद्गु' इत्यादिवत् दृष्टः दर्शनविषयः सूर्यो यदा इत्यर्थे अव्ययीभावसमासात् सूर्य्यदर्शनसमकालं पततीत्यर्थः । गोभिः किरणैः । आकाशगङ्गासलिलं मन्दाकिनीजलम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उभयं पुण्यमत्यर्थं नृणां पापापहं द्विज(२) !
आकाशगङ्गासलिलं दिव्यस्नानं महामुने ॥१८॥
यत्तु मेघैः समुत्सृष्टं वारि तत् प्राणिनां द्विज !
पुष्णात्योषधयः सर्वा जीवनायामृतं हि तत् (ज)॥१९॥
तेन वृद्धिं परां नीतः सलिलेनौषधीगणः(३) ।
साधकः फलपाकान्तः प्रजानां द्विज ! जायते ॥२०॥
तेन यज्ञान् यथाप्रोक्तान् मानवाः शास्त्रचक्षुषः(झ) ।
कुर्वन्त्यहरहस्तैश्च देवानाप्याययन्ति ते ॥२१॥
एवं यज्ञाश्च वेदाश्च वर्णाश्च द्विजपूर्वकाः(४) ।
सर्वे देवनिकायाश्च पशुभूतगणाश्च ये ॥२२॥
वृष्ट्या धृतमिदं सर्वमन्नं निष्पाद्यते यथा ।
सापि निष्पाद्यते वृष्टिः सवित्रा मुनिसत्तम ॥२३॥
आधारभूतः सवितुर्ध्रुवो मुनिवरोत्तम !
ध्रुवस्य शिशुमारोऽसौ सोऽपि नारायणाश्रयः ॥२४॥
हृदि नारायणस्तस्य शिशुमारस्य संस्थितः ।
बिभर्त्ता सर्वभूतानामादिभूतः सनातनः ॥२५॥

इति श्रीविष्णुपुराणे द्वितीयेऽंशे नवमोऽध्यायः ।

एवं 'युग्मर्क्षेषु' रोहिण्यार्द्रादिसमनक्षत्रेषु स्थितोऽर्क इति ज्ञेयम्। सूर्याक्रान्तनक्षत्रैरेव वृष्ट्यादिव्यहारदर्शनात् । ॥१७,१८॥

प्रासङ्गिकं समाप्य पूर्वोक्तां वृष्टिमनुवर्तयति । 'यत्त्विति'त्रिभिः ॥१९॥

साधकः दृष्टादृष्टहेतुः प्रजानां जायते ॥२०,२१॥

अध्यायार्थमुपसंहरति—'एव'मिति चतुर्भिः ॥२२,२३॥

तस्य शिशुमारस्य हृदि स्थितो नारायणस्तद्द्वारा सर्वभूतानां बिभर्त्ता विधारकः । बिभर्त्तीति पाठे सर्व्वभूतानामिति कर्मणि षष्ठी ॥२५॥

(ज) प्राणिनां जीवनाय सञ्जीवनायेति सम्बन्धः । हि यतः तत् वारि अमृतम् अमृतकल्पं सञ्जीवनसाधकम् । अथवा जीवनायेत्यस्य काकाक्षिगोलकन्यायेनोभयत्रान्वयः । तथाहि—तत् वारि प्राणिनां जीवनाय सर्वा ओषधयः ओषधीः पुष्णाति पुष्टिं लम्भयति वृद्धिं नयतीति यावत् । हि यतः तत् जीवनाय सञ्जीवनसाधकम् अमृतं पीयूषकल्पम् । ओषधीरिति कर्मणि द्वितीयान्तप्रयोगे कर्तव्ये ओषधय इति प्रथमान्तप्रयोग आर्षः ।

(झ) शास्त्रं यज्ञविधायकवेदादिशास्त्रं तदेव चक्षुः ज्ञानसाधनतासाधर्म्यात् नयनेन्द्रियं येषां ते शास्त्रचक्षुषः शास्त्रेण यज्ञसमूहस्येष्टसाधनताज्ञानवन्तः पण्डिता इत्यर्थः । यज्ञानामिष्टसाधनतायाः शास्त्रमात्रगम्यत्वात् शास्त्रचक्षुष एव प्रत्यहं यज्ञेषु प्रवर्त्तन्त इत्युक्तिः सुसङ्गच्छते प्रवृत्तेरिष्टसाधनताज्ञान-साध्यत्वात् अपूर्वद्वारकस्वर्गादिरूपेष्टसाधनताबोधस्य च शास्त्रापेक्षित्वादिति भावः ।

इति श्रीधरस्वामिकृतायामात्यप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयेंऽशे नवमोऽध्यायः समाप्तः ॥

पाठान्तराणि—

(४—१) नारायणोऽयनं— ।
(१८—२)—पापभयापहम् ।
(२०—३)—सकलश्चौषधीगणः ।
(२२—४)—वृष्टिपूर्वकाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दशमोऽध्यायः ।

[सूर्यरथाधिष्ठातॄणां देवादीनां विवरणम् ।]

पराशर उवाच ।

साशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः ।
आरोहणावरोहाभ्यां भानोरब्देन या गतिः ॥१॥

स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणी-सर्प-राक्षसैः ॥२॥

धाता क्रतुस्थला चैव पुलस्त्यो वासुकिस्तथा ।
रथकृद्ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः ॥३॥

एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय स्यन्दने भानोः सप्त मासाधिकारिणः ॥४॥

अर्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिसंज्ञे निबोध मे(क) ॥५॥

मित्रोऽत्रिस्तक्षको रक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चैव मैत्रेयैते वसन्ति वै ॥६॥

वरुणो वशिष्ठो रम्भा जहजन्या हूहूर्बुधः (१) ।
रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञके ॥७॥

दशमः अध्यायः ।

अथ प्रतिमासं सूर्यरथपरिभ्रमणाधिकारिगणान् वक्ष्यन्नुत्तरायणदक्षिणायनयोरनुलोमप्रतिलोमगन्तव्यानि क्रान्तिवृत्तान्याह—'साशीती'ति । उत्तरदक्षिणकाष्ठयोर्मध्ये अशीत्युत्तरं मण्डलशतं भानोर्गतिर्गन्तव्यं वर्त्म आरोहणावरोहाभ्यामिति युगाक्षकटिवन्धौ वायुपाशौ ध्रुवो यदाकर्षति तदोत्तरायणे प्रत्यहमभ्यन्तरैकैकमण्डलप्रवेशे रथस्यारोहणं भवति, यदा तु तौ पाशौ ध्रुवः प्रसारयति दक्षिणायने तेष्वेव मण्डलेषु प्रतिलोमं बहिरेकैकमण्डलं प्रविशतो रथस्यावरोहणं भवति । तदुक्तं मात्स्ये—"आकृष्यते यदा तौ तु ध्रुवेण समधिष्ठितौ । तदा सोऽभ्यन्तरं सूर्यो भ्रमते मण्डलानि तु । ध्रुवेण मुच्यमाने तु पुना रश्मियुगेन तु । तथैव वाक्षतः सूर्यो भ्रमते मण्डलानि च" इति ॥१॥

देवैरादित्यैरादित्या एव देवास्तैः, ग्रामणीर्यक्षः ॥२॥ तानेवादित्यादीन् प्रतिमासं सप्त सप्तानुक्रामति 'धाते'त्यादिना 'विष्णुशक्त्युपबृंहिता' इत्यन्तेन । धाता सूर्यः रथकृत्संज्ञो ग्रामणीः यक्षः । हेती राक्षसः ॥३॥

चैत्र एव मधुमासस्तस्मिन् ॥४॥

रथौजा यक्षः, प्रहेतिः राक्षसः । कच्छनीरः सर्पः, माधवे वैशाखे । शुचिसंज्ञे इति ज्यैष्ठो विवक्षितः ॥५॥

पौरुषेयो राक्षसः, रथस्वनो यक्षः ॥६॥

वरुणः सूर्यः रम्भा च सहजन्येति पाठे फाल्गुने वक्ष्यमाण-रम्भाव्यावृत्त्यर्थं संज्ञान्तरेण तस्य विशेषणम् । रथचित्र इति यक्षसर्पयोरेकं नाम । नागश्च सहजन्येति पाठे नागसंज्ञकः सर्पः । आषाढ़संज्ञक इति चाख्यानादाषाढ़ एव शुक्रः पूर्वोक्तशुचिसंज्ञो ज्यैष्ठ इति ज्ञेयम् ॥७॥

(क) वैशाखमासानन्तरं प्रकृते ज्यैष्ठमासस्य वक्तव्यत्वापातेन 'शुचिस्त्वयमाषाढ़े' इति कोषात् 'शुचिसंज्ञ' इत्यस्याषाढ़वाचिनोऽपि शुचिशब्दस्य ज्यैष्ठपरत्वविवक्षया सिद्धम्, आषाढस्य सप्तम-श्लोके 'आषाढ़संज्ञक' इत्यनेन स्पष्टमुल्लेखात् । अत एवात्र 'शुचिसंज्ञ' इति ज्यैष्ठो विवक्षितः' इति स्वामिना व्याख्यातम्, 'आषाढ़संज्ञक' इति चाख्यानादाषाढ़ एव शुक्रः पूर्वोक्तशुचिसंज्ञो ज्यैष्ठ इति च ज्ञेयमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इन्द्रो विश्वावसुः स्रोत एलापत्रस्तथाङ्गिराः ।
प्रम्लोचा च नभस्येते सर्पश्चार्के वसन्ति वै ॥८॥

विवस्वानुग्रसेनश्च भृगुश्चापूरणस्तथा ।
अनुम्लोचा शङ्खपालो व्याघ्रो भाद्रपदे तथा ॥९॥

पूषा च सुरुचिर्धाता(२) गौतमोऽथ धनञ्जयः ।
सुषेणोऽन्यो घृताची च वसन्त्याश्वयुजे रवौ(ख) ॥१०॥

विभावसुभरद्वाजौ पर्जन्यैरावतौ तथा ।
विश्वाची-सेनजित्संज्ञौ कार्त्तिके चाधिकारिणः(३)११

अंशुकाश्यपतार्क्ष्यास्तु महापद्मस्तथोर्वशी ।
चित्रसेनस्तथा विद्युन्मार्गशीर्षाधिकारिणः ॥१२॥

क्रतुर्भगस्तथोर्णायुः स्फूर्जः कर्कोटकस्तथा ।
अरिष्टनेमिश्चैवान्या पूर्वचित्तिर्वराप्सराः ॥१३॥

पौषमासे वसन्त्येते सप्त भास्करमण्डले ।
लोकप्रकाशनार्थाय विप्रवर्याधिकारिणः ॥१४॥

त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजिद् धृतराष्ट्रोऽथ सप्तमः ॥१५॥

माघमासे वसन्त्येते सप्त मैत्रय ! भास्करे ।
श्रुयन्ताञ्चापरे सूर्ये फाल्गुने निवसन्ति ये ॥१६॥

विष्णुरश्वतरो रम्भा सूर्यवर्चाथ सत्यजित् ।
विश्वामित्रस्तथा रक्षो यज्ञापेतो महामुने ॥१७॥

मासेष्वेतेषु मैत्रेय ! वसन्त्येते तु सप्तकाः ।
सवितुर्मण्डले ब्रह्मन् ! विष्णुशक्त्युपबृंहिताः ॥१८॥

स्तुवन्ति मुनयः सूर्य्यं गन्धर्वैर्गीयते पुरः ।
नृत्यन्त्योऽप्सरसो यान्ति सूर्यस्यानु निशाचराः ॥१९॥

इन्द्रः सूर्यः, एलापत्रो नागः, नभसि श्रावणे, सर्पो राक्षसः, अर्के सूर्यरथे ॥८॥

उग्रसेनो गन्धर्वः, आपूरणो यक्षः, व्याघ्रो राक्षसः ॥९॥

सुरुचिर्गन्धर्वः, वातो राक्षसः, धनञ्जयः सर्पः, सुषेणो यक्षः ॥१०॥

विश्वावसुसंज्ञ एवापरो गन्धर्वः, पर्जन्यः सूर्यः, ऐरावतः सर्पः, सेनजित्संज्ञौ। सेनजिच्चाप इति पाठे चापो राक्षसः ॥११॥

अंशुः सूर्यः, तार्क्ष्यो यक्षः, महापद्मः सर्पः, चित्रसेनो गन्धर्वः, विद्युद्रारक्षः ॥१२॥

क्रतुर्ऋषिः, भगः सूर्यः, ऊर्णायुर्गन्धर्वः, स्फूर्जो राक्षसः, कर्कोटकः सर्पः, अरिष्टनेमिर्यक्षः ॥१३।१४॥

त्वष्टा सूर्यः, कम्बलः सर्पः, ब्रह्मापेतो राक्षसः, ऋतजिद् यक्षः, धृतराष्ट्रो गन्धर्वः ॥१५॥

विष्णुः सूर्यः, अश्वतरः सर्पः, सूर्यवर्चा गन्धर्वः, सत्यजिद् यक्षः, यज्ञापेतो राक्षसः ॥१६,१७॥

तेषां व्यापारविशेषानाह—'स्तुवन्ती'ति सार्धेन ॥१८॥

(ख) आश्वयुजे अश्वयुज्शब्दात् ष्णप्रत्ययेनाश्वयुक्-सम्बन्धिनि आश्विनीये इति यावत् रविविशेषणमिदम् अथवा आश्वयुजे आश्विने मासि, स्यादाश्विन इषोऽप्याश्वयुजोऽपीति कोषात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वहन्ति पन्नगा यक्षौः क्रियतेऽभीषुसंग्रहः ।
बालखिल्यास्तथैवैनं परिवार्य्य समासते ॥२०॥

सोऽयं सप्तगणः सूर्यमण्डले मुनिसत्तम !
हिमोष्ण-वारिवृष्टीनां हेतुत्वे समयं गतः ॥२१॥

इति श्रीविष्णुपुराणे द्वितीयेंऽशे दशमोऽध्यायः ।

वहन्ति वहनानुकूलतया रथं सन्नह्यन्तीत्यर्थः, 'सन्नह्यन्ति रथं नागाः' इति शुकोक्तेः । अभीषुसंग्रहः रश्मिसंयोजनम् । नित्यसेवकानाह—'बालखिल्या' इति ॥२०॥

सप्तानां साधारणं कर्माह—'सोऽयमि'ति । स्वयमागत इति पाठे स्वस्वकाले हेमन्त-ग्रीष्मादावागतः सन् हिमादि-वृष्टीनां हेतुरित्यर्थः ॥२०॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वाश्रीविष्णुपुराणटीकायां द्वितीयेंऽशे दशमोऽध्यायः ॥

पाठान्तराणि—

(७—१)—नागश्च सहजन्या हूहूरथः ।
(१०—२) पूषा वसुरुचिर्वातो— ।
(११—३)—कार्त्तिके च वसन्ति वै ।

एकादशोऽध्यायः

(सूर्यरथस्थायास्त्रयीमय्या विष्णुशक्तेर्विवरणम्)

मैत्रेय उवाच ।

यदेतद्भगवानाह गणः सप्तविधो रवेः ।
मण्डले हिम-तापादेः कारणं तन्मया श्रुतम् ॥१॥

व्यापाराश्चापि कथिता गन्धर्वोरगरक्षसाम् ।
ऋषीणां बालखिल्यानां तथैवाप्सरसां गुरो ! ॥२॥

यक्षाणाञ्च रथे भानोर्विष्णुशक्तिधृतात्मनाम् ।
किन्त्वादित्यस्य यत् कर्म्म तन्नात्रोक्तं त्वया मुने ॥३॥

यदि सप्तगणो वारि हिममुष्णं च वर्षते ।
तत् किमत्र रवेर्येन वृष्टिः सूर्यादितीर्यते (क) ॥४॥

एकादशः अध्यायः ।

उक्तानुवादपूर्व्वकं रवेर्विशेषं पृच्छति—'यदेतदि'ति पञ्चभिः । ॥१।३॥

नन्वादित्यस्यापि वृष्टिकर्म्मोक्तमेव विवस्वानष्टभिर्मासै-रित्यादिना अत आह—'यदी'ति । सोऽयं सप्तगणो हिमोष्ण-वारिवृष्टीनां हेतुरिति साधारण्यस्योक्तत्वादित्यर्थः ॥४॥

(क) सूर्याद् वृष्टिः भवतीति शेषः । ईर्य्यते कथ्यते, 'विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः । वर्षत्यम्बु' इत्यनेन 'सापि निष्पाद्यते वृष्टिः सक्त्या मुनिसत्तम' इत्यनेन च नवमाध्याये इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विवस्वानुदितो मध्ये यात्यस्तमिति किं जनाः ।
ब्रवीत्येतत् समं कर्म यदि सप्तगणस्य तत् ॥५॥

पराशर उवाच ।

मैत्रेय ! श्रूयतामेतद् यद्ब्रुवान् परिपृच्छति ।
यथा सप्तगणेऽप्येकः प्राधान्येनाधिको रविः ॥६॥
सर्वा शक्तिः परा विष्णोर्ऋग्यजुःसामसंज्ञिता ।
सैषा त्रयी तपत्यंहो जगतश्च हिनस्ति या ॥७॥
सैव विष्णुः स्थितः स्थित्यां जगतः पालनोद्यतः ।
ऋग्यजुःसामभूतोऽन्तः सवितुर्द्विज ! तिष्ठति ॥८॥
मासि मासि रविर्यो यस्तत्र तत्र हि सा परा ।
त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै ॥९॥
ऋचस्तपन्ति पूर्वाह्णे मध्याह्नेऽथ यजूंषि वै ।
बृहद्रथन्तरादीनि सामान्यस्तं क्षये रवौ ॥१०॥
अङ्गमेषा त्रयी विष्णोर्ऋग्यजुःसामसंज्ञिता ।
विष्णुशक्तिरवस्थानं सदादित्ये करोति सा ॥११॥
न केवलं रवौ शक्तिर्वैष्णवी सा त्रयीमयी ।
ब्रह्माथ पुरुषो रुद्रस्त्रयमेतत् त्रयीमयम् ॥१२॥
सर्गादौ ऋङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः ।
रुद्रः साममयोऽन्ताय तस्मात् तस्याशुचिर्ध्वनिः ॥१३॥
एवं सा सात्त्विकी शक्तिर्वैष्णवी या त्रयीमयी ।
आत्मसप्तगणस्थं तं भास्वन्तमधितिष्ठति ॥१४॥
तया चाधिष्ठितः सोऽपि जाज्वलीति स्वरश्मिभिः ।
तमः समस्तजगतां नाशं नयति चाखिलम् ॥१५॥

ननु साधारणत्वात् रवेरपि तत् कर्म भवत्येव । तत्राह—'विवस्वानि'ति ॥५॥

विष्णुशक्त्यधिष्ठानातिशयाद्रविप्राधान्येन सर्वोऽप्ययं व्यवहारो युक्त इति परिहारमाह—'मैत्रेये'त्यादिना ॥६

यद् यस्माद् या परा सर्वार्थप्रकाशिका विष्णोस्त्रयीरूपा शक्तिः सैवैषा रविरूपेण तपति अंहश्च पापमुपासिता सती हिनस्ति, अतः प्राधान्येनाधिको रविः, "सैषा त्रय्येव विद्या तपति"इति श्रुतेः । सर्वा शक्तिरिति पाठे सर्वा शक्तिः समग्रा शक्तिरित्यर्थः ॥७॥

अत एव तस्य विष्णुना अभेदमेवाभिप्रेत्याह—'सैवे'ति । जगतः स्थित्यां स्थितः सन् पालनायोद्यतो विष्णुर्नाम सा शक्तिरेवेत्यन्वयः ॥८,९॥

'ऋचस्तपन्ति' इत्यत्र श्रुतिः—'ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्येऽह्नः । सामवेदेनास्तमये महीयते' इत्यादिः ॥१०॥

अङ्गं मूर्त्तिः ॥११॥

न केवलं रवेरेव सा शक्तिरधिष्ठात्री किन्तु ब्रह्मादीनामपीत्याह—'नै'ति । पुरुषो विष्णुस्त्रयीमयं त्रयीप्रधानं तदधिष्ठितमित्यर्थः ॥१२॥

यस्तस्मात् सामशक्त्या रुद्रोऽन्तं करोति, तस्मान्नाशकरत्वात् तस्य साम्नो ध्वनिरशुचिः अशुचिदेशकालादिवद् वेदान्तरस्यानध्यायत्वापादक इत्यर्थः, "न सामध्वनावृग्यजुषी" इति गौतमस्मृतेः ॥१३॥

आत्मसप्तगणस्थं स्वाधिष्ठेये सप्तगणे स्थितं भास्वन्तं सूर्यमतिशयेनाधितिष्ठति ॥१४॥

जाज्वलीति अतिशयेन प्रकाशते ॥१५॥

(ख) सवितुः सूर्यमण्डलस्य अन्तः मध्ये विष्णुः तिष्ठति । अत एव 'ध्येयः दास सवितृमण्डलमध्यवर्त्ती'ति नारायणध्यानांशः सङ्गच्छते ।

(ग) तम इति—तामसी विष्णुशक्तिरित्यर्थः । समस्तजगतां निखिल-चराचरभुवनानाम् अखिलं निःशेषं नाशं प्रलयं नयति करोति । अथवा नयतेः प्रापणार्थकस्य द्विकर्मकस्यापि कर्मणि समस्तजगद्वाचकपदे षष्ठीप्रयोग आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तुवन्ति तं वै मुनयो गन्धर्व्वैर्गीयते पुरः ।
नत्यन्त्योऽप्सरसो यान्ति तस्य चानु निशाचराः ॥१६
वहन्ति पन्नगा यक्षैः क्रियतेऽभीषुसंग्रहः ।
बालखिल्यास्तथैवैनं परिवार्य्य समासते ॥१७॥
नोदेता नास्तमेता च कदाचिच्छक्तिरूपधृक् ।
विष्णुर्विष्णोः पृथक् तस्य गणः सप्तमयोऽप्ययम् ।१८
स्तम्भस्थदर्पणस्येव योऽयमासन्नतां गतः ।
छायादर्शनसंयोगं स तं प्राप्नोत्यथात्मनः ॥१९॥
एवं सा वैष्णवी शक्तिर्न्नैवापैति ततो द्विज !
मासानुमासं भास्वन्तमध्यास्ते तत्र संस्थितम् ॥२०॥
पितृ-देव-मनुष्यादीन् स सदाप्याययन् प्रभुः ।
परिवर्त्तत्यहोरात्रकारणं सविता द्विज(घ) ॥२१॥
सूर्य्यरश्मिः सुषुम्णो यस्तर्पितस्तेन चन्द्रमाः ।
कृष्णपक्षेऽमरैः शश्वत् पीयते वै सुधामयः ॥२२॥
पीतं तद्द्विकलं सोमं कृष्णपक्षक्षये द्विज !
पिबन्ति पितरः शेषं भास्करात् तर्पणं तथा(ङ) ॥२३॥
आदत्ते रश्मिभिर्यत्तु क्षितिसंस्थं रसं रविः ।
तमुत्सृजति भूतानां पुष्ट्यर्थं शस्यवृद्धये(च) ॥२४॥

अतस्तस्य प्राधान्यात् पूर्वोक्तैः स्व-स्वव्यापारैर्ऋषिमुख्यास्तं सेवन्ते इत्याह—'स्तुवन्ती'ति द्वाभ्याम् ॥१६।१७॥

"ऋग्यजुःसामभूतोऽन्तः सवितुर्द्विज ! तिष्ठति । विष्णुशक्तिरवस्थानं सदादित्ये करोति सः"। 'न केवलं रवौ शक्ति'रित्यादिषु त्रयीशक्तिरूपस्य विष्णोः प्रतिमासं भिन्नेष्वागमापायिषु सूर्येष्ववस्थानोक्तेः सूर्यादिवत् प्रतिमासं विष्णोरप्यागमापायित्वं प्रतीतं वारयति, – नोदेता उदयं न गन्ता। नास्तमेता अस्तञ्च न गन्ता। अधिष्ठाता विष्णुः प्रतिमासमागमापायी न भवति, किन्तु तदधिष्ठेयः सप्तमयः सप्तभिः सम्भाद्योऽयं सर्वोऽप्यागमापायी गणस्ततः पृथगेव ॥१८॥

एतदेव दृष्टान्तेन स्पष्टयति – स्तम्भेति द्वाभ्याम्। स्तम्भे निखातस्य दर्पणस्य सान्निध्यं यो यो जनः प्राप्नोति स सर्वोऽपि क्रमेण आत्मनः छायादर्शनसंयोगं प्रतिविम्बभावेन सम्बन्धं यथा प्राप्नोति ॥१९॥

एवं स्तम्भस्थानीये सूर्यरथे स्थिता सा दर्पणस्थानीया वैष्णवी शक्तिस्ततः स्थानान्नैवापगच्छति तत्रस्थव तु मासानुमासं प्रतिमासि तत्र स्थितमार्गैस्त्रिजगत्स्थानीयं भास्वन्तमध्यास्ते अधितिष्ठति ॥२०॥

एवं विष्णुशक्त्यधिष्ठितस्य रवेः पित्रादितर्पकत्वमाह—'पितृदेवे'ति। आप्याययन् तर्पयन् परिवर्त्तति परिभ्रमतीत्यर्थः ॥२१॥

तत्र देवपितृतर्पणे प्रकारमाह—'सूर्यरश्मि'रिति द्वाभ्याम्। तर्पितः शुक्लप्रतिपदमारभ्यापूरितः षोढ़शकलः सन् कृष्णपक्षे प्रतिपदादि प्रत्यहमेकैककलांशेनामरैः पीयते। "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः" इत्यादिस्मृतेः ॥२२॥

एवं प्रत्यहममरैरेकैककलायामंशेन पीतायां चतुर्दश्यन्ते द्विकलमवशिष्टं सन्तं कृष्णपक्षक्षये दर्शे पितरः किञ्चित् पिबन्ति। तथा तेन चन्द्रतर्पणप्रकारेण भास्करात् तेषां देवपितॄणां तर्पणं भवति ॥२३॥

मनुष्यादितर्पणप्रकारमाह—'आदत्त' इति द्वाभ्याम् ॥२४,२५॥

(घ) परिवर्त्ततीत्यत्र परिवृतेः परस्मैपदमार्षम्।

(ङ) अत्र स्वामिटीकायां दर्श इत्यस्य अमावास्याया-मित्यर्थः।

(च) तदुक्तं कविना कालिदासेन—'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रवि'रिति। पुष्ट्यर्थमिति स्तोकं पाकं इत्यादिवत् शस्यवृद्धिक्रियाविशेषणम्। या शस्यवृद्धिः भूतानां पुष्टिजनिका तदर्थं रश्मिभिर्गृहीतं क्षितिगतं रसं रविरुत्सृजति इति वर्त्तुलार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेन प्रीणात्यशेषाणि भूतानि भगवान् रविः ।
पितृ-देव-मनुष्यादीनेवमाप्याययत्यसौ ॥२५॥

पक्षतृप्तिन्तु देवानां पितॄणाञ्चैव मासिकीम् ।
शश्वत्तृप्तिञ्च मर्त्यानां मैत्रेयार्कः प्रयच्छति ॥२६॥
इति श्रीविष्णुपुराणे द्वितीयेंऽशे एकादशोऽध्यायः

वृष्टिकृतायां तृप्तौ विशेषमाह—'पक्षतृप्ति'मिति । शश्वत्तृप्तिं तत्तद्दिनतृप्तिं स्वकृतवृष्टिनिष्पन्नैरन्नैः सकृद् भुक्तैः पक्षमासाहोरात्रपरिमितां तृप्तिं देवपितृमर्त्यानामर्कः करोतीत्यर्थः । अत एव श्रुतिः—"तस्मादहरहर्मनुष्य अशनमिच्छन्तेऽर्धमासे देवा इत्यन्ते मासि पितृभ्यः क्रियते इति ॥२६॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयेंऽशे एकादशोऽध्यायः ॥

द्वादशोऽध्यायः ।

चन्द्रादिग्रहाणां रथादीनां, प्रवह-वायोः श्रीविष्णोर्माहात्म्यस्य च कथनम् ।

पराशर उवाच ।

रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः ।
वाम-दक्षिणतो युक्ता दश तेन चरत्यसौ ॥१॥

वीथ्याश्रयाणि ऋक्षाणि ध्रुवाधारेण वेगिना ।
ह्रासवृद्धिक्रमस्तस्य रश्मीनां सवितुर्यथा ॥२॥

अर्कस्येव हि तस्याश्वाः सकृद्युक्ता वहन्ति ते ।
कल्पमेकं मुनिश्रेष्ठ ! वारिगर्भसमुद्भवाः ॥३॥

क्षीणं पीतं सुरैः सोममाप्याययति दीप्तिमान् ।
मैत्रेयैककलं सन्तं रश्मिनैकेन भास्करः ॥४॥

द्वादशः अध्यायः ।

उक्ता चतुर्भिरध्यायैरष्टमासै रवेः स्थितिः । अथ सोमादिसंस्थोक्त्या तत्प्रपञ्चोपसंहृतिः कुन्दाभाः श्वेताः । रविरथाद् विशेषमाह—'वामतो दक्षिणतश्च युक्तास्तस्य रथस्याश्वा दशे'ति । तेन रथेन ॥१॥

नागवीथ्याद्याश्रयाण्यश्विन्यादीनि नक्षत्राणि प्रागुदित्या- चरति । ह्रासवृद्धिक्रम इति । उदितो वर्द्धमानादि मध्याह्नादित्यत्र सवितृरश्मीनां यथोक्तस्तथा तस्यापि ॥२॥

क्षीणस्य सोमस्य पुनः पूर्णस्य सतो देवादितर्पकत्वमाह 'क्षीण'मिति चतुर्भिः । पञ्चदश्यां कलायां दर्शे पिबं पीतायाः षोड़श्याः कलायाः अवशिष्टत्वादेककलं सन्तं इत्युक्तम् । एकेन रश्मिना सुषुम्णाख्येन ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रमेण येन पीतोऽसौ देवैस्तेन निशाकरम् ।
आप्याययत्यनुदिनं भास्करो वारितस्करः ॥५॥
सम्भृतश्चार्द्धमासेन तत्सोमस्थं सुधामृतम् ।
पिबन्ति देवा मैत्रेय ! सुधाहारा यतोऽमराः(क) ॥६॥
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च ।
त्रयस्त्रिंशत् तथा देवाः पिबन्ति क्षणदाकरम् ॥७॥
कलाद्वयावशिष्टस्तु प्रविष्टः सूर्य्यमण्डलम् ।
अमाख्यरश्मौ वसति अमावास्या ततः स्मृता ॥८॥
अप्सु तस्मिन्नहोरात्रे पूर्व्वं वसति चन्द्रमाः ।
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥९॥
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥१०॥
शेषे पञ्चदशे भागे किञ्चिच्छिष्टे कलात्मके ।
अपराह्णे पितृगणा जघन्यं पर्य्युपासते ।
पिबन्ति द्विकलाकारं शिष्टा तस्य कला तु या ।
सुधामृतमयी पुण्या तामिन्दोः पितरो मुने(ख) ॥१२॥
निःसृतं तदमावस्यां गभस्तिभ्यः सुधामृतम् ।
मासं तृप्तिमवाप्याग्र्यां पितरः सन्ति निर्वृताः ।
सौम्या बर्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ॥१३॥

येन क्रमेण प्रतिपत्प्रभृति देवैर्वह्न्यादिभिरसौ पीतस्तेनैव प्रतिदिनं तं निशाकरमाप्याययति। अलक्षितं वारि तस्करवत् हरतीति तथा वारितस्करः। एवं गृहीतेन वारिणा सोममापूरयतीत्यर्थः ॥५॥

सुधामृतं सुधारूपममृतं मृत्युभेषजम् ॥६॥

क्षणदाकरं सोमम् ॥७॥

पितॄणां सोमपानप्रकारमाह—'कलाद्वयेति' सार्धैः षड्भिः ॥८॥

सूर्यमण्डलप्रवेशक्रममाह—'अप्स्वि'ति ॥९॥

प्रसङ्गाद् दर्शे वीरुधां छेदकर्त्तारं निन्दति—'छिनत्ती'ति ॥१०॥

तदेवं दर्शाहोरात्रे अप्सु वीरुत्सु च प्रवेशादुपक्षीणप्राये कलात्मके पञ्चदशे भागे किञ्चिच्छिष्टे सति तं जघन्यं पश्चादवशिष्टं सोममपराह्णे पितृगणाः पर्य्युपासते पानार्थं परितः सेवन्ते ॥११॥

ततश्च तस्येन्दोर्द्विकलाकारः शिष्टद्विकलो य आकारस्तत्र शिष्टा पञ्चदशी या कला तां पितरः पिबन्ति, न तु षोडशीम्। द्विकलं सोममिति पाठे द्विकलं पर्य्युपास्य तस्य शिष्टामेककलां पिबन्तीत्यर्थः। द्विलवमिति पाठे लवः सूक्ष्मः कलावयवः, द्विलवपरिमितं कालं तां शिष्टां कलां पिबन्तीत्यर्थः ॥१२॥

अमावस्याम् अमावास्यायां तत् सोमस्य गभस्तिभ्यो निःसृतं सुधामृतं पीत्वति शेषः ॥१३॥

तदेवममृतद्वारा सोमाद् देवादीनां तर्पणमुक्त्वा तन्निष्पादितान्नादिनापि तेषां तर्पणमाह—'एव'मिति। सिते पक्षे देवानाप्याययति, 'देवानां शुक्लपक्षे

(क) यतः मृत्युभेषजरूपायाः सुधायाः पानात् सुधाहाराः नियमेन सुधापायिनः देवाः अमराः मरणशून्याः कल्पान्तकालपर्य्यन्तजीविन इति यावत् भवन्तीति शेषः। तदुक्तम्—'आभूतसंप्लवं स्थानममृतत्वं प्रचक्षत' इति। एतेन जन्यभावमात्रस्यैव नियमेन ध्वंसप्रतियोगित्वाद् देवानाममरत्वमनुपपन्नमित्याक्षेपो निरस्तः, प्रलये भावभूतानां देवानां विनाशे सत्यपि तत्पूर्वकालपर्य्यन्तस्थितिरूपस्य अमरत्वस्य सत्त्वे बाधकाभावात्।

(ख) सुधामृतमयी सुधारूपं यत् अमृतं मृत्युभेषजम् तद्रूपा। पुण्या पवित्रा, एतेन पितॄणां तत्पानप्रवृत्तौ बाधाभावो दर्शितः। इन्दोः तां कलां पितरः पितृदेवताः पिबन्तीत्यन्वयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवं देवान् सिते पक्षे कृष्णपक्षे तथा पितॄन् ।
वीरुधश्चामृतमयैः शीतैरप्परमाणुभिः ॥१४॥
वीरुधोषधिनिष्पत्त्या मनुष्य-पशु-कीटकान् ।
आप्याययति शीतांशुः प्रकाशाह्लादनेन तु ॥१५॥
वाय्वग्निद्रवसंभूतो रथश्चन्द्रसुतस्य च ।
पिषङ्गैस्तुरगैर्युक्तः सोऽष्टाभिर्वायुवेगिभिः ॥१६॥
सवरूथः सानुकर्षो युक्तो भूसम्भवैर्हयैः ।
सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् ॥१७॥
अष्टास्रिः काञ्चनः श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागारुणैरश्वैः संयुक्तो वह्निसम्भवैः(ग) ॥१८॥
अष्टाभिः पाण्डरैर्युक्तो वाजिभिः काञ्चनो रथः ।
तस्मिंस्तिष्ठति वर्षान्ते राशौ राशौ बृहस्पतिः(घ) ॥१९॥
आकाशसम्भवैरश्वैः शबलैः स्यन्दनं युतम् ।
तमारुह्य शनैर्याति मन्दगामी शनैश्चरः ॥२०॥

स्वर्भानोस्तुरगा ह्यष्टौ भृङ्गाभा घूसरं रथम् ।
सकृद्युक्तास्तु मैत्रेय ! वहन्त्यविरतं सदा ॥२१॥
आदित्यान्निःसृतो राहुः सोमं गच्छति पर्व्वसु ।
आदित्यमेति सोमाच्च पुनः सौरेषु पर्व्वसु ॥२२॥
तथा केतुरथस्याश्वा अप्यष्टौ वातरंहसः ।
पलालधूमवर्णाभा लाक्षारसनिभारुणाः(ङ) ॥२३॥
एते मया ग्रहाणां वै तवाख्याता रथा नव ।
सर्व्वे ध्रुवे महाभाग ! प्रबद्धा वायुरश्मिभिः ॥२४॥
ग्रहर्क्षताराधिष्णानि ध्रुवे बद्धान्यशेषतः ।
भ्रमन्त्युचितचारेण मैत्रेयानिलरश्मिभिः ॥२५॥
यावत्यश्चैव ताराख्तावन्तो वातरश्मयः ।
सर्व्वे ध्रुवे निबद्धास्ते भ्रमन्तो भ्रामयन्ति तम् ॥२६॥
तैलापीड़ा यथा चक्रं भ्रमन्तो भ्रामयन्ति वै ।
तथा भ्रमन्ति ज्योतींषि वाताविद्धानि सर्व्वशः ॥२७॥

यजनात् स्नानात् तस्मादापूर्यमाणपक्षे यजन्ते' इति श्रुतेः, कृष्णपक्षे पितॄन् "अपरपक्षे पितृणाम्" इति श्रुतेः। अपपरमाणुभिरपां सूक्ष्मैरंशैः ॥१४॥

वीरुधो लताद्याः, ओषध्यो व्रीह्याद्याः, तासां निष्पत्त्या प्रकाशेन यदाह्लादनं तेन च ॥१५॥

तदेवं सोमस्य रथादिप्रकारमुक्त्वा बुधादीनामथाह—'वाय्वग्नी'त्यादिना 'प्रवहस्तेन स स्मृत' इत्यन्तेन। पिषङ्गैः कपिलैः ॥१६॥

"वरूथो रथगुप्तिर्या तिरोधत्ते रथस्थितम्। रथस्याधः स्थितं काष्ठमनुकर्षो निगद्यते। उपासङ्गो रथोपस्थः। पताका प्रसिद्धा तत्सहितः ॥१७॥

अष्टास्रिरष्टकोणः ॥१८।१९॥ शबलैश्चित्रवर्णैः ॥२०॥

स्वर्भानोः राहोः, भृङ्गाभाः कृष्णाः, घूसरम् ईषत् पाण्डरम् अविरतम् अनुपरतम् ॥२१॥

सौम्येषु पर्वसु सोमं गच्छति ॥२२॥

पलालं वुसं तद्धूमवर्णवदाभा दीप्तिर्येषां ते, लाक्षारसवदरुणाश्च ॥२३।२४॥

ग्रहर्क्षताराणां धिष्ण्यानि मण्डलानि। उचितचारेण स्वस्वोचितगत्या ॥२५,२६॥

तैलापीड़ास्तैलिकाः स्वयं भ्रमन्तो यथा चक्रं तैलयन्त्रं भ्रामयन्ति। वाताविद्धानि प्रवहाख्यवातचक्रप्रेरितानि ॥२७॥

(ग) अष्टौ अश्वयः यस्य सः। काञ्चनस्य सुवर्णस्य अयं काञ्चनः स्वर्णमयः। भौमस्य भूमिसुतस्य मङ्गलग्रहस्य। पद्मरागारुणैः पद्मरागमणिवत् लोहितवर्णैः।

(घ) पाण्डरैः श्वेतैः। वाजिभिः अश्वैः।

(ङ) वातस्येव रंहः वेगः येषां ते वायुवेगेन गतिमन्त इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अलातचक्रवद् यान्ति वातचक्रेरितानि तु ।
यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः ॥२८॥
शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति ।
सन्निवेशश्च तस्यापि शृणुष्व मुनिसत्तम ॥२९॥
यदह्ना कुरुते पापं तं दृष्ट्वा निशि मुच्यते ।
यावत्यश्चैव तारास्ताः शिशुमाराश्रिता दिवि ।
तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि च ॥३०॥
उत्तानपादस्तस्याथ विज्ञेयोह्युत्तरो हनुः ।
यज्ञोऽधरश्च विज्ञेयो धर्म्मो मूर्द्धानमाश्रितः ॥३१॥
हृदि नारायणश्चास्ते अश्विनौ पूर्व्वपादयोः ।
वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी ॥३२॥
शिश्नः संवत्सरस्तस्य मित्रोऽपानं समाश्रितः ।
पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः ।
तारकाशिशुमारस्य नास्तमेति चतुष्टयम् ॥३३॥
इत्येष सन्निवेशोऽयं पृथिव्या ज्योतिषां तथा ।
द्वीपानामुदधीनाञ्च पर्व्वतानाञ्च कीर्त्तितः ॥३४॥
वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै ।
तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः ॥३५॥
यदम्बु वैष्णवः कायस्ततो विप्र ! वसुन्धरा ।
पद्माकारा समुद्भूता पर्व्वताब्ध्यादिसंयुता ॥३६॥
ज्योतींषि विष्णुर्भुवनानि विष्णु-
र्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्व्वं
यदस्ति यन्नास्ति च विप्रवर्य्य ॥३७॥
ज्ञानस्वरूपो भगवान् यतोऽसा-
वशेषमूर्त्तिर्न च वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि ॥३८॥

यस्मात् ज्योतींषि प्रकर्षेण वहति तेन स वायुः प्रवहः स्मृतः । प्रवहस्यैव भेदाः सर्वे वायुस्कन्धाः ॥२८॥

'सर्वे ध्रुवे निबद्धास्त' इति प्रस्तुतध्रुवाद्याधारभूतं शिशुमारं नवमाध्यायोपक्षिप्तमेवोपासनार्थं विशेषतो वक्तुमाह—'शिशुमार'स्विति ॥२९॥

तद्दर्शनफलमाह—'यदह्ने'ति सार्द्धेन ॥३०॥

तत्सन्निवेशमेवाह—'उत्तानपाद' इति सार्धैस्त्रिभिः । उत्तानपादः यज्ञादयो नक्षत्ररूपा देवास्तदवयवत्वेनोच्यन्ते । यज्ञोऽधरो हनुरित्यनुषङ्गः ॥३१॥ सक्थिनी ऊरू ॥३२॥

तारकामयस्य शिशुमारस्य पुच्छे तमभ्रयादि चतुष्टयं नास्तमेति, अत्युन्नतपुच्छस्थितमन्तर्धानाभावान्नित्यं दृश्यते । न्यस्तमिति पाठे तस्य पुच्छे चतुष्टयमेतन्न्यस्तं निहितमित्यर्थः । श्रुतिश्च 'अग्निः पुच्छस्य प्रथमं काण्डं तद् इन्द्रस्ततः प्रजापतिरभयं चतुर्थम् ॥३३॥

उक्तं भुवनकोशमुपसंहरंस्तस्य विष्ण्वात्मतां दर्शयन्नाह —'इत्येष' इति यावत्समाप्ति ॥३४।३५॥

यदम्बु वैष्णवः कायः विष्णोरेव मूर्त्तिस्ततोऽम्बुनः गर्भोदकात् पद्माकारा मेरुकर्णिका सर्वतः समवर्त्तुला नानापर्वतविभक्ताऽनेकतत्तद्द्वीपवर्षदला वसुन्धरा समुद्भूता । अतः सापि तन्मूर्त्तिरेव न ततः पृथगिति संक्षेपार्थः ॥३६॥

एतदुपलक्षणीकृत्य सर्वस्यापि तदात्मतामाह—'ज्योतींषी'ति । यदस्ति यन्नास्ति च भावाभावरूपेण प्रतीतं वस्तु तत् सर्वं स एव ॥३७॥

नन्वेकस्यानेकत्वं विरुद्धमित्याशङ्क्यानेकत्वस्यावास्तवत्वमाह—ज्ञानमेव स्वरूपं तत्त्वं यस्य स एवासौ भगवान् यतः अतोऽशेषमूर्त्तिः प्रपञ्चमूर्त्तिरसौ वस्तुभूतः परमार्थरूपो न भवति । कथं तर्हि प्रपञ्चस्य मूर्त्तित्वं तत्राह—तत इति । तस्मात् ज्ञानस्वरूपाच्छैलादिभेदात् विज्ञानेऽधिष्ठाने विजृम्भितानि स्वमायया विलसितानि रूपाणि जानीहि ॥३८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदा तु शुद्धं निजरूपि सर्व्वं
कर्म्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि संकल्पतरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः ॥३९॥

वस्त्वस्ति किं कुत्रचिदादिमध्य-
पर्य्यन्तहीनं सततैकरूपम् ।
यच्चान्यथात्वं द्विज ! याति भूयो
न तत्तथा कुत्र कुतो हि तत्त्वम् ॥४०॥

मही घटत्वं घटतः कपालिका
कपालिका चूर्ण-रजस्ततोऽणुः ।
जनैः स्वकर्म्मस्तिमितात्मनिश्चयै-
रालक्ष्यते ब्रूहि किमत्र वस्तु ॥४१॥

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्
क्वचित् कदाचिद् द्विज ! वस्तुजातम् ।
विज्ञानमेकं निजकर्म्मभेद-
विभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥४२॥

ज्ञानं विशुद्धं विमलं विशोक-
मशेषशोकादिनिरस्तसङ्गम् ।
एवं सदैकं परमः परेशः
स वासुदेवो न यतोऽन्यदस्ति ॥४३॥

सद्भाव एषो भवतो मयोक्तो
ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत् संव्यवहारभूतं
तत्रापि चोक्तं भुवनाश्रितं ते ॥४४॥

अत्र हेतुमाह—'यदा त्वि'ति। यदा तु प्रतिबन्धक-कर्मक्षये सर्वमेतज्जगच्छुद्धं केवलं निजमात्मैव रूपमस्ति यस्य तथाभूतं निरस्तसम्भावनादिदोषं ज्ञानमेव भवति, तदा संकल्पतरोः फलभूताः वस्तुषु पृथिव्यादिषु तद्भेदेनोच्चावचविशेषा न स्फुरन्ति, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येत्तत् केन कं जिघ्रेत्' इत्यादिश्रुतेः। अतस्तत्त्व-ज्ञानबाधितत्वान्न प्रपञ्चो वास्तव इत्यर्थः ॥३९

'आदावन्तेऽपि यन्नास्ति वर्त्तमानेऽपि तत्तथा' इत्यादि-न्यायेनागमापायित्वात् परिणामित्वाच्च न वास्तवत्वमस्येत्याह —'वस्त्वि'ति। यच्चान्यथात्वं परिणामान्तरं याति, तत् पुनस्तथा पूर्ववन्न भवति। अत्र तथाभूते कादाचित्के स्वरूपात् प्रच्युते च वस्तुनि शुक्तिरजतादिवत्, तत्त्वं परमार्थत्वं कुतः ॥४०॥

अन्यथात्वमेवोदाहरन् मिथ्यात्वमाह—'मही'ति। मही पिण्डादिद्वारा घटत्वं प्राप्ता आलक्ष्यते, घटत्वानन्तरञ्च कपालिकाभूता लक्ष्यते। कपालिका च सती चूर्णं रजश्च लक्ष्यते। ततश्चाणुरतिसूक्ष्मा लक्ष्यते। स्वकर्मणा प्रति-बन्धकेन स्तिमितो मन्दीभूत आत्मनिश्चयो येषां तैर्जनैः परिणामपरम्परायां किं वस्त्वालक्ष्यते ? न किञ्चित् पूर्वस्मात् प्रच्युतेरित्यर्थः। तथा च श्रुतिः 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति ॥४१॥

वृत्तिज्ञानावच्छिन्नैः शोकादिभिर्निरस्तः सङ्गो यस्य तथाभूतं ज्ञानं सदैकमेव। स एव च परमः सर्वोत्कृष्टः परमेश्वरो वासुदेवः, यतो व्यतिरिक्तं किञ्चिन्नास्ति ॥४३॥

उपसंहरति 'सद्भाव' इति। सद्भावः परमार्थः। 'एष भवत' इति सुलोपाभावस्त्वार्षः। ननु चान्यस्य सर्वस्य सत्यत्वे किमर्थमेतद्भुवनाद्याश्रितं बहु वर्णितं तत्राह—यज्ज्ञानव्यतिरिक्तं तत् सर्वं संव्यवहारभूतं सत् परमार्थोपयोगिनि व्यवहारे भूतं स्थितं, नतु सत्। तत्रापि च विशेषतस्तुभ्यं यत् भुवनाश्रितमुक्तम् ॥४४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ञः पशुर्वह्निरशेष ऋत्विक्
सोमः सुराः स्वर्गमयश्च कामः ।
इत्यादिकर्म्माश्रितमार्गदृष्टं
भूरादिभोगाश्च फलानि तेषाम् ॥४५॥

यच्चैतद्भुवनगतं मया तवोक्तं
सर्व्वत्र व्रजति हि तत्र कर्म्मवश्यः ।
ज्ञात्वैवं ध्रुवमचलं सदैकरूपं
तत् कुर्य्याद्विशति हि येन वासुदेवम् ॥४६॥
इति श्रीविष्णुपुराणे द्वितीयेऽंशे द्वादशोऽध्यायः ।

'यज्ञः पशु'रित्यादिकर्माश्रितमार्गदृष्टञ्चोक्तं भूरादिभोगाश्च तत्फलानीत्युक्तम् ॥४५॥

तेषु वैराग्योत्पादनेन स्वकर्मानुष्ठानद्वारा श्रीवासुदेवप्राप्त्यर्थमित्याह—'यच्चैतदि'ति । कर्मवश्यो जीवो नानायोनीर्व्रजतीति ज्ञात्वा विरक्तः सन् ध्रुवं नित्यमचलं परिपूर्णम् अतः सर्वदैकरूपं वासुदेवं येनोपायेन स्वकर्मादिना तद्भजनात्तत्प्रसादाल्लब्धज्ञानेन विशति तदेव कुर्यादित्यर्थः ॥४६॥

इति श्रीधरकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयेऽंशे द्वादशोऽध्यायः ॥

त्रयोदशोऽध्यायः ।

[जड़भरतोपाख्यानं, सौवीरं राजानं प्रति भरतस्य तत्त्वोपदेशश्च ।]

श्रीमैत्रेय उवाच ।

भगवन् ! सम्यगाख्यातं यत् पृष्टोऽसि मयाखिलम् ।
भूसमुद्रादिसरितां संस्थानं ग्रहसंस्थितिम् ॥१॥

विष्ण्वाधारं तथा चैतत् त्रैलोक्यं समवस्थितम् ।
परमार्थस्तु तेनोक्तो यथाज्ञानं प्रधानतः ॥२॥

त्रयोदशः अध्यायः ।

एवं तावद्धरेः स्थूले विश्वरूपे निरूपिते । तेन शुद्धमतिस्तस्य सूक्ष्मरूपं बुभुत्सते । 'तत् कुर्याद्विशति हि येन वासुदेव'मित्युक्ते ततप्रवेशोपायभूतज्ञानयोगाश्रयं प्रथमाध्यायोपक्षिप्तमेव भरतचरितमुक्तानुवादपूर्वकं पृच्छति—'भगवन्निति' षड्भिः ॥१॥

प्रधानत इति प्रधानमित्यर्थः । सार्वविभक्तिकत्वात् तसिल्प्रत्ययस्य ॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्त्वेतद्भगवानाह भरतस्य महीपतेः ।
कथयिष्यामि चरितं तन्ममाख्यातुमर्हसि ॥३॥

भरतः स महीपालः शालग्रामेऽवसत् किल
योगयुक्तः समाधाय वासुदेवे सदा मनः ॥४॥

पुण्यदेशप्रभावेण ध्यायतश्च सदा हरिम् ।
कथन्तु नाभवन्मुक्तिर्यदभूत् स द्विजः पुनः ॥५॥

विप्रत्वे च कृतं तेन यद्भूयः सुमहात्मना ।
भरतेन मुनिश्रेष्ठ ! तत् सर्व्वं वक्तुमर्हसि ॥६॥

पराशर उवाच ।

शालग्रामे महाभागो भगवन्न्यस्तमानसः ।
स उवास चिरं कालं मैत्रेय ! पृथिवीपतिः(क) ॥७॥

अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः ।
अवाप परमां काष्ठां मनसश्चापि संयमे ॥८॥

यज्ञेशाच्युत गोविन्द माधवानन्त केशव !
कृष्ण विष्णो हृषीकेशेत्याह राजा स केवलम् ॥९॥

नान्यज्जगाद मैत्रेय ! किञ्चित् स्वप्नान्तरेऽपि च ।
एतत्परं तदर्थञ्च विना नान्यदचिन्तयत्(ख) ॥१०॥

समित्-पुष्प-कुशादानं चक्रे देवक्रियाकृते ।
नान्यानि चक्रे कर्म्माणि निःसङ्गो योगतापसः(ग) ॥११॥

जगाम सोऽभिषेकार्थमेकदा तु महानदीम् ।
सस्नौ तत्र तदा चक्रे स्नानस्यानन्तरक्रियाः(घ) ॥१२॥

अथाजगाम तत्तीर्थं जलं पातुं पिपासिता ।
आसन्नप्रसवा ब्रह्मन्नेकैव हरिणी वनात् (ङ) ॥१३॥

ततः समभवत्तत्र पीतप्राये जले तया ।
सिंहस्य नादः सुमहान् सर्व्वप्राणिभयङ्करः ॥१४॥

भरतस्य चरितं कथयिष्यामीति यद्भवानुक्तवान्, तत् ममेदानीं हरेः स्थूलरूपश्रवणध्यानादिना शुद्धचित्तस्याख्यातुमर्हसीत्यर्थः ॥३।६॥

'कथन्तु नाभूवन्मुक्ति'रित्यस्योत्तरत्वेन तस्मिन् जन्मनि जातं योगभ्रंशं वक्तुं तस्य प्राचीनं योगमनुवदति—'शालग्राम' इति पञ्चभिः । भगवति न्यस्तं मानसं येन सः ॥७॥

अहिंसादिषु यमनियमादिषु तत्साध्ये च मनसः संयमे समाधौ परमां काष्ठाम् उत्कर्षम् अवाप ॥८॥

व्युत्थानसमये यज्ञेशाच्युतेत्यादिभगवन्नामैवाह ॥९॥ नान्यानि कर्माणि । योगयुक्तः तापसः ॥११॥

नान्यद्वाचा जगाद मनसा च एतद्भगवन्नामैव तदर्थञ्च केवलमचिन्तयत्, नान्यत् किमपि ॥१०॥

देहेन च समित्पुष्पकुशानाम् आदानं देवपूजार्थं चक्रे ।

अथ तस्य हरिणसङ्गाद् योगभ्रंशं प्रस्तौति 'जगामे'त्यादिना 'निष्कृतिं ययावि'त्यन्तेन ॥१२।१४॥

(क) चिरं कालमित्यत्र कालाध्वनोरत्यन्तसंयोग इत्यनेन द्वितीया, सुदीर्घं कालं व्याप्येत्यर्थः ।

(ख) स्वप्नान्तरेऽपि स्वप्नावस्थामध्येऽपि । अत्र श्रीधरः 'एतद् भगवन्नामैव तदर्थञ्च केवलमचिन्तयदित्येवमर्थमाह स्वप्नान्तरे तत्र परमित्यस्य केवलमित्यर्थः । तस्यार्थान्तरमपि समभवत् यथा—एतत्परं भगवद्बोधनेच्छयोच्चारितं शब्दं विना अन्यत् न अचिन्तयत्, तथा तदर्थं तस्य शब्दस्य अर्थं प्रतिपाद्यं भगवन्तं विष्णुं विना अन्यत् न अचिन्तयदिति ।

(ग) निःसङ्गः विषयासक्तिशून्यः । योगेन युक्तः तापसः योगतापस इति मध्यपदलोपी समासः ।

(घ) अभिषेकः स्नानमेव अर्थः प्रयोजनमस्येति अभिषेकार्थं स्नानार्थम् । जगामेति क्रियाया विशेषणमिदम् ।

(ङ) पिपासा विद्यते यस्या इत्यर्थे पिपासाशब्दात् इत्चप्रत्ययेन पिपासितेति सिद्धम् । आसन्नः सन्निहितः अचिरेण कालभावीति यावत्, प्रसवः शावकस्येति शेषः यस्याः सा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः सा सहसा त्रासादाप्लुता निम्नगातटम् ।
अत्युच्चारोहणेनास्या नद्यां गर्भः पपात सः ॥१५॥
तमुह्यमानं वेगेन वीचिमालापरिप्लुतम् ।
जग्राह स नृपो गर्भात् पतितं मृगपोतकम् (च)॥१६॥
गर्भप्रच्युतिदोषेण प्रोत्तुङ्गाक्रमणेन च ।
मैत्रेय ! सापि हरिणी पपात च ममार च (छ)॥१७॥
हरिणीं तां विलोक्याथ विपन्नां नृपतापसः ।
मृगपोतं समादाय निजमाश्रममागतः (ज) ॥१८॥
चकारानुदिनञ्चासौ मृगपोतस्य वै नृपः ।
पोषणं पुष्यमाणश्च स तेन ववृधे मुने ॥१९॥
चचाराश्रमपर्य्यन्तं तृणानि गहनेषु सः ।
दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः ॥२०॥

प्रातर्गत्वातिदूरञ्च सायमायाद् यथाश्रमम् ।
पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे ॥२१॥
तस्य तस्मिन्मृगे दूर-समीपपरिवर्त्तिनि ।
आसीच्चेतः समायुक्तं न यथावन्यतो द्विज(झ) ॥२२॥
विमुक्तराज्यतनयः प्रोज्झिताशेषबान्धवः ।
ममत्वं स चकारोच्चैस्तस्मिन् हरिणबालके (ञ) ॥२३
किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः ।
चिरायमाणे निष्क्रान्ते तस्यासीदिति मानसम् (ट)।२४
एषा वसुमती तस्य खुराग्रक्षतकर्बुरा ।
प्रीतये मम जातोऽसौ क्व ममैणकबालकः (ठ) ॥२५॥
विषाणाग्रेण मद्बाहुकण्डूयनपरो हि सः ।
क्षेमेणाभ्यागतोऽरण्यादपि मां सुखयिष्यति (ड) ॥२६

आप्लुता उत्पतिता ॥१५।२०॥

(च) वेगेन नद्याः प्रवाहेण उह्यमानं 'वेगः प्रवाहजवयोरपी'ति कोषात् वीचिमालया तरङ्गसमूहेन परिप्लुतम् अस्थैर्य्यं नीतं परितो व्याप्तमिति वा तं मृगपोतकं मृग्याः शावकम्, पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुरिति कोषात्। मृग्याः पोतः मृगपोत इति। तदुक्तं कालापिकेन दुर्गसिंहेन—'कुक्कुट्यादीनामण्डादिषु च स्त्रीत्वस्याविवक्षा। कुक्कुट्या अण्डं कुक्कुटाण्डं, मृग्याः पदं मृगपदम्, काक्याः शावः काकशावः इत्यादि। अतिक्षुद्रो मृगपोतः मृगपोतकस्तम्। तदुक्तम्—अज्ञाने कुत्सिते चैव संज्ञायामनुकम्पने। तद्युक्तनोतावप्यल्पे वाच्ये ह्रस्वे च कः स्मृतः। इति। अथवा दयार्हो मृगपोतः मृगपोतक इत्यनुकम्पने कः।

(छ) गर्भस्य प्रच्युतिः स्खलनं सैव अनिष्टकरत्वाद् दोषः तेन। प्रोत्तुङ्गस्य अत्युच्चस्थानस्य आक्रमणम् उत्पतनेन समाश्रयणं समारोहणमिति यावत् तेन च। एतद् द्वयं पतनोत्तरमरणे हेतुभूतं ज्ञातव्यम्।

(ज) विपन्नां मृताम्। मृगपोतं समादायेति मृतमातृकत्वादशरणे तस्मिन्ननुकम्पावशेनेति भावः।

उटजाजिरे पर्णशालाङ्गने ॥२१॥
कृपया पुष्यमाणे तस्मिन् जायमानम् आसङ्गं प्रपञ्चयति 'तस्ये'त्यादिना ॥२२।२४॥
खुराग्रक्षतैः कर्बुरा ॥२५॥

(झ) दूरसमीपपरिवर्त्तिनि कदाचिद् दूरे कदाचिच्च समीपे परिवर्त्तिनि विहरणशीले तस्मिन् मृगे मृगपोते। तस्य नृपतापसस्य भरतस्य चेतः समायुक्तं सुतरामासक्तमासीत्।

(ञ) विमुक्तं त्यक्तं राज्यं तनयाश्च येन सः। प्रोज्झिताः एकान्ततः परिहृताः अशेषाः अखिलाः बान्धवाः ज्ञातिकुटुम्बादयः येन सः।

(ट) निष्क्रान्ते तस्मिन् हरिणशिशाविति शेषः। चिरायमाणे आश्रमप्रत्यावर्त्तने कालविलम्बं कुर्वति सति। इति 'किं वृकैर्भक्षित' इत्यादिरूपं मानसं मनोवृत्तिरासीदित्यन्वयः।

(ठ) एणकबालकः हरिणशिशुः। प्रीतये जातः पुरेति शेषः।

(ड) विषाणाग्रेण शृङ्गाग्रभागेण। मम बाहोः कण्डूयनपरः कण्डूयनकृत्यव्यापृतः। एतेन तस्य हरिणशिशोस्तस्मिन् नृपे परमप्रीतिमूला विश्वस्तचित्तता व्यज्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ।
कुशाः काशा विराजन्ते वटवः सामगा इव (ढ)॥२७

इत्थं चिरगते तस्मिन् स चक्रे मानसं मुनिः ।
प्रीतिप्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ॥२८॥

समाधिभङ्गस्तस्यासीत् तन्ममत्वाद्दतात्मनः ।
सन्त्यक्तराज्यभोगर्द्धिस्वजनस्यापि भूपतेः ॥२९॥

चपलं चपले तस्मिन् दूरगं दूरगामिनि ।
मृगपोतेऽभवच्चित्तं स्थैर्य्यवत्तस्य भूपतेः ॥३०॥

कालेन गच्छता सोऽथ कालञ्चक्रे महीपतिः ।
पितेव सास्रं पुत्रेण मृगपोतेन वीक्षितः (ण) ॥३१॥

मृगमेव तदाद्राक्षीत् त्यजन् प्राणानसावपि ।
तन्मयत्वेन मैत्रेय ! नान्यत् किञ्चिदचिन्तयत् ॥३२॥

ततश्च तत्कालकृतां भावनां प्राप्य तादृशीम् ।
जम्बूमार्गे महारण्ये जातो जातिस्मरो मृगः ॥३३॥

[द्वितीयांश

जातिस्मरत्वादुद्विग्नः संसारस्य द्विजोत्तम !
विहाय मातरं भूयः शालग्राममुपाययौ (त) ॥३४॥

शुष्कैस्तृणैस्तथा पर्णैः स कुर्व्वन्नात्मपोषणम् ।
मृगत्वहेतुभूतस्य कर्म्मणो निष्कृतिं ययौ (थ) ॥३५॥

तत्र चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः ।
सदाचारवतां शुद्धे योगिनां प्रवरे कुले ॥३६॥

सर्व्वविज्ञानसम्पन्नः सर्व्वशास्त्रार्थतत्त्ववित् ।
अपश्यत् स च मैत्रेय ! आत्मानं प्रकृतेः परम् ॥३७॥

आत्मनोऽधिगतज्ञानो देवादीनि महामुने !
सर्व्वभूतान्यभेदेन स ददर्श महामतिः ॥३८॥

न पपाठ गुरुप्रोक्तं कृतोपनयनः श्रुतिम् ।
न ददर्श च कर्माणि शास्त्राणि जगृहे न च ॥३९॥

उक्तोऽपि बहुशः किञ्चिज्जड़वाक्यमभाषत ।
तदप्यसंस्कारगुणं ग्राम्यवाक्योक्तिसंश्रितम् ॥४०॥

कृपया तस्मिन् ममत्वे आहृतः सादरः आत्मा चित्तं यस्य सः । तन्मयत्वेति पाठे तन्मयत्वे तदाकारत्वे आहृतः आत्मा यस्य । हरिचित्तत्वं समाधिः ॥२९।३१॥

कालं चक्र मृत्यं प्राप ॥३१।३२॥

तत्कालकृतां भावनाम् अन्तकाले मृगचिन्ताम् । जम्बूमार्गे कालञ्जरे गिरौ 'कालञ्जरात् प्रत्याजगामे'ति शुकोक्तेः । हर्य्यनुग्रहात् जातिस्मरो मृगो जातः ॥३३।३४॥

इदानीं मृगत्वे हेतुभूतकर्मणः अन्ते तस्य चरमदेहेन जड़वत् चरितमाह—'तत्र चे'त्यादि 'बभूवाहारवेलेव' इत्यन्तेन ॥३६॥

अधिगतज्ञानः प्राप्तज्ञानः, आत्मनः स्वस्मात् सकाशात् अभेदेन सर्वभूतानि ददर्श । ऋषभदेवोपदिष्टस्यैव ज्ञानस्य प्रतिबन्धापगमे सत्याविर्भूतत्वात् ॥३७॥

ददर्श न च कर्माणि निवृत्तवर्णाश्रमाद्यभिमानत्वात् ॥३९॥

असंस्कारगुणम् । संस्कारः व्याकरणोक्तः । गुरुप्रयोचितप्रियहितादिः, तद्रहितं यथा भवति एवम् अभाषत ॥४०॥

(ढ) मृगशिशोरचिरोद्गतानां दशनानां कठिनभागलवनसामर्थ्याभावात् तैः लूनशिखा इति कुशकाशानां विशेषणम् । अत्र शिखा अग्रभागः कुशकाशानां, सा सुतरां कोमलेति कोमलैर्दशनैस्तल्लवनमुपपन्नम् । वटुपक्षे शिखाशब्दः केशचूड़ार्थक इति श्लेषानुप्राणितोपमालङ्कारः ।

(ण) पुत्रेण पिता इव मृगपोतेन तेन मृगशिशुना सास्रं सवाष्पं सरोदनमित्यर्थः, वीक्षितः कालं चक्रे मृत्युमवापेत्यन्वयः ।

(त) संसारस्य उद्विग्नः संसाराद् भीतः । संसारस्येत्यत्र सम्बन्धसामान्यविवक्षया षष्ठी ।

(थ) कर्मणः दुरदृष्टस्य निष्कृतिम् अन्तं ययौ प्राप ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अपध्वस्तवपुः सोऽपि मलिनाम्बरधृग् द्विजः ।
क्लिन्नदन्तान्तरः सर्वैः परिभूतः स नागरैः(द) ॥४१॥

सम्मानना परां हानिं योगर्द्धेः कुरुते यतः ।
जनेनावमतो योगी योगसिद्धिञ्च विन्दति(ध) ॥४२॥

तस्माच्चरेत वै योगी सतां मार्गमदूषयन् ।
जना यथावमन्येरन् गच्छेयुर्नैव सङ्गतिम्(न) ॥४३॥

हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः ।
आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने (प)॥४४॥

भुङ्क्ते कुल्माषव्रीह्यादिशाकं वन्यं फलं कणान् ।
यद् यदाप्नोति सुबहु तदत्ते कालसंयमम् ॥४५॥

पितर्युपरते सोऽथ भ्रातृ-भ्रातृव्य-बान्धवैः ।
कारितः क्षेत्रकर्मादि कदन्नाहारपोषितः (फ) ॥४६॥

स तूक्षपीनावयवो जड़कारी च कर्मणि ।
सर्वलोकोपकरणं बभूवाहारवेतनः ॥४७॥

[तं तादृशमसंस्कारं विप्राकृतिविचेष्टितम् ।
क्षत्ता पृषतराजस्य काल्यै पशुमकल्पयत् ॥४८॥
रात्रौ तं समलङ्कृत्य वैशसस्य विधानतः ।
अधिष्ठितं महाकाली ज्ञात्वा योगेश्वरं तथा ॥४९॥
ततः खड्गं समादाय निशितं निशि सा तथा ।
क्षत्तारं क्रूरकर्माणमच्छिनत् करठमूलतः ।
स्वपार्षदयुता देवी पपौ रुधिरमुल्वणम् ॥५०॥

अपध्वस्तवपुः मलीमसदेहः । क्लिन्नानि मलापूरितानि दन्तान्तराणि दन्तरन्ध्राणि यस्य सः ॥४१॥

सम्माननेत्यादिश्लोकद्वयं हिरण्यगर्भोक्तयोगशास्त्रवचनं विचिन्त्य ॥४२॥

सतां वर्त्म अदूषयन्, अवमानार्थमपि निषिद्धम् अकुर्वन् ॥४३॥

कुल्माषः किञ्चित्पक्वमाषयावकादिः । 'स्याद् यावकस्तु कुल्माषः' इत्यमरसिंहः । व्राह्यो माषादिविकार इन्दुकाख्यः । सुबहु असंकोचं यद्यदाप्नोति, तत्तदङ्गे लिम्पति देहाख्यं व्रणं लिम्पन्निव असक्तः सन् भुङ्क्ते इत्यर्थः । तथा च स्मृतिः—'शरीरं व्रणवत् पश्येदन्नञ्च व्रणलेपवत् । व्रणशोधनवत् पानं वस्त्रञ्च व्रणपट्टवदिति' कालसंयमं कालक्षपणमात्रं यथा भवति तथा । तदत्त इति पाठे तस्याभावे कालसंयमं कालनियमं विना दिवा नक्तं वा यदृच्छाप्राप्तं यत् किमपि भुङ्क्ते इत्यर्थः ॥४४।४५॥

भ्रातृव्याः भ्रातृपुत्राः ॥४६॥

जड़वत् करोतीति जड़कारी । आहारमेव वेतनं भृतिर्यस्य सः ॥४७॥

(द) परिभूतः अवमतः अवज्ञात इति यावत् ।

(ध) योगर्द्धेः योगसम्पदः ।

(न) चरेत इत्यत्रात्मनेपदमार्षम् । सङ्गतिं जनैः सहेति शेषः ।

(प) जड़स्य उन्मत्तस्य च आकृतिरिव आकृतिर्यस्य तथाभूतम्, आत्मानं दर्शयामास ; लोकवर्गासक्तिजनितोपप्लवनिराकरणाय योगिना जड़ोन्मत्तपिशाचवत् आत्मनः प्रत्यायनस्य शास्त्रसिद्धत्वात् ।

(फ) उपरते मृते सति । एतेन पितृमरणात् पूर्वं पितुर्भयादिकारणादेव पितृप्रिये तस्मिन् क्षेत्रकर्मनियोगादिरूपापव्यवहारविरहः सूच्यते ।

(ब) उक्षवत् वृषभवत् पीनाः परिपुष्टा मांसला इति यावत्, अवयवाः स्कन्धादिशरीरांशभेदा यस्य सः । सर्वेषां लोकानां जनानाम् उपकरणम् उपकारकारी आत्मपरनिर्विशेषं सर्व्वजनकृत्यनिष्पादक इत्यर्थः । 'बभूवाहारवेतन' इत्यनेन तस्मै य एवाहारमात्रमदत्त, तस्यैव स कार्य्यमकरोदिति व्यज्यते ।

(भ) असंस्कारा संस्कारशून्या विप्राकृतिः ब्राह्मणस्य आकारः विचेष्टितं व्यवहारश्च यस्य तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः सौवीरराजस्य प्रयातस्य महात्मनः ।
विष्टिकर्ताथ मन्येत विष्टियोग्योऽयमित्यपि ॥५१॥

तं तादृशं महात्मानं भस्मच्छन्नमिवानलम् ।]*
तं तादृशमसंस्कारं विप्राकृतिविचेष्टितम् ।
क्षत्ता सौवीरराजस्य विष्टियोग्यममन्यत ॥५२॥

स राजा शिविकारूढो गन्तुं कृतमतिर्द्विज !
बभूवेक्षुमतीतीरे कपिलर्षेर्वराश्रमम् ॥५३॥

श्रेयः किमत्र संसारे दुःखप्राये नृणामिति ।
प्रष्टुं तं मोक्षधर्मज्ञं कपिलाख्यं महामुनिम् (म) ॥५४

उवाह शिविकां तस्य क्षत्तुर्वचनचोदितः ।
नृणां विष्टिगृहीतानामन्येषां सोऽपि मध्यगः ॥५५॥

गृहीतो विष्टिना विप्रः सर्वज्ञानैकभाजनम् ।
जातिस्मरोऽसौ पापस्य क्षयकाम उवाह ताम् ॥

ययौ जड़गतिः सोऽथ युगमात्रावलोकनः ।
कुर्वन् मतिमतां श्रेष्ठस्तदन्ये त्वरितं ययुः(य) ॥५

विलोक्य नृपतिः सोऽथ विषमां शिबिकापतिम्
किमेतदित्याह समं गम्यतां शिबिकावहाः ॥५

पुनस्तथैव शिबिकां विलोक्य विषमां हि सः ।
नृपः किमेतदित्याह भवद्भिर्गम्यतेऽन्यथा ॥५

भूपतेर्वदतस्तस्य श्रुत्वेत्थं बहुशो वचः ।
शिबिकावाहकाः प्रोचुरयं यातीत्यसत्वरम् ॥६

राजोवाच

किं श्रान्तोऽस्यल्पमध्वानं त्वयोढा शिबिका मम ।
किमायाससहो न त्वं पीवानसि निरीक्ष्यसे(र) ॥६

इदानीं तस्य आत्मवित्त्वं प्रख्यापयितुम् आख्यानमाह 'तं तादृशमि'त्यादिना यावदध्यायसमाप्ति । क्षत्ता द्वाःस्थः सारथिर्वा । विष्टिर्निर्मूल्यं कर्म, तत्र योग्यम् । शिविकावाहनादौ क्षमत्वात् असंस्कृतविप्राकृतित्वाच्च । स्मर्यते हि— 'सायं प्रातर्यदा सन्ध्यां ये विप्रा नो उपासते । तान् स्वेषु धार्मिको राजा शूद्रकर्मसु योजयेत्' इति ॥५२॥

शिविका दारुमयं बहुपुरुषवाह्यं यानम् । ताम् आरूढो भूत्वा कपिलस्य वरम् आश्रमं गन्तुं कृतमतिः सन् स राजा शिविकावाहपुरुषागमनं प्रतीक्षमाणः इक्षुमत्या नद्याः तीरे बभूव ॥५३॥

तद्गमने प्रयोजनमाह—'श्रेय' इति ॥५४॥

जड़गतिः मन्दगतिः सन् ॥५७॥

किमेतत् विषमम् ? समं यथा भवति तथा गम्यतामित्याह ॥५८॥

अयमसत्वरं मन्दं यातीति प्रोचुः ॥६०॥

किं श्रान्तोऽसि त्वम् ? नैव श्रान्तोऽसि, यतः अल्पं अध्वानं त्वया शिबिका ऊढा आनीता । किञ्च किं त्वं आयाससहो न असि ? अपि तु असि । यतः पीवान् स्थूलो बलवान् निरीक्ष्यसे दृश्यसे । पीवानिति नलोपाभावश्च आर्षः ॥६१॥

(म) दुःखप्राये तापबहुले । इति श्रेयः किमित्यादिवाक्यप्रतिपाद्यं वस्तु, कपिलाख्यं महामुनिं प्रष्टुं कपिलर्षेर्वराश्रमं गन्तुं कृतमतिरिति पूर्वेण सम्बन्धः ।

* [ ] एतदाकारबन्धनीद्वयान्तर्गतभागः सर्वत्र पुस्तके न दृश्यते । श्रीधरेणाप्यस्य व्याख्या न कृता, अतः सर्वसम्मतिशून्यत्वादयं भागो बन्धनीद्वयगर्भे स्थापितः ।]

(य) युगमात्रस्य शिविकाङ्गभूतकाष्ठविशेषमात्रस्य अवलोकनं कुर्वन् तत्रैव स्थापितदृष्टिरित्यर्थः । 'यानाङ्गे युगपंसि युगं युग्मे कृतादिषु' इति नानार्थकोषात् ।

(र) अध्वानमित्यत्रात्यन्तसंयोगे द्वितीया ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्राह्मण उवाच

नाहं पीवान्न चैवोढा शिबिका भवतो मया ।
न श्रान्तोऽस्मि न चायासः सोढव्योऽस्ति
महीपते ॥६२॥

राजोवाच

प्रत्यक्षं दृश्यसे पीवानद्यापि शिबिका त्वयि ।
श्रमश्च भारोद्वहने भवत्येव हि देहिनाम् ॥६३॥

ब्राह्मण उवाच

प्रत्यक्ष भवता भूप ! यद् दृष्टं मम तद्वद ।
बलवानबलश्चेति वाच्यं पश्चाद् विशेषणम् ॥६४॥

त्वयोढ़ा शिबिका चेति त्वय्यद्यापि च संस्थिता ।
मिथ्यैतदत्र तु भवाञ्छृणोतु वचनं मम ॥६५॥

भूमौ पादयुगस्यास्था जङ्घे पादद्वये स्थिते ।
ऊरू जङ्घाद्वयावस्थौ तदाधारं तथोदरम्(ल) ॥६६॥

वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ ।
स्कन्धाश्रितेयं शिबिका मम भारोऽत्र किंकृतः ॥६७॥

शिबिकायां स्थितं चेदं वपुस्त्वदुपलक्षितम् ।
तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥६८॥

अहं त्वञ्च तथान्ये च भूतैरुह्याम पार्थिव ।
गुणप्रवाहपतितो भूतवर्गोऽपि यात्ययम्(व) ॥६९॥

कर्मवश्या गुणाश्चैते सत्त्वाद्याः पृथिवीपते !
अविद्यासञ्चितं कर्म्म तच्चाशेषेषु जन्तुषु ॥७०॥

राजा लोकव्यवहारविरोधम् उद्भावयन्नाह—'प्रत्यक्षं दृश्यसे' इति ॥६३॥

ब्राह्मणस्तु लोकप्रतीतेर्मिथ्यात्वाभिप्रायेणाह—प्रत्यक्षं भवता यद्दृष्टं देहो वा जीवो वा परमात्मा वा, तत् प्रथमं वद, विशेषणं पश्चाद्वाच्यं, विशेष्याश्रयत्वाद् विशेषणस्य ॥६४

देहपक्षे तावदात्मनो भाराभावमाह – 'त्वये'ति त्रिभिः ॥६५॥

आस्था स्थितिः । ऊर्वोर्जङ्घाद्वये अवस्थानम् । पादादिव्यतिरेकेण देहस्यानिरूप्यत्वात् पादादीनामेवोत्तरोत्तरं प्रति आधारत्वम्, अतो देहस्यैव तावद्भारो दुर्वचः । मम तु साक्षिणो भारः किन्निमित्तः स्यादित्यर्थः ॥६६॥

यच्चोक्तं 'त्वयोढ़ा शिविका ममे'ति, त्वदुपलक्षितं त्वया प्रीत्यैवात्मत्वेन दृष्टं शरीरमेव शिविकायां स्थितं, न तु त्वम्, अतस्तत्र तस्यां शिविकायां त्वम् अहम् अप्यत्र भूमौ इतीदमपि अन्यथा मिथ्यैव प्रोच्यते ॥६७।६८॥

जीवपक्षे अप्याह—'अहं त्वञ्च' इति द्वाभ्याम् । सर्वेष्वपि जीवेषु अविद्यासञ्चितकर्माधीनाः सत्त्वाद्या गुणाः तद्वशश्च भूतवर्गो देहो याति । तदेवंभूतैरेव देहाकारपरिणतैस्तदभिमानिनो वयं सर्वे जीवाः तं तं कर्मफलभोगदेशम् उह्याम प्राप्यामहे, अतो न सत्यो वाह्यवाहकभाव इत्यर्थः ॥६६।७०॥

(ल) आस्था स्थितिः । जङ्घाद्वये अवतिष्ठेते यौ तथाभूतौ । तौ ऊरू एव आधारः आश्रयः यस्य तथाभूतम् ऊरूद्वयावस्थितमित्यर्थः ।

(व) उह्याम इत्यत्र कर्मवाच्ये परस्मैपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्धयपचयौ नास्य एकस्याखिलजन्तुषु ॥७१॥

यदा नोपचयस्तस्य न चैवापचयो नृप !
तदा पीवानसीतीत्थं कया युक्त्या त्वयेरितम् ॥७२॥

भू-पाद-जङ्घा-कट्यूरु-जठरादिषु संस्थिते ।
शिबिकेयं यथा स्कन्धे तथा भारः समस्त्वया ॥७३॥

तदान्यैर्जन्तुभिर्भूप ! शिबिकोढा(१) न केवलम् ।
शैल-द्रुम-गृहोत्थोऽपि पृथिवीसम्भवोऽपि वा ॥७४॥

यदा पुंसः पृथग्भावः प्राकृतैः कारणैर्नृप !
सोढव्यस्तु तदायासः कथं वा नृपते ! मया ॥७५॥

यद्द्रव्या शिबिका चेयं तद्द्रव्यो भूतसंग्रहः ।
भवतो मेऽखिलस्यास्य ममत्वेनोपबृंहितः ॥७६॥

पराशर उवाच ।

एवमुक्त्वाभवन्मौनी स वहञ्छिबिकां द्विज !
सोऽपि राजावतीर्य्योर्व्यां तत्पादौ जगृहे त्वरन् ॥७७॥

राजोवाच

भो भो विसृज्य शिबिकां प्रसादं कुरु मे द्विज !
कथ्यतां को भवानत्र जाल्मरूपधरः स्थितः ॥७८॥

यो भवान् यन्निमित्तं वा यदागमनकारणम् ।
तत्सर्वं कथ्यतां विद्वन् ! मह्यं शुश्रूषवे
त्वया(श) ॥७९॥

ब्राह्मण उवाच

श्रूयतां कोऽहमित्येतद्वक्तुं भूप ! न शक्यते ।
उपभोगनिमित्तञ्च सर्वत्र गमनक्रिया ॥८०॥

परमात्मपक्षे तु त्वदुक्तं पीवत्वादिकमत्यन्तं निर्युक्तिकमित्याह—'आत्मे'ति । शुद्धः देहादिव्यतिरिक्तः, अक्षरः अचलः, शान्तः रागादिशून्यः, निर्गुणः सत्त्वादिगुणशून्यः, प्रकृतेरपि परश्च, अतोऽस्याखिलजन्तुष्वेकस्य परिपूर्णस्य प्रवृद्ध्यपचयौ न स्तः ॥७१॥

यदा चैतौ न स्तः, तदा पीवेति भाषणमयुक्तमित्यर्थः ॥७२

तदेवं मम देहादिव्यतिरिक्तत्वात् भारो नास्तीत्युक्तम् । इदानीं मद्व्यतिरिक्तस्कन्धे स्थितो भारो यदि मे स्यात्, तर्हि सर्वेषामपि किं न स्यात् । यदि वासंबद्धाया अपि शिबिकाया भारो ममोच्यते, तर्हि पर्वतादिभारोऽपि किं नोच्यते ? इत्याह 'भूपादे'ति द्वाभ्याम् । भूपादादिषु स्थिते स्कन्धे स्थितेयं शिबिका मम यदि भारः स्यात्, तदा स भारस्त्वया चान्यैश्च समः स्यादित्यर्थः । तद्वत तेषां चासौ भारः स्यादित्यर्थः ॥७३॥

अत एव च मया यः सोढ़व्यः सोऽपि नास्तीत्याह—'यदे'ति ॥७५॥

किञ्च शिबिकायाः तव मम सर्वदेहानाञ्च भौतिकत्वं समाने किं तवेयं शिबिका, त्वं वा शिबिकायाः, किमहं तव, त्वं वा ममेति गुणप्रधानभावे नियामकं नास्तीत्याशयेनाह—'यद्द्रव्ये'ति । भूतसंग्रहः देहः ॥७६॥

जाल्मरूपधरः जड़वेशधृक् ॥७८॥

को भवानित्येतद्विवृण्वन्नाह—'य' इति । यः यज्जातीयः, यन्निमित्तं येन प्रयोजनेन, तव इहागमनं, कारणं हेतुः, तत् सर्वं कथ्यताम् ॥७९॥

को भवानित्यस्योत्तरं वक्तुं न शक्यमित्याह—'श्रूयता-' मिति । अहं स एवेति वाच्योऽर्थः क इति वक्तुमशक्यमित्यर्थः । यन्निमित्तमित्यस्योत्तरमाह—'उपभोगे'ति ॥८०॥

(श) त्वरन्नित्यत्र त्वरतेरात्मनेपदिनः शतृप्रत्यय आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ ।
धर्माधर्मोद्भवौ भोक्तुं जन्तुर्देहादिमृच्छति ॥८१॥

सर्वस्यैव हि भूपाल ! जन्तोः सर्वत्र कारणम् ।
धर्माधर्मौ यतः कस्मात् कारणं पृच्छ्यते त्वया ॥८२

राजोवाच

धर्माधर्मौ न सन्देहः सर्वकार्य्येषु कारणम् ।
उपभोगनिमित्तञ्च देहाद्देहान्तरागमः (२) ॥८३॥

यत्त्वेतद् भवता प्रोक्तं कोऽहमित्येतदात्मनः ।
वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्त्तते ॥८४॥

योऽस्ति सोऽहमिति ब्रह्मन् ! कथं वक्तुं न शक्यते ।
आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज ॥८५॥

ब्राह्मण उवाच ।

शब्दोऽहमिति दोषाय आत्मन्येष तथैव तत् ।
अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ॥८६॥

जिह्वा ब्रवीत्यहमिति दन्तोष्ठौ तालुकं नृप !
एते नाहं यतः सर्वे वाङ्निष्पादनहेतवः ॥८७॥

किं हेतुभिर्वदत्येषा वागेवाहमिति स्वयम् ।
तथापि वाग् नाहमेतद् वक्तुमित्थं(४) न युज्यते ॥८८

पिण्डः पृथग् यतः पुंसः शिरःपाण्यादिलक्षणः(५) ।
ततोऽहमिति कुत्रैतां संज्ञां राजन् ! करोम्यहम् ॥८९॥

उपभोगस्य देशान्तरादिगमनप्रयोजनत्वं स्फुटयति,—'सुखदुःखे'ति। नियतदेशकालादिभोग्यञ्च सुख-दुःखयोः धर्माधर्मवशादित्याह—'धर्माधर्मे'ति ॥८१॥

यदागमनकारणम् इत्यस्योत्तरमाह—'सर्वस्ये'ति। यतः सर्वत्र सुख-दुःखभोगतत्साधनादौ धर्माधर्मावेव सर्वस्य कारणं ततो ममागमने विशेषतः का त्वया कस्मात् पृच्छ्यते इत्यर्थः ॥८२॥

राजा तु तदागमनकारणप्रयोजनप्रश्नद्वयोत्तरमङ्गीकुर्वन् प्रथमप्रश्नोत्तरमाक्षिपति—'धर्माधर्मावि'ति त्रिभिः ॥८३॥

कोऽहमित्येतदहंशब्दार्थत्वमात्मनो वक्तुं न शक्यते इति। यत्तु एतद्भवता प्रोक्तं, तत् श्रोतुमित्यन्वयः ॥८४॥

खपुष्पादितुल्यश्चेदात्मा स्यात्, तर्हि वक्तुं न शक्यते, न तु तदस्तीत्याह—'योऽस्ती'ति। यदि च गुरौ हुंकार-त्वंकारादिवदात्मन्यहंशब्दो दोषाय स्यात्, तर्हि वक्तुं न शक्यते, तच्च नास्तीत्याह—'आत्मनी'ति ॥८५॥

ब्राह्मणस्त्वात्मन्यहंशब्दप्रयोगे प्रत्यवायाभावमङ्गीकृत्य अहंशब्दस्य आत्मवाचकत्वासम्भवादशक्यत्वमुक्तमित्याह-'शब्दोऽहमि'त्यादिना। अहमित्येष शब्द आत्मनि दोषाय न भवतीति त्वया यदुक्तं, तत्तथैव। किन्तु अहंशब्दादनात्मन्यात्मविज्ञानं स्यात्। अहंशब्दश्चात्मनि भ्रान्तिलक्षणो मोहमूलः स्यात्, अहंशब्दस्य मिथ्यात्वविषयत्वादनात्मन्यात्मज्ञानं दोषाय स्यादित्यर्थः। तथा हि अहं ब्रवीमीत्यादिषु युष्मदर्थविलक्षणेऽहंशब्दप्रयोक्तुर्य्यहंशब्दः प्रयुज्यते। तत्प्रयोक्ता च किं जिह्वादिः वागिन्द्रियं वा देहो वा क्षेत्रज्ञो वा ॥८६॥

तत्र जिह्वादेरनात्मतामाह—'जिह्वे'ति। एते जिह्वादयो नाहम् अहंशब्दवाच्या न भवन्ति, जिह्वाहमित्यादिप्रयोगाभावात्। यतश्चैते वाक्यनिष्पादने हेतवः कारणानि, न तु कर्त्तारः, ततोऽप्येते नाहंशब्दवाच्याः ॥८७॥

वागिन्द्रियपक्षेऽप्यनात्मत्वमाह—'किमि'ति। हेतुभिर्जिह्वादिभिः सहकृता किं वागेव स्वयमहमिति वदतीति मतं, तथापि वागिन्द्रियमहं न भवामि, अत इत्यहमेतदुक्तं न युज्यते ॥८८॥

इन्द्रियस्यानात्मत्वमाह—'पिण्ड' इति। पिण्डो देहः पंस आत्मनः पृथगेव दृश्यत्वात् घटवदित्यर्थः ॥८९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम !
तदैषोऽहमयञ्चान्यो वक्तुमेवमपीष्यते ॥९०॥

यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान् कोऽहमित्येतद् विफलं वचः ॥९१

त्वं राजा शिबिका चेयमिमे वाहाः पुरःसराः ।
अयञ्च भवतो लोको न सदेतन्नृपोच्यते ॥९२॥

वृक्षाद् दारु ततश्चेयं शिबिका त्वदधिष्ठिता ।
किं वृक्षसंज्ञा वास्याः स्याद्दारुसंज्ञाथवा नृप ॥९३॥

वृक्षारूढो महाराजो नायं वदति ते जनः ।
न च दारूणि सर्वस्त्वां ब्रवीति शिबिकागतम् ॥९४
शिबिका दारुसङ्घातो रचनास्थितिसंस्थितः ।
अन्विष्यतां नृपश्रेष्ठ ! तद्भेदे शिबिका त्वया ॥९५
एवं छत्रशलाकानां पृथग्भागे विमृश्यताम् ।
क्व यातं छत्रमित्येष न्यायस्त्वयि तथा मयि ॥९६
पुमान् स्त्री गौरजो वाजी कुञ्जरो विहगस्तरुः(६)।
देहेषु लोकसंज्ञेयं विज्ञेया कर्म्महेतुषु ॥९७॥

पुमान्न देवो न नरो न पशुर्न च पादपः ।
शरीराकृतिभेदास्तु भूपैते कर्म्मयोनयः ॥९८॥

क्षेत्रज्ञपक्षेऽप्याह—'यदी'ति द्वाभ्याम्। मत्तोऽन्यः सजातीयः परो विजातीयो वा यदि कोऽप्यस्ति, तदा तच्छब्देनैषोऽहमिति वक्तुं युज्यते ॥९०॥

यदा सर्वदेहेष्वेक एवात्मा साक्षितया व्यवस्थितः, तदा को भवानिति बहुषु निर्द्धारणरूपं प्रश्नवचः सोऽहमित्यन्यात्मव्यावृत्त्या मम प्रतिवचश्च विफलम् ॥९१॥

ननु शिबिकाद्यचेतनभेदस्य वाह्यवाहकादिचेतनभेदस्य च दृश्यमानत्वात् कथमात्मनः सजातीय-विजातीयभेदो नास्तीत्याशंक्य तद्भेदस्य मिथ्यात्वमाह—'त्वं राजे'त्यादिना। लोकः परिजनादिः, एतत् सर्वं सन्नोच्यते, अपित् असदेव ॥९२॥

तत्र तावच्छिबिकाकारणमाह,—सरसो वृक्षः ततश्छिन्नं शुष्कं काष्ठं दारु। ततः चतुरस्रा रचितेयं शिबिका। तथा च वृक्षदारुसंज्ञयोरभावाद् व्यभिचारित्वेन वृक्षदारुणोर्मिथ्यात्वमित्यर्थः ॥९३॥

शिबिकावस्थायां वृक्षदारुसंज्ञानिवृत्तिं तद्व्यवहारनिवृत्त्योपपादयति—'वृक्षारूढ' इति ॥९४॥

शिबिकावस्थाया अपि मिथ्यात्वमाह—'शिबिकेति' रचनास्थित्या संस्थितो दारुसंघात एव शिबिका। तस्य भेदे काष्ठविभागे कृते शिबिका क्व गतेति त्वया तार्किणान्विष्यताम् ॥९५॥

एवं छत्रारम्भकाणां शलाकानां विभागे छत्रं क्व गतमिति विमृश्यताम्। तदेवं शिबिकादेः अचेतनस्य सत्यं निराकृत्य तमेव न्यायं चेतनत्वेन गृहीतेष्वप्यतिदिशति 'एष' इति। मयि मद्देहे त्वयि त्वद्देहे च विमृश्यतां शिरःपाण्यादिविभागे न त्वं न चाहमित्यर्थः ॥९६॥

ननु तर्हि व्यवहारस्य किं मूलमित्यपेक्षया वारम्भणमात्रमित्याह—'पुमान् स्त्री'ति। कर्मैव हेतुर्येषां तेषु देहेष्वेवेयं लोके संज्ञा न त्वात्मनि ॥९७॥

तस्य साक्षितया सर्वत्रैकरूप्यादिति दर्शयन्नाह—'पुमानि'ति ॥९८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वस्तु राजेति यल्लोके यच्च राजभटात्मकम्
तथान्यच्च नृपेत्थं तन्न सत्सङ्कल्पनामयम् ॥९९॥

यत्तु कालान्तरेणापि नान्यां संज्ञामुपैति वै ।
परिणामादिसम्भूतां तद्वस्तु नृप ! तच्च किम् ॥१००॥

त्वं राजा सर्व्वलोकस्य पितुः पुत्रो रिपो रिपुः ।
पत्न्याः पतिः पिता सूनोः किं त्वां भूप !
वदाम्यहम् ॥१०१॥

त्वं किमेतच्छिरः किं नु ग्रीवा तव तथोदरम् ।
किमु पादादिकं त्वं वा तवैतत् किं महीपते ॥१०२॥

समस्तावयवेभ्यस्त्वं पृथग् भूप ! व्यवस्थितः ।
कोऽहमित्यत्र निपुणो भूत्वा चिन्तय पार्थिव ॥१०३॥

एवं व्यवस्थिते तत्त्वे मयाहमिति भाषितुम् ।
पृथक् करणनिष्पाद्यं शक्यते नृपते ! कथम् ॥१०४॥

इति श्रीविष्णुपुराणे द्वितीयेंऽशे त्रयोदशोऽध्यायः ।

अतो लोकव्यवहारास्पदं वस्तु संकल्पमात्रविलसितमित्याह—'वस्त्वि'ति ॥९९॥

एतदेव परमार्थवस्तुवैलक्षण्येन स्फुटीकरोति—'यत्त्वि'ति। परिणामादिना जातं संज्ञान्तरं कालान्तरेणापि यन्न प्राप्नोति, तत् परमार्थवस्तु। तच्चात्र किं ? न किञ्चित्। राजादीनामपि बाल्ययौवनादिपरिणामादवस्तुत्वमित्यर्थः। तदुक्तं—'मही घटत्व'मित्यादि ॥१००॥

वर्त्तमानकालेऽप्यव्यवस्थितिरूपत्वान्मिथ्यात्वमित्याह—'त्वं राजे'ति ॥१०१॥

ननु राजादिरूपस्य प्रतियोगिभेदेन अव्यवस्थितत्वेऽपि शिरः-पाण्यादिमानहमेकरूप एवेत्यत्राह—'त्वमि'ति। अवयवावयविभावस्य निरुक्तेस्तदपि वक्तुमशक्यमिति भावः ॥१०२

ननु तथापि वरूथवनादिवदवयवसमूहरूपोऽहं वस्तुभूतः किं न स्यात् तत्राह—'समस्ते'ति। अवयवानामुपचयेऽपचयेऽपि द्रष्टृत्वेन पृथगैक्यरूपेण त्वं व्यवस्थितः। द्रष्टुश्च स्वप्रकाशतया शब्दादिगोचरत्वासम्भवात्। त्वमेव स्वानुभवेन चिन्तयेत्याह—'कोऽहमित्यत्रे'ति ॥१०३॥

अतो मया यदुक्तं 'कोऽहमित्येतद् वक्तुं न शक्यते' इति, तत् सिद्धमित्युपसंहरति—'एवमि'ति। एवमभिन्ने व्यवस्थिते सति पृथक्करणेनान्यव्यवच्छेदेन निष्पाद्यमुच्चार्य्यमेषोऽहमित्युत्तरं कथं भाषितुं शक्यमित्यर्थः ॥१०४॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयेंऽशे त्रयोदशोऽध्यायः ॥

पाठान्तराणि—

(७९—१)—शिबिकोत्थो— ।
(८३—२)—देहदेशान्तरागमः ।
(८७—३)—दन्तौष्ठं— ।
(८८—४)—अतः पीवनसीत्येतद् वक्तुमित्थं— ।
(८९—५)—पादपाण्यादिलक्षणः ।
(९७—६)—कुञ्जरोऽविर्हरिस्तरुः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्दशोऽध्यायः

(राज्ञः सौवीरस्य प्रश्नः, भरतस्योत्तरदानञ्च)

पराशर उवाच

निशम्य तस्येति वचः परमार्थसमन्वितम् ।
प्रश्रयावनतो भूत्वा तमाह नृपतिर्द्विजम्(क) ॥१॥

राजोवाच

भगवन् ! यत्त्वया प्रोक्तं परमार्थमयं वचः ।
श्रुते तस्मिन् भ्रमन्तीव मनसो मम वृत्तयः(ख) ॥२॥
एतद्विवेकविज्ञानं यदशेषेषु जन्तुषु ।
भवता दर्शितं विप्र ! तत्परं प्रकृतेर्महत् ॥३॥
नाहं वहामि शिबिकां शिबिका न मयि स्थिता ।
शरीरमन्यदस्मत्तो येनेयं शिबिका धृता ॥४॥
गुणप्रवृत्त्या भूतानां प्रवृत्तिः कर्म्मचोदिता ।
प्रवर्त्तन्ते गुणा ह्येते किं ममेति(१) त्वयोदितम् ॥५॥
एतस्मिन् परमार्थज्ञ ! मम श्रोत्रपथं गते ।
मनो विह्वलतामेति परमार्थार्थितां गतम् ॥६॥
पूर्वमेव महाभागं कपिलर्षिमहं द्विज !
प्रष्टुमभ्युद्यतो गत्वा श्रेयः किं त्वत्र शंस मे ॥७॥
तदन्तरे च भवता तदेतद्वाक्यमीरितम् ।
तेनैव परमार्थार्थं त्वयि चेतः प्रधावति ॥८॥
कपिलर्षिर्भगवतः सर्व्वभूतस्य वै द्विज !
विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः ॥९॥
स एव भगवान् नूनमस्माकं हितकाम्यया ।
प्रत्यक्षतामत्र गतो यथैतद् भवतोच्यते ॥१०॥
तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज !
तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान् ॥११॥

चतुर्दशः अध्यायः

नाहमित्यादिवाक्येन प्रमाणासम्भवे गते। प्रमेयासम्भवाशङ्की भूयो भूयोऽथ पृच्छति ॥१॥

नाहं पीवेत्यादिवाक्यश्रवणतः प्रमाणासम्भावनायां निवृत्तायामपि नानादर्शनप्रसिद्धश्रेयसां परमार्थत्वे सति आत्मैव परमार्थ इत्यस्य प्रमेयस्य असम्भावनया पृच्छति—'भगवन्नि'ति दशभिः ॥२॥

तर्हि मया किं सन्दिग्धमुक्तं येन तव मनसो वृत्तयो भ्रमन्तीत्यत आह—'एतदि'ति। यदेतत् विवेकविज्ञानं भवता दर्शितं, तत् प्रकृतेः परं महद्ब्रह्मैव दर्शितं ; न तु तद्वाक्ये सन्देहः कश्चिदस्तीत्यर्थः ॥३।६

तद्वाक्यमेवानुवदंस्तत्र सन्देहाद्यभावं दर्शयन्नाह—'पूर्वमेवे'ति। अत्र संसारे किं श्रेयः संश्रय इति कपिलमहर्षिं गत्वा प्रष्टुमभ्युद्यतोऽस्मि ॥७।८॥

यथैतद् भवतोच्यते तेन स एव प्रत्यक्षतां गत इति मन्ये, अन्यथैवंविधोक्तेरसम्भवादिति भावः ॥१०॥

अखिलानि यानि विज्ञानानि तत्तद्दर्शनानि तान्येव जलवीचयो यस्मिन् स उदधिः परमज्ञानार्णवो भवान्। अतः परमार्थभूतं श्रेयो वदेत्यर्थः ॥११॥

(क) प्रश्रयेण प्रणयेन प्रीतिपूर्वकप्रार्थनया वा अवनतः विनम्रः। 'प्रश्रय-प्रणयौ समा' विश्वमरः, 'प्रीत्या प्रार्थने प्रश्रय' इति रायमरतौ।

(ख) मनसः वृत्तयः ज्ञानरूपाः, भ्रमन्तीव नानाकोटिषु भ्रमणं कुर्वन्तीव, नैकस्यां कोटौ स्थैर्य्यमालम्बन्त इत्यर्थः। सांख्यनये ज्ञानादीनां मनोवृत्तित्वं प्रसिद्धमेव।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्राह्मण उवाच

भूप ! पृच्छसि किं श्रेयः परमार्थं नु पृच्छसि ।
श्रेयांसि परमार्थानि(२) अशेषाणि च भूपते ॥१२॥

देवताराधनं कृत्वा धनसम्पदमिच्छति ।
पुत्रानिच्छति राज्यञ्च श्रेयस्तस्यैव तन्नृप ॥१३॥

कर्म्म यज्ञात्मकं श्रेयः स्वर्लोकफलदायि च(ग)(३) ।
श्रेयः प्रधानञ्च फले तदेवानभिसंहिते ॥१४॥

आत्मा ध्येयः सदा भूप ! योगयुक्तैस्तथापरम् ।
श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मना(घ) ॥१५॥

श्रेयांस्येवमनेकानि शतशोऽथ सहस्रशः ।
सन्त्यत्र परमार्थस्तु तत्त्वतः(४) श्रूयतां च मे ॥१६॥

धर्म्माय त्यज्यते किन्नु परमार्थो धनं यदि ।
व्ययश्च क्रियते कस्मात् कामप्राप्त्युपलक्षणः ॥१७॥

पुत्रश्चेत् परमार्थः स्यात् सोऽप्यन्यस्य नरेश्वर !
परमार्थभूतः सोऽन्यस्य परमार्थो हि तत्पिता ॥१८॥

एवं न परमार्थोऽस्ति जगत्यस्मिंश्चराचरे ।
परमार्थो हि कार्याणि कारणानामशेषतः ॥१९॥

राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि ।
परमार्था भवन्त्यत्र न भवन्ति च वै ततः ॥२०॥

ऋग्-यजुः-सामनिष्पाद्यं यज्ञकर्म्म मतं तव ।
परमार्थभूतं तत्रापि श्रूयतां गदतो मम ॥२१॥

तत्र शास्त्रान्तरसम्मतेभ्यः श्रेयोभ्य आत्मतत्त्वमेव परमार्थ इति निर्णेतुं श्रेयःपरमार्थयोर्भेदं विकल्पपूर्वकमाह—'भूपे'ति । नु विकल्पे श्रेयांसि परमार्थभूतानि न वेति विकल्पे, 'अपरमार्थानी'ति पाठे न विद्यते परमार्थभूतोऽर्थो येषु तानि तथा ॥१२॥

तान्येव श्रेयांस्युत्तरोत्तरमुत्कृष्टानि सप्तोपन्यस्यति—'दिवते'ति त्रिभिः । यो हि धनं पुत्रं राज्यं वेच्छति, तस्य तदेव श्रेय इत्यन्वयः ॥१३॥

फले नाभिसंहिते असंकल्पिते तद्यज्ञादि कर्मैव प्रधानं मुख्यं श्रेयः । संकल्पिते तु यज्ञादिसाध्यं स्वर्गादिकमेव श्रेय इत्यर्थः ॥१४

'आत्मा ध्येय' इति—श्रेयः आत्मध्यानं श्रेय इत्यर्थः । तस्यैवात्मनः स्वस्य यः परमात्मना संयोगः स परं श्रेयः ॥१५

श्रेयांस्येवमनेकानीत्येतदुक्तं भागवते — 'धर्ममेके यशश्चान्ये कामं सत्यं श्रमं दमम् । अन्ये वदन्ति स्वार्थं वै ऐश्वर्य्यं त्यागभोजनम् । केचिद् यज्ञं तपो दानं व्रतानि नियमान् यमान् । आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्म्मिताः । दुःखोदर्कास्तपोनिष्ठाः क्षुद्रानन्दाः शुचार्पिताः' । इत्यादिना ॥१६

धनादीनाम् अपरमार्थत्वमुपपादयति—'धर्माये'त्यादिना 'संक्षेपाच्छ्रूयतां ममे'त्यन्तेन । कामप्राप्तिरुपलक्षणं निमित्तं यस्य व्ययस्य सः । 'पुत्रश्चे'ति द्वाभ्याम् । यस्य पुत्रः परमार्थाख्यः स पिताप्यन्यपुत्रत्वात् परमार्थभूतः, सोऽन्यस्य, तत्पिताप्यन्यस्य ॥१७

इत्येवं परमार्थः कोऽपि नास्तीत्यतिप्रसंगः स्यात् । यस्मात् कार्याणि जन्यानि पुत्रादीनि कारणानां जनकानां परमार्थः स्यात्, तस्मादशेषः परमार्थः स्यात् ॥१९॥

अत्र पक्षे परमार्था भवन्ति न भवन्ति चेति काक्वा योज्यम् । आगमापायित्वाद्राज्यादिकं न परमार्थ इत्यर्थः ॥२०

(ग) स्वः स्वर्गं एव लोकः स एव फलं तत् दातुं शीलं यस्य तत् । स्वः स्वर्गस्य 'यत्र दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम् ।' इत्युक्तलक्षणसुखविशेषस्य लोकः स्थानविशेषः, तत्फलदायीत्यर्थः ।

(घ) आत्मा जीवात्मा, तस्य जीवात्मनः परमात्मना संयोगः श्रेयः श्रेयःस्वरूपः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्तु निष्पाद्यते कार्य्यं मृदा कारणभूतया ।
तत् कारणानुगमनाज्जायते नृप ! मृन्मयम् ॥२२॥
एवं विनाशिभिर्द्रव्यैः समिदाज्य-कुशादिभिः ।
निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी ॥२३
अनाशी परमार्थस्तु प्राज्ञैरभ्युपगम्यते ।
तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम्(ङ) ॥२४।
तदेवाफलदं कर्म्म परमार्थो मतस्तव ।
मुक्तिसाधनभूतत्वात् परमार्थो न साधनम् ॥२५॥
ध्यानं चैवात्मनो भूप ! परमार्थार्थशब्दितम् ।
भेदकारि परेभ्यस्तु परमार्थो न भेदवान् ॥२६॥
परमात्मात्मनोर्योगः परमार्थ इतीर्य्यते ।
मिथ्यैतदन्यद् द्रव्यं हि नैति तद्द्रव्यतां यतः(च) ॥२
तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः ।
परमार्थस्तु भूपाल ! सङ्क्षेपाच्छ्रूयतां मम ॥२७॥
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ।
जन्मवृद्ध्यादिरहित आत्मा सर्व्वगतोऽव्ययः(छ) ॥

यज्ञादिसाध्यस्य स्वर्गादेरप्यनित्यतां साधयन्नपरमार्थतामाह—'ऋगि'ति चतुर्भिः। यज्ञकर्मेति यज्ञैराप्तुमिष्टतमं स्वर्गादिकं परमार्थभूतं यदि मतमित्यर्थः ॥२१।२२

या क्रिया निष्पाद्यते इति क्रियाद्वारा अपूर्वं स्वर्गादिकञ्च यन्निष्पाद्यते तद् विनाशि भवेदित्यर्थः ॥२३।२४

मुक्तिसाधनभूतत्वादफलदमित्येतन्नास्ति, यतश्चान्यार्थत्वात् परमार्थो न भवतीत्यर्थः ॥२५

परेभ्यो देहादिभ्यो विविच्यात्मनश्चित्तालम्बनीभूतस्य ध्येयत्वाद् ध्यानं भेदकारिपरमार्थश्च न भेदवान्, एकमेवाद्वितीयं ब्रह्मेति श्रुतेः ॥२६

जीवपरमात्मनोरैक्योपासनया तादात्म्यलक्षणो योगः परमार्थ इत्येतदपि मतं मिथ्यैव। तथा हि तयोर्भिन्नयोरभिन्नयोर्वा योगः स्यात्। भिन्नत्वे गवाश्वयोरिवैक्यासम्भवः, अभिन्नत्वे च विम्बप्रतिविम्बयोरिव उपाधिव्युदासमात्रं विना योगशब्दार्थो नास्तीत्यर्थः ॥२७

तस्मात् श्रेयांसि आपेक्षिकाणि भवन्ति, न तु परमार्थरूपाणि। परमार्थस्तु आत्मैवेत्यन्वयः ॥२८

स च एक एव, न तु प्रतिदेहभिन्नः, व्यापी साक्षितया सर्वव्यापकः, समः एकरूपः, न तु ज्ञानादिपरिणामैरनेकरूपः, शुद्धः कर्त्तृत्वादिकालुष्यशून्यः, अतो जन्मवृद्धादिभिर्देहादिविकारैरसंस्पृष्टः। अत एव सर्वगतः, न तु देहपरिमाणः, अतो मध्यपरिमाणत्वाभावाद् अव्ययः ॥२९

(ङ) अनाशी नाशाप्रतियोगी अविनश्वरः पदार्थः परमार्थः प्राज्ञैः प्रकृष्टज्ञानशालिभिः अभ्युपगम्यते। ध्वंसप्रतिनाशिना द्रव्येण उपपादितं जनितम्।

(च) परमात्मात्मनोः परब्रह्मजीवात्मनोः। अन्यत् किञ्चिदपेक्षया भिन्नं द्रव्यं तद्द्रव्यतां तद्द्रव्यतादात्म्यं नैति न प्राप्नोतीत्यर्थः, भेदप्रतियोगितावच्छेदकयोर्मिथो विरोधात्।

(छ) सर्वगतोऽव्यय इत्यत्र 'अत एव सर्वगतः, न तु देहपरिमाणः, अतो मध्यमपरिमाणत्वाभावादव्यय' इति स्वामी—

सर्वगत इत्यनेन जैनानां देहपरिमाणस्यात्मनः प्रतिषेधः कृतः। ते हि देहपरिमाणमात्मानं मन्यन्ते। सङ्कोचविकाशशक्तः स यदा हस्तिदेहं विशति, तदा हस्तिदेहपरिमाणो भवति, यदा च पिपीलिकादिक्षुद्रकीटदेहं विशति, तदा सङ्कोचेन पिपीलिकादितत्तत्क्षुद्रकीटशरीरपरिमितो भवतीति तेषां सिद्धान्तः।

अत इति देहपरिमाणत्वाभावादित्यर्थः। अयञ्च मध्यमपरिमाणत्वाभावे हेतुरुपदर्शितः, मध्यमपरिमाणत्वाभावश्चाव्ययत्वे। अत्र हेत्वंशे परिमाणवत्त्वे सतीति विशेषणं योज्यम्, अन्यथा रूपादौ व्यभिचारात्। तद्विशेषणयोजने च परिमाणवत्त्वविशेषितस्य मध्यमपरिमाणत्वाभावस्य सर्वापेक्षया निकृष्टपरिमाणे परमाणौ परममहत्याकाशादौ नित्यद्रव्य एव च वर्त्तमानत्वात् तत्र च नियमेनाव्ययत्वस्यावाधितत्वेन क्षत्यभावात्। रूपादौ तु मध्यमपरिमाणत्वाभावस्य केवलस्य सत्त्वेऽपि तत्र परिमाणवत्त्वरूपविशेषणाभावाद् विशिष्टस्य प्रकृतहेतोरभावेनाव्ययत्वस्य साध्यस्य तत्रासत्त्वेऽपि न क्षतिरिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ।
न योगवान्न युक्तोऽभून्नैव पार्थिव ! (ज)
योज्यते (५) ॥३०

तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतत्त्वदर्शिनः (६) ॥३१

वेणुरन्ध्रप्रभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोस्तथा तस्य
महात्मनः (७)(ञ) ॥३२

एकत्वं रूपभेदश्च बाह्यकर्म्मप्रवृत्तिजः ।
देवादिभेदेऽपध्वस्ते नास्त्येवावरणे हि सः ॥३३॥

इति श्रीविष्णुपुराणे द्वितीयेंऽशे चतुर्दशोऽध्यायः ।

परज्ञानमयः नित्यज्ञानरूपः, न तु क्षणिकज्ञानात्मा। असद्भिः अविद्यामयैः नामजात्यादिभिः वर्त्तमानभूतभविष्यत्कालेषु योगशून्यः। अतः विभुः ईश्वरः स्वतन्त्र इत्यर्थः ॥३०

ननु प्रतिदेहमात्मनो भेदविकारादिप्रतीतेः कथमेकत्वसर्वगतत्वादि ? तत्राह—'तस्ये'ति। आत्मपरदेहेषु तद्देहाकारावच्छिन्नतया सतः स्फुरतोऽप्येकाकारं यद्विशिष्टं स्वप्रकाशापरिच्छिन्नं ज्ञानं स एव परमार्थः, भेदप्रतीतेरुपाधिनिबन्धनत्वात्। द्वैतवादिनोऽपरमार्थदर्शिनः ॥३१

एतद् दृष्टान्तेनोपपादयति—'वेणुरन्ध्रे'ति द्वाभ्याम्। अभेदस्य व्यापिनो वायोर्यथा वेणुरन्ध्रोपाधिभेदेन षड्जर्षभगान्धारादिस्वराभिव्यञ्जकत्वात् न तन्नादसंज्ञितो भेदस्तथा तस्य महतोऽपरिच्छिन्नस्य आत्मनः स्वत एकत्वम् ॥३२॥

रूपभेदस्तु देवमनुष्यादिलक्षणो बाह्यकर्मप्रवृत्तिजः बाह्यानामात्मनः पृथग्भूतानां देहेन्द्रियादीनां यत् कर्म तस्य प्रवृत्तिः फलं ततो जातः। पाठान्तरे बाह्यानां देहानां कर्मभिः या आवृतिः आवरणं ततः प्रजायते इति बाह्यकर्मावृतिप्रजो भेदः, न तु स्वतः। तत्र हेतुः,—यस्मात् देवादिभेदे अपध्वस्ते भिद्यते अनेनेति भेदः अहंकारः, देवादिभेदे देहे तावत् अहंकारावरणे सुषुप्त्यादौ विनष्टे स भेदो नास्त्येव। 'देवादिभेदमध्यास्ते' इति पाठे तु बाह्यकर्मावरणनिमित्तो रूपभेदोऽहंकार एव देवादिभेदम् अध्यास्ते अधिकृत्य वर्त्तते, स्वतस्तु भेदो नास्त्येव, यस्मात् आवरणे सति स भेदः नान्यदेवेत्यर्थः ॥३३॥

(ज) न योगवानिति भाविनि कालेन युक्तो भविष्यतीत्यर्थः। न युक्तोऽभूत् अतीते काले युक्तो न बभूवेत्यर्थः। न योज्यते वर्त्तमाने काले न युक्तो भवतीत्यर्थः। अत एवोक्तं स्वामिना 'वर्त्तमानभूत-भविष्यत्कालेषु योगशून्य इति।

(ञ) अभेदव्यापिन इति—न विद्यते भेदः षड्जादिसंज्ञाभेदेऽपि तत्त्वतो भेदः यस्य सः अभेदः, स चासौ व्यापी चेति कर्मधारयः। तथा हि यथा एक एव वायुः वेणुरन्ध्रभेदेन षड्जर्षभगान्धारादिसंज्ञया व्यवहृतोऽपि न तत्त्वतो भिद्यते तथा इत्युपमार्थः।

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयांशे चतुर्दशोऽध्यायः ॥

पाठान्तराणि—
(५—२)—किमेतद् यत्—।
(१२—२)—श्रेयांस्यपरमार्थानि—।
(१४—३)—फलं स्वर्गादिलक्षणम्।
(२६—४)—न त्वेते—।
(३०—५)—योज्यते—।
(३१—६)—द्वैतिनोऽतथ्यदर्शिनः।
(३२—७)—परमात्मनः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चदशोऽध्यायः ।

[ऋभु-निदाघसंवादः ।]

पराशर उवाच ।

इत्युक्ते मौनिनं भूयश्चिन्तयानं महीपतिम् ।
प्रत्युवाचाथ विप्रोऽसावद्वैतान्तर्गतां कथाम्(क) ॥१।

ब्राह्मण उवाच

श्रूयतां नृपशार्दूल ! यद्गीतमृभुणा पुरा ।
अवबोधं जनयता निदाघस्य महात्मनः ॥२॥

ऋभुर्नामाभवत् पुत्रो ब्रह्मणः परमेष्ठिनः ।
विज्ञाततत्त्वसद्भावो निसर्गादेव भूपते ॥३॥

तस्य शिष्यो निदाघोऽभूत् पुलस्त्यतनयः पुरा ।
प्रादादशेषविज्ञानं स तस्मै परया मुदा(ख) ॥४॥

अवाप्तज्ञानतत्त्वस्य न तस्याद्वैतवासनाम् ।
स ऋभुस्तर्कयामास निदाघस्य नरेश्वर(ग) ॥५॥

देविकायास्तटे वीरनगरं नाम वै पुरम् ।
समृद्धमतिरम्यं च पुलस्त्येन निवेशितम् ॥६॥

रम्योपवनपर्य्यन्ते स तस्मिन् पार्थिवोत्तम !
निदाघो नाम योगज्ञ ऋभुशिष्योऽवसत् पुरा(घ) ॥७॥

दिव्ये वर्षसहस्रे तु समतीतेऽस्य तत्पुरम् ।
जगाम स ऋभुः शिष्यं निदाघमवलोककः ॥८॥

स तस्य वैश्वदेवान्ते द्वारालोकनगोचरे ।
स्थितस्तेन गृहीतार्घ्यो निजवेश्म प्रवेशितः ॥९॥

पञ्चदशः अध्यायः

प्रमाणतर्कतः सम्यङ्माने मेयेऽपि निश्चिते । बुद्ध्यसम्भावनोत्थित्यै निदाघाख्यानमीर्य्यते ॥ इत्युक्ते प्रमाणोपपत्तिभ्यामात्मैक्ये निरूपितेऽपि विपरीते भावनादार्ढ्यात् बुद्ध्यसम्भावनया मौनिनं तूष्णीं चिन्तयानं भूयो विप्रः प्रत्युवाच ॥१।२॥

निसर्गात् स्वभावादेव विज्ञातः तत्त्वस्य सद्भावो याथार्थ्यं येन सः ॥३।४॥

दृष्टादृष्टयोरासक्त्या तस्याद्वैतवासनां न तर्कयामास देविकाया नद्यास्टटे ॥६॥

रम्यः उपवनपर्य्यन्तो यस्य तस्मिन् । योगज्ञः प्रवीणः ॥७॥

(क) चिन्तयमानमिति व्यक्तव्ये चिन्तयानमिति वचनमार्षम् । अद्वैतान्तर्गताम् अद्वैतविषयिणीम् ।

(ख) सः ऋभुः । तस्मै निदाघाय शिष्याय ।

(ग) अवाप्तज्ञानतत्त्वस्य गुरूपदेशादधिगतयथार्थस्यापि तस्य निदाघस्य । अद्वैतवासनाम् अद्वैतगोचरं ज्ञानं न तर्कयामास ।

(घ) रम्यः उपवनपर्य्यन्तो यस्य तस्मिन् इति बहुव्रीहिः । अत्र रम्यम् उपवनं यत्र तथाभूतः पर्य्यन्तः अवधिर्यस्मिन् तथाभूते तस्मिन् वीरनगरनाम्नि पुरे—इति वार्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रक्षालिताङ्घ्रिपाणिं च कृतासनपरिग्रहम् ।
उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरम्(ङ) ॥१०

ऋभुरुवाच ।

भो विप्रवर्य्य ! भोक्तव्यं यदन्नं भवतो गृहे ।
तत् कथ्यतां कदन्नेषु न प्रीतिः सततं मम ॥११॥

निदाघ उवाच ।

भक्त्यावक-वाट्यानामपूपानाञ्च मे गृहे ।
यद् रोचते द्विजश्रेष्ठ ! तत् त्वं भुङ्क्ष्व यथेच्छया॥१२

ऋभुरुवाच ।

कदन्नानि द्विजैतानि मृष्टमन्नं प्रयच्छ मे ।
संयाव-पायसादीनि द्रप्स्यफाणितवन्ति च(च) ॥१३॥

निदाघ उवाच ।

हे शालिनि मद्गेहे यत् किञ्चिदतिशोभनम् ।
भक्ष्योपसाधनं मृष्टं तेनास्यान्नं प्रसाधय(छ) ॥१४॥

ब्राह्मण उवाच ।

इत्युक्ता तेन सा पत्नी मृष्टमन्नं द्विजस्य यत् ।
प्रसाधितवती तद् वै भर्त्तुर्वचनगौरवात् ॥१५॥

तं भुक्तवन्तमिच्छातो मृष्टमन्नं महामुनिम् ।
निदाघः प्राह भूपाल ! प्रश्रयावनतः स्थितः ॥१६॥

निदाघ उवाच ।

अपि ते परमा तृप्तिरुत्पन्ना तुष्टिरेव च ।
अपि ते मानसं स्वस्थमाहारेण कृतं द्विज ॥१७॥

क्व निवासो भवान् विप्र ! क्व च गन्तुं समुद्यतः ।
आगम्यते च भवता यतस्तच्च द्विजोच्यताम् (ज) ॥१८॥

ऋभुरुवाच ।

क्षुद् यस्य तस्य भुक्तेऽन्ने तृप्तिर्ब्राह्मण ! जायते ।
न मे क्षुन्नाभवत् तृप्तिः कस्मान्मां परिपृच्छसि ॥१९

'तुमुण्णुलौ क्रियायां क्रियार्थायाम्' इति णुलि युवोरनाकावित्यकादेशे सत्यवलोकक इति रूपम् अवलोकयितुमित्यर्थः ॥८॥

(ङ) प्रक्षालितौ अङ्घ्रिपाणी करचरणौ येन तम् । कृतः आसनस्य परिग्रहो येन तम्, करचरणौ प्रक्षाल्य समुपविष्टमित्यर्थः । तम् ऋभुमिति शेषः । स द्विजश्रेष्ठः निदाघः ।

(च) द्रप्स्यमित्यत्र त्रप्स्यमिति केचित् पठन्ति । तन्मते 'त्रप्स्यं दधि घनेतरत्' इति कोषेऽपि पाठः । घनेतरत् तरलं दधि त्रप्स्यम् अथवा द्रप्स्यमित्यर्थः । 'फाणितं विकृतिगौड़ी'तिरभुरायुध इति स्वामी । गौड़ी गुड़भवा विकृतिः गुड़स्य विकार इत्यर्थः, फाणितम् फाणितपदार्थः इत्यर्थः ।

(छ) भक्ष्यस्योपसाधनमुपस्कर इति स्वामी । उपस्करः 'वेसवारः सूपव्यञ्जनादिसाधनाङ्गोपकरणविशेषः । 'वेसवार उपस्कर' इत्यमरकोषात् ।

तच्चित्तपरीक्षार्थमाह—'भो विप्रवर्य्ये'त्यादि ॥११॥

यावको यवविकारः । वाट्यं वाटीभवं कन्दमूलफलादि ॥१२॥

मृष्टं मधुरम् संयावो गोधूमादिविकारस्तन्तुसन्निभः । 'द्रप्स्यं दधि घनेतरत्' इत्यमरसिंहः । 'फाणितं विकृतिगौड़ी' इति हलायुधः ॥१३॥

शालिनि श्लाघ्ये प्रिये, भक्ष्यस्योपसाधनमुपस्करः ॥१४।१६॥

तृप्तिः क्षुत्तृषोः शान्तिः, तुष्टिः सन्तोषः, स्वस्थं प्रकृतिस्थम् ॥१७

(ज) यतः स्थानाद् आगम्यते, तत् आगमनावधिभूतं स्थानमित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वह्निना पार्थिवे धातौ क्षयिते क्षुत्समुद्भवः ।
भवत्यम्भसि च क्षीणे नृणां तृड़पि जायते(झ) ॥२०॥

क्षुत्तृषौ देहधर्म्माख्ये न ममैते यतो द्विज !
ततः क्षुत्सम्भवाभावात् तृप्तिरस्त्येव मे सदा ॥२१॥

मनसः स्वस्थता तुष्टिश्चित्तधर्म्माविमौ द्विज !
चेतसो यस्य तत् पृच्छ पुमानेभिर्न युज्यते ॥२२॥

क्व निवासस्तवेत्युक्तं क्व गन्तासि स यत् त्वया ।
कुतश्चागम्यते तत्र त्रितयेऽपि निबोध मे ॥२३॥

पुमान् सर्व्वगतो व्यापी आकाशवदयं यतः ।
कुतः कुत्र क्व गन्तासीत्येतदप्यर्थवत् कथम् ॥२४॥

नाहं(३) गन्ता न चागन्ता नैकदेशनिकेतनः ।
त्वं चान्ये च न च त्वं त्वं नान्ये नैवाहमप्यहम् ॥२५॥

मृष्टं न मृष्टमप्येषा जिज्ञासा मे कृता तव ।
किं वक्ष्यसीति तत्रापि श्रूयतां द्विजसत्तम ॥२६॥

किमस्वाद्वथवा मृष्टं भुञ्जतोऽन्नं द्विजोत्तम !
मृष्टमेव यदामृष्टं तदैवोद्वेगकारकम् ॥२७॥

अमृष्टं जायते मृष्टं मृष्टादुद्विजते जनः ।
आदिमध्यावसानेषु किमन्नं रुचिकारकम् ॥२८॥

मृन्मयं हि गृहं यद्वन्मृदा लिप्तं स्थिरं भवेत् ।
पार्थिवोऽयं तथा देहः पार्थिवैः परमाणुभिः ॥२९॥

क्व निवासस्तवेति शेषः ॥१८२०॥

देहधर्माख्ये देहस्य धर्माभ्यां पार्थिवाप्यधातुक्षयाभ्यामाख्यायेते । ते च तद्द्वारा प्राणधर्मौ, अशनाया पिपासे प्राणस्ये'ति श्रुतेः । मम प्राणव्यतिरिक्तस्यैते न स्तः । क्षुन्निमित्ते दुःखाभावसाम्यात् तृप्तिरस्त्येवेत्युपचारः ॥२१॥

मनसः स्वस्थता च तुष्टिश्चेति यत् पृष्टम्, इमौ तु चित्तस्य धर्मौ, अतो यस्य चेतसश्चित्तस्य इमौ धर्मौ तच्चित्तमेव पृच्छ, न त्वं पुमान् प्रश्नार्हः । यतः पुमानेभिः प्राणचित्तधर्मैस्तृप्तिस्वास्थ्यैर्न युज्यते ॥२२।२३॥

वायुवत् क्रमेण सर्वगतत्वं व्यावर्त्तयितं व्यापीत्युक्तम् ॥२४॥

न केवलम् अहमेवैम्भूतः किन्तु त्वञ्चान्ये च सर्वेऽपि । ननु मम चान्येषाञ्च तव च परिच्छेदगमनादिप्रतीतेः कथं प्रत्यक्षविरुद्धमुच्यते ? तत्राह—'न च त्व'मिति । यस्त्वलौकिकः परिच्छिन्नः प्रतीयसे एष त्वं न भवसि । ये चान्ये प्रादेशिकाः प्रतीयन्ते तथाविधास्तेऽन्ये न भवन्ति । अहमपि यादृशस्त्वया दृष्टो न तादृशोऽहम्, किन्तु त्वमहमित्यादिव्यवहारगोचरः परमात्मैव वयं सर्वे, अतो न कश्चिद्विरोधः ॥२५॥

यद्येवं तर्हि मृष्टमेवान्नं त्वया किमर्थं याचितं ? तत्राह 'मृष्ट'मिति । एवं मयोक्ते त्वं किं वक्ष्यसीति तव जिज्ञासा कृता । किन्तु मृष्टामृष्टप्रस्तावे मया कृते तयोरवस्तुत्वं द्वारा किमप्यात्मतत्त्वाश्रितं वक्ष्यसि नवेति त्वत्परीक्षा कृता, न तु मृष्टार्थितयोक्तम्, तद्भेदस्यावास्तवत्वात् ॥२६॥

तदेवाह, 'किमिति द्वाभ्याम्, किमस्वादु अमृष्टम्, अथवा मृष्टमन्नं नियतमस्ति भुञ्जानस्य पुंसः ? न किञ्चिदित्यर्थः । तदेवाह यत् मृष्टं तदेव यदा अतितृप्तस्योद्वेगकारकं तदा अमृष्टं भवति ॥२७॥

अतिक्षुधितस्य चामृष्टमेव यावकादि मृष्टं जायते, तेन यदा मृष्टादेव जनः कदाचिदुद्विजते, तदा आदिमध्यावसानेषु नियतं रुचिकारकं मृष्टं किमन्नमस्ति ? न किञ्चिदित्यर्थः ॥२८॥

तर्हि किमिति त्वया मृष्टमेव भुक्तं ? तत्राह—'हो'ति । पार्थिवैः परमाणुभिः सूक्ष्मैरंशैरालिप्तं उपबृंहितं हि गृहं स्थिरो भवति ॥२९॥

(झ) क्षुत्समुद्भवः क्षुधाया उद्रेकः भवतीत्यन्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यव-गोधूम-मुद्गादि घृतं तैलं पयो दधि ।
गुडं फलादीनि तथा पार्थिवाः परमाणवः ॥३०॥
तदेतद् भवता ज्ञात्वा मृष्टामृष्टविचारि यत् ।
तन्मनः समतालम्बि कार्य्यं साम्यं हि मुक्तये ॥३१॥

ब्राह्मण उवाच ।

इत्याकर्ण्य वचस्तस्य परमार्थाश्रितं नृप !
प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् ॥३२॥

निदाघ उवाच

प्रसीद मद्धितार्थाय कथ्यतां यस्त्वमागतः ।
नष्टो मोहस्त्वाकर्ण्य वचांस्येतानि मे द्विज ॥३३॥

ऋभुरुवाच ।

ऋभुरस्मि तवाचार्य्यः प्रज्ञादानाय ते द्विज !
इहागतोऽहं यास्यामि परमार्थस्तवोदितः ॥३४॥
एवमेकमिदं विद्धि न भेदि सकलं जगत् ।
वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ॥३५॥

ब्राह्मण उवाच ।

तथेत्युक्त्वा निदाघेन प्रणिपातपुरःसरम् (ट) ।
पूजितः परया भक्त्या इच्छातः प्रययावृभुः ॥३६॥

इति श्रीविष्णुपुराणे द्वितीयेंऽशे पञ्चदशोऽध्यायः ।१५

प्रारब्धकर्मोपस्थापितं मृष्टमपि देहनिर्वाहयात्रोपयोगितया भुक्तं, न तु मृष्टबुद्ध्येति भावः। देहधारणे च तुल्या एव सर्वे मृष्टामृष्टाः परमाणव इत्याह—'यवे'ति ॥३०॥

त्वयाप्यनयैव दृष्ट्या भोक्तव्यमित्याह—'तदेत'दिति। मृष्टामृष्टविचारशीलं यत् मनः तत् समतालम्बनशीलं कार्यं, यतो मृष्टं भुञ्जानस्यापि मनसः साम्यं मुक्तये भवति ॥३१।३२।३३॥

'प्रज्ञादानाये'ति—प्रज्ञा अत्र उपासनात्मिका, 'विज्ञाय प्रज्ञां कुर्वीते'ति श्रुतेः ॥३४॥

न भेदि भेदवन्न भवति ॥३५।३६॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां द्वितीयेऽंशे पञ्चदशोऽध्यायः ॥

(ञ) भुञ्जानस्येति शानचा वाच्ये भुञ्जत इति शतृप्रत्ययेन प्रयोग आर्षः ।

(ट) प्रणिपातः साष्टाङ्गप्रणतिः पुरःसरः पूर्ववर्त्ती यस्य तद् यथा स्यात्तथेति 'पूजित' इति क्रियाया विशेषणम् ।

पाठान्तरे—
(५—१)—अवाप्तज्ञानतन्त्रस्य— ।
(२५—३)—सोऽहं— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षोड़शोऽध्यायः ।

(निदाघसमीपे ऋभोः पुनर्गमनम्, आत्मतत्त्वोपदेशश्च ।]

ब्राह्मण उवाच ।

ऋभुर्वर्षसहस्रे तु समतीते नरेश्वर !
निदाघज्ञानदानाय तदेव नगरं ययौ ॥१॥
नगरस्य बहिः सोऽथ निदाघं ददृशे मुनिः ।
महाबलपरीवारे पुरं विशति पार्थिवे(क) ॥२॥
दूरे स्थितं महाभागं जनसम्मर्द्दवर्ज्जकम् ।
क्षुत्क्षामकण्ठमायान्तमरण्यात् ससमित्कुशम् ॥३॥
दृष्ट्वा निदाघं स ऋभुरुपगम्याभिवाद्य च ।
उवाच कस्मादेकान्ते स्थीयते भवता द्विज(ख) ॥४॥

निदाघ उवाच ।

भो विप्र ! जनसम्मर्द्दो महानेष जनेश्वरे(१) ।
प्रविविक्षौ पुरं रम्यं तेनात्र स्थीयते मया ॥५॥

ऋभुरुवाच ।

नराधिपोऽत्र कतमः कतमश्चेतरो जनः ।
कथ्यतां मे द्विजश्रेष्ठ ! त्वमभिज्ञो मतो मम ॥६॥

निदाघ उवाच ।

योऽयं गजेन्द्रमुन्मत्तमद्रिशृङ्गसमुच्छ्रितम् ।
अधिरूढो नरेन्द्रोऽयं परलोकस्तथेतरः ॥७॥

ऋभुरुवाच ।

एतौ हि गज-राजानौ युगपद् दर्शितौ मम ।
भवता न विशेषेण पृथक्चिह्नोपलक्षणौ ॥८॥
तत् कथ्यतां महाभाग ! विशेषो भवतानयोः ।
ज्ञातुमिच्छाम्यहं कोऽत्र गजः को वा नराधिपः ॥९॥

निदाघ उवाच ।

गजो योऽयमधो ब्रह्मन् ! उपर्य्यस्यैष भूपतिः ।
वाह्य-वाहकसम्बन्धं को न जानाति वै द्विज ॥१०॥

षोडशः अध्यायः

वर्षसहस्रे समतीते निदाघज्ञानदानाय ययाविति वदन्नात्मैक्यज्ञानस्य चिरकालबहूपदेशापेक्षितया दुर्लभतां दर्शयति ॥१॥

(क) ददृशे मुनिरिति कर्त्तरि दृशेरात्मनेपदप्रयोग आर्षः । महान्ति बलानि परीवाराश्च यस्य तथाभूते । एतच्च महतो जनसंमर्द्दस्य सूचनार्थमुक्तम् ।

अस्पृश्यस्पर्शादिशङ्कया जनसंमर्दवर्ज्जकम् ।
क्षामः कृशः कण्ठो यस्य तम् ॥३॥
आचार्य्यत्वं स्वीयं प्रच्छादयितुमभिवाद्य च ॥४॥

(ख) अत्र ऋभुणा शिष्यस्यापि निदाघस्याभिवादनमा यथा बहुकालानन्तरं दृष्टस्य स्वस्य शिष्येण गुरुत्वेन प्रत्यभिज्ञ स्यादित्येतदर्थम् । आदावेव तस्य गुरुत्वेन प्रत्यभिज्ञाने तदीयज्ञानस्य सम्यक् परीक्षानुपपत्तेः । अत एवोक्तं 'आचार्य्यत्वं स्वीयं प्रच्छादयितुमभिवाद्य चे'ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋभुरुवाच ।

जानाम्यहं यथा ब्रह्मंस्तथा मामवबोधय ।
अधःशब्दनिगद्यं किं किञ्चोर्द्ध्वमभिधीयते ॥११॥

ब्राह्मण उवाच ।

इत्युक्तः सहसारुह्य निदाघः प्राह तं ऋभुम् ।
श्रूयतां कथयाम्येष यन्मां त्वं परिपृच्छसि(ग) ॥१२॥

उपर्य्यहं यथा राजा त्वमधः कुञ्जरो यथा ।
अवबोधाय ते ब्रह्मन् ! दृष्टान्तो दर्शितो मया ॥१३॥

ऋभुरुवाच ।

त्वं राजेव द्विजश्रेष्ठ ! स्थितोऽहं गजवद् यदि ।
तदेतत् त्वं समाचक्ष्व कतमस्त्वमहं तथा ॥१४॥

ब्राह्मण उवाच ।

इत्युक्तः सत्वरं तस्य प्रगृह्य चरणावुभौ ।
निदाघः प्राह भगवानाचार्य्यस्त्वमृभुर्ध्रुवम् ॥१५॥

नान्यस्याद्वैतसंस्कारसंस्कृतं मानसं तथा ।
यथाचार्य्यस्य तेन त्वां मन्ये प्राप्तमहं गुरुम्(घ) ॥१६॥

ऋभुरुवाच ।

तवोपदेशदानाय पूर्व्वशुश्रूषणाद्दृतः ।
गुरुस्तेऽहमृभुर्नाम्ना निदाघ ! समुपागतः ॥१७॥

तदेतदुपदिष्टं ते सङ्क्षेपेण महामते !
परमार्थसारभूतं यदद्वैतमशेषतः ॥१८॥

ब्राह्मण उवाच ।

एवमुक्त्वा ययौ विद्वान् निदाघं स ऋभुर्गुरुः ।
निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत्(ङ) ॥१९॥

सर्व्वभूतान्यभेदेन ददृशे स तदात्मनः ।
यथा ब्रह्मपरो मुक्तिमवाप परमां द्विज(च) ॥२०॥

तथा त्वमपि धर्म्मज्ञ ! तुल्यात्मरिपुबान्धवः ।
भव सर्व्वगतं जानन्नात्मानमवनीपते(छ) ॥२१॥

सितनीलादिभेदेन यथैकः दृश्यते नभः ।
भ्रान्तिदृष्टिभिरात्मापि तथैकं सन् पृथक् पृथक् ॥२२॥

एकः समस्तं यदिहास्ति किञ्चित्
तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्व्वमेत-
दात्मस्वरूपं त्यज भेदमोहम् ॥२३॥

परलोकः परिजनः ६७।८।१२॥

तदुपरि आरोहापराधं परिहरति 'दृष्टान्तो दर्शित' इति ॥१३॥

'तदेव त्वं समाचक्ष्व कतमस्त्वमहं तथे'ति साक्षेपोक्त्या न त्वं त्वं, न चान्येऽन्ये, नाहमप्यहमिति ॥१४॥

पूर्वं यदुक्तं त्वमहमित्यादिभेदो मिथ्येति तदेव स्मारितः तस्या चरणौ प्रगृह्य मापयन्निदाघ आह ध्रुवं त्वं ममाचार्य्य इति ॥१५॥

सर्वगतं सर्वत्राधिष्ठानत्वेनानुगतम् ॥२१॥

अप्रत्यक्षेऽप्यात्मनि प्रत्यक्षभेदभ्रममाकाशदृष्टान्तेन सम्भावयन्नुपदिष्टमर्थं निगमयति—'सितनीले'ति द्वाभ्याम् ॥२२।२३॥

(ग) तं ऋभुमित्यत्र छन्दसे विसन्धिरार्षः ।

(घ) अन्यस्य ममाचार्य्याद् ऋभोरितरस्येत्यर्थः । आचार्य्यस्य मद्गुरोस्त्वेत्यर्थः ।

(ङ) निदाघम् एवमुक्त्वेत्यन्वयः ।

(च) ददृशे स इति कर्त्तरि प्रयोग आर्षः ।

(छ) तुल्यौ आत्मनः रिपुबान्धवौ रिपुत्वेन बान्धवत्वेन च अभिमतौ जनौ यस्य सः । अथवा तुल्याः आत्मा स्वयं रिपुः बान्धवश्च यस्य सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

इतीरितस्तेन स राजवर्य्य-
स्तत्याज भेदं परमार्थदृष्टिः ।
स चापि जातिस्मरणाप्तबोध-
स्तत्रैव जन्मन्यपवर्गमाप ॥२४॥

इति भरत-नरेन्द्रसारवृत्तं
कथयति यश्च शृणोति भक्तियुक्तः ।
स विमलमतिरेति नात्ममोहं
भवति च संसरणेषु मुक्तियोग्यः ॥२५॥

इति श्रीविष्णुपुराणे द्वितीयेंऽशे षोड़शोऽध्यायः ॥

जातिस्मरणेन आप्तो बोधो येन । भरतजन्मस्मरणेन हि तदा ऋषभदेवेन यत् उपदिष्टं ज्ञानं तदेव योगभ्रंशहेतु-भूतप्रारब्धकर्मावसाने सत्यस्मिन् द्विज-जन्मन्याविर्भूतं, अतस्तत्रैव जन्मन्यपवर्गं प्राप ॥२४॥

तच्चरितवक्तृश्रोत्रोरपि तदेव फलमाह—'इती'ति ॥२५॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां श्रीविष्णुपुराणटीकायां वा द्वितीयेंऽशे षोड़शोऽध्यायः ॥

पाठान्तरम्—

(५—१) नरेश्वरः ।

॥ द्वितीयांशः सम्पूर्णः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृतीयः अंशः

प्रथमोऽध्यायः ।

[मन्वन्तरविवरणम्]

मैत्रेय उवाच ।

कथिता गुरुणा सम्यग् भूसमुद्रादिसंस्थितिः !
सूर्यादीनाञ्च संस्थानं ज्योतिषामपि विस्तरात् ॥१॥

देवादीनां तथा सृष्टिर्ऋषीणामपि वर्णिता ।
चातुर्वर्ण्यस्य चोत्पत्तिस्तिर्य्यग्योनिगतस्य च ॥२॥

ध्रुवप्रह्लादचरितं विस्तराच्च त्वयोदितम् ।
मन्वन्तराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात् ॥३॥

मन्वन्तराधिपांश्चैव शक्रदेवपुरोगमान् ।
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ॥४॥

पराशर उवाच ।

अतीतानागतानीह यानि मन्वन्तराणि वै ।
तान्यहं भवते सम्यक् कथयामि यथाक्रमम् ॥५॥

स्वायम्भुवो मनुः पूर्वो मनुः स्वारोचिषस्तथा ।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥६॥

षडेते मनवोऽतीताः साम्प्रतन्तु रवेः सुतः ।
वैवस्वतोऽयं यस्यैतत् सप्तमं वर्ततेऽन्तरम् ॥७॥

स्वायम्भुवन्तु कथितं कल्पादावन्तरं मया ।
देवाः सप्तर्षयश्चैव यथावत् कथिता मया ॥८॥

अत ऊर्द्ध्वं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ।
मन्वन्तराधिपान् सम्यग् देवर्षींस्तत्सुतांस्तथा ॥९॥

पारावताः सतुषिता देवाः स्वारोचिषेऽन्तरे ।
विपश्चिच्चैव देवेन्द्रो मैत्रेयासीन्महाबलः ॥१०॥

ऊर्ज्जः स्तम्बस्तथा प्राणो दत्तोलिर्ऋषभस्तथा(१) ।
निश्चरश्चोर्वरीवांश्च(२) तत्र सप्तर्षयोऽभवन् ॥११॥

प्रथमः अध्यायः

परानन्दपदाम्भोज-श्रीधरः श्रीधरो यतिः ।
पुराणे वैष्णवे व्याख्यत् तृतीयांशे यथामति ॥
अंशद्वयेन सृष्ट्यादिद्विसप्तभुवनोक्तिभिः ।
अध्यारोप्य निषिद्धं तद् राजद्विजसदुक्तिभिः ॥
तृतीयेंऽशे मनुव्यासधर्माद्याः स्थितिहेतवः ।
वर्ण्यन्तेऽत्र निषेधाय कौरव्यपृतना यथा ॥
अत्रापि प्रथमेऽध्याये सप्तमन्वन्तराणि तु ।
भवभूद्वृत्तानि कथितान्यवतारा हरेरपि ॥

वृत्तकीर्त्तनपूर्वकं मन्वन्तराणां स्वरूपं पृच्छति—'कथिता' इति चतुर्भिः ॥१॥

इह वाराहकल्पे । यथाक्रममित्यनेन क्रमप्राप्तं वर्त्तमानमपि मन्वन्तरं ज्ञेयम् ॥५॥

कल्पस्य आदौ स्वायम्भुवमन्वन्तरन्तु कथितं, प्रथमांशे देवा यामाख्या ऋषयो मरीच्यादयः । चकारादिन्द्रो यज्ञः । मनुपुत्रौ प्रियव्रतोत्तानपादौ कथितौ ॥८॥

देवर्षीन् देवान् ऋषींश्च तत्सुतान् मनुपुत्रान् ॥९॥

पारावतास्तुषिताश्च देवगणौ विपश्चित्संज्ञो देवेन्द्रः ॥१०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चैत्र-किम्पुरुषाद्याश्च सुताः स्वारोचिषस्य तु ।
द्वितीयमेतत् कथितमन्तरं(३) शृणु चोत्तमम् ॥१२॥

तृतीये त्वन्तरे ब्रह्मन् ! औत्तमिर्नाम(४) यो मनुः ।
सुशान्तिर्नाम देवेन्द्रो मैत्रेयासीत् सुरेश्वर ॥१३॥

सुधामानस्तथा सत्याः शिवाश्चासन् प्रतर्दनाः ।
वशवर्तिनश्च पञ्चैते गणा द्वादशकाः स्मृताः ॥१४॥

वसिष्ठतनयास्तत्र सप्त सप्तर्षयोऽभवन् ।
अजः परशुदिव्याद्यास्तस्योत्तमिमनोः सुताः ॥१५॥

तामसस्यान्तरे देवाः सुरूपा हरयस्तथा ।
सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥१६॥

शिबिरिन्द्रस्तथा चासीच्छतयज्ञोपलक्षणः ।
सप्तर्षयश्च ये तेषां तत्र नामानि मे शृणु(क) ॥१७॥

ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा ।
पीवरश्चर्षयो ह्येते सप्त तत्रापि चान्तरे ॥१८॥

नरः ख्यातिः शान्तहयो जानुजङ्घादयस्तथा ।
पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः ॥१९॥

पञ्चमे चापि मैत्रेय ! रैवतो नाम नामतः ।
मनुर्विभुश्च तत्रेन्द्रो देवांश्चैवान्तरे शृणु ॥२०॥

अमिताभा भूतरजोवैकुण्ठाः ससुमेधसः ।
एते देवगणास्तत्र चदुर्दश चतुर्दश ॥२१॥

हिरण्यरोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ।
एते सप्तर्षयो विप्र ! तत्रासन् रैवतेऽन्तरे ॥२२॥

बलबन्धुः सुसम्भारुः सत्यकाद्याश्च तत्सुताः ।
नरेन्द्राः सुमहावीर्य्या बभूवुर्मुनिसत्तम ॥२३॥

स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवस्तथा ॥२४॥

विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ।
मन्वन्तराधिपानेतान् लब्धवानात्मवंशजान् ॥२५॥

षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तथा मनुः ।
मनोजवस्तथैवेन्द्रो देवानपि निबोध मे ॥२६॥

आद्याः प्रसूता भव्याश्च पृथुगाश्च दिवौकसः ।
महानुभावा लेखाश्च पञ्चैतेऽप्यष्टका गणाः ॥२७॥

सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥२८॥

ऊरुः पुरुः शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥२९॥

उत्तमम् उत्तमसन्बन्धि मन्वन्तरम् । उत्तम एवौत्तमिः ॥१२।१३॥

द्वादशकाः द्वादशानां एकैको गणः इत्येवमेते पञ्च गणाः स्मृताः ॥१४॥

सप्तविंशतिकाः सप्तविंशतीनां गणाः ॥१६॥

शतयज्ञोपलक्षणः शतक्रतुः । अत्र तामसे मन्वन्तरे सप्तर्षयः तेषां नामानि मे शृणु इत्यन्वयः ॥१७॥

ज्योतिर्धामेत्यन्वर्थकं नाम ॥१९॥

'रैवतो नाम नामत' इति—नाम-प्रसिद्धौ, नामतः संज्ञया न तु रेवतपुत्रः ॥२०॥

प्रत्येकं चतुर्दशभूता एते गणाः ।२२।२७॥

(क) शतं यज्ञाः उपलक्षणं चिह्नं विशेषणं वा यस्य सः । अत एव शतेत्यादेः शतक्रतुरित्यर्थमाह स्वामी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विवस्वतः सुतो विप्र ! श्राद्धदेवो महाद्युतिः ।
मनुः संवर्त्तते धीमान् साम्प्रतं सप्तमेऽन्तरे ॥३०॥

आदित्य-वसु-रुद्राद्या देवाश्चात्र महामुने !
पुरन्दरस्तथैवात्र मैत्रेय ! त्रिदशेश्वरः ॥३१॥

वशिष्ठः काश्यपोऽथात्रिर्जमदग्निः सगौतमः ।
विश्वामित्रो भरद्वाजः सप्त सप्तर्षयोऽभवन् ॥३२॥

इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभ उद्दिष्ट एव च ॥३३॥

करूशश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्राश्च धार्मिकाः ॥३४॥

विष्णुशक्तिरनौपम्या सत्त्वोद्रिक्ता स्थितौ स्थिता ।
मन्वन्तरेष्वशेषेषु देवत्वेनाधितिष्ठति ॥३५॥

अंशेन तस्य जज्ञेऽसौ यज्ञः स्वायम्भुवेऽन्तरे ।
आकूत्यां मानसो देव उत्पन्नः प्रथमेऽन्तरे ॥३६॥

ततः पुनः स वै देवः प्राप्ते स्वारोचिषेऽन्तरे ।
तुषितायां समुत्पन्नो ह्यजितस्तुषितैः सह ॥३७॥

औत्तमे त्वन्तरे चैव तुषितस्तु पुनः स वै ।
सत्यायामभवत् सत्यः सत्यैः सह सुरोत्तमैः ॥३८॥

तामसस्यान्तरे चैव सम्प्राप्ते पुनरेव हि ।
हर्य्यायां हरिभिः सार्धं हरिरेव बभूव ह ॥३९॥

रैवतेऽप्यन्तरे देवः सम्भूत्यां मानसोऽभवत् ।
सम्भूतो रैवतैः सार्द्धं देवैर्देववरो हरिः ॥४०॥

चाक्षुषे चान्तरे देवो वैकुण्ठः पुरुषोत्तमः !
विकुण्ठायामसौ जज्ञे वैकुण्ठैर्देवतैः सह ॥४१॥

मन्वन्तरे तु सम्प्राप्ते तथा वैवस्वते द्विज !
वामनः कश्यपाद् विष्णुरदित्यां सम्बभूव ह ॥४२॥

त्रिभिः क्रमैरिमाँल्लोकाञ्जित्वा येन महात्मना ।
पुरन्दराय त्रैलोक्यं दत्तं निहतकण्टकम् ॥४३॥

इत्येतास्तनवस्तस्य सप्तमन्वन्तरेषु वै ।
सप्ताथवाभवन् विप्र ! याभिः संवर्द्धिताः प्रजाः ॥४४

यस्माद् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्मात् स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात् ॥४५

वसुमान् लोकविश्रत इति विशेषणद्वयम्। पृषध्रश्चैव वसुमान् वीर्य्यवान् वसिष्ठशापे ज्ञातेऽपि क्षोभाभावात्। लोकविश्रुतः सर्वसङ्गपरित्यागेन मुक्तिप्राप्तेः। तथा सति नव पुत्रा महाबला इति नवत्वम् उपपन्नं भवति ॥३४॥

एवं तर्हि मनुपुत्रदेवेन्द्रर्षिभिः पञ्चभिरेव जगतः पालने सिद्धे कृतं विष्णोः पालकत्वेन इत्याशङ्क्य सर्वेष्वपि मन्वन्तरेषु पालने प्रवृत्तस्य विष्णोरधिष्ठातृत्वं दर्शयति—'विष्णुशक्ति'रित्यादिना यावदध्यायसमाप्ति। देव-यज्ञादिरूपदेवताभावेन विष्णोः स्वरूपभूता शक्तिः, तस्य विष्णोः अंशेन स्वायम्भुवमन्वन्तरे आकूत्यां मातरि यज्ञ-संज्ञः उत्पन्नः जज्ञे बभूवेत्यर्थः। यद्वा प्रथमे अन्तरे अवसरे ब्रह्मणो मानसः यः उत्पन्नो रुचिः तस्मात् पितुः जज्ञे इति ॥३५।३६॥

(ख) अधितिष्ठतेरधिकरणत्वेन मन्वन्तरशब्दाद् द्वितीयायां प्राप्तायां सप्तमीप्रयोग आर्षः।

(ग) त्रिभिः क्रमैः पादन्यासैः इमान् लोकान् द्युलोक-मर्त्य-लोक-पातालाख्यान्, जित्वा येन वामनरूपिणा विष्णुना पुरन्दराय इन्द्राय त्रैलोक्यं दत्तमित्यन्वयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वे च देवा मनवः समस्ताः
सप्तर्षयो ये मनुसूनवश्च ।
इन्द्रश्च योऽयं त्रिदशेशभूतो
विष्णोरशेषास्तु विभूतयस्ताः ॥४६॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे प्रथमोऽध्यायः ॥१॥

उक्तमेव अर्थं विष्णुपदनिरुक्त्या दर्शयन् मन्वादिषु च तदावेशमाह—'यस्मा'दिति द्वाभ्याम्। महात्मनः स्वरूपभूतया प्रवेशनात् प्रवेशनार्थात् ॥४६।४७॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे प्रथमोऽध्यायः ॥

पाठान्तराणि—

(११—१)—वातोऽथ पृषतस्तथा ।
(११—२) निरयश्च परीवांश्च—।
(१२—३) द्वितीययेतद्याख्यातमन्तरं—।

द्वितीयोऽध्यायः

[सावर्ण्यादिमन्वन्तरकथनम्, कल्पपरिमाणञ्च ।]

मैत्रेय उवाच ।

प्रोक्तान्येतानि भवता सप्तमन्वन्तराणि वै ।
भविष्याण्यपि विप्रर्षे ! ममाख्यातुं त्वमर्हसि ॥१॥

पराशर उवाच ।

सूर्यस्य पत्नी संज्ञाभूत्तनया विश्वकर्मणः
मनुर्यमो यमी चैव तद्‌पत्यानि वै मुने ॥२॥

असहन्ती तु सा भर्तुस्तेजश्छायां युयोज वै ।
भर्त्तुः शुश्रूषणेऽरण्यं स्वयं च तपसे ययौ ॥३॥

संज्ञे यमित्यथार्कश्च छायायामात्मजत्रयम् ।
शनैश्चरं मनुञ्चान्यं तपतीञ्चाप्यजीजनत् ॥४॥

छायासंज्ञा ददौ शापं यमाय कुपिता यदा ।
तदान्येयमसौ बुद्धिरित्यासीद् यम-सूर्ययोः ॥५॥

द्वितीयः अध्यायः

द्वितीये सप्त मन्वादीन् वक्ष्यन्नादौ रवेः सुतः । यथा सावर्णिरभवदितिहासं तमब्रवीत् ॥१॥

मनुः श्राद्धदेवः ॥२॥

छायां बिम्बतुल्यां स्वसदृशीमन्यां स्त्रियं सूर्यतेजःसहिष्णुं निर्माय भर्त्तः शुश्रूषणे युयोज, स्वयञ्च तपसे ययावित्यर्थः ॥३॥

अत्र मनुं सावर्णिम्। तपतीं संवरणस्य राज्ञो भार्याम्।

छायैव संज्ञारूपेण स्थिता छायासंज्ञा। सा यदा स्वापत्यत्रयस्नेहवती आत्मनि पादप्रहारोद्यताय यमाय पादस्ते पतत्विति शापं ददौ। तदातिनिर्दयत्वमस्य नेयमसौ संज्ञा, किन्तु अन्येयं संज्ञेति यमसूर्ययोर्बुद्धिरभूदित्यर्थः ॥५॥

(क) तदपत्यानि तस्याः संज्ञायाः अपत्यानि ।

(ख) असहन्तीत्यत्र सहतेरात्मनेपदिनः शतृप्रयोग भर्त्तुः पत्युः सूर्य्यस्य शुश्रूषणे युयोज इत्यन्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो विवस्वानाख्याते तयैवारण्यसंस्थिताम् ।
समाधिदृष्ट्या ददृशे तामश्वां तपसि स्थिताम्(घ) ॥६॥
वाजिरूपधरः सोऽथ तस्यां देवावथाश्विनौ ।
जनयामास रेवन्तं रेतसोऽन्ते च भास्करः ॥७॥
आनिन्ये च पुनः संज्ञां स्वस्थानं भगवान् रविः ।
तेजसः शमनञ्चास्य विश्वकर्मा चकार ह ॥८॥
भ्रमिमारोप्य सूर्यन्तु तस्य तेजोविशातनम्(ङ) ।
कृतवानष्टमं भागं न व्यशातयताव्ययम् ॥९॥
यत् सूर्याद् वैष्णवं तेजः शातितं विश्वकर्मणा ।
जाज्वल्यमानमपतत्तद्भूमौ मुनिसत्तम ॥१०॥
त्वष्टैव तेजसा तेन विष्णोश्चक्रमकल्पयत् ।
त्रिशूलञ्चैव रुद्रस्य(२) शिविकां धनदस्य च ॥११॥
शक्तिं गुहस्य देवानामन्येषाञ्च यदायुधम् ।
तत्सर्वं तेजसा तेन विश्वकर्मा व्यवर्द्धयत् ॥१२॥
छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः ।
पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन चोच्यते(३) ॥१३॥
तस्य मन्वन्तरं ह्येतत् सावर्णिकमथाष्टमम् ।
तच्छृणुष्व महाभाग ! भविष्यं कथयामि ते ॥१४॥
सावर्णिस्तु मनुर्योऽसौ मैत्रेय ! भविता ततः ।
सुतपाश्चामिताभाश्च मुख्याश्चापि तदा सुराः ॥१५॥
तेषां गणस्तु देवानामेकैको विंशकः स्मृतः ।
सप्तर्षीनपि वक्ष्यामि भविष्यान् मुनिसत्तम ॥१६॥
दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथा परः ।
मत्पुत्रस्तु तथा व्यास ऋष्यशृङ्गश्च सप्तमः ॥१७॥
विष्णुप्रसादादनघः पातालान्तरगोचरः ।
विरोचनसुतस्तेषां बलिरिन्द्रो भविष्यति ॥१८॥
विरजाश्चार्वरीवांश्च निर्मोहाद्यास्तथापरे ।
सावर्णेस्तु मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥१९॥
नवमो दक्षसावर्णो मैत्रेय ! भविता मनुः ।
पारा मरीचिगर्भाश्च सुधर्माणस्तथा त्रिधा ॥२०॥

ततश्चातिनिर्वन्धं पृष्टया तया नाहं संज्ञा किन्तु तत्या-श्छायेति आख्याते विवस्वान् सूर्यः समाधिनोत्तरकुरुष्व-रण्ये अश्वां वडवारूपां तपसि स्थितां संज्ञां ददृशे ददर्श। ततः सोऽपि विवस्वानश्वरूपधरस्तस्यामश्विनौ देवौ रेवन्तञ्चेति त्रयमजीजनत्। रेतसोऽन्त इति रेवन्तनामनिरुक्तिः ॥७॥

भ्रमिं चक्राकारं तक्ष्यत्रम्। तेजसो विशातनं कृतवान्। अष्टमं भागं न व्यशातयत् यतोऽव्ययम् ॥९॥

धनदस्य शिबिकायत्रम् ॥११॥

पूर्वजस्य श्राद्धदेवस्य सवर्णः मनुरिति समानवर्णत्वात् सूर्यपुत्रत्वात् तुल्यरूपत्वाद्वा ॥१३॥

विंशकः विंशतिसंख्यकः ॥१६॥

(घ) समाधिदृष्ट्या यौगिकदृष्ट्या तां संज्ञाम्। ददृश इत्यार्षम्। स्त्रियामीप्रत्ययप्रकरणे अजादिवर्जनादश्वशब्दस्य च अजादिगणे पठितत्वादश्वामित्यत्र स्त्रियामीप्रत्ययाभावः।

(ङ) भ्रमिमारोप्येत्यादि—एतमेवार्थमनुस्मृत्य श्रीकण्ठः-कविरुत्तररामचरितनाटके प्राह—'त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्ड-ज्योतिरुज्ज्वलः'। इति।

(च) त्वष्टा विश्वकर्मा। चक्रं सुदर्शनाख्यम्। देवानां सर्वेषां प्रसिद्धानि यानि यान्यायुधानि तानि सर्वाणि तत्तेजः-प्रभवाण्येवेति तस्य तेजसो महाप्रभावत्वं व्यज्यते। तेन च सूर्यतेजसस्तदपेक्षया समधिकप्रभावत्वमिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भविष्यन्ति तदा देवा एकैको द्वादशो गणः ।
तेषामिन्द्रो महावीर्यो भविष्यत्यद्भुतो द्विज ॥२१॥
सबलो द्युतिमान् भव्यो वसुर्मेधा धृतिस्तथा ।
ज्योतिष्मान् सप्तमः सत्यस्तत्रैते च महर्षयः ॥२२॥
धृतकेतुर्दीप्तिकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाद्याश्च तथा दक्षसावर्णिकात्मजाः ॥२३॥
दशमो ब्रह्मसावर्णिर्भविष्यति मुने ! मनुः ।
सुधामानो विशुद्धाश्च शतसंख्यास्तथा सुराः ॥२४॥
तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः ।
सप्तर्षयो भविष्यन्ति ये तदा तान् शृणुष्व च(छ)२५
हविष्मान् सुकृतः सत्यो ह्यपांमूर्तिस्तथापरः ।
नाभागोऽप्रतिमौजाश्च सत्यकेतुस्तथैव च ॥२६॥
सुक्षेत्रश्चौत्तमौजाश्च हरिसेनादयो दश ।
ब्रह्मसावर्णपुत्रास्तु रक्षिष्यन्ति वसुन्धराम् ॥२७॥
एकादशश्च भविता धर्मसावर्णिको मनुः ।
विहङ्गमाः कामगमा निर्वाणरतयस्तथा ॥२८॥
गणास्त्वेते तदा मुख्या देवानाञ्च भविष्यताम् ।
एकैकस्त्रिंशकस्तेषां गणश्चेन्द्रश्च वै वृषः ॥२९॥
निश्चरश्चाग्नितेजाश्च वपुष्मान् विष्णुरारुणिः(४) ।
हविष्माननघश्चैते भाव्याः सप्तर्षयस्तथा ॥३०॥
सर्वगः सर्वधर्मा(५) च देवानीकादयस्तथा ।
भविष्यन्ति मनोस्तस्य तनयाः पृथिवीश्वराः ॥३१

रुद्रपुत्रस्तु सावर्णो भविता द्वादशो मनुः ।
ऋतधामा च तत्रेन्द्रो भविता शृणु मे सुरान् ॥३२॥
हरिता रोहिता देवास्तथा सुमनसो द्विज !
सुकर्माणश्च ताराश्च दशकाः पञ्च वै गणाः ॥३३॥
तपस्वी सुतपाश्चैव तपोमूर्तिस्तपोरतिः ।
तपोधृतिर्द्युतिश्चान्यः सप्तमस्तु तपोधनः ॥३४॥
देववानुपदेवश्च देवश्रेष्ठादयस्तथा ।
मनोस्तस्य महावीर्या भविष्यन्ति सुता नृपाः(६)॥
त्रयोदशो रौच्यनामा(७) भविष्यति मुने ! मनुः ।
सुत्रामाणः सुधर्माणः सुकर्माणस्तथापराः ॥३६॥
त्रयस्त्रिंशद्विभेदास्ते देवानां ये तु वै गणाः ।
दिवस्पतिर्महावीर्यस्तेषामिन्द्रो भविष्यति ॥३७॥
निर्मोहस्तत्त्वदर्शी च निष्प्रकम्प्यो निरुत्सुकः ।
धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः ॥३८॥
सप्तर्षयस्त्विमे तस्य पुत्रानपि निबोध मे ।
चित्रसेनविचित्राद्या भविष्यन्ति महीक्षितः ॥३९॥
भौत्यश्चतुर्दशश्चात्र मैत्रेय ! भविता मनुः ।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च शृणुष्व तान् ॥४०॥
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिकास्तथा ।
वचोवृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु ॥४१॥
अग्निबाहुः शुचिः शुक्रो मागधोऽग्निध्र एव च ।
युक्तस्तथाऽजितश्चान्यो मनुपुत्रानतः शृणु ॥४२॥

अद्भुतसंज्ञः इन्द्रः ॥२१॥

सुक्षेत्रादयः ब्रह्मसावर्णिपुत्राः ॥२७॥

(छ) शृणुष्वेत्यार्षम् ।

(ज) अत्रापि शृणुष्वेत्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऊर्ग्गभीरवह्नाद्या मनोस्तस्य सुता नृपाः ।
कथिता मुनिशार्दूल ! पालयिष्यन्ति ये महीम् ॥४३

चतुर्युगान्ते वेदानां जायते किल विप्लवः ।
प्रवर्तयन्ति तानेत्य भुवि सप्तर्षयो दिवः ॥४४॥

कृते कृते स्मृतेर्विप्र ! प्रणेता जायते मनुः ।
देवा यज्ञभुजस्ते तु यावन्मन्वन्तरन्तु तत् ॥४५॥

भवन्ति ये मनोः पुत्रा यावन्मन्वन्तरन्तु तैः ।
तदन्वयोद्भवैश्चैव तावद्भूः परिपाल्यते ॥४६॥

मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः ।
मन्वन्तरे भवन्त्येते शक्रश्चैवाधिकारिणः ॥४७॥

चतुर्दशभिरेतैस्तु गतैर्मन्वन्तरैर्द्विज !
सहस्रयुगपर्यन्तः कल्पो निःशेष उच्यते ॥४८॥

तावत्प्रमाणा च निशा ततो भवति सत्तम !
ब्रह्मरूपधरः शेते शेषाहावम्बुसम्प्लवे ॥५९॥

त्रैलोक्यमखिलं ग्रस्त्वा भगवानादिकृद् विभुः ।
स्वमायासंस्थितो विप्र ! सर्वभूतो जनार्दनः ॥५०॥

ततः प्रबुद्धो भगवान् यथा पूर्वं तथा पुनः ।
सृष्टिं करोत्यव्ययात्मा कल्पे कल्पे रजोगुणः(झ) ॥५१

मनवो भूभुजः सेन्द्रा देवाः सप्तर्षयस्तथा ।
सात्त्विकोऽंशः स्थितिकरो जगतो द्विजसत्तम(ञ)।५२

चतुर्युगेऽप्यसौ विष्णुः स्थितिव्यापारलक्षणः ।
युगव्यवस्थां कुरुते यथा मैत्रेय ! तच्छृणु ॥५३॥

कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक् ।
ददाति सर्वभूतानां सर्वभूतहिते रतः(ट) ॥५४॥

चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः ।
दुष्टानां निग्रहं कुर्वन् परिपाति जगत्त्रयम्(ठ) ॥५५॥

वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ॥५६॥

उक्तानां मन्वादीनां कृत्यभेदानाह—'चतुर्युगान्त' इति। कलौ वेदानां विप्लवे उच्छेदे जाते दिविष्ठा महर्षयो भुवमेत्य कृतयुगादौ तानेव सम्प्रवर्त्तयन्ति ॥४४॥

वेदप्रवर्त्तनमुक्त्वा स्मृतिप्रवर्त्तनमाह — 'कृत' इति। स्मृतेः धर्मशास्त्रस्य मनुसंज्ञस्य, तत्तदृषिप्रवर्त्तितानां स्मृतीनामुपलक्षणमेतत्। तत्तन्मन्वन्तरे ये देवाः कीर्त्तितास्ते तन्नामानः तत्तन्मन्वन्तरे यज्ञभुजो भवन्ति। यावन्मन्वन्तरं मन्वन्तरसमाप्तिपर्यन्तम् ॥४५॥

अन्येऽपि मन्वादयस्तन्मन्वन्तराधिकारिण एव इत्याह —'मनुरि'ति ॥४७॥

'तावत्प्रमाणा च निशे'ति—तदा सूर्यादिपरिस्पन्दरूपकालोपाध्यभावेऽपि भगवतो योगनिद्रारूपमायोपाधिपरिच्छिन्नस्य कालस्य तावत्त्वं ज्ञेयम्। ब्रह्मेति—दिवा ब्रह्मरूपधरो यः स एव भगवान् रात्रौ श्रीनारायणरूपेण शेषाहौ अनन्तनाम्नि सर्पे शेते इत्यर्थः ॥४९॥

एवमेव सर्वकल्पमन्वन्तरादिस्थितिं सप्रपञ्चमाह—'ततः प्रबुद्धे' इत्यादिना यावदध्यायसमाप्ति ॥५१॥

स्थितये यो व्यापारः स एव लक्षणं उपाधिर्यस्य सः ॥५३॥

(झ) सृष्टिं करोति व्यापारयति सृजतीत्यर्थः। रजोगुणः प्राधान्येन रजोगुणाश्रितः ब्रह्मात्मेत्यर्थः।

(ञ) स्थितिकरः पालनकर्त्ता।

(ट) कृते युगे सत्ययुगे कपिलादीनां स्वरूपधृक् कपिलाद्यवताररूपधारीत्यर्थः। सर्वेषां भूतानां प्राणिनां हिते रत इति हेत्वर्थगर्भविशेषणमिदम्। सर्वभूतानामित्यत्र सम्बन्धविवक्षया षष्ठी।

(ठ) चक्रवर्त्तिस्वरूपेण सार्वभौमनरपतिरूपेण।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ।
कल्किस्वरूपी दुर्वृत्तान् मार्गे स्थापयति प्रभुः ॥५७॥
एवमेष जगत् सर्वं परिपाति करोति च ।
हन्ति चान्तेष्वनन्तात्मा नास्त्यस्माद् व्यतिरेकि यत् ॥५८॥

भूतं भव्यं भविष्यञ्च सर्वभूतान्महात्मनः ।
तदत्रान्यत्र वा विप्र ! सद्भावः कथितस्तव ॥५९॥
मन्वन्तराण्यशेषाणि कथितानि मया तव ।
मन्वन्तराधिपाश्चैव किमन्यत् कथयामि ते ॥६१॥
इति श्रीविष्णुपुराणे तृतीयेंऽशे द्वितीयोऽध्यायः ॥

उपसंहरति—'एवमि'ति द्वाभ्याम्

अत्र वा अन्यत्र वा कल्पादौ तस्मात् व्यतिरेकि यत् भूतादि, तन्नास्ति, किन्तु भेदकल्पनाशून्यो भगवान् वास्तीत्येष एव सद्भावः परमार्थः कथित इति ॥५८।५९॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे द्वितीयोऽध्यायः ॥

(ङ) व्यस्य विभज्य । मार्गे सत्पथे धर्म्ये वर्त्मनीत्यर्थः ।

पाठान्तराणि—

(९—१) भ्रमिमारोप्य सूर्यं तु तस्य तेजोनिशातनम् ।
(११—२)—शर्वस्य— ।
(१३—३)—कथ्यते ।
(३०—४)—धृणिरारुणिः ।
(३२—५) सर्वत्रगः सुधर्मा— ।
(३५—६)—महानृपाः ।
(३६—७)—रुचिर्नाम— ।

तृतीयः अध्यायः

[वेदव्यासस्याष्टाविंशतिनामकथनम्]

मैत्रेय उवाच ।

ज्ञातमेतन्मया त्वत्तो यथापूर्वमिदं जगत् ।
विष्णुर्विष्णौ विष्णुतश्च न परं विद्यते ततः ॥१॥
एतत्तु श्रोतुमिच्छामि व्यस्ता वेदा महात्मना ।
वेदव्यासस्य रूपेण यथा तेन युगे युगे ॥२॥
यस्मिन् यस्मिन् युगे व्यासो यो य आसीन्महामुने ।
तं तमाचक्ष्व भगवन् ! शाखाभेदांश्च मे वद(क) ॥

तृतीयः अध्यायः

स्थितिहेतुप्रसङ्गेन मुनेः प्रश्नानुसारतः । वेदव्यासस्तृतीयेऽत्र सप्रपञ्चोऽनुवर्ण्यते । वेदव्यस्ति प्रष्टुं सर्वग्रन्थतात्पर्यमनुवदति—'ज्ञात'मिति । यथा सर्वं जगत् विष्णुरेव, ततः परं न विद्यते, यथा च विष्णौ तिष्ठति, विष्णोः सकाशात् यथा भवति, तथा त्वत्तो मया ज्ञातम् । अनेन सर्वोऽपि कारकाद्यर्थो विष्णावुपलक्ष्यते ॥१॥

यथा वेदा व्यस्ता इति प्रकारप्रश्नः ॥२॥

(क) वेदानां व्यासात् शाखादिभेदेन विभजनात् वेदव्यासः इत्युपनाममात्रम् । वेदव्यासास्तु तत्तद्युगेषु बहव एव, न तु एक एव सर्वेषु युगेषु वेदव्यास इति ध्येयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

वेदद्रुमस्य मैत्रेय ! शाखाभेदैः सहस्रशः ।
न शक्यो विस्तरो वक्तुं संक्षेपेण शृणुष्व तत्(ख) ॥४॥

द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने !
वेदमेकं स बहुधा कुरुते जगतो हितः ॥५॥

वीर्यं तेजो बलञ्चाल्पं मनुष्याणामवेक्ष्य वै ।
हिताय सर्वभूतानां वेदभेदान् करोति सः(ग) ॥६॥

ययासौ कुरुते तन्वा वेदमेकं पृथक् प्रभुः ।
वेदव्यासाभिधाना तु सा मूर्तिर्मधुविद्विषः(घ) ॥७॥

यस्मिन् मन्वन्तरे ये ये व्यासा तांस्तान्निबोध मे ।
यथा च भेदः शाखानां व्यासेन क्रियते मुने ॥८॥

अष्टाविंशतिकृत्वो वै वेदा व्यस्ता महर्षिभिः ।
वैवस्वतेऽन्तरे ह्यस्मिन् द्वापरेषु पुनः पुनः(ङ) ॥९॥

वेदव्यासा व्यतीता ये अष्टाविंशति सत्तम !
चतुर्द्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः ॥१०॥

द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ॥११॥

यस्मिन् यस्मिन्नित्यधिकरणप्रश्नः। यो य इति कर्तृप्रश्नः। शाखाभेदानिति शाखासंख्यानाम्नोः प्रश्नः ॥३॥

तत्र तावत् शाखाभेदानां संख्यातो नामतश्च विस्तारो वक्तुमशक्य इत्याह—'वेदद्रुमस्ये'ति ॥४॥

अधिकरणकर्तृस्वरूपप्रश्नयोरुत्तरमाह — 'द्वापर' इति द्वाभ्याम् ॥५॥

वीर्यमुत्साहः, तेजः प्रागल्भ्यं, बलञ्च ग्रहणसामर्थ्यमल्पमवेक्ष्य ॥६॥

ननु अपर एव वेदव्यासाः, कथं भगवान् वेदभेदान् करोति इत्याशंक्य—सर्वे भगवत्तनव इत्याह—'यये'ति ॥७॥

अत्र तावत् अतीतानागतमन्वन्तराणां व्यासान् अतिविस्तरत्वेन उपेक्ष्य वैवस्वते मन्वन्तरे व्यतीतान् व्यासान् भाविनश्चैकं तथा शाखाभेदांश्च वक्तुमाह—'यस्मि'न्निति ॥८॥

अष्टाविंशतिर्व्यासा व्यतीता निवृत्ताधिकाराः जाता इत्यर्थः। विसर्गलोपश्छान्दसः ॥१०॥

(ख) वेद एव द्रुमः वृक्षः तस्येति रूपकमिदम्। शृणुष्वेत्यार्षम्।

(ग) श्रीभगवतस्तत्तद्रूपमास्थाय वेदानां विभजने हेतुमुदारहति—'वीर्य्यं तेज' इत्यादिना। वीर्य्यमुत्साहः, तेजः प्रागल्भ्यम्, बलञ्च ग्रहणसामर्थ्यमल्पमवेक्ष्येति स्वामी। तथा हि जनाः समुत्साहेनैव महता महान्ति शास्त्राणि समध्येतुं प्रवर्त्तन्ते। महता प्रागलभ्येनैव तत्र तत्र सूक्ष्मतत्त्वानि ऊहापोहादिद्वारा विचारयन्ति, ग्रहणसामर्थ्यलक्षणेन च महता बलेनैव महाग्रन्थात्तानि महान्ति तत्त्वानि ग्रहीतुं शक्नुवन्ति। तस्य तस्य लघुत्वे दुष्कराण्येव तानि सर्व्वाणि कृत्यानि स्युः, अत एव लघुशक्तिकानां ग्रहणादिसौकर्य्याय कृतो भगवता तत्तद्द्वापरयुगेषु विभागो वेदानामिति भावः।

(घ) मधुविद्विषः मधुसूदनस्य नारायणस्य, सा मूर्त्तिः वेदव्यास इति अभिधानं नाम यस्याः तथाभूता। अतस्तस्य नारायणस्यैव तत्तद्रूपेण वेदविभागकरणात् 'वेदभेदान् करोति स' इति पूर्वोक्तिः सुसङ्गच्छते।

(ङ) अष्टाविंशतिकृत्वः अष्टाविंशतिं वारानिति वारार्थे कृत्वस्प्रत्ययः। महर्षिभिः प्रजापतिप्रभृतिभिः, वेदा अखण्डाः श्रुतयः व्यस्ताः शाखादिभेदेन विभक्ताः।

(च) 'विंशत्याद्याः सदैकत्वे' इत्यनुशासनात् प्रकृते प्रथमैकवचनान्ताष्टाविंशतिशब्दप्रयोगे कर्त्तव्ये 'अष्टाविंशतिः तत्तम' इति प्रयोक्तव्यम्। तत्र मूले 'अष्टाविंशति सत्तम' इति निर्विसर्गपाठः कृतः। स चायमार्षत्वात् समाधेयः। अत एवोक्तं स्वामिना 'विसर्गलोपश्छान्दस' इति, सविसर्गपाठे छन्दोविप्लवात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृतीये चोशना व्यासश्चतुर्थे च बृहस्पतिः ।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ॥१२॥
सप्तमे च तथैवेन्द्रो वसिष्ठश्चाष्टमे स्मृतः
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ॥१३॥
एकादशे तु त्रिवृषा भरद्वाजस्ततः परम् ।
एकादशे चान्तरीक्षो वप्री चापि चतुर्दशे ॥१४॥
त्रय्यारुणः पञ्चदशे षोड़शे तु धनञ्जयः ।
क्रतुञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः ॥१५॥
ततो व्यासो भरद्वाजो भरद्वाजात् तु गौतमः ।
गौतमादुत्तमो व्यासो हर्यात्मा योऽभिधीयते ॥१६॥
अथ हर्यात्मनो वेणः स्मृतो वाजश्रवान्वयः ।
सोमशुष्मायनस्तस्मात् तृणबिन्दुरिति स्मृतः ॥१७॥
ऋक्षोऽभूद्भार्गवस्तस्माद् वाल्मीकिर्योऽभिधीयते ।
तस्मादस्मात्पिता शक्तिर्व्यासस्तस्मादहं मुने ॥१८॥
जातूकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः ।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः ॥१९॥
एको वेदश्चतुर्धा तु यैः कृतो द्वापरादिषु ।
भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति ।
व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुनौ ॥२०॥
ध्रुवमेकाक्षरं ब्रह्म ओमित्येवं व्यवस्थितम् ।
बृहत्त्वाद् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते ॥२१॥
प्रणवावस्थितं नित्यं भूर्भुवःस्वरितीर्य्यते ।
ऋग्यजुःसामाथर्वाणं यत् तस्मै ब्रह्मणे नमः ॥२२॥
जगतः प्रलयोत्पत्त्योर्यत्तत् कारणसंज्ञितम् ।
महतः परमं गुह्यं तस्मै सुब्रह्मणे नमः ॥२३॥

प्रजापतिर्मनुः, "द्वापरे तु पुरा वृत्ते मनोः स्वायम्भुवेऽन्तरे। ब्रह्मा मनुमुवाचेदं वेदान् व्यस्य प्रजापते ॥" इति वायूक्तेः। इत एव वचनाद् द्वापरादिष्वित्यत्र द्वापर आदिर्येषां तेषु द्वापराणां सन्ध्यांशेष्वित्यर्थः कल्प्यते। शान्तनुसमकालं सत्यवत्यां कृष्णद्वैपायनोत्पत्तिप्रसिद्धेः। ॥११।२०॥

इदानीं वेदविभागं वक्ष्यमाणः प्रथमं तावत् प्रणवावच्छिन्नब्रह्मणो वेदाविर्भावं दर्शयितुमाह—'ध्रुव'मिति। ध्रुवं वेदादीनां प्रकृतिभूतं ओमित्येवंरूपं व्यवस्थितमेकमक्षरं ब्रह्मेत्यभिधीयते। तत्र हेतुमाह—बृहत्त्वात् अपरिच्छिन्नरूपब्रह्मात्मकत्वात्, बृंहणत्वात् वेदादीनां कारणत्वात् आविर्भावकर्तृत्वादिति यावत्। "यस्माद्बृहत्यर्यमाण एव बृंहति बृंहयति तस्माद्बृहच्यते परब्रह्म" इति श्रुतेः, ओमित्येकं ब्रह्मेति गीतोक्तेश्च ॥२१॥

तस्यैव व्यापकत्वं प्रतिपादयन् ब्रह्मप्रकाशकत्वं ब्रह्मप्रकाशत्वं ब्रह्मत्वेनोपास्यं प्रणमति प्रणवेति। भूर्भुवस्व व्याहृतित्रयं नित्यं प्रणवावस्थितमीर्य्यते। तेन व्याहृतित्रयात्मकं यदित्यर्थः। ऋग्यजुःसामार्थवाणमिति द्वितीया। एतद्वेदचतुष्टयात्मकञ्च यत् तस्मै प्रणवाख्याय नम इति ॥२२॥

एवं वाचकप्रणवप्रणामानन्तरं तद्वाच्यं ब्रह्म प्रणमति 'जगत' इति सार्द्धैस्त्रिभिः। जगतः प्रलयोत्पत्त्योः यत् संज्ञितं महतश्च परमं गुह्यं मुख्यं कारणं तस्मै पूजितगुणाधिष्ठात्रे ब्रह्मणे नम इत्यन्वयः ॥२३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अगाधापारमक्षय्यं जगत् सम्मोहनालयम् ।
सम्प्रकाशप्रवृत्तिभ्यां पुरुषार्थप्रयोजनम् ॥२४॥

सांख्यज्ञानवतां निष्ठा गतिः शमदमात्मनाम् ।
यत्तदव्यक्तममृतं प्रवृत्तं ब्रह्म शाश्वतम् ॥२५॥

प्रधानमात्मयोनिश्च गुहासत्त्वञ्च शस्यते ।
अविभागं तथा शुक्लमक्षरं बहुधात्मकम् ॥२६॥

परमब्रह्मणे तस्मै नित्यमेव नमो नमः ।
यद्रूपं वासुदेवस्य परमात्मस्वरूपिणः ॥२७॥

एतद् ब्रह्म त्रिधाभेदमभेदमपि स प्रभुः ।
सर्वभूतेष्वभेदोऽसौ भिद्यते भिन्नबुद्धिभिः ॥२८॥

स ऋङ्मयः साममयः स चात्मा स यजुर्मयः ।
ऋग्यजुःसामसारात्मा स एवात्मा शरीरिणाम् ॥२९॥

तदेव विशिनष्टि,—अगाधं पूर्वपरकालावधिरहितम्, अपारं सर्वगतम्, अक्षय्यं क्षयितुमशक्यं, जगतः सम्मोहनं तमोगुणः तस्यायमालयः। किञ्च सम्प्रकाशप्रवृत्तिभ्यां सत्त्वरजोगुणाभ्यां पुरुषस्य योऽर्थो भोगापवर्गलक्षणः स प्रयोजनं कार्यं यस्य तत् ॥२४॥

तदेवाह,—सांख्यज्ञानं पञ्चविंशतितत्त्वज्ञानं तद्वतां निष्ठा प्राप्यं स्थानम्। शमः अन्तःकरणव्यापारोपरमः, दमः बाह्येन्द्रियव्यापारोपरमः, स एव आत्मा स्वभावो येषां तेषां गतिः आत्मानात्मविवेककारणं यत्तदव्यक्तमतीन्द्रियम्, अमृतं अविनाशि, प्रवृत्तं ब्रह्मपरिणामवद् ब्रह्म शाश्वतं वस्तुतः सदैकरूपतया वर्त्तमानम् ॥२५॥

प्रधानं महदादिकार्यकर्तृत्वेन प्रतीयमानम्। यद्वा प्रधीयते आधीयते विश्वमिहेति प्रधानम्, आत्मयोनिः अनन्यकार्यं स्वतः सिद्धमिति यावत्। गुहायां हृदयकुहरे प्रकाशमानं सत्त्वं यस्य तत् शस्यते वेदादिषु। अविभागः निर्भेदम् पंस्त्वमार्षम्। शुक्लं दीप्तिमत् स्वयम्प्रभम् इति यावत्। अक्षरं अपक्षयशून्यम्। बहुधात्मकम् बहुप्रकारोपाधिकम्। ॥२६॥

यदेवम्भूतं तथापि परमब्रह्मणे कूटस्थपरिपूर्णाय तस्मै प्रणवगम्याय नित्यं नमो नम इति भक्त्यतिशयो द्योत्यते ॥२७॥

इदानीं वाच्यवाचकप्रणवब्रह्मण एव अभेदविवक्षया व्याहृत्यादिरूपतामाह-'यद्रूप'मिति सार्द्धैस्त्रिभिः। वासुदेवस्य यत् प्रणवाख्यं रूपमेतदभेदमपि त्रिधा व्याहृतिरूपेण भूरादिलोकत्रयरूपेण च भेदो यस्य तत्। तत्र हेतुमाह स प्रभुः प्रणवात्मा वासुदेव एव विभिन्नाभिर्बुद्धिभिः भिद्यते भिन्नतया प्रतीयते। दृश्यते भिन्नबुद्धिभिरिति पाठे विषमदृष्टिभिः सर्वभूतेष्वभेदोऽसौ दृश्यते अतः भेदमपि तत्स्वरूपम्। त्रिधा भिद्यते इति त्रिधा भेदं ज्ञानात्मभिन्नं त्रिधा भिन्नन्तु भूराद्यात्मनेत्यर्थः ॥२८॥

किञ्च ऋगादिमयः ऋग्वेदादिरूपः ऋगादिसारः प्रणवस्तदात्मा च शरीरिणां वेदविभागकर्तृणामात्मा च स एव ॥२९॥

(ङ) जगत्सम्मोहनालयमित्यत्र जगतः सम्मोहनं तमोगुणः इति स्वामिना व्याख्यातम्, तदिदं व्याख्यानं सांख्यनयसिद्धं तमोगुणस्य मोहसाधनत्वमधिकृत्य प्रतिपत्तव्यम्।

अनन्तरञ्च स एव 'किञ्च सम्प्रकाश-प्रवृत्तिभ्यां सत्त्वरजोगुणाभ्या' मित्यर्थमाह। तदपि सांख्यमतसिद्धं सत्त्वरजोगुणयोर्यथाक्रमं प्रकाशप्रवृत्तिसाधनत्वात् कार्य्यकारणयोरभेदसिद्धान्तमुररीकृत्याभिहितम्। तदुक्तं कारिकायां 'सत्त्वं प्रकाशक'मित्यादि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स भिद्यते वेदमयः स वेदं
करोति भेदैर्बहुभिः सशाखम् ।
शाखाप्रणेता स समस्तशाखा-
ज्ञानस्वरूपो भगवाननन्तः ॥३०

इति श्रीविष्णुपुराणे तृतीयेंऽशे तृतीयोऽध्यायः ।

प्रणवाख्यवासुदेवस्य सर्वात्मत्वं निवेदयति—'स भिद्यते' इति। स एव वेदमयः स एव भिद्यते ऋगादिरूपेण बहुभिर्भेदैः सशाखम् अनेकप्रकारकशाखाकं वेदमात्मानमेव तत्तत्प्रणेतृरूपः सन् स एव करोति स एव समस्तशाखारूपश्च। तत्र हेतुभूतविशेषणत्रयमाह—'ज्ञानस्वरूपो भगवान्' इति। तेन अनन्तशाखारूपत्वं तत्प्रणेतृत्वं च इति ॥३०॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे तृतीयोऽध्यायः

चतुर्थः अध्यायः

(वेदव्यासमाहात्म्य-वेदविभागवर्णनम्]

पराशर उवाच ।

आद्यो वेदश्चतुष्पादः शतसाहस्रसम्मितः(क) ।
ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥१॥

ततोऽत्र मत्सुतो व्यासो ह्यष्टाविंशतिमेऽन्तरे ।
वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः ॥२॥

चतुर्थः अध्यायः

अष्टाविंशे द्वापरेऽत्र नान्यत्रापि प्रसङ्गतः। कृष्णद्वैपायनेनैव वेदा व्यस्ता इतीर्य्यते। आद्य ईश्वराद्भूतश्चतुष्पाद ऋगादिचतुर्भेदसमूहरूपः शतसाहस्रसम्मित इत्यर्थः। ततः प्रवृत्तोऽयं कृत्स्नो यज्ञो दशगुणः दशविधः, अग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमा इति पञ्चविधः, स एव प्रकृतिविकृतिभेदेन दशविध इति। यद्वा गृह्योक्तैः पञ्चयज्ञैः सह दशविधत्वम् ॥१॥

अत्र मन्वन्तरे अष्टाविंशतितमे द्वापरे चतुष्पादं सन्तं वेदं चतुर्द्धा ऋग्यजुःसामाथर्वरूपेण पृथग् व्यभजत् प्रभुः ईश्वरः अवताररूपः ॥२॥

(क) गृह्योक्तैः पञ्चयज्ञैः सहेति स्वामी।—अत्र पञ्च यज्ञा ब्रह्मयज्ञ-पितृयज्ञ-देवयज्ञ-भूतयज्ञ नृयज्ञसंज्ञाः। तत्स्वरूपाण्याह मनुः—'अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।' इति।

(ख) 'अष्टाविंशतिमेऽन्तर' इत्यत्र 'असंख्यादेर्नान्तात् भवति शेषाच्च ड' इति वैयाकरणसिद्धान्तात् संख्यापूर्वकात् शब्दात् पूरणार्थे डस्य 'विंशत्यादेस्तमट्' इत्यनुशासनाच्च ल्पेन तमट्प्रत्ययस्यैव प्राप्तौ पञ्चमादिशब्दवत् आर्षः। अथवा अष्टाविंशतिः मा मानं संख्यानमिति यस्य तथाभूते अष्टाविंशतिसंख्यके बहुव्रीहिसमासस्य लक्षणया तत्पूरक इति यावत्, अन्तरे मन्वन्तरे इत्यर्थः। मम पराशरस्य सुतः सत्यवत्यां जनितः पुत्रः कृष्ण इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा तु तेन वै व्यस्ता वेदव्यासेन धीमता ।
वेदास्तथा समस्तैस्तैर्व्यस्ता व्यासैस्तथा मया ॥३॥

तदनेनैव वेदानां शाखाभेदान् द्विजोत्तम !
चतुर्युगेष्वावरचितान् समस्तेष्ववधारय(१) ॥४॥

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
कोऽन्यो हि भुवि मैत्रेय ! महाभारतकृद् भवेत् ॥५॥

तेन व्यस्ता यथा वेदा मत्पुत्रेण महात्मना ।
द्वापरे ह्यत्र मैत्रेय ! तस्मिन् शृणु यथार्थतः ॥६॥

ब्रह्मणा चोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे ।
अथ शिष्यान् स जग्राह चतुरो वेदपारगान् ॥७॥

ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥८॥

जैमिनिं सामवेदस्य तथैवाथर्ववेदवित् ।
सुमन्तुस्तस्य शिष्योऽभूद् वेदव्यासस्य धीमतः ॥९॥

रोमहर्षणनामानं महाबुद्धिं महामुनिः ।
सूतं जग्राह शिष्यं स इतिहास-पुराणयोः ॥१०॥

एक आसीद् यजुर्वेदस्तं चतुर्धा व्यकल्पयत् ।
चातुर्होत्रमभूद् यस्मिंस्तेन यज्ञमथाकरोत् ॥११॥

आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथा मुनिः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥१२॥

ततः स ऋचमुद्धृत्य ऋग्वेदं कृतवान् मुनिः ।
यजूंषि च यजुर्वेदं सामवेदञ्च सामभिः ॥१३॥

राज्ञस्त्वथर्ववेदेन सर्वकर्माणि च प्रभुः ।
कारयामास मैत्रेय ! ब्रह्मत्वञ्च यथास्थिति ॥१४॥

सोऽयमेको महावेदस्तरुस्तेन पृथक्कृतः ।
चतुर्धा तु ततो जातं वेदपादपकाननम्(ग) ॥२५॥

तैः पूर्वैः समस्तैः मया च षड्विंशे वेदा व्यस्ताः ॥३॥

तत् तस्मात् अनेन कृष्णद्वैपायनकृतेन वेदविभागेन दृष्टान्तेन चतुर्युगेषु सर्वेष्वपि वेदविभागान् पूर्वैः कृतान् अवधारय जानीहि ॥४॥

तदेवं कृष्णद्वैपायनव्यासस्य मुख्यत्वमुक्त्वा तत्र हेतुमाह—'कृष्णे'ति। अतः अस्मिन् मन्वन्तरे अष्टाविंशे एव द्वापरे भारताविर्भाव इति गम्यते ॥५॥

वेदपारगान् वेदस्य पारं गन्तुं समर्थान् ॥७॥

ऋग्वेदश्रावकमिति—समासस्थमपि श्रावकपदमग्रेऽनुकृष्य योज्यं पारगमिति क्वचित् पाठः ॥८॥

इतिहासपुराणयोरिति "आर्ष्यादि बहुधाख्यानं देवर्षि-चरिताश्रयम्। इतिहासमिति प्रोक्तं भविष्याद्भुतधर्मयुक्।" सर्गादिपञ्चलक्षणं सर्गाद्यवतारभेदविवक्षया दशलक्षणञ्च। ॥१०॥

एक आसीदिति याजुर्वेदिकाध्वर्य्यवक्रियाबाहुल्यात् प्रधानकर्मणश्च याजनस्य तद्विहितत्वात् यजुःप्राधान्यादेव-मुक्तम् "यच्छिष्टश्च यजुर्वेदे तेन यज्ञमयुञ्जत। याजनाद्धि यजुर्वेद इति शास्त्रस्य निश्चयः॥" इति वायूक्तेः। होत्रो-पलक्षिताश्चत्वार ऋत्विजश्चत्वारो होतारः। तैः अनुष्ठेयं कर्म चातुर्होत्रम्, तत् यस्मिन्नभूत् जातं, तेन चतुर्द्धा विभक्तेन वेदेन यज्ञम् अकरोत् प्रवर्त्तितवान् ॥११॥

चातुर्होत्रमेवाह—'आध्वर्यव'मिति ॥१२॥

चतुर्धा भेदमाह—'तत' इति। ततः वेदराशेः यजूंष्यु-द्धृत्येत्यनुषङ्गः। सामभिर्गीतात्मकैरुद्धृतैरित्यर्थः ॥१३॥

राज्ञः सर्वकर्माणि शान्तिपुष्ट्यादीनि ॥१४॥

वेदा एव पादपाः तेभ्यः काननं शाखा-प्रशाखासन्ततिः एव काननमिति वा ॥१५॥

(ग) वेदपादपकाननमिते ऋग्वेदादयः प्रत्येकं व्यष्टयापाद-पः, तत्समष्टिश्च काननमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बिभेद प्रथमं विप्र ! पैल ऋग्वेदपादपम् ।
इन्द्रप्रमितये प्रादाद् बास्कलाय च संहिते(घ) ॥१६॥
चतुर्धा स बिभेदाथ बास्कलिर्द्विज ! संहिताम् ।
बौध्यादिभ्यो ददौ तास्तु शिष्येभ्यः स महामुनिः ।१७
बौध्याग्निमाठरौ तद्वद् याज्ञवल्क्यपराशरौ ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ॥१८॥
इन्द्रप्रमतिरेकान्तु संहितां स्वसुतं ततः ।
माण्डुकेयं महात्मानं मैत्रेयाध्यापयत् तदा ॥१९॥
तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यान् क्रमाद् ययौ ।
वेदमित्रस्तु शाकल्यः संहितां तामधीतवान् ॥२०॥
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्यास्तु ये पञ्च तेषां नामानि मे शृणु ॥२१॥

मुद्गलो गोमुखश्चैव वात्स्यः शालीय एव च ।
शिशिरः पञ्चमश्चासीन्मैत्रेय ! सुमहामुनिः(२) ॥२२॥
संहितात्रितयं चक्रे शाकपूर्णिरथेतरम् ।
निरुक्तमकरोत् तद्वच्चतुर्थं मुनिसत्तम ॥२३॥
क्रौञ्चो वैतालिकस्तद्वद् बलाकश्च महामतिः ।
निरुक्तकृच्चतुर्थोऽभूद् वेदवेदाङ्गपारगः ॥२४॥
इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम !
बास्कलिश्चापरास्तिस्रः संहिताः कृतवान् द्विज ॥२५॥
शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च कथाजवः ।
इत्येते बहुधा प्रोक्ताः संहिता यैः प्रवर्तिताः ॥२६॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे चतुर्थोऽध्यायः ॥४॥

प्रथमं ऋग्वेदपादपं द्विधा बिभेद ॥१६॥

वास्कल एव वास्कलिः स्वार्थे इन् ॥१७॥

वास्कलये दत्तायाः शाखाया अवान्तरशाखास्ते बौध्यादयो जगृहुः ॥१८॥

तस्य पैलशिष्यस्य इन्द्रप्रमतेः शिष्यप्रशिष्येभ्यः शिष्यप्रशिष्याणां पुत्रान् शिष्यांश्च क्रमाद् ययौ ॥२०॥

वेदमित्राख्यः शाकल्य इन्द्रप्रमतिसंहिताम् अधीतवान् । ततश्च स एव तस्याः पञ्च संहिताश्चकार । ताश्च शिष्येभ्यः मुद्गलादिभ्यो ददौ ॥२१॥

शाकपूर्णिस्तु इन्द्रप्रमतिशिष्यस्तत्संहितायाः संहितात्रितयं निरुक्तञ्च वेदशब्दनिर्वचनरूपम् अकरोत् ॥२३॥

तच्च संहितात्रितयं क्रौञ्चादिभ्यः अदात्। चतुर्थो निरुक्तकृत् नामेति केचित् पठन्ति ॥२४॥

अनुशाखाः अवान्तरशाखाः। बास्कलिः पैलशिष्यः तिस्रः संहिताश्चक्रे इत्युक्तं, स एवान्यास्तिस्रः संहिताः कृतवान्। अपर एव शाकल्यसतीर्थो बास्कलिः तच्छिष्याः कालायनिप्रमुखास्त्रयः ॥२६॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां वा स्वप्रकाशाख्यायां श्रीविष्णुपुराणटीकायां तृतीयेंऽशे चतुर्थोऽध्यायः ॥

(घ) बिभेद राशिभूताया वेदसमष्टेः ऋचः समुद्धृत्य ऋग्वेदत्वेनैकं भागं व्यवस्थापितवानित्यर्थः ।

पाठान्तरे—
(४—१) चतुर्युगेषु पठितान्समस्तेष्ववधारय ।
(२२—२)—सुमहामतिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चमः अध्यायः

[यजुर्वेदशाखाविभागः, याज्ञवल्क्यकृत-सूर्य्यस्तुतिश्च]

पराशर उवाच ।

यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः ।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै(क) ॥१॥

शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ।
याज्ञवल्क्यस्तु तत्राभूद् ब्रह्मरातसुतो द्विजः(ख) ॥२॥

शिष्यः परमधर्मज्ञो गुरुवृत्तिपरः सदा ।
ऋषिर्योऽद्य महामेरौः समाजे नागमिष्यति ॥३॥

तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ।
पूर्वमेवं मुनिगणैः समयोऽभूत् कृतो द्विज(१)(ग) ॥४॥

वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा ।
स्वस्रीयं बालकं सोऽथ पदास्पृष्टमघातयत्(घ) ॥५॥

शिष्यानाह स भोः शिष्या ! ब्रह्महत्यापहं व्रतम् ।
चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा(ङ) ॥६॥

पञ्चमः अध्यायः

पञ्चमेऽथ यजुःशाखाः कथ्यन्तेऽत्र समासतः । सेतिहासं तैत्तिरीयं वाजिशाखाप्रवर्त्तनम् ॥ सप्तविंशत् सप्तविंशतिः यजुषः प्रधानशाखाः । ब्रह्माण्डे तु एकाधिकशतमध्वर्युशाखा आपस्तम्बोक्ता उक्ताः ॥१॥

यजुःशाखान्तराणामुत्पत्तिं वक्तुं शिष्यान्तरमाह—याज्ञवल्क्यस्त्विति ॥२॥

तस्मादेव शाखाद्वयप्रवृत्तिं वक्तुं इतिहासमाह— 'ऋषिरिति । अद्य अस्मत्समाजे य ऋषिर्नागमिष्यति, तस्येतः सप्तरात्रात् ब्रह्महत्या भविष्यतीति यः समयोऽभूत् तत् वैशम्पायन एवातिक्रान्तवानिति द्वयोरन्वयः ॥४॥

स्वस्रीयं स्वसुः सुतं पदा स्पृष्टं सन्तम् अघातयत् । ऋषिशापवशात् पदा स्पृष्टमात्रोऽसौ ममारेत्यर्थः ॥५॥

समर्थेनान्येन महापातके कृतेऽन्येन कथं तत्प्रायश्चित्तं कर्त्तव्यमितीदं न विचार्यं, किन्तु तथा साक्षाद् वधे शास्त्रोक्तमुख्यप्रकारेण मदर्थं व्रतं चरतेत्यर्थः ॥६॥

(क) सप्तविंशतिरिति वक्तव्ये सप्तविंशदितिवचनमार्षम् ।

(ख) अनुक्रमादिति—क्रमानुसारेणोत्यर्थः, उचितानुपूर्वीकश्रुतिसन्दर्भस्यैवादृष्टादिविशेषजनकत्वनियमात् । गुरुवृत्तिपर इति—गुरोः वृत्तिः अनुवृत्तिः तत्परः तत्परायणः, गुरूपदिष्टश्रुतिपाठादिष्वस्खलित इत्यर्थः । अथवा गुरोः या वृत्तिः चित्तवृत्तिः तत्परः गुरुचित्तवृत्तिसदृशचित्तवृत्तिधारीत्यर्थः । किंवा गुरोः वृत्तिः मनोवृत्तिः तत्परः गुर्विच्छानुसारेण कृत्यकारीत्यर्थः ।

(ग) सप्तानां रात्रीणां समाहारः इति सप्तरात्रं तस्मात् ल्यब्लोपे पञ्चमी, सप्तरात्रमनतिक्रम्येत्यर्थः । अथवा सप्तरात्रात् परम् । तथा हि यदि सप्तरात्राभ्यन्तरे नागच्छेत्, तदैव तस्य ब्रह्महत्या भविष्यति, अन्यथा तु न । एतेन कृपया किञ्चित्कालापेक्षा सूचिता

(घ) तं निरुक्तं समयं व्यतिक्रान्तवान् तत्समयानुसारेण यथाकालं समाजे नागतवानित्यर्थः ।

(ङ) चरध्वमित्यात्मनेपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथाह याज्ञवल्क्यस्तु किमेभिर्भगवन् ! द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् (च) ॥७॥
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिः ।
मुच्यतां यत् त्वयाधीतं मत्तो विप्रावमानक ॥८॥
निस्तेजसो वदस्येनान् यस्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा(ज) ॥९॥
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ॥१०॥

पराशर उवाच ।

इत्युक्तो रुधिराक्तानि सरूपाणि यजूंषि सः ।
छर्दयित्वा ददौ तस्मै ययौ स स्वेच्छया मुनिः ॥११॥

यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज !
जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥१२॥
ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः ।
चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम(झ) ॥१३॥
याज्ञवल्क्योऽपि मैत्रेय ! प्राणायामपरायणः ।
तुष्टाव प्रयतः सूर्यं यजूष्यभिलषंस्ततः(ञ) ॥१४॥

याज्ञवल्क्य उवाच ।

नमः सवित्रे द्वाराय विमुक्तेः सिततेजसे(१) ।
ऋग्यजुःसामभूताय त्रयीधामवते नमः(२) ॥१५॥
नमोऽग्नीषोमभूताय जगतः कारणात्मने ।
भास्कराय परं तेजः सौषुम्नमुरु बिभ्रते ॥१६॥

विप्रावमानक विप्रावमन्तः ॥८॥

सर्वान् शिष्यान् प्रत्युक्ते तन्निषिध्य मयैव कार्यमित्युक्त्वादाज्ञाभङ्गकारिणेत्युक्तम् ॥९॥

ममापि त्वया गुरुणा अलं त्वत्तो मया यदधीतं तदिदमिति छर्दनमनुचकार ॥१०॥

छर्दितानां साक्षाद ग्रहणमनुचितमिति तित्तिराः पक्षिणो भूत्वा जगृहुः ततो हेतोस्ते तैत्तिरीयाः प्रसिद्धाः ॥१२॥

ततोऽन्येषां चरकाध्वर्य्यसंज्ञां निर्वक्ति —'ब्रह्महत्या व्रतमि'ति ॥१३॥

ततोऽसौ सूर्य्यं स्तुत्वा तत्प्रसादाल्लब्धैर्यजुर्भिः काण्वान् पञ्चदश शाखाः कृतवानिति दर्शयन्नाह—'याज्ञवल्क्योऽपी'त्यादिना यावदध्यायसमाप्ति ॥१४॥

विमुक्तेः द्वाराय त्रयीधामवते त्रयीरूपतेजःशालिने ॥१५॥

अग्नीसोमभूताय अतो जगतः कारणात्मने । तदेवाह—भास्कराय आतपवृष्टिद्वारा जगत्कारणतिमि भावः । [illegible] पपादयति—तेजो बिभ्रत इत्यग्निरूपत्वम् । सौषुम्नं विभ्र इति सोमरूपत्वम् । उक्तञ्च 'सूर्यरश्मिः सुषुम्नो यस्तस्मिंस्तेन चन्द्रमा इति ॥१६॥

(च) चरिष्य इत्यात्मनेपदमार्षम् ।

(छ) विप्रावमानक ! 'किमेभिर्भगवन् ! द्विजैः । क्लेशितैरल्पतेजोभिरित्यनेन विप्राणामपरेषामवमानकारिन् ! क्वचिद् 'विप्रावमन्यक' इति पाठो दृश्यते । तत्र विप्रावमानकेति वक्तव्ये विप्रावमन्यकेत्युक्तिरार्षत्वात् सोढव्या । तन्मते टीकायामपि 'विप्रावमन्यके'ति पाठः । अत एव स्वामी विप्रावमन्यकेत्यस्य विप्रावमन्तरिति प्रतिशब्दमाह ।

(ज) निः नास्ति तेजः येषां तान् निस्तेजसः तेजःशून्यान् स्वल्पमात्रतेजस इत्यर्थः । वदसि किमेभिर्भगवन् ! द्विजैः । क्लेशितैरल्पतेजोभि'रिति पूर्वोक्तश्लोकांशेनेति शेषः । ब्राह्मणपुङ्गवान् विप्रश्रेष्ठानित्यर्थः, 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ।' इत्यमरसिंहोक्तेः ।

(झ) गुरुणा वैशम्पायनेन चोदितैः प्रेरितैः आदिष्टैरिति यावत् तदादेशानुसारेणेत्यर्थः । यैः शिष्यैः ब्रह्महत्याव्रतं ब्रह्महत्याजनितदुरितनाशायानुष्ठेयं प्रायश्चित्तं चीर्णम् आचरितम् । ते चरकाध्वर्य्यवः जाता इति शेषः ।

(ञ) ततः पूर्वोक्तरूपेण वैशम्पायनाद् गृहीतानां छर्दनानन्तरम् । अथवा ततः सूर्य्यात् यजूंषि अभिलषन्

कलाकाष्ठानिमेषादिकालज्ञानात्मने नमः ।
ध्येयाय विष्णुरूपाय परमाक्षररूपिणे ॥१७॥

बिभर्त्ति यः सुरगणानाप्याय्येन्दुं स्वरश्मिभिः ।
सुधामृतेन च पितॄंस्तस्मै तृप्तात्मने नमः ॥१८॥

हिमाम्बुघर्मवृष्टीनां कर्ता हर्ता च यः प्रभुः ।
तस्मै त्रिकालरूपाय नमः सूर्य्याय वेधसे ॥१९॥

यो हन्ति तिमिराण्येको जगतोऽस्य जगत्पतिः(३) ।
सत्त्वधामधरो देवो नमस्तस्मै विवस्वते ॥२०॥

सत्कर्मयोग्यो न जनो नैवापः शौचकारणम् ।
यस्मिन्ननुदिते तस्मै नमो देवाय वेधसे(ट) ॥२१॥

स्पृष्टो यदंशुभिर्लोकः क्रियायोग्योऽभिजायते ।
पवित्रताकारणाय तस्मै शुद्धात्मने नमः ॥२२॥

नमः सवित्रे सूर्याय भास्कराय विवस्वते ।
आदित्यायादिभूताय देवादीनां नमो नमः ॥२३॥

हिरण्मयं रथं यस्य केतवोऽमृतधायिनः ।
वहन्ति भुवनालोकिचक्षुषं तं नमाम्यहम्(ठ) ॥२४॥

पराशर उवाच ।

इत्येवमादिभिस्तेन स्तूयमानः स्तवै रविः ।
वाजिरूपधरः प्राह व्रियतामिति वाच्छितम् ॥२५॥

याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ॥२६॥

एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः(ड) ॥२७॥

कलाकाष्ठादिकालो ज्ञायते येन तथाभूतः आत्मा यस्य तस्मै ध्येयाय सर्वेषां ध्यानार्हाय, 'धीमही'ति गायत्रीलिङ्गात् । परमाक्षरं ब्रह्म, 'अक्षरात् परतः परः' । इति श्रुतेः । तद्रूपिणे ओंकाररूपिणे इति वा ॥१७॥

सुधामृतेन सुधैव अमृतम् अमरत्वसाधनत्वात् तेन । तृप्त्यात्मने तर्पकाय । धृतात्मन इति पाठे धारयित्रे ॥१८॥

हिमादीनां या वृष्टिः तत्कर्त्ता । हेमन्तवर्षाग्रीष्माख्य-त्रिकालरूपाय, वेधसे स्रष्ट्रे ॥१९॥

सत्त्वधामधरः सत्त्वमूर्त्तिधर । सत्यधामधर इति पाठे सत्यम् अवाधितं धाम तेजो धरतीति पचाद्यच् ॥२०॥

सत्कर्म रात्रिसन्ध्येतरकालविहितं यत् कर्म तद्योग्यः ॥२१॥

(ट) यस्मिन् सूर्य्ये अनुदिते उदयमलब्धवति सति । जनः न सत्कर्मयोग्यः रात्रिसन्ध्येतरकाश्च विहितकृत्ययोग्यः, तत्तत्कर्मणः सूर्योदये सत्येव कर्त्तव्यत्वात् ।

पूर्वोक्तमेवार्थं विधिमुखेनाह – 'स्पृष्ट' इति ॥२२॥

भक्त्यतिशयेन पूर्वोक्तैः पर्य्यायैः सर्वैः प्रणमति—'नमः सवित्रे' इति ॥२३॥

हिरण्मयं तेजोमयम् । केतवः वेदमयाः अश्वा अमृत-धायिनः अमृताहाराः । 'उदुत्यं जातवेदस'मित्यादि—ऋगर्थ उक्तः । हिरण्मये रथ इति पाठे केतवः रश्मयः, अमृतं जलं तद्धातारः, वहन्ति गच्छन्तीत्यर्थः ॥२४॥

अयातयामसंज्ञानि अन्यैरनभ्यस्तानि ॥२७॥

(ठ) भुवनालोकि भुवनदर्शनकारि चक्षुः येन तथाभूतम्, आलोकसंयोगस्य चाक्षुषप्रत्यक्षं प्रति कारणत्वात् सूर्य्यस्य स्वीयालोकद्वारा तथात्वम् । तं सूर्य्यम् ।

(ड) यानि यजूंषि पूर्वैरभ्यस्तानि तेषां पूर्वजातत्वाद् विगता यामाः, यानि पूर्वैरनभ्यस्तानि तेषां न गता यामाः, अत एव अयात-यामसंज्ञानि इत्यस्य अन्यैरनभ्यस्तानीत्यर्थमाह स्वामी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम !
वाजिनस्ते समाख्याताः सूर्याश्वः सोऽभवद् यतः ॥२८

शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्यास्तु महाभाग ! याज्ञवल्क्या-प्रवर्तिताः ।

वाजिनः समाख्याताः वाजिरूप-सूर्यप्रोक्तसंहिताध्यायित्वादित्यर्थः ॥२८॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे पञ्चमोऽध्यायः ॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयांशे पञ्चमोऽध्यायः ॥

पाठान्तराणि—

(४—१)—समयो यः कृतो द्विज ।
(१५—२)—मुक्तेरमिततेजसे ।
(१५—३)—त्रयीधाम्ने च ते नमः ।
(२९—२)—अपहन्ति तमो यश्च जगतोऽस्य जगत्पतिः

षष्ठः अध्यायः

[सामाथर्व्ववेदशाखाविभागः, पुराणनाम—लक्षणादिनिरूपणञ्च]

पराशर उवाच ।

सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः ।
क्रमेण येन मैत्रेय ! बिभेद शृणु तन्मम ॥१॥

सुमन्तुस्तस्य पुत्रोऽभूत् सुकर्मास्याप्यभूत् सुतः ।
अधीतवन्तावेकैकां संहितां तौ महामुनी ॥२॥

साहस्रं संहिताभेदं सुकर्मा तत्सुतस्ततः ।
चकार तञ्च तच्छिष्यौ जगृहाते महामती ॥३॥

हिरण्यनाभः कौशल्यः पौष्पिञ्जिश्च द्विजोत्तम !
उदीच्यसामगाः शिष्यास्तेभ्यः पञ्चदश स्मृताः ॥४॥

हिरण्यनाभात् तावत्यः संहिता यैर्द्विजोत्तमैः ।
गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्यसामगाः ॥५॥

षष्ठः अध्यायः

साम्नोऽथार्थवर्णः शाखाभेदाः पौराणिका अपि । अध्येतारश्च कर्त्तारस्तेषां षष्ठे निरूपिताः । तस्य जैमिनेः । अस्य जैमिनिपुत्रस्य सुमन्तोः । तौ जैमिनेः पुत्रपौत्रौ जैमिनिना विभक्तामेकैकां संहितां स्व-स्वकालेऽधीतवन्तौ ॥२॥

तत्सुतः सुमन्तुसुतः तत्संहिताभेदम् ॥३॥

सुकर्मणः शिष्यावाह—'हिरण्यनाभ' इति कौशल्यः । हिरण्यनाभविशेषणम् । ये पञ्चदश शिष्यास्तेभ्यः पञ्च संहिता हिरण्यनाभेन दत्तास्त एव उदीच्यसामगाः स्मृताः ॥४॥

यैरपरैर्द्विजोत्तमैस्तावत्यस्तेषां ग्रहीतॄणां संख्यया संहिता हिरण्यनाभाद् गृहीताः, ते प्राच्यसामगा इत्यन्वयः ॥५॥

(क) बिभेद विभागं कृतवान् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोकाक्षिः कुथुमिश्चैव कुसीदिर्लाङ्गलिस्तथा(१) ।
पौष्पिञ्जिशिष्यास्तद्भेदैः संहिता बहूलीकृताः ॥६॥
हिरण्यनाभशिष्यश्च चतुर्विंशतिसंहिताः ।
प्रोवाच कृतिनामासौ शिष्येभ्यः स महामतिः ॥७॥
तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः ।
अथर्वणामथो वक्ष्ये संहितानां समुच्चयम् ॥८॥
अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ।
शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा(ख) ।
कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान् ॥९॥
देवदर्शस्य शिष्यास्तु मौद्गो ब्रह्मबलिस्तथा ।
शौक्तायनिः पिप्पलादस्तथान्यो मुनिसत्तम ॥१०॥
पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज ! संहिताः ।
जाजालिः कुमुदादिश्च तृतीयः शौनको द्विज(२) ॥११
शौनकस्तु द्विधा कृत्वा ददावेकन्तु बभ्रवे ।
द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने ॥१२॥
सैन्धवा मुञ्जिकेशाश्च द्विधा भिन्नास्त्रिधा पुनः ।
नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥१३॥
चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः ।
श्रेष्ठास्त्वथर्वणामेते संहितानां विकल्पकाः ॥१४॥
आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पसिद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥१५॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै रोमहर्षणः ।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः ॥१६॥
सुमतिश्चाग्निवर्चाश्च मित्रायुः शांशपायनः ।
अकृतव्रणः सावर्णिः षट् शिष्यास्तस्य चाभवन् ॥१७॥
काश्यपः संहिताकर्ता सावर्णिः शांशपायनः ।
रोमहर्षणिका चान्या तिसृणां मूलसंहिताः ॥१८॥
चतुष्टयेनाप्येतेन संहितानामिदं मुने !
आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ॥१९॥

पौष्पिञ्जिशिष्यानाह — 'लोकाक्षि'रिति। तद्भेदैः तच्छिष्यप्रशिष्यादिभिः ॥६॥

हिरण्यनाभस्य उदीच्यसामगशिष्यमध्ये कृतिनामा शिष्यः ॥७॥

तैः कृतिनाम्नः शिष्यैः ॥८॥

देवदर्शः स्वसंहितां चतुर्धा चक्रे। तास्तु मौद्गादयः चत्वारो जगृहुरित्यर्थः ॥११॥

पथ्यकृतास्तिस्रः संहिता जाजल्यादयो जगृहुः, यैः स्वसंहिता भिन्नाः कृताः ॥१२॥

सैन्धवाः सैन्धवायनशिष्याः, मुञ्जिकेशा इति वभ्रोरेव नामान्तरं तच्छिष्या द्विधा द्विप्रकाराभिन्ना वेदाः स्व स्व संहिता यैः ते तथा। संहिताभेदानाह—'नक्षत्रकल्प' इति।

(ख) सोऽपि कबन्धोऽपि। तम् अथर्ववेदम् द्विधा कृत्वेति सम्बन्धः।

वेदानां संहितानाञ्च कल्प इत्यन्वयः। तत्र नक्षत्रकल्पो नक्षत्रादिपूजाविधिः वेदकल्पो वैतालिक ब्रह्मत्वादिभिः संहिताकल्पः संहिताविधिः ॥१४॥

आङ्गिरसकल्पः अभिचारादिविधिः शान्तिकल्पः अश्वगजाद्यष्टादशमहाशान्त्यादिविधिः ॥१५॥

आख्यानादिभिः सह पुराणसंहिताञ्चक्रे व्यास इति शेषः। तत्र दृष्टोपलब्धकथनमुपाख्यानं प्रचक्षते, गाथा पितृपृथिव्यादिगीताः, कल्पसिद्धिः वाराहादिकल्पनिर्णयः ॥१६॥

सुमत्यादयस्तस्य रोमहर्षणस्य षट् शिष्याः तत्कृताः षट् संहिता जगृहुः ॥१८॥

काश्यपादिभिस्त्रिभिः कृतास्तिस्रः। अकृतव्रण एव काश्यपः काश्यपोऽप्यकृतव्रण इति वायुनोक्तः। रोमहर्षणिका च अन्या रोमहर्षणेन पुनः सङ्क्षेपेण कृता ॥१८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते ।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥२०॥
अथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ।
आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा ॥२१॥
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ।
वाराहं द्वादशञ्चैव स्कान्दञ्चात्र त्रयोदशम् ॥२२॥
चतुर्दशं वामनञ्च कौर्मं पञ्चदशं स्मृतम् ।
मात्स्यञ्च गारुड़ञ्चैव ब्रह्माण्डञ्च ततः परम् ॥२३॥
महापुराणान्येतानि ह्यष्टादश महामुने ॥२४॥
तथा चोपपुराणानि मुनिभिः कथितानि च ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितञ्च यत् ॥२५॥

यदेतत् तव मैत्रेय ! पुराणं कथ्यते मया ।
एतद् वैष्णवसंज्ञं वै पाद्मस्य समनन्तरम् ॥२६॥
सर्गे च प्रतिसर्गे च वंशमन्वन्तरादिषु ।
कथ्यते भगवान् विष्णुरशेषेष्वेव सत्तम ॥२७॥
अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥२८॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।
अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव ताः(ग)॥
ज्ञेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः ।
राजर्षयः पुनस्तेभ्य ऋषिप्रकृतयस्त्रयः ॥३०॥
इति शाखाः प्रसंख्याताः शाखाभेदास्तथैव च ।
कर्तारश्चैव शाखानां भेदहेतुस्तथोदितः ॥३१॥

एतासां संहितानां चतुष्टयेन सारोद्धाररूपमिदं विष्णुपुराणं मुने ! मैत्रेय ! मया कृतमिति शेषः

व्यासकृतानि अष्टादशपुराणान्याह—आद्यमिति सार्धैश्चतुर्भिः । केचित् तु संहितानां चतुष्टयेन इदमाद्यं ब्राह्ममुच्यते इति वदन्ति ॥१६।२७॥

उक्तेष्वष्टादशपुराणेषु किमेतत् पुराणं त्वया कथ्यत इत्याह—यदेतदिति । मया यदेतत् तव कथ्यते, तदेवानागताख्यानेन पद्मपुराणानन्तरं व्यासेन कृतमित्यर्थः । यथाह—मात्स्ये, वराहकल्पवृत्तान्तमधिकृत्य पराशरः । यान् प्राह धर्मानखिलांस्तदुक्तं वैष्णवं विदुः । इत्येवमेव ब्रह्मादिकथितं व्यासेन निबद्धं ब्रह्मपुराणादि कथ्यते । विष्णुपुराणञ्च क्वचित् दशसाहस्रं क्वचिदष्टसाहस्रमित्यादिविकल्पेऽपि अत्र षट्साहस्रमेव व्याख्यायते ॥२६॥

अस्य वैष्णवसंज्ञायां हेतुमाह—'सर्गे चे'ति ॥२७॥

पुराणानां वेदोपबृंहणत्वेन धर्मवेदतद्धेतुत्वात् धर्मविद्यास्थानेषु चतुर्दशस्वन्तर्भावमाह—'अङ्गानी'ति । अङ्गानि शिक्षाकल्पज्योतिश्छन्दोनिरुक्तव्याकरणानि षट् । चतुरस्रं धर्मशास्त्रं मन्वादिप्रोक्तस्मृतिशास्त्रम् ॥२८॥

केवलं दृष्टार्थविद्यास्थानमायुर्वेदादिचतुष्कं धर्मविद्यास्थानैः सहाष्टादशविद्यास्थानान्याह—'आयुर्वेदो आयुर्वेदोऽष्टाङ्गचिकित्साशास्त्रम् धन्वन्तरिप्रोक्तम्। भृगुप्रोक्तश्चतुर्विध आयुधसन्धानमोक्षादिविषयः। वेदो भरतमुनिप्रणीतो नृत्यगीतादिविषयः। बार्हस्पत्यादिनीतिशास्त्रम्। पूर्वोक्ताश्चतुर्दशेत्यष्टादश इति ॥२९॥

वेदशाखप्रसङ्गात् कर्तॄणामष्टर्षीणां भेदानाह—इति ॥३०॥

उपसंहरति—'इती'ति । प्रसंख्याताः संख्याता शाखाभेदाश्च नाम उक्ताः । भेदहेतुः पुरुषप्रज्ञत्वादिः ॥३१॥

(ग) अष्टादशैव विद्या इति पूर्वनिरुक्तचतुर्दशविध्येयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वमन्वन्तरेष्वेव शाखाभेदाः समाः स्मृताः ।
प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे द्विज ॥३२॥

एतत् तवोदितं सर्वं यत् पृष्टोऽहमिह त्वया ।
मैत्रेय ! वेदसम्बद्धं किमन्यत् कथयामि ते ॥३३॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे षष्ठोऽध्यायः ॥६॥

शाखानां पुरुषप्रणीतत्वेन वेदस्य पौरुषेयत्वं स्यादित्यत आह—'प्राजापत्ये'ति । कल्पादौ प्रजापतिना दृष्टा श्रुतिः । नित्यैव इमे तु शाखाभेदास्तस्या एव विकल्पाः, ते ग्रहणसौकर्य्यार्थमवान्तरभेदाः, न त्वपूर्वाः पुरुषैः कृता इत्यर्थः ॥३२॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः ।

[यमगीता]

मैत्रेय उवाच ।

यथावत् कथितं सर्वं यत् पृष्टोऽसि मया द्विज !
श्रोतुमिच्छाम्यहं त्वेकं तद् भवान् प्रब्रवीतु मे ॥१॥

सप्त द्वीपानि पाताल-वीथ्यश्च सुमहामुने !
सप्त लोका येऽन्तरस्था ब्रह्माण्डस्यास्य सर्वतः ॥२॥
स्थूलैः सूक्ष्मैस्तथा सूक्ष्मात् सूक्ष्मैः सूक्ष्मतरैस्तथा ।
स्थूलैः स्थूलतरैश्चैव सर्वप्राणिभिरावृतम् ॥३॥
अङ्गुलस्याष्टभागोऽपि न सोऽस्ति मुनिसत्तम !
न सन्ति प्राणिनो यत्र कर्मबन्धनिबन्धनाः(क) ॥४॥

सर्वे चैते वशं यान्ति यमस्य भगवन् ! किल ।
आयुषोऽन्ते तथा यान्ति यातनास्तत्प्रचोदिताः(ख)॥५
यातनाभ्यः परिभ्रष्टा देवाद्यास्स्थ योनिषु ।
जन्तवः परिवर्तन्ते शास्त्राणामेष निर्णयः ॥६॥
सोऽहमिच्छामि तच्छ्रोतुं यमस्य वशवर्त्तिनः ।
न भवन्ति नरा येन तत् कर्म कथयामलम् ॥७॥

पराशर उवाच ।

अयमेव मुने ! प्रश्नो नकुलेन महात्मना ।
पृष्टः पितामहः प्राह भीष्मो यत् तच्छृणुष्व मे(ग)॥८

सप्तमः अध्यायः

वेदशाखाप्रणयनमुक्तं कर्त्रादिभेदतः । अथ तान्त्रिकधर्मश्च सेतिहासोऽत्र वर्ण्यते । भूतलादिप्रसङ्गानुप्रसङ्गादनु वर्ण्यते । सद्गतिस्तत्स्थजन्तूनां भगवद्धर्मसङ्गतः । उक्तमभिनन्दन् श्रुतिस्मृतिसारभूतं धर्मं पृच्छति—'यथाव'दिति सप्तभिः ॥१॥

पातालवीथी भूविवरपंक्तिः । सप्त लोकाः स्वर्गादयः । एतत् सप्तद्वीपादिरूपं सर्वम् ॥२॥

अयमेव प्रश्नः प्रष्टव्योऽर्थो नकुलेन भीष्मं प्रति पृष्टः, ततश्च स भीष्मस्तं प्रति यत् प्राह तच्च शृणुष्व ॥८॥

(क) कर्मबन्धः कर्मकृतं बन्धनं निबन्धनं कारणं येषां ते 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयत' इत्यादि शास्त्रात् ।

(ख) तत्प्रचोदिताः यमेन प्रेरिताः, तेन नियन्त्रिता इत्यर्थः ।

(ग) शृणुष्वेत्यात्मनेपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भीष्म उवाच।

पुरा समागतो वत्स ! सखा कालिङ्गको द्विजः ।
स मामुवाच पृष्टो वै मया जातिस्मरो मुनिः ॥९॥

तेनाख्यातमिदञ्चेदमित्थञ्चैतद् भविष्यति ।
तथा च तदभूद् वत्स ! यथोक्तं तेन धीमता ॥१०॥

स पृष्टश्च मया भूयः श्रद्दधानवता द्विजः (१) ।
यद् यदाह न तद् दृष्टमन्यथा हि मया क्वचित् ॥११॥

एकदा तु मया पृष्टं यदेतद् भवतोदितम् ।
प्राह कालिङ्गको विप्रः स्मृत्वा तस्य मुनेर्वचः ॥१२॥

जातिस्मरेण कथितो रहस्यः परमो मम ।
यम-किङ्करयोर्योऽभूत् संवादस्तं ब्रवीमि ते ॥१३॥

कालिङ्ग उवाच ।

स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥१४॥

अहममरगणार्चितेन धात्रा (२)
यम इति लोकहिताहिते नियुक्तः ।
हरिगुरुवशगोऽस्मि न स्वतन्त्रः
प्रभवति संयमने ममापि विष्णुः ॥१५॥

कटकमुकुटकर्णिकादिभेदैः
कनकमभेदमपीष्यते यथैकम् ।
सुरपशुमनुजादिकल्पनाभि-
र्हरिरखिलाभिरुदीर्य्यते तथैकः ॥१६॥

स कालिङ्गको द्विजो मामुवाच,—'मया जातिस्मरो मुनिः पृष्टः' इति ॥९॥

तेन जातिस्मरेण इदमिदं वर्त्तमानमेतदित्थमेवंलक्षणं भविष्यतीति च कालिङ्गस्थाने यदाख्यातं, तेन च कालिङ्गकेन मह्यं यथोक्तं, तथैवं तदभूत् हे वत्स नकुलेत्यन्वयः ॥१०

श्रद्दधानमनोयुक्तेन स कालिङ्गको द्विजो भूयः पुनः पृष्टः सन् जातिस्मरवाक्यं यद्यदाह, तदन्यथा व्यभिचारि मया न दृष्टमित्यतिविश्वासार्थमुक्तम् ॥११

प्रकृतमाह—'एकदे'ति । तस्य जातिस्मरस्य मुनेः ॥१२॥

तदेवाह—'जाती'ति । तं संवादं संवादविषयार्थम् ॥१३॥

तमेवाह—'स्वपुरुष'मित्यादिभिः 'सोऽन्यलोक्य' इत्यन्तैरेकविंशत्या श्लोकैः । पापिजनानयनाय उद्यतं पाशहस्तं स्वपुरुषमभिवीक्ष्य विष्णुभक्तान् परित्यज्यान्यानानयेति प्रतापभङ्गभिया अतिरहस्यतया च कर्णमूले वदति स्म ॥१४॥

न वैष्णवानां प्रभुरित्यत्र हेतुमाह—'अह'मिति । संयमनाद् यम इति संज्ञया लोकहिताहिते शुभाशुभदानार्थे धात्रा नियुक्तोऽपि हरिरेव गुरुस्तद्वशगोऽस्मि न स्वतन्त्रः । यतो ममापि संयमने दण्डे विष्णुः प्रभवति हिताय स नियुक्त इति पाठे दण्डोऽपि पादक्षयार्थं हित एव तस्मादपि ॥१५॥

तत्र हेतुमाह—'कटके'ति द्वाभ्याम् । सर्वोत्पत्तिमत्त्वहेतुत्वेन सर्वात्मकत्वात् सर्वनियन्तृत्वमित्यर्थः, कटको वलयः कर्णिका कर्णभूषणम् । कटकादिभेदैर्नानारूपैः कार्यैर्लक्षितमपि अभेदं कारणात्मना एकमेवेष्यते यथा, तथैव जगत्कारणभूतो हरिः सुरादिभेदैरुदीर्य्यते ॥१६॥

(घ) स्वपुरुषं यमपुरुषम् । पाशः हस्ते यस्य तम् । तस्य यमपुरुषस्य । मधुसूदनप्रपन्नान् विष्णुशरणागतान् विष्णुभक्तानिति यावत् । अन्यनृणां वैष्णवभिन्नजनानाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षितिजलपरमाणवोऽनिलान्ते(ङ) (३)
पुनरपि यान्ति यथैकतां धरित्र्याः ।
सुरपशुमनुजादयस्तथान्ते
गुणकलुषेण सनातनेन तेन ॥१७॥

हरिममरगणार्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः ।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाग्निमाज्यसिक्तम् ॥१८॥

इति यमवचनं निशम्य पाशी
यमपुरुषस्तमुवाच धर्मराजम् ।
कथय मम विभो ! समस्तधातु-
र्भवति हरेः खलु यादृशोऽस्य भक्तः ॥१९॥

यम उवाच ।
न चलति निजवर्णधर्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे(च) ।
न हरति न च हन्ति किञ्चिदुच्चैः
सितमनसं तमवैहि विष्णुभक्तम् ॥२०॥

कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनीकृतोऽस्तमोहे ।
मनसि कृतजनार्दनं मनुष्यं
सततमवैहि हरेरतीव भक्तम् ॥२१॥

कनकमपि रहस्यवेक्ष्य बुद्ध्या
तृणमिव यः समवैति वै परस्वम् ।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम् ॥२२॥

किञ्च भेदस्य मायोपाधिकत्वान्मायानाशे तु विष्णुरेक एव इत्याह—'क्षिती'ति। अनिलोद्वृत्ताः क्षितिजलपरमाणवो यथा अनिलस्यान्ते अवसाने धरित्र्यादिना सहैकतां यान्ति तथा गुणानां कलुषेण कालुष्येण क्षोभेण ये सुरादयो जाताः अन्ते गुणक्षोभोपरमे तेन विष्णुना सहैकतां यान्तीत्यन्वयः ॥१७॥

तर्हि यमस्यापि नियन्तुर्भक्तिः कथं मनुष्यसाध्येत्यत आह—'हरि'मिति। परमार्थतः सर्वात्मत्वेन हरिं यः प्रणमत्यपि तं परित्यज्य व्रज। यद्वा हरिप्रणतिमात्रेण परमार्थतः तमपगतसमस्तपापबन्धमित्यन्वयः। अनेन दृष्टान्तेन भक्तसंसर्गिणोऽपि त्याज्या इत्युक्तं, 'येऽन्ये च पापाः पदमाश्रयाश्रयाः शुध्यन्तो'ति शुकोक्तेः ॥१८॥

समस्तस्य धातुः पालकस्य ॥१९॥

उच्चैरतिशयेन सितं शुद्धं रागादिशून्यं मनो यस्य तं विष्णुभक्तं विद्धि। भक्तौ हेतुं वदन् तं विशिनष्टि—न चलतीति हरेराज्ञेयमिति बुद्ध्या निजवर्णाश्रमधर्मतो यो न चलति तम्। भक्तेश्चिह्नान्याह—'सममति'रिति ॥२०॥

तेष्वप्यस्तमोहे मनसि सततं कृतजनार्दनमतीवभक्तमवैहि। किं विशिष्टं कलौ वर्त्तमानस्य यस्य तत्कृतेन पापमलेनात्मा बुद्धिर्न मलिनीकृतस्तम् ॥२१॥

न हरतीति यदुक्तं तद्विशेषमाह—'कनक'मिति। कनकमपि रहस्यपि दृष्ट्वा परस्वं तृणमिव यः समवैति जिघृक्षाविमुखो भवतीत्यर्थः। अथ च भगवति अनन्यचेताः भवति तम् ॥२२॥

(ङ) अनिलान्ते प्राणवायोरवसाने मरणानन्तरमित्यर्थः।

(च) आत्मसुहृद्विपक्षपक्षे आत्मपक्षे सुहृत्पक्षे विपक्षपक्षे च सममतिः तुल्यज्ञानः। तथा हि यः आत्मपक्षे सुहृत्पक्षे च रागातिशयेन न मुह्यति, विपक्षपक्षे च विद्वेषं न पुष्णाति तथाभूत इत्यर्थः। यद्वा आत्मनि सुहृत्पक्षे विपक्षपक्षे शत्रुपक्षे चेत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्फटिकगिरिशिलामलः क्व विष्णु-
र्मनसि नृणां क्व च मत्सरादिदोषः ।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति हुताशनदीप्तिजः प्रतापः(छ) ॥२३॥

विमलमतिविमत्सरः प्रशान्तः
शुचिचरितोऽखिलसत्त्वमित्रभूतः ।
प्रियहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः ॥२४॥

वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव शालपोतः ॥२५॥

यमनियमविधूतकल्मषाणा-
मनुदिनमच्युतसक्तमानसानाम् ।
अपगतमद-मान-मत्सराणां
त्यज भट ! दूरतरेण मानवानाम्(ज) ॥२६॥

हृदि यदि भगवाननादिरास्ते
हरिरसिशङ्खगदाधरोऽव्ययात्मा ।
तदघमघविघातकर्तृभिन्नं
भवति कथं सति चान्धकारमर्के ॥२७॥

हरति परधनं निहन्ति जन्तून्
वदति तथानृतनिष्ठुराणि यश्च ।
अशुभजनितदुर्मदस्य पुंसः
कलुषमतेर्हृदि तस्य नास्त्यनन्तः ॥२८॥

न सहति परसम्पदं विनिन्दां
कलुषमतिः कुरुते सतामसाधुः ।
न यजति न ददाति यश्च सन्तं
मनसि न तस्य जनार्दनोऽधमस्य(झ) ॥२९॥

सितमनसमिति विशेषणं यदुक्तं तदेव क्वशब्दाभ्यां स्पष्टयति—'स्फटिके'ति । स्फटिकगिरिशिलेव अमलः तुहिनमयूखश्चन्द्रस्तस्य रश्मिपुञ्जे मत्सरादिदोषस्य विष्णुभक्तेश्च विरोधोक्त्या तद्दोषरहितस्यैव विष्णुभक्तत्वमित्युक्तं भवति ॥२३॥

तदेव विधिमुखेन विवृणोति—'विमलमति'रिति । शुचि शुद्धं चरितं यस्य, अखिलानां सत्त्वानां मित्रभूतः, अस्ते निरस्ते मानमाये गर्वालीके येन सः ॥२४॥

तस्य प्रसन्नतैव चिह्नमित्याह—'वसती'ति । उक्तमर्थमर्थान्तरन्यासेन समर्थयति—'क्षितिरस'मिति । शालपोतो बालः शालतरुः चारुतया सुकुमारतयैव रम्यं क्षितिरसं स्वस्यान्तर्यथा कथयति अनुमापयति, एवं सर्वभूतेषु सौम्य विष्णुभक्तोऽपि विष्णुं हृदि वसन्तं सूचयतीत्यर्थः ॥२५॥

किञ्च 'यमनियमे'ति अहिंसासत्यास्तेयब्रह्मचर्य्यापरि यमाः, शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नि धनादिसम्पत्समुत्सिक्तो मनस उल्लासो मदः, आ पूज्यताबुद्धिर्मानः, परशुभद्वेषो मत्सरः ॥२६॥

अपगतकल्मषत्वमेवाह—'हृदी'ति । असिस्थाने क्वचित् पाठः । तत् तर्हि अघानां विघातकर्त्ता हरि भिन्नं नाशितं सदघं कथं भवति बलवद्विरोधिनि अपरं न तिष्ठतीत्यर्थान्तरेण स्पष्टयति—'कथ'मिति ॥२७॥

इदानीमभक्तलक्षणान्याह – 'हरती'ति चतुर्भिः ॥२८॥

सतां विनिन्दां कुरुते, सन्तमर्थं न ददाति । यद्वा विष्णुं तद्भक्तं वा न यजति न पूजयति, न च ददाति ॥२९॥

(छ) क्वशब्दद्वयं प्रकृतयोरुभयोर्महदन्तरं सूचयति । तथा हि मत्सरादिदोषग्रस्ते मनसि विष्णोः स्फटिकशिलामलस्य न कदापि स्थितिर्भवितुमर्हतीत्यर्थः । हुताशनदीप्तिजः वह्निप्रज्वलनजन्यः प्रतापः प्रकृष्टः तापः यथा न, तथेत्यर्थः ।

(ज) मदश्च मानश्च मत्सरश्चेति द्वन्द्वोत्तरं अपगताः मानमत्सरा येषां तेषामिति बहुव्रीहिः । दूरतरेण अतिदूरेणेत्यर्थः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परमसुहृदि बान्धवे कलत्रे
सुततनयापितृमातृभृत्यवर्गे ।
शठमतिरुपयाति योऽर्थतृष्णां
तमधमचेष्टमवैहि नास्य भक्तम्(ञ) ॥३०॥

अशुभमतिरसत्प्रवृत्तिसक्तः
सततमनार्य्यविशालसङ्गमत्तः (४) ।
अनुदिनकृतपापबन्धयत्नः
पुरुषपशुर्नहि वासुदेवभक्तः(ट) ॥३१॥

सकलमिदमहञ्च वासुदेवः
परमपुमान् परमेश्वरः स एकः ।
इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान् विहाय दूरात् ॥३२॥

कमलनयन वासुदेव विष्णो
धरणिधराच्युत शङ्खचक्रपाणे !
भव शरणमितीरयन्ति ये वै
त्यज भट दूरतरेण तानपापान्(ठ) ॥३३॥

वसति मनसि यस्य सोऽव्ययात्मा
पुरुषवरस्य न तस्य दृष्टिपाते ।
तव गतिरथवा ममास्ति चक्र-
प्रतिहतवीर्य्यबलस्य सोऽन्यलोक्यः ॥३४॥

कालिङ्ग उवाच ।

इति निजभटशासनाय देवो
रवितनयः स किलाह धर्मराजः ।
मम कथितमिदञ्च तेन तुभ्यं
कुरुवर ! सम्यगिदं मयापि चोक्तम् ॥३५॥

भीष्म उवाच ।

नकुलैतन्ममाख्यातं पूर्वं तेन द्विजन्मना ।
कलिङ्गदेशादभ्येत्य प्रीयता सुमहात्मना(ड) ॥३६॥

परमसुहृदादिषु शठमतिः सन्नर्थतृष्णां करोति, अर्थात् तेभ्य एवार्थं ग्रहीतुं वाञ्छति । यद्वा परमसुहृदादौ तेषां निमित्तमन्यायेनाप्यर्थतृष्णां करोति ॥३०॥

अनार्यैः विशालो दीर्घकालो यः सङ्गस्तेन मत्तः । अनार्य्यकुशीलेति पाठे नीचैः दुःशीलैश्च यः सङ्गस्तेन मत्तः इत्यर्थः ॥३१॥

उक्तमभक्तचिह्नं भक्तचिह्नमाह सकलमिति ॥३२॥

तन्नामकीर्त्तनं तदेकशरणता चैकान्तभक्तचिह्नमित्याह 'कमलनयने'ति ॥३३॥

दूरतरेण त्यजेति यदुक्तं तत्र हेतुमाह वसतीति । तस्य दृष्टिपातं यावच्चक्रभ्रमणादतस्तच्चक्रेण प्रतिहते वीर्यबले यस्य तस्य तव मम च तद्दृष्टिपातविषये पापिजनानयनेऽपि न गतिरस्ति स पुनरन्यलोक्यः वैकुण्ठवासार्हः नास्मल्लोकयोग्यः ॥३४॥

मम मह्यं, तेन जातिस्मरेण, कुरुवर ! हे भीष्म ॥३५॥

(क) सहतीत्यत्र परस्मैपदमार्षम् ।

(ञ) अस्य जनार्हनस्य भक्तं न अवैहि जानीहि । तं पाशेन बद्ध्वा मत्समीपं नयेति भावः ।

(ट) अशुभा मतिर्यस्य सः । असत्प्रवृत्तौ असाधुव्यापारे सक्तः आसक्तः व्याप्तो वा । अनुदिनं प्रतिदिनं सर्वस्मिन् समये इत्यर्थः, कृतः पापबन्धे पातकप्रबन्धे पापसम्बन्धे पापसमूहे वा यत्नो येन सः ।

(ठ) अपापान् पापशून्यान् तथा विष्णुशरणागतेः सकलकलुषनिर्कर्त्तकत्वेन निरस्तनिखिलकल्मषान् तान् । दूरतरेण दृष्टिबाह्यदूरमार्गेण, त्यज ; पापयुक्तेष्वेव तव मम चाधिकारादिति भावः ।

(ड) प्रीयतेत्यत्र शतृप्रत्यय आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२४२ विष्णुपुराणम् [तृतीयांश

मयाप्येतद् यथान्यायं सम्यग् वत्स ! तवोदितम् ।
यथा विष्णुमृते नान्यत् त्राणं संसारसागरे (ढ) ॥३७॥
किङ्करा पाशदण्डाश्च न यमो न च यातनाः ।
समर्थास्तस्य यस्यात्मा केशवालम्बनः सदा (ण) ॥३८॥

पराशर उवाच ।

एतन्मुने तवाख्यातं गीतं वैवस्वतेन यत् ।
तत्प्रश्नानुगतं सम्यक् किमन्यच्छ्रोतुमिच्छसि ॥३९॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे सप्तमोऽध्यायः ॥७॥

तस्य वशीकर्तुं न समर्थाः । केशवालम्बनः केशवाश्रयः ॥३८॥

इति श्रीधरकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे सप्तमोऽध्यायः ॥

(ढ) त्राणं त्राणकारणम् ।

(ण) समर्थाः स्व-स्वफलजनने शक्तिमन्तः प्रभाववन्तो वा । किङ्कराः भृत्याः यमस्येति शेषः ।

पाठान्तराणि—

(११—१)—श्रद्दधानेन वै द्विजः ।
(१५—२) अहममरवरार्चितेन धात्रा,
(१७—३) क्षितितलपरमाणवोऽनिलान्ते,
(३१—४) सततमनार्य्यकुशीलसङ्गमत्तः ।

अष्टमोऽध्यायः ।

[श्रीविष्णुपूजायां फलश्रुतिः, चातुर्व्वर्ण्यधर्मकथनञ्च]

मैत्रेय उवाच ।

भगवन् भगवान् देवः संसारविजिगीषुभिः (क) ।
मामाख्याहि जगन्नाथो विष्णुराराध्यते यथा ॥१॥
आराधिताच्च गोविन्दादाराधनपरैर्नरैः ।
यत् प्राप्यते फलं श्रोतुं तवेच्छामि महामुने ॥२॥

पराशर उवाच ।

यत् पृच्छति भवानेतत् सगरेण महात्मना !
और्वः प्राह यथा पृष्टस्तन्मे कथयतः शृणु ॥३॥

अष्टमः अध्यायः

विष्णोराराधनोपायो निजधर्मप्रसङ्गतः । सगरौर्वीय-संवादं नवाध्यायैर्निरूप्यते । यथा यत्प्रकारेण धर्मेण विष्णोराराधनपरैराज्ञानुष्ठानतत्परैः ॥२॥

स्वर्गिबन्धं ब्रह्मलोकादिपदम् ॥६॥

(क) संसारविजिगीषुभिः संसारं त्रितापमयं भवं विजेतुं पराभवितुम् इच्छुभिः मुमुक्षुभिरित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सगरः प्रणिपत्येदमौर्वं पप्रच्छ भार्गवम् ।
विष्णोराराधनोपायसम्बद्धं मुनिसत्तम ॥४॥
फलञ्चाराधिते विष्णौ यत् पुंसामभिजायते ।
स चाह पृष्टो यत्तेन तन्मैत्रेयाखिलं शृणु(१)॥५

और्व उवाच ।

भौमान् मनोरथान् स्वर्गान् स्वर्गिबन्धं तथास्पदम् ॥(२)
प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमम् ॥६॥
यद् यदिच्छति यावच्च फलमाराधितेऽच्युते ।
तत् तदाप्नोति राजेन्द्र ! भूरि स्वल्पमथापि वा ॥७॥
यत्तु पृच्छसि भूपाल ! कथमाराध्यते हि सः ।
तदहं सकलं तुभ्यं कथयामि निबोध मे ॥८॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यत् तत्तोषकारणम्(ख) ॥९
यजन् यज्ञान् यजत्येनं जपत्येनं जपन् नृप !
घ्नंस्तथान्यां हिनस्त्येनं(३) सर्वभूतो यतो हरिः ॥१०
तस्मात् सदाचारवता पुरुषेण जनार्दनः ।
आराध्यते स्ववर्णोक्त-धर्मानुष्ठानकारिणा ॥११॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च धरणीपते !
स्वधर्मतत्परो विष्णुमाराधयति नान्यथा ॥१२॥
परापवादं पैशुन्यमनृतञ्च न भाषते ।
अन्योद्वेगकरञ्चापि तोष्यते तेन केशवः(ग) ॥१३॥
परपत्नी-परद्रव्य-परहिंसासु यो मतिम् ।
न करोति पुमान् भूप ! तोष्यते तेन केशवः ॥१४॥
न ताडयति नो हन्ति प्राणिनोऽन्यांश्च देहिनः ।
यो मनुष्यो मनुष्येन्द्र ! तोष्यते तेन केशवः ॥१५॥
देव-द्विज-गुरूणां यः शुश्रूषासु सदोद्यतः ।
तोष्यते तेन गोविन्दः पुरुषेण नरेश्वर(घ) ॥१६॥

यावत् यत्संख्यकं भूरि स्वल्पं वेति प्रमाणतः ॥७॥ वर्णाश्रमाचारवतेत्यधिकारिविशेषणाद् वेदोक्तदविरुद्धपुराणागमाद्युक्ताचारवानेव तत्राधिकारी, न विगीताचारः। अन्यः श्रुत्युक्तधर्मपरित्यागेन तद्व्रतधारणश्रवणकीर्तनादिरूपः पन्था न भवति ॥९॥

यज्ञान् यष्टव्यान् इन्द्रादीन् यजन् विष्णुं यजति, यं कञ्चन जपन् विष्णुमेव जपति, अन्यं घ्नन् विष्णुमेव हन्ति ॥१०॥

यतः पूज्य वध्यादिसर्वस्वरूपो विष्णुस्तस्मात् तदाज्ञया वर्णाश्रमधर्मान् यागादीन् सदाचारांश्च कुर्वता विष्णुराराध्यते तोष्यते। सदाचारः अविगीतशिष्टाचारः ॥११॥

उक्तमर्थमेवाधिकारिदर्शनपूर्वकं व्यतिरेकमुखेन द्रढयति —'ब्राह्मण' इति ॥१२॥

तत्र साधारणधर्मानाह षड्भिः। परस्यापवादं समक्षनिन्दां, पैशुन्यं परोक्षे रहोदोषकथनम् ॥१३॥

न हन्ति न प्राणान् वियोजयति। प्राणिनो जङ्गमानन्यान् देहिनः स्थावरान्। एतेषां नियमेनाक्रियमाणानां धर्मत्वेन हरितोषणत्वाच्चित्तशोधकत्वम् ॥१५॥

(ख) वर्णाश्रमाचारवता पुरुषेणेत्यत्र वर्णाश्रमाचारवतेत्यधिकारिविशेषणाद् वेदोक्तदविरुद्धपुराणागमाद्युक्ताचारवानेव तत्राधिकारी न विगीताचार' इति सन्दर्भाद् विष्णोराराधने वर्णाश्रमाचारवतामेवाधिकारः, न वर्णाश्रमाचारबाह्यानामित्येव स्वामिप्रभृतीनामभिप्रायो व्यज्यते। प्रकरणमेवेदं तदर्थपरमिति ध्येयम्।

(ग) 'अत्र न भाषत' इत्यस्य कर्त्राकाङ्क्षानिवृत्तये य इत्यध्याहार्य्यम्।

(घ) शुश्रूषासु सेवासु, सेवायाः कायिकादिभेदेन बहुविधत्वाद् बहुवचनम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथात्मनि च पुत्रे च सर्वभूतेषु यस्तथा ।
हितकामो हरिस्तेन सर्वदा तोष्यते सुखम्(ङ) ॥१७॥
यस्य रागादिदोषेण न दुष्टं नृप ! मानसम् ।
विशुद्धचेतसा विष्णुस्तोष्यते तेन सर्वदा(च) ॥१८॥
वर्णाश्रमेषु ये धर्माः शास्त्रोक्ता नृपसत्तम !
तेषु तिष्ठन् नरो विष्णुमाराधयति नान्यथा ॥१९॥

सगर उवाच ।

तदहं श्रोतुमिच्छामि वर्णधर्मानशेषतः ।
तथैवाश्रमधर्मांश्च द्विजवर्य ! ब्रवीहि तान्(छ) ॥२०॥

और्व उवाच ।

ब्राह्मण-क्षत्रिय-विशां शूद्राणाञ्च यथाक्रमम् ।
त्वमेकाग्रमना भूत्वा शृणु धर्मान् मयोदितान् ॥२१॥
दानं दद्याद् यजेद् देवान् यज्ञैः स्वाध्यायतत्परः ।
नित्योदकी भवेद् विप्रः कुर्याच्चाग्निपरिग्रहम् ॥२२॥
वृत्त्यर्थं याजयेच्चान्यानन्यानध्यापयेत् तथा ।
कुर्यात् प्रतिग्रहादानं गुर्वर्थं न्यायतो द्विजः ॥२३॥
सर्वभूतहितं कुर्यान्नाहितं कस्यचिद् द्विजः ।
मैत्री समस्तभूतेषु ब्राह्मणस्योत्तमं धनम् ॥२४॥
ग्रावे रत्ने च पारक्ये समबुद्धिर्भवेद् द्विजः ।
ऋतावभिगमः पत्न्यां शस्यते चास्य पार्थिव ॥२५॥

इदानीं हरितोषकान् साधारणधर्मानाह—'वर्णे'ति । तिष्ठन्निति हेतौ शतृप्रत्ययः । तेषु स्थितिस्तदनुष्ठानमाराधनहेतुरित्यर्थः ॥१९॥

तत् तर्हि तान् श्रोतुमिच्छामि, ब्रवीहीत्यर्थः ॥२०॥

तत्र ब्राह्मणस्यावश्यकान् धर्मानाह—'दान'मिति । दद्यात् कुर्यात्, नित्योदकी नित्यं स्नानतर्पणादिकृत्, यथाधिकारमौपासनाग्नेस्त्रेतादीनां वा परिग्रहः ॥२२॥

धनोपार्जननियमानाह—'वृत्त्यर्थ'मिति । प्रतिग्रहादानं प्रतिग्राह्यस्य गवादेरादानं ग्रहणं, गुर्वर्थं गुरोरर्थो यस्मिन् तत् शुक्लार्थादिति पाठे तु शुक्लः शुद्धः अर्थो यस्य तस्माद् विप्रादेः । "क्रमागतं पैतृदायं प्राप्तञ्च सह भार्यया । अविशेषेण सर्वेषां धनं शुक्लमुदाहृतम्" । इति विष्णुवचनात् । शुक्लार्थमिति पाठे शुक्लधनोपार्जननिमित्तमित्यर्थः । तत्रापि न्यायतः कालपुरुषादिप्रतिग्रहं विना, द्विजो ब्राह्मणः ॥२३॥

ग्रावे इति । ग्रावे पाषाणे पारक्ये पारकीये रत्ने वा अस्य ब्राह्मणस्येत्युपलक्षणम् । पत्न्याम् ऋतौ चाभिगमः [illegible] श्रुत्याभ्यनुज्ञायते, न तु नियम्यते । "ऋतौ भार्यामुपेयात्" इति श्रुतौ परिसंख्याया उक्तत्वात् परिसंख्यायाश्च भेदात् । तथा हि भट्टपादः "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्या गीयते" ॥ इत्यस्यार्थः स्वर्गोपायभूतज्योतिष्टोमयागमप्राप्तस्य प्रापणं विधिः, पथाग्निष्टेमेन यजेतेत्यादेः पाक्षिकप्राप्तौ सत्यामप्राप्तांशस्य परिपूरणाय नियमेन [illegible] नियमविधिः, यथा व्रीहीनवहन्तीत्यत्र वितुषीकरणवहननेन नखनिकृन्तनादिना च प्राप्तस्य नखनिकृन्तनपक्षेऽपि अवहननस्याप्राप्तस्यांशस्य नियमेन प्रापणं विधिः तत्र चान्यत्र च प्राप्तियोग्यतायां अन्यतरनिवृत्तये प्रापणं परिसंख्या । यथा "पञ्च पञ्च नखाभक्ष्याः" "भार्यामुपेयात्" इति । अत्र पञ्चनखभक्षणादेर्लोकतः प्राप्तस्य अज्ञातत्वाभावात् तत्र स्मृतेरज्ञातज्ञापकत्वस्य प्रामाण्यस्य असम्भवेन स्वार्थत्यागात् पञ्चातिरिक्त-पञ्चभक्षणनिषेधादिरूपान्यार्थकल्पनं युक्तम्, तत्र उक्तरूपस्य सत्त्वात् तदनुरोधेन रागतः प्राप्तस्य बाधोऽपि न्याय्य अत एव न स्वार्थत्यागान्यार्थकल्पननिषेधप्रतियोगि प्रमाणबाधलक्षणदोषत्रयवत्त्वम् । एवं श्रौतोदाहरणेऽपि मगृभ्नन्नश्नामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र श्रुत

(ङ) सर्वभूतेषु सर्वप्राणिषु । सुखम् अनायासं यथा स्यात् तथा ।

(च) रागादीत्यादिपदात् द्वेषमोहादयो गृह्यन्ते । विशुद्धं निर्दोषं चेतः यस्य तेन निर्मल मनसेत्यर्थः ।

(छ) ब्रूहीति वक्तव्ये ब्रवीहीत्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि हि ।
यजेच्च विविधैर्यज्ञै रधीयीत च पार्थिव ॥२६॥
शस्त्राजीवो महीरक्षा प्रवरा तस्य जीविका ।
तस्यापि प्रथमे(१) कल्पे पृथिवीपरिपालनम् ॥२७॥
धरित्रीपालनेनैव कृतकृत्या नराधिपाः ।
भवन्ति नृपतेरंशा यतो यज्ञादिकर्मणाम् ॥२८॥
दुष्टानां त्रासनाद् राजा(२) शिष्टानां परिपालनात् ।
प्राप्नोत्यभिमताँल्लोकान् वर्णसंस्थाकरो नृपः ॥२९॥
पाशुपाल्यञ्च वाणिज्यं कृषिञ्च मनुजेश्वर !
वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः (ऋ)॥३०

साधारणाश्वमेधसम्बन्धिनः पशोः रशनां गृहीतवन्त इत्येवमर्थकस्य मन्त्रस्यार्थप्रकाशनसामर्थ्यलक्षणलिङ्गेनाश्वरशनाऽऽदाने गर्दभादिरशनादाने चोभयत्र श्रुत्यनुमानद्वारा प्राप्स्यतः प्रागेवाश्वरशनाऽऽदाने मन्त्रविनियोगलक्षणस्य श्रुत्यर्थस्य अप्राप्तस्य सत्त्वेन श्रुतेरप्राप्तप्रापकत्वलक्षणप्रामाण्यसम्भवान्न तदनुरोधेन स्वार्थत्यागस्ततश्चान्यार्थकल्पनाप्राप्तबाधश्च नास्तीति न दोषत्रयगन्धोऽपि । तर्हि अज्ञातज्ञापकत्वलक्षणप्रामाण्यस्य सर्वत्राविशेषादपूर्वनियमपरिसंख्याविधीनां को भेद इति चेन्न, प्रमाणान्तरायोग्ये उपाये अपूर्वविधिः, पाक्षिकप्राप्ते नियमविधिः, श्रुत्यपेक्षया विलम्बितप्रत्यायकप्रमाणेनोभयप्राप्तियोग्यतया परिसंख्याविधिरिति पूर्वमेवोक्तत्वात् । अथापूर्वविधिवत् परिसंख्याविधेरपि अप्राप्तप्रापकत्वेन चरितार्थत्वादन्यनिवृत्तिः फलं न स्यादिति चेन्न, लिङ्गेन प्राप्स्यतोऽर्थस्य श्रुत्या पूर्वप्रतिपादनवैयर्थ्यादन्यनिवृत्तिरूपफलस्यावश्यकत्वात् । तथापि श्रुत्या अश्वरशनाऽऽदाने विनियुक्तस्य मन्त्रस्य पश्चाल्लिङ्गेन विनियोगासम्भवादन्यनिवृत्तिः, सुतरां सिद्धैव रशनैव परिसंख्याफलम् । अपूर्वविधेस्तु अग्निष्टोमादिषु प्रवृत्तिजननस्य सम्भवान्नान्यफलाकाङ्क्षेति । अत एव भट्टपादाः स्वयमाहुस्तत्र वार्त्तिके,-"अज्ञातविधिरेवायमतो मन्त्रस्य निश्चितः । परिसंख्याफलेनोक्ता न विशेषः पुनः श्रुतेः ॥" इति परिसंख्यान्यवृत्तिः फलमित्यर्थः । तत् कुत इत्यत्राह—"न विशेषः पुनः श्रुतेः" इति, लिङ्गजन्यभविष्यत्पुनःश्रवणस्य तत्प्रथमभवश्रुतिजन्यश्रवणस्य प्रवृत्तिलक्षणफलमात्रे विशेषाभावात् श्रुतिजन्यश्रवणस्यान्यनिवृत्तिरूप—फलमस्त्येवेत्येव कल्पनीयमित्यर्थः । केचित्तु भट्टमते परिसंख्यायाः स्मार्त्तोदाहरणं नास्तीति वदन्ति, तन्न, "पञ्च पञ्चनखा भक्ष्याः" इत्यादिषु उक्तप्रकारेण दोषत्रयाभावात् परिसंख्योदाहरणत्वेऽपि अदोषाद् भेदेनैव परिसंख्यालक्षणस्य सामान्येनोक्तत्वाच्च । एवम् ऋतौ भार्यामुपेयात् इत्यत्र ऋतुकालानृतुकालयोर्नित्यवत् प्राप्ततया अप्राप्तांशपूरणलक्षणफलाभावान्नियमविध्यसम्भवेन परिसंख्यैव । तर्हि, "ऋतुस्नातान्तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः ।" इति दोषश्रवणं न स्यात् । नैष दोषः, मनसि कामे सत्यपि तस्य द्वेषादिना तामनुपगच्छतो दोषश्रवणोपपत्तेरिति संक्षेपः । "लोके व्यवायामिषमद्यसेवा, नित्यास्तु जन्तोर्नहि तत्र चोदना ।' इत्यादिशुकोक्तेश्च ॥२५॥

क्षत्रियधर्मानाह—'दानानी'ति चतुर्भिः ॥२६॥

शस्त्राजीवो युद्धजीविका, तस्य प्रथमे कल्पे पक्षे पृथिवीपालनं कर्माभिधीयत इति शेषः ॥२७॥

अत्र हेतुः 'धरित्री'ति । 'भवन्ति नृपतेरंशाः'—"पुण्यात् षड्गुणमादत्ते न्यायतः परिपालयन्" इत्यादिस्मृतेः स्वयमेकेनानुष्ठितधर्मात् प्रतिपालितविप्राद्यनुष्ठितधर्मषष्ठांशो भूयादिति भावः ॥२८॥

वर्णानां संस्था मर्यादा तां करोतीति तथा । वर्णसंस्कारक इति पाठे संस्कारको गुणाधानकर्त्ता ॥२९॥

(ऋ) पशुपालस्य भावः पाशुपाल्यम् पशुपालनमित्यर्थः । क्वचित् 'पाशुपाल्यं वनिज्यञ्चे'ति पाठो दृश्यते । तत्र वणिजि साधु वणिज्यं वणिग्योग्यं कर्म । छन्दोविप्लवभिया तत्र वाणिज्यमिति नोक्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[तृतीयांशे

तस्याप्यध्ययनं यज्ञो दानं धर्मश्च शस्यते ।
नित्यनैमित्तिकादीनामनुष्ठानञ्च कर्मणाम् ॥३१॥

द्विजातिसंश्रयं कर्म तादर्थ्यं तेन पोषणम् ।
क्रयविक्रयजैर्वापि धनैः कारूद्भवेन वा (ञ) ॥३२॥

[शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ।
अमन्त्रयज्ञो ह्यस्तेयं सत्सङ्गो विप्ररक्षणम् (ट)]॥३३॥

दानञ्च दद्याच्छूद्रोऽपि पाकयज्ञैर्यजेत च ।
पित्र्यादिकञ्च तत्सर्वं शूद्रः कुर्वीत तेन वै ॥३४॥

भृत्यादिभरणार्थाय सर्वेषाञ्च परिग्रहः ।
ऋतुकालेऽभिगमनं स्वदारेषु महीपते ॥३५॥

दया समस्तभूतेषु तितिक्षानभिमानिता(४) ।
सत्यं शौचमनायासो मङ्गल्यं प्रियवादिता ॥३६॥

मैत्रस्पृहा तथा तद्वदकार्पण्यं नरेश्वर !
अनसूया च सामान्या वर्णानां कथिता गुणाः ॥३७॥

आश्रमाणाञ्च सर्वेषामेते सामान्यलक्षणाः ।
गुणांस्तथापद्धर्मांश्च विप्रादीनामिमाञ्छृणु ॥३८॥

क्षात्रं कर्म द्विजस्योक्तं वैश्यं कर्म तथापदि ।
राजन्यस्य च वैश्योक्तं शूद्रकर्म न वै तयोः (ठ)॥

सामर्थ्ये सति तत्त्याज्यमुभाभ्यामपि पार्थिव !
तदेवापदि कर्तव्यं न कुर्यात् कर्मसङ्करम् ॥४०॥

वैश्यधर्मानप्याह—'पाशुपाल्य'मिति द्वाभ्याम् ॥३०॥

शूद्राणामप्याह—'द्विजाती'ति । द्विजातिसंश्रयं त्रैवर्णिकशुश्रूषालक्षणं कर्म, तादर्थ्यं तत्पारतन्त्र्यञ्च स्वधर्मः । तेन द्विजशुश्रूषालब्धेनात्मपोषणं मुख्यम् । आपदि तु क्रयविक्रयजैर्वाणिज्यलब्धैः तदसम्भवे तक्षादिकारुकर्मोद्भवेन द्रव्येण पोषणं शूद्रस्य । "द्विजशुश्रूषया जीवन्न हीयते" इति शुकोक्तेः ॥३२॥

पाकयज्ञैर्वैश्वदेवाख्यैः । "नमस्कारेण मन्त्रेण पञ्च यज्ञान्न हापयेत्" इति याज्ञवल्क्योक्तेः । पित्र्यादिकं श्राद्धादि । तेन द्विजशुश्रूषालब्धेन द्रव्येण कुर्वीत ॥३४॥

पुनः सर्वेषां साधारणधर्मानाह—'भृत्यादी'ति अक्षरद्वयाधिकैः सार्धैस्त्रिभिः एते । परिग्रहाद्याः सर्वेषां सामान्यलक्षणा इति चतुर्थेनान्वयः । परिग्रहोऽर्थसंपादनम् ॥३५॥

दया परदुःखप्रहरणेच्छा, तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता, अनभिमानिता आत्मनि श्रेष्ठत्वाद्यभिमानशून्यता, सत्यं यथार्थकथनम्, शौचम् "मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्" तत् द्विविधम् । "पीड्यते येन सुशुभेनापि कर्मणा । अत्यन्तं तन्न अनायासः स उच्यते" "इत्यनायासः । मंगलम् सपुष्पं चरणौ सुपूजितौ" इत्युक्तम् । मैत्री सर्वमित्रवर्त्तनम्, अस्पृहा प्राणयात्रामात्रनिमित्तादन्यत्रानभि 'अत्युष्णात् सघृतादन्नादच्छिद्राच्चैव वाससः । अपरभावाच्च भूय इच्छन् पतत्यधः ।" इति । अकार्पण्यं शक्ति दानम् अनसूया गुणेषु दोषारोपाभावः ॥३७॥

उक्तरीत्या वैश्यशूद्रकर्मप्राप्तौ तन्निषेधमाह क्षत्रियवैश्ययोः, ब्राह्मणस्याप्युपलक्षणम् ॥३९॥

उभाभ्यां क्षत्रियवैश्याभ्यां, ब्राह्मणेनापि अत्र मुख्यकल्पनिर्बन्धः, अशक्तस्यानुकल्पाश्रय एव । वृत्त्योव्यतिकरम् ॥४०॥

(ञ) कारूद्भवेन तक्षणादिशिल्पकर्मलब्धेन धनेनेति शेषः ।

(ट) बन्धनीमध्यगतः श्लोको न सार्वत्रिकः । स क्वचिदेवोपलभ्यते । श्रीधरेणापि तस्याव्याख्यानात् सोऽयं बन्धन्यां स्थापितः ।

(ठ) द्विजस्य ब्राह्मणस्य । राजन्यस्य क्षत्रियस्य । कर्म वैश्यस्य कृते निर्दिष्टं कर्म पाशुपाल्यादि, वैश्योक्तं तदर्थम् ।

(ड) सामर्थ्ये सति ब्राह्मणादीनां क्षत्रियादिकर्मानाचरणे आत्मपोषणयोग्यतायां सत्यामित्यर्थः । तत् तस्य तत्तत् कर्माश्रयणम् आपदि एव कर्त्तव्यम्, न तु स्वाभाविकमिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्येते कथिता राजन् वर्णधर्मा मया तव । धर्ममाश्रमिणां सम्यग् सम्यग्ब्रुवतो मे निशामय ॥४१

इति श्रीविष्णुपुराणे तृतीयेंऽशे अष्टमोऽध्यायः ॥८॥

उक्तानुवादपूर्वकम् आश्रमधर्मान् वक्तुं प्रतिजानीते 'इती'ति ॥४१॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे अष्टमोऽध्यायः ॥

पाठान्तराणि—

(५—१) स चाह पृष्टो यत्नेन तस्मै तन्मेऽखिलं शृणु ।
(६—२) भौमं मनोरथं स्वर्गं रम्यं च यत्पदम् ।
(१०—३) निघ्नन्नन्यान्हिनस्त्येनं—— ।
(२७—४) तत्रापि प्रथमः कल्पः—
(२९—५) दुष्टानां शासनाद् राजा—।
(२९—६)—वर्णसंस्थां करोति यः ।
(३६—७)—तितिक्षा नातिमानिता ।

नवमोऽध्यायः

[ब्रह्मचर्य्याद्याश्रमचतुष्टयवर्णनम्]

और्व उवाच ।

बालः कृतोपनयनो वेदाहरणतत्परः ।
गुरुगेहे वसेद् भूप ब्रह्मचारी समाहितः (क) ॥१॥
शौचाचारवता तत्र(१) कार्यं शुश्रूषणं गुरोः ।
व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना ॥२॥
उभे सन्ध्ये रविं भूप ! तथैवाग्निं समाहितः ।
उपतिष्ठेत्तदा कुर्याद् गुरोरप्यभिवादनम् ॥३॥
स्थिते तिष्ठेद् व्रजेद् याते नीचैरासीत् तथासति ।
शिष्यो गुरौ नृपश्रेष्ठ ! प्रतिकूलं न सम्भजेत्
(२) (ख) ॥४॥
तेनैवोक्तः पठेद् वेदं नान्यचित्तः पुरः स्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद् गुरुणा ततः ॥५॥

नवमः अध्यायः

निरुच्य हरितोषार्थान् वर्णधर्मानशेषतः । तत्तदाश्रमधर्माश्च नवमेऽत्र निरूपिताः ॥१॥

व्रतानि "प्राजापत्यं तथा सौम्यमाग्नेयं वैश्वदैविकम्" इत्यादीनि मधुमांसवर्जनादीनि च चरता कुर्वता वेदो ग्राह्यः ॥२॥

स्थिते ऊर्धीभूते गुरौ शिष्यस्तिष्ठेत् ऊर्धीभवेत्, तथा आसति आसीने नीचैः हीनभावेनासीत, प्रतिकूलमेतद्-विपरीतं न कुर्यात् ॥४॥

तेनैवोक्तः पठेत् न तु शीघ्राध्यापनाय गुरुं नियुञ्जीत ॥५॥

(क) कृतं निष्पादितम् उपनयनम् उपनयनसंस्कारो यस्य सः । वेदस्य वेदयोः वेदानां वा आहरणे उपादाने शिक्षणे इति यावत्, तत्परः व्यापृत इत्यर्थः । समाहितः संयतः तदेकनिष्ठो वा ।

(ख) तथा आसति इति सन्धिच्छेदः । आसतीत्यत्रासेरात्मनेपदिनः शतृप्रत्यय आर्षः । याति व्रजति सति गमनव्यापृते सतीत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवगाहेदपः पूर्वमाचार्येणावगाहिताः ।
समिज्जलादिकञ्चास्य कल्यं कल्यमुपानयेत् (ग) ॥६॥

गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य च ।
गार्हस्थ्यमावसेत्प्राज्ञो(३) निष्पन्नगुरुनिष्कृतिः (घ)॥७

विधिनावाप्तदारस्तु धनं प्राप्य स्वकर्मणा ।
गृहस्थकार्यमखिलं कुर्याद् भूपाल ! शक्तितः (ङ) ॥८॥

निवापेन पितॄनर्चेद् यज्ञैर्देवांस्तथातिथीन् ।
अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥९॥

बलिकर्मणा भूतानि वाक्सत्येनाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्मसमर्जितान् ॥१०॥

भिक्षाभुजश्च ये केचित् परिव्राड्ब्रह्मचारिणः ।
तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् ॥११॥

वेदाहरणकार्याय(४) तीर्थस्नानाय च प्रभो !
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥१२॥

अनिकेता ह्यनाहारा यत्रसायंगृहाश्च ये ।
तेषां गृहस्थः सर्वेषां प्रतिष्ठा योनिरेव च ॥१३॥

तेषां स्वागतदानादि वक्तव्यं मधुरं नृप !
गृहागतानां दद्याच्च शयनासनभोजनम् ॥१४॥

आचार्य्येणावगाहिता अपोऽवगाहे । कल्यं कल्यं प्रातः प्रातः ॥६॥

(ग) गाहेः परस्मैपदमार्षम् ।

(घ) निष्पन्ना सञ्जाता गुरोः निष्कृतिः दक्षिणादानेनेति शेषः यस्य सः ।

(ङ) विधिना ब्राह्मार्षादिनेति स्वामी,—ब्राह्मार्षादिभेदभिन्न-विवाहानामन्यतमविध्यनुसारेणेत्यर्थः । तदुक्तं मनुना,—ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गान्धर्वो राक्षसश्चैव पशाचश्चाष्टमोऽधमः ।' इति उक्तेषु विवाहेषु 'यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ' त एते 'षड़ानुपूर्व्या विप्रस्ये'त्यादि-मनुवचनेभ्य एव ज्ञातव्याः ।

(च) निवापेनेत्यादिना भूतानीत्यन्तेन गृहस्थकर्त्तव्यान् पञ्च यज्ञानाह । तदुक्तं मनुना—'पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन् । तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः । पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते' । इति ।

गृहीतो ग्राह्यो ग्रहणार्हो वेदो येन सः । निष्पन्ना गुरुनिष्कृतिः दत्तगुरुदक्षिणः ॥७॥

विधिना ब्राह्मार्षादिना, स्वकर्मणा याजनादिना ॥८॥

निवापेन पिण्डदानादिना, पितॄनिति पितृयज्ञो दर्शितः यज्ञैर्देवानिति देवयज्ञः, अतिथीनन्नैरिति मनुष्ययज्ञः मुनींश्च स्वाध्यायैरिति ब्रह्मयज्ञः, अपत्येन प्रजापतिमिति प्रसङ्गाद् गृहस्थस्यावश्यकं कर्त्तव्यमित्युक्तम् ॥९॥

बलिकर्मणा भूतानीति भूतयज्ञः । वाक्सत्येन सत्यवचनेन वात्सल्येनेति पाठे दातृत्वेनोपकर्त्तृत्वेन वा ॥१०॥

अटन्ति भ्राम्यन्ति ॥१२॥

अनिकेताः अगृहाः, अनाहाराः आहारार्थं सञ्चयरहिताः, यत्र सायं तत्रैव गृहं येषां ते, प्रतिष्ठा आश्रयः योनिर्माता सस्नेहमन्नदानादिना देहपोषकत्वात् ॥१३॥

अतस्तेषां गृहागतानां स्वागतोक्तिपूर्वकं मधुरं हितं वक्तव्यम् ॥१४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति (छ)॥१५॥

अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः ।
परितापोपघातौ च पारुष्यञ्च न शस्यते (ज) ॥१६॥

यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
सर्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥१७॥

वयःपरिणतौ राजन् ! कृतकृत्यो गृहाश्रमी ।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा (झ)॥१८॥

पर्ण-मूल-फलाहारः केशश्मश्रुजटाधरः ।
भूमिशायी भवेत्तत्र मुनिः सर्वातिथिर्नृप ॥१९॥

चर्मकाशकुशैः कुर्यात् परिधानोत्तरीयके ।
तद्वत् त्रिसवनं स्नानं शस्तमस्य नरेश्वर (ञ) ॥२०॥

देवताभ्यर्चनं होमः सर्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शस्तमस्य नरेश्वर ॥२१॥

वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपश्च तस्य राजेन्द्र ! शीतोष्णादिसहिष्णुता ॥२२॥

यस्त्वेतां निहितश्चर्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् (ट)॥२३

चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥२४॥

पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप !
चतुर्थमाश्रमं स्थानं गच्छेन्निर्धूतमत्सरः ॥२५॥

स भग्नाशोऽतिथिस्तस्मै पापं दत्त्वेति नित्यकर्मरूपातिथि-पूजाभावेन प्रत्यवायोत्पत्तेः। पुण्यमादायेति तत्पूजाजन्य-पुण्यानुत्पत्तेरेवमुपचर्य्यते ॥१५॥

अहंकार आत्मन्युत्कर्षबुद्धिः। दम्भो लाभाद्यर्थं धर्माचरणम्। परितापो वृथा दत्तमित्युरुतापः। उपघातः प्रतिघातः ताड़नं वा। पारुष्यं निष्ठुरता ॥१६॥

(छ) तस्मै आशाभङ्गकारिणे गृहस्थाय। 'दुष्कृतं दत्त्वा पुण्यमादाय गच्छतीत्युक्तिरियमौपचारिकी। एकसम्बन्धिपाप-स्यान्यस्मै दानासम्भवात्; अन्यगतपुण्यस्यान्येन ग्रहणासम्भवाच्च। अत एव्योक्तं खानिना—'पापं दत्त्वेति नित्यकर्मरूपातिथिपूजा-भावेन प्रत्यवायोत्पत्तेः, पुण्यमादायेति तत्पूजाजन्यपुण्यानुत्पत्तेरे-वमुपचर्य्यत' इति।

(ज) अवज्ञानम् अवहेलनम्। गृहे सतः गृहस्थस्य। अथवा गृहे वर्त्तमानस्य अतिथेः। पूर्वकल्पे कर्त्तरि उत्तरकल्पे च कर्मणि षष्ठी।

(झ) पुत्रेषु भार्य्यां भरणीयां पत्नीं निःक्षिप्य तद्भरणभारं पुत्रेषु समर्प्येत्यर्थः। वा अथवा सहैव भार्य्ययेति शेषः। वनं गच्छेद् वानप्रस्थधर्ममाश्रयेदित्यर्थः।

सर्ववन्धैर्विमुक्तः सन् ॥१७॥

कृतं कृत्यं गृहोचितं येन सः ॥१८॥

सर्वातिथिः सर्वातिथिपूजकः। अतिथिरज्ञातपूर्वः ॥१९॥

त्रिसवनं त्रिकालस्नानम्, अभ्यागतोऽज्ञातपूर्वः ॥२०॥

वन्यस्नेहेन इङ्गुदीतैलादिना। तपस्यतस्तपश्चरतः ॥२२॥

जयेत् प्राप्नुयात् ॥२३॥

चतुर्थमाश्रमं स्थानं विश्रामहेतुः ॥२५॥

(ञ) चर्मकाशकुशैरिति—चर्मणा मृगादिचर्मणा वस्त्राकारेण परिणमितैः काशैः कुशैर्वा परिधानमुत्तरीयञ्च कुर्य्यात्। त्रिसवनं स्नानं त्रिसवनाख्यं स्नानं शस्तं प्रशस्तम्, गुणविशेषाधायक-मित्यर्थः। एतेन शारीरस्वास्थ्याद्यनुरोधेन तदकरणेऽपि न प्रत्यवाय इति सूच्यते। मनुरपि—'वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा' इति प्राह।

(ट) निहितः समाहितचित्तः। मुनिः मननधर्मा सन्निति शेषः। चर्य्याम् आचारं वानप्रस्थधर्मं चरेत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रैवर्गिकांस्त्यजेत् सर्वानारम्भानवनीपते !
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु (ठ)॥२६॥

जरायुजाण्डजादीनां वाङ्-मनः-कायकर्मभिः ।
युक्तः कुर्वीत न द्रोहं सर्वसङ्गांश्च वर्जयेत् (ड) ॥२७॥

एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद् यथा प्रीतिर्द्वेषो वा नास्य जायते ॥२८॥

प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्यटेद् गृहान् (ण)॥२९॥

कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राड् निर्ममो भवेत् ॥३०॥

अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः ।
तस्यापि सर्वभूतेभ्यो न भयं विद्यते क्वचित् ॥३१॥

कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निं स्वमुखे जुहोति ।
विप्रस्तु भैक्ष्योपगतैर्हविर्भि-
श्चिताग्निना स व्रजति स्म लोकान् ॥३२॥

त्रैवर्गिकान् धर्मार्थकामहेतुभूतान् आरम्भान् लौकिक-वैदिकोद्योगान् त्यक्त्वा ब्रह्मनिष्ठां कुर्यादिति भावः ॥२६॥

एकरात्रस्थित्यादावपि विशेषमाह—'तथे'ति ॥२८॥

(ठ) मित्रादिषु मित्रामित्रक्षुद्रबृहत्सु समस्तेषु सर्वेषु एव जन्तुषु समः मैत्रः मैत्रीयुक्तः मित्रभावापन्नः ।

(ड) सर्वसङ्गान् सर्वेषां सङ्गान् सम्पर्कान् वर्जयेत्, न केनापि सह कायकृतं वाग्गादिकृतञ्च निविड़सम्बन्धं न कुर्य्यादित्यर्थः । अथवा सर्वान् सङ्गान् पुत्रैषणावित्तैषणादिभेदभिन्नान् सर्वान् कामानित्यर्थः । वर्जयेत् ।

(ढ) अस्य भिक्षोः प्रीतिः अनुरागः द्वेषः विद्वेषो वा यथा न जायते तथा तिष्ठेत् । तस्य प्रीतिद्वेषसमुत्पादे भिक्षुधर्म-विप्लवसम्भवात् । अथवा अस्य स्वेनाश्रितस्य ग्रामस्य पुरस्य वा यथा प्रीतिः तेन सह मैत्री, द्वेषः तस्मिन् शात्रवं वा न स्यात् तथा तिष्ठेत् । प्रीत्युत्पत्तौ यतिधर्मक्षतिसम्भवात्, शात्रवोत्पत्तौ स्वाभिमतभिक्षादिलाभविप्लवात् ।

विगताः शान्ता निर्वाणा अङ्गारा यस्मिन् । भुक्तवज्जना यस्मिन् तस्मिन् काले । प्रशस्ताः श्रेष्ठास्त्रयो वर्णा तेषाम् ॥२९॥

भिक्षान्नभक्षण एवोपासनामाह—'कृत्वे'ति । अग्निं पूर्वं हूयमानं वह्निं शरीरसंस्थं कृत्वा प्राजापत्येष्ट्यनन्तरमात्मन्यग्नीनाधाय भिक्षारूपैर्हविर्भिः स्वमुखे कुण्डस्थानीये शारीरं प्राणादियुक्तं जाठरमग्निमुद्दिश्य 'चिताग्निना जाठराग्निर्भुङ्क्ते नाह'मिति चिता चैतन्येनाग्निना अनुसन्धानेन जुहोति, स लोकानर्थादग्निहोत्रिणां व्रजतीत्युपासनाफलोक्तिः । यद्वा लोक्यते इति लोको ब्रह्मैव, बहुत्वमार्षम् । क्षितम् । चिताग्निनेति पाठे ॥३२॥

(ण) भुक्तवज्जन इति—अन्यथा कालान्तरे उपस्थिते यतेः सत्कारार्थं गृहस्थाः स्वीयं भोज्यमन्नं कदाचिद् न स्वयं निराहारास्तिष्ठेयुः, तेन च यतेः प्रत्यवायः सम्भाव्येत भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः स्वसङ्कल्पितबुद्धियुक्तः (त) (६)।
अनिन्धनं ज्योतिरिव प्रशान्तः
स ब्रह्मलोकं जयति द्विजातिः ॥३३॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे नवमोऽध्यायः ॥९॥

इदानीमाश्रमपालनस्य परमफलमाह—'मोक्षे'ति। स्वस्मिन् ब्रह्मणि संकल्पितमिदं विश्वमिति बुद्धियुक्तः, ब्रह्मैव लोकस्तम्, अनिन्धनं विधूमं 'यथा ज्योतिर्विधूम'मित्यादिश्रुतेः। द्विजातिरिति पूर्वश्लोकोक्तस्य विप्रस्योक्तिः। 'गतिस्तुर्य्याश्रमे नास्ति बाहुजोरुजयोः क्वचित्। तुर्याश्रमे गतिः प्रोक्ता मुखजानां स्वयम्भुवा।" इति दत्तात्रेयोक्तेः, 'ब्राह्मणः प्रव्रजेद् गृहा'दिति यमसंवर्त्तबौधायनवचनाच्च ॥३३॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे नवमोऽध्यायः समाप्तः ॥

(त) मोक्षाश्रमं सन्न्यासाश्रमधर्मं यथोक्तम् उक्तरीत्यनुसारं चरते अनुतिष्ठति। चरत इत्यार्षम्, नयति आर्त्तं करोति।

पाठान्तराणि—

(२—१) शौचाचारव्रतं तत्र—।
(४—२) शिष्यो गुरोर्नृपश्रेष्ठ प्रतिकूलं न संचरेत्
(७—३) गार्हस्थ्यमाविशेत् प्राज्ञो—।
(१२—४ वेदाहरणकार्येण —
(३२—५) विप्रस्तु मैत्र्योपहितैर्हविर्भि-
श्चिताग्निकानां व्रजति स्म लोकान्।
(३३—६) शुचिः सुखं कल्पितबुद्धियुक्तः।

दशमोऽध्यायः।

[जातकर्मादिक्रियायाः कन्यायाश्च लक्षणनिरूपणम्]

सगर उवाच।
कथितं चातुराश्रम्यं चातुर्वर्ण्यक्रियास्तथा।
पुंसः क्रियामहं श्रोतुमिच्छामि द्विजसत्तम ॥१॥
नित्यां नैमित्तिकीं काम्यां क्रियां पुंसामशेषतः(१)।
समाख्याहि भृगुश्रेष्ठ सर्वज्ञो ह्यसि मे मतः ॥२॥

और्व उवाच।
यदेतदुक्तं भवता नित्यनैमित्तिकाश्रितम्।
तदहं कथयिष्यामि शृणुष्वैकमना नृप ॥३॥

दशमः अध्यायः

पुंसः षोडशसंस्कारैर्वर्णाश्रमनिवेशनम्। अतस्तानाह

(क) चातुराश्रम्यमिति—अत्र चत्वारः आश्रमा एव चातुराश्रम्यं तद्धर्मः कथित इति स्वामी। अत्र तद्धर्म इत्यस्य स एव धर्मः तद्धर्मः। लक्षणया वा तस्य धर्म इत्यर्थो विवक्षितः। अथवा चातुराश्रम्यमित्यस्य चत्वारः आश्रमा यस्य स चतुराश्रमः तस्य भावः चातुराश्रम्यं तत् कथितमिति। चातुर्वर्ण्यंत्यत्र स्वार्थे ष्यञ्, चतुर्णां वर्णानां ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां क्रिया कर्त्तव्यं कर्म।

दशमे बाहुल्येन द्विजातिषु। चत्वार आश्रमा एव चातुराश्रम्यं तद्धर्मः कथितः, एवञ्चातुर्वर्ण्यक्रिया अपि पुंसः क्रियां षोडशसंस्काररूपाम् ॥१॥

नित्यामहरहः क्रियमाणां प्रत्यवायपरिहारफलाम्, नैमित्तिकीं राहुदर्शादौ निमित्ते सति विहितानामकरणात् प्रत्यवायप्रदाम् काम्यां कामाय हिताम् अग्निष्टोमादिकाम् ॥२॥

नित्यनैमित्तिकाश्रितमिति काम्यस्याप्युपलक्षणम् ॥३॥

(ख) शृणुष्वेत्यार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जातस्य जातकर्मादिक्रियाकाण्डमशेषतः ।
पुत्रस्य कुर्वीत पिता श्राद्धञ्चाभ्युदयात्मकम् (ग) ॥४॥

युग्मांस्तु प्राङ्मुखान् विप्रा भोजयेन्मनुजेश्वर !
यथा वृत्तिस्तथा कुर्याद्दैवं पित्र्यं द्विजन्मनाम् ॥५॥

दक्षा यवैः सवदरैर्मिश्रान् पिण्डान् मुदा युतः ।
नान्दीमुखेभ्यस्तीर्थेन दद्याद् दैवेन पार्थिव ॥६॥

प्राजापत्येन वा सर्वमुपचारं प्रदक्षिणम् ।
कुर्वीत तत्तथाशेषवृद्धिकालेषु भूपते ॥७॥

ततश्च नाम कुर्वीत पितैव दशमेऽहनि ।
देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम् ॥८॥

शर्मेति ब्राह्मणस्योक्तं वर्मेति क्षत्रसंश्रयम् ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्य-शूद्रयोः ॥९॥

नार्थहीनं न चाशस्तं नापशब्दयुतं तथा ।
नामङ्गल्यं जुगुप्स्यं वा नाम कुर्यात् समाक्षरम् ॥१०॥

नातिदीर्घं नातिह्रस्वं नातिगुर्वक्षरान्वितम् ।
सुखोच्चार्य्यन्तु तन्नाम कुर्याद् यत् प्रवणाक्षरम् ॥११॥

ततोऽनन्तरसंस्कारसंस्कृतो गुरुवेश्मनि ।
यथोक्तविधिमाश्रित्य कुर्याद् विद्यापरिग्रहम् ॥१२॥

गृहीतविद्यो गुरवे दत्त्वा च गुरुदक्षिणाम् ।
गार्हस्थ्यमिच्छन् भूपाल ! कुर्याद् दारपरिग्रहम् ॥१३॥

ब्रह्मचर्येण वा कालं कुर्यात् संकल्पपूर्वकम् ।
गुरोः शुश्रूषणं कुर्यात् तत्पुत्रादेरथापि वा ॥१४॥

जातस्य पुत्रस्य जातकर्म च आदिक्रियाकाण्डञ्च जन्मनः प्राचीनं गर्भाधानपुंसवनादिक्रियासमूहं पिता कुर्वीत इत्यर्थः । तदुक्तम् "गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा" इति ॥४॥

द्विजन्मनां ब्राह्मणानां यथावृत्ति यथोपचारं दैवं देवसम्बन्धिकर्म पित्र्यं पितृसम्बन्धिकर्म कुर्यात् । अभ्युदयश्राद्धोक्तेन विशेषेण प्रदक्षिणोपचारादिना दैवपित्र्यश्राद्धं कुर्यात् इत्यर्थः ॥५॥

तदेवाह—'दक्षे'ति । दैवेन कराग्रेण ॥६॥

प्राजापत्येन कनिष्ठामूलेन । तदुक्तम्, "कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापति-पितृ-ब्रह्म-देवतीर्थान्यनुक्रमात् ।" इति । अशेषवृद्धिकालेषु कन्या पुत्रविवाहेष्वित्यादिना वक्ष्यमाणेषु ॥७॥

दशमेऽहनि अतीत इति शेषः । तच्चाशौचान्तोपलक्षणम् । अत्रैव कालान्तरमप्याह यथा—"नामधेयं दशम्याञ्च केचिदिच्छन्ति पार्थिव । द्वादश्यामथवा मासे पूर्णे तथापरे ।" इति । देवपूर्वं कुलदेवतानाम 'कुलदेवतासम्बद्धं नाम कुर्यादिति शंखोक्तेः । पुरुषवाचकम् । तत्र प्रान्ते शर्मवर्मादिसंयुतम्, सोमशर्मा इन्द्रवर्मा चन्द्रवर्मा चन्द्रगुप्तः इत्यादि ॥८॥

अर्थहीनं डित्थादि, अप्रशस्तं देवभाषायां तत्र अपशब्दं गुह्यकेशादि, जुगुप्स्यं वीभत्सरूपम्, द्व्यक्षरचतुरक्षरादि नाम कुर्यात् ॥१०॥

अतिदीर्घं बह्वक्षरं ह्रस्वम् अल्पाक्षरम् प्रवणाक्षरं अन्तराक्षरम् ॥११॥

अनन्तरसंस्कारैर्निष्क्रमणान्नप्राशन चूडो-पनयन संस्कृतः सन् यथोक्तं गुरुशुश्रूषादिलक्षणं विधिमाश्रित्य मध्ये नैष्ठिकं 'ब्रह्मचर्यमाह—ब्रह्मचर्येणे'ति ॥ वा अथवा निच्छायामित्यर्थः । कालं कुर्यात् नयेत् ॥१४॥

(ग) श्राद्धञ्चाभ्युदयात्मकमिति आभ्युदयिकश्राद्धमित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वैखानसो वापि भवेत् प्रव्रजेद् वा यथेच्छया (१)।
पूर्वसङ्कल्पितं यादृक् तादृक् कुर्यान्नराधिप ॥१५॥
वर्षैरेकगुणां भार्यामुद्वहेत् त्रिगुणः स्वयम्।
नातिकेशामकेशां वा नातिकृष्णां न पिङ्गलाम् ॥१६॥
निसर्गतो विकलाङ्गीमधिकाङ्गीञ्च नोद्वहेत्।
नाविशुद्धां सरोगां वाऽकुलजां
वातिरोगिणीम् (२) ॥१७॥
न दुष्टां दुष्टवाचाटां(३) व्यङ्गिनीं पितृ-मातृतः।
न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ॥१८॥
न घर्घरस्वरां क्षाम-वाक्यां(४) काकस्वरां न च।
नानिबद्धेक्षणां तद्वद् वृत्ताक्षीं नोद्वहेद् बुधः ॥१९॥
यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ।
गण्डयोः कूपकौ यस्या हसन्त्यास्तां न चोद्वहेत् ॥२०॥
नोद्वहेत् तादृशीं कन्यां प्राज्ञः कार्यविशारदः।
नातिरूक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ॥२१॥
आपीनहस्तपादाञ्च न कन्यामुद्वहेद् बुधः।
न वामनां नातिदीर्घां नोद्वहेत् संहतभ्रुवम् ॥२२॥
न चातिच्छिद्रदशनां न करालमुखीं नरः।
पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ॥२३॥
गृहस्थश्चोद्वहेत् कन्यां न्यायेन विधिना नृप!
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥२४॥

वैखानसो वानप्रस्थः। इच्छया आश्रमादाश्रमं गच्छेत्। यावज्जीवं ममायमेवाश्रम इति यदि पूर्वसंकल्पितं, तदा तत्रैव तिष्ठेत्, नाश्रमान्तरं गच्छेत्, एतच्च दृढ़वैराग्याभावे द्रष्टव्यम्। तत्रापि दृढ़विरक्तौ तु यतिः स्यादेव। "यदहरेव विरजेत् तदहरेव प्रव्रजेत्"। इति श्रुतेः ॥१५॥

वर्षैरेकगुणामिति यवीयस्या एवोपलक्षणम्, अन्यथा साङ्गवेदाध्ययनासक्तस्य स्मृत्यनुमिताष्टचत्वारिंशद्वर्षाविधिकब्रह्मचर्यस्य त्रिंशद्वर्षादूर्द्ध्वं विवाहे "दशवर्षा भवेत् कन्या अत ऊर्ध्वं रजस्वला" इति निन्दितरजस्वलाविवाहापत्तेः, "असपिण्डां यवीयसीम्" इति स्मृतेश्च। अतिकेशां केशभस्ताम्, अकेशां निष्केशप्रायाम् ॥१६॥

निसर्गतो गर्भावस्थायामेव, अविशुद्धां पातकादिदुष्टाम्, सरोगां सहजरोगाम्, अकुलजां दुष्कुलाम्, अतिरोगिणीमुत्कटरोगिणीम् ॥१७॥

दुष्टां शूद्रादिसंवर्द्धिताम्, दुष्टवाचाटां बहुविरुद्धदुर्भाषिणीम्, व्यङ्गिनीं पितृतो मातृतश्च कुष्ठिनीं कुष्ठिपितृमातृजामित्यर्थः, श्मश्रूण्येव व्यञ्जनं पुंस्त्वव्यञ्जकं तद्युक्ताम् ॥१८॥

क्षामवाक्यां स्वभावत एवावसन्नवचनाम्, अनिबद्धेक्षणां पक्ष्मभिरसंवृतेक्षणां, निषिद्धेऽपि अनिरुद्धदर्शनां वा, निद्रायामपि अर्द्धनिमीलितनेत्रामिति वा, वृत्ताक्षीं वर्त्तुलनयनाम् ॥१९॥

यस्या हसन्त्याः गण्डयोः कूपकौ गतौ भवतस्तां नोद्वहेत्। तादृशीमिति पुनर्निषेधोऽतिदोषख्यापनाय। क्वचित् पुस्तकेऽयमर्द्धश्लोको नास्त्येव। 'हसन्त्याश्चैव जायते' इति पाठे एकवचनमार्षम् ॥२०॥

पाण्डुकरजां श्वेतनखाम् ॥२१॥

संहते भ्रुवौ यस्यास्ताम् ॥२२॥

करालमुखीं दन्तुरास्याम्। पञ्चमीमिति। मातृपक्षात् मातृसन्तानात् पञ्चमीं पितृपक्षात् पितृसन्तानात् सप्तमीं विहायेति शेषः।

"पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतस्तथा" इति वचनात्। तथा च मातरमारभ्य तत्पितृपितामहादिगणनायां पञ्चमपुरुषसन्तानवर्त्तिनी मातृपक्षे पञ्चमीत्युच्यते। सन्तानभेदेऽपि यतः सन्तानभेदमादाय गणयेत् यावत् पञ्चम इति। एवं पितृपक्षसप्तमीति ज्ञेयम्। तां नोद्वहेत् ततः परामुद्वहेदित्यर्थः ॥२३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गान्धर्वराक्षसौ चान्यौ पैशाचश्चाष्टमोऽधमः ॥२५॥
एतेषां यस्य यो धर्मो वर्णस्योक्तो महर्षिभिः ।
कुर्वीत दाराहरणम् तेनान्त्यं परिवर्जयेत् (घ) ॥२६॥
सधर्मचारिणीं प्राप्य गार्हस्थ्यं सहितस्तया (ङ)।
समुद्वहेद् ददात्येषा सम्यगूढा महाफलम्(५) ॥२७॥
इति श्रीविष्णुपुराणे तृतीयेंऽशे दशमोऽध्यायः ॥१०॥

तमेव न्याय्यं विधिं दर्शयितुं अष्टौ विवाहानाह—'ब्राह्म' इति। यथा, ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयम्। सहोभौ चरतां धर्मं प्राजापत्यो विधिः स्मृतः। आसुरो द्रविणादानाद् गान्धर्वः समयान्मिथः। राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्।" इति ॥२५॥

'एतेषा'मिति। यदाह देवलः,—"आद्या विवाहाश्चत्वारो धर्म्यास्तोयप्रदानिकाः। अशुल्का ब्राह्मणार्हाश्च तारकं द्वयोः कुलम्। गान्धर्व-राक्षसौ राज्ञ आसुरो वैश्य-शूद्रयोः स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः" इति। अतः पैशाचम् ॥२६॥

समुद्वहेत् कुर्यात्, एषा पूर्वोक्तलक्षणा सम्यक् विधिना ऊढा सती महाफलं ददाति। एतत् सम्यगूढं महाफलमिति पाठे एतद्गार्हस्थ्यमूढं प्रतिपादितं सदित्यर्थः ॥२७॥

इति श्रीधरस्वामिकृतायां श्रीविष्णुपुराणटीकायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा तृतीयेंऽशे दशमोऽध्यायः ॥

(घ) दाराहरणं भार्य्यायाः परिग्रहं विवाहमित्यर्थः। कुर्वीत। तेन यथोक्तं धर्मभूतेन तेषामन्यतमेन प्रकारेण इत्यर्थः। अन्त्यं ब्राह्म इत्यादिविभिन्नविवाहप्रकारनिर्देशावसरे चरमोक्तं पैशाचविवाहमित्यर्थः। परिवर्जयेदिति 'स पापिष्ठो विवाहाना'मित्यादिषु तद्दोषस्य सङ्कीर्त्तनादिति भावः।

(ङ) सधर्मचारिणीं समानधर्मचारिणीं भार्य्यया सहितः गार्हस्थ्यं गृहस्थधर्मं समुद्वहेत् धारयेत् अनुतिष्ठेदित्यर्थः।

पाठान्तराणि—

(१५—१) परिव्राडथवेच्छया।
(१७—२) निसर्गतोऽधिकाङ्गीं वा न्यूनाङ्गीमपि नोद्वहेत्।
नाविशुद्धां सरोमां वाऽकूलजां वापि रोगिणीम् ॥
(१८—३) न दुष्टां दुष्टवाक्यां वा—।
(१९—४) न घर्घरस्वरां क्षामां तथा—।
(२७—५) समुद्वहेद् ददात्येतत् सम्यगूढं महाफलम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकादशः अध्यायः

(गृहस्थसदाचाराणां मूत्रपुरीषोत्सर्गादिविधेश्च वर्णनम् ।)

सगर उवाच ।

गृहस्थस्य सदाचारं श्रोतुमिच्छाम्यहं मुने !
लोकादस्मात् परस्माच्च यमातिष्ठन्न हीयते (क) ॥१॥

और्व उवाच ।

श्रूयतां पृथिवीपाल ! सदाचारस्य लक्षणम् ।
सदाचारवता पुंसा जितौ लोकावुभावपि ॥२॥
साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते (ख) ॥३॥
सप्तर्षयोऽथ मनवः प्रजानां पतयस्तथा ।
सदाचारस्य वक्तारः कर्तारश्च महीपते ॥४॥
ब्राह्मे मुहूर्ते सुस्थे च मानसे मतिमान् नृप !
विबुद्धश्चिन्तयेद् धर्ममर्थञ्चास्याविरोधिनम्(१)(ग)॥५॥
अपीडया तयोः काममुभयोरपि चिन्तयेत् ।
दृष्टादृष्टविनाशाय त्रिवर्गे समदर्शिता (घ) ॥६॥
परित्यजेदर्थकामौ धर्मपीडाकरौ नृप !
धर्ममप्यसुखोदर्कं लोकविद्विष्टमेव च ॥७॥
ततः कल्यं समुत्थाय कुर्यान्मैत्रं नरेश्वर !
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः (ङ) ॥८॥
दूरादावसथान्मूत्रं पुरीषञ्च विसर्जयेत् ।
पादावसेचनोच्छिष्टे प्रक्षिपेन्न गृहाङ्गणे ॥९॥

एकादशः अध्यायः

गर्भाधानादिना पुंसः संस्कृतस्य कृतिं ब्रुवन् । एकादशे सदाचारान् प्राह श्रीहरितोषणान् । ब्राह्मे मूहूर्त्ते सूर्योदयात् पूर्वं तृतीये मुहूर्त्ते । अर्थश्चास्य धर्मस्याविरोधिनम् ॥५॥

तयोर्धर्मार्थयोर्दृष्टादृष्टविनाशाय दृष्टादृष्टविनाशनिवृत्तये, तादर्थ्ये चतुर्थीत्यत्रार्थशब्दस्य निवृत्तेरपि वाचकत्वात् । यद्वा विनाशमपनेतुमित्यर्थः । क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी । यथा रघौ वनं गन्तुमित्यर्थे "वनाय पीतप्रतिबद्धवत्साम्" इति । दृष्टादृष्टविनाशायेति पाठः सुगमः । त्रिवर्गे समदर्शिता परस्पराविरोधेन भवत्विति समदृष्टिः ॥६॥

'धर्ममपी'ति — व्याघ्रचौरादिसमाक्रान्ततीर्थगमनादि असुखोदर्कं दुःखोत्तरफलकं, लोकविद्विष्टं सौत्रामण्यादौ सुराग्रहादि ॥७॥

कल्यमुषसि, मैत्रं मित्राधिष्ठितपायूक्तं मलोत्सर्गादि ग्रामान्नैर्ऋत्यां, तदसम्भवेषु आवसथाद् दूरे ॥८॥

गृहाङ्गणे सदासच्चारदेशे ॥९॥

(क) यं सदाचारम् आतिष्ठन् अनुतिष्ठन् न हीयते गृहस्थ इति शेषः ।

(ख) क्षीणा नष्टा दोषाः भ्रमप्रमादविप्रलिप्सादयः येषां ते ।

(ग) विबुद्धः प्रबुद्धः परिहृतसुप्तिजाड्य इत्यर्थः ।

(घ) दृष्टा-दृष्टेत्यादि-अत एव त्रिवर्गे समदर्शी सन् तयोः धर्मार्थयोरपीड़या काममपि चिन्तयेदिति भावः । त्रयाणां धर्मार्थकामानां वर्गः गणः तस्मिन् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मच्छायां तरुच्छायां गोसूर्याग्न्यनिलांस्तथा ।
गुरुद्विजातींस्तु बुधो न मेहेत कदाचन(२) ॥१०॥

न कृष्टे शस्यमध्ये वा गोव्रजे जनसंसदि ।
न वर्त्मनि न नद्यादितीर्थेषु पुरुषर्षभ ॥११॥

नाप्सु नैवाम्भसस्तीरे श्मशाने न समाचरेत् ।
उत्सर्गं वै पुरीषस्य मूत्रस्य च विसर्जनम् ॥१२॥

उदङ्मुखो दिवा मूत्रं विपरीतमुखो निशि ।
कुर्वीतानापदि प्राज्ञो मूत्रोत्सर्गञ्च पार्थिव (च) ॥१३॥

तृणैरास्तीर्य वसुधां वस्त्रप्रावृतमस्तकः ।
तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत् ॥१४॥

वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा(३) ।
शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवाम् ॥१५॥

अन्तःप्राण्यवपन्नां च(४) हलोत्खाताञ्च पार्थिव ।
परित्यजेन्मृदो ह्येताः सकलाः शौचकर्मणि ॥१६॥

एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश ।
हस्तद्वये च सप्त स्युर्मृदः शौचोपपादिकाः ॥१७॥

अच्छेनागन्धफेनेन जलेनाबुद्बुदेन च ।
आचामेच्च मृदं भूयस्तथा दद्यात् समाहितः (छ)॥

निष्पादिताङ्घ्रिशौचस्तु पादावभ्युक्ष्य वै पुनः ।
त्रिः पिबेत् सलिलं तेन तथा द्विः परिमार्जयेत् ॥

शीर्षण्यानि ततः खानि मूर्द्धानञ्च समालभेत् ।
बाहू नाभिञ्च तोयेन हृदयञ्चापि संस्पृशेत् (ज) ॥

'आत्मच्छाया'मिति। एतान् पुरस्कृत्य न मेहेत इत्यर्थः ॥१०॥

लेपसम्भवां गृहलेपनगताम् ॥१५॥

अन्तःप्राण्यवपन्नाश्च कीटाद्युपहताम्, अणुप्राण्यवपन्नामिति पाठे अणुभिरतिसूक्ष्मैः प्राणिभिरवपन्नां युक्तामित्यर्थः ॥१६॥

एकाद्या मृदः शौचोपपादिकाः ॥१७॥

सहशौचमुक्त्वा वक्तव्याचमनपरिभाषामाह—अच्छेन अनाविलेन आचामेतेत्याचमनं प्रस्तुत्य तस्य पूर्वार्द्धमाह—'मृद'मिति। भूयो मृदमादद्यात् ॥१८॥

तया निष्पादितांघ्रिशौचः सन् पुनः पादावभ्युक्ष्य त्रिः पिबेदित्यन्वयः। मुखं द्विः परिमार्जयेत् ॥१९॥

शीर्षण्यानि शिरःस्थानि खानि इन्द्रियच्छिद्राणि आलभेत् स्पृशेत् हृदयञ्चाप्यसञ्जयन् इति पाठे मौनी इत्यर्थः। अत्र विशेषमाह दक्षः—"प्रक्षाल्य पादौ हस्तौ त्रिः पिबेदम्बु वीक्षितम्। संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्य ततो मुखम्। संहताभिस्त्रिभिः पूर्वमास्यन्तु समुपस्पृशेत्। अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्। अङ्गुष्ठनामिकाभ्यान्तु चक्षुःश्रोत्रे पुनः पुनः। कनिष्ठाङ्गुष्ठाभ्यां नाभिं हृदयन्तु तलेन वै। सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्" ॥२०॥

(ङ) कल्यमुषसीति स्वामी—'प्रत्युषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपी'ति कोषात्। कल्यमित्यत्र कालाध्वनोरित्यादिना द्वितीया।

(च) विपरीतमुख इति दक्षिणामुख इत्यर्थः। अनापदि इत्यनेन आपत्काले तत्तदन्यथाकरणं न दोषायेति सूच्यते।

(छ) अगन्धफेनेन गन्धशून्येन समुत्कटसौरभादिरहितेनेत्यर्थः। अबुद्बुदेन बुद्बुदशून्येन।

(ज) समालभेदित्यार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आचान्तस्तु ततः कुर्यात् पुमान् केशप्रसाधनम् ।
आदर्शाञ्जनमाङ्गल्यं दूर्वाद्यालम्भनानि च ॥२१॥

ततः स्ववर्णाधर्मेण वृत्त्यर्थञ्च धनार्जनम् ।
कुर्वीत श्रद्धासम्पन्नो यजेच्च पृथिवीपते ॥२२॥

सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च संस्थिताः ।
धने यतो मनुष्याणां यतेतातो धनार्जने ॥२३॥

नदी-नद-तडागेषु देवखातजलेषु च ।
नित्यक्रियार्थं स्नायीत गिरिप्रस्रवणेषु च (झ) ॥२४॥

कूपेषूद्धृततोयेन स्नानं कुर्वीत वा भुवि ।
गृहेषूद्धृततोयेन ह्यथवा भुव्यसम्भवे ॥२५॥

शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्पणम् ।
तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः (ञ) ॥२६॥

त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् ।
ऋषीणाञ्च यथान्यायं सकृच्चापि प्रजापतेः ॥२७॥

पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते !
पितामहेभ्यश्च तथा प्रीणयेत्प्रपितामहान् ॥२८॥

मातामहाय तत्पित्रे तत्पित्रे च समाहितः ।
दद्यात् पैत्रेण तीर्थेन काम्यञ्चान्यच्छृणुष्व मे (ट)॥२९॥

मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप !
गुरवे मातुलादीनां स्निग्धमित्राय भूभुजे(ऽ) (ठ)॥३०

अथ प्रातःस्नानस्य मलापकर्षणरूपस्य शौचोक्ते च उक्तप्रायत्वात् 'नित्योदकी भवेद् विप्र' इति पूर्वं संक्षेपेणोक्तत्वात् सन्ध्योपासनहोमादीनाञ्च सूर्योदयास्तमयप्रसङ्गेनोक्तत्वात् तदुपरितनं क्रियाकाण्डमाह—'आचान्त' इति ॥२१

सोमसंस्था अग्निष्टोमादयः सप्त । हविःसंस्था अग्न्याधेयाद्याः । पाकसंस्थाः अष्टकाद्याः । यथाह गोतमः—, अष्टका पार्वणश्राद्धम् श्रावण्याग्रहायणी चैत्राश्वयुजीति सप्त पाकसंस्थाः । अग्न्याधेयमग्निहोत्रं दर्शपौर्णमास्याग्रयणं चातुर्मास्यानि निरूढपशुबन्धसौत्रामणी चेति सप्त सोमसंस्था इति ॥२३॥

माध्यन्दिनीयस्नानतर्पणान्याह—'नदी'ति । देवखातो मनुष्यादिकृतो ह्रदः । स्नायीत स्नायात् । कूपेषु कलसादिभिरुद्धृतेन तोयेन भुवि तत्तटभूमौ स्नायात् । तदसम्भवे नद्या उद्धृतेन शीतलोदकेन गृह एव स्नायात् । तत्राप्यशक्तौ उष्णोदकेन तत्राप्यशक्तौ मन्त्रस्नानादि कुर्यादित्यन्यस्मृतिभ्यो ज्ञेयम् ॥२५॥

(झ) स्नायादिति वक्तव्ये स्नायीतेति प्रयोग आर्षः ।

तेषां देवादीनां तीर्थेन पूर्वोक्तेन ॥२६॥

त्रिरप इति शाखाभेदव्यवस्थितमिदम् । तत्र भूर्देवान् भुवर्देवान् स्वर्देवान् तर्पयामीति एवं त्रिरपो वर्जयेत् दद्यात्, तथर्षीणामपि भूरादिपदयोगेन त्रिरपो दद्यात् प्रजापतिः तर्पयामीति सकृत् ॥२७॥

पितॄणामिति भूरादिपदयोगेन सामान्यपितॄणां तत्प्रयोगं विना स्वपितॄणाञ्चेत्यर्थः ॥२८॥

पैत्रेण तीर्थेन तर्ज्जनीमूलेन काम्यं फलविशेषार्थम् ॥२९॥

(ञ) तेषामेव देवर्षिपितॄणामेव तीर्थेन । तथाहि देवतीर्थेन देवान् ऋषितीर्थेन ऋषीणां, पितृतीर्थेन च पितॄणां तर्पणं कुर्वीत ।

(ट) प्रथमस्य तत्पित्रे इत्यस्य मातामहस्य पित्रे प्रमातामहायेत्यर्थः, द्वितीयस्य च तत्पित्रे इत्यस्य मातामहपितुः प्रमातामहस्य पित्रे वृद्धप्रमातामहायेत्यर्थः । शृणुष्वेत्यत्रात्मनेपदप्रयोग आर्षः ।

(ठ) प्रमात्रे मातामह्यै पितामह्यै च । तन्मात्रे प्रपितामह्यै प्रमातामह्यै च । पितामही-प्रपितामह्योरपि तर्पणस्य शास्त्रविहितत्वात् तथैवार्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[तृतीयः

इदञ्चापि जपेदम्बु दद्यादात्मेच्छया नृप !
उपकाराय भूतानां कृतदेवादितर्पणः (ङ) ॥३१॥

देवासुरास्तथा यक्षा नागगन्धर्वराक्षसाः ।
पिशाचा गुह्यकाः सिद्धाः कुष्माण्डास्तरवः खगाः ॥३२

जलेचरा भूनिलया वायव्याहाराश्च जन्तवः ।
तृप्तिमेतेन यान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ॥३३॥

नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥३४॥

येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्वे तृप्तिमयान्तु(६) ये चास्मत्तोयकाङ्क्षिणः (ण)।३५

यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ।
इदमप्यक्षयञ्चास्तु(७) मया दत्तं तिलोदकम् ॥३६॥

काम्योदकप्रदानन्ते मयैतत् कथितं नृप !
यद् दत्त्वा प्रीणयत्येतन्मनुष्यः सकलं जगत् ॥३७

जगदाप्यायनोद्भूतं पुण्यमाप्नोति चानघ !
दत्त्वा काम्योदकं सम्यगेतेभ्यः श्रद्धयान्वितः (थ)

आचम्य च ततो दद्यात् सूर्याय सलिलाञ्जलिम्
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ॥३९॥

ततो गृहार्चनं कुर्यादभीष्टसुरपूजनम् ।
जलाभिषेक-पुष्पाणां धूपादेश्च निवेदनैः(द) (
अपूर्वमग्निहोत्रञ्च कुर्यात् प्राग् ब्रह्मणे नृप ।
प्रजापतिं समुद्दिश्य दद्यादाहुतिमादरात् ॥४१॥

"हे ब्रह्मन् ! भास्वदादिरूपाय तुभ्यं नमः" । 'ब्रह्मभास्वत'

(ङ) भूतानां देवादीनां सर्वप्राणिनाम् उपकाराय प्रीत्यादि-विधानाय कृतं देवादीनां 'देवासुरास्तथा यक्षा' इत्यादिमन्त्रोक्त-देवासुरप्रभृतीनां तर्पणं येन तथाभूतः ।

(ढ) तरव इति—तरव इत्युपलक्षणम्, तेन लतागुल्मादय-योऽपि गृह्यन्ते, 'अन्तःसंज्ञा भवन्येते सुखदुःखसमन्विताः' इत्यादिशास्त्रैस्तेषामप्यन्तश्चेतनानां सुखदुःखभोगस्य कथनात्त-त्तुप्तेरपि सुतरामुदारदृष्ट्या समपेक्षितत्वात् ।

(ण) अबान्धवाः तर्पणकर्त्तुर्मम बान्धवभिन्नाः, वा अथवा बान्धवाः अस्मिन् जन्मनि ममेति शेषः । अथवा न विद्यते बान्धवो येषां ते अबान्धवाः बान्धवशून्याः, तेषां कस्यापि बान्धवस्याभावेन तदुत्-सृष्टतर्पणतोयजन्यतृप्तिसम्भावनाविरहात् तत्तर्पणार्थं मदीय-तर्पणतोयस्य आवश्यकत्वादिति भावः । अस्मिन् कल्पे बान्धवा इत्यस्य बान्धवशब्दादस्त्यर्थे अप्रत्ययेन बान्धववन्त इत्यप्यर्थमाहुः ।

अस्माकं तोयम् अस्मत्प्रदत्तं तर्पणजलं तत्काङ्क्षिणः । अथवा अस्मदिति पृथगसमस्तं पञ्चम्यन्तपदम्, अस्मत्त इत्यर्थकम् ।

इति पाठे वेदैः प्रकाशमानायेत्यर्थः । जगत्सर्वे जनकाय, कर्मदायिने कर्मप्रवर्त्तकाय ॥३८॥

अपूर्वमनन्यप्रकृतिकम् अग्निहोत्रं ब्रह्मादिप देवयज्ञाख्यं हविर्होमं कुर्यादित्यर्थः । अपूर्वमिति प्रोक्षणपूर्वकमित्यर्थः ॥४१॥

(त) तिलेन सहितमुदकम् तिलोदकम् तर्पणजलमित्यर्थः । क्षुत्तृष्णोपहतात्मनामिति विशेषणात् तृष्णोपशमनार्थं तर्पणोदकस्येव तिलस्यापि नार्थमस्ति प्रकृतोपयोग इति केषाञ्चिन्मतिः ।

(थ) श्रद्धयान्वित इत्यनेन अश्रद्धया कथञ्चित् प्रदाने न तत्पुण्यलाभ इति व्यज्यते ।

(द) गृहार्च्चनमिति गृहदेवतार्च्चनमित्यर्थः । पूजनमिति स्वीयेष्टदेवतासमर्च्चनमित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुह्येभ्यः कश्यपायाथ ततोऽनुमतये क्रमात् ॥४२॥
तच्छेषं मणिकेऽद्भ्योऽथ पर्जन्यायः क्षिपेत्ततः(९) ।
द्वारे धातुर्विधातुश्च मध्ये च ब्राह्मणाः क्षिपेत् ।
गृहस्य पुरुषव्याघ्र ! दिग्देवानपि मे शृणु ॥४३॥
इन्द्राय धर्मराजाय वरुणाय तथेन्दवे ।
प्राच्यादिषु बुधो दद्याद्धुतशेषात्मकं बलिम् (ध)४४॥
प्रागुत्तरे च दिग्भागे धन्वन्तरिबलिं बुधः ।
निर्वपेद् वैश्वदेवञ्च कर्म कुर्यादतः परम् (न) ॥४५॥
वायव्ये वायवे दिक्षु समस्तासु ततो दिशाम् ।
ब्रह्मणे चान्तरिक्षाय भानवे च क्षिपेद् बलिम् (प)॥४६
विश्वेदेवान् विश्वभूतानथ विश्वपतीन् पितॄन् ।
यक्षाणाञ्च समुद्दिश्य बलिं दद्यान्नरेश्वर (फ)॥४७॥

ततोऽन्यदन्नमादाय भूमिभागे शुचौ बुधः ॥
दद्यादशेषभूतेभ्यः स्वेच्छया तत् समाहितः ॥४८॥

देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसङ्घाः ।
प्रेताः पिशाचास्तरवः समस्ता
ये चान्नमिच्छन्ति मया प्रदत्तम् ॥४९॥

पिपीलिकाः कीटपतङ्गकाद्या
बुभुक्षिताः कर्मनिबन्धबद्धाः ।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु (ब)॥५०॥

भूतयज्ञमाह—तच्छेषं मणिके जलाधारसन्निधौ अद्भ्यः पर्जन्याय च क्षिपेत्। पृथ्वीपर्जन्याद्भ्य इति पाठान्तरम् ॥४२॥

गृहस्य द्वारे धातुर्विधातुश्च मध्ये ब्रह्मणः ॥४३॥

प्राच्यादिषु गृहस्येति सर्वत्रान्वयः ॥४४॥

धन्वन्तरिबलिं निर्वपेत् इत्यन्वयः। तदेवं गृह्यदेवताको बलिरुक्तः। इदानीं तदितरदेवताकं बलिमाह—'वैश्वदेव'मित्यादिना 'भुवि मानवा' इत्यन्तेन। वैश्वदेवादयो देवा उद्देश्या यत्र बलौ तं ततः कुर्यात् ॥४५॥

तदेवाह—वायव्ये कोणे वायवे बलिं प्रक्षिपेत्। वायवे इति पाठे वीप्सया समस्तासु दिक्षु वायवे वायुमुद्दिश्य प्रक्षिपेदित्यर्थः। ततो दिशां प्राच्यै दिशे दक्षिणस्यै दिशे इत्यादिना बलिं क्षिपेत् ॥४६॥

मध्ये ब्राह्मणादित्रयाणाम् उत्तरतः विश्वेभ्यो देवेभ्य इत्यादिना बलिं क्षिपेत्, दक्षिणतो भूतपत्यादीनामिति ॥४८

(ध) प्राच्यादिष्विति—गृहस्य प्राच्यां दिशि इन्द्राय, दक्षिणस्यां दिशि धर्मराजाय, प्रतीच्यां दिशि वरुणाय, तथा उत्तरस्यां दिशि इन्दवे हुतशेषात्मकं बलिं दद्यादिति सर्वत्र सम्बन्धः।

(न) प्रागुत्तरे दिग्भागे पूर्वोत्तरयोर्दिशोरन्तरालगतायां दिशि ऐशान्यां दिशीत्यर्थः।

(प) दिशामित्यत्र चतुर्थ्यर्थे षष्ठी, दिग्भ्य इत्यर्थः। अत एव 'ततो दिशां, प्राच्यै दिशे, दक्षिणायै दिशे इत्यादिना बलिं क्षिपेदिति स्वामिना व्याख्यातम्। अथवा दिशामित्यस्य बलिना सम्बन्धः कार्य्यः।

(फ) विश्वभूतान् विश्वानि भूतानि, पुंलिङ्गप्रयोग आर्षः। यक्षाणाञ्चेत्यत्र द्वितीयार्थे षष्ठीप्रयोगोऽप्यार्षः।

(ब) अत्र तृप्तिमित्यन्तमेकं वाक्यम्, विसृष्टमित्यन्तमपरं शेषञ्चान्यदिति वाक्यत्रयमयं परार्द्धम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येषां न माता न पिता न बन्धु-
नैवान्नसिद्धिर्न तथान्नमस्ति ।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
ते यान्तु तृप्तिं मुदिता भवन्तु (भ) ॥५१॥

भूतानि सर्वाणि तथान्नमेत-
दहञ्च विष्णुर्न यतोऽन्यदस्ति ।
तस्मादहं भूतनिकायभूत—
मन्नं प्रयच्छामि भवाय तेषाम् ॥५२॥

चतुर्दशो भूतगणो य एष
तत्र स्थिता येऽखिलभूतसङ्घाः ।
तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदं ते मुदिता भवन्तु (म) ॥५३॥

इत्युच्चार्य नरोच दद्यादन्नं श्रद्धासमन्वितः ।
भुवि सर्वोपकाराय गृही सर्वाश्रयो यतः ॥५४॥
श्वचाण्डालविहङ्गानां भुवि दद्यान्नरेश्वर !
ये चान्ये पतिताः केचिदपुत्राः सन्ति मानवाः ॥
ततो गोदोहमात्रं वै कालं तिष्ठेद् गृहाङ्गणे ।
अतिथिग्रहणार्थाय तद्ऊर्ध्वं वा यथेच्छया ॥५६॥
अतिथिं तत्र सम्प्राप्तं पूजयेत् स्वागतादिना ।
तथासनप्रदानेन पादप्रक्षालनेन च ॥५७॥
श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च ।
गच्छतश्चानुयानेन प्रीतिमुत्पादयेद् गृही ॥५८॥
अज्ञातकुलनामानमन्यदेशादुपागतम् ।
पूजयेदतिथिं सम्यङ् नैकग्रामनिवासिनम् ॥५९॥
अकिञ्चनमसम्बन्धमज्ञातकुलशीलिनम् ।
असम्पूज्यातिथिं भुञ्जन् भक्तुकामं व्रजत्यधः ॥६०॥

येषामन्नं नास्ति येषाञ्च सत्यप्यन्ने नान्नसिद्धिः पाकसाधनं नास्तीत्यर्थः ॥५१॥

चतुर्दश इति एष देवा इत्यादि श्लोकोक्तः कीटपतङ्गान्तः चतुर्दशसंख्यको भूतगणः । स्वार्थे डप्रत्यय आर्षः । यद्वा दैवमष्टविधं तैर्यग्योन्यश्च पञ्चविधं मानुषञ्चैकविधमिति चतुर्दशो भूतगणः, तत्र स्थिता अखिला भूतसंघास्तत्तदवान्तरविशेषाः ॥५३॥

(भ) तत्तृप्तये तेषां सर्वेषां तृप्त्यर्थम् तृप्तिं प्रयान्तु ते भुवि दत्तेनानेन अन्नेनेति शेषः ।

(म) तेषां तेभ्यः, विसृष्टं दत्तम् ।

(य) प्रश्नश्च उत्तरञ्च प्रश्नोत्तरमिति समाहारद्वन्द्वोत्तरं प्रियं प्रश्नोत्तरं प्रियप्रश्नोत्तरमिति कर्मधारयः, तेन ।

तथा हि गृहस्थेनातिथेस्तथा प्रश्नो न कार्य्यः, तथा च तदीयप्रश्नस्योत्तरं न देयं, यथास्य मनसः प्रीतिर्व्याहन्येतेति भावः । अनुयातम् अनुगमनं तेन । भावे क्तप्रत्ययः ।

यद्यप्यवान्तरवाक्यसमाप्त्या पृथक् पृथग् वलिदानं यते, तथा इत्युच्चार्य्य नरो दद्यादिति वाचनिकमेवैकवा मिति ॥५४॥

अपात्राः श्राद्धायोग्याः । पुंस्त्वमार्षम् । तेषाञ्च दद्यात् ॥५५॥

गोदोहमात्रं घटिकाचतुर्थांशम् ॥५६॥

तत्र तस्मिन् काले ॥५७॥

अतिथिलक्षणमाह—'अज्ञाते'ति । नैकग्रामनि एकग्रामस्थभिन्नम् ॥५९

नित्यत्वार्थमपूजने निन्दामाह—'अकिञ्चनादिगुणं मतिथिमसंपूज्य भक्तमन्नं भुञ्जन् भुञ्जानोऽश्नन् मोक्तुकाममिति पाठे अतिथेर्विशेषणम् ॥६०॥

(र) भुञ्जान इति वक्तव्ये भुञ्जन् इति शतृप्रत्ययः आर्षः । अत्र 'भक्तं कामं व्रजत्यध' इति श्रीधरसम्म प्रतिभाति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पित्रर्थञ्चापरं विप्रमेकमप्याशयेन्नृप !
तद्देश्यं विदिताचारसम्भूतिं पञ्चयज्ञियम्(ल) ॥६२॥

अन्नाग्रञ्च समुद्धृत्य हन्तकारोपकल्पितम् ।
निवापभूतं भूपाल ! श्रोत्रियायोपकल्पयेत् ॥६३॥

दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणाम् ।
इच्छया च बुधो दद्याद् विभवे सत्यवारितम् ॥६४॥

इत्येतेऽतिथयः प्रोक्ताः प्रागुक्ता भिक्षवश्च ये ।
चतुरः पूजयन्नेतान् नृयज्ञर्णात् प्रमुच्यते ।.६५॥

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥६६॥

धाता प्रजापतिः शक्रो वह्निर्वसूगणोऽर्यमा ।
प्रविश्यातिथिमेवैते भुञ्जतेऽन्नं नरेश्वर ॥६७॥

तस्मादतिथिपूजायां यतेत सततं नरः ।
स केवलमघं भुङ्क्ते यो भुङ्क्ते ह्यतिथिं विना ॥६८॥

ततः सुवासिनीदुःखिगर्भिणीवृद्धबालकान् ।
भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ॥६९॥

अभुक्तवत्सु चैतेषु भुञ्जन् भुङ्क्ते हि दुष्कृतम्(व) ।
मृतश्च नरकं गत्वा श्लेष्मभुग् जायते नरः ॥७०

अस्नाताशी मलं भुङ्क्ते ह्यजपी पूयशोणितम् ।
असंस्कृतान्नभुङ् मूत्रं बालादिप्रथमं शकृत् ॥७१॥

(अहोमी च कृमीन् भुङ्क्ते अदत्त्वा विषमश्नुते ।)
तस्माच्छृणुष्व राजेन्द्र ! यथा भुञ्जीत वै गृही ।
भुञ्जतश्च तथा पुंसः पापबन्धो न जायते(श) ॥७२॥

स्वाध्यायादिकमपृष्ट्वा चरणं वेदावान्तरशास्त्राम् आचारं वा अपृष्ट्वा अभ्यागतम् अतिथिम् ॥६१॥

पित्रर्थं नित्यश्राद्धार्थम् आशयेत् भोजयेत्। विदित आचारः सम्भूतिः कुलञ्च यस्य। पञ्चयज्ञियं पञ्चयज्ञकारिणम् ॥६२॥

अन्नाग्रं भोजनाद्यनवशिष्टम्। अत्र चोक्तम्—"ग्रासमात्रा भवेद् भिक्षा अग्रं ग्रासचतुष्टयम्। अग्राण्येव तु चत्वारि हन्तकारं प्रचक्षते।" मनुष्येभ्यो हन्तेति मन्त्रेणोपकल्पितमन्नं हन्तकारोपकल्पितम्। निवापभूतं पृथक्कल्पस्थापितम् ॥३३॥

'इत्येतेऽतिथय' इति 'अज्ञातकुलनामान'मित्यादिना 'तं मन्ये अभ्यागतं गृही'त्यन्तेनोक्त एकः, पित्रर्थान्नभोक्ता चापरः, हन्तकारसम्प्रदानश्चान्य इति त्रयः, पूर्वमाश्रमाध्यायोक्ताश्च परिव्राड्ब्रह्मचारिणो भिक्षवो भिक्षजीविनश्चेत्येको वर्गः। इत्येतांश्चतुरः पूजयन् मनुष्ययज्ञरूपादृणान्मुच्यते ॥६५॥

निन्दार्थवादेनातिथिपूजाया आवश्यकत्वमुपसंहरति—'अतिथि'रिति त्रिभिः ॥६६॥

सुवासिनी कृतविवाहा पितृगृहस्था कन्या। चरमं पश्चात् गृही भुञ्जीत ॥६८॥

अस्नाताशी त्रिविधस्नानहीनः सन् भोजनशीलः, अजपी गायत्र्यादिमन्त्रजपहीनः, बालादितः प्रथमं भुञ्जानः। शकृत् पुरीषं भुङ्क्ते ॥७१॥

प्रसङ्गाद् भोजनप्रकारमाह—'तस्मादि'त्यादिना प्राणाद्याप्यायनाय चेत्यन्तेन ॥७२॥

(ल) तद्देश्यं तद्देशभवं स्वदेशभवमिति यावत्, तथात्वेनैव तस्य आचारकुलादीनां सुग्रहत्वादिति भावः।

(व) भुञ्जन्निति पूर्ववदार्षम्।

(श) शृणुष्वेति भुञ्जत इति च पदद्वयमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इह चारोग्यमतुलं बलवृद्धिस्तथा नृप !
भवत्यनिष्टशान्तिश्च वैरिपक्षाभिचारिका(ष) ॥७३॥

स्नातो यथावत् कृत्वा च देवर्षिपितृतर्पणम् ।
प्रशस्तरत्नपाणिस्तु भुञ्जीत प्रयतो गृही ॥७४॥

कृतजाप्यो हुते वह्नौ शुद्धवस्त्रधरो नृप !
दत्त्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रिताय च ७५॥

पुण्यगन्धधरः शस्तमाल्यधारी नरेश्वर ॥
नैकवस्त्रधरोऽयार्द्रपाणिपादो महीपते(स) ॥७६॥

विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः ।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नृप(ह)॥७७

अन्नं प्रशस्तं पथ्यं च प्रोक्षितं प्रोक्षणोदकैः ।
न कुत्सिताहृतं नैव जुगुप्सावदसंस्कृतम् ॥७८॥

दत्त्वा तु भुक्तं शिष्येभ्यः क्षुधितेभ्यस्तथा गृही ।
प्रशस्तशुद्धपात्रेषु भुञ्जीताकुपितो नृप ॥७९॥

नासन्दीसंस्थिते पात्रे नादेशे च नरेश्वर !
नाकाले नातिसङ्कीर्णे दत्त्वाग्रञ्च नरोऽभये ॥८०॥

मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं नृप !
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥८१॥

तद्वद्धरीतकेभ्यश्च गुड़पक्वेभ्य एव च ।
भुञ्जीतोद्धृतसाराणि न कदापि नरेश्वर ॥८२॥

नाशेषं पुरुषोऽश्नीयादन्यत्र जगतीपते !
मध्वम्बुदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान् ॥८३॥

अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः ॥८४॥

अरिष्टमशुभादृष्टं तस्य शान्तिः, वैरिपक्षाणामुत्पन्नयोगानामभिचारिका विनाशशीला ॥७३॥

प्राङ्मुख उदङ्मुखो वा भुञ्जीत ॥७७॥

(ष) वैरिपक्षाणामभिचारिकेति अनिष्टशान्तेर्विशेषणत्वेन व्याख्यातं स्वामिना । केचित्तुरै विपक्षाणामभिचारिकेति पृथग् वाक्यमिदमिति वदन्ति । तदर्थश्च वैरिपक्षाणामभिचारिका अभिचारश्च भवति । अभिपूर्वचर्धातोर्भावे वुञ्प्रत्येन अभिचारिकापदस्य निष्पत्तेः । भवतः शायिका भवत आसिकेत्यादिषु शायिकासिकादिपदवत् ।

(स) नैकवस्त्रधर इति उत्तरीयवस्त्रपरिधानेवस्त्रेत्युभयधारीत्यर्थः । एतेन एकमात्रवस्त्रधारिणा न भोक्तव्यमिति निषेधो व्यज्यते । वर्त्तमाने काले सोऽयं शास्त्रार्थो नानुष्ठीयते प्रायेण ।

(ह) प्राङ्मुखोदङ्मुखो वापीत्यत्र विकल्पोपपत्त्यर्थं प्राङ्मुख उदङ्मुखो वेति पृथगसमासेन वक्तव्ये समस्तपदप्रयोग आर्षः । सप्ताशीतितमश्लोकोऽपि तथा ।

आसन्दो दारुमयं त्रिपदादि, अदेशे कुत्सिते स्थाने अकाले सन्ध्यादिसमये । आकाश इति पाठे अनाकाशे अग्रमग्नये दत्त्वा परिशिष्टस्यान्नस्याग्रं किञ्चिदग्नौ क्षिप्त्वा च न भुञ्जीत, 'परिशिष्टस्यान्नस्याग्रं नाग्नौ क्षिपेद्धि' इति विधिः ॥८०॥

मन्त्राभिमन्त्रितं शस्तं भुञ्जीतेत्यनुषङ्गः । शुष्कं जलोपसेकं विना पक्वं शाकादिकं सक्तवादिकं विना शेषः ॥८१॥

हरीतकेभ्यः अपक्वलेह्यादिभ्यः । वादरिकेभ्य इति पाठे तु वदरविकारेभ्य इत्यर्थः । गुड़पक्वेभ्यः लड्डुकादिभ्यः । गुड़भक्षेभ्य इति पाठे स एवार्थः । उद्धृतसाराणि पिण्याकादीनि ॥८२॥

नाशेषं निःशेषं न भुञ्जीत ॥८३॥

तन्मनाः अन्ने दत्तचित्तः सन् ॥८४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रागूद्ववं पुरुषोऽश्नीयान्मध्ये कठिनभोजनः ।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति ॥८५॥
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन् ।
पञ्च ग्रासान् महामौनं प्राणाद्याप्यायनाय च ॥८६॥
भुक्त्वा सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा ।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य मूलतः ॥८७॥
स्वस्थः प्रशान्तचित्तस्तु कृतासनपरिग्रहः ।
अभीष्टदेवतानान्तु कुर्वीत स्मरणं नरः ॥८८॥
अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः ।
दत्तावकाशं नभसा जरयत्वस्तु मे सुखम् ॥८९॥
अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च ।
भवत्वेतत्परिणतौ ममास्त्वव्याहतं सुखम् ॥९०॥
प्राणापानसमानानामुदानव्यानयोस्तथा ।
अन्नं पुष्टिकरञ्चास्तु ममाप्यव्याहतं सुखम् ॥९१॥
अगस्तिरग्निर्बडवानलश्च
भुक्तं मयान्नं जरयत्वशेषम् ।
सूखञ्च मे तत्परिणामसम्भवं
यच्छत्वरोगो मम चास्तु देहे ॥९२॥
विष्णुः समस्तेन्द्रियदेहदेही
प्रधानभूतो भगवान् यथैकः ।
सत्येन तेनान्नमशेषमेत—
दारोग्यदं मे परिणाममेतु ॥९३॥
विष्णुरत्ता तथैवान्नं परिणामश्च वै तथा ।
सत्येन तेन वै भुक्तं जीर्यत्वन्नमिदं तथा ॥९४॥
इत्युच्चार्य्य स्वहस्तेन परिमृष्य तथोदरम् ।
अनायासप्रदायीनि कुर्यात् कर्माण्यतन्द्रितः (क्ष)॥९५॥
सच्छास्त्रादिविनोदेन सन्मार्गाद्यविरोधिना ।
दिनं नयेत्ततः सन्ध्यामुपतिष्ठेत् समाहितः ॥९६॥
दिनान्तसन्ध्यां सूर्येण पूर्वामृक्षैर्युतां बुधः ।
उपतिष्ठेद् यथान्यायं सम्यगाचम्य पार्थिव(क) ॥९७॥

बलारोग्ये न मुञ्चति न त्यजति सर्वदा तद्युक्तो भवतीत्यर्थः ॥८५॥

अनिन्द्यम् अनिषिद्धम्, महामौनं संकेतादिरहितम् ॥८६॥

मूलतः कफोणिपर्यन्तम् ॥८७॥

पवनेरितो वह्निर्नभसा दत्तावकाशं मया भुक्तमन्नं जरयतु। ततश्चान्नरसेन पार्थिवं देहधातुम् आप्याययत्विति ॥८९॥

पञ्च भूतान्नग्रहप्रार्थनम्,—मे मत्सम्बन्धिनां भूम्यादीनां बलायान्नमस्तु ॥९०॥

अरोगो रोगाभावः ॥९२॥

विष्णुर्यथा समस्तदेहादिषु प्रधानभूतो मयोपास्यते, तेनोपासनेन सत्येन परमार्थतोऽपि सत्यमूतेनान्नम् आरोग्यदं सत् परिणाममेत्वित्यन्वयः ॥९३॥

एवं विष्णुरत्तेत्यादावपि योज्यम् ॥९४॥

'सच्छास्त्रादी'ति आदिशब्देन क्रीड़ादेरपि परिग्रहः। अत एव विशिनष्टि—'सन्मार्गाद्यविरोधिने'ति ॥९६॥

(क्ष) न आयासप्रदायीनि अनायासप्रदायीनि कष्टाजनकानि आनायाससाध्यानीत्यर्थः। अतन्द्रितः अनलसः सन्नित्यर्थः। एतेन भोजनात् परम् आलस्यपरिहारेण स्वल्पश्रमः कर्त्तव्य इति सूच्यते। तदभिप्रायेणैव 'भुक्त्वा पदशतं गच्छे'दित्यादिशास्त्रोपदेशात्।

(क) दिनान्तसन्ध्यां पश्चिमां सन्ध्यां सायंसन्ध्यामिति यावत्, सूर्य्येण युतामुपतिष्ठेत्, पूर्वां प्रातःसन्ध्यान्तु ऋक्षैः नक्षत्रैः युताम् सनक्षत्रामित्यर्थः, उपतिष्ठेदित्वन्वयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वकालमुपस्थानं सन्ध्ययोः पार्थिवेष्यते ।
अन्यत्र सूतकाश्चौचविभ्रमातुरभीतितः(ख) ॥९८॥

सुर्येणाभ्युदितो यश्च त्यक्तः सूर्येण वा स्वपन् ।
अन्यत्रातुरभावात्तु प्रायश्चित्ती भवेन्नरः ॥९९॥

तस्मादनुदिते सूर्ये समुत्थाय महीपते ।
उपतिष्ठेन्नरः सन्ध्यामस्तंयंश्च दिनान्तजाम् ॥१००॥

उपतिष्ठन्ति वै सन्ध्यां ये न पूर्वां न पश्चिमाम् ।
व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप ॥१०१॥

पुनः पाकमुपादाय सायप्यवनीपते ।
वैश्वदेवनिमित्तं वै पत्न्यमन्त्रं बलिं हरेत् ॥१०२॥

तत्रापि श्वपचादिभ्यस्तथैवान्नविसर्जनम् ।
अतिथिं चागतं तत्र स्वशक्त्या पूजयेद् बुधः(ग)॥१०३॥

पादशौचासनप्रह्वस्वागतोक्त्या च पूजनम् ।
ततश्चान्नप्रदानेन शयनेन च पार्थिव(घ) ॥१०४॥

दिवातिथौ तु विमुखे गते यद् पातकं नृप ।
तदेवाष्टगुणं पुंसां सूर्येंढे विमुखे गते ॥१०५॥

तस्मात् स्वशक्त्या राजेन्द्र सूर्येंढमतिथिं नरः ।
पूजयेत्पूजिते तस्मिन्पूजिताः सर्वदेवताः ॥१०६॥

अन्नशाकाम्बुदानेन स्वशक्त्या प्रीणयेत्पुमान् ।
शयनप्रस्तरमहीप्रदानैरथवापि तम् ॥१०७॥

सन्ध्योपास्तौ विशेषमाह—'दिने'ति । तथा च स्मृतिः । "प्रातःसन्ध्यां सनक्षत्रामुपासीत• यथाविधि । सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम् ॥" इति ॥९७॥

सूतकं जन्मनिमित्तमशौचम्, अशौचं शावम्, विभ्रमो वैचित्त्यम्, आतुरमातुरत्वं रोगकृतम् भीतिरपायद्याशङ्का, तेभ्योऽन्यत्र ॥९८॥

सूर्येणाभ्युदितः—यस्मिन् सुप्ते सूर्य्य उदेति, सूर्य्येण त्यक्तः—यस्मिन् सुप्ते सूर्योऽस्तमेति । आतुरभावादिति सूतकादेरुपलक्षणम् । प्रायश्चित्तीयते पातको भवति ॥९९॥

वैश्वदेवनिमित्तं वैश्वदेवकर्मफलसिद्ध्यर्थम् । पत्नी मन्त्रं विना बलिं हरेत्, 'पत्न्या सार्द्धं बलिं हरे'दित्यपि पाठः कुत्रापि ॥१०२॥

तत्रापि सायमग्नि ॥१०३॥

प्रह्वः प्रह्वत्वं प्रणाम इत्यर्थः ॥१०४॥

सूर्येणास्तं गच्छता ऊढः प्रापित इव सूर्यास्तमनन्तरमागत इत्यर्थः ॥१०६॥

शयनं कमलादि । प्रस्तरः कटतृणादि । मही भूमात्रमपि ॥१०७॥

(ख) सर्वकालं प्रतिदीवसीयं सर्वं विहितकालम् । व्याप्येत्यर्थः । अथवा सर्वः कालो यस्य तदित्युपस्थानविशेषणमिदम् । सर्वपदं सङ्कोचवृत्त्या विहितकालपरम्, सन्ध्ययोः प्रातःसन्ध्यासायंसन्ध्ययोरित्यर्थः । केचित्तु मध्याह्नसन्ध्याया अपि उपलक्षणमिदमित्याहुः । उपस्थानम् उपासनमित्यर्थः । आतुरस्य भाव आतुरम् आतुरत्वम्, अत एव 'आतुरमातुरत्व'मित्यर्थमाह स्वामी । अन्यत्रेत्यादि—एतेन सूतकाद्यवस्थासु सन्ध्याया उपासनाभावेऽपि प्रत्यवायाभावः सूच्यते ।

(ग) श्वपचादिभ्यः चाण्डालादिभ्यः । अन्नविसर्जनम् अन्नप्रदानम् ।

(घ) प्रह्वेति धर्मप्रधाननिर्देशः, अत एव स्वामी 'प्रह्वत्व'मित्यर्थमाह । अथवा प्रह्वस्य विनम्रजनस्य स्वागतोक्तिः तयेत्यर्थः । अन्नप्रदानेन शयनेन चेत्यस्य पूर्वेण पूजनमित्यनेन सम्बन्धः । शयनेन शय्यया । अनट् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ।
गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप ॥१०८॥

नाविशालां न वै भग्नां नासमां मलिनां न च ।
न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम्(ङ)।१०९

प्राच्यां दिशि शिरः शस्तं याम्यायामथ वा नृप !
सदैव स्वपतः पुंसो विपरीतान्तु रोगदम्(च) ॥११०

कृतावुपगमः शस्तः स्वपत्न्यामवनीपते !
पुन्नामर्क्षे शुभे काले ज्येष्ठायुग्मासु रात्रिषु ॥१११॥

नास्नातान्तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम् ।
नानिष्टां न प्रकुपितां नाप्रशस्तां न च गर्भिणीम्।११२

नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् ।
क्षुत्क्षामां नातिभुक्तां वा स्वयञ्चैभिर्गुणैर्युतः ॥११३॥

नातः स्रग् गन्धधृक् प्रीतो न ध्यातः क्षुधितोऽपि वा ।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥११४॥

चतुर्दश्यष्टमी चैव अमावस्याथ पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥११५॥

तैलस्त्रीमांससम्भोगी पर्वेष्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं नृप ॥११६॥

अशेषपर्वस्वेतेषु तस्मात् संयमिभिर्बुधैः ।
भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः ॥११७॥

नान्ययोनावयोनौ वा नोपयुक्तौषधस्तथा ।
देवद्विजगुरूणाञ्च व्यवायी नाश्रमे भवेत् ॥११८॥

चैत्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे ।
नैव श्मशानोपवने सलिलेषु महीपते ॥११९॥

प्रोक्तपर्वस्वशेषेषु नैव भूपाल ! सन्ध्ययोः ।
गच्छेद् व्यवायं मतिमान् न मूत्रोच्चारपीडितः ॥१२०

पर्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप !
भुवि रोगावहो नृणामप्रशस्तो जलाशये ॥१२१॥

अस्फुटितामविदीर्णां गजदन्तमयीं तदभावे दारुमयीमपि ॥१०८॥

स्वपतः प्राच्यां याम्यायाञ्चैव शिरः सदा शस्तमित्यन्वयः ॥११०॥

इदानीं विशिष्टयोषिद्गमनमाह यावदध्यायसमाप्ति। 'नृता'वित्ति—पुंनामर्क्षाणि दश अश्विनी, कृत्तिका, रोहिणी-पुनर्वसु,पुष्या, हस्ता,अनुराधा, श्रवणा पूर्वभोद्रपदा उत्तरभाद्रपदा च। ज्येष्ठयुग्मासु रात्रिषु। ऋतुकालमारभ्य षष्ठ्याष्टम्यादिषु रात्रिषु। तत्रापि ज्येष्ठासु वृद्धासु उत्तरोत्तरं शुभावित्यर्थः ॥१११॥

अस्नाताम् अकृतर्तुस्नानाम्, रजस्वलां चतुर्थरात्रिप्रभृति अनुपरतरजस्काम् अनिष्टामनुपजातेच्छाम्, अप्रशस्तां परिवादादिदूषिताम् ॥११२॥

अदक्षिणाम् अननुकूलाम्, अन्यकामाम् अन्यपुरुषाभिलाषिणीम्। एभिर्वक्ष्यमाणैर्गुणैर्युतः पुरुषो व्यवायं व्रजेदित्युत्तरेणान्वयः ॥११३॥

अन्ययोनौ अश्वादियोनौ, अयोनौ मुखादौ, औषधं वृष्यावाजीकरणरसायनादि, देवादीनामाश्रमे गेहे स्थितः। आश्रयीति पाठे स एवार्थः ॥११८॥

अधन्यो धनहानिकृत् ॥१२१॥

(ङ) जन्तुमहीम् मवेकुणादिकीटव्याप्ताम्।

(च) विपरीतां पश्चिमायामुत्तरस्यां वा दिशि स्थापितं शिर इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परदारान् न गच्छेच्च मनसापि कदाचन ।
किमु वाचास्थिबन्धोऽपि नास्ति तेषु व्यवायिनाम् ।१२२
मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः ।
परदारगतिः पुंसामुभयत्रापि भीतिदा ॥१२३॥

इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि ॥१२४॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे एकादशोऽध्यायः

यदा मनसा न गच्छेत्, तदा वाचा तदभिलाषः किं वक्तव्य इत्यर्थः । परस्त्रीव्यवायिनामस्थिबन्धोऽपि नास्ति, कृमिकीटादियोनिषु परिवर्त्तन्ते इत्यर्थः ॥१२२॥

परदारेषु गतिः गमनं यस्य स पंसां मध्ये उभयत्र इह परत्र च । तदेवाह—मृत इति । भीतिदः सुगमः ॥१२३॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेऽंशे एकादशोऽध्यायः

पाठान्तराणि—

(१—१) ब्राह्मे मुहूर्ते चोत्थाय मनसा मतिमान् नृप ।
प्रबुद्धश्चिन्तयेद्धर्ममर्थं चाप्यविरोधिनम् ॥
(१०—२) नाधिमेहेत् कदाचन ।
(१५—३) वल्मीकमूषिकोद्भूतां मृदं नान्तर्जलां तथा ।
(१६—४) अणुप्राण्युपपन्नां च— ।
(३०—५) गुरूणां मातुलानां च— ।
(३५—६) ते तृप्तिमखिलां यान्तु— ।
(३६—७) इदमाप्यायनायास्तु— ।
(४०—८) जलाभिषेकैः पुष्पैश्च धूपाद्यैश्च निवेद्य
(४२—९) तच्छेषं माणिके पृथ्वी-पर्जन्येभ्यः क्षिपेत्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वादशोऽध्यायः ।

[गृहस्थचाराकथनम्]

और्व उवाच ।

देवगोब्राह्मणान् सिद्ध–वृद्धाचार्यांस्तथार्चयेत् ।
द्विकालञ्च नमेत् सन्ध्यामग्नीनुपचरेत्तथा ॥१॥

सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः ।
गारुडानि च रत्नानि बिभृयात् प्रयतो नरः ॥२॥

प्रस्निग्धामलकेशश्च सुगन्धिश्चारुवेषधृक् ।
सिताः सुमनसो हृद्या बिभृयाच्च नरः सदा (क) ॥३॥

किञ्चित् परस्वं न हरेन्नाल्पमप्यप्रियं वदेत् ।
प्रियञ्च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् (ख) ॥४॥

नान्यश्रियं तथा वैरं रोचयेत् पुरुषर्षभ !
न दुष्टं यानमारोहेत् कूलच्छायां न संश्रयेत् ॥५॥

विद्विष्टपतितोन्मत्तबहुवैरातिकीटकैः ।
बन्धकी-बन्धकीभर्त्तृ-क्षुद्रानृतकथैः सह ॥६॥

तथातिव्ययशीलैश्च परिवादरतैः शठैः ।
बुधो मैत्रीं न कुर्वीत नैकः पन्थानमाश्रयेत् (ग)॥७॥

नावगाहेज्जलौघस्य वेगमग्ने नरेश्वर !
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः(घ) ॥८॥

द्वादशः अध्यायः

ब्राह्मं मुहूर्त्तमारभ्य निशीथान्तं निरूपिताः । सदाचारा द्वादशे तु त एवानियमेरिताः । प्रायेण तु गृहस्थानां त्रिवर्गपरचेतसाम् । दृष्टादृष्टप्रधानानां सद्धर्माणामिहोक्तयः ॥१॥

अनुपहते अभग्ने, प्रशस्ता विष्णुक्रान्ता दूर्वादयः ॥२॥

प्रस्निग्धाः अरूक्षाः, प्रसिद्धा इति पाठे अलङ्कृताः केशा यस्य ॥३॥

अन्यश्रियं वैरञ्च नाभिलषेत् । नद्यादीनां कूलच्छायाम् ॥५॥

विद्विष्टादिभिः सह मैत्रीं न कुर्वीत । बहभिर्वैरं यस्य । अतिकोटकैरत्यन्तं कीटवत् पीड़कैः । कीककैरिति पाठे कुदेशस्थैरित्यर्थः । बन्धकी वेश्या । क्षुद्रः अल्पलाभोत्सिक्तः । अनृतकथः मिथ्यावादी ॥६॥

शठः कुटिलः ॥७॥

जलौघस्य वेगमग्ने । अन्यस्मिन् अनवतीर्णे नावगाहेत् न प्रविशेत् । प्रदीप्तम् अग्निनाक्रान्तम् ॥८॥

(क) विभृयात् धारयेत् । सुमनसः पुष्पाणि ।

(ख) नाल्पमप्यप्रियं वदेदिति पूर्वोक्तनिषेधवाक्येन प्रियवाक्यमात्रस्य वक्तव्यतायां प्राप्तायामनृतस्य प्रियस्य कथनं निषिध्यते 'प्रियञ्चे'त्यादिना ।

(ग) नैकपन्थानमाश्रयेदिति पाठान्तरे पन्थिशब्दस्य समासमात्रे अदन्तयाया आनुशासनिकत्वेन अदन्ताभावेन प्रयोग आर्षः ।

(घ) अवगाहेदित्यत्र परस्मैपदमार्षम् । जलौघस्य जलप्रवाहस्य वेगः जवः मग्नः लुप्तः यत्र तथाभूते जलाशये इति शेषः । अत्र मग्नशब्दस्य कथञ्चिदाहिताद्यन्तर्गतत्वस्वीकारात् मग्नशब्दस्य विशेषणस्यापि परनिपातः समाधेयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न कुर्याद्दन्तसङ्घर्षं कुष्णीयाच्च न नासिकाम् ।
नासंवृतमुखो जृम्भेच्छ्वासकासौ च वर्जयेत् (ङ)॥९॥

नोच्चैर्हसेत् सशब्दञ्च न मुञ्चेत् पवनं बुधः ।
नखान्न वादयेच्छिन्द्यान्न तृणं न महीं लिखेत् ।१०

न श्मश्रु भक्षयेल्लोष्टं न मृद्नीयाद् विचक्षणः ।
ज्यौतींष्यमेध्यशस्तानि नाभिवीक्षेत च प्रभो ॥११॥

नग्नां परस्त्रियञ्चैव सूर्यं चास्तमयोदये ।
न हुङ्कुर्याच्छवञ्चैव शवगन्धो हि सोमजः ॥१२॥

चतुष्पथांश्चैत्यतरून् श्मशानोपवनानि च ।
दुष्टस्त्रीसन्निकर्षञ्च वर्जयेन्निशि सर्वदा ॥१३॥

पूज्यदेवध्वजज्योतिश्छायां नातिक्रमेद् बुधः ।
नैकः शून्याटवीं गच्छेन्न च शून्यगृहे वसेत् (च)॥१४॥

केशास्थिकण्टकामेध्यवह्निभस्मतुषांस्तथा ।
स्नानार्द्रधरणीञ्चैव दूरतः परिवर्जयेत् ॥१५॥

नानार्यानाश्रयेत् कांश्चिन्न जिह्मं रोचयेद् बुधः ।
उपसर्पेत न व्यालं चिरं तिष्ठेन्न चोत्थितः ॥१६॥

अतीव जागरस्वप्ने तद्वत्स्नानासने बुधः ।
न सेवेत तथा शय्यां व्यायामञ्च नरेश्वर ॥१७॥

दंष्ट्रिणं शृङ्गिणश्चैव प्राज्ञो दूरेण वर्जयेत् ।
अवश्यायञ्च राजेन्द्र ! पुरोवातातपौ तथा ॥१८॥

न कुष्णीयान्नोत्किरेत्, असंवृतमुखो जृम्भादि न कुर्यात् ॥९॥

न मृद्नीयान्न मर्दयेत्, अमेध्योऽशुचिः सन् ज्योतींषि सुर्यादीनि शस्तानि ब्राह्मणादीनि नाभिवीक्षेत । ज्योतींष्यमेध्याशस्तानीति पाठे ज्योतींषि चक्षुःप्रतिकूलानि, अमेध्यानि पुरीषादीनि, अशस्तानि अमंगलानि ॥११॥

शवं चकारात् तद्गन्धञ्च न हुंकुर्यात् न जुगुप्सेत । हेतुः शवगन्धो हीति । विश्वस्याग्नीषोमात्मकत्वेनाग्नेयांश उष्मणि प्राणेन सह गतेऽवशिष्टस्य देहस्य शवस्य गन्धः सोमज इति, "अग्निरुष्मा रसः सोमः शरीरं तन्मयं वपुः" इति वचनात् ॥१२॥

पूज्या गुरुप्रभृतयः ॥१४॥

जिह्मान् कुटिलान् न रोचयेत् नेच्छेत् । व्यालान् दुष्टमृगान् सर्पान् वा नोपसर्पेत तत्सम्मुखं न गच्छेत् ॥१६॥

अतीव जागरादीन् न च सेवेत नाभ्यस्येत् । स्नानासनं गतिनिवृत्तिम्, आसनमुपवेशनं, शय्याम् इति शयनस्यापि ययोरुपलक्षणम् । व्यायामं श्रमम् ॥१६॥

अवश्यायं हिमम् ॥१८॥

(ङ) कुष्णीयादिति—'कुष निष्कर्षे' इति क्र्यादिगणपठितस्य कुष्धातोः विधिलिङि रूपम् । धातूनामनेकार्थत्वात् कुष्णीयादित्यस्य कुञ्चितां कुर्य्यादित्यर्थः । अत एव स्वामी—न कुष्णीयादित्यस्य नोत्किरेदित्यर्थमाह । कृविक्षेपे इत्यनेन गणपठितस्य कृधातोरुत्पूर्वस्य ऊर्द्धविक्षेपार्थत्वात् नासिकायाः कुञ्चने नासिकाया ऊर्द्धविक्षेपस्यैव स्वाभाविकत्वात् । अत्र केचित् कुञ्चीयादिति पठन्ति, तेषां न समीचीनः पक्षः, 'कुन्चक्कुन्च् कौटिल्यागीभावयोरिति गणपठिते सत्यपि कुन्चधातौ तस्य विधिलिङि कुञ्चीयादिति पदस्यानिष्पत्तेः । तत्पाठस्वीकारे गत्यन्तराभावेनार्षत्वमेव स्वीकार्य्यम् ।

(च) नातिक्रामेदिति संस्कारेण वक्तव्ये नातिक्रमेदिति संस्कृतवचनमार्षत्वात् साध्यम् ।

(छ) उपसर्पेतेत्यात्मनेपदमार्षम् ।

(ज) जागर-स्वप्ने इत्यत्र क्लीवलिङ्गमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न स्नायान्न स्वपेन्नग्नो न चैवोपस्पृशेद् बुधः ।
मुक्तकच्छश्च नाचामेद् देवाभ्यर्चाञ्च वर्जयेत् (झ) ॥१९

होमदेवार्चनाद्यासु क्रियास्वाचमने तथा ।
नैकवस्त्रः प्रवर्तेत द्विजवाचनिके जपे ॥२०॥

नासमञ्जसशीलैस्तु सहासीत कदाचन ।
सद्वृत्तसन्निकर्षो हि क्षणार्द्धमपि शस्यते (ञ) ॥२१

विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः ।
विवाहश्च विवादश्च तुल्यशीलैर्नृपेष्यते ॥२२॥

नारभेत कलिं प्राज्ञः शुष्कवैरञ्च वर्जयेत् ।
अल्पहानिः सोढ़व्या वैरेणार्थागमं त्यजेत् ॥२३॥

स्नातो नाङ्गानि निर्म्मार्जेत् स्नानशाट्या न पाणिना ।
न च निर्धूनयेत् केशान् नाचामेन्नैव चोत्थितः(ट)॥२४

पादेन नाक्रमेत् पादं न पूज्याभिमुखं नयेत् ।
वीरासनं गुरोरग्रे त्यजेत विनयान्वितः (ठ) ॥२५॥

अपसव्यं न गच्छेच्च देवागारचतुष्पथान् ।
मङ्गल्यपूज्यांश्च तथा विपरीतान्न दक्षिणान् ॥२६॥

सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न सम्मुखम् ।
कुर्यात् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः ॥२७॥

तिष्ठन्न मूत्रयेत् तद्वत् पन्थानं नावमूत्रयेत् ।
श्लेष्मविण्मूत्ररक्तानि सर्वदैव न लङ्घयेत् ॥२८॥

श्लेष्मसिंहानकोत्सर्गो नान्नकाले प्रशस्यते ।
बलिमङ्गलजप्यादौ न होमे न महाजने ॥२९॥

योषितो नावमन्येत न चासां विश्वसेद् बुधः ।
न चैवेर्षुर्भवेत्ताश्च नाधिकुर्यात् कदाचन (ड) ॥३०॥

माङ्गल्यपुष्परत्नाज्यपूज्याननभिवाद्य च ।
न निष्कामेद् गृहात् प्राज्ञ सदाचारपरो नरः ॥३१॥

चतुष्पथान् नमस्कुर्यात् काले होमपरो भवेत् ।
दीनानभ्युद्धरेत् साधूनुपासीत बहुश्रुतान् (ढ)॥३२॥

उपस्पृशेत् आचामेत् । मुक्तकच्छः मुक्तपश्चादञ्चलः ॥१९
द्विजवाचनिके पुण्याहवाचने ॥२०॥
इष्यते यथाकथञ्चिदनुमन्यते, न विधीयते ॥२२॥
तदेवाह—'ने'ति । न कलिं कलहम् ॥२३॥
पूज्यानामभिमुखं पादं न नयेत् प्रसारयेत् ॥२५॥

अपसव्यम् प्रदक्षिणम् । विपरीतान् अमङ्गल्यान् प्रदक्षिणं न कुर्यात् ॥२६॥

सिंहानकं कठिनः श्लेष्मा, द्युतमिति केचित् । महाजने महाजनसमीपे ॥२९॥

ईर्षुरसहिष्णुः, ताश्च योषितो नाधिकुर्यात् कुत्राप्यधिकारिणीर्न कुर्यात् ॥ तास्विति पाठे अन्तःपुराधिकारं न कुर्य्यादित्यर्थः ॥३०॥

साधूनेव बहुश्रुतान् उपासीत नेतरान् । काले समयोचितम् ॥३२॥

(झ) स्वपेरदादिकस्य स्वप्यादिति विधिलिङि वक्तव्ये स्वपेदिति वचनमार्षम् ।

(ञ) असमञ्जसशीलैः असद्वृत्तैः ।

(ट) निर्मार्जेदित्यार्षम् । स्नानशाट्या स्नानार्थं परिहितेन वस्त्रेण स्नानवस्त्रेणेति यावत् । उत्थितः दण्डायमानः स्थितः सन्नित्यर्थः ।

(ठ) आक्रमेदित्यत्र क्रमेरुपधाया दीर्घाभाव आर्षः । त्यजेतेत्यत्र आत्मनेपदमार्षम् ।

(ड) विश्वसेदित्यार्षम् । तासु योषित्सु ।

(ढ) बहुश्रुतान् भूरिशास्त्रज्ञानसम्पन्नान् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवर्षिपूजकः सम्यक् पितृपिण्डोदकप्रदः ।
सत्कर्ता चातिथीनां यः स लोकानुत्तमान् व्रजेत् ॥३३॥

हितं मितं प्रियं काले वश्यात्मा योऽभिभाषते ।
स याति लोकानाह्लादहेतुभूतान् नृपाक्षयान् ॥३४॥

धीमान् ह्रीमान् क्षमायुक्त आस्तिको विनयान्वितः ।
विद्याभिजनवृद्धानां याति लोकाननुत्तमान् ॥३५॥

अकालगर्जितादौ च पर्वस्वाशौचकादिषु ।
अनध्यायं बुधः कुर्यादुपरागादिके तथा(ण) ॥३६॥

शमं नयति यः क्रुद्धान् सर्वबन्धुरमत्सरी ।
भीताश्वासनकृत् साधुः स्वर्गस्तस्याल्पकं फलम् ॥३७॥

वर्षातपादिके च्छत्री दण्डी राज्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥३८॥

नोद्धृं न तिर्यग् दूरं वा निरीक्षन् पर्यटेद् बुधः ।
युगमात्रं महीपृष्ठं नरो गच्छेद् विलोकयन्(त) ॥३९॥

दोषहेतूनशेषांस्तु वश्यात्मा यो निरस्यति ।
तस्य धर्मार्थकामानां हानिर्नाल्पापि जायते ॥४०॥

(सदाचाररतः प्राज्ञो विद्याविनयशिक्षितः ।)
पापेऽप्यपापः परुषेऽप्यभिधत्ते प्रियाणि यः ।
मैत्रीद्रवान्तःकरणस्तस्य मुक्तिः करे स्थिता ॥४१॥

ये कामक्रोधलोभानां वीतरागा न गोचरे ।
सदाचारस्थितास्तेषामनुभावैर्धृता मही ॥४२॥

तस्मात्सत्यं वदेत् प्राज्ञो यत् परप्रीतिकारणम् ।
सत्यं यत् परदुःखाय तत्र मौनपरो भवेत् ॥४३॥

प्रियं युक्तं हितं नैतदिति मत्वा न तद्वदेत् ।
श्रेयस्तत्र हितं वाक्यं यद्यप्यत्यन्तमप्रियम् ॥४४॥

विद्यादिवृद्धानां विनयः तत्कर्तृकशिक्षा तदन्वित इत्यर्थः ॥३५॥

युगमात्रं हस्तचतुष्टयम् ॥३९॥

दोषहेतून् उक्तान् अनुक्तांश्च ॥४०॥

पापेऽपराधिनि अपापः, अद्रोग्धा परुषभाषिणि प्रियभाषी ॥४१॥

ये कामादीनां न गोचरे नास्पदं भवन्तीत्यर्थः । अतु भावैः सत्यादिस्वभावैर्धृता "सत्येनोत्तम्भिता भूमिः" इति श्रुतेः ॥४२॥

(ण) 'माघादिचतुरो मासान् गर्जमात्रे विवर्जये'दित्यनेनैक-वाक्यतया प्रकृते अकालपदेन माघादयश्चत्वारो मासा ग्राह्याः । उपरागादिके सूर्यचन्द्रग्रहणादौ ।

(त) निरीक्षन्नित्यत्र शतृप्रत्यय आर्षः । युगमात्रं हस्त चतुष्टयमितं महीपृष्ठं पृथिवीतलं विलोकयन्निति सम्बन्धः ।

(थ) मैत्र्या मित्रतया बन्धुभावेनेति यावत्, द्रव्यं द्रवीभूत अन्तःकरणं यस्य सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राणिनामुपकाराय यथैवेह परत्र च ।
कर्मणा मनसा वाचा तदेव मतिमान् भजेत् ॥४५॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे द्वादशोऽध्यायः ॥११

उपदेशसारमाह—'प्राणिना'मिति ॥४५॥

इति श्रीविष्णुपुराणटीकायां श्रीधरस्वामीकृतायां स्वप्रकशाख्यायामात्मप्रकाशाख्यायां वा तृतीयेऽंशे द्वादशोऽध्यायः समाप्तः ॥

त्रयोदशोऽध्यायः

[शवदाहस्य, अशौचस्य, एकोद्दिष्टस्य, सपिण्डीकरणस्य च व्यवस्था ।]

और्व उवाच

सचेलस्य पितुः स्नानं जाते पुत्रे विधीयते ।
जातकर्म तदा कुर्याच्छ्राद्धमभ्युदये च यत् (क) ॥१॥

युग्मान् दैवांश्च पित्र्यांश्च सम्यक् सव्यक्रमाद् द्विजान् ।
पूजयेद् भोजयेच्चैव तन्मना नान्यमानसः ॥२॥

दध्यक्षतैः सबदरैः प्राङ्मुखोदङ्मुखोऽपि वा ।
दैवतीर्थेन वै पिण्डान् दद्यात् कायेन वा नृप ॥३॥

नान्दीमुखः पितृगणस्तेन श्राद्धेन पार्थिव !
प्रीयते तत्तु कर्त्तव्यं पुरुषैः सर्ववृद्धिषु ॥४॥

कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः ।
नामकर्मणि बालानां चूडाकर्मादिके तथा (ख) ॥५॥

सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥६॥

पितृपूजाविधिः प्रोक्तो वृद्धावेष समासतः ।
श्रूयतामवनीपाल ! प्रेतकर्मक्रियाविधिः ॥७॥

त्रयोदशोऽध्यायः

त्रयोदशेऽथ श्राद्धानि सनिमित्तान्यवर्णयत्। प्रेतकिया-स्तथा तासु यथार्हमधिकारिणः। पितुः पुत्रजन्मकाले सन्नि-हितस्य ॥१॥

सव्यक्रमात् प्रदक्षिणक्रमेण। नान्यमानसः अन्यस्मिन् उत्पन्नपुत्रादौ मानसं यस्य सः श्राद्धसमये तादृशो भवेदि-त्यर्थः ॥२॥

कायेन प्रजापतितीर्थेन ॥३॥

सर्ववृद्धीर्दर्शयति—'कन्यापुत्रे'ति ॥५॥

पुत्रस्यादिमुखदर्शने प्रथमतो दर्शने। तच्च जन्मकाले सन्निहितस्यैव पितुस्तथैवोक्तत्वात् ॥६॥

(क) सचेलस्य सवसनस्य सुत जन्मकाले यद् वस्त्रं परिहितं स्यात्, परिहिततद्वस्त्रस्यैवेत्यर्थः 'वस्त्रमाच्छादनं वासश्चेलं वसन-मंशुक' मिति कोषात्।

(ख) नववेश्मनः नवगृहस्य प्रवेशे प्रथमप्रवेशे इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रेतदेहं शुभैः स्नानैः स्नापितं स्रग्विभूषितम् !
दग्ध्वा ग्रामाद् बहिः स्नातवा सचेलाः सलिलाशये ॥८
यत्र यत्र स्थितायैतदमुकायेतिवादिनः ।
दक्षिणाभिमुखा दद्युर्बान्धवाः सलिलाञ्जलिम् ॥९॥
प्रविष्टाश्च समं गोभिर्ग्रामं नक्षत्रदर्शने ।
कटधर्मांस्ततः कुर्युर्भूमौ प्रस्तरशायिनः ॥१०॥
दातव्योऽनुदिनं पिण्डः प्रेताय भुवि पार्थिव ।
दिवा च भक्तं भोक्तव्यममांसं मनुजर्षभ ॥११॥
दिनादि तावदिच्छातः कर्त्तव्यं विप्रभोजनम् !
प्रेतस्तृप्तिं तथा याति बन्धुवर्गेण भुञ्जता (घ)॥१२॥
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ।
वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात् तिलोदकम् ॥१३॥
ततोऽनु बन्धुवर्गस्तु भुविदद्यात् तिलोदकम् ।
चतुर्थेऽह्नि च कर्त्तव्यं भस्मास्थिचयनं नृप ।
तदूर्द्ध्वमङ्गसंस्पर्शश्च सपिण्डानामपीष्यते ॥१४॥
योग्याः सर्वक्रियाणान्तु समानसलिलास्तथा ।
अनुलेपनपुष्पादिभोगादन्यत्र पार्थिव ॥१५॥
शय्यासनोपभोगश्च सपिण्डानामपीष्यते ।
भस्मास्थिचयनादूर्द्ध्वं संयोगो न तु योषिता ॥१६
बाले देशान्तरस्थे च पतिते च मुनौ मृते ।
सद्यःशौचं तथेच्छाते जलाग्न्युद्बन्धनादिषु (ङ)॥१७
मृतबन्धोर्दशाहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्तते ॥१८॥
विप्रस्यैतद् द्वादशाहं राजन्यस्याप्यशौचकम् ।
अर्द्धमासश्च वैश्यस्य मासं शूद्रस्यं शुद्धये (च)॥१९॥

स्नानैः स्नानसाधनैः, सचेलाः पूर्वधृतवस्त्रसहिता एव स्नाताः ॥८॥

अमुकायेति नामगोत्रोपलक्षणम् ॥९॥

गोभिः समं गवां प्रवेशसमये । एतच्च दिवादाहविषयम् । कटधर्मान् प्रेतकृत्यानि स्रस्तरः तृणशय्या ॥१०॥

अनुदिनं यावदशौचं, भक्तम् ओदनम्, अतः पिष्टादिवर्जनमायाति । अमांसमित्युक्तेर्मांसव्यतिरिक्तानुज्ञा ॥११॥

विप्रभोजनम् । एतच्च सपिण्डसमानोदकविषयम् सपिण्डादिभेदश्च कूर्मोक्तः—"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते । समानोदकभावस्तु जन्म-नाम्नोरवेदने" । इति ॥१२॥

सर्वक्रियाणामुपासनं पञ्चयज्ञादीनाम् ॥१५

बाले अजातदन्ते देशान्तरस्थ इति संवत्सरादूर्द्ध्वं सद्यः-शौचं, संवत्सराभ्यन्तरे तु अशौचान्ते श्रुते त्रिरात्रम् । देशान्तरन्तु "महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः । वाचो यत्र विभिद्यन्ते तद्देशान्तरमिष्यते ।" इति । एतच्च मातापितृव्यतिरिक्तविषयम् । तदुक्तम्—"पितरौ चेन्मृतौ स्यातां दूरतस्तद्दिनमारभ्य दशाहं सूतकी भवेत्" इति । मुनौ यतौ । इच्छात इति विशेषणादनिच्छया मृते यथोक्तमशौचादि कार्यम् । "यदि कश्चित् प्रमादेन म्रियेताप्युदकादिना । तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया ॥" इति स्मृतेः ॥१७॥

मृतो बन्धुः सपिण्डो यस्य तत्कुलस्यान्नं दशाहं न भोक्तव्यम् । तत्कुलस्य तदन्नभोक्तुश्च यावदशौचं दानादि निवर्तते ॥१८॥

एतत् पूर्वोक्तदशाहः ॥१९॥

(ग) अमांसमित्यत्र मांसपदमामिषमात्रपरम् । तेन तदा आमिषान्तर भोजनमपि निषिद्धम् ।

(घ) विप्रभोजनमित्यत्र 'एतच्च सपिण्डसमानोदकविषय' मित्याह स्वामी—अन्येषामशौचान्नभोजनासम्भवादेव स्वामिना तथा वस्तुवर्णनं कृतमिति बोध्यम् । भुञ्जतेति शतृप्रयोग आर्षः ।

(ङ) जलाग्न्युद्बन्धनादिषु जलमज्जनेन अग्निदाहेन बन्धनादिना वा मरणे इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अयुजो भोजयेत् कामं द्विजानाद्ये ततो दिने ।
दद्याद् दर्भेषु पिण्डञ्च प्रेतायोच्छिष्टसन्निधौ ॥२०॥

वार्यायुधप्रतोदास्तु दण्डश्च द्विजभोजनात् ।
स्प्रष्ट्व्योऽनन्तरं वर्णैः शुध्येरंस्ते ततः क्रमात्(छ) ॥२१

ततः स्ववर्णधर्मा ये विप्रादीनामुदाहृताः ।
तान् कुर्वीत पुमान् जीवेन्निजधर्मार्जनैस्तथा ॥२२॥

मृताहनि च कर्तव्यमेकोद्दिष्टमतः परम् !
आह्वानादिक्रियादैव-नियोगरहितं हि तत्(ज) ॥२३॥

एकोऽर्घस्तत्र दातव्यस्तथैवैकपवित्रकम् ।
प्रेताय पिण्डो दातव्यो भुक्तवत्सु द्विजातिषु ॥२४॥

प्रश्नश्च तत्राभिरतिर्यजमानैर्द्विजन्मनाम् ।
अक्षय्यममुकस्येति वक्तव्यं विरतौ तथा ॥२५॥

एकोद्दिष्टमयो धर्म इत्थमा वत्सरात् स्मृतः ।
सपिण्डीकरणं तस्मिन् काले राजेन्द्र ! तच्छृणु(झ)२६

एकोद्दिष्टविधानेन कार्यं तदपि पार्थिव !
(संवत्सरेऽथ षष्ठे वा मासे वा द्वादशेऽह्नि तत्)
तिलगन्धोदकैर्युक्तं तत्र पात्रचतुष्टयम् ॥२७॥

पात्रं प्रेतस्य तत्रैकं पैत्रं पात्रत्रयं तथा ।
सेचयेत् पितृपात्रेषु प्रेतपात्रं ततस्त्रिषु ॥२८॥

आद्यमेकोद्दिष्टश्राद्धमाह—'अयुज' इति, एकं त्रीणीत्येवं विषमसंख्यान्। आद्ये अशौचानन्तरं प्रथमेऽहनि। 'अन्त' इति पाठे अशौचान्त इत्यर्थः, "आद्यमेकादशेऽहनि" इति स्मृतेः ॥२०॥

द्विजभोजनादनन्तरं वर्णैर्विप्रादिभिर्वार्य्याद्याः क्रमात् स्प्रष्ट्व्याः, ततस्ते शुध्येरन् इत्यन्वयः। ब्राह्मणादिभिश्चतुर्भिर्वर्णैश्चत्वारि क्रमात् स्प्रष्ट्व्यानीत्यर्थः ॥२१॥

शुद्ध्यनन्तरमेव निजधर्मार्जनैर्जीवेत् जीविकार्थं निजधर्मेणोपार्ज्जनं कुर्यादित्यर्थः ॥२२॥

अतः प्रथममासात् परं प्रतिमासं मृततिथौ यावदब्दम् आह्वानमावाहनम् आदिशब्देनाग्नौ करणादिक्रिया दैवनियोगो वैश्वदेवविप्रामन्त्रणञ्च तद्रहितम् ॥२३॥

भुक्तवत्सु बहुषु अयुजो भोजयेदित्युक्तत्वात् प्रेतायैक एव पिण्डो देयः ॥२४॥

प्रश्नश्चाभिरतिरिति अभिरम्यतामिति यजमानोक्तैर्द्विजैः 'अभिरताः स्म' इति वक्तव्यमित्यर्थः। अक्षय्यममुकस्येति एकोद्दिष्टविशेषविषयमेतत्। उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जनेऽभिरम्यतामिति वदेत्। भूयस्ते अभिरताः स्म इति स्मृतेः ॥२५॥

तस्मिन् काले पूर्णे संवत्सरे, तत् सपिण्डीकरणम् ॥२६॥

पात्रचतुष्टयस्य विनियोगमाह—'पात्रं प्रेतस्ये'ति ॥२८॥

श्राद्धधर्मैः स्वधाकारादिभिस्तत् पूर्वान् सपिण्डीकृतः पूर्वो येषां तांस्त्रीन् पूजयेत्। चतुर्थस्तु निवर्त्तते तस्मात् तृतीयात् पुरुषाणां नाम गृह्णन्तीति श्रुतेः ॥२९॥

मुख्यानुकल्पाभावेन क्रियाकर्त्तॄन् आह—'पुत्र' इति साद्धैस्त्रिभिः ॥३०॥

(च) अर्द्धमासः पञ्चदश दिनानि। मासः त्रिंशद्दिनानि।

(छ) क्रमादिति—ब्राह्मणाः वारिस्पर्शनेन, क्षत्रिया आयुधस्पर्शनेन, वैश्याः प्रतोदस्पर्शनेन, शूद्राश्च दण्डस्पर्शनेन शुध्येरन्नित्यर्थः।

(ज) मृताहनीत्यार्षम्। मृताहनीत्यत्र अहःपदं तिथिपरम्, तेन मृततिथौ मृततिथिसजातीयतिथावित्यर्थः। सजातीयञ्च प्रतिपत्त्व-द्वितीयात्वादिना। तत् एकोद्दिष्टश्राद्धम्।

(झ) आ वत्सरात् मरणतिथेः प्रारभ्य वत्सरकालपूर्त्तिपर्य्यन्तम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः पितृत्वमापन्ने तस्मिन् प्रेते महीपते !
श्राद्धधर्मैरशेषैस्तु तत् पूर्वानर्चयेत् पितॄन् ॥२९॥
पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसन्ततिः ।
सपिण्डसन्ततिर्वापि क्रियार्हो नृप ! जायते ॥३०
तेषामभावे सर्वेषां समानोदकसन्ततिः ।
मातृपक्षसपिण्डेन सम्बद्धा ये जलेन वा ॥३१॥
कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्याः क्रिया नृप !
सङ्घातान्तर्गतैर्वापि कार्याः प्रेतस्य च क्रियाः ।
उत्सन्नबन्धुरिक्थानां कारयेदवनीपतिः ॥३२
पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ।
त्रिप्रकाराः क्रियाः सर्वास्तासां भेदं शृणुष्व मे ॥३३॥
आदाह–वार्यायुधादिस्पर्शाद्यन्तास्तु याः क्रियाः
ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः ॥३४

प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु ।
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता
नृपोत्तराः ॥३५॥
पितृमातृसपिण्डैस्तु समानसलिलैस्तथा ।
तत् सङ्घान्तर्गतैर्वापि राज्ञा तद्धनहारिणा ॥३६॥
पूर्वाः क्रियाश्च कर्तव्याः पुत्राद्यैरेव चोत्तराः ।
दौहित्रैर्वा नृपश्रेष्ठ ! कार्यास्तत्तनयैस्तथा ॥३७॥
मृताहनि च कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः ।
प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः ॥३८॥
तस्मादुत्तरसंज्ञा याः क्रियास्ताः शृणु पार्थिव !
यदा यदा च कर्तव्या विधिना येन वानघ ॥३९॥

इति श्रीविष्णुपुराणे तृतीयेऽंशे त्रयोदशोऽध्यायः ॥१३

पूर्वोक्तानामेव स्त्रीभिः मुख्यानुकल्पाभावेन क्रिया कार्या इत्यर्थः। संघातः सार्थः पात्रिकसमुदायः। तत्र मृतस्य तदन्तर्गतैः प्रेतक्रिया कार्येत्यर्थः। समानप्रवरसमानशास्त्रादिरूपः संघात इति केचित् ॥३२॥

उत्सन्ना वन्धव ऋक्थानि च येषां तेषाम्। उत्सन्नबन्धुरिक्थादिति पाठे उत्सन्नबन्धोः प्रेतस्य रिक्थादित्यर्थः। कर्तृव्यवस्थां वक्तुं क्रियात्रैविध्यमाह—'पूर्वा' इति त्रिभिः ॥३३

आ दाहाद् दाहपूर्वावधिकाश्च ता वार्यायुधादिस्पर्शादिरन्तो यासां ताश्च तथा। यद्वा आ समन्ताद् दह्यन्तेऽस्मिन्नित्यादाहं श्मशानं तेन प्रेतदाहो लक्ष्यते। आदाहश्च वार्य्यायुधादिस्पर्शश्च आद्यन्तौ यासां ताः। दाहाद्यशौचान्तभवाः पूर्वाः क्रिया इत्यर्थः ॥३४॥

तत्र पूर्वाः क्रियाः पित्रादिभिरपि यथार्हं कर्त्तव्याः ॥३५

पुत्राद्यैरेवोत्तराः मध्यमास्तूभयैर्यथासम्भवं कर्त्तव्या इति गम्यते ॥३७॥

मृताहनि चेति चकारादष्टकादिषु पार्वणविधिना चेत्यर्थः ॥३८॥

तस्मादूत्तरक्रियाबाहुल्यादुत्तरक्रिया याः ताः तत्कालविधीन् शृण्वित्यर्थः ॥३९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेऽंशे त्रयोदशोऽध्यायः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्दशोऽध्यायः ।

[श्राद्धफलश्रुति–विशेषश्राद्धफल-पितृगीतावर्णनम्]

और्व उवाच

ब्रह्मेन्द्र-रुद्र-नासत्य-सूर्याग्नि-वसु-मारुतान् ।
विश्वेदेवान् पितृगणान् वयांसि मनुजान् पशून्(क)॥१

सरीसृपानृषिगणान् यच्चान्नद्भूतसंज्ञितम् ।
श्राद्धं श्रद्धान्वितः कुर्वन् प्रीणयत्यखिलं जगत् ॥२॥

मासि मास्यसिते पक्षे पञ्चदश्यां नरेश्वर !
तथाष्टकासु कुर्वीत काम्यान् कालाञ्छृणुष्व मे ॥३॥

श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजम् ।
श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा ॥४॥

विषुवे चापि सम्प्राप्ते ग्रहणे शशि-सूर्ययोः ।
समस्तेष्वेव भूपाल ! राशिष्वर्के च गच्छति ॥५॥

नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने ।
इच्छाश्राद्धानि कुर्वीत नवशस्यागमे तथा ॥६॥

अमावास्या यदा मैत्रविशाखास्वातियोगिनी ।
श्राद्धैः पितृगणस्तृप्तिं तथाप्नोत्यष्टवार्षिकीम्(ख) ॥७॥

अमावास्या यदा पुष्ये रौद्रे चर्क्षे पुनर्वसौ ।
द्वादशाब्दं तदा तृप्तिं प्रयान्ति पितरोऽर्चिताः(ग) ॥८॥

वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छताम् ।
वारुणे चाप्यमावास्या देवानामपि दुर्लभा ॥९॥

चतुर्दशः अध्यायः

श्राद्धं तत्फलकालांश्च नित्यकाम्यादिभेदतः । चतुर्दशे तु कल्पांश्च तत्फलान्यन्ववर्णयत् । तत्र तावदुत्तरक्रियाणां कालान् वर्णयिष्यन् श्राद्धप्रशंसामाह—'ब्रह्मे'ति ॥१॥

प्रतिमासं कृष्णपक्षे पञ्चदश्यां दर्शश्राद्धं कुर्वीतेत्यर्थः । अष्टका आग्रहायण्यादूर्ध्वं तिस्रः कृष्णाष्टम्यस्तासु ॥३॥

श्राद्धार्हं द्रव्यं विशिष्टञ्च द्विजमागतं विज्ञायेत्यन्वयः ॥४॥

समस्तेषु राशिषु अर्के गच्छति सति इति सर्वसंक्रान्तीनां श्राद्धकालत्वस्योक्तत्वात् अयने विषुवे चेति पृथगुक्तिः फलातिरेकार्था ॥५॥

इच्छाश्राद्धानि काम्यानि । नवशस्यागम इति—एतच्च व्रीहियवव्यतिरिक्तविषयम्, तयोर्नित्यश्राद्धनिमित्तत्वात् ॥६॥

मैत्रमनुराधा ॥७॥

रौद्रमार्द्रा ॥८॥

वासवं ज्येष्ठा, अजैकपात् पूर्वभाद्रपदा, वारुणं शतभिषा, एतेषु नक्षत्रेष्वमावास्या पितॄणां देवतानाञ्च तृप्तिं कर्तुमिच्छतां पुंसां दुर्लभा । इच्छतेति पाठे स एवार्थः ॥९॥

(क) नासत्यौ अश्विनीकुमारौ, 'नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभा'विति कोषात् । वयांसि पक्षिणः, 'खगबाल्यादिनोर्वय' इति कोषात् ।

(ख) अष्टवार्षिकीम् अष्टवर्षव्यापिनीम् ।

(ग) द्वादशानामब्दानां समाहार इत्यर्थे समाहारद्विगुसमाससिद्ध-द्वादशाब्दशब्दात् 'कालाध्वनोरत्यन्तसंयोग' इति द्वितीया । शताब्दीप्रभृति शब्दवदत्रापि ईप्प्रत्यये प्राप्ते तदभावेन प्रयोग आर्षत्वात् सोढव्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नवस्वृक्षेष्वमावास्या यदैतेष्ववनीपते !
तदा तृप्तिप्रदं श्राद्धं पितॄणां शृणु चापरम् ॥१०
गीतं सनत्कुमारेण यथैलाय महात्मने ।
पृच्छते पितृभक्ताय प्रश्रयावनताय च ॥११॥

सनत्कुमार उवाच—

वैशाखमासस्य च या तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे
त्रयोदशी पञ्चदशी च माघे(घ) ॥१२॥
एता युगाद्याः कथिताः पुराणै-
रनन्तपुण्यास्तिथयश्चतस्रः ।
उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च ॥१३॥
पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति ॥१४॥
माघासिते पञ्चदशी कदाचि-
दुपैति योगं यदि वारुणंन ।
ऋक्षेण कालः स परः पितॄणां
न ह्यल्पपुण्यैर्नृप ! लभ्यतेऽसौ ॥१५॥
काले धनिष्ठा यदि नाम तस्मिन्
भवन्ति भूपाल ! तदा पितृभ्यः ।
दत्तं जलान्नं प्रददाति तृप्तिं
वर्षायुतं तत् कुलजैर्मनुष्यैः(ङ) ॥१६॥
तत्रैव चेद् भाद्रपदास्तु पूर्वाः
काले यथावत्क्रियते पितृभ्यः ।
श्राद्धं परां तृप्तिमुपेत्य तेन
युगं समग्रं पितरः स्वपन्ति(च) ॥१७॥
गङ्गां शतद्रूं यमुनां विपाशां
सरस्वतीं नैमिषगोमतीं वा ।
तत्रावगाह्यार्चनमादरेण
कृत्वा पितॄणां दुरितानि हन्ति(छ) ॥१८॥

नन्वमावास्याश्राद्धत्वान्नित्यतैव, तत् कथमेतेषु फलश्रुतिरित्यत आह—'नवस्वि'ति। 'गोदोहेनापः प्रणयेत् पशुकामस्ये'तिवत् नक्षत्रगुणयोगाद् गुणफलविधिरित्यर्थः। नित्यात् पृथगेतानि श्राद्धानीति वा ॥१०॥

ऐलाय पुरूरवसे ॥११॥

'पञ्चदशी च माघ' इत्यत्र कृष्णपक्ष इत्यनुषङ्गः ॥१२॥

एता युगाद्याः ॥१३॥

पूर्वोक्तैरेव वारुणादिनक्षत्रैर्युक्ता माघामावास्या अतिश्रेष्ठेत्याह—'माघासिते' इति त्रिभिः। पूर्वन्तु एतैर्नक्षत्रैर्युता सामान्या अमावास्येति विशेषः ॥१५॥

पितॄणामर्चनं कृत्वा आत्मनो दुरितं निहन्ति नाशयति ॥१८॥

(घ) नभस्यमासस्य भाद्रमासस्य। तमिस्रपक्षे अन्धकारपक्षे कृष्णपक्ष इति यावत्।

(ङ) जलान्नमिति जलञ्च अन्नञ्च इति समाहारद्वन्द्वः। अथवा जलेन सहितम् अन्नं जलान्नमिति मध्यपदलोपी तृतीयातत्पुरुषः। वर्षाणामयुतम् अयुतं वर्षाणि व्याप्येत्यर्थः।

(च) समग्रं सम्पूर्णं युगम् एकयुगकालं यावत्।

(छ) गङ्गा-शतद्रूप्रभृतीनि प्रसिद्धनदीनामानि। तासां नदीनां यां काञ्चन अवगाह्य, तत्र उक्तानामन्यतमनद्याम्, आदरेण पितृणामर्चनं कृत्वेति सम्बन्धः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गायन्ति चैतत् पितरः कदा नु
वर्षामघातृप्तिमवाप्य भूयः ।
माघासितान्ते शुभतीर्थतोयै-
र्यास्यामि तृप्तिं तनयादिदत्तैः ॥१९॥

वित्तञ्च वित्तञ्च नृणां विशुद्धं
शस्तञ्च कालः कथितो विधिश्च ।
पात्रं यथोक्तं परमा च भक्ति-
र्नृणां प्रयच्छन्त्यभिवाञ्छितानि ॥२०॥

पितृगीतास्तथैवात्र श्लोकास्तांश्च शृणुष्व मे
श्रुत्वा तथैव भवता भाव्यं तत्राद्दतात्मना(ज) ॥२१

अपि धन्यः कुले जायादस्माकं मतिमान्नरः ।
अकुर्वन् वित्तशाठ्यं यः पिण्डान्नो निर्वपिष्यति(झ)२२

रत्नं वस्त्रं मही यानं सर्वभोगादिकं वसु ।
विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति(ञ)२३

अन्नेन वा यथाशक्त्या कालेऽस्मिन् भक्तिनम्रधीः ।
भोजयिष्यति विप्राग्र्यांस्तन्मात्रविभवो नरः(ट) ॥२४॥

असमर्थोऽन्नदानस्य धान्यामं स्वशक्तितः ।
प्रदास्यति द्विजाग्र्येभ्यः स्वल्पाल्पां वापि दक्षिणाम्॥२५

तत्राप्यसामर्थ्ययुतः कराग्राग्रस्थितांस्तिलान् ।
प्रणम्य द्विजमुख्याय कस्मैचिद् भूप ! दास्यति ॥२६॥

तिलैः सप्ताष्टभिर्वापि समवेतं जलाञ्जलिम् ।
भक्तिनम्रः समुद्दिश्य भुव्यस्माकं प्रदास्यति(ड) ॥२३॥

यतः कुतश्चित् सम्प्राप्य गोभ्यो वापि गवाह्निकम् ।
अभावे प्रीणयन्नस्माञ्छ्रद्धायुक्तः प्रदास्यति ॥२८॥

सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः ।
सूर्यादिलोकपालानामिदमुच्चैर्वदिष्यति ॥२९॥

वर्षामघातृप्तिमिति अपरपक्षमघात्रयोदशीश्राद्धे तृप्तिं प्राप्येत्यर्थः ॥१९॥

वित्तं विशुद्धं, शस्तं द्रव्यं, वित्तञ्च विशुद्धं वित्तशाठ्यहीनम् ॥२०॥

एतदेव पितृगीतैः स्पष्टयति 'पितृगीता' इति यावदध्याय-समाप्ति। अन्नचित्तवित्तादिपञ्चकप्राशस्त्ये पितृगीतान् श्लोकान् शृणु ॥२१॥

आमपक्वं धान्यमाममिति वा पाठः। तत्र पुरुषाहारमात्रम् ॥२५॥

गवाह्निकम् एकस्या गोरेकाहतृप्तिजनकं तृणादि ॥२८॥

(ज) शृणुष्वेत्यात्मनेपदमार्षम्। आद्दतात्मना श्रद्धावता सता। तथैव भाव्यम् निरूक्तसकलकार्य्यकारिणा भवितव्यम्।

(झ) जायादिति परस्मैपदमार्षम्। निर्वपिष्यतीत्यत्र दीर्घमप्यार्षम्।

(ञ) अस्मानुद्दिश्य अस्माकं पितॄणां प्रीतिं समुद्दिश्येत्यर्थः। तन्तु विप्रसम्प्रदानकं, न तु पितृसम्प्रदानकमिति ध्येयम्।

(ट) तन्मात्रविभवः तन्मात्रः विप्राग्रथगणभोजनोपयुक्तपरिमाणः विभवः वित्तं यस्य तथाभूतः।

(ठ) अन्नदानस्य अन्नदानाय, चतुर्थीस्थाने सम्बन्धसामान्यविवक्षया षष्ठीप्रयोगः। स्वल्पामिति वीप्सया प्रत्येकमल्पामल्पामित्यर्थः। अधिकदाने सामर्थ्याभावमभिसन्धाय तथोक्तिः।

(ड) अस्माकम् अस्मभ्यम्। अत्रापि सम्बन्धसामान्यविवक्षया षष्ठी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न मेऽस्ति वित्तं न धनं न चान्य-
च्छ्राद्धोपयोग्यं स्वपितॄन्ततोऽस्मि ।
तृप्यन्तु भक्त्या पितरो मयैतौ
कृतौ भुजौ वर्त्मनि मारुतस्य ॥३०॥

और उवाच ।

इत्येतत् पितृभिर्गीतं भावाभावप्रयोजनम् ।
यः करोति कृतं तेन श्राद्धं भवति पार्थिव ॥३१॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे चतुर्दशोऽध्यायः ॥

कक्षामूलप्रदर्शकः निर्घृनत्वख्यापनार्थमूर्ध्ववाहुः ॥२९॥

वित्तं स्वर्णरजतादि इतरद् धनञ्च नास्ति । तत्प्रत्ययार्थं मया भुजौ मारुतस्य वर्त्मनि आकाशे क्षिप्तौ ॥३०॥

भावाभावप्रयोजनं वित्तस्य भावेऽभावे च प्रयोजकं हेतुं तृप्तिहेतुप्रयोगम् ॥३१॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेऽंशे चतुर्दशोऽध्यायः ॥

पञ्चदशोऽध्यायः

[श्राद्धभोजि-विप्रलक्षणादिकथनम् योगिप्रशंसा च]

और्व उवाच ।

ब्राह्मणान् भोजयेच्छ्राद्धे यद्गुणांस्तान्निबोध मे ।
त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥१॥
वेदविच्छ्रोत्रियो योगी तथा वै ज्येष्ठसामगः ।
ऋत्विक् स्वस्रेय-दौहित्र-जामातृ-श्वशुरास्तथा ॥२॥
मातुलोऽथ तपोनिष्ठः पञ्चाग्न्यभिरतस्तथा ।
शिष्याः सम्बन्धिनश्चैव मातापितृरतश्च यः ॥३॥
एतान् नियोजयेच्छ्राद्धे पूर्वोक्तान् प्रथमं नृप !
ब्राह्मणान् पितृपुष्ट्यर्थमनुकल्पेष्वनन्तरान् ॥४॥

पञ्चदशोऽध्यायः

इति कृत्यान् विधीनत्र श्राद्धीयान ब्राह्मणानपि । भोक्तुः कर्त्तुश्च वर्ज्यानि प्राह पञ्चदशे मुनिः । अथ पार्वणश्राद्धप्रयोगान् वक्ष्यन् प्रथमं श्राद्धीयान् ब्राह्मणानाह—'ब्राह्मणानि'ति त्रिभिः । यद्गुणान् यैर्गुणैर्युक्तान् । द्वितीयकठिकस्थास्रयोऽनुवाकास्त्रिणाचिकेताः, तदध्यायी तदनुष्ठाता च त्रिणाचिकेतः । मधुवाता इति ऋचाध्यायी तद्वृतश्च त्रिमधुः । ब्राह्मणेन्मान् इत्याद्यनुवाकत्रयाध्यायी तद्वृतश्च त्रिसुपर्णः । षट् अङ्गानि यस्य तं वेदमधीते वेत्ति वा षडङ्गवित् ॥१॥

वेदवित् वेदार्थविचारकः । श्रोत्रियस्तदर्थानुष्ठाता । योगाभ्यासी । मूर्धानं दिव इत्याद्यृग्विशेषगीतं ज्येष्ठं तद्गाता ज्येष्ठसामगः । आहवनीयादित्रयः सज्यावसथ्यो द्वौ एते पञ्चाग्नयः, तेष्वभिरतस्तदुपासकः । यद्वा वेदाग्न्यु-पर्जन्य-पृथिवी-पुरुष-योषिद्रूपपञ्चाग्निविधोपासकः ॥

एतेषु मुख्यानुकल्पभेदमाह—'एता'निति । एतान् श्लोकोक्तान् ज्येष्ठसामगान् । प्रथमं मुख्यकल्पे नियोजयेत् । अनन्तरान् मृगादीन् अनुकल्पेषु ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्रघ्रुक् कुनखी क्लीबः श्यावदन्तस्तथा द्विजः ।
कन्यादूषयिता वह्निवेदोज्झः सोमविक्रयी ॥५॥

अभिशस्तस्तथा स्तेनः पिशुनो ग्रामयाजकः ।
भूतकाध्यापकस्तद्वद् भृतकाध्यापितश्च यः ॥६॥

परपूर्वापतिश्चैव मातापित्रोस्तथोज्झकः ।
वृषलीसूतिपोष्टा च वृषलीपतिरेव च ॥७॥

तथा देवलकश्चैव श्राद्धे नार्हन्ति केतनम् ॥८॥

प्रयोक्तव्यो बुधः शस्ताञ्छ्रोत्रियादीन् निमन्त्रयेत् ।
कथयेच्च तथैवैषां नियोगान् पैत्र्यदैविकान् ॥९॥

ततः क्रोधव्यवायादीनायासं तैर्द्विजैः सह ।
यजमानो न कुर्वीत दोषस्तत्र महानयम् ॥१०॥

श्राद्धे नियुक्तो भुक्त्वा वा भोजयित्वा नियुज्य च ।
व्यवायी रेतसो गर्त्ते मज्जयत्यात्मनः पितॄन्(क) ॥११॥

तस्मात् प्रथममत्रोक्तं द्विजाग्र्याणां निमन्त्रणम् ।
अनिमन्त्र्य द्विजान् गेहमागतान् भोजयेद् यतीन् ॥१२

पादशौचादिना गेहमागतान् पूजयेद् द्विजान् ।
पवित्रपाणिराचान्तानासनेषूपवेशयेत् ॥१३॥

पितॄणामयुजो युग्मान् देवानामिच्छया द्विजान् ।
देवानामेकमेकं वा पितॄणाञ्च नियोजयेत्(ख) ॥१४॥

तथा मातामहश्राद्धं वैश्वदेवसमन्वितम् ।
कुर्वीत भक्तिसम्पन्नस्तन्त्रं वा वैश्वदैविकम् ॥१५॥

एतेषामसम्भवे निषिद्धग्रहणार्थं निषिद्धानाह— 'मित्रघ्रु-रिग'ति साद्धैस्त्रिभिः । कुनखी निसर्गतः कुत्सितनखः । श्यावदन्तः सभावतः कृष्णदन्तः । अग्निवेदोज्झः अधिकारी शक्तश्च सन् अग्निहोत्रवेदाभ्यासत्यागी । सोमं सोमलतां विक्रीणीते स तथा ॥५॥

अभिशस्तः सत्येनासत्येन महापातकित्वेनाभियुक्तः । स्तेनश्चौरः । पिशुनः निभृते परदोषवक्ता । ग्रामयाजकः साधारणानां याजयिता, ग्रामार्थपुष्टो वा । भृतकाध्यापकः किञ्चिनाध्यापितश्च ॥६॥

परपूर्वा परस्मै या दत्ता तस्या अपरः पतिः । मातापित्रो-रपतित्यादावपि उज्झकः उपेक्षकः । वृषलीसूतिपोष्टा शूद्रा-त्यपोषकः । देवलकः "देवार्च्चनपरो विप्रो वित्तार्थी वत्सर-कृत्यम् । असौ देवलको नाम हव्यकव्येषु गर्हितः ।" इत्युक्तः । केतनं निमन्त्रणम् ॥७-८॥

इदानीं प्रयोगमाह,—पैत्र्यादैविकान् एते पैत्र्या एते दैविका इति कल्पयेत् । यद्वा पितृदेवसम्बन्धिनः । अक्रोधनैः शौचपरैरिति नियोगात् ॥९॥

कथयित्वा च तथा कुर्यादित्याह,—'तत' इति ॥१०॥

महान्तं दोषमाह—'श्राद्ध' इति । नियुक्तः पूर्वदिने भुक्त्वा च परदिने व्यवायी एवं कर्त्तापि ॥११॥

अनिमन्त्रितानपि यतीन् द्विजान् भोजयेत् । यतित्वे-नैव पूर्वोक्तदोषाभावादिति भावः ॥१२॥

तांश्च सर्वान् पादशौचादिना पूजयेत् ॥१३॥

पितॄणामयुजो युग्मान् देवानां युग्मानिच्छया वा यथाशक्ति भोजयेत् । उभयेषाम् एकमेकं वा ॥१४॥

तन्त्रं वेति पितृमातामहश्राद्धयोरेकमेव वैश्वदेवविधान-मित्यर्थः । तन्त्रन्त्वनुद्देश्यानुष्ठानसाम्ये सति सजातीया-नेककार्यकरम् अमावास्यायां तीर्थप्राप्तावेकश्राद्धमिव ॥१५॥

(क) रेतसः शुक्रस्य गर्त्ते कुण्डे । पितॄन् पितृपुरुषान् मज्जयति ।

(ख) पितॄणाम् अयुजः अयुग्मान् पितृपक्षे अयुग्मान् द्विजान् ब्राह्मणान् नियोजयेत् । देवानां दैवपक्षे युग्मान् ब्राह्मणान् नियोजयेदिति सम्बन्धः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राङ्मुखान् भोजयेद् विप्रान् देवानामुभयात्मकान् ।
पितृमातामहानाञ्च भोजयेच्चाप्युदङ्मुखान् ॥१६॥

पृथक् तयोः केचिदाहुः श्राद्धस्य करणं नृप !
एकत्रैकेन पाकेन वदन्त्यन्ये महर्षयः ॥१७॥

विष्टरार्थं कुशान् दत्त्वा सम्पूज्यार्घ्यविधानतः ।
कुर्यादावाहनं प्राज्ञो देवानां तदनुज्ञया(ग) ॥१८॥

यवाम्बुना च देवानां दद्यादर्घ्यं विधानवित् ।
स्रग्-गन्ध-धूप-दीपांश्च तेभ्यो दद्याद् यथाविधि ॥१९॥

पितॄणामपसव्यं तत् सर्वमेवोपकल्पयेत् ।
अनुज्ञाञ्च ततः प्राप्य दत्त्वा दर्भान् द्विधाकृतान् ॥२०

मन्त्रपूर्वं पितॄणान्तु कुर्याच्चावाहनं बुधः ।
तिलाम्बुना चापसव्यं दद्यादर्घ्यादिकं नृप ॥२१॥

काले तत्रातिथिं प्राप्तमन्नकामं नृपाध्वगम् ।
ब्राह्मणैरभ्यनुज्ञातः कामं तमपि भोजयेत्(घ) ॥२२॥

योगिनो विविधै रूपैर्नराणामुपकारिणः ।
भ्रमन्ति पृथिवीमेतामविज्ञातस्वरूपिणः ॥२३॥

तस्मादभ्यर्चयेत् प्राप्तं श्राद्धकालेऽतिथिं बुधः ।
श्राद्धक्रियाफलं हन्ति नरेन्द्रापूजितोऽतिथिः(ङ) ॥२

जुहुयाद् व्यञ्जनक्षारवर्जमन्नं ततोऽनले ।
अनुज्ञातो द्विजैस्तैस्तु त्रिकृत्वः पुरुषर्षभ ॥२५॥

अग्नये कव्यवाहाय स्वाहेत्यादौ नृपाहुतिः ।
सोमाय वै पितृमते दातव्या तदनन्तरम् ॥२६॥

वैवस्वताय चैवान्या तृतीया दीयते ततः ।
हुतावशिष्टमल्पाल्पं पितृपात्रेषु निर्वपेत् ॥२७॥

ततोऽत्र मिष्टमत्यर्थमभीष्टमतिसंस्कृतम् ।
दत्त्वा जुषध्वमिच्छातो वाच्यमेतदनिष्ठुरम्(च) ॥

भोक्तव्यं तैश्च तच्चित्तैर्मौनिभिः सुमुखैः सुखम् ।
अक्रुध्यता चात्वरता देयं तेनापि भक्तितः(ज) ॥

उभयार्थकान् पितृमातामहीयवैश्वदेवार्थकान् पितृमातामहवर्गश्राद्धीयानुदङ्मुखानिति वान्वयः । भोजयेत् भोजनार्थमुपवेशयेत् इत्यर्थः ॥१६॥

तयोः पितृमातामहवर्गयोः ॥१७॥

द्विधाकृतान् द्विगुणीकृतान् विंशस्तत्त्वेति मन्त्रपूर्वम् अत एव विश्वदेवावाहनेऽपि मन्त्र आयाति ॥२०॥

तदा प्राप्तातिथिभोजने हेतुमाह द्वाभ्यां 'योगिन' इति ॥२३॥

व्यञ्जनं शाकादि । क्षारं लवणादि तद्वर्जम् ॥२५॥

वैवस्वताय यमायेति पृथगाहुतिः शाखिभेदव्यवस्थि ॥२७॥

अक्रुद्धयता चात्वरता च भक्तितो देयम् । अक्रुद्धयता पाठे तत्र कार्येत्यध्याहृत्य पूर्वेणान्वयः ॥२९॥

(ग) विष्टरार्थम् आसनार्थम् । अर्घ्यविधानतः अर्घ्यदानविध्यनुसारेण ।

(घ) नृपाध्वगमित्यत्र नृपेति सम्बोधनपदम् । अध्वगं पथिकम् । एतेन प्राप्तस्यातिथेः पूर्वपरिचयाभावः सूचितः ।

(ङ) नरेन्द्रापूजित इत्यत्रापि नरेन्द्रेति सम्बोधनपदम् ।

(च) अनिष्ठुरम् अकर्कशम् सविनयमिति यावत् ।

(छ) तैश्चब्राह्मणैश्च, तच्चित्तैः तन्मनस्कैः अनन्यमनस्कैरि यावत्, सुमुखैः प्रसन्नमुखैः, मौनिभिः तूष्णीम्भावयुक्तैः ।

(ज) अत्वरतेत्यत्र त्वरेरात्मनेपदिनः शतृप्रत्यय अर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रक्षोघ्नमन्त्रपठनं भूमेरास्तरणं तिलैः ।
कृत्वा ध्येयाः स्वपितरस्त्व एव द्विजसत्तमाः ॥३०॥

पिता पितामहश्चैव तथैव प्रपितामहः ।
मम तृप्तिं प्रयान्त्वग्निहोमाप्यायितमूर्तयः(ज) ॥३१॥

पिता पितामहश्चैव तथैव प्रपितामहः ।
तृप्तिं प्रयान्तु पिण्डेन मया दत्तेन भूतले ॥३२॥

पिता पितामहश्चैव तथैव प्रपितामहः ।
तृप्तिं प्रयान्तु मे भक्त्या मन्मयैतदिहाकृतम् (झ) ॥३३

मातामहस्तृप्तिमुपैतु तस्य
तथा पिता तस्य पिता तथान्यः ।
विश्वे च देवाः परमां प्रयान्तु
तृप्तिं प्रणश्यन्तु च यातुधानाः(ञ) ॥३४॥

यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्वे ॥३५॥

तृप्तिष्वेतेषु विकिरेदन्नं विप्रेषु भूतले ।
दद्यादाचमनार्थाय तेभ्यो वारि सकृत् सकृत् ॥३६॥

सुतृप्तैस्तैरनुज्ञातः सर्वेणान्नेन भूतले ।
सतिलेन ततः पिण्डान् सम्यग् दद्यात् समाहितः ॥३७

पितृतीर्थेन सतिलान् दद्यादथ जलाञ्जलीन् ।
मातामहेभ्यस्तेनैव पिण्डांस्तीर्थेन निर्वपेत्(ट) ॥३८॥

दाक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत् ।
अवकाशेषु चोक्षेषु जलतीरेषु चैव हि ॥३९॥

दक्षिणाग्रेषु दर्भेषु पुष्पधूपादिपूजितम् ।
स्वपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ ॥४०॥

पितामहाय चैवान्यत् तत्पित्रे च तथापरम् ।
दर्भभूले लेपभुजः प्रीणयेल्लेपघर्षणैः ॥४१॥

पिण्डैर्मातामहांस्तद्वद् गन्धमाल्यादिसंयुतैः ।
पूजयित्वा द्विजाग्र्याणां दद्याच्चाचमनं ततः ॥४२॥

पितृभ्यः प्रथमं भक्त्या तन्मनस्को नरेश्वर !
सुस्वधेत्याशिषा युक्तां दद्याच्छक्त्या च दक्षिणाम् ॥४३

मम पित्रादयस्तृप्तिं प्रयान्त्वित्यन्वयः । सर्वेण व्यञ्जनादिसहितेन अन्नेन पिण्डान् दद्यात् ॥३१-३७॥

(ज) अग्निहोमाप्यायितमूर्त्तय इत्यत्र मूर्त्तिपदं स्वरूपपरं, न तु शरीरपरं, तेन शरीरस्य सुखात्मकाप्यायनाभावेऽपि न क्षतिः ।

(झ) मया हइ श्राद्धे यत् अकृतम् अज्ञानाद् वा सामर्थ्याभावाद् वा नानुष्ठितं, तेनापि तृप्तिं प्रयान्तु । तत्र प्रयोजिका भक्तिरेवेत्याह 'मे भक्त्ये' ति । अथवा आकृतं ईषत् कृतम् असम्पूर्णं कृतमित्यर्थः ।

चोक्षेषु समीचीनेषु लेपभुजः पितॄणां चतुर्थाद्याः ॥३८॥

पित्रेभ्यो ब्राह्मणेभ्यः सुष्ठु स्वधेत्याशिषा युक्ताम् । एतदाशीः प्रार्थनानन्तरं दक्षिणां दद्यादित्यतो दक्षिणापि पितृपूर्वैवायाति ॥४२॥

(ञ) यातुधानाः राक्षसाः, 'यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी'ति कोषात् ।

(ट) तेनैव तीर्थेन पितृतीर्थेन ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दत्त्वा च दक्षिणां तेभ्यो वाचयेद्वैश्वदेविकान् ।
प्रीयन्तामिह ये विश्वेदेवास्तेन इतीरयेत् ॥४४॥

तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तथाशिषः ।
पश्चाद्विसर्जयेद् देवान् पूर्वं पैत्र्यान्महीपते ॥४५॥

मातामहानामप्येवं सह देवैः क्रमः स्मृतः ।
भोजने च स्वशक्त्या च दाने तद्वद् विसर्जने ॥४६॥

आपादशौचनात् पूर्वं कुर्याद् देवद्विजन्मसु ।
विसर्जनन्तु प्रथमं पैत्रमातामहेषु वै (ठ) ॥४७॥

विसर्जयेत् प्रीतिवचः सम्मानाभ्यर्चितांस्ततः ।
निवर्त्तेताभ्यनुज्ञात आ द्वारान्तादनुव्रजेत्(ड) ॥४८॥

ततस्तु वैश्वदेवाख्यां कुर्यान्नित्यक्रियां बुधः ।
भुञ्जीयाच्च समं पूज्य-भृत्य-बन्धुभिरात्मनः(ढ) ४९॥

एवं श्राद्धं बुधः कुर्यात् पैत्र्यं मातामहं तथा ।
श्राद्धैराप्यायिता दद्युः सर्वान् कामान् पितामहा॥५०॥

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
रजतस्य तथादानं कथासङ्कीर्तनादिकम्(ण) ॥५१॥

वर्ज्यानि कुर्वता श्राद्धं कोपोऽध्वगमनं त्वरा ।
भोक्तुरप्यत्र राजेन्द्र ! त्रयमेतन्न शस्यते ॥५२॥

किञ्च पश्चाद् विसर्जयेदित्यनेन विसर्जनमपि पितृपूर्वकमित्यतोऽन्यत् सर्वं देवपूर्वमेवेत्यर्थादुक्तम् ॥४५॥

इममेवार्थं वैश्वदैवतन्त्रपक्षेऽप्याह,—'आपादे'ति । पादप्रक्षालनात् प्रभृति देवार्थानां ब्राह्मणानां सर्वं प्रथमं कुर्यात् । ततः पितृवर्गाणां ततो मातामहवर्गाणाम् इति । विसर्जन्त्विति दक्षिणाया उपलक्षणम् पूर्वमेवोक्तत्वात् ॥४७॥

पूज्यैर्मान्यैर्भृत्यैर्बन्धुभिश्च सह भुञ्जीत ॥४९॥

दौहित्रो दुहितुः सुतः । कुतपोऽष्टमो मुहूर्त्तः । दौहित्रमिति पाठे दौहित्रं घृतविशेषः । "अमावास्यागते सोमे या च खादति गौस्तृणम् । दौहित्री सा मता तस्या दौहित्रमुच्यते ।" इति । दौहित्रं खड्गपात्रमिति केचित् । केचित्तु कुतपमपि छागलोमजं कम्बलमाहुः । रजतस्य कथासन्दर्शनादिकमपि । पवित्रं राजतं रजताक्तं वा पितृपात्रमुच्यते । "रजतस्य तथादानं दर्शनं नाम चेष्यते" इति मत्स्यवायूक्तेः ॥५१॥

विश्वेदेवादय आप्यायन्ते कुलञ्चाप्यायत इति ॥५३॥

(ठ) देवद्विजन्मसु दैवपक्षीयब्राह्मणेषु दैवपक्षीयब्राह्मणानामित्यर्थः; षष्ठीसप्तम्योरर्थं प्रति भेदो नास्तीति नियमादिति भावः । शौचस्य करणं शौचनम् करोत्यर्थे इनुप्रत्ययात्, पादयोः शौचनं प्रक्षालनम् तस्मात् आ पादप्रक्षालनावधिकं पादप्रक्षालनप्रभृति कर्म ।

(ड) प्रीतिवचसा प्रीतिकरेण मधुरवाक्येन यः सम्मानः अर्चनं तेन अभ्यर्चितान् सम्मानितान् । द्वारान्तात् आ निजगृहद्वारपर्य्यन्तं, सति सम्भवे तद्ब्राह्मणगृहद्वारपर्य्यन्तं वा अनुव्रजेत् । ततः तेन ब्राह्मणेन अनुज्ञातः निवर्त्तेत ।

(ढ) भुञ्जीयादिति प्रयोग आर्षः ।

(ण) 'रजतस्य तथादान'मित्यत्र रजतस्य दानं दक्षिणादिरूपेण वितरणम्, तथा आदानं अङ्गुरीयकादिरूपेण ग्रहणमित्यर्थद्वयी सम्भवति । तथा आदानमित्यनयोः सन्धावाकारलोपाद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्वेदेवाः सपितरस्तथा मातामहा नृप !
कुलञ्चाप्यायते पुंसां सर्वं श्राद्धं प्रकुर्वताम् (त)॥५३॥

सोमाधारः पितृगणो यागाधारस्तु चन्द्रमाः ।
श्रेष्ठयोगिनियोगस्तु तस्माद् भूपाल ! शस्यते ॥५४॥

सहस्रस्यापि विप्राणां यौगी चेत् पुरतः स्थितः ।
सर्वान् भोक्तॄंस्तारयति यजमानं तथा नृप ॥५५॥

इति श्रीविष्णुपुराणे तृतीयांशे पञ्चदशोऽध्यायः ॥१५॥

सोमाधारः पितृगणः अग्निष्वात्तादेराधिकारिको गणः सोमाधारः सोमोपजीवित्वात् । योगाधारश्चन्द्रमास्तेषामेव-योगबलेन पुनश्चन्द्रस्याप्यायनात् । तथा च हरिवंशे—"एते ऽस्मत्पितरस्तात ! योगिनां योगवर्द्धनाः । आप्याययन्ति ये पूर्वं सोमं योगबलेन वै ।" तथा वायुः "श्राद्धे प्रीताः पुनः सोमं पितरो योगमाश्रिताः । आप्याययन्ति योगेन त्रैलोक्यं येन जीवति ।" तस्मात् श्राद्धे योगिनिमन्त्रणं शस्तमिति ॥५४॥

इति श्रीधरकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेऽंशे पञ्चदशोऽध्यायः ॥

(त) पितृभिः सह वर्त्तमानाः सपितरः पितृवर्गसहिताः विश्वेदेवाः आप्यायन्ते इति वचनव्यत्ययेनान्वयः, विश्वे चास्तथा पितरः आप्यायन्त इत्यर्थः । बहुव्रीहौ समासे ऋदन्तानां नित्यं कप्रत्ययानुशासनात् सपितृका इति वक्तव्ये सपितर इत्युक्तिरार्षत्वात् समाधेया ।

षोड़शः अध्यायः

[श्राद्धे मधुमांसादिदानफलस्य क्लीवादिद्वाराश्राद्धदर्शनदोषस्य च वर्णनम्]

और्व उवाच ।

हविष्य-मत्स्य-मांसैस्तु शशस्य शकुनस्य च ।
शौकरच्छागलैरेणैरौरवैर्गवयेन च ॥१॥

औरभ्रगव्यैश्च तथा मासवृद्ध्या पितामहाः ।
प्रयान्ति तृप्तिं मांसैस्तु नित्यं वाध्रीणसामिषैः(क)॥२

षोड़शोऽध्यायः ।

सदाचारप्रसङ्गानुप्रसङ्गेनाथ षोडशे । द्रव्याणि श्राद्धयोग्यानि तथायोग्यानि चादिशत् । तत्र श्राद्धे देयद्रव्यप्रशंसा हविष्यैर्व्रीह्यादिभिः । मत्स्यादीनां नवानां मांसैश्च प्रत्येकमेकैकमासवृद्ध्या पितामहाः पितरस्तृप्तिं प्रयान्ति इति द्वयोरन्वयः । व्रीह्यादिभिरेकमासं मत्स्यमांसैर्द्वौ मासावित्येवं दशमासान्तम् मत्स्यामिषे मांसत्वोपचारः । एणो हरिणविशेषः । उरभ्रः पृषतः तदीयैः । गवयो गोसदृशः पशुरारण्यकः ॥१॥

उरभ्रो मेषः तदीयैश्च । गव्यन्तु पयः पायसं वा । "संवत्सरन्तु गव्येन पयसा पायसेन च ।" इति स्मृतेः । मांसमध्यपाठात् मांसमेवेत्यन्ये, तत्तु युगान्तरीणमित्यवधेयम् । वाध्रीणसमांसैस्तु नित्यं सर्वकालं तृप्यन्ति । वाध्रीणसः स्मृतिप्रसिद्धः । यथा,—त्रिपिबन्त्विन्द्रियं क्षीणं श्वेतं वृद्धप्रजापतिम् । वाध्रीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि ।" इति । जलपाने यस्य मुखवत् कर्णौ च जलं स्पृशतः स त्रिपिबः । यद्वा 'कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहङ्गमः । स वै वाध्रीणसः प्रोक्त इत्येषा नैगमी श्रुतिः' इति ॥२॥

(क) शशस्य शकुनस्य चेत्यनयोः षष्ठ्यर्थसम्बन्धस्य द्वितीयशौकरमांसपदार्थे भेदेनान्वयः, शौकरेत्यादेस्तु शूकरस्य इमानीत्यार्थे ष्णप्रत्यय-वलात् शूकरादिसम्बन्ध्यर्थस्य मांसपदार्थे अभेदेनान्वयः । तेन तत्र सर्वत्रैव तत्तत्सम्बन्धिभिर्मांसैरित्यर्थः प्रतीयते । शौकरच्छागलै-रित्यत्र द्वन्द्वसमासेन शौकरैः शूकरसम्बन्धिभिः छागलैः छागलसम्बन्धिभिश्चेत्यर्थः । शरीरवृत्तिचैत्रत्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खड्गमांसमतीवात्र कालशाकं तथा मधु ।
शस्तानि कर्मण्यत्यन्त-तृप्तिदानि नरेश्वर(ख) ॥३॥
गयामुपेत्य यः श्राद्धं करोति पृथिवीपते ।
सफलं तस्य तज्जन्म जायते पितृतुष्टिदम् ॥४॥
प्रशान्तिकाः सनीवाराः श्यामाका द्विविधास्तथा ।
वनौषधीप्रधानास्तु श्राद्धार्हाः पुरुषर्षभ ॥५॥

- तज्जन्म पितृतुष्टिदं सत् तस्मिन् जन्मनि पितॄणामृणादुत्तीर्ण इत्यर्थः ॥४॥

प्रशान्तिका देवधान्यानि आरण्यव्रीहिसदृशा केचित् ।

मैत्रत्वादिजातेरिव गवयत्वजातेरपि शरीरवृत्तित्वेन गवयस्य पशोः शरीरस्य च मांसमयत्वेन गवयेनेत्यस्य न मांसप्रकरणोक्तिविरोधः ।

औरभ्रगव्यौश्चेति अत्रापि उरभ्रस्य मेषस्य इमानीत्यर्थे उरभ्रशब्दात् ष्णप्रत्ययेन तथा गोशब्दाद् यत्प्रत्ययेन औरभ्रगव्येति-पदद्वयसिद्धिः, मेषसम्बन्धीति गोसम्बन्धीति च तदर्थः, 'गव्यं त्रिषु गवां सर्वमि'ति कोषात् ।

ननु धर्मशास्त्रेषु ज्ञानादज्ञानाद् वा कृतेषु गोवधेषु गुरुतरप्रायश्चित्तस्य विधानात् तेषां गुरुतरपापजनकतायाः प्रतीतेः प्रतिषेधो गम्यते, तत् कथमन्यैरप्यनुमन्यते प्रकृतगव्यपदस्य मांसपरत्वं शास्त्रकारैरिति चेत् सत्यम्, अवैधगोवधेष्वेव प्रायश्चित्तस्य विधानादवैधगोवधानामेव पापजनकत्वस्य सिद्धेः, वैधगोवधेषु तु न पापजनकत्वम् न वा प्रायश्चित्तस्य कर्त्तव्यत्वमिति मीमांसकसिद्धान्तात् अत एव प्राचीने काले पशुमांसेन मधुपर्कस्य साङ्गतां सम्पादयितुं गोवधमपि कृतवन्तः प्राचीनाः, गोमेधयज्ञेऽपि कृतवन्तो गवालम्भम्। तथा च श्रूयते—पुरा रन्तिदेवेन राज्ञा विहिते गोमेधयज्ञे निहतानां गवां रुधिरेण परिस्रुतेन चर्मण्वती नाम नदी प्रवृत्तेति । अस्ति च 'गामालभेत स्थालीपाकं वा कुर्वीते' त्यादिगृह्यसूत्राद्युक्त-वचनेषु विधिर्गोवधस्य । तदत्र शास्त्रकारानुमतिरनवद्या । परमत्रानुमतावेष विशेषः, यद् वैध एव गोवधो विधेयो नावैध इति ।

एवं स्थितायामपि धर्मशास्त्र-मर्य्यादायां यदा प्रकामं कामोपहतचित्तवृत्तयो जीवाः क्षीवा इव वैधव्यतिरिक्तेष्वपि गो-वधादिषु प्रावर्त्तन्त, तदैव कलौ तत्कृतेरत्यर्थं प्रसारं सम्भावयन्तो मनीषिणो महर्षयः सकल-कल्याणपरिपिपालयिषया कलि-वर्ज्यप्रकरणमेकं निबद्धवन्तः, यत्र 'मधुपर्के पशोर्वधः' 'मांसादनं तथा श्राद्धे' इत्यादिना वैधावैधविशेषमनादृत्य सामान्यत एव गोवधनिषेधः परिगृहीतः । 'मांसादनमिति गोमहिषादे'रित्यनेनोद्वाहतत्त्वे स्मार्त्तरघुनन्दनभट्टाचार्य्येण कलिवर्ज्यप्रकरणकथनावसरे तथैव

तात्पर्य्यस्य व्याख्यानात् । उक्तञ्च प्राचीनैः—'दीक्षेत ब्रह्मचर्य्य' मित्याद्युपक्रम्य 'एतानि लोकगुप्त्यर्थं कर्माणि महात्मभिः । निवर्त्तितानि कर्माणि व्यवस्था पूर्वकं बुधैः' ॥

अत्र 'लोकगुप्त्यर्थ' मित्यत्र लोकगुप्त्यर्थं जगत्परिरक्षार्थमित्यर्थः । तत्रायमभिसन्धिः—'कलावन्नगताः प्राणा' इति-शास्त्रात् कलौ प्राणानामन्नोपजीवित्वं प्रतीयते, अन्नञ्च व्रीह्यादिरूपं साध्यम्, शस्यानि कृषिकर्मसाध्यानि, कृषिश्च प्राधान्येन गवादिसाध्या, तदेवं गोवधक्रियया गवां भूयसा क्षयेण गोसाध्यकृषिकर्मविपत्त्या तत्प्रयुक्तेनान्नाभावेन लोका विपद्येरन् । किञ्च गव्यं क्षीरं प्राणशक्तिं विवर्द्धयति लोकानाम् । गवामभावेन तत्प्राणशक्तिवर्द्धनासम्भवादपि लोकक्षतिरनिवार्य्या । अत एव लोकगुप्त्यर्थं गोरक्षा-मुपपादयितुमेव मनीषिभिः प्राच्यैः प्रवर्त्तितमेतद् गोवधनिवृत्तिशास्त्र-मित्यपि प्रतिपत्तव्यम् ।

अतएव 'औरभ्र-गव्यैश्चेत्यादि-प्रकृतश्लोकव्याख्यानप्रस्तावे श्रीधरैः 'मांसमध्यपाठात् मांसमेवेत्यन्ये, तत्तु युगान्तरीणमित्यवधेय'मित्यत्र गव्यैर्मांसैरिति पात्त्विकः कल्पो युगान्तरगोचरतयोपपादितः ।

नन्वेवम् 'औरभ्रगव्यैश्चे'त्यादिश्लोकव्याख्यानावसरे श्रीधरैः —'उरभ्रो मेषः, तदीयैश्च, गव्यन्तु पयः पायसं वा । 'संवत्सरं गव्येन पयसा पायसेन च' इति स्मृतेः । मांसमध्यपाठात् मांसमेवेत्यन्ये' इति व्याख्यानस्य कृतत्वात् प्रकृतगव्यपदस्य मांसपरत्वे तस्य नानुमतं परं पयःपरत्वमेवेत्यत्र को हेतुरिति चेदत्र ब्रूमः—धर्मशास्त्रादीनां सति सर्वकालसाधारण्यादिसम्भवे कालविशेषादिपरत्वमनुचितम्, अत एव शास्त्रेऽस्मिन् विहितस्य प्रकृतवस्तुनः निर्विशेषेण निखिलयुगोपयोगमुपपादयितुमेव तथा व्याख्यानम् । गव्यपदस्य प्रकृते मांसपरत्वे तदिदं शास्त्रं कलौ नोपयुज्यते, कलौ श्राद्धे मांसादनस्य प्रागुक्तनिषेधश्रवणात् । किञ्च गव्यपदस्य मांसपरत्वे स्मृतिरियं मनुवचनवैपरीत्यादप्रशस्ता भवति, मनुना—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यवाः प्रियङ्गवो मुद्गा गोधूमा व्रीहयस्तिलाः ।
निष्पावाः कोविदाराश्च सर्षपाश्चात्र शोभनाः ॥६॥
अकृताग्रयणं यच्च धान्यजातं नरेश्वर !
राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत् ॥७॥
अलाबुं गृञ्जनञ्चैव पलाण्डुं पिण्डमूलकम् ।
गान्धारकं करम्भाणि लवणान्यौषराणि च ॥८॥

श्यामाका द्विविधाः श्वेताः कृष्णाश्च वन्यौषधिप्रधाना वक्ष्माणाः ॥५॥

प्रियङ्गवः कंगवः । व्रीहयः शरत्पक्वानि धान्यानि । निष्पावाः शिम्ब्यः । कोविदारा वृक्षास्तैश्च तत्फलानि लक्ष्यन्ते । सर्षपाः श्वेताः ॥६॥

वर्ज्यानाह,—अकृताग्रयणमित्यादिना पर्युषितमित्यन्तेन । नवशस्यागमे साग्नेर्विहिता इष्टिराग्रयणम् । तत्र कृतं यन्न तत् । राजमाषान् अकृष्टमासान् अणून् सूक्ष्मशालीन् ॥७॥

गृञ्जनं हरितमूलकं, पलाण्डं लशुनभेदं, पिण्डमूलकं पिण्डाकारमूलकम् । एतेनान्यमूलकाभ्यनुज्ञा आयाति, गान्धारं शाकभेदः काञ्जिकं वा । करम्भाणि अविकासिता लाजाः शाकभेद इत्येके । औषराणि ऊषरभूमिजातानि ॥८॥

'संवसरन्तु गव्येन पयसा पायसेन चे'त्यनेन गव्यस्य पयसः पायसस्यैव चोपादानात् । 'मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते इति शास्त्रात् । गव्यपदस्य पयःपरत्वे औरभ्रपदस्य मांसपरत्वे तयोः समासे तत्समासानन्तर्गत-मांसपदार्थेन समभिव्याहृतस्यौरभ्रपदार्थस्याभेदेनान्वयाद्यनुपपत्तिस्तु कथञ्चिदार्षप्रयोगानुरोधात् सोढ़व्येति समासः ।

औरभ्रगव्यैश्च तथेत्यादिश्लोके श्रीजीवन्यायतीर्थमहोदयैर्यद् विचारितं तदपि बन्धनचिह्नान्तर्गतं कृत्वा समुपन्यस्यते । यथा—

['औरभ्रगव्यैश्च तथे'त्यादि । अत्र औरभ्रैर्मांसैः गव्यैः पयोभिः पायसैर्वेति । अन्ये तु औरभ्रगव्यैः मांसैरित्यन्वयं वदन्ति, तच्च युगान्तरविषयमिति श्रीस्वामिपादव्याख्याभिप्रायः । वस्तुतः औरभ्रपदं गव्यपदञ्च यदि मांसपदेन सहान्वितं स्यात्, तदा विशेषणरूपेण (अद्रव्यवाचित्वेन) उभयोर्ग्रहणं स्यात् । तत्र न कर्मधारयः (पाणिनिमते न तत्पुरुषः) न वा द्वन्द्वसमासः सम्भवति । 'विशेषणं विशेष्येण बहुलम् ।' इति सूत्रेणैकस्य विशेष्यत्वापेक्षणात् विप्रतिषिद्धज्ञानधिकरणवाचि' इति सूत्रार्थस्तु —विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात् । शीतोष्णं शीतोष्णे । वैकल्पिकः समाहारद्वन्द्वः चार्थे इति सूत्रेण प्राप्तेः । स विरुद्धार्थानां यदि भवति, तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम्, तेन द्रव्यवाचिनामितरेतरयोग एव । शीतोष्णे उदके स्तः (इति सिद्धान्तकौमुदीसन्दर्भः) । अत एव सामान्यविशेषणेन (अद्रव्यवाचिना) सह सामान्यविशेषणस्य (अद्रव्यवाचिनः) द्वन्द्वसमासो न स्वीक्रियते । औरभ्रपदस्य साकाङ्क्षत्वात् 'शाब्दी ह्याकाङ्क्षा शब्दैरेव प्रपूर्यते' इति न्यायात् मांसैरिति पदेन सहान्वयः, तेन औरभ्रपदस्य औरभ्रमांसार्थकत्वमायातम् । गव्यपदस्य तु नाद्रव्यवाचित्वम् अपि तु द्रव्यवाचित्वमेव । अद्रव्यवाचित्वस्वीकारे द्वन्द्वसमासानुपपत्तेः, उभयोः पदयोर्विरुद्धार्थाप्रतिपादनात् । विरोधोऽत्र सहानवस्थानलक्षणः, औरभ्रं गव्यञ्च क्षेत्रम् इत्यत्र सामानाधिकरण्यदर्शनात् । गव्यपदस्य च पञ्चगव्यादिपदेन दधिदुग्धादिबोधकत्वं शक्त्या शक्तितुल्यया निरूढ़लक्षणया वेति नातिरोहितं विदुषाम् । ननू गव्यपदस्य यदि पञ्चगव्यादिपदावधारिते दधिदुग्धादौ शक्तिः स्वीक्रियते, तर्हि पायसलाभः कथं सम्भवति ? युक्तम्, परन्तु पायसपदस्य व्युत्पत्तिद्वयं वर्त्तते, पायसः पायसञ्च । 'परमान्नन्तु पायसः' अर्थात् पयःसंस्कृत ओदनः, पयोविकारः पायसं पयोऽभिन्नतया पायसस्य प्राप्तेः । मनुवचनप्राप्तेन पायसपदेन चोभयोर्ग्रहणम् । अत एव औरभ्रगव्यपदयोर्द्रव्यवाचित्वेन द्वन्द्वसमासस्यावाधितत्वात् 'संवसरन्तु गव्येन पयसा पायसेन चेति मनुवचनैकवाक्यत्वसम्भवाच्च श्रीधरस्वामिपादानां प्रथमोक्तव्याख्यास्वारस्यमिति युक्तमुत्पश्यामः । इति श्रीश्रीजीवन्यायतीर्थमतम् ।]

(ख) खड्गस्य गण्डकस्य 'गण्डार' इति भाषायां प्रसिद्धस्य पशोः मांसम् । 'गण्डके खड्गखड्गिनाविति कोषात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आरक्ताश्चैव निर्यासाः प्रत्यक्षलवणानि च ।
वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ॥९॥

नक्ताहृतं न चोत्सृष्टं तृप्यते न च यत्र गौः ।
दुर्गन्धि फेनिलञ्चाम्बु श्राद्धयोग्यं न पार्थिव(ग) ॥१०

क्षीरमेकशफानां यदौष्ट्रमाविकमेव च ।
मार्गञ्च माहिषञ्चैव वर्जयेच्छ्राद्धकर्म्मणि(घ) ॥११॥

षण्ढापविद्धचाण्डालपाषण्डोन्मत्तरोगिभिः ।
कृकवाकु-श्व-नग्नैश्च वानर-ग्रामशूकरैः ॥१२॥

उदक्यासूतकाशौचिमृतहारैश्च वीक्षिते ।
श्राद्धे सुरा न पितरो भुञ्जते पुरुषर्षभ ॥१३॥

तस्मात् परिश्रिते कुर्याच्छ्राद्धं श्रद्धासमन्वितः ।
उर्व्याञ्च तिलविक्षेपाद् यातुधानान् निवारयेत् ॥१४॥

न पूति नैवोपपन्नं केशकीटादिभिर्नृप !
न चैवाभिषवैर्मिश्रमन्नं पर्युषितं तथा ॥१५॥

श्रद्धासमन्वितैर्दत्तं पितृभ्यो नामगोत्रतः ।
यदाहारास्तु ते जातास्तदाहारत्वमेति तत् ॥१६॥

श्रूयन्ते चापि पितृभिर्गीता गाथा महीपते !
ईक्ष्वाकोर्मनुपुत्रस्य कलापोपवने पुरा ॥१७॥

अपि नस्ते भविष्यन्ति कुले सन्मार्गगामिनः ।
गयामुपेत्य ये पिण्डान् दास्यन्त्यस्माकमादरात्(ङ)॥१८

निर्यासा वृक्षरसा आरक्ताः स्वभावतः । प्रत्यक्षलवणानि चक्षुर्दृश्यलवणानि । यच्च विहितमपि वाचा न शस्यते निन्द्यत इत्यर्थः ॥९॥

अनुत्सृष्टं अप्रतिष्ठितकूपादिभवम् । गौर्यत्र न तृप्यते स्वल्पमित्यर्थः ॥१०॥

एकशफा वड़वाद्याः । आविकं मेषसम्बन्धि । मार्गं हरिणीसम्बन्धि ॥११॥

षण्ढादिभिस्त्रयोदशभिर्वीक्षिते श्राद्धे देवाः पितरश्च न भुञ्जते । षण्ढो नपंसकम्, अपविद्धो महाजनपरित्यक्तः, पाषण्डी वैदिककर्मपरित्यागी, रोगी महारोगी, कृकवाकुः कुक्कुटः, श्वा कुक्कुरः, नग्ना अग्निमाध्याये वक्ष्यमाणाः ॥१२॥

उदक्या रजस्वला, सूतकं जननाशौचम्, अशौचं मरण निमित्तं तदयुक्तः, मृतहारः शवनिर्हरणवृत्तिः ॥१३॥

परिश्रिते सर्वतः परिवृते ॥१४॥

पूति दुर्गन्धि, केशकीटादिभिरुपपन्नम् युक्तम् । अवक्व मिति पाठे दूषितमित्यर्थः । अभिषवैः काञ्जिकैः । पर्युषि पक्वं रात्र्यन्तरितम् । एतत् सर्वमन्नं पितॄनुद्दिश्य न दद दित्यर्थः ॥१५॥

श्रद्धासमन्वितैः पितॄनुद्दिश्य यद्दत्तं तदन्नञ्च ते पितरो यदाहारा यादृशाहारयोग्या जातास्तदाहारतामुपैतीत्यर्थ ॥१६॥

कलापो हिमवत्पार्श्ववर्त्ती ग्रामविशेषः, तस्योपवने इक्ष्वाकोरिक्ष्वाकुं प्रति पितृभिर्गीता ॥१७॥

अपि दुर्घटत्वमाह ॥१८॥

(ग) तृप्यत इत्यत्रात्मनेपदप्रयोग आर्षः ।

(घ) एकं प्रतिपदमेकमात्रम् अथवा द्वैधानापन्नं मध्ये अविच्छिन्नमिति यावत्, शफं खुरः येषां ते तथाभूताः तेषाम् ।

(ङ) अस्माकम् अस्मभ्यम्, सम्बन्धसामान्यविवक्षया षष्ठी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अपि नः स्वकुले जायाद् यो नो दद्यात् त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च(च) ॥१९॥
गौरीं वाप्युद्वहेत् कन्यां नीलं वा वृषमुत्सृजेत् ।
यजेत वाश्वमेधेन विधिवद्दक्षिणावता(छ) ॥२०॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे षोड़शोऽध्यायः ॥१६॥

वर्षासु भ्राद्रपदे मघानक्षत्रे त्रयोदशीं प्राप्य ॥९॥ गौरीमष्टवर्षाम् । "अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत् कन्या अत ऊर्द्ध्वं रजस्वला ।" इति स्मृतेः । तामुद्वहेत् स्वीकुर्यात् । उद्वाहयेत् इति वा पाठः । "गौरीं ददन्नाकपृष्टं वैकुण्ठं याति रोहिणीम् । कन्यां ददद् ब्रह्मलोकं रौरवन्तु रजस्वलाम् ।" इति संवर्त्तोक्तेः । नीलः स्मृत्युक्तः । "लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते" ॥२०॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेऽंशे षोड़शोऽध्यायः समाप्तः ॥

(च) जायात् जायेत । परस्मैपदमार्षम् । अपि न इत्यत्र नः अस्माकम् । यो नो दद्यादित्यत्र नः अस्मभ्यमित्यर्थः ।

(छ) दक्षिणावतेत्यत्र प्रशंसायां वतुप्प्रत्ययः प्रशस्तदक्षिणावतेत्यर्थः, 'देवानुरूपो वलि'रिति न्यायात् महाक्रतावश्वमेधे प्रशस्तदक्षिणादानस्यैवोचितत्वादिति भावः ।

सप्तदशोऽध्यायः ।

[नग्नलक्षणम्, भीष्म-वशिष्ठसंवादः, विष्णुस्तुतिः, मायामोहोत्पत्तिश्च]

पराशर उवाच ।

इत्याह भगवानौर्वः सगराय महात्मने ।
सदाचारान् पुरा सम्यङ् मैत्रेय ! परिपृच्छते ॥१॥
मयाप्येतदशेषेण कथितं भवते द्विज !
समुल्लङ्घ्य सदाचारं कश्चिन्नाप्नोति शोभनम् ॥२॥

मैत्रेय उवाच ।

षण्ढापविद्धप्रमुखा विदिता भगवन् ! मया ।
उदक्याद्याश्च ये सर्वे नग्नमिच्छामि वेदितुम् ॥३॥
को नग्नः किं समाचारो नग्नसंज्ञां नरो लभेत्(क) ।
नग्नस्वरूपमिच्छामि यथावद् गदितं त्वया ।
(श्रोतुं धर्मभृतां श्रेष्ठ ! न ह्यस्त्यविदितं तव) ॥४॥

सप्तदशाध्यायः

एवं नवभिरध्यायैस्त्रयीधर्माः प्रपञ्चिताः । व्यतिरेके त्वनर्थाप्तिर्द्वयेनेह निरूप्यते । तत्र सप्तदशे देवैः स्तुतो विष्णुरजीजनत् । मायामोहं यतो मग्ना दैत्या नग्नाश्च जज्ञिरे ॥१॥

(क) लभेदित्यत्र परस्मैपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज !
एतामुज्झति यो मोहात् स नग्नः पातकी स्मृतः(ख)॥५

त्रयी समस्तवर्णानां द्विज ! संवरणं यतः ।
नग्नो भवत्युज्झितायामतस्तस्यां न संशयः ॥६॥

इदञ्च श्रूयतामन्यद् भीष्माय सुमहात्मने ।
कथयामास धर्मज्ञो वसिष्ठोऽस्मत्पितामहः ॥७॥

मयापि तस्य गदतः श्रुतमेतन्महात्मनः ।
नग्नसम्बन्धि मैत्रेय ! यत् पृष्टोऽहमिह त्वया ।८

देवासुरमभूद् युद्धं दिव्यमब्दं पुरा द्विज !
तस्मिन् पराजिता देवा दैत्यैर्ह्लादिपुरोगमैः(ग) ॥९॥

क्षीरोदस्योत्तरं कूलं गत्वातप्यन्त वै तपः ।
विष्णोराराधनार्थाय जगुश्चेमं स्तवं तदा ॥१०॥

देवा ऊचुः ।

आराधनाय लोकानां विष्णोरीशस्य यां गिरम् ।
वक्ष्यामो भगवानाद्यस्तया विष्णुः प्रसीदतु ॥११॥

यतो भूतान्यशेषाणि प्रसूतानि महात्मनः ।
यस्मिंश्च लयमेष्यन्ति कस्तं स्तोतुमिहेश्वरः ॥१२॥

तथाप्यरातिविध्वंसध्वस्तवीर्या भवार्थिनः ।
त्वां स्तोष्यामस्तवोक्तीनां याथार्थ्यं नैव गोचरे(घ)॥१३

त्वमुर्वी सलिलं वह्निर्वायुराकाशमेव च ।
समस्तमन्तःकरणं प्रधानं तत्परः पुमान् ॥१४॥

एकं तवैतद् भूतात्मन् ! मूर्त्तामूर्त्तमयं वपुः ।
आब्रह्मस्तम्बपर्यन्तं स्थानकालविभेदवत् ॥१५॥

तत्रेश ! तव यत्पूर्वं त्वन्नाभिकमलोद्भवम् ।
रूपं विश्वोपकाराय तस्मै ब्रह्मात्मने नमः ॥१६॥

वर्णानाम् आवृतिः परिधानम् ॥५॥

किञ्च यतः सैव संवरणमपि प्रावरणम् उत्तरीयमिति यावत्, अतस्तत्परित्यागे परिधानोत्तरीयहीन इव नग्नी भवतीत्यर्थः ॥६॥

एतदेव स्पष्टीकर्त्तुमितिहासं प्रस्तौति—'इदञ्चे'ति ॥७॥

देवा सुराश्च योद्धारो यस्मिन् तत् ॥९॥

लोकानामीशस्य विष्णोः ॥११॥

प्रसूतानि जातानि। प्रभूतानीति पाठे वृद्धिं गतानि ॥१२॥

यद्यपि तव याथार्थ्यं तत्त्वमुक्तीनां वचसां गोचरे नैव वर्त्तते, तथापि अरातिकृतेन ध्वंसेन पराभवेन विध्व नाशितं वीर्य्यं प्रभावो येषां ते वयं यस्मात् भवार्थिनः कर्म णार्थिनः स्वमत्यनुरूपं स्तोष्यामः ॥१३॥

तत्र प्रथमं विश्वरूपेण सगुणं स्तुवन्ति—'त्वमुर्वी'त्यादि 'तस्मै सर्वात्मने नमः' इत्यन्तेन। समस्तमनोबुद्ध्यहंका चित्ताख्यमन्तःकरणम्। तस्याः प्रकृतेः परः ॥१४॥

स्थानं देशः, देशे काले च तस्मिंस्तस्मिन्नानाभेद विश्वं तवैकमेव वपुरित्यर्थः ॥१५॥

तत्र तव रूपमध्ये प्रथमं सर्गेण विश्वोपकाराय यत् तस्मै नमः ॥१६॥

(ख) नग्नः परिधानवसनशून्या इति 'नग्नोऽवासा दिगम्बर' इति कोषात् तदनुसारेण प्रकृतनग्नस्य तत्त्वं रूपकेणोपपादयति 'ऋग्यजु' रित्यादिना।

(ग) अब्दमित्यत्र कालाध्वनोरित्यादिना द्वितीया।

(घ) तवोक्तीनामित्यादिः—तव परमेश्वरस्य विष्णोः याथा तत्त्वम् उक्तीनां गोचरे नैव अस्तीति। उक्तीनामिति बहुवच संख्यातीतैरपि वचनैस्तव विष्णोर्याथार्थ्यं नैव शक्यं प्र पादयितुमित्यर्थः प्रतीयते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शक्रार्क-रुद्र-वस्वश्वि-मरुत्सोमादिभेदवत् ।
वयमेयत् स्वरूपं यत् तस्मै देवात्मने नमः ॥१७॥

दम्भप्रायमसम्बोधि तितिक्षा-दमवर्जितम् ।
यद्रूपं तव गोविन्द ! तस्मै दैत्यात्मने नमः (ङ)॥१८

नातिज्ञानवहा यस्मिन् नाड्यः स्तिमिततेजसि ।
शूद्रादिलोभि यत्तस्मै तुभ्यं यक्षात्मने नमः ॥१९॥

कार्यमायामयं घोरं यच्च रूपं तवासितम् ।
निशाचरात्मने तस्मै नमस्ते पुरुषोत्तम ॥२०॥

स्वर्गसद्धर्मिसद्धर्म-फलोपकरणं तव ।
धर्म्यख्यञ्च तथा रूपं नमस्तस्मै जनार्दन ॥२१॥

हर्षप्रायमसंसर्गि गतिमद् गमनादिषु ।
सिद्धाख्यं तव यद्रूपं तस्मै सिद्धात्मने नमः ॥२२॥

अतितिक्षाधनं क्रूरमुपभोगमयं हरे !
द्विजिह्वं तव यद्रूपं तस्मै नागात्मने नमः (च)॥२३॥

अवबोधि च यच्छान्तमदोषमपकल्मषम् ।
ऋषिरूपात्मने तस्मै विष्णो रूपाय ! ते नमः ॥२४॥

भक्षयत्यथ कल्पान्ते भूतानि यदवारितम् ।
त्वद्रूपं पुण्डरीकाक्ष ! तस्मै कालात्मने नमः ॥२५॥

सम्भक्ष्य सर्वभूतानि देवादीन्यविशेषतः ।
नृत्यत्यन्ते च यद्रूपं तस्मै रुद्रात्मने नमः ॥२६॥

प्रवृत्त्या रजसो यच्च कर्मणां कारकात्मकम् ।
जनार्दन ! नमस्तस्मै त्वद्रूपाय नरात्मने ॥२७॥

अष्टाविंशद्वधोपेतं यद्रूपं तामसं तव ।
उन्मार्गगामि सर्वात्मन् तस्मै ! पश्वात्मने नमः ॥२८॥

असम्बोधि विवेकशून्यम् ॥१८॥

यस्मिन् यक्षरूपे नाड्य इन्द्रियनाड्यो हृदयनाड्यो वा नातिज्ञानवहा नातिज्ञानक्षमाः। नाट्यस्तिमितेति पाठे नाट्येन नृत्यादिना। तत्र हेतु स्तिमिततेजसि अल्पसत्त्वे ॥१९॥

असितं तमोमयम् ॥२०॥

स्वर्गस्थाः स्वर्गार्हा ये धर्मिणः यजमानास्तेषां यः सद्धर्मो यागादिस्तस्य यत् फलं स्वर्गादि तस्योपकरणं प्रापकं धर्म्यमहृष्टसंज्ञं यद्रूपं तस्मै नमः ॥२१॥

गमनादिषु गमनीयादिषु असंसर्गिणी या संसर्गशून्या गतिर्गत्यादि तद्युक्तम्। सिद्धा हि जलाग्न्यादिषु गच्छन्ततिष्ठन्तो वा न सङ्गच्छन्ते ॥२२॥

अतितिक्षा अक्षमा धनं सर्वस्वं यस्य। उपभोगवशमिति पाठे उपभोगेऽपि तृप्तिरहितम् ॥२३॥

अदोषं रागादिहीनम् ऋषिरूपम्। ऋष्याकृतिरात्मा देहो यस्य तस्मै तव रूपाय नमः ॥२४॥

यत् कालात्मकं ते रूपं भूतानि भक्षयति तस्मै नमः ॥२५॥

रुद्रात्मकन्तु रूपं भक्षयित्वा नृत्यतीति शेषः ॥२६॥

रजसो वृत्त्या यत् कर्मणां कारकात्मकं कर्तृस्वभावं तस्मै नरात्मने मनुष्यात्मने नमः ॥२७॥

अष्टाविंशद्वधोपेतमिति पाठे एकादश इन्द्रियवधाः। नव तुष्टिवधाः, अष्टौ सिद्धिवधा इति प्रथमेऽंशे विवृताः ॥२८॥

(ङ) दम्भप्रायम् व्याजबहुलम्, 'कपटोऽस्त्री व्याजदम्भोपधयरवश्च कैतवे' इति कोषात्। दर्पोत्सिक्तमिति वा।

(च) द्विजिह्वमिति—द्वे जिह्वे यत्र तथाभूतम्। सर्पाणां पुरा पुराणोक्तकारणविशेषेण जिह्वाया द्विधा विभक्तत्वात् तथात्वम्।

(छ) अष्टाविंशतिवधोपेतम् इति संस्कारेण वक्तव्ये अष्टाविंशद्वधोपेतम् इति प्रयोग आर्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ञाङ्गभूतं यद्रूपं जगतः सिद्धिसाधनम् ।
वृक्षादिभेदैर्यद्भेदि तस्मै मुख्यात्मने नमः ॥२९॥

तिर्यङ्मानुषदेवादि व्योमशब्दादिकञ्च यत् ।
रूपं तवादेः सर्वस्य तस्मै सर्वात्मने नमः ॥३०॥

प्रधानबुद्ध्यादिमयादशेषाद्
यदन्यदस्मात् परमं परात्मन् !
रूपं तवाद्यं न यदन्यतुल्यं
तस्मै नमः कारणकारणाय ॥३१॥

शुक्लादिदीर्घादिघनादिहीन-
मगोचरे यच्च विशेषणानाम् ।
शुद्धातिशुद्धं परमर्षिदृश्यं
रूपाय तस्मै भगवन् ! नताः स्मः (ज)॥३२

यन्नः शरीरेषु यदन्यदेहे-
ष्वशेषजन्तुष्वजमव्ययं यत् ।
यस्माच्च नान्यद्व्यतिरिक्तमस्ति
ब्रह्मस्वरूपाय नताः स्म तस्मै ॥३३॥

सकलमिदमजस्य यस्य रूपं
परमपदात्मवतः सनातनस्य ।
तमनिधनमशेषबीजभूतं
प्रभुममलं प्रणताः स्म वासुदेवम् ॥३४॥

पराशर उवाच ।

स्तोत्रस्यास्यावसाने ते ददृशुः परमेश्वरम् ।
शङ्खचक्रगदापाणिं गरुडस्थं सुरा हरिम् ॥३५॥

तमूचुः सकला देवाः प्रणिपातपुरःसरम् ।
प्रसीद देव ! दैत्येभ्यस्त्राहीति शरणार्थिनः (ञ)॥३६॥

त्रैलोक्यं यज्ञभागाश्च दैत्यैर्ह्रादिपुरोगमैः ।
हृतं नो ब्रह्मणोऽप्याज्ञामुल्लङ्घ्य च परमेश्वर ॥३७॥

यद्यप्यशेषभूतस्य वयं ते च तवांशकाः ।
तथाप्यविद्याभेदेन भिन्नं पश्यामहे जगत् (ञ)॥३८॥

जगतः सिद्धिः वर्त्तनं, वृक्षादिर्भेदैर्यद्भेदि भिन्नम् । षड्भेदीति पाठे वृक्ष-गुल्म-लता-वीरुत्-तृण-त्वक्सारात्मना षड्भेदि, मुख्यात्मने वृक्षात्मने ॥२९॥

तव सर्वस्यादेः कारणस्य यद्रूपं तिर्यङ्मनुष्यदेवादीत्यन्वयः ॥३०॥

इदानीं निर्गुणं ब्रह्म प्रणमन्ति—प्रधानादिमयादस्माद् विश्वरूपादन्यत् परमं रूपम् अतएव यदन्यतुल्यं न भवति निरुपमं तस्मै नमः ॥३१॥

(ज) शुक्लादीत्यादिः शुक्लगुणादि-विशेषणहीनमित्यर्थः । अथवा शुक्लादिपदानां धर्मपरत्वात् शुक्लत्वादिगुण-दीर्घत्वादिपरिमाण-घनत्वादिभावरहितमित्यर्थः ।

पूर्वोक्तमेव दर्शयन्तः प्रणमति—'शुक्लादी'ति त्रिभिः शुक्लत्वादीनां कियतां निषेधमुक्त्वा सर्वविशेषणनिषेधमाह—'अगोचर' इति ॥३२॥

परमपदात्मवतः परमं पदं ब्रह्मैवात्मा स्वरूपं यस्यास्ति तस्य ॥३४॥

तव शरणार्थिनोऽस्मान् दैत्येभ्यस्त्राहीति तं हरिमूचुरित्यन्वयः ॥३६॥

(ञ) शरणार्थिन इत्यस्य देवा इत्यनेन सम्बन्धः ।

(ञ) अशेषभूतस्य निखिलस्वरूपस्य तवेति शेषः । अविद्याभेदेन अज्ञानविशेषेण भिन्नं पृथक् पश्यामहे पश्यामः । पश्यामह इत्यात्मनेपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वधर्मनिरता वेदमार्गानुसारिणः ।
न शक्यास्तेऽरयो हन्तुमस्माभिस्तपसान्विताः (ट)॥३९
तमुपायममेयात्मन्नस्माकं दातुमर्हसि ।
येन तानसुरान् हन्तुं भवेम भगवन् ! क्षमाः ॥४०॥

पराशर उवाच ।

इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
तमुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥४१॥

श्रीभगवानुवाच ।

मायामोहोऽयमखिलान् दैत्यांस्तान्मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः (ठ)॥४२॥
स्थितौ स्थितस्य मे वध्या यावन्तः परिपन्थिनः ।
ब्रह्मणो येऽधिकारस्य देवदैत्यादिकाः सुराः ॥४३॥
तद्गच्छत न भीः कार्या मायामोहोऽयमग्रतः ।
गच्छत्वद्योपकाराय भवता भवतां सुराः (ड) ॥४४॥

पराशर उवाच ।

इत्युक्ताः प्रणिपत्यैनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महासुराः (ढ)॥४५

इति श्रीविष्णुपुराणे तृतीयेंऽशे सप्तदशोऽध्यायः ॥१७॥

स्थितौ स्थितिनिमित्तं स्थितस्य ब्रह्मणोऽधिकारस्य ये यावन्तः परिपन्थिनस्ते सर्वे मम वध्या इत्यर्थः ॥४३॥

इति श्रीधरस्वामिकृतायमात्मप्रकाशामिधाया स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणठीकायां तृतीयेऽंशे सप्तदशोऽध्यायः॥

(ट) स्वधर्मनिरता इत्यादीनि विशेषणानि हेत्वर्थगर्भाणि। यस्मा हि तेषामरीणां स्वधर्मनिरतत्वात् वेदमार्गानुसारित्वात् तपसा समन्वितत्वाच्च नास्माभिस्ते हन्तुं शक्या इत्यर्थः ।

(ठ) मायया अविद्यया मोहयति यः स मायामोहः ।

(ड) अग्रतः पुरः युष्माकमिति शेषः । उपकाराय भविता अयं मायामोह इति शेषः ।

(ढ) महान्तः असुराः महासुराः तिष्ठन्तीति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टादशोऽध्यायः

[असुरेभ्यो मायामोहस्योपदेशदानम् बौद्धधर्मोत्पत्तिः, नग्नसम्पर्कदोषः, नृपस्य शतधनुष उपाख्यानञ्च]

पराशर उवाच ।

तपस्यभिरतान् सोऽथ मायामोहो महासुरान् ।
मैत्रेय ! ददृशे गत्वा नर्मदातीरसंश्रितान् ॥१॥

ततो दिगम्बरो मुण्डो बर्हिपत्रधरो द्विज !
मायामोहोऽसुरान् श्लक्ष्णमिदं वचनमब्रवीत्(क) ॥२॥

मायामोह उवाच ।

हे दैत्यपतयो ! ब्रूत यदर्थं तप्यते तपः ।
ऐहिकं वाथ पारत्र्यं तपसः फलमिच्छथ ॥३॥

असुरा ऊचुः ।

पारत्र्यफललाभाय तपश्चर्या महामते !
अस्माभिरियमारब्धा किं वा तेऽत्र विवक्षितम् ॥४॥

मायामोह उवाच ।

कुरुध्वं मम वाक्यानि यदि मुक्तिमभीप्सथ ।
अर्हध्वमेनं धर्मञ्च मुक्तिद्वारमसंवृतम् ॥५॥

धर्मो विमुक्तेरर्होऽयं नैतदस्मात् परः परः ।
अत्रैव संस्थिताः स्वर्गं विमुक्तिं वा गमिष्यथ ।
अर्हध्वं धर्ममेतञ्च सर्वे यूयं महाबलाः ॥६॥

पराशर उवाच ।

एवं प्रकारैर्बहुभिर्युक्तिदर्शनवर्द्धितैः ।
मायामोहेन ते दैत्या वेदमार्गादपाकृताः ॥७॥

धर्मायैतदधर्माय सदेतन्न सदित्यपि ।
विमुक्तये त्विदं नैतद् विमुक्तिं सम्प्रयच्छति ॥८॥

परमार्थोऽयमत्यर्थं परमार्थो न चाप्ययम्
कार्यमेतदकार्य्यञ्च नैतदेवं स्फुटं त्विदम् ।
दिग्वाससामयं धर्मो धर्मोऽयं बहुवाससाम् ॥९॥

अष्टादशोऽध्यायः

इहोच्यन्ते हता दैत्या मायामोहविमोहिताः ।
नग्नसंसर्गदोषोक्त्यै शैव्याशतधनुःकथाः ॥१॥

श्लक्ष्णं मनोहरम् ॥२॥

ऐहिकम् इहलोकभोग्यं, पारत्र्यं परलोकभोग्यम् ॥३॥

एवं धर्ममग्रे वक्ष्यमाणम् । असंवृतमुद्घाटितम् ॥४॥

अर्हः योग्यः । एतस्मादपरो धर्मः न परो न श्रेष्ठः ॥५॥

एवम्प्रकारैर्वाक्यैः युक्तिदर्शनं शुष्कतर्कवादः तेन वर्द्धितैः चर्चितैरिति वा पाठः । अपाकृता दूरीभूताः ॥७॥

वेदमार्गापाकरणमेव सप्तधा दर्शयति — सार्द्धश्लोकेन 'धर्मायै'ति ॥८॥

(क) बर्हिणः मयूराः तेषां पत्राणि पक्षाः पिच्छानीति यावत्, तद्धरः मयूरपिच्छधारीत्यर्थः । 'पत्रं वाहन-पक्षयो'रिति कोषात् । दिगम्बरजैनानां मयूरपिच्छधारित्वं प्रसिद्धम् । इदं वक्ष्यमाणं वचनमब्रवीत् । मुण्डः मुण्डितमस्तकः । 'मुण्डस्तु-मुण्डिते' इति कोषात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्यनेकान्तवादञ्च मायामोहेन नैकधा ।
तेन दर्शयता दैत्याः स्वधर्मांस्त्याजिता द्विज ॥१०॥

अर्हतेमं महाधर्मं मायामोहेन ते यतः ।
प्रोक्तास्तमाश्रिता धर्ममार्हतास्तेन तेऽभवन् (ख) ॥११

त्रयीधर्मसमुत्सर्गं मायामोहेन तेऽसुराः ।
कारितास्तन्मया ह्यासंस्ततोऽन्ये तत्प्रबोधिताः (ग)॥१२

तैरप्यन्ये परे तैश्च तैरप्यन्ये परे च तैः ।
अल्पैरहोभिः सन्त्यक्ता तैर्दैत्यैः प्रायशस्त्रयी ॥१३॥

पुनश्च रक्ताम्बरधृङ् मायामोहोऽजितेक्षिणः ।
अन्यानाहासुरान् गत्वा मृद्वल्पमधुराक्षरम् (घ)॥१४॥

मायामोह उवाच ।

स्वर्गार्थं यदि वो वाञ्छा निर्वाणार्थमथासुराः ।
तदलं पशुघातादिदुष्टधर्मैर्निबोधत (ङ) ॥१५॥

विज्ञानमयमेवैतदशेषमवगच्छत ।
बुध्यध्वं मे वचः सम्यग् बुधैरेवमुदीरितम् ॥१६॥

अनैकान्तवादं फलव्यभिचारिकारणवादं भेदाभेदवादं वा दर्शयता इत्येवं स्वधर्मान् त्याजिता इत्युपसंहारः ॥१०॥

आर्हतानां नामनिरुक्तिमाह—'अर्हते'ति ॥११॥

सम्प्रदायप्रवृत्तिमाह—'त्रयी'ति ॥१२॥

आर्हतमतमुक्त्वा बौद्धमतमाह 'पुनश्चे'ति सप्तभिः । रक्तेत्येतदाचारप्रदर्शनम् ॥१४॥

अत्र हि विज्ञानमयं बुद्धिमयमित्यादिना योगाचाराणामात्मख्यातिवाद उक्तः ॥१६॥

(ख) यतः यस्माद्धेतोः ते असुराः मायामोहेन 'इमं महाधर्मं मुक्तिकारणीभूतं मदुपस्थापितं महाधर्मम् महान्तं धर्मं प्रशस्तभूतं धर्ममित्यर्थः अर्हत मानयत' इति प्रोक्ताः सम्यक्तया कथिताः ग्राहिता इति यावत् तेन तं धर्मम् आश्रिताः ते आर्हताः आर्हतपदवाच्याः अभवन्निति स्फुटान्वयः ।

(ग) ते असुराः त्रयीधर्मः वैदिको धर्मः यागयज्ञादिः तस्य समुत्सर्गं सम्यक्तया साकल्येन च परिहारं कारिताः सन्तः तन्मयाः निरुक्तमहाधर्ममयाः तदेकान्तिन इति यावत्, आसन् । तथा अन्ये तत्प्रबोधिता तैः उपदेशेन शिक्षिताः निष्कम्पं बोधं लब्धिमता इति यावत्, तन्मयाः तदेकान्तानुगताः आसन् । अथवा तन्मयाः त्रयीधर्मसमुत्सर्गमयाः वैदिकधर्मपरिहारैकान्तिनः आसन् अन्येऽपि तत्प्रबोधिताः सन्तः तथा तन्मया आसन्निति सम्बन्धः ।

(घ) रक्ताम्बरधृक् परिहितकाषायवसनः, बौद्धानामयमाचारः । अञ्जिते अञ्जनेन रञ्जिते ईक्षणे चक्षुषी येन तथाभूतः ।

पूर्वापेक्षया आत्मनः स्वरूपभेदप्रत्यायनार्थं तथा वेशान्तरपरिग्रहः, अन्यथा एकस्यैव विभिन्नमतोपन्यासोपादप्रत्ययः प्रसज्येत । मृद्वल्पेत्यादिकम् आह—क्रियाया विशेषणमपि तदभिप्रायेणैवेति मन्तव्यम्, अन्यथा पूर्वमन्यथोपदिष्टा यदि भिन्नतत्त्वप्रतिपादकमिदं वचनं शृणुयुस्तदा तत्र विश्वासं जह्युरिति भावः ।

(ङ) पशुघातादीत्यादिपदाद् यागादिसाधनीभूतबीजवधादि परिग्रहः, तेन पशुघातादिना पशुवधबीजवधादिकर्मणा दुष्टाः दोषग्रस्ताः दुरदृष्टजनकाः धर्माः वैदिकधर्मा यागादयः तैः, अलम् । बौद्धदर्शनप्रस्थाने हिंसासामान्यमेव पापजनकत्वाद्धेयं, नत्ववैधहिंसामात्रम्, अतस्तत्र यागसाधनभूत-वेदविहितहिंसाया अपि प्रतिषेधः । एतत् दृश्यमानम् अशेषं समग्रं जगत् विज्ञानमयम् क्षणिकविज्ञानस्वरूपम् अवगच्छत जानीत । अयं सिद्धान्तो बौद्धयोगाचारदार्शनिकानाम् । ते हि 'सहोपलम्भनियमादभेदो नीलतद्धियोः । भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये' इत्यादिना 'यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी ।' इत्यादिना च युक्तियुक्तवचनजालेन क्षणिकविज्ञानमयत्वं सर्वस्यास्य जगतः समुपपादयन्ति । तच्च क्षणिकविज्ञानं स्वप्रकाशमेवेति न तत्प्रकाशार्थमपि नातिरिक्तापेक्षा । तदुक्तम्—'नान्योऽनुभाव्यो बुद्धयास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते ।' इति ।

CC-0. Mumukshu Bhawan Varanasi Collection, Digitized by eGangotri

जगदेतदनाधारं भ्रान्तिज्ञानार्थतत्परम् ।
रागादिदुष्टमत्यर्थं भ्राम्यते भवसङ्कटे (च) ॥१७॥

पराशर उवाच ।

एवं बुध्यत बुध्यध्वं बुध्यतैवमितीरयन् ।
मायामोहः स दैतेयान् धर्ममत्याजयन्निजम् ॥१८॥

नानाप्रकारवचनं स तेषां युक्तियोज़ितम् ।
तथा तथा च तद्धर्मं तत्यजुस्ते यथा यथा ॥१९॥

तेऽप्यन्येषां तथैवोचुरन्यैरन्ये तथोदिताः ।
मैत्रेय ! तत्यजुर्धर्मं वेदस्मृत्युदितं परम् ॥२०॥

अन्यानप्यन्यपाषण्डप्रकारैर्बहुभिर्द्विज !
दैतेयान् मोहयामास मायामोहोऽतिमोहकृत् ॥२१॥

स्वल्पेनैव हि कालेन मायामोहेन तेऽसुराः ।
मोहितास्तत्यजुः सर्वां त्रयीमार्गाश्रितां कथाम् ॥२२॥

केचिद्विनिन्दां वेदानां देवानामपरे द्विज !
यज्ञकर्मकलापस्य तथान्ये च द्विजन्मनाम् ॥२३॥

नैतद्युक्तिसहं वाक्यं हिंसा धर्माय नेष्यते ।
हवींष्यनलदग्धानि फलायेत्यर्भकोदितम् (छ) ॥२४॥

यज्ञैरनेकैर्देवत्वमवाप्येन्द्रेण भुज्यते ।
शम्यादि यदि चेत्काष्ठं तद्वरं पत्रभुक् पशुः (ज)॥२५॥

निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन किन्नु तस्मान्न हन्यते ॥२६॥

अनाधारमिति माध्यमिकमतशून्यख्यातिपक्षोक्तिः । भ्रान्तिज्ञानञ्च तदर्थञ्च तत्परं तन्निष्ठम् ॥१७॥

एवं बुध्यतेत्यत्र पुनरुक्तिर्बौद्धपदनिरुक्त्यर्था ॥१८॥

अन्यपाषण्डप्रकारैर्लौकायतिकमतभेदैः ॥२१॥

त्रयीमार्गाश्रितां कथामपि तत्यजुः ॥२२॥

न केवलमेतावत् किन्तु केचित् विनिन्दां वेदानामिति चक्रुरिति शेषः ॥२३॥

निन्दामेव कुतर्कसहितामाह—'नैतदि'ति । हिंसा परमो धर्मायेति यद्वचनम् "अग्निषोमीयं पशुमालभेत" इत्यादि तन्न युक्तिसहं, यतः "मा हिंस्यात् सर्वाभूतानि" इति तन्नेष्यते । चेष्यत इति तु पाठः सुगमः ॥२४

शम्यादि समिद्रूपं काष्ठं वह्नौ हुतञ्चेत् इन्द्रेण भुज्यते तर्हि वरं श्रेष्ठः पशुः यतोऽसौ काष्ठात् कोमलपत्रभुक् ॥२५॥

यज्ञे हतस्य पशोः सद्गतिश्चेत्, तर्हि यजमानेन स्वर्गार्थं स्वपिता किं न हन्यते ॥२६॥

(च) शून्यतत्त्ववादिमाध्यमिक-बौद्धसिद्धान्तमनूद्यापि तेषां वैदिकधर्मबहिष्कारमनुकूलयति—जगदेतदित्यादिना ।

माध्यमिकबौद्धाः किल जगति संवृतिसत्यं परमार्थसत्यञ्चेति द्विविधं वस्तु संगिरन्ते । तन्मते संवृतिरविद्या, तदुपदर्शितं प्रतीत्यसमुत्पन्नं वस्तुरूपमपि संवृतिरुच्यते । सा च संवृतिर्द्विविधा—तथ्यसंवृतिर्मिथ्यासंवृतिश्चेति । परमार्थसत्यन्तु अकृत्रिमं वस्तुरूपं यदभिगमात् सर्वावृतिवासनानुबन्धिक्लेशप्रहाणं भवति, तच्च सर्वधर्माणां निःस्वभावता, तस्याश्च शून्यतातथताः भूतकोटिः धर्मधातुरित्यादयः पर्य्यायाः । एतत् सर्वम् अन्यच्च तन्मतं 'संवृतिः परमानर्थश्च सत्यद्वयमिदं मतम् । बुद्धे रगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते ।' इत्यादि-बोधिचर्य्यावतारमूलपञ्जिकायां प्रज्ञापारमिताख्यनवमपरिच्छेदे वैशद्येनावगन्तव्यम् ।

(छ) अर्भकोदितम् बालभाषितम् अज्ञैः कथितं यावत् ।

(ज) यदि चेदिति पुनरुक्तिरार्षत्वात् सोढव्या ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृप्तये जायते पुंसो भुक्तमन्येन चेत्ततः ।
कुर्याच्छ्राद्धं श्रद्धयान्नं न वहेयुः प्रवासिनः ॥२७॥

जनश्रद्धेयमित्येतदवगम्य ततो वचः ।
उपेक्ष्य श्रेयसे वाक्यं रोचतां यन्मयेरितम् (क)॥२८॥

न ह्याप्तवादा नभसो निपतन्ति महासुराः ।
युक्तिमद् वचनं ग्राह्यं मयान्यैश्च भवद्विधैः ॥२९॥

मायामोहेन ते दैत्याः प्रकारैर्बहुभिस्तथा ।
व्युत्थापिता यथा नैषां त्रयीं कश्चिदरोचयत् (ख)॥३०

इत्थमुन्मार्गयातेषु तेषु दैत्येषु तेऽमराः ।
उद्योगं परमं कृत्वा युद्धाय समुपस्थिताः ॥३१॥

ततो देवासुरं युद्धं पुनरेवाभवद् द्विज !
हताश्च तेऽसुरा देवैः सन्मार्गपरिपन्थिनः ॥३२॥

स्वधर्मकवचस्तेषामभूद् यः प्रथमं द्विज !
तेन रक्षाभवत् पूर्वं नेशुर्नष्टे च तत्र ते (ट) ॥३३॥

ततो मैत्रेय ! तन्मार्गवर्त्तिनो येऽभवञ्जनाः ।
नग्नास्ते तैर्यतस्त्यक्तं त्रयीसंवरणं वृथा (ठ) ॥३४॥

ब्रह्मचारी गृहस्थश्च वानप्रस्थस्तथाश्रमाः ।
परिव्राड् वा चतुर्थोऽत्र पञ्चमो नोपपद्यते ॥३५॥

यस्तु सन्त्यज्य गार्हस्थ्यं वानप्रस्थो न जायते ।
परिव्राड् वापि मैत्रेय ! स नग्नः पापकृन्नरः ॥३६॥

नित्यानां कर्मणां विप्र ! तस्य हानिरहर्निशम् ।
अकुर्वन् विहितं कर्म शक्तः पतति तद्दिने ॥३७॥

प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि ।
पक्षं नित्यक्रियाहानेः कर्त्ता मैत्रेय ! मानवः ॥३८॥

संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्यो निरीक्ष्यः साधुभिः सदा ॥३९

अन्येन श्राद्धे अन्नं भुक्तम् अन्यस्य तृप्तये चेज्जायते, तर्हि प्रवासिनोऽन्नं न वहेयुः, किन्तु स्वग्रामस्थितः पुत्रादिस्तमुद्दिश्य श्राद्धं दद्यात् ॥२७॥

ततो निर्युक्तिकं केवलं पृथग्जनश्रद्धेयमेतद्यज्ञादिविषयं स्यात्, अतो युष्माकमत्रोपेक्षैव युक्ता ॥२८॥

नन्वाप्तवादे वेदे कथम् उपेक्षा तत्राह—'नहो'ति । नहि आप्तवादाः स्वभावतः केचन वर्त्तन्ते । किन्तु यदेव युक्तिमद् वचनं तन्मया अन्यैश्च भवद्विधैश्च ग्राह्यम् । युक्तिश्च पूर्वोक्तरीत्या वेदवादेषु नास्तीति भावः ॥२८॥

(क) रोचतां युष्मभ्यमिति शेषः ।

(ख) व्युत्थापिता विकृतिं प्रापिताः ।

(ट) स्वधर्मः निजो वैदिको धर्मः स एव कवचः युद्धे कवचस्य रक्षाकरः । तत्र तस्मिन् स्वधर्मकवचे नष्टे सति ते असुराः नेशुः नाशं प्राप्ताः ।

तेषां मध्ये ॥३०॥

गार्हस्थ्यं परित्यज्य वानप्रस्थः परिव्राड् वा यो न जायते, स च नग्नः ॥३६॥

नग्नस्य तत्संसर्गिणश्च दोषमाह—'नित्याना'मित्यादिना 'यदेभिरवलोकित'मित्यन्तेन । विहितं नित्यं पतति पापवान् भवति ॥३७॥

एवं पक्षक्रियाहानेर्हेतोः प्रायश्चित्तेन महता शुद्धिं प्राप्नोतीत्यर्थः । एवं मासादिक्रियाहानावधिकं प्रायश्चित्तं ज्ञेयम् ॥३८॥

तस्य संवत्सरक्रियालोपकर्त्तुः ॥३९॥

(ठ) वृथेति अहेतुकमित्यर्थः । एतेन शास्त्रोक्त-विशेषकारणसन्निधाने त्रयीसंवरणत्यागो न दोषायेति सूच्यते । त्रयी एव संवरणं आवरणम् त्यक्तम्, अत एव ते निरावरणत्वात् नग्नपदवाच्या इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्पृष्टे स्नानं सचेलस्य शुद्धेर्हेतुर्महामते !
पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मणः (ड)॥४०

देवर्षिपितृभूतानि यस्य निःश्वस्य वेश्मनि ।
प्रयान्त्यनर्चितान्यत्र लोके तस्मान्न पापकृत् ॥४१॥

देवादिनिःश्वासहतं शरीरं यस्य वेश्म च ।
न तेन सङ्करं कुर्याद् गृहासनपरिच्छदैः ॥४२॥

सम्भाषणानुप्रश्नादि सहास्यां चैव कुर्वतः ।
जायते तुल्यता तस्य तेनैव द्विज ! वत्सरम् (ढ)॥४३॥

अथ भुङ्क्ते गृहे तस्य करोत्यास्यां तथासने ।
शेते चाप्येकशयने स सद्यस्तत्समो भवेत् ॥४४॥

देवतापितृभूतानि तथानभ्यर्च्य योऽतिथीन् ।
भुङ्क्ते स पातकं भुङ्क्ते निष्कृतिस्तस्य कीदृशी ॥४५

ब्राह्मणाद्यास्तु ये वर्णाः स्वधर्मादन्यतोमुखम् ।
यान्ति ते नग्नसंज्ञां तु हीनकर्मस्ववस्थिताः ॥४६॥

चतुर्णां यत्र वर्णानां मैत्रेयात्यन्तसङ्करः ।
तत्रास्या साधुवृत्तीनामुपघाताय जायते ॥४७॥

अनभ्यर्च्य ऋषीन् देवान् पितॄन् भूतातिथींस्तथा ।
यो भुङ्क्ते तस्य सम्भाषात् पतन्ति नरके नराः ॥४८॥

तस्मादेतान्नरो नग्नांस्त्रयीसन्त्यागदूषितान् ।
सर्वदा वर्जयेत् प्राज्ञ आलापस्पर्शनादिषु ॥४९॥

श्रद्धावद्भिः कृतं यत्नाद्देवान् पितृपितामहान् ।
न प्रीणयति तच्छ्राद्धं यदेभिरवलोकितम् ॥५०॥

श्रूयते च पुरा ख्यातो राजा शतधनुर्भुवि ।
पत्नी च शैव्या तस्याभूदतिधर्मपरायणा ॥५१॥

पतिव्रता महाभागा सत्यशौचदयान्विता ।
सर्वलक्षणसम्पन्ना विनयेन नयेन च (ण) ॥५२॥

स तु राजा तया सार्द्धं देवदेवं जनार्दनम् ।
आराधयामास विभुं परमेण समाधिना ॥५३॥

अत्र पृथिव्याम् ॥४१॥

गृहादिभिः सङ्करं संसर्गम् ॥४२॥

सहास्यामेकत्र स्थितिम् । साहाय्यमिति पाठे परस्परं सम्भाषादिसमानक्रियात्वं संवत्सरं कुर्वतः तेन नग्नेन तुल्यत्वं जायते ॥४३॥

इदानीं भोजनादीनि युगपत् क्रियमाणानि सद्यः हेतव इत्याह—'अथे'ति ॥४४॥

ब्राह्मणाद्याः स्वधर्मादन्यतोमुखं विमुखं यान्ति ये नग्नसंज्ञां यान्तीत्यन्वयः ॥४६॥

संकरो गृहादिषु आस्या स्थितिः ॥४७॥

कृतं श्राद्धमित्यन्वयः ॥५०॥

तत्र पाषण्डालापदोषं दर्शयितुम् इतिहासमाह—'श्रूये'त्यादिना यावत्समाप्ति ॥५१॥

(ड) स्पृष्टे संवत्सरं व्याप्य क्रियालोपकारिणि तस्मिन् स्पृष्टे सतीत्यर्थः । पुंसः स्पर्शनकारिणः । अथवा स्पृष्टे स्पर्शने सति । स्पृष्टमत्र पक्षे भावक्तप्रत्ययान्तम् ।

(ढ) आस्येत्यास्धातोः क्यप्प्रत्यये रूपम् । आसने एकस्मिन् खट्वाद्यासने तेन सहेति शेषः । अथवा तस्य आसने इति सम्बन्धः ।

(ण) विनयेन नयेन च सम्पन्नेति शेषः । अथवा विनयेन च गुणेन सर्वेषां लक्षणं दृष्टिः तत्सम्पन्ना निरूपणीया सर्वेषां लक्षणीयेत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

होमैर्जपैस्तथा दानैरुपवासैश्च भक्तितः ।
पूजाभिश्चानुदिवसं तन्मना नान्यमानसः ॥५५॥

एकदा तु समं स्नातौ तौ तु भार्यापती जले ।
भागीरथ्याः समुत्तीर्णौ कार्त्तिक्यां समुपोषितौ(त) ।
पाषण्डिनमपश्येतामायान्तं सम्मुखं द्विज ॥५६॥

चापाचार्यस्य तस्यासौ सखा राज्ञो महात्मनः ।
अतद्गौरवात्तेन सहालापमथाकरोत् (थ) ॥५७॥

न तु सा वागयता देवी तस्य पत्नी पतिव्रता ।
उपोषितास्मीति रविं तस्मिन् दृष्टे ददर्श च ॥५८॥

समागम्य यथान्यायं दम्पती तौ यथाविधि ।
विष्णोः पूजादिकं सर्वं कृतवन्तौ द्विजोत्तम ॥५९॥

कालेन गच्छता राजा ममारासौ सपत्नजित् ।
अन्वारुरोह तं देवी चितास्थं भूपतिं पतिम्(द) ॥६०॥

स तु तेनापचारेण श्वा जज्ञे वसुधाधिपः ।
उपोषितेन पाषण्डसंलापी यः कृतोऽभवत् ॥६१॥

सा तु जातिस्मरा जज्ञे काशीराजसुता शुभा ।
सर्वविज्ञानसम्पूर्णा सर्वलक्षणपूजिता ॥६२॥

तां पिता दातुकामोऽभूत् वराय विनिवारितः ।
तयैव तन्व्या विरतो विवाहारम्भतो नृपः ॥६३॥

ततः सा दिव्यया दृष्ट्या दृष्ट्वा श्वानं निजं पतिम् ।
विदिशाख्यं पुरं गत्वा तदवस्थं ददर्श तम् ॥६४॥

तं दृष्ट्वैव महाभागं श्वभूतन्तु पतिं तथा ।
ददौ तस्मै वराहारं सत्कारप्रवणं शुभम्(ध) ॥६५॥

भुञ्जन् दत्तं तया सोऽन्नमतिमृष्टमभीप्सितम् ।
श्वजातिललितं कुर्वन् बहु चाटु चकार वै(न) ॥६६॥

अतीव व्रीडिता बाला कुर्वता चाटु तेन सा ।
प्रणामपूर्वमाहेदं दयितं तं कुयोनिजम् ॥६७॥

पत्न्युवाच ।

स्मर्य्यतां तन्महाराज ! दाक्षिण्यललितं त्वया ।
येन श्वयोनिमापन्नो मम चाटुकरो भवान् ॥६८॥

तस्य राज्ञश्चापाचार्य्यस्य धनुर्विद्यागुरोरसौ पाषण्डी सत्रेत्यन्वयः ॥५५॥

तेनापचारेण नग्नसंसर्गेण पापेन । तदेवाह उपोषितेन राज्ञा पाषण्डसम्भाष आलापः ॥६१॥

सर्वस्मिन्नर्थे विज्ञानमबाधितज्ञानं तेन सम्पूर्णा स्वभावतः पूर्णा सर्वज्ञेत्यर्थः ॥६२॥

तया काशीराजसुतया तथा विनिवारितः सन् ॥६३॥

दाक्षिण्याद् गुरोः सखेति सद्भावात् ललितं प्रीतिसम्भाषणं स्मर्य्यतां, येन भवान् मम चाटुकारो ज्ञात इत्यर्थः । चाटुः प्रीतिचेष्टा ॥६८॥

(त) कार्त्तिक्यां कार्त्तिकमासीयपूर्णिमायाम् । समुपोषितौ कृतोपवासौ ।

(थ) तस्य राज्ञः यः चापाचार्य्यः धनुर्विद्यागुरुः तस्य सखा मित्रम् । आसीदिति शेषः ।

(द) अन्वारुरोह चिताग्निप्रवेशेन अन्वगच्छत् अनुमृतामनदित्यर्थः ।

(ध) सत्कारप्रवणं सत्कारपूर्वकं समादरपुरःसरमित्यर्थः ।

(न) तया जन्मान्तरीणनिजपत्न्या शैव्यया दत्तम् अन्नं भुञ्जन् भुञ्जानः । भुञ्जन्नित्यार्षम् । श्वजातिललितं सारमेयजातिसमुचितविलासमित्यर्थः । 'स्त्रीणां विलासविव्वोकविभ्रमा ललितन्तथा' इतिकोषात् ललितशब्दस्य स्त्रीविलासार्थकस्यापि सामान्यविलासार्थेऽत्र प्रयोगः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाषण्डिनं समाभाष्य तीर्थस्नानादनन्तरम् ।
प्राप्तोऽसि कुत्सितां योनिं किं न स्मरसि तत्प्रभो ! ॥६९॥

श्रीपराशर उवाच ।

तयैवं स्मारिते तस्मिन् पूर्वजातिकृते तदा ।
दध्यौ चिरमथावाप निर्वेदमतिदुर्लभम् ॥७०॥
निर्विण्णचित्तः स ततो निर्गम्य नगराद् बहिः ।
मरुप्रपतनं कृत्वा शार्गालीं योनिमागतः ॥७१॥
सापि द्वितीये सम्प्राप्ते वर्षे दिव्येन चक्षुषा ।
ज्ञात्वा शृगालं तं द्रष्टुं ययौ कोलाहलं गिरिम् ॥७२॥
तत्रापि दृष्ट्वा तं प्राह शार्गालीं योनिमागतम् ।
भर्त्तारमतिचार्वङ्गी तनया पृथितीपतेः ॥७३॥

पत्न्युवाच ।

अपि स्मरसि राजेन्द्र ! श्वयोनिस्थस्य यन्मया ।
प्रोक्तं ते पूर्वचरितं पाषण्डालापसंश्रयम् ॥७४॥
पुनस्तयोक्तस्तज्ज्ञात्वा सत्यं सत्यवतां वरः ।
कालेन स निराहारस्तत्याज स्वं कलेवरम् ॥७५॥
भूयस्ततो वृकं जातं गत्वा तं निर्जने वने ।
स्मारयामास भर्त्तारं पूर्ववृत्तमनिन्दिता ॥७६॥
न त्वं वृको महभाग ! राजा शतधनुर्भवान् ।
श्वा भूत्वा त्वं शृगालोऽभूर्वृकत्वं साम्प्रतं गतः ॥७७॥

पराशर उवाच ।

स्मारितेन यदा त्यक्तस्तेनात्मा गृध्रतां गतः ।
अवाप सा पुनश्चैनं बोधयामास भाविनीं ॥७८॥
नरेन्द्र ! स्मर्यतामात्मा ह्यलं ते गृध्रचेष्टया ।
पाषण्डालापजातोऽयं दोषो यद्गृध्रतां गतः(प) ॥७९॥
ततः काकत्वमापन्नं समनन्तरजन्मनि ।
उवाच तन्वी भर्त्तारमुपलभ्यात्मयोगतः ॥८०॥
अशेषा भूभृतः पूर्वं वश्या यस्मै बलिं ददुः ।
स त्वं काकत्वमापन्नो जातोऽद्य बलिभुक् प्रभो ॥८१॥

पराशर उवाच ।

एवमेव च काकत्वे स्मारितः स पुरातनम् ।
तत्याज भूपतिः प्राणान् मयूरत्वमवाप च ॥८२॥
मयूरत्वं ततः सा वै चकारानुगतिं शुभा ।
दत्तैः प्रतिक्षणं हृद्यैस्तृप्तं तज्जातिभोजनैः ॥८३॥
ततस्तु जनको राजा वाजिमेधं महाक्रतुम् !
चकार तस्यावभृथे स्नापयामास तं तदा(फ) ॥८४॥

मरुप्रपतनं गिरिशृङ्गात् पातं निरुदकदेशे महापथगमनं वा । शार्गालीं शृगालसम्बन्धिनीं योनिम् ॥७१॥

वृकं वनश्वानं क्षुद्रव्याघ्रं वा ॥७६॥

यदा आत्मा देहस्त्यक्तस्तदा गृध्रतां गतः । एनं गृध्रम् अवाप बोधयामास च ॥७८॥

आत्मा राज-देहः स्मर्यताम् । त्यज्यतामिति यावत् । आत्मा गृध्रदेहः । अयं येन दोषेण ॥७९॥

उपलभ्य ज्ञात्वा प्राप्य च ॥८०॥

बलिं करम् । बलिभुक् उपहारपिण्डभुक् ॥८१॥

तज्जातिभोजनैर्मयूरजातिभोजनैर्भक्ष्यैः ॥८३॥

(प) गृध्रचेष्टया गृध्रपक्षिसमुचितक्रियया अलम् । सैषा वार्थ्यतामित्यर्थः ।

(फ) वाजिमेधम् अश्वमेधम् । तस्य महाक्रतोः अवभृथे यज्ञान्तकर्त्तव्ये स्नाने । तं मयूररूपिणं निजपतिं स्नापयामास पूतजलेनेति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सखौ स्वयं च तन्वङ्गी स्मारयामास चापि तम् ।
यथासौ श्वश्रृगालाद्या योनीर्जग्राह पार्थिवः ॥८५॥

स्मृतजन्मक्रमः सोऽथ तत्याज स्वं कलेवरम् ।
जज्ञे स जनकस्यैव पुत्रोऽसौ सुमहात्मनः ॥८६॥

ततः सा पितरं तन्वी विवहार्थमचोदयत् ।
स चापि कारयामास तस्या राजा स्वयंवरम् ॥८७॥

स्वयंवरे कृते सा तं सम्प्राप्तं पतिमात्मनः ।
वरयामास भूयोऽपि भर्तृभावेन भामिनी ॥८८॥

बुभुजे च तया सार्द्धं सम्भोगान्नृपनन्दनः ।
पितर्य्युपरते राज्यं विदेहेषु चकार सः ॥८९॥

इयाज यज्ञान् सुबहून् ददौ दानानि चार्थिनाम् ।
पुत्रानुत्पादयामास युयुधे च सहारिभिः(भ) ॥९०॥

राज्यं भुक्त्वा यथान्यायं पालयित्वा वसुन्धराम् ।
तत्याज स प्रियान् प्राणान् संग्रामे धर्मतो नृपः ॥९१॥

ततश्चितास्थं तं भूयो भर्त्तारं सा शुभेक्षणा ।
अन्वारुरोह विधिवद् यथापूर्वं मुदा सती ॥९२॥

ततोऽवाप तया सार्द्धं राजपुत्र्या स पार्थिवः ।
ऐन्द्रानतीत्य वै लोकान् लोकान् कामदुहोऽक्षयान्॥९३

स्वर्गाक्षयत्वमतुलं दाम्पत्यमतिदुर्लभम् ।
प्राप्तं पुण्यफलं प्राप्य संशुद्धिं तां द्विजोत्तम(म) ॥९४॥

एष पाषण्डसम्भाषाद्दोषः प्रोक्तो मया द्विज !
तथाश्वमेधावभृथस्नानमाहात्म्यमेव च ॥९५॥

तस्मात् पाषण्डिभिः पापैरालापस्पर्शनं त्यजेत् ।
विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षितः ॥९६॥

क्रियाहानिर्गृहे यस्य मासमेकं प्रजायते ।
तस्यावलोकनात् सूर्यं पश्येत मतिमान् नरः(य) ॥९७॥

किं पुनर्यैस्तु सत्यक्ता त्रयी सर्वात्मना द्विज !
परान्नभोजिभिः पापैर्वेदवादविरोधिभिः ॥९८॥

आत्मनः पतिं स्वयंवरे वरयामासेत्युक्त्वा परिव्रतया स्वस्य पत्युः ज्ञातस्य तत्रापि स्वयंवरविषये वरणे स्त्री-पुरुषयोर्ज्येष्ठ-कनिष्ठभावेऽपि दोषाभावः सूचितः ॥८८॥

ऐन्द्रान् लोकान् अतीत्य कामदुहः कामदुघान् लोकान् प्राप ॥९३॥

ताम् अश्वमेधावभृथस्नानजां सिद्धिं पाषण्डिसंसर्गज-पापक्षय-पुण्यवृद्धिरूपाम् ॥९४॥

इदानीं कैमुतिकन्यायेन पूर्वोक्तमेव प्रायश्चित्तमाह—'क्रियाहानि'रिति ॥९७॥

यैः त्रयी त्यक्ता तेषां दर्शनात् सूर्यं पश्येदिति किं पुनर्वाच्यम् परान्नभोजिभिः पाषण्डान्नभोजिभिः ॥९८॥

(ब) सा शैव्या पितरं काशीराजम् । विवाहार्थं स्वीय-विवाहक्रियायै अचोदयत् प्रवर्त्तयामास ।

(भ) अर्थिनामित्यत्र सम्बन्धसामान्यविवक्षया षष्ठी, अर्थिभ्य इत्यर्थः । ददौ चकार । अथवा दानानि देयद्रव्याणि ददौ विततार । इयाजेत्यस्यापि चकारेत्यर्थः ।

(म) स्वर्गाक्षयत्वमित्यत्र स्वर्गः अक्षयः यस्य तस्य भावस्तत्त्वम् । अक्षयेति विशेषणस्य परनिपात आर्षः । अथवा स्वर्गस्य अक्षयत्वमिति षष्ठीतत्पुरुषः ।

(य) पश्येतेत्यात्मनेपदमार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सहालापस्तु संसर्गः सहास्या चातिपापिनी ।
पाषण्डिभिर्दुराचारैस्तस्मात्ताः परिवर्जयेत् ॥९९॥

पाषण्डिनो विकर्मस्थान् वैडालव्रतिकाञ्छठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥१००॥

दूरादपास्तः सम्पर्कः सहस्यापि च पापिभिः ।
पाषण्डिभिर्दुराचारैस्तस्मात्ताः परिवर्जयेत् ॥१०१॥

एते नग्नास्तवाख्याता दृष्ट्या श्राद्धोपघातकाः ।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति ॥१०२॥

एते पाषण्डिनः पापा न ह्येतानालपेद् बुधः ।
पुण्यं नश्यति सम्भाषादेतेषां तद्धिनोद्भवम् ॥१०३॥

पुंसां जटाधरणमौण्ड्यवतां वृथैव ।
मोघाशिनामखिलशौचनिराकृतानाम् ।
तोयप्रदानपितृपिण्डबहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति(र) ॥१०४॥

इति श्रीविष्णुपुराणे तृतीयेंऽशे अष्टादशोऽध्यायः ।

श्रीमति विष्णुमहापुराणे तृतीयोंऽशः समाप्तः ॥

पाषण्डादयः सर्वे वेदविरुद्धा एव यदाहुः । "भ्रष्टः स्वधर्मात् पाषण्डो विकर्मस्थो निषिद्धकृत् । यस्य धर्मध्वजो नित्यं सुराध्वज इवोच्छ्रितः । प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् । प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् । त्यक्तोपरोधचेष्टश्च शठोऽयं कथितो बुधैः । सन्देहकृद्धेतुभिश्च सत्कर्मसु सहेतुकः । अर्वाग्दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः ।" इति । वाङ्मात्रेणापि नार्च्चयेत् । तैः सम्भाषणमपि न कुर्यात् ॥१००॥

यदा चैवं तदा पूर्वोक्तैः पापिभिः सह सम्पर्कः सहभोजनादिरूपो दूरादपास्तो निषिद्धः । सहास्यापि निषिद्धा । किं बहुना, सर्वात्मना तान् परिवर्जयेत् ॥१०१॥

नग्नपाषण्डिनोः पूर्वदोषमनुवदन् उपसंहरति—'एत' इति द्वाभ्याम् ॥१०२॥

सर्वेषां तेषां सामान्यदोषम् आह,—'पुंसामि'ति । वृथैवेति विशेषणादथर्व्वशिरःप्रोक्तं शैव-पाशुपतव्रताद्यङ्गभूतजटाधारणाद्यनुमन्यते अमोघाशिनां देवतातिथ्यादिपूजां विना अन्नभोक्तृणाम् अखिलशौचैर्बाह्याभ्यन्तरशौचैर्निराकृतानां वर्ज्जितानां तोयप्रदानादिभ्यो मायामोहेन बहिष्कृतानामिति । तपसोऽपि स्तुतिः श्रेष्ठेत्याविष्कुर्वन् सुरेतरान् । तपस्यमिरतान् देवैः स्तुतो विष्णुरमूमुहत् ॥१०४॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां तृतीयेंऽशे अष्टादशोऽध्यायः समाप्तः ॥

(र) मौन्ड्यम् मुन्डितशिरस्कत्वम् । तोयप्रदानं तर्पणजलदानं पितृतर्पणमित्यर्थः । सम्भाषणादपि इत्यपिशब्देन कैमुतिकन्यायाद् गुरुनरसम्बन्धान्तरान्नरकप्राप्तेरावश्यकत्वं बोध्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थांशः

प्रथमोऽध्यायः ।

[वंशविस्तारकथनम्। ब्रह्मणो दक्षादीनाञ्चोत्पत्तिः, पुरूरवसो जन्म, रेवत्या सह बलरामस्य विवाहश्च]

मैत्रेय उवाच ।

भगवन् ! यन्नरैः कार्य्यं साधुकर्म्मण्यवस्थितैः ।
तन्मह्यं गुरुणाख्यातं नित्यनैमित्तिकात्मकम् ॥१॥
वर्णधर्म्मास्तथाख्याता धर्म्मा ये चाश्रमेषु वै
श्रोतुमिच्छाम्यहं वंशान् तांस्त्वं प्रब्रूहि मे गुरो ॥२॥

पराशर उवाच ।

मैत्रेय ! श्रूयतामयमनेकयज्ञवीरशूरभूपालालङ्कृतो ब्रह्मादिर्मानवो वंशः ।

तथा चोच्यते ।

ब्रह्माद्यं यो मनोर्वंशमहन्यहनि संस्मरेत् ।
तस्य वंशसमुच्छेदो न कदाचिद्भविष्यति ॥३

तदस्य वंशानुपूर्व्वीमशेषपापप्रक्षालनाय मैत्रेयैतां शृणु । तद् यथा सकलजगतामनादिरादिभूत ऋग्-यजुः-सामादिमयो भगवद्विष्णुमयं ब्रह्मणो मूर्त्तिरूपं हिरण्यगर्भो ब्रह्माण्डतो भगवान् ब्रह्मा प्राग्बभूव ॥४

ब्रह्मणश्च दक्षिणाङ्गुष्ठजन्मा दक्षः प्रजापतिः, दक्षस्याप्यदितिः, अदितेर्विवस्वान्, विवस्वतो मनुः, मनोरिक्ष्वाकु-नृग-धृष्ट-शर्य्याति-नरिष्यन्त-प्रांशु-नाभा-गनेदिष्ठ-करूष-पृषध्राख्याः पुत्रा बभूवुः ॥५॥
इष्टिञ्च मित्रावरुणयोर्म्मनुः पुत्रकामश्चकार ॥६॥

प्रथमः अध्यायः

धर्मोपधर्मयोः पूर्वमुक्तयोरनुवर्ण्यते। मनुवंशश्चतुर्थांशे [क]निवर्त्तकः। नेदिष्ठवंशं प्रथमेऽकथयद् यत्र रैवतः। स्वसुतां हलिने प्रादात् स्वसुतां द्रुहिणाज्ञया। उक्तानुवाद-पूर्वकं मनुवंशं पृच्छति,—'भगवन्निं'ति। गुरुणा त्वया ख्यातम् ॥१॥

वीर उत्साहवान्, शूरः पराभिभावी। ब्रह्मा आदिर्मूल-कारणं यस्य सः। मानवो वैवस्वतस्य मनोः सम्बन्धी। तत्र क्रमं वंशस्मरणादिफलमाह—'ब्रह्माद्यमि'ति ॥३॥

ब्रह्माण्डतो ब्रह्मा प्राग् बभूव। किंविशिष्टः जगतामादि-कारणं स्वयञ्चानादिः दृष्टकारणशून्यः। भगवद्विष्णु-स्यस्य भगवद्विष्णोर्मूर्त्तिः। मूर्त्तिरूपं परिच्छिन्नं स्वरूपम्। रण्यस्य ब्रह्माण्डस्य गर्भरूपश्चेत्यर्थः ॥४॥

तत्र तावत् 'अदितिर्ह्यजनिष्ट दक्षस्य दुहिता, तां देवा अनुजायन्त इत्यादि-श्रुतिसिद्धां वंशानुपूर्वीमाह—'ब्रह्मण' इति। दक्षस्य अदितिः कन्येति शेषः। नाभाग-नेदिष्ठेति नाभागस्य पिता नेदिष्ठ इत्यर्थः। क्वचिन्नेदिष्ठस्यैव दिष्टः इत्यपि संज्ञा ॥५॥

इष्टिञ्च पुत्रोत्पत्तेः पूर्वमेव चकार। यथाह वायुः,—'अकरोत् पुत्रकामस्तु मनुरिष्टिं प्रजापतिः। अनुत्पन्नेषु नवसु पुत्रेष्वेतेषु सुव्रत'। इति ॥६॥

(क) वंशानुपूर्वीम् पूर्वतः प्रभृति वंश्यानां क्रममित्यर्थ।

(ख) दक्षिणाङ्गुष्ठात् जन्म यस्य सः दक्षिणाङ्गुष्ठजन्मेति। व्यधिकरणबहुव्रीहिः, अग्र्यो व्यधिकरणबहुव्रीहिर्जन्माद्युत्तरपदे इत्यनुशासनात् तस्य साधुत्वम्। विवस्वान् सूर्य्यः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३०२ विष्णुपुराणम् [चतुर्थांश

तत्रापहृते होतुरपचारादिला नाम कन्या बभूव ॥७॥

सैव च मित्रावरुणप्रसादात् सुद्युम्नो नाम मनोः पुत्रो मैत्रेयासीत्। पुनश्चेश्वरकोपात् स्त्री सती सोमसूनोर्बुधस्याश्रमसमीपे बभ्राम(ग) ॥८॥

सानुरागश्च तस्यां बुधः पुरूरवसमात्मजमुत्पादयामास ॥९॥

जाते च तस्मिन्नमिततेजोभिः परमर्षिभिरिष्टिमयऋङ्मयो यजुर्म्मयः साममयोऽथर्व्वमयः सर्वमयो मनोमयो ज्ञानमयोऽकिञ्चिन्मयो भगवान् यज्ञपुरुषस्वरूपी सुद्युम्नस्य पुंस्त्वमभिलषद्भिर्यथावदिष्टः ॥१०॥

तत्प्रसादादिला पुनरपि सुद्युम्नोऽभवत्(घ) ॥११॥

तस्याप्युत्कलगयविनतसंज्ञास्त्रयः पुत्रा बभूवुः। सुद्युम्नस्तु स्त्रीपूर्वकत्वाद् राज्यभागं न लेभे ॥१२॥

तत्पित्रा तु वशिष्ठवचनात् प्रतिष्ठानं नाम नगरं सुद्युम्नाय दत्तम्। तच्चासौ पुरूरवसे प्रादात्। पृषध्रस्तु गुरुगोवधात् शूद्रत्वमगमत्(ङ) ॥१३॥

करूषात् कारूषा महाबलाः क्षत्त्रिया बभूवुः ॥१४॥

नाभागो नेदिष्ठपुत्रस्तु वैश्यतामगमत् ॥१५॥

तस्माद् भलन्दनः पुत्रोऽभवत्। भलन्दनाद्वत्सप्रीरुदारकीर्त्तिः, वत्सप्रेः प्रांशुरभवत्, प्रजापतिप्रांशोरेकोऽभवत्, ततश्च खनित्रः, तस्माच्च क्षुपः, क्षुपाच्च अतिबलपराक्रमोऽविविंशोऽभवत्। तो विविंशः, तस्माच्च खनीनेत्रः, ततश्चातिविभूतिः, अतिविभूतेर्भूरिबलपराक्रमः करन्धमः पुत्रोऽभवत्, तस्मादप्यविक्षिः, अविक्षेरप्यतिबलः पुत्रो मरुत्तोऽभवत् ॥१६॥

सुद्युम्नस्य प्रथमं कन्यात्वाद् राज्यानर्हत्वं दर्शयन्नाह तत्र,—तस्मिन् कर्मणि मनुपत्न्या कन्यार्थं प्रार्थितस्य होतुरपचारात् कन्यासंकल्परूपादपहृते विकल्पे जाते सति कन्याभूत्। अपकृतेरिति पाठे अपकृष्टात् होमाद्धेतोरित्यर्थः ॥७॥

ईश्वरकोपादिति,—महादेवः किल इलावृते पार्वत्या सह रममाणः केनचिन्निमित्तेनाशपत्—योऽस्मिन् वने प्रवेक्ष्यति, स योषिद् भविष्यति इति। सुद्युम्नस्तं शापमजानन् तत्र प्रविष्टो योषिद् बभूवेति ॥८॥

तस्यां स्त्रियां पुरूरवसमुत्पादयामासेत्यतः सूर्यवंश एव चन्द्रवंशसमुद्भवः सूचितः ॥९॥

तस्मिंश्च जाते परमर्षिभिर्भगवान् यथावदिष्टः व्यवहारत इष्ट्यादिमयः वस्तुतस्त्वकिञ्चिन्मयः ॥१०॥

स्त्रीपूर्वकत्वात् पूर्वं स्त्रीत्वादित्यर्थः ॥१२॥

पृषध्रस्यापि राज्यानर्हत्वं प्रसङ्गादाह—'पृषध्रः' इति। वसिष्ठगोरक्षणे नियुक्तो रात्रौ व्रजे प्रविष्टं व्याघ्रं जिघांसया प्रमादात् तां जघानेति गुरुणा शप्तः शूद्रत्वमवापेत्यर्थः ॥१३॥

अत्र पाठक्रमो न विवक्षितः सूचीकटाहन्यायेनानुपूर्वकथनादित्यत आह—'करूषादि'ति ॥१४॥

नेदिष्ठपुत्रो नाभागो वैश्यतां गतः। 'नाभागो दिशं पुत्रोऽन्यः कर्मणा वैश्यतां गतः' इति शुकोक्तेः ॥१५॥

तस्य च पुत्रोत्पत्तेरुत्तरकालमेव वैश्यत्वप्राप्त्या [ततश्च] भलन्दनस्य क्षत्रियत्वम् अविरुद्धमेव। अत एव तदन्वये मरुत्तस्य चक्रवर्त्तित्वं संगच्छते। अविक्षेरेव कश्चिदपि दित्यपि नाम ॥१६॥

(ग) सोमसूनोः चन्द्रपुत्रस्य बृहस्पतिपत्न्यां तारायां कामधर्मेणोत्पादितस्य।

(घ) इला तदाख्या मनोः कन्या। तत्प्रसादात् परमर्षिभिरिष्टस्य भगवतो विष्णोरनुग्रहात्।

(ङ) तत्पित्रा तज्जनकेन मनुना। पुरूरवसे तस्याय स्वपुत्राय।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्येमावद्यापि श्लोकौ गीयेते ।—

मरुत्तस्य यथा यज्ञस्तथा कस्याभवद् भुवि ।
सर्वं हिरण्मयं यस्य यज्ञ वस्त्वतिशोभनम् ॥
अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः(च) ।
मरुतः परिवेष्टारः सदस्याश्च दिवौकसः ॥१७॥

मरुत्तश्चक्रवर्त्ती नरिष्यन्तनामानं पुत्रमवाप । तस्माच्च दमः, दमस्य पुत्रो राज्यवर्द्धनो जज्ञे । राज्यवर्द्धनात् सुधृतिरभूत् । ततश्च नरः, तस्माच्च केवलः, केवलाद् बन्धुमान्, बन्धुमतो वेगवान्, वेगवतो बुधः, ततः तृणबिन्दुः, तस्याप्येका कन्या इलिबिला नाम । तञ्चालम्बुषा नाम वराप्सरा तृणबिन्दुं भेजे । तस्यामस्य विशालो जज्ञे ; यः पुरीं वैशालीं नाम निर्म्ममे । हेमचन्द्रश्च विशालस्य पुत्रोऽभवत् । तस्माच्च सुचन्द्रः, तत्तनयो धूम्राश्वः, तस्यापि सृञ्जयोऽभूत् । सृञ्जयात् सहदेवः, ततः कृशाश्वो नाम पुत्रोऽभूत् । सोमदत्तः कृशाश्वाज्जज्ञे ; यो दशाश्वमेधानाजहार । ततपुत्रश्च जनमेजयः, जनमेजयात् सुमतिः । एते वैशालका भूभृतः ॥१८॥

श्लोकोऽप्यत्र गीयते ।—

तृणविन्दोः प्रसादेन सर्व्वे वैशालका नृपाः ।
दीर्घायुषो महात्मानो वीर्य्यवन्तोऽतिधार्म्मिकाः ॥१९॥

शर्य्यातेः कन्या सुकन्या नामाभवत् ; यामुपयेमे च्यवनः । आनर्त्तश्च नाम धार्म्मिकः शर्य्याति-पुत्रोऽभवत् । आनर्त्तस्यापि रेवतो नाम पुत्रो जज्ञे, योऽसावानर्त्तविषयं बुभुजे, पुरीञ्च कुश-स्थलीमध्युवास । रेवतस्यापि रैरतः पुत्रः ककुद्मी नाम धर्म्मात्मा भ्रातृशतज्येष्ठोऽभवत् । तस्य च रेवती नाम कन्या । तामादाय कस्येयमर्हतीति भगवन्तमब्जयोनिं प्रष्टुं ब्रह्मलोकं जगाम(छ)। तावच्च ब्रह्मणोऽन्तिके हाहाहूहूसंज्ञाभ्यां गन्धर्व्वाभ्यामतितानं नाम दिव्यं गान्धर्व्वमगीयत ॥२०॥

तावच्च त्रिमार्गपरिवर्त्तैरनेकयुगपरिवृत्ति तिष्ठन्नपि रैवतकः शृण्वन् मुहूर्त्तमिव मेने ॥२१॥

अमाद्यत् सोमपानेनातितृप्त्या हृष्टो बभूवेत्यर्थः । मरुतो देवाः । परिवेष्टारः अन्नादिपरिवेशकाः ॥१७॥

अतितानं गेयविशेषः । दिव्यं दिवि भवं, पृथिव्यां तद्-भावात् । गान्धर्वं गन्धर्वाणां कर्म गीतम् । गान्धार-मिति पाठे गान्धारग्रामबहुलम् ॥२०॥

त्रयो मार्गाः षड्ज-मध्यम-गान्धाराख्याश्चित्रदक्षिण-वर्त्तिकाख्या वा, तेषां परिवर्त्तैरावर्त्तनैरनेकेषां युगानां परिवृत्तिर्यथा भवति, तथा अनेकयुगपरिवृत्ति तिष्ठन्नपि तत् शृण्वन् मुहूर्त्तमिव मेने इत्यर्थः । परिवर्त्तीति पाठे गान्धर्व-विशेषणम् ॥२१॥

(च) अमाद्यदिति यत्र यज्ञे येन यज्ञेनेति वा शेषः ।

(छ) आनर्त्तविषयम् आनर्त्तदेशम् । भ्रातृशतज्येष्ठ इति अनेन रेवतस्य शतं पुत्रा आसन्निति गम्यते । तस्य च रैवतस्य । जगाम रैवत इति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३०४ विष्णुपुराणम् [चतुर्थांश

गीतावसाने भगवन्तमब्जयोनिं प्रणम्य रैवतकः कन्यायोग्यं वरमपृच्छत्। तञ्चाह भगवान्;—कथय योऽभिमतस्ते वर इति। पुनश्च प्रणम्य भगवते यथाभिमतानात्मनः स वरान् कथयामास,—क एषां भगवतोऽभिमतः? कस्मै कन्यामिमां प्रयच्छामीति। ततः किञ्चिदवनतशिराः सस्मितो भगवान् अब्जयोनिराह ॥२२॥

ये एते भवतोऽभिमताः, नैतेषां साम्प्रतमपत्यापत्यसन्ततिरप्यवनीतलेऽस्ति। बहूनि हि तवात्रैतद् गान्धर्व्वं शृण्वतश्चतुर्युगान्यतीतानि। साम्प्रतं भूतलेऽष्टाविंशतितमस्य मनोश्चतुर्युगमतीतप्रायम्, आसन्नो हि तत्कलिः। अन्यस्मै कन्यारत्नमिदं भवतैकाकिना देयम् ॥२३॥

भवतोऽपि मित्र-मन्त्रि-भृत्य-कलत्र-बन्धु-बल-कोषादयः कालेनैतेनात्यन्तमतीताः ॥२४॥

पुनरप्युत्पन्नसाध्वसः स राजा भगवन्तं प्रणम्य पप्रच्छ,—भगवन्! एवमवस्थिते ममेयं कस्मै देयेति। ततः स भगवान् किञ्चिदवनतकन्धरं कृताञ्जलिभूतं सप्तलोकगुरुरब्जयोनिराह(ज) ॥२५॥

ब्रह्मोवाच।

न ह्यादिमध्यान्तमजस्य यस्य
विद्मो वयं सर्व्वगतस्य धातुः।
न च स्वरूपं न परं स्वभावं
न चैव सारं परमेश्वरस्य ॥२६॥

कलामुहूर्त्तादिमयश्च कालो
न यद् विभूतेः परिणामहेतुः।
अजन्मनाशस्य समस्तमूर्त्ते—
रनामरूपस्य सनातनस्य ॥२७॥

यस्य प्रसादादहमच्युतस्य
भूतः प्रजासृष्टिकरोऽन्तकारी।
क्रोधाच्च रुद्रः स्थितिहेतुभूतो
यस्माच्च मध्ये पुरुषः परस्मात् ॥२८॥

अवनतशिराः चिन्तयैवावनतमुखः। अवनतशिरमिति पाठे रैवतविशेषणम् ॥२२॥

अस्य रैवतस्य मनोरष्टाविंशतितमं चतुर्युगं गतप्रायम् ॥२३॥

एकाकिना देयमित्यत्र हेतुमाह—'भवत' इति ॥२४॥

कन्याया वराभावादुत्पन्नसाध्वसः ॥२५॥

पूर्वं चिन्तितेभ्योऽन्येभ्योऽप्ययमेव वरः श्रेष्ठ इति वक्तुं बलदेवाय कन्यां देहीत्याह—'न ह्यादिमध्यान्तमि'ति दर्शयति। पूर्वयच्छब्दानां स विष्णुः धरित्र्यां स्वांशेनावतीर्ण इत्यत्रेमेनान्वयः। आदिमध्यान्त्यज्ञानहेतुः कारणतया सर्वगतस्वरूपं तत्त्वं परं स्वभावम् असाधारणं धर्मसारं बलम् ॥२६॥

यस्य विभूतेरवताररूपायाः परिणामस्य सदृशस्य विकारस्य कालो न हेतुः। अत्र हेतुः 'अजन्मेति' ॥२७॥

यस्याच्युतस्य प्रसादादहं ब्रह्मा प्रजासृष्टिकरो भूतः क्रोधाच्चान्तकारी रुद्रः, मध्ये च यस्मात् स्थितिहेतुः पुरुषाख्यो विष्ण्वाख्यो भूतः ॥२८॥

(ज) उत्पन्नं साध्वसं भयं वराभावप्रयुक्तभाव्यनिष्टसम्भावनमिति यावत् यस्य सः। 'भीतिर्भीः साध्वसं भय' मिति कोषात्। अवनता कन्धरा ग्रीवा यस्य तं नतग्रीवमित्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मद्रूपमास्थाय सृजत्यजो यः
स्थितौ च योऽसौ पुरुषस्वरूपी ।
रुद्रस्वरूपेण च योऽत्ति विश्वं
धत्ते तथानन्तवपुः समस्तम् ॥२९॥

शक्रादिरूपी परिपाति विश्व—
मर्केन्दुरूपश्च तमो हिनस्ति ।
पाकाय योऽग्नित्वमुपेत्य लोकान्
बिभर्त्ति पृथ्वीवपुरव्ययात्मा ॥३०॥

चेष्टां करोति श्वसनस्वरूपी
लोकस्य तृप्तिञ्च जलस्वरूपी ।
ददाति विश्वस्थितिसंस्थितस्तु
सर्व्वावकाशञ्च नभःस्वरूपी ॥३१॥

यः सृज्यते सर्गकृदात्मनैव
यः पाल्यते पालयिता च देवः ।
विश्वात्मनः संह्रियतेऽन्तकारी
पृथङ् न यस्यास्य च योऽव्ययात्मा ॥३२॥

यस्मिन् जगद् यो जगदेतदाद्यो
यश्चाश्रितोऽस्मिन् जगति स्वयम्भूः ।
स सर्व्वभूतप्रभवो धरित्र्यां
स्वांशेन विष्णुर्नृपतेऽवतीर्णः (क)॥३३॥

कुशस्थली या तव भूप ! रम्या
पुरी पुराभूदमरावतीव ।
सा द्वारका सम्प्रति तत्र चास्ते
स केशवांशो बलदेवनामा ॥३४॥

तस्मै त्वमेनां तनयां नरेन्द्र !
प्रयच्छ मायामनुजाय जायाम् ।
श्लाघ्यो वरोऽसौ तनया तवेयं
स्त्रीरत्नभूता सदृशो हि योगः (ख)॥३५॥

पराशर उवाच ।

इतीरितोऽसौ कमलोद्भवेन
भुवं समासाद्य पतिः प्रजानाम् ।
ददर्श ह्रस्वान् पुरुषानशेषा—
नत्यौजसः स्वल्पविवेकवीर्य्यान् (ट)॥३६॥

तर्हि किं परमपुरुषो न सृष्ट्यादिकर्त्ता, किन्तु भवदादय इव इत्यत आह— 'मद्रूपमि'ति । अनन्तवपुः शेषमूर्त्तिः ॥२९॥

शक्रादीत्यादिशब्दात् स्थितिहेतवो ज्ञेयाः । पञ्चमहाभूतरूपेणापि पालकत्वमाह—'पाकाये'ति सार्द्धेन ॥३०॥

तर्हि किं सृज्यादयस्ततो भिन्ना इत्याशंक्य स्रष्ट्राऽनन्तरं सृज्यादिभिः सहाभेदेनाह—'यः सृज्यत' इति द्वाभ्याम् । विश्वात्मनो विश्वस्य अन्तकारी संह्रियते च । अस्य स्रष्ट्रादित्रयस्य सृज्यादित्रयस्य च यः पृथक् शुद्धचिद्रूपः पृथग् यस्येति पाठे यस्मात् पृथगन्यो नास्तीत्यर्थः ॥३२॥

अस्मिन् जगत्याश्रितः एतद्व्याप्य स्थितः । 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेः ॥३३॥

अल्पौजसोऽल्पसामर्थ्यान् ॥३६॥

(क) प्रभवत्यस्मादिति प्रभव, सर्वेषां भूतानां प्राणिनां भगवतां वस्तूनां वा प्रभव इत्यर्थः ।

(ख) मायामनुजाय मायया गृहीतनरविग्रहाय । योगः श्रीरुक्मयोः वरवधूरूपेण मिथ्यः सम्बन्धः सदृशः योग्यः ।

(ट) प्रजानां पतिः राजा रैवतकः ददर्श । ह्रस्वानित्यत्र ह्रस्वे वेत्यनेन संयुक्तवर्णपूर्ववर्त्तिनो ह्रस्वस्यापि विकल्पेनैव गुरुत्वविधानान्न इन्द्रवज्रोपेन्द्रवज्रयोः साङ्कर्य्यप्रयुक्तोपजातिच्छन्दोव्याघातः । तदुक्तं छन्दशास्त्रे—'यदा तीव्रप्रयत्नेन संयोगादेर्गुरुत्वम् । न च्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः' । इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुशस्थल ताञ्च पुरीमुपेत्य
दृष्ट्वान्यरूपां प्रददौ स्वकन्याम् ।
सीरध्वजाय स्फटिकाचलाभ—
वक्षःस्थलायातुलधीर्नरेन्द्रः (ठ) ॥३७॥

उच्चप्रमाणामति तामवेक्ष्य
स्वलाङ्गलाग्रेण स तालकेतुः ।
विनामयामास ततश्च सापि
बभूव सद्यो वनिता यथान्या ॥३८॥

तां रेवतीं रैवतभूपकन्यां
सीरायुधोऽसौ विधिनोपयेमे ।
दत्त्वा च कन्यां स नृपो जगाम
हिमाचलं वै तपसे धृतात्मा ॥३९॥

इति विष्णुपुराणे चतुर्थांशे प्रथमः अध्यायः ।

अन्यरूपां कृष्णेन समुद्रात् द्वादशयोजनपरिमितां भूमिं गृहीत्वा विश्वकर्मद्वारा अन्यथानिर्मितत्वात् । सीरध्वजाय हलिने ॥३७॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाभिधायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे प्रथमोऽध्यायः

(ट) अल्पौजसः अल्पसामर्थ्यानिति श्रीधरव्याख्यानेन 'अल्पौजस' इति मूलपाठस्तत्सम्मत इति प्रतिभाति । परन्तु अन्यत्र 'अल्पौजस' इति पाठो दृश्यते । तस्य ओजः अतिक्रान्ता अत्यौजसः तान् इति व्युत्पत्त्या स एवार्थ इति ध्येयम् । विवेकश्च वीर्य्यञ्च ते विवेकवीर्य्ये खल्पे पूर्वपूर्वयुगापेक्षया अत्यल्पमात्रे विवेकवीर्य्ये येषां तान् । एतेन विवेकस्य अन्तःकरणवृत्तित्वात् वीर्य्यस्य च शारीरसामर्थ्यरूपत्वात् तेषामन्तःकरणशक्तिः शारीरशक्तिश्चेत्युभयोरेवात्यल्पत्वं प्रतीयते ।

(ठ) स्फटिकाचलः स्फटिकमयः शुभ्रः पर्वतः तदार्थं वर्णसाधर्म्येण विशालत्वसाधर्म्येण च तत्तुल्यं वक्षस्थलं यस्य तस्य

(ड) तां रैवतकन्यां रेवतीम् । अति उच्चप्रमाणां सुदीर्घप्रमाणशरीराम् । तालकेतुः तालाङ्कः बलदेव इत्यर्थः 'तालाङ्को मुषली हली'ति कोषात् । विनामयामास स्वीयलाङ्गलाग्रस्पर्शविशेषप्रभावेण द्वापरयुगयोग्य-शरीरप्रमाणाङ्गविनमयामासेति वक्तव्ये विनामयामासेत्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयः अध्यायः

[ईक्ष्वाकोर्जन्मः, ककुत्स्थवंशस्य युवनाश्वस्य सोमरेश्चोपाख्यानम्]

पराशर उवाच ।

यावच्च ब्रह्मलोकात् ककुद्मी रैवतो नामाभ्येति तावत् पुण्यजनसंज्ञा राक्षसास्तामस्य पुरीं कुशस्थलीं जघ्नुः ॥१॥

तावच्चास्य भ्रातृशतं पुण्यजनत्रासाद् दिशो भेजे । तदन्वयाश्च क्षत्रियाः सर्व्वदिक्षु अभवन् । धृष्टस्यापि धार्ष्टकं क्षत्रं समभवत् । नभागस्यात्मजो नाभागः, तस्याम्बरीषः, अम्बरीषस्यापि विरूपोऽभवत् । विरूपात् पृषदश्वो जज्ञे । ततश्च रथीतरः । तत्रायं श्लोकः ।

एते क्षत्रप्रसूता वै पुनश्चाङ्गिरसः स्मृताः ।
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥२

क्षुवतश्च मनोरिक्ष्वाकुर्घ्राणतः पुत्रो जज्ञे । तस्य पुत्रशतप्रवरा विकुक्षि-निमि-दण्डाख्यास्त्रयः पुत्राः । शकुनिप्रमुखाः पञ्चाशत् पुत्रा उत्तरापथरक्षितारो बभूवुः । चत्वारिंशदष्टौ च दक्षिणापथे भूपालाः (क)॥३

स च इक्ष्वाकुरष्टकायामुत्पाद्य श्राद्धार्हमांसमानयेति विकुक्षिमाज्ञापयामास (ख) ॥४॥

स तथेति गृहीताज्ञो वनमभ्येत्यानेकान् मृगान् हत्वा अतिश्रान्तोऽतिक्षुत्परीतो विकुक्षिरेकं शशमभक्षयत्, शेषञ्च मांसमानीय पित्रे निवेदयामास । इक्ष्वाकुणापि इक्ष्वाकुकुलाचार्य्यस्तत्प्रोक्षणाय वशिष्ठः प्रचोदितः प्राह—अलमनेनामेध्येनामिषेण । दुरात्मनानेन ते पुत्रेण एतन्मांसमुपहृतम्, यतोऽनेन शशको

द्वितीयः अध्यायः

धृष्टादिमनुपुत्राणां वंशांस्तच्चरितानि च । द्वितीये तत्प्रसङ्गेन सौभर्य्याख्यानमुक्तवान् । रैवतस्य भ्रातृशतमध्ये किन्तावत् कोऽपि राजा नाभवदित्याशङ्क्याह—'यावच्चे'ति । पुण्यजनसंज्ञा इति विशेषणं सोपालम्भं राक्षसजातिविशेषपरं वा ॥१॥

एते क्षत्रप्रसूता इति । एते रथीतरस्य प्रवर-गोत्रजाः क्षत्रप्रसूताः क्षत्रिया अप्रजस्य रथीतरस्य भार्य्यायामङ्गिरसा जातत्वात् । तथापि तयोर्योगात् पुनरङ्गिरसो ब्राह्मणाः स्मृताः, अतः क्षत्रोपेता द्विजातयः इत्यन्वयः ॥२॥

इक्ष्वाकुनामनिरुक्तिपूर्वकं तस्य वंशमाह,—क्षुवतः क्षुतं कुर्वतः मनोर्घ्राणतः । पुत्रशतस्यैकाधिकपुत्रशतस्य प्रवराः ॥३॥

विकुक्षेरेव शशादसंज्ञां वक्तुमाह—'स चे'ति । उत्पाद्य क्रियादिकं विना स्वयं मृगान् हत्वेत्यर्थः ॥४॥

(क) विकुक्षितः प्रारभ्य गणनया साकल्येन एकाधिकं पुत्रशतं भवतीत्यत एव श्रीधरेण पुत्रशतप्रवरा इत्यस्य एकाधिकपुत्रशतप्रवरा इत्यर्थः कृतः ।

(ख) अष्टकायां मांसाष्टकाश्राद्धे । श्राद्धार्हमांसं श्राद्धसाधनयोग्यं मृगमांसादिकं विकुक्षिं तदाख्यं स्वस्य प्रवरं पुत्रमेकम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भक्षितः । ततश्चासौ विकुक्षिः गुरुणैवमुक्तः शशाद-संज्ञामवाप, पित्रापि च परित्यक्तः । पितर्य्युपरते चाखिलामेतां पृथ्वीं धर्म्मतः शशास ! शशादस्य च परञ्जयो नाम पुत्रोऽभवत् (ग) ॥५॥

इदञ्चान्यत्,—पुरा हि त्रेतायां दैवासुरमतीव भीषणं युद्धमासीत् । तत्र चातिबलिभिरसुरैरमराः पराजिता भगवन्तं विष्णुमाराधयाञ्चक्रुः ॥६॥

प्रसन्नश्च देवानामनादिनिधनः सकलजगत्परायणो नारायणः प्राह,—ज्ञातमेव मया युष्माभिर्यदभिलषितम्, तदर्थमिदं श्रूयताम् (घ) ॥७॥

परञ्जयो हि नाम शशादस्य च राजर्षेस्तनयः क्षत्रियवर्य्यः । तच्छरीरेऽहमंशेन स्वयमेवावतीर्य्य तानशेषानसुरान् निहनिष्यामि, तद्भवद्भिः परञ्जयोऽसुरवधार्थाय इह कार्य्योद्योगः कार्य्य इति । एतच्छ्रुत्वा प्रणम्य भगवन्तं विष्णुममराः परञ्जयसकाशमाजग्मुः ॥८॥

ऊचुश्चैनं भोः भोः क्षत्रियवर्य्य ! अस्माभिरर्थितेन भवता अस्माकमरातिवधोद्यतानां साहाय्यं कृतमिच्छामः (ङ) ॥९॥

तद्भवता अस्माकमभ्यागतानां प्रणयभङ्गो न कार्य्यः । इत्युक्तः परञ्जयः प्राह,—सकलत्रैलोक्यनाथो योऽयं युष्माकमिन्द्रः शतक्रतुः, अस्य यद्यहं स्कन्धमारूढो युष्मदरातिभिः सह योत्स्ये, तदाहं भवतां सहायः । इत्याकर्ण्य समस्तदेवैरिन्द्रेण च तथास्त्वमित्येवमन्वीप्सितम् (च) ॥१०॥

ततश्च शतक्रतोर्वृषभरूपधारिणः ककुत्स्थो भूत्वा समन्वितो भगवतश्चराचरगुरोरच्युतस्य तेजसाप्यायितो देवासुरसंग्रामे समस्तानेवासुरान् निजघान । ततश्च वृषभककुत्स्थेन राज्ञा निसूदितमसुरबलं ततश्चासौ ककुत्स्थसंज्ञामवाप (छ) ॥११॥

एवं शशादोऽयमिति गुरुणोक्तः शशादसंज्ञामवापेत्यन्वयः ॥५॥

परञ्जय एव ककुत्स्थसंज्ञामवापेति वक्तुमितिहासमाह—'इदञ्चे'त्यादिना 'संज्ञामवापे'त्यन्तेन । इदञ्चान्यत् तस्य नामेति शेषः ॥६॥

सकलं जगदेव परं श्रेष्ठम् अयनमाश्रयो यस्य, नारायणस्य सर्वान्तर्यामित्वात् । तदर्थं तन्निष्पत्तये ॥७॥

अवतीर्य्य प्रविश्य, कार्यः अवश्यम् विधेयः उद्योगो युद्धा-

रम्भो येन परञ्जयेन स तथाविधः कार्यः सम्पाद्यः ॥८॥

साहायकं साहाय्यम् ॥९॥

बाढ़ं तथेत्यन्वीप्सितम् अनुमतमित्यर्थः ॥१०॥

(ग) अतिक्षुधा प्रबलक्षुधया परीतः युक्तः । तत्प्रोक्षणाय तस्य विकुक्षिणा स्वपित्रे समर्पितस्य मांसस्य । प्रचोदितः प्रार्थितः । अमेध्येन अपवित्रेण आमिषेण मांसेन । उपहतं नाशितं श्राद्धानर्हं कृतमिति यावत् । उपरते मृते सति ।

(घ) देवाश्च असुराश्च देवासुरं तत्सम्बन्धि दैवासुरम् ।

(ङ) अरातीनां अस्मच्छत्रूणामसुराणां वधाय उद्यतानां कृतोद्यमानामस्माकम् ।

(च) प्रणयभङ्गः प्रार्थनाभङ्गः प्रार्थनाया निष्फलत्वमित्यर्थः । अहं यदि अस्य शतक्रतोरिन्द्रस्य स्कन्धमारूढः सन् योत्स्ये कर्त्तुं क्षमिष्ये इत्यर्थः । सहाय इति भविष्यामीति शेषः ।

(छ) वृषभरूपधारिणः स्कन्धे तस्य वहनयोग्यं वृषभरूपं अवलम्बितवतः शतक्रतोरिन्द्रस्य ककुदि तिष्ठतीति ककुत्स्थः वर्त्तमानः सन् । निसूदितं निहतम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ककुत्स्थस्याप्यनेनाः पुत्रोऽभूत्। अनेनसः पृथुः, पृथोर्विश्वगश्वः, तस्य चार्द्रोऽभूत्, अर्द्रस्य युवनाश्वः तस्य श्रावस्तः, यः श्रावस्तीं पुरीं निवेशयामास। श्रावस्तस्य बृहदश्वः, बृहदश्वस्यापि कुवलयाश्वः; योऽसावुतङ्कस्य महर्षेरपकारिणं धुन्धुनामानमसुरं वैष्णवेन तेजसाप्यायितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान, धुन्धुमारसंज्ञामवाप। तस्य च समस्ता एव पुत्रा धुन्धुमुखनिःश्वासाग्निना विप्लुष्टा विनेशुः (ज) ॥१२॥

दृढ़ाश्व-चन्द्राश्व—कपिलाश्वान्वयः केवलमवशेषिताः। दृढ़ाश्वाद् वार्य्यश्वः, तस्माद् निकुम्भः, निकुम्भात् संहताश्वः, ततश्च कृशाश्वः, तस्मात् प्रसेनजित्, ततो युवनाश्वोऽभवत्। तस्य चापुत्रस्यातिनिर्व्वेदाद् मुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनाय इष्टिः कृता। तस्याञ्च मध्यरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलसं वेदिमध्ये निवेश्य ते मुनयः सुषुपुः (झ) ॥१३॥

तेषु च सुप्तेषु अतीव तृट्परीतः स भूपालस्तमाश्रमं विवेश, सुप्तांश्च तानृषीन् नैवोत्थापयामास ॥१४

तच्च कलसजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ प्रबुद्धाश्च ऋषयः पप्रच्छुः,—केनैतन्मन्त्रपूतं वारि पीतम्? अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति। इत्याकर्ण्य स राजा अजानता मया पीतमित्याह (ञ) ॥१५॥

गर्भश्च युवनाश्वोदरेऽभवत् क्रमेण च ववृधे। प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निर्भिद्य निश्चक्राम न चासौ राजा ममार ॥१६॥

जातो नामैष कं धास्यतीति ते मुनयः प्रोचुः। अथागम्य देवराड़ब्रवीत्—मामयं धास्यतीति। ततो मान्धाता नामतोऽभवत्, वक्त्रे चास्य प्रदेशिनी देवराजेन न्यस्ता, तां पपौ। ताञ्चामृतस्रावि णीमासाद्य पीत्वा चाह्नैव व्यवर्द्धत। स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे। भवति चात्र श्लोकः,—

यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
सर्व्वं तद् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते (ट) ॥१७

विप्लुष्टा दग्धाः ॥१२॥

मध्यरात्रे निवृत्तायां समाप्तायाम् ॥१३॥

सुप्तांश्च नोत्थापयामास 'शयानं न प्रबोधये'दिति निषेधाच्च ॥१४॥

अत्रैतत् कलसस्थे जले पीते सति ॥१५॥

मुनीनां प्रभावादेव न ममार ॥१६॥

कं धास्यति पातव्यस्तनाभावात्॥

यावदिति साकल्ये, मेरोः सर्वतः सूर्य्यस्य उदयास्तमनोपलक्षितं सर्वं मान्धातुः क्षेत्रमधिष्ठेयदेश उच्यते ॥१७॥

मान्धातुः कन्यावंशं स्वल्पत्वादत्याश्चर्य्यत्वाच्च प्रथमं वक्तुं सौमरिचरितमुच्यते बह्वृच इत्यादिना। द्वादशाब्दरूपं कालं व्याप्य ॥१८॥

(ज) श्रावस्तस्य इयमिति व्युत्पत्त्या श्रावस्तशब्दात् ष्णप्रत्ययेन तस्य च नदाद्यन्तर्गतत्वेन स्त्रियामीप्प्रत्ययात् श्रावस्तीति पदसिद्धिः। आप्यायितः परिपुष्टः शक्त्या बृंहित इति यावत्।

(झ) इष्टिः यज्ञः पुत्रेष्टियाग इत्यर्थः। तस्याञ्च इष्टौ मध्यरात्रे निशाया मध्यभागे निवृत्तायां समाप्तायां सत्याम्।

(ञ) तृषा तृष्णया परीतः युक्तः तृष्णार्त्त इत्यर्थः।

अपरिमेयं इयत्तया परिमातुमशक्यं माहात्म्यं महिमा प्रभाव इति यावत् यस्य तत्। प्रबुद्धाः जागरिताः सन्तः।

(ट) एषः पुत्रः धास्यतीति धेट्पा पान हति धातुगणपठितस्य धेठ्धातो रूपम्। प्रदेशिनी तर्जन्यङ्गुली। अस्य मान्धातुः। अह्नैव एकेनैव दिवसेन। अपवर्गे तृतीया। सर्वमित्यादि। सर्वं तत् स्थानं यौवनाश्वाधिकारे स्थितमिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मान्धाता च शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे, पुरुकुत्समम्बरीषं मुचुकुन्दञ्च तस्यामपत्यत्रयमुत्पादयामास। पञ्चाशच्च दुहितरस्तस्य नृपतेर्बभूवुः ॥१८॥

बह्वृचश्च सौभरिर्नाम ऋषिरन्तर्जले द्वादशाब्दं कालमुवास ॥१९॥

तत्र चान्तर्जले सम्मदनामातिबहुप्रजोऽतिप्रमाणो मीनाधिपतिरासीत्। तस्य पुत्र-पौत्र-दौहित्राः पार्श्वतः पृष्ठतोऽग्रतो वक्षः-पुच्छ-शिरसाञ्चोपरि भ्रमन्तस्तेनैव सहार्हनिशमतिनिर्वृता रेमिरे। स चापि तत्स्पर्शोपचीयमानहर्षप्रकर्षो बहुप्रकारं तस्यर्षेः पश्यतस्तैरात्मज-पौत्र-दौहित्रादिभिः सहानुदिवसं बहुप्रकारं रेमे। अथान्तर्जलावस्थितः स सौभरिरे काग्रतासमाधानमपहायानुदिनं तत् तस्य मत्स्यस्यात्मजपौत्रदौहित्रादिभिः सहातिरमणीयं ललितमवेक्ष्याचिन्तयत् (ठ) ॥२०॥

अहो धन्योऽयमीदृशमपि अनभिमतं योन्यन्तरमवाप्य एभिरात्मजपौत्रादिभिः सह रममाणोऽतीवास्माकं स्पृहामुत्पादयति। वयमप्येवं पुत्रादिभिः सह रमयिष्यामः। इत्येवमभिसमीक्ष्य स तस्मादन्तर्जलान्निष्क्रम्य निर्व्वेष्टुकामः कन्यार्थं मान्धातारं राजानमगच्छत् (ड) ॥२१॥

अथागमनश्रवणसमनन्तरं चोत्थाय तेन राज्ञा सम्यग् अर्घ्यादिना पूजितः कृतासनपरिग्रहः सौभरिरुवाच।

निर्व्वेष्टुकामोऽस्मि नरेन्द्र कन्यां
प्रयच्छ मे मा प्रणयं विभाङ्क्षीः।
न ह्यर्थिनः कार्य्यवशाभ्युपेताः
ककुत्स्थगोत्रे विमुखाः प्रयान्ति (ढ)॥२३॥

अन्येऽपि सन्त्येव नृपाः पृथिव्यां
क्ष्मापाल येषां तनयाः प्रभूताः (ण)।
किन्त्वर्थिनामर्थितदानदीक्षा-
कृतव्रतं श्लाघ्यमिदं कुलं ते ॥२३॥

ललितं क्रीड़ासुखम् ॥२०

निर्वेष्टुकाम उद्वोढ़ुकामः। मा प्रणयं विभांक्षीः प्रणयभङ्गं मा कार्षीः ॥२२॥

(ठ) अतिबह्वयः अतिबहुसंख्याकाः प्रजाः सन्ततयः यस्य सः। अतिप्रमाणः सुबृहदाकारः। अतिनिर्वृताः सुतरां सुखिनः। स चापि सम्मदनामा तत्रत्यमीनाधिपतिः। तस्य ऋषेः सौभरेः पश्यतः अवलोकयतः, अनादरे षष्ठी, पश्यन्तं सौभरिं ऋषिमनादृत्य, पश्यतोऽपि तस्मादमीत इत्यर्थः।

(ड) अयं मीनाधिपतिः। स्पृहां पुत्रपौत्रादिभिः सह ईदृशक्रीड़ाविषयिणीमिच्छाम्। रमयिष्यामः क्रीडां करिष्यामः क्रीड़या आत्मानं तर्पयिष्याम इति वा।

अर्थितदाने या दीक्षा संकल्पः, तत्र कृतं व्रतम् आर्थिदैन्याभावरूपं येन कुलेन तत् ॥२३

(ढ) आगमनश्रवणसमनन्तरम् कन्यार्थं सौभरेरागमनश्रवणस्य अव्यवहितोत्तरम्, एतेन राज्ञ ऋषिं सौभरिं प्रति आदरातिशयो व्यज्यते।

हे नरेन्द्र! मे मह्यं कन्यां विवाहयोग्यां स्वदुहितरं प्रयच्छ देहि। प्रणयं, प्रार्थनाम्। ककुत्स्थस्य परञ्जयस्य भवत्पूर्वपुरुषस्य गोत्रे वंशे कार्य्यवशाभ्युपेताः अर्थिनः विमुखाः सन्तः न प्रयान्ति अतः त्वमपि मम प्रार्थनां न विभाङ्क्षीरित्यर्थः।

(ण) क्ष्मापाल पृथिवीपाल!

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शतार्द्धसङ्ख्यास्तव सन्ति कन्या-
स्तासां ममैकां नृपते ! प्रयच्छ ।
यत् प्रार्थनाभङ्गभयाद् बिभेमि
तस्मादहं राजवरातिदुःखात् (त) ॥२४॥

पराशर उवाच ।

इति ऋषिवचनमाकर्ण्य स राजा जराजर्जरित-देहं तमृषिमालोक्य प्रत्याख्यानकातरस्तस्माच्च भगवतः शापतो बिभ्यत् किञ्चिदधोमुखश्चिरं दध्यौ ।

ऋषिरुवाच ।

नरेन्द्र ! कस्मात् समुपैषि चिन्ता-
मशक्यमुक्तं न मयात्र किञ्चित् ।
याऽवश्यदेया तनया तयैव
कृतार्थता नो यदि किं न लब्धम् (थ)॥२५॥

पराशर उवाच ।

अथ तस्य शापभीतः सप्रश्रयमुवाचासौ राजा ।

राजोवाच ।

भगवन् ! अस्मत्कुलस्थितिरियम्,—य एव कन्याया अभिरुचितोऽभिजनवान् वरः, तस्मै कन्या प्रदीयते । भगवद्याच्ञा चास्मन्मनोरथानामप्यगोचरवर्त्तिनी कथमप्येषा सञ्जाता । तदेवमवस्थिते न विद्मः किं कुर्म्म इति, तन्मया चिन्त्यत इत्यभिहिते तेन भूभुजा मुनिरचिन्तयत् । अहो अयमन्योऽस्मत्प्रत्याख्यानोपायः । वृद्धोऽयमनभिमतः स्त्रीणां किमुत कन्यानामिति अमुना सञ्चिन्त्यैवमभिहितम् (द)॥२६॥

एवमस्तु तथा करिष्यामीति सञ्चिन्त्य मान्धातारमुवाच ॥२७॥

यद् यस्मात् प्रार्थनाभङ्गाद् यद्भयं शङ्का तस्माद् यदतिदुःखं तस्माद् बिभेमि । तस्मात् त्वमेकां कन्यां प्रयच्छेत्यन्वयः ॥२४॥

यस्मै कस्मैचिदवश्यं या कन्या देया, तया यदि नोऽस्माकं कृतार्थता स्यात्, तर्हि किं न लब्धं लाभाभावः किं स्यात् ? किन्त्वस्माकं लाभः स्यादेव । यद्वा तर्हि त्वया किं न लब्धं मन्मनोरथपूरणमेव तव महान् लाभ इत्यर्थः । न लब्धेति पाठे सा कन्या किं न लब्धा लब्धैवेति सिद्धवन्निर्देशः ॥२५॥

प्रत्याख्यानोपायमेव दर्शयति—वृद्धोऽयमित्यादिना । एतत् सञ्चिन्त्य अमुना राज्ञा एवमभिहितम् इत्यन्वयः ॥२६॥

तत्र प्रतीकारं विचिन्त्य स्वगतमाह—'एवमि'ति ॥२७॥

(त) शतार्द्धसंख्याः पञ्चाशत्संख्याः । तासां उक्तपञ्चाशत्कन्यानां मध्ये । मम मह्यम्, सम्बन्धसामान्यविवक्षया षष्ठी ।

(थ) इति उक्तरूपम् । ऋषिवचनम् ऋषेः सौभरेर्वाक्यम् । प्रत्याख्यानकातरः स्वीयकुलधर्मेणेति शेषः । चिरं सुदीर्घं कालं यावत्, दध्यौ चिन्तयामास । अशक्यमिति तव असाध्यमिति त्वया साधयितुमशक्यमित्यर्थः ।

(द) तस्य सौभरेर्महर्षेः शापात् भीतः । अभिरुचितः स्पृहाविषयः । अभिजनवान् सत्कुलप्रभवः ।

भगवद्याच्ञा चेत्यादिः—भगवान् भवान् निर्वेष्टुकामो मम कन्यायाः प्रार्थयितेति मनसाप्यहं कल्पयितुं नार्हामि । तथाप्येषा भगवद्याच्ञा कुतश्चिन्मम सौभाग्यातिशयादेव जाता इति भावः ।

स्त्रीणां सामान्यतः स्त्रीजातेरेव । किमुत कन्यानाम् अनूढ़स्त्रीविशेषाणाम् । अनूढ़ा हि कन्या युवानमेव स्पृहयन्तीति-भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्येवं तदादिश्यतामस्मा प्रवेशाय कन्यान्तः-पुरवर्षवरः ॥२८॥

यदि कन्यैव काचिन्मामभिलषति, तदाहं दारपरिग्रहं करिष्यामीति। अन्यथा चैतदलमस्माकम् एतेनातीतकालारम्भेणेत्युक्त्वा विरराम। ततश्च मान्धात्रा मुनिशापशङ्कितेन कन्यान्तःपुरवर्षवरः समाज्ञप्तः। कन्यान्तःपुरं प्रविशन्नेव भगवानखिल-सिद्ध-गन्धर्व्व-मनुष्येभ्योऽतिशयेन कमनीयं रूपमकरोत्। प्रवेश्य च तमृषिमन्तःपुरवर्षवरस्ताः कन्यकाः प्राह, भवतीनां जनयिता महाराजः समाज्ञापयति, अयमस्मान् ब्रह्मर्षिः कन्यार्थी समभ्यागतः, मया चास्य प्रतिज्ञातं, यद्यस्मत्कन्यका काचिद् भगवन्तं वरयति, तत्कन्यायाश्छन्दे नाहं परिपन्थानं करिष्यामि; इत्याकर्ण्य सर्व्वा एव ताः कन्यकाः सानुरागाः समन्मथाः करेणव इवेभयूथपतिं तमृषिं महमहमिकया वरयाम्बभूवुरूचुश्च (ध) ॥२९॥

अलं भगिन्योऽहमिमं वृणोमि
वृतो मया नैष तवानुरूपः।
ममैव भर्त्ता विधिनैष सृष्टः
सृष्टाहमस्योपशमं प्रयाहि (न) ॥३०॥

वृतो मयायं प्रथमं मयायं
गृहं विशन्नेव विहन्यसे किम्।
मया मयेति क्षितिपात्मजानां
तदर्थमत्यर्थकलिर्बभूव (प) ॥३१॥

यदा तु सर्व्वाभिरतीव हार्द्दाद्
धृतः स कन्याभिरनिन्द्यकीर्त्तिः।
तदा स कन्याधिकृतो नृपाय
यथावदाचष्ट विनम्रमूर्त्तिः ॥३२॥

कन्यान्तःपुरस्य रक्षको वर्षवरः शण्ढः ॥२८॥

तत् तदा कन्यायाश्छन्दे इच्छायां परिपन्थानं प्रातिकूल्यं नाहं करिष्यामीति प्रतिज्ञातम्—इत्याकर्ण्येतीति शब्दः इत्यङ्गीकृतम् इत्याकर्ण्येति, काकाक्षिगोलकवदुभयत्र योज्यः। एवमग्रेऽपि। अहं पूर्वमहं पूर्वमिति संरम्भक्रिया अहमहमिका तया ॥२९॥

तामेवाह—'अलं भगिन्य' इति द्वाभ्याम्। सृष्टाहमस्य पत्नीति शेषः। उपशमं व्रज एतदर्थं यत्नं मा कुरु इत्यर्थः ॥३०॥

विहन्यसे विहंसि विघातं किं कुरुषे। कलिः कलहः ॥३१॥

अतिहार्द्दात् स्नेहात्। कन्यानामेवं पत्यर्थं कलहोऽनुचित इति विनम्रमूर्त्तिराचष्ट ॥३२॥

(ध) तदेति तदैवेत्यर्थः। अतीतः कालः स्वयोग्ययौवनकालः यस्य आरम्भस्य तेन। अकाले अभिलषितेन विवाहेनेत्यर्थः। वरयति वरत्वेन वृणुते। करेणवः करिण्यः। इभयूथं हस्तिसमूहः तत्पतिम्।

(न) हे भगिन्यः! अलं निवृत्ता भवत यूयम्, अथवा युष्माकं कामना व्यर्थेत्यर्थः।

(प) विहंसीत्यर्थे विहन्यसे इत्यार्षम्। तदर्थं सौभर्य्यर्थं पतिरूपेण तस्य सौभरेर्लाभार्थमित्यर्थः। अत्यर्थः अतिमात्रः कलिः कलहः।

(फ) कन्यासु अधिकृतः कन्यानां शीलरक्षणार्थं दत्ताधिकारः कन्यान्तःपुररक्षको वर्षवर इत्यर्थः। विनम्रा कन्याजनाननुरूपाचरणकथने सहता सङ्कोचेन विनम्रानता मूर्त्तिर्यस्य सः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदवगमात् किमेतत् कथय, किं करोमीति किं तयाभिहितमित्याकुलमतिरनिच्छन्नपि कथमपि राजानुमेने। कृतानुरूपविवाहश्च महर्षिः सकलास्ता: कन्यकाः स्वमाश्रममनयत्। तत्र चाशेषविल्पिशिल्पप्रणेतारं विधातारमिवान्यं विश्वकर्म्माणमाहूय सकलकन्यानामेकैकस्याः प्रोत्फुल्लपङ्कजकूजत्कलहंसकारण्डवादिविहङ्गाभिरामजलाशयाः सोपवनाः सविकाशाः साधुशय्यासनपरिच्छदाः प्रासादाः क्रियन्तामित्यादिदेश(भ) ॥३३॥

तच्च तथैवानुष्ठितमशेषशिल्पविशेषाचार्य्यस्त्वष्टा दर्शितवान् ॥३४॥

ततश्च परमर्षिणा सौभरिणाज्ञप्तस्तेषु गृहेष्वनपायाल्लामा महानिधिरासाञ्चक्रे ॥३५॥

ततोऽनवरतभक्ष्यभोज्यलेह्याद्युपभोगैरागतानुगतभृत्यादीनहर्निशमशेषगृहेषु ताः क्षितीशदुहितरो भोजयामासुः ॥३६॥

एकदा तु दुहितृस्नेहाकृष्टहृदयः स महीपतिरतिदुःखितास्ताः सुखिता वा इति विचिन्त्य तस्य महर्षेराश्रममुपेत्य स्फुरदंशुमालां स्फटिकमयीं प्रासादमालामतिरम्योपवनजलाशयां ददर्श (म) ॥३७॥

प्रविश्य चैकं प्रासादमात्मजां परिष्वज्य कृतासनपरिग्रहः प्रवृत्तस्नेहनयनाम्बुगर्भनयनोऽब्रवीत् (य)॥३८

अप्यत्र वत्से भवत्याः सुखमुत किञ्चिदसुखम् अपि ते महर्षिः स्नेहवान्, उत संस्मर्य्यतेऽस्मद्गृहवासस्य ? इत्युक्ता तत्तनया पितरमाह,—तात ! अतिशयरमणीयः प्रासादोऽत्र-अतिमनोज्ञमुपवनम् अतिकलवाक्यविहगा-

---

सोपवनाः उपवनसहिताः, पच्छिदाः भोगोपकरणानि ॥३३॥

तच्च विशिष्ट-प्रासादरूपं कार्यं तथैवानुष्ठितं दर्शितवान् ॥३४॥

आसाञ्चक्रे अवस्थितवान् ॥३५॥

आगता अतिथयः अनुगतभृत्यादयश्च तान् ॥३६॥

स्फुरन्त्योऽंशुमाला यस्यास्ताम् ॥३७॥

प्रवृत्तो यः स्नेहस्तेन यानि नयनाम्बूनि तान्येव गर्भे ययोस्तादृशे नयने यस्य सः। प्रवृत्तस्नेहाम्बुगर्भनयन इति पाठे प्रवृत्तस्नेहेनाम्बुगर्भे नयने यस्य इति विग्रहः ॥३८॥

(भ) कृतः निष्पादितः अनुरूपः ब्राह्मः गान्धर्वो वा विवाहः यः। अनुरूपोऽत्र गान्धर्व एव उभयोर्वर-कन्ययोर्मिथः प्रेमविवाहस्थले गान्धर्वस्यैव तस्यानुरूप्यादिति केचित्। तस्याः कन्यायाः, प्रोत्फुल्लानि प्रकर्षेण विकसितानि निःशेषं प्रस्फुटितानि यानि पङ्कजानि। प्रोत्फुल्लेति विशेषणेन पङ्कजानां प्रकृष्टसौरभशालित्वं व्यज्यते। तैः तथा कूजद्भिः कलाः कारण्डवाश्च हंसभेदाः ते आदयो येषां तैः विहङ्गमैः पच्छिभिः अभिरामा रमणीयाः जलाशयाः सरांसि येषु तथाभूताः। कूजदित्यादिजलाशयविशेषणेन तेषां जलनीलीप्रमुखहंसादिविहारसौकर्य्यं — विरोधिवस्तुपरिशून्यस्वच्छसलिलशालित्वात् नेत्रतर्पणत्वं श्रुतितर्पणत्वञ्च गम्यते। प्रासादाः राजोचितोत्कृष्टहर्म्याणि। एकैकस्या इति शेषः। सोपवना इत्यनेन तेषां दम्पतिसुखविहारयोग्यत्वं, सावकाशा इत्यनेन च दम्पत्योरप्रतिरुद्धसुखमारुतनिषेवणादिकृत्योपयोगित्वञ्च व्यज्यते। अनपायः अविनाशी अविच्छिन्नप्रवाह इति यावत् आनन्दो येन तथाभूतः, महानिधिः प्रशस्तो निधिः।

(म) स्फुरन्त्यः समन्ततो दीप्यमानाः अंशुमालाः रश्मिसमूहा यस्याः ताम्।

(य) प्रवृत्तं यत् स्नेहनयनाम्बु कन्यास्नेहप्रयुक्तं नेत्राश्रु तद्गर्भं नयनं यस्य सः इति वा अर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिरुताः प्रोत्फुल्लपद्माकरजलाशयाः, मनोऽनुकूलभक्ष्यभोज्यानुलेपनवस्त्रभूषणादिभोगोपभोगः, मृदूनि शयनानि, सर्व्वसम्पत्समवेतमेतद् गार्हस्थ्यम्, तथापि केन वा जन्मभूमिर्न स्मर्य्यते ? त्वत्प्रसादादिदमशेषमतिशोभनम् (र)॥३९॥

किन्तु एतन्ममैकं दुःखकारणम्, यदस्मद्भर्त्तास्मद्गेहान्न निःसरति। ममैव केवलमतिप्रीत्या समीपवर्त्ती, नान्यासां मद्भगिनीनाम् एवञ्च मम सहोदरा दुःखिता इत्येवमतिदुःखकारणम्, इत्युक्तस्तया द्वितीयं प्रासादमुपेत्य स्वतनयां परिष्वज्योपविष्टस्तथैव पृष्टवान्। तयापि तथैव सर्व्वमेतत् प्रासादाद्युपभोगसुखमाख्यातम्। ममैव केवलं पार्श्ववर्त्ती नान्यासामस्मद्भगिनीनामित्येवमादि श्रुत्वा समस्तप्रासादेषु राजा प्रविवेश। तनयां तनयां तथैवापृच्छत्, ताभिश्च तथैवाभिहितः परितोषविस्मयनिर्भरविवशहृदयो भगवन्तं सौभरिमेकान्तावस्थितमुपेत्य ब्रवीत् ॥४०॥

दृष्टस्ते भगवन् सुमहानेष सिद्धिप्रभावो नैवंविधः कस्यचिदस्माभिर्विभूतिविलसितमुपलक्षितम् (ल) कियदेतद्भगवंस्तपसः फलमित्यभिपूज्य तमृषिं तेन ऋषिवर्य्येण सह किञ्चित् कालमभिमतोवुभुजे, स्वपुरञ्च जगाम ॥४१॥

कालेन गच्छता तस्य राजतनयासु तासु सार्द्धमभवत्। तदनुदिनारूढस्नेहः स ममताकृष्टहृदयोऽभवत् ॥४२॥

अप्येतेऽस्मत्पुत्राः कलभाषिणः पद्भ्यां गच्छन्तः अप्येते यौवनिनो भवेयुः, अपि कृतदारान् पश्येयम्, अप्येतेषां पुत्रा भवेयुः, अथ तत्पुत्रसमन्वितान् पश्येयम् ? एवमादिमनोरथमकालसम्पत्तिवृत्तिमवेत्यैतत् सञ्चिन्तयामास ॥४३॥

प्रोत्फुल्लानि यानि पद्मानि तदाकारभूता जलाशयाश्च। भोगो भक्ष्यादेरुपभोगोऽनुलेपनादेः ॥३९॥

परितोषो दुहितॄणां सुखेन योगैश्वर्य्येण च विस्मयस्तयोर्निर्भरेण विवशं हृदयं यस्य सः। कृता पूजा येन अब्रवीत् स्तुतिरूपाञ्च पूजामकरोदित्यर्थः ॥४०॥

कियदेतत् इतोऽप्यधिकं सम्भाव्यत इत्यर्थः ॥४१॥

तत्र तेषु पुत्रेषु ॥४२॥

ममताकृष्टत्वमेवाह—'अप्येत' इति। अनुदिनं सम्पत्तिराधिक्यं तस्या वृत्तिरनुवर्त्तनं यत्र मनोरथे तं ज्ञात्वा अचिन्तयत् एतद् वक्ष्यमाणम् ॥४३॥

(र) असुखमपि ते इत्यत्र एकवाक्यसमाप्तिः, अपीत्यत्र वाक्यसमाप्तौ ते इत्यस्य आदेशिनः तव इत्यस्य पदोत्तरत्वाभावादादेशासम्भवादगत्या ते इति प्रयोगस्यार्षत्वयनुसन्धेयम्। विहगाभिरुताः विहङ्गशब्दिताः। 'मनोऽनुकूलौ भक्ष्यादिभोगोपभोगौ' इति पाठानुगुणमत्र 'भोगो भक्ष्यादेरुपभोगोऽनुलेपनादे' रिति श्रीधरव्याख्यानं प्रतिभाति।

(ल) विभूतेः योगैश्वरर्य्यस्य योगजमहिम्न इति विलसितं फलम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहो मे मोहस्यातिविस्तारः ।—
मनोरथानां न समाप्तिरस्ति
वर्षायुतेनापि तथाब्दलक्षैः ।
पूर्णेषु पूर्णेषु पुनर्नवानाम्
उत्पत्तयः सन्ति मनोरथानाम् ॥४४॥

पङ्क्त्यां गता यौवनिनश्च जाता
दारैश्च संयोगमिताः प्रसूताः ।
द्रक्ष्याः सुतास्तत्तनयप्रसूतिं
द्रष्टुं पुनर्वाञ्छति मेऽन्तरात्मा ॥४५॥

द्रक्ष्यामि तेषामपि चेत् प्रसूतिं
मनोरथो मे भविता ततोऽन्यः ।
पूर्णेऽपि तत्राप्यपरस्य जन्म
निवार्य्यते केन मनोरथस्य ॥४६॥

आ मृत्युतो नैव मनोरथाना-
मन्तोऽस्ति विज्ञातमिदं मया च ।
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमात्मसङ्गि (व)॥४७

स मे समाधिर्जलवासमित्र-
मत्स्यस्य सङ्गात् सहसैव नष्टः !
परिग्रहः सङ्गकृतो ममायं
परिग्रहोत्थाश्च महाविधित्साः (श)॥४८॥

दुःखं यदेवैकशरीरजन्म
शतार्द्धसङ्ख्यं तदिदं प्रसूतम् ।
परिग्रहेण क्षितिपात्मजानां
सुतैरनेकैर्बहुलीकृतं तत् ॥४९॥

सुतात्मजैस्तत्तनयैश्च भूयो
भूयश्च तेषां स्वपरिग्रहेण ।
विस्तारमेष्यत्यतिदुःखहेतुः
परिग्रहो वै ममतानिधानम् ॥५०॥

चीर्णं तपो यत्तु जलाश्रयेण
तस्यर्द्धिरेषा तपसोऽन्तरायः ।
मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ॥५१॥

निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ।
आरूढ़योगोऽपि निपात्यतेऽधः
सङ्गेन योगी किमुताल्पसिद्धिः (ष)॥५२

प्रसूता जातापत्याः। तेषाञ्च सुता दृष्टाः। तस्य पौत्रवर्गस्य तनयप्रसूतिम् अपत्यजन्म ॥४५॥

महत्यो विधित्सा इति कृत्येच्छाः ॥४८॥

एकशरीरजन्म दुःखं दुःखहेतुः ॥४९॥

(व) परमात्मसङ्गि परमात्मनि परमेश्वरे यः सङ्गः आसक्तिः तद्युक्तम्। अथवा—परम् अत्यर्थम् आत्मसङ्गि आत्मध्याननिष्ठम् आत्मतत्त्वविचारपरमित्यर्थः ।

एषाम् ऋद्धिस्तस्य तपसोऽन्तरायो विघ्नः। मुषितो वञ्चितः ॥५१॥

आरूढो जातः योगः समाधिर्यस्य सः ॥५२॥

(श) जले एकत्र सलिले यो वासः तेन मित्रं एकस्थान-वासित्वेन बान्धवः मत्स्यः सम्मदनामा मीनाधिपतिः तस्य ।

(ष) निः न विद्यते सङ्गः विषयासक्तिः यस्य तस्य भावः निःसङ्गता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहं चरिष्यामि तथात्मनोऽर्थे
परिग्रहग्राहगृहीतबुद्धिः ।
यथा हि भूयः परिहीणदोषो
जनस्य दुःखैर्भविता न दुःखी ॥५३॥

सर्व्वस्य धातारमचिन्त्यरूप-
मणोरणीयांसमतिप्रमाणम् ।
सितासितञ्चेश्वरमीश्वराणा-
माराधयिष्ये तपसैव विष्णुम् ॥५४॥

तस्मिन्नशेषौजसि सर्व्वरूपि-
ण्यव्यक्तविस्पष्टतनावनन्ते ।
ममाचलं चित्तमपेतदोषं
सदास्तु विष्णावभवाय भूयः ॥५५॥

समस्तभूतादमलादनन्तात्
सर्व्वेश्वरादन्यदनादिमध्यात् ।
यस्मान्न किञ्चित् तमहं गुरूणां
परं गुरुं संश्रयमेमि विष्णुम् ॥५६॥

इति विष्णुपुराणे चतुर्थांशे द्वितीयः अध्यायः

इदानीं परिग्रहग्राहगृहीतबुद्धिरपि जनस्य परिजनस्य दुःखैर्दुःखी यथाहं न भविता, तथा चरिष्ये ॥५३॥

अतिप्रमाणं महतां महीयांसं, प्रमाणं ज्ञापकमतिक्रम्य वर्त्तमानं स्वप्रकाशत्वादिति वा। सितम् बद्धं जीवरूपेण, असितञ्च तद्विपरीतमीश्वररूपेण ॥५४॥

अशेषौजसि सर्वशक्तौ, अव्यक्तं प्रधानं, विस्पष्टं ब्रह्म ते तनुरुपाधिर्यस्य तस्मिन् भूयोऽभवाय पुनर्भावाय ॥५५॥

यस्मादन्यत् किञ्चिन्नास्ति तमाश्रयं शरणं गच्छामि ॥५६॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे द्वितीयोऽध्यायः सम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृतीयोऽध्यायः

[सर्पविनाशमन्त्रवर्णनम्, अनरण्यवंशस्य सगरोत्पत्तेश्च कथनम्]

पराशर उवाच ।

इत्यात्मानमात्मनैवाभिधायासौ सौभरिरपहाय पुत्रगृहासनपरिवर्हादिकमशेषमर्थजातं सकलभार्य्यासमवेतो वनं प्रविवेश । तत्राप्यनुदिनं वैखानसनिष्पाद्यमशेषं क्रियाकलापं निष्पाद्य क्षयितसकलपापः परिपक्वमनोवृत्तिरात्मन्यग्नीनारोप्य भिक्षुरभवत् (क)॥१॥

भगवति आसज्याखिलं कर्म्मकलापमजमविकारममरणादिधर्म्ममवाप परं परवतामच्युतपदम् ॥२॥

इत्येतन्मान्धातुर्दुहितृसम्बन्धाद्व्याख्यातम् ॥३॥

यश्चैतत् सौभरिचरितमनुस्मरति पठति शृणोत्यवधारयति, तस्याष्टौ जन्मान्यसन्मतिरसद्धर्म्मो वा मनसोऽसन्मार्गाचरणमशेषहेयेषु वा ममत्वं न भवतीति । अतो मान्धातुः पुत्रसन्ततिरभिधीयते (ख) ॥४॥

अम्बरीषस्य मान्धातुस्तनयस्य युवनाश्वः पुत्रोऽभूत् । तस्मात् हरितः, यतोऽङ्गिरसो हारिताः ॥५॥

रसातले च मौनेया नाम गन्धर्व्वाः षट्कोटिसङ्ख्यास्तैरशेषाणि नागकुलानि अपहृतप्रधानरत्नाधिपत्यान्यक्रियन्त ॥६॥

तृतीयः अध्यायः

तृतीये सौरभेः सिद्धिर्मान्धातृतनयान्वयः । वर्ण्यते सगरस्यापि चरितं रिपुघातिनः । परिपक्वा रागादिहीना मनोवृत्तिर्यस्य सः भिक्षुर्यतिरभवत् ॥१॥

भगवत्यशेषकर्मकलापमासज्य समर्प्य अच्युतपदमवापेति सम्बन्धः । परवतां परम् । 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः । महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।' इत्युक्त्या परवतामिन्द्रियादीनां परमान्तरमित्यर्थः ॥२॥

राजवंशप्रस्तावे उक्तसौभरिचरितस्यासङ्गतिम् अपाकरोति,—'इत्येतदि'ति ॥३॥

अतः अतः परम् ॥४॥

अम्बरीषस्य युवनाश्वः प्रपितामहसनामा यतो हारिताद्धारिता अङ्गिरसो द्विजा हरितगोत्रप्रवराः । अथ हरितानामार्षेय आङ्गिरसाम्बरीष-युवनाश्वाश्चेति प्रवरपाठात् ॥५॥

इदानीं मान्धातृतनयस्य पुरुकुत्सस्य वंशं वक्तुं कथां प्रस्तौति,– 'रसातल' इत्यादिना 'वरं ददुरि'त्यन्तेन । मुनेः कश्यपपत्न्याः पुत्राश्चित्रसेनाद्याः । अपहृतानि प्रधानरत्नानि आधिपत्यञ्च येषां तान्यक्रियन्त ॥६॥

(क) परिवर्हः परिच्छदः 'परिच्छदे नृपार्हेऽर्थे परिवर्ह' इति कोषात् । वैखानसनिष्पाद्यं वानप्रस्थधर्मावलम्बिना कर्त्तव्यम् ।

(ख) अष्टौ जन्मानि अष्टजन्मजीवनकालानभिव्याप्येत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तैश्च गन्धर्व्ववीर्य्यावधूतैरुरगेश्वरैर्भगवान् अशेषदेवेशस्तवश्रवणोन्मीलितोद्भिन्न-पुण्डरीकनयनो जलशयनो निद्रावसानाद् विबुद्धः प्रणिपत्याभिहितो भगवन् ! अप्यस्माकमेतेभ्यो गन्धर्व्वेभ्यो भयमुपशममेष्यतीत्याह भगवानादिपुरुषः पुरुषोत्तमो यौवनाश्वस्य मान्धातुः पुरुकुत्सनामा पुत्रस्तमहमनुप्रविश्यैतानशेषदुष्टगन्धर्व्वानुपशमं नयिष्यामि (ख)॥७

इत्याकर्ण्य भगवते कृतप्रणामाः पुनर्नागलोकमागताः पन्नगपतयो नर्म्मदाञ्च पुरुकुत्सानयनाय चोदयामासुः ॥८॥

सा चैनं रसातले नीतवती । रसातलगतश्चासौ भगवत्तेजसाप्यायितात्मवीर्य्यः सकल-गन्धर्व्वान् जघान, पुनश्च स्वभवनमाजगाम । सकलपन्नगपतयश्च नर्म्मदायै वरं ददुः । यस्तेऽनुस्मरणसमवेतं नामग्रहणं करिष्यति, तस्य सर्पविषभयं न भविष्यतीति (ग) ॥९॥

अत्र श्लोकः ।—

नर्म्मदायै नमः प्रातर्नर्म्मदायै नमो निशि ।
नमोऽस्तु नर्म्मदे तुभ्यं रक्ष मां विषसर्पतः ॥
इत्युच्चार्य्याहर्निशमन्धकारप्रवेशे वा न
सर्पैर्दश्यते ॥१०॥

न चापि कृतानुस्मरणभुजो विषमपि सुभुक्तमुपघाताय भविष्यति ॥११॥

पुरुकुत्साय च भवतः सन्ततिविच्छेदो न भविष्यतीत्युरगपतयो वरं ददुः ॥१२॥

तैर्भगवान् स्तुत इति शेषः। अर्थात् तेषां स्तवश्रवणेन उन्मीलिते उद्भिन्ने पुण्डरीके इव नयने यस्य। जलशयनः क्षीराब्धिशायी। ऐकपद्यपाठे जलशयनरूपा या निद्रा तस्या अवसानात्। अवसाने इति वा पाठः। बिबुधः सन्। अपि किं गन्धर्वेभ्यो यद्भयं तदुपशममेष्यतीति प्रणिपत्य तैरभिहितो भगवान् मान्धातुः पुरुकुत्सः पुत्रस्तमहमनुप्रविश्य गन्धर्वानुपशमं नयिष्यामीत्याहेत्यन्वयः। नयतेरिड़ागम आर्षः। नेष्यामीति वा पाठः ॥७।

नर्मदां स्वभगिनीं पुरुकुत्सस्य भार्य्याम्। "नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः। तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया"। इति शुकोक्तेः ॥८॥

आप्यायित आत्मा देहो वीर्य्यञ्च बलं यस्य सः ॥९॥

अत्र च नामग्रहणप्रकारे पुनर्नर्म्मदेत्यादि। अह्नि निशि वा उच्चार्य्यम्, गर्भगृहे अन्यत्र वा अन्धकारे प्रवेशे वा सर्पैर्न दश्यते ॥१०॥

कृतानुस्मरणं नर्मदास्मरणपूर्वकम् अन्नादि भुञ्जानस्य ॥११॥

पुरुकुत्सस्य सन्ततिं वक्ष्यन् तदुपयुक्तं वरदानमाह—'पुरुकुत्साये'ति ॥१२॥

(ख) गन्धर्वाणां वीर्य्येण अवधूतैः पराजितैः। चोदयामासुः प्रेरयामासुः।

(ग) सा च नर्मदा च। एनं पुरुकुत्सम्। रसातले नीतवती रसातलं प्रापितवती। नयतेर्द्विकर्मकत्वात् रसातलमिति वक्तव्ये रसातले इति प्रयोग आर्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरुकुत्सो नर्म्मदायां त्रसदस्युमजीजनत्। त्रसदस्युसुतः सम्भूतः, ततोऽनरण्यः, तं रावणो दिग्विजये जघान। अनरण्यस्य पृषदश्वः, पृषदश्वस्य हर्य्यश्वः पुत्रोऽभवत्। ततश्च सुमनाः, तस्यापि त्रिधन्वा, त्रिधन्वनस्त्र्यय्यारुणः ॥१३॥

तस्मात् सत्यव्रतः। सोऽसौ त्रिशङ्कुसंज्ञामवाप, चण्डालतामुपगतश्च द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रकलत्रापत्यपोषणार्थं चाण्डालप्रतिग्रहपरिहरणाय च जाह्नवीतीरे न्यग्रोधे मृगमांसमनुदिनं बबन्ध ॥१४॥

परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्गमारोपितः। त्रिशङ्कोर्हरिश्चन्द्रः, तस्मात् रोहिताश्वः, ततश्च हरितः, हरिताच्चञ्चुः, चञ्चोर्विजय-सुदेवौ। रुरुको विजयात्, रुरुकस्य च वृकः, ततो बाहुः। योऽसौ हैहयतालजङ्घादिभिरवजितोऽन्तर्व्वत्न्या महिष्या सह वनं प्रविवेश ॥१५॥

तस्याश्च सपत्न्या गर्भस्तम्भनाय गरो दत्तः। तेनास्या गर्भः स सप्तवर्षाणि जठर एव तस्थौ। स च बाहुर्वृद्धभावादौर्व्वाश्रमसमीपे ममार ॥१६॥

सा तस्य भार्य्या चितां कृत्वा तमारोप्यानुमरणकृतनिश्चयाभूत्। अथैनामतीतानागतवर्त्तमानकालवेदी भगवानौर्व्वः स्वस्मादाश्रमान्निर्य्यायाब्रवीत्,-अलमेतेनासद्ग्रहेण, अखिलभूमण्डलपतिरतिवीर्य्यपराक्रमोऽनेकयज्ञकृदरातिपक्षक्षयकर्त्ता तवोदरे चक्रवर्त्ती तिष्ठति। मैवं मैवं साहसाध्यवसायिनी भवती भवतु, इत्युक्ता च सा तस्मादनुमरणनिर्बन्धाद् विवराम (घ) ॥१७॥

तेनैव भगवता स्वाश्रममानीयत। कतिपयदिनान्तरे च सहैव तेन गरेणातितेजस्वी बालको जज्ञे। तस्यौर्व्वो जातकर्म्मादिकां क्रियां निष्पाद्य सगर इति नाम चकार। कृतोपनयनश्चैनमौर्व्वो वेदान्

अप्रोक्षितभक्षणगुरुधेनुवधपित्राज्ञालङ्घनरूपैस्त्रिभिः शङ्कुभिरिव हृदि व्यथाहेतुभिस्त्रिशङ्कुसंज्ञामवाप। तथा च हरिवंशे—'पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः। एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महायशाः। त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः। इति'। परिणीयमानविप्रकन्याहरणात् क्रुद्धेन पित्रा शप्तश्चाण्डालतामुपगतश्च। विश्वामित्रकलत्रापत्यपोषणार्थं कलत्रादिपोषणनिमित्तं साक्षात् चाण्डालप्रतिग्रहपरिहरणाय वन्यन्यग्रोधे वटवृक्षे बबन्ध ॥१३॥

तत् श्रुत्वा परितुष्टेन स्वर्गमारोपितस्त्रिशङ्कुः ॥१४॥

अन्तर्वत्न्या गर्भिण्याः ॥१५॥

गरो विषम्। वृद्धभावाज्जराया हेतोः ॥१६॥

चक्रवर्त्तीति आशंसायां सिद्धवन्निर्देशः। साहसेऽविचारितकर्मणि। अध्यवसायिनी निश्चयवती ॥१७॥

(घ) एतेन असद्ग्रहेण चितामारुह्य पत्यनुमरणरूपकर्मांग्रहेण अलम्। प्रकृतकर्मणः असत्त्वे बीजमाह—अखिलेत्यादिना। तथाहि तवैवं साहसेन तव तथाभूतस्य पुत्रस्याप्यवश्यं नाशस्य भावित्वात् महदनिष्टं सम्पत्स्यत इति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शास्त्राण्यशेषाणि अस्त्रञ्चाग्नेयं भार्गवाख्यमध्यापयामास। उत्पन्नबुद्धिश्च मातरमपृच्छत्,—अम्ब! कथमत्र वयम्? क्व वा तातः? तातोऽस्माकं कः? इत्येवमादि पृच्छतः तन्माता सर्व्वमवोचत्। ततः पितृराज्यहरणामर्षितो हैहयतालजङ्घादिवधाय प्रतिज्ञामकरोत्। प्रायशश्च हैहयान् जघान। शक-यवनकाम्बोज-पारद-पह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः (ङ) ॥१८॥

अथैतान् वशिष्ठो जीवन्मृतकान् कृत्वा सगरमाह,-वत्स! वत्स! अलमेभिरतिजीवन्मृतकैरनुसृतैः ॥१९

एते च मयैव त्वत्प्रतिज्ञापरिपालनाय द्विजसङ्गपरित्यागं कारिताः ॥२०॥

स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेशान्यत्वमकारयत्। यवनान् मुण्डितशिरसः, अर्द्धमुण्डान् शकान्, प्रलम्बकेशान् पारदान्, पह्लवांश्च श्मश्रुधरान् निःस्वाध्यायवषट्कारान् एतानन्यांश्च क्षत्रियांश्चकार। ते च निजधर्म्मपरित्यागाद् ब्राह्मणैश्च परित्यक्ता म्लेच्छतां ययुः। सगरोऽपि स्वमधिष्ठानमागम्य अस्खलितचक्रः सप्तद्वीपवतीमिमामूर्वीं प्रशशास (च)॥२१॥

इति विष्णुपुराणे चतुर्थांशे तृतीयः अध्यायः।

तत्कुलगुरुं सगरकुलगुरुम् ॥१८॥

अनुसृतैरनुगतैः। अनुसृतैरिति पाठे अनु पश्चात् देहत्यागलक्षणमरणवद्भिरलं त्वया पुनर्हतैरलमित्यर्थः ॥१९॥

जीवन्मृतत्वं विवृणोति—'एते चे'ति। 'यः स्वधर्मात् परिभ्रष्टो विप्रैश्चैव बहिष्कृतः। स जीवन्नेव लोकेऽस्मिन् मृत इत्यभिधीयते'। इति स्मृतेः। अस्खलितम् अप्रतिहतं चक्रं सैन्यमाज्ञा वा यस्य सः ॥२०-२१॥

(ङ) तेनैव भगवता और्वेण मुनिना। तेन गरेण बाहुमहिष्या गर्भस्तम्भनाय पुरा सपत्न्या दत्तेन विषेण सहैव। सगर इति नाम चकार, गरेण सह वर्त्तमानः सगर इति व्युत्पत्तिमभिसन्धायेति शेषः। अमर्षः क्रोधः तद्युक्तः अमर्षितः। क्रुद्ध इत्यर्थः।

(च) वेशेन अन्यः वेशान्यः तस्य भावः वेशान्यत्वम्। उर्वीं पृथिवीम्।

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराटीकायां चतुर्थेऽंशे तृतीयोऽध्यायः समाप्तः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थोऽध्यायः ।

[सगरस्याश्वमेधयज्ञः, भगीरथस्य गङ्गानयनम्, रामचन्द्रादीनामुत्पत्तिश्च]

पराशर उवाच ।

कश्यपदुहिता सुमतिर्विदर्भराजतनया च केशिनी द्वे भार्य्ये सगरस्यास्ताम् ॥१॥

ताभ्याञ्चापत्यार्थमाराधित और्व्वः परमेण समाधिना वरमदात् ॥२॥

एका वंशधरमेकं पुत्रम्, अपरा षष्टिं पुत्रसहस्राणि जनयिष्यतीति, यस्या यदभिमतं गृह्यताम् । इत्युक्ते केशिनी पुत्रमेकम्, सुमतिः पुत्रसहस्राणि षष्टिं वव्रे । तथेति च ऋषिणाभिहिते अल्पैरेवाहोभिरेकमसमञ्जसं नाम वंशधरं पुत्रमसूत केशिनी । विनतातनयायास्तु सुमत्याः षष्टीः पुत्रसहस्राण्यभवन् । तस्मादसमञ्जसोऽंशुमान् नाम कुमारो जज्ञे(क) ॥३॥

स तु असमञ्जा बाल्यादेवापवृत्तः । पिता चास्या-चिन्तयत्,— अयमतीतबाल्यो बुद्धिमान् भविष्यतीति ।

अथ तत्रापि वयस्यतीते तच्चरितमेवैनं पिता तत्याज(ख) ॥४॥

तान्यपि षष्टिः कुमारसहस्राणि असमञ्जसश्चरितमनुचक्रुः ॥५॥

ततश्चासमञ्जसश्चरितानुकारिभिः सागरैरपध्वस्तयज्ञादिसन्मार्गे जगति देवाः सकलविद्यामयमसंस्पृष्टमशेषदोषैर्भगवतः पुरुषोत्तमस्यांशभूतं कपिलर्षिं प्रणम्य तदर्थमूचुः ॥६॥

भगवन्! एभिः सगरतनयैरसमञ्जसश्चरितमनुगम्यते, कथमेवमेभिरनुसरद्भिर्जगद्भविष्यतीत्यार्त्तजगत्परित्राणाय च भगवतोऽत्र शरीरग्रहणम् । इत्याकर्ण्य भगवान् 'अल्पैरेव दिनैरेते विनङ्क्ष्यन्ति' इत्युक्तवान्(ग) ॥७॥

चतुर्थोऽध्यायः

कपिलः सागरान् षष्टि-सहस्राणि यथादहत्। सौदासरक्षोभावश्च तथा तुर्येऽनुवर्ण्यते। 'कश्यपदुहिते'ति। कश्यपस्य मरीचिपुत्रस्य विनतातनयाया इत्यग्रे वक्ष्यमाणत्वात् ॥१॥

समाधिना चित्तैकाग्र्येण ॥२॥

अपवृत्तो दुर्वृत्तः, अतीतबाल्यो गतबालत्वः । तत्र बाल्ये अतीतेऽपि तदेव दुष्टं चरितं यस्य तम् ॥४॥

अनुचक्रुः अनुसृताः ॥५॥

अपध्वस्ता निराकृताः यज्ञादयः सन्मार्गाः यस्मिन् तथाभूते जगति सति। तदर्थं यज्ञादिलोकरूपमर्थम् ॥६॥

भगवन्नित्यादिना आर्त्तस्वरूपकथनम् ॥७॥

(क) यस्याः सगरभार्य्यायाः यदभिमतं, गृह्यतां तया तत् वरगोचरत्वेनेति शेषः ।

(ख) एनम् असमञ्जसम् । पिता सगरः ।

(ग) एवम् उक्तरूपेण अनुसरद्भिः असमञ्जसः चरितमनुवर्त्तमानैः हेतुभूतैः जगत् कथं भविष्यति, जगतः कीदृशी दुर्दशा भविष्यतीत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३२२ विष्णुपुराणम् [चतुर्थांशे

तत्रान्तरे च सगरो हयमेधमारेभे। तत्र च तत्पुत्रैरधिष्ठितमस्याश्वं कोऽप्यपहृत्य भुवो विवरं प्रविवेश(घ) ॥८॥

ततश्चाश्वान्वेषणाय तनयान् युयोज। ततस्तत्तनयाश्चाश्वखुरपदवीमनुसरन्तोऽतिनिर्बन्धेन वसुधातलमेकैको योजनं योजनमवनेश्चखान(ङ) ॥९॥

पाताले चाश्वं परिभ्रमन्तमवनीपतिनन्दनास्ते ददृशुः। नातिदूरस्थितञ्च भगवन्तमपघने शरत्कालेऽर्कमिव तेजोभिरनवरतमूर्द्ध्वमधश्चाशेषदिशश्चोद्भासयमानं कपिलर्षिमपश्यन्(च) ॥१०॥

ततश्चोद्यतायुधा 'दुरात्मायमस्मदपकारी यज्ञविघातकर्त्ता हयहर्त्ता हन्यतां हन्यता'मित्यधावन्। ततश्च तेनापि भगवता किञ्चिदीषत्परिवर्त्तितलोचनेन विलोकिताः स्वशरीरसमुत्थेनाग्निना दह्यमाना विनेशुः(छ) ॥११॥

सगरोऽप्यनुगम्याश्वानुसारि तत् पुत्रबलक्षयं परमर्षिकपिलतेजसा दग्धमंशुमन्तमसमञ्जसः पुत्रमश्वानयनाय चोदयामास ॥१२॥

स तु सगरतनयखातमार्गेण कपिलमुपगम्य भक्तिनम्रस्तथा तथा च तुष्टाव, यथैनं भगवानाह—गच्छैनं पितामहायाश्वं प्रापय, वरं वृणीष्व च पुत्र! पौत्रश्च ते स्वर्गाद् गङ्गामानयिष्यतीति(ज)।

अथांशुमानपि ब्रह्मदण्डहतानामस्मत्पितॄणां स्वर्गाय स्वर्गायोग्यानां स्वर्गप्राप्तिकरं वरमसौ भगवान् प्रयच्छतु इत्याह ॥१४॥

अधिष्ठितं संरक्षितम् ॥८॥

ततोऽनन्तरं तत्तनयाः सगरतनयाः। अतिनिर्बन्धेन खुरचिह्नानुसारेण वसुधातलं विविशुरिति पूर्वोक्तस्यैव विशतेर्वचनविपरिणामेनान्वयः। तेषाञ्चैकैको योजनं योजनमेकैकं योजनं चखान गर्त्तञ्चकार इत्यर्थः। चखनुरिति पाठे तत्तनया भुवस्तलम् चखनुरित्येकं वाक्यम्। तत्रेयत्ता-माह,—एकैकः अर्थात् तेषामेव, योजनं योजनं चखानेत्यन्वयः वाक्यम् ॥८॥

अपघने अपगतमेघे ॥१०॥

ईषत् परिवर्त्तितं तिर्यक्कृतं लोचनं तेन किञ्चित् विलोकिताः सन्तो विनेशुः ॥११॥

कपिलेन निमित्तेन यत् स्वदेहजं तेजस्तेन दग्धम् ॥१२॥

हे पुत्र! तव पौत्रो गंगामानयिष्यतीति इड्लोपश्छान्दसः। भुवमिति तत्रार्थादुक्तम् ॥१३॥

(घ) हयमेधम् अश्वमेधं नाम महाक्रतुम्, आरेभे आयोजयामास। तत्पुत्रैः सगरपुत्रैः। अस्य अश्वमेधस्य सम्बन्धिनमश्वम्। अथवा अस्य सगरपितुरश्वम् अश्वमेधयज्ञसाधनीभूतम् तुरङ्गम्।

(ङ) युयोज नियुङ्क्ते स्म सगर इति शेषः।

(च) अवनीपतेः सगरस्य राज्ञः नन्दनाः पुत्राः अवनीखननेन पातालं गता इति शेषः। नातिदूरस्थितं किञ्चिद्दूरे वर्त्तमानं सन्निहितमित्यर्थः। एतच्च चक्षुषा दर्शनयोग्यत्वसूचनाय।

(छ) अयं दुरात्मा हयहर्त्ता अश्वहारकः, हन्यताम् अयमिति शेषः। इति अधावन् उक्तरूपं वदन्तः कपिलर्षिं प्रति धावितवन्तः स्म। तेनापि कपिलर्षिणापि। दह्यमाना विनेशुः मृताः तनया इति शेषः।

(ज) उपगम्य उपसृत्य तत्समीपं गत्वेत्यर्थः। तथा तथा तेन तेन प्रकारेण तुष्टाव, यथा येन स्तवप्रकारेण तुष्टः सन् भगवान् कपिलर्षिः एनम् सगरस्य पौत्रमंशुमन्तम् आह।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तञ्चाह भगवान्,—उक्तमेवैतन्मया पौत्रस्ते त्रिदिवाद् गङ्गां भुवमानयिष्यतीति । तदम्भसा संस्पृष्टेष्वस्थिभस्मस्वेते स्वर्गमारोक्ष्यन्ति। भगवद्विष्णुपादाङ्गुष्ठविनिर्गतजलस्य हि तन्माहात्म्यं यन्न केवलमभिसन्धिपूर्व्वकं स्नानाद्युपभोगेषूपकारकम्, अनभिसंहितमप्यपेतप्राणस्यास्थि-चर्म्म-स्नायु-केशाद्युत्सृष्टं शरीरञ्च यद्भूपतितं सद्यः शरीरिणं स्वर्गं नयतीत्युक्तः प्रणम्य च भगवतेऽश्वमादाय पितामहयज्ञमाजगाम(झ) ॥१५॥

सगरोऽस्याश्वमादाय तं यज्ञं समापयामास । सागरञ्चात्मजप्रीत्या पुत्रत्वे कल्पयामास ॥१६॥

तस्याप्यंशुमतो दिलीपः पुत्रोऽभवत् । दिलीपस्यापि भगीरथः, योऽसौ गङ्गां स्वर्गादिहानीय भागीरथीसंज्ञां चकार ॥१७॥

भगीरथात् श्रुतः, तस्यापि नाभागः, ततोऽप्यम्बरीषः, तस्मात् सिन्धुद्वीपः, तस्याप्ययुताश्वः, तत्पुत्र ऋतुपर्णो नलसहायोऽक्षहृदयज्ञोऽभूत् ॥१८॥

ऋतुपर्ण-पुत्रः सर्व्वकामः । तत्तनयः सुदासः । सुदासात् सौदासो मित्रसहनामा ॥१९॥

योऽसावटव्यां मृगयागतो व्याघ्रद्वयमपश्यत्। ताभ्याञ्च तद् वनमपमृगं कृतम् ॥२१॥

स चैकं तयोर्वाणेन जघान ॥२२॥

म्रियमाणश्चासावतिभीषणाकृतिरतिकरालवदनो राक्षसोऽभवत् ॥२३॥

द्वितीयोऽपि प्रतिक्रियां ते करिष्यामीत्युक्त्वान्तर्धानं जगाम ॥२४॥

ब्रह्मदण्डः अचिरात् विनङ्क्ष्यन्तीति कपिलोक्तो ब्रह्मशापः, ब्राह्मणवधोद्यमो वा, तद्बलेन हतानां पितॄणां पितृव्याणां स्वर्गाय स्वर्गभोगाय तत्प्राप्तिहेतुं वरं स्वर्गं वव्रे ॥१४॥

अभिसन्धिपूर्वकं स्नानाद्युपभोगेषूपकारकं स्वर्गप्रापकमिति यत् तत् केवलं माहात्म्यमिति न, किन्तु अपेतप्राणस्य मृतस्यास्थ्यादि यत्रोत्सृष्टं क्षिप्तं संसृष्टं वा अनभिसंहितमपि शरीरिणं स्वर्गं नयतीति यत्, तदपि माहात्म्यमित्युक्त इत्यन्वयः। यस्य गंगाजलस्य सम्बन्धि भूपतितमस्थ्यादि इति वा ॥१५॥

सागरं सगरसुतैः खननाद् वर्द्धितम्, अत एवात्मजप्रीत्या पुत्रत्वे कल्पयामास स्थापयामास। तस्मिन् पुत्रबुद्धिं कृतवान् इत्यर्थः ॥१६॥

भागीरथी संज्ञा यस्यास्ताम् ॥१७॥

नलस्य सहायः सखा, अक्षहृदयज्ञः द्यूतादौ गणनानिपुणः ॥१८॥

मित्रं वशिष्ठं प्रतिशप्तुं समर्थोऽपि सहते स्म, तेन मित्रसह-नामा ॥१९॥

तस्यैव कल्माषपादसंज्ञां वक्तुं कथां प्रस्तौति, 'योऽसावि'ति ॥२०॥

अपमृगं निर्मृगम् ॥२१॥

तयोर्व्याघ्रयोः ॥२२॥

अतिकरालं दन्तुरं वदनं यस्य सः ।२३।

प्रतिक्रियां वैरनिर्यातनम् ॥२४॥

(झ) तदम्भसा तस्या गङ्गायाः सलिलेन संस्पृष्टेषु सत्सु। एते तव पितरः स्वर्गमारोक्ष्यन्ति। भगवद्विष्णुपादाङ्गुष्ठविनिर्गतजलस्य गङ्गाभूयं गतस्येति शेषः। अभिसन्धिपूर्वकम् एतेन स्वर्गो भवतु इत्येवं कामनापूर्वकम् स्नादाद्युपभोगेषु गङ्गास्नानानुष्ठानेषु कृतेषु जातेषु वा, अनभिसंहितमिति अभिसंहितम् अभिसन्धानम्, भावे क्तप्रत्ययात्, तद् यत्र नास्ति तत् अनभिसंहितम् अभिसन्धानरहितमित्यर्थः। एतत् उत्सृष्टमिति क्रियाया विशेषणम्। उत्सृष्टं परित्यक्तं शरीरिणेति शेषः। शरीरिणं तत्सम्बन्धिनमिति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कालेन गच्छता स सौदासो यज्ञमयजत्। परिनिष्ठितयज्ञे चाचार्य्यवशिष्ठे निष्क्रान्ते तद्रक्षो वशिष्ठरूपमास्थाय यज्ञावसाने मम समांसं भोजनं देयम्, तत् संष्क्रियतां क्षणादिहागमिष्यामीतुक्त्वा निष्क्रान्तः(अ) ॥२५॥

भूयश्च सूदवेशं कृत्वा राजाज्ञया मानुषमांसं संस्कृत्य राज्ञे न्यवेदयत्। असावपि हिरण्यपात्र-स्थितं मांसमादाय वशिष्ठागमनप्रतीक्षोऽभवत्(ट) ॥२६॥

आगताय च वशिष्ठाय निवेदितवान्, स चाचिन्तयत्, अहो! राज्ञोऽस्य दौःशील्यम्, येनैतन्मांसमस्माकं प्रयच्छति। किमेतद् द्रव्यजातमितिध्यानपरोऽभूत्, अपश्यच्च तन्मानुषमांसम्। ततश्च क्रोधकलुषीकृतचेता राजानं प्रति शापमुत्ससर्ज्ज, यस्मादभोज्यमस्मद्विधानां तपस्विनाम् अवगच्छन्नपि भवान् मह्यं ददाति, तस्मात्तवैवात्र लोहितबुद्धिर्भविष्यतीति(ठ) ॥२७॥

अनन्तरञ्च तेनापि भगवतैवाभिहितोऽस्मीत्युक्तं किं किं मयैवाभिहितम् इति पुनरपि समाधितस्थौ ॥२८॥

समाधिविज्ञानावगतार्थश्चास्यानुग्रहं चकार, नात्यन्तमेतत्, द्वादशाब्दं भवतो भोजनं भविष्यतीति ॥२९॥

असावपि तु प्रगृह्योदकाञ्जलिं मुनिशापप्रदानायोद्यतो 'भगवानस्मद्गुरुः नार्हस्येवं कुलदेवतभूतमाचार्य्यं शप्तु'मिति स्वपत्न्या मदयन्त्या प्रसादितः। शस्याम्बुदरक्षार्थं तच्छापाम्बु नोर्व्यां नाकाशे चिक्षेप, तेनैव स्वपादौ सिषेच ॥३०॥

तेन क्रोधश्रृतेनाम्भसा दग्धच्छायौ तत्पादौ कल्माषतामुपगतौ(ड) ॥३१॥

परिनिष्ठितः समापितो यज्ञो येन तस्मिन् निष्क्रान्ते सति ॥२५॥

असावपि राजापि ॥२६॥

अत्र नरमांसे लोलुपा सस्पृहा बुद्धिः, राक्षसो भविष्यसीत्यर्थः। बुद्धिपदं विना लोलुपेति पाठे सस्पृहतेत्यर्थः ॥२७॥

तेन राज्ञा मांसभोजनार्थं भगवतैवाभिहितोऽस्मीत्युक्तः। मयैवाभिहितमिति किञ्च किमिति सम्भ्रमात् समाधौ तस्थौ ॥२८

समाधिज्ञानेनावगतार्थः राक्षसकृतमेवैतत् नास्यापराध इति ज्ञातार्थः, एतन्मांसमोजनं द्वादशाब्दं भवतु इति, नात्यन्तं न यावज्जीवमित्यर्थः ॥२९॥

भगवानस्मद्गुरुरित्यादि सोपपत्तिवचनेन मदयन्त्या प्रसादितः तच्छापाम्बु वशिष्ठशापार्थं यत्तत् शस्यरक्षार्थं नोर्व्याम्, अम्बुदरक्षार्थं नाकाशे च चिक्षेप, किन्तु स्वपादौ अम्बुना स्वपादौ सिषेच ॥३०॥

क्रोधश्रृतेन क्रोधाग्नितप्तेन दग्धा च्छाया कान्तिः यस्य कल्माषतां कृष्णपाण्डुताम् ॥३१॥

(अ) समांसं भोजनं देयं मह्यं त्वयेति शेषः।

(ट) सूदस्य पाचकस्य वेशं कृत्वा आत्मन इति शेषः। वशिष्ठस्य आगमनं प्रतीक्षत इति तथा।

(ठ) दुष्टं शीलं यस्य तस्य भावः दौःशील्यम् दुष्टत्वम्। अपश्यत् ध्यानयोगेनेति शेषः।

(ड) शस्याम्बुरक्षार्थमिति—यदि शापार्थं गृहीत जलिः पृथिव्यां क्षिप्तः स्यात्, तदा पृथिवी अनुर्वरा, स्थिरशस्यानां विनाशः स्यात्, ततः शस्यानामभावेन जागतिकमहानपकारः स्यात्। यद्याकाशे क्षिप्तः स्यात्, तदा जलदा जगदुपकारका जलदा विपद्येरन्, तेनापि सर्वं जगद् विनश्येत् इति भावः। प्रसादित इति क्रोधापगमेन प्रसन्नतां लम्भित इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततश्च स कल्माषपादसंज्ञामवाप, वशिष्ठशापाच्च षष्ठे काले राक्षसभावमुपेत्याटव्यां पर्य्यटन्ननेकशो मानुषानभक्षयत् ॥३२॥

एकदा तु कश्चिन्मुनिमृतुकाले भार्य्यया सह सङ्गतं ददर्श ॥३३॥

तयोश्च तमतिभीषणं राक्षसमवलोक्य त्रासात् प्रधावितयोर्दम्पत्योर्ब्राह्मणं जग्राह ॥३४॥

ततः सा ब्राह्मणी बहुशस्तं याचितवती, प्रसीद इक्ष्वाकुकुलतिलकभूतस्त्वं महाराजमित्रसहः, न राक्षसः। नार्हसि स्त्रीधर्म्मसुखाभिज्ञो मय्यकृतार्थायामिमं मद्भर्त्तारमत्तुम्, इत्येवं बहुप्रकारं तस्यां विलपन्त्यां व्याघ्रः पशुमिव तं ब्राह्मणमभक्षयत्(ण) ॥३५

ततश्चातिकोपसमन्विता ब्राह्मणी तं राजानं 'यस्मादेवं मय्यतृप्तायां त्वयायं मत्पतिर्भक्षितः, तस्मात् त्वमप्यन्तमवलोपभोगप्रवृत्तौ प्राप्स्यसि' इति शशापाग्निं प्रविवेश च(त) ॥३६॥

ततस्तस्य द्वादशाब्दपर्य्यये विमुक्तशापस्य स्त्रीविषयाभिलाषिणो मदयन्ती स्मारयामास। ततश्च परमसौ स्त्रीसम्भोगं तत्याज ॥३७॥

वशिष्ठश्च अपुत्रिणा राज्ञा पुत्रार्थमभ्यर्थितो मदयन्त्यां गर्भाधानं चकार। यदा च सप्त वर्षाण्यसौ गर्भो न जज्ञे, ततस्तं गर्भमश्मना देवी जघान। पुत्रश्चाजायत। तस्य चाश्मक एव नामाभवत्। अश्मकस्य मूलको नाम पुत्रोऽभवत्। योऽसौ निःक्षत्रेऽस्मिन् क्ष्मातले क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य्य रक्षितः। ततस्तं नारीकवचमुदाहरन्ति। मूलकाद् दशरथः, तस्मादिलिविलः, ततश्च विश्वसहः, तस्माच्च खट्वाङ्गो दिलीपः। योऽसौ देवासुराणां संग्रामे देवताभिरभ्यर्थितोऽसुरान् जघान। स्वर्गे च कृतप्रियैर्देवैर्वरार्थं चोदितः प्राह,—यद्यवश्यं वरो ग्राह्यस्तन्ममायुः कथ्यतामिति। अनन्तरञ्चैतैरुक्तम्—एकमुहूर्त्तप्रमाणमायुः। इत्युक्तोऽस्व-

---

राक्षसभावमुपेत्य अत एव षष्ठे षष्ठे काले तृतीयदिनान्ते ॥३२॥

(ढ) षष्ठे काले भोजनकाले। तथाहि प्रतिदिनं भोजनस्य द्वौ कालौ मध्याह्नकालश्च रात्रिश्च, तयोरेकैकशो गणनया षण्णां कालानां प्रथमदिने द्वौ, द्वितीयदिने ताभ्यां योगेन चत्वारः कालाः, तृतीयदिने च तैश्चतुर्भिर्योगेन षट् कालाः, तेषाञ्चान्तिमः कालः षष्ठः कालः, तस्मिन्नेव कथञ्चिज्जीवनरक्षार्थं स मानुषानभक्षयत्। इति भावः। अत एव श्रीधरेणात्र 'षष्ठे षष्ठे काले तृतीयदिनान्ते' इत्येवं व्याख्यानं कृतम्।

(ण) तस्यां ब्राह्मण्यां विलपन्त्यां सत्याम् तस्या विलापपूर्वं वचनमुपेक्ष्येति भावः।

इदानीं तस्यैव राज्ञ औरसपुत्राभावं वक्तुं कथां प्रस्तौति—'एकदे'त्यादिना 'स्त्रीसम्भोगं तत्याजे'त्यन्तेन ॥३३॥

दम्पत्योः प्रधावितयोः पलायितयोर्मध्ये ब्राह्मणं जग्राह ॥३४॥

स्त्रीधर्मो मैथुनं तत्सुखाभिज्ञः ॥३५॥

अन्तं मृत्युम् ॥३६॥

द्वादशाब्दपर्य्यये तं ब्राह्मण्याः शापं पत्नी स्मारयामास ॥३७॥

(त) अवलायाः स्त्रिया उपभोगप्रवृत्तौ रमणप्रवृत्तौ सत्यम् अन्तं मृत्युं प्राप्स्यसि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लितगतिना विमानेन लघिमगुणो मर्त्यलोकमागम्याह,—यथा न ब्राह्मणेभ्यः सकाशादात्मापि मे प्रियतरः, न चापि स्वधर्म्मोल्लङ्घनं मया कदाचिदप्यनुष्ठितम्, न च सकलदेवमानुष-पशु-वृक्षादिकेऽप्यच्युतव्यतिरेकवती दृष्टिर्ममाभूत्, तथा तमेव देवं मुनिजनानुस्मृतं भगवन्तमस्खलितगतिरद्य प्रापयेयमित्यशेषदेवगुरौ भगवत्यनिर्द्देश्यवपुषि सत्तामात्रात्मन्यात्मानं परमात्मनि वासुदेवे युयोज, तत्रैव लयमवाप(थ) ॥३८॥

तत्रापि श्रूयते श्लोको गीतः सप्तर्षिभिः पुरा ।
खट्वाङ्गेन समो नान्यः कश्चिदुर्व्व्यां भविष्यति ॥
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम् ।
त्रयोऽभिसंहिता लोका बुद्ध्या दानेन चैव हि ॥३९

खट्वाङ्गतो दीर्घबाहुः पुत्रोऽभवत् । ततो रघुः, तस्मादप्यजः, अजाद् दशरथः, दशरथस्यापि श्रीभगवान् अब्जनाभो जगत्स्थित्यर्थमात्मांशेन राम-लक्ष्मण-भरत-शत्रुघ्नरूपिणा चतुर्द्धा पुत्रत्वमयासीत् ॥४०॥

रामोऽपि बाल एव विश्वामित्रयज्ञरक्षणाय गत्वा ताड़कां जघान ॥४१॥

यज्ञे च मारीचमिषुपाताहतं दूरं चिक्षेप, सुबाहुप्रमुखाश्च क्षयमनयत् । सन्दर्शनमात्रेणैवाहल्यामपापां चकार । जनकगृहे च माहेश्वरं चापमनायासेनैव बभञ्ज सीताञ्चायोनिजां जनकराजतनयां वीर्य्यशुल्कां लेभे(द) ॥४२॥

सकलक्षत्रक्षयकारिणमशेषहैहयकुलकेतुभूतञ्च परशुराममपास्तवीर्य्य-बलावलेपं चकार ॥४३॥

पितृवचनाच्चागणितराज्याभिलाषो भ्रातृभार्य्याभ्यां समन्वितो वनं विवेश ॥४४॥

अस्खलितगतिना देवविमानेन लघिमगुणोऽतिशीघ्रगतिः सन् मर्त्तलोकमुपेत्य ब्राह्मणप्रियत्वादिना धर्मेण भगवत्प्राप्तिं प्रार्थयन् समाधौ यतते स्मेत्याह—'यथे'त्यादिना 'वासुदेवाख्ये युयोजे'त्यन्तेन । प्रापयेयं प्राप्नुयाम् ॥३८॥

मुहूर्त्तं जीवितं प्राप्य ज्ञात्वा बुद्धया 'वासुदेवः सर्वमि'ति ज्ञानेन । यद्वा दानं समर्पणं खण्डनमिति वा प्रविलापनमिति यावत्, तेनाभिसंहिता विषयीकृतास्त्रयो लोका विष्णौ प्रविलापिता इत्यर्थः ॥३९॥

अयासीत् प्राप्तः ॥४०॥

ताड़काद्युपाख्यानञ्च रामायणप्रसिद्धम् ॥४१॥

वीर्य्यं पराक्रम एव शुल्कं मूल्यं यस्यास्तां सीतां लेभे ॥४२॥

केतुभूतं विनाशकं वीर्य्यं प्रभावः बलं शक्तिः । अपास्तवीर्य्यबलनिमित्तोऽवलेपो मदो यस्य तम् ॥४३॥

अगणितो राज्याभिलाषोऽभिलष्यमाणं राज्यं येन भ्रातृभार्य्याभ्यां लक्ष्मणसीताभ्यां समन्वितः ॥४४॥

(थ) न जज्ञे उदरान्न निर्जगाम । अश्मना प्रस्तरखण्डेन जघान आजघान । कृतं प्रियं प्रीतिकरं वस्तु येषां तैः । वरो ग्राह्य इति मयेति शेषः । अच्युतव्यतिरेकवती विष्णुभेदवती विष्णुभेदप्रकारिकेत्यर्थः दृष्टिः ज्ञानम्, दृशेर्ज्ञानसामान्यार्थकत्वात्तथार्थः ।

(द) माहेश्वरं चापम् सीताया विवाहार्थं पणरूपेण रक्षितं हरधनुः । वीर्य्यं हरधनुर्भङ्गसूच्यं वीरत्वमेव शुल्कम् मूल्यं यस्याः ताम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विराध-खर-दूषणादीन् कबन्ध-वालिनौ च जघान। बद्ध्वा चाम्भोनिधिम् अशेषराक्षसकुलक्षयं कृत्वा दशाननापहृतां तद्वधापहृतकलङ्कामप्यनलप्रवेशशुद्धामशेषदेवेशसंस्तूयमानां सीतां जनकराजतनयामयोध्यामानिन्ये ॥४५॥

भरतोऽपि गन्धर्व्वविषयसाधनायोग्रगन्धर्व्वकोटीस्तिस्रो जघान। शत्रुघ्नेनाप्यमितबलपराक्रमो मधुपुत्रो लवणो नाम राक्षसेश्वरो निहतो मथुरा च निवेशिता। इत्येवमाद्यतुलबलपराक्रमविक्रमणैरतिदुष्टनिवर्हणैरशेषस्यास्य जगतो निष्पादितस्थितयो राम-लक्ष्मण-भरत-शत्रुघ्नाः पुनर्द्दिवमारूढाः। येऽपि तेषु भगवदंशेष्वनुरागिणः कोशलनगरजनपदास्तेऽपि तन्मनसस्तत्सलोकतामवापुः(ध) ॥४६॥

रामस्य तु कुश-लवौ पुत्रौ, लक्ष्मणस्याङ्गद-चन्द्रकेतू, तक्ष-पुष्करौ भरतस्य, सुबाहु-शूरसेनौ च शत्रुघ्नस्य ॥४७॥

कुशस्यातिथिः, अतिथेरपि निषधः पुत्रोऽभवत्। निषधस्यापि नलः, तस्यापि नभाः, नभसः पुण्डरीकः, तत्तनयः क्षेमधन्वा, तस्य च देवानीकः। तस्याप्यहीनगुः (ततो रूपः) ततो रुरुः, तस्य च पारिपात्रः, पारिपात्राद्दलः, दलाच्छलः, तस्याप्युक्थः, उक्थाद् वज्रनाभः, तस्मात् शङ्खनाभः, ततो व्युत्थिताश्वः, ततश्च विश्वसहो जज्ञे। हिरण्यनाभस्ततो महायोगीश्वरजैमिनिशिष्यः। यतो याज्ञवल्क्यो योगमवाप। हिरण्यनाभस्य पुत्रः पुष्यः, तस्माद् ध्रुवसन्धिः, ततः सुदर्शनः, तस्मादग्निवर्णः, ततश्च शीघ्रः, ततोऽपि मरुः पुत्रोऽभूत्! योऽसौ योगमास्थायाद्यापि कलापग्राममाश्रितस्तिष्ठति। आगामियुगे सूर्य्यवंशक्षत्रप्रवर्त्तयिता भविष्यतीति। प्रसुश्रुतस्तस्यात्मजः, तस्यापि सुगन्धिः, ततश्चामर्षः, तस्य महस्वान् ततो विश्रुतवान्, ततो बृहद्बलः, योऽर्ज्जुनतनयेनाभिमन्युना भारतयुद्धे क्षयमनीयत ॥४८॥

एते हीक्ष्वाकुभूपालाः प्राधान्येन मयोदिताः।
एतेषाञ्चरितं शृण्वन् सर्व्वपापैः प्रमुच्यते ॥४९॥

इति विष्णुपुराणे चतुर्थांशे चतुर्थः अध्यायः ॥

अपहृतकलङ्कामपि अपगतखेदाम्। रामचरितसहभावेन लक्ष्मणचरितमप्युक्तमेवेति पृथक् नोक्तम् ॥४५॥

(ध) गन्धर्वाणां विषयो देशः तस्य साधनाय आयत्तीकरणाय। मथुरा तदाख्या प्रसिद्धा नगरी। अतिदुष्टानां अतिदुर्द्दान्तानाम् निवर्हणैः क्षयसाधनैः।

अतुलबलपराक्रमैर्यानि विक्रमणानि चरितानि तैः ॥४६॥

प्रसुश्रुतः तस्य मरोः ॥४७॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे चतुर्थोऽध्यायः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चमोऽध्यायः

[निमियज्ञविवरणम्, सीताया उत्पत्तिः, कुशध्वजवंशकथनञ्च ।]

पराशर उवाच ।

इक्ष्वाकुतनयो योऽसौ निमिर्नाम, स तु सहस्रवत्सरं सत्रमारेभे. वशिष्ठञ्च होतारं वरयामास ॥१॥

तमाह वशिष्ठः, अहमिन्द्रेण पञ्चवर्षशतं यागार्थं प्रथमतरं वृतः, तदनन्तरं प्रतिपाल्यताम्, आगतस्त्वापि ऋत्विग् भविष्यामि, इत्युक्ते स पृथिवीपतिना न किञ्चिदुक्तः (क) ॥२॥

वशिष्ठोऽप्यनेन समन्वीप्सितमित्यमरपतेर्यागमकरोत् ॥३॥

सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत् । समाप्ते चामरपतेर्यागे त्वरावान् वशिष्ठो निमेः क्रतुं करिष्यामीत्याजगाम, तत्कर्म्मकर्त्तृत्वञ्च तत्र गौतमस्य दृष्ट्वा, अथ स्वपते तस्मै राज्ञे मामप्रत्याख्यायैवदनेन गौतमाय कर्म्मान्तरमर्पितं यस्मात्, तस्माद्विदेहो भविष्यतीति शापं ददौ(ख) ॥४॥

प्रतिबुद्धश्चासाववनीपतिरपि प्राह,—यस्मान्मसम्भाष्य अजानत एव शयानस्य शापोत्सर्गमदुष्टगुरुश्चकार, तस्मात् तस्यापि देहः पतिष्यतीति प्रतिशापं दत्त्वा देहमत्यजत् ॥५॥

पञ्चमः अध्यायः

वशिष्ठस्य निमेः शापाद्देहपातः परस्परम् । राज्ञस्तस्यैव वंशोऽपि पञ्चमे तु प्रपञ्च्यते । निमेरेव विदेह इति संज्ञां वक्तुं कथां प्रस्तौति—'इक्ष्वाकुतनयो योऽसावि'त्यादिना 'निमेषं चक्रु'रित्यन्तेन ॥१॥

तदनन्तरमागतः तवापि ऋत्विक् भविष्यामि । तावत् प्रतिपाल्यतां प्रतीक्ष्यतामिति वशिष्ठेनोक्ते निमिना च वशिष्ठभयात् धर्मविलम्बानौचित्याच्च वशिष्ठः किमपि नोक्तः ॥२॥

मौनं सम्मतिलक्षणमिति युक्त्यैव समन्वीप्सितमतमिति मत्वा तत्र गत्वा यागमकरोत् ॥३॥

मामप्रत्याख्यायेति पूर्वं मदुत्तरे प्रत्युत्तरमदत्त्वैव। इन्द्रयागात् मामनिवार्य्यैव, एतत् कर्मान्तरं निमेर्मदनुपूर्वं पूर्वकर्मवत् एतत् कर्मान्तरं मदनुष्ठेयं गौतमाय तम् कर्मणि अन्तरमल्पस्यावकाशो दत्त इति वार्थः। देहपातभयादिदं कर्म आरब्धमित्यतो विदेह एव भवतु शापं ददौ ॥४॥

माम् असम्भाष्येति मां विनैव गौतमद्वारा कर्म कृतमिति मां प्रत्यनुक्त्वेत्यर्थः ॥५॥

(क) प्रतिपाल्यताम् अपेक्ष्यताम्। आगतः तं यागं समाप्य प्रत्यायात इत्यर्थः ।

(ख) सोऽपि निमिरपि । स्वपते निद्रां गताय। राज्ञे निमिनाम्ने ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्माच्छापाच्च मित्रावरुणयोस्तेजसि वशिष्ठतेजः प्रविष्टम्, उर्व्वशीदर्शनादुद्भूतवीर्य्यप्रपातयोः सकाशाद् वशिष्ठो देहमपरं लेभे (ग) ॥६॥

निमेरपि तच्छरीरमतिमनोहरतैलगन्धादिभिरुपस्क्रियमाणं नैव क्लेदादिकं दोषमवाप, सद्योमृतमिव तस्थौ (घ) ॥७॥

यज्ञसमाप्तौ च भागग्रहणायागतान् देवान् ऋत्विज ऊचुः, यजमानाय वरो दीयतामिति। देवैश्छन्दितो निमिराह ॥८॥

भगवन्तोऽखिलसंसारदुःखसङ्घातस्य च्छेत्तारः, न ह्येतावज्जगत्यन्यद् दुःखमस्ति, यच्छरीरात्मनोर्व्वियोगो भवति, तदहमिच्छामि सकललोकलोचनेषु वस्तुम्, न पुनः शरीरग्रहणं कर्त्तुम्। इत्युक्ते देवैरसावशेषभूतानां नेत्रेषु आसां कारितः।

ततो भूतान्युन्मेषनिमेषं चक्रुः ॥९॥

अपुत्रस्य च तस्य भूभुजः शरीरमराजकभीरवस्ते मुनयोऽरण्यां ममन्थुः (ङ) ॥१०॥

तत्र कुमारो जज्ञे, जननाज्जनकसंज्ञाश्चासाववाप ॥११॥

अभूद् विदेहोऽस्य पितेति वैदेहो मथनान्मिथिरभूत्। तस्योदावसुः पुत्रोऽभूत्। ततो नन्दिवर्द्धनः, तस्मात् सुकेतुः, तस्यापि देवरातः, ततश्च बृहदुक्थः, तस्य च महावीर्य्यः, तस्यापि सत्यधृतिः, ततश्च धृष्टकेतुः, धृष्टकेतोर्हर्य्यश्वः, तस्य च मरुः, मरोः प्रतिबन्धकः, तस्मात् कृतरथः, तस्मात् कृतिः, तस्य विबुधः, तस्यापि महाधृतिः, तस्य च कृतिरातः, ततो महारोमा, ततः सुवर्णरोमा, तस्यापि पुत्रो ह्रस्वरोमा, ततः सीरध्वजोऽभूत्। तस्य पुत्रार्थं

तेजसि वीर्य्ये तेजो लिङ्गशरीरम्, चेत इति पाठे स एवार्थः। पश्चादुद्भूतो वीर्य्यप्रपातो वीर्य्यच्युतिर्ययोस्तादृशयोः ॥६॥

मृतस्य देहधारणं यज्ञसमाप्तिं वंशप्रवृत्तिं चोद्दिश्येति वक्तुं देहधारणप्रकारमाह—'निमे'रिति ॥७॥

छन्दितः वरार्थमिच्छां कारितः ॥८॥

आसाम् अवस्थितिं कारितः ॥९॥

ततपुत्रस्य संज्ञात्रयं तद्वंशप्रवृत्तिञ्च वक्तुमाह—'अपुत्रस्ये'ति ॥१०॥

जननात् मृतदेहजननात् ॥११॥

(ग) उद्भूतवीर्य्यप्रपातयोः सञ्जातशुक्रस्खलनयोः। मैत्रावरुणयोरित्यस्य विशेषणमिदम्। तत एव वशिष्ठः पुनर्देहं लेभे, अत एव वशिष्ठो मैत्रावरुणिरित्युच्यते। मित्रश्च वरुणश्चेति देवताद्वन्द्वे मित्रावरुणयोरिति दीर्घः।

(घ) सद्योमृतमिव सद्य एव आत्मना प्राणैर्वा त्यक्तमिव।

(ङ) ततः अशेषभूतानां नेत्रेषु तस्य देवानां वरेणावस्थानादित्यर्थः। अराजकभीरवः राज्यस्याराजकत्वदोषाद् भीताः सन्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यजनभुवं कृषतः सीरे सीता दुहिता समुत्पन्नासीत्। सीरध्वजस्य भ्राता साङ्काश्याधिपतिः कुशध्वजनामा। सीरध्वजस्यापत्यं भानुमान् ॥१२॥

भानुमतः शतद्युम्नः, तस्य शुचिः, तस्मादूर्ज्जवहो नाम पुत्रो जज्ञे। तस्यापि सत्यध्वजः(१), ततः कुनिः (क्रूणिः), कुनेरञ्जनः, तत्पुत्रः ऋतुजित्, ततोऽरिष्टनेमिः, तस्मात् श्रुतायुः, ततः सूर्य्याश्वः, तस्मात् सञ्जयः (संनयः), ततः क्षेमारिः, तस्मादनेनाः, तस्मान्मीनरथः (मानरथः), तस्य सत्यरथः, तस्य सात्यरथिः, सात्यरथेरुपगुः, तस्मात् श्रुतः, (उपगुप्तः), तस्मात् शाश्वतः, तस्मात् सुधन्वा (सुवर्च्चाः), तस्यापि सुभासः, ततः सुश्रुतः, तस्माज्जयः, जयपुत्रो विजयः, तस्य ऋतः, ऋतात् सुनयः, ततो वीतहव्यः, तस्मात् सञ्जयः, तस्माद् (क्षेमाश्वः, तस्मात्) धृतिः, धृतेर्बहुलाश्वः, तस्य पुत्रः कृतिः, कृतौ सन्तिष्ठतेऽयं जनक-वंशः ॥१३॥

इत्येते मैथिलाः। प्राचुर्य्येण एतेषामात्मविद्याश्रयिणो भूपाला भविष्यन्तीति ॥१४॥

इति श्रीविष्णुपुराणे चतुर्थांशे पञ्चमः अध्यायः॥

सन्तिष्ठते समाप्तिं यातीत्यर्थः ॥१३॥

आत्मविद्याश्रयिणः आत्मविदः ॥१४॥

इति श्रीधरस्वामिकृतायां स्वप्रकशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे पञ्चमोऽध्यायः॥

(च) यजनभुवं यज्ञभूमिम् सीरे हलाग्रे, 'लाङ्गलं हलं गोदारणञ्च सीर' इति कोषात्।

पाठान्तरम्—

१३—१ तस्यापि शतध्वजः—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठः अध्यायः

[चन्द्रवंशकथनम्, ताराहरणम्, अग्नित्रयोत्पत्तिश्च ।]

मैत्रेय उवाच ।

सूर्य्यस्य भगवन् ! वंशः कथितो भवता मम ।
सोमस्य वंशे त्वखिलान् श्रोतुमिच्छामि पार्थिवान् ॥१
कीर्त्यते स्थिरकीर्त्तीनां येषामद्यापि सन्ततिः ।
प्रसादसुमुखस्तन्मे ब्रह्मन्नाख्यातुमर्हसि ॥२॥

पराशर उवाच ।

श्रूयतां मुनिशार्दूल । वंशः प्रथिततेजसः ।
सोमस्यानुक्रमात् ख्याता यत्रोर्व्वीपतयोऽभवन् ॥३॥
अयं हि वंशोऽतिबलपराक्रमद्युतिशीलचेष्टावद्भिरतिगुणान्वितैर्नहुष-ययाति-कार्त्तवीर्य्यार्ज्जुनादिभिर्भूपालैरलङ्कृतः ॥४॥
तमहं कथयामि श्रूयताम्—अखिलजगत्स्रष्टुर्भगवन्नारायणनाभिसरोजिनीसमुद्भवाब्जयोनेर्ब्रह्मणः पुत्रोऽत्रिः, अत्रेः सोमः, तञ्च भगवानब्जयोनिरशेषौषधि-द्विज-नक्षत्राणामाधिपत्येऽभ्यषेचयत् (क) ॥५॥

स च राजसूयमकरोत् । तत्प्रभावादत्युत्कृष्टाधिपत्याधिष्ठातृत्वाच्चैनं मद आविवेश (ख) ॥६॥

मदावलेपाच्चासौ सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार ॥७॥

बहुशश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच । तस्य हि बृहस्पतिद्वेषादुशनाः पार्ष्णिग्राहोऽभवत् (ग) ॥८॥

अङ्गिरसश्च सकाशोपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत् ॥९॥

षष्ठः जध्यायः

सूर्य्यवंशप्रसङ्गेन सोमवंशस्तदन्वये । ऐलोऽपि वर्ण्यते षष्ठे त्रेताग्नियेंन निर्मितः ॥१॥

अतिशयितं बलं सामर्थ्यं, पराक्रमः शौर्यं, द्युतिः कान्तिः, शीलमाचारः, चेष्टा दानभोगादिलीला, अतिवलादिभिर्युक्तैः । गुणा गाम्भीर्य्यादयः, अतिगुणान्वितैः च अलङ्कृतः ॥४॥

भगवन्नारायणस्य नाभिसरोजिनी नाभिह्रदः, तत्र जातं यदब्जं, तदेव योनिः कारणं यस्य तस्य जगत्स्रष्टुर्ब्रह्मणः पुत्र इत्यन्वयः । सोमस्य तारायां बुधः पुत्र इति सोपाख्यानमाह—'तञ्च भगवा'नित्यादिना 'लज्जाजड़माह सोमस्ये'त्यन्तेन ॥५

तत्प्रभावादत्युत्कृष्टानामोषध्यादीनामाधिपत्यात् सर्वाधिष्ठातृत्वाच्च एनं सोमं मद आविवेश ॥६॥

मद एवावलेपो दोषस्तस्मात् ॥७॥

पार्ष्णिग्राहः सहायः ॥८॥

सकाशात् समीपत उपलब्धा विद्या येन सः ॥९॥

(क) अशेषौषधीत्यादिः—अत एव कोषकाराः 'ओषधीशो निशापतिः' 'द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः' इत्यादि-चन्द्रपर्य्यायानाहुः ।

(ख) स च पूर्वोक्तः सोमश्च । एनं सोमम् । मदः अहङ्कारः ।

(ग) न मुमोच तां तारामिति शेषः । बृहस्पतिद्वेषात् देवगुरुं बृहस्पतिं प्रति विद्वेषात् । उशनाः असुराणां देवविद्वेषिणां गुरुः शुक्राचार्य्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यतश्चोशनाः, ततो हि जम्भ-कुजम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यमं चक्रुः। बृहस्पतेरपि सकलदेवसैन्यसहायः शक्रोऽभवत् ॥१०॥

एवञ्च तयोरतीवोग्रः संग्रामस्तारकानिमित्त स्तारका मयो नामाभवत्। ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवा देवेषु चाशेषदानवा मुमुचुः ॥११॥

एवञ्च देवासुराहवक्षोभक्षुब्धहृदयमशेषमेव जगद् ब्रह्माणं शरणं जगाम ॥१२॥

ततश्च भगवानप्युशनसं शङ्करमसुरान् देवांश्च निवार्य्य बृहस्पतेस्तारामदात्। ताञ्चान्तःप्रसवामवलोक्य बृहस्पतिराह ॥१३॥

नैष मम क्षेत्रे भवत्यान्यसुतो धार्य्यस्तदुत्सृजैनमलमतिधाष्ट्र्येनेति। सा च तेनैवमुक्ता पतिव्रता भर्तृवचनात् तमीषिकास्तम्बे गर्भमुत्ससर्ज्ज ॥१४॥

स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप ॥१५॥

बृहस्पतिमिन्दुञ्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः सत्यं कथयास्माकमतिसुभगे! कस्यायमात्मजः सोमस्याथ बृहस्पतेः? इत्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच ॥१६॥

बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे, तदा कुमारस्तां! शप्तुमुद्यतः; प्राह च दुष्टे! अम्ब कस्मान्मे तातं नाख्यासि, अद्यैव तेऽलीकलज्जावत्याः शान्तिमयमहं करोमि, यथा नैवमन्याप्यतिमन्थरवचना भवतीति ॥१७॥

अथ भगवान् पितामहस्तं कुमारं सन्निवार्य्य स्वयमपृच्छत् ताराम्, कथय वत्से! कस्यायमात्मजः? सोमस्याथ बृहस्पतेः? इत्युक्ता लज्जाजड़माह—'सोमस्ये'ति ॥१८॥

यतो यत्र। बृहस्पतेरपि सकलदेवसैन्यं सहायो यस्य स शक्रोऽभवत् सहाय इति शेषः। तारकामय इति नामनिर्वचनं तारकानिमित्त इति ॥११॥

देवासुराहवक्षोभेण क्षुब्धं सोद्वेगं हृदयं यस्य तज्जगत् ॥१२॥

अन्तःप्रसवां गर्भिणीम् ॥१३॥

पतिव्रता पत्युः छन्दानुसारिणी सोमेन बलादाहितं गर्भमुत्ससर्ज। इषीकास्तम्बे मुञ्जगुच्छे ॥१४॥

आचिक्षेप अभिभूतवान् ॥१५॥

'माता भस्त्रा पितुः पुत्र' इत्यादि-वचनात् पितुरेव पुत्रः मातैव पुत्रजनकं वेत्ति चेत्यतोऽस्य कः पितेति तारामेव प्रपच्छुरिति ॥१६॥

मन्थरवचना अतिविलम्बितवाक् ॥१७॥

आत्मज औरसः ॥१८॥

(घ) नाचचक्षे न कथयामास, कस्यायमात्मज इत्यस्य प्रश्नस्य उत्तरमिति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः स्फुरदुच्छ्वसितामलकपोलकान्तिर्भगवानुडुपतिस्तमालिङ्ग्य कुमारं साधु साधु वत्स ! प्राज्ञोऽसीति बुध इति नाम चक्रे (ङ) ॥१९॥

स च आख्यातमेवैतत्—यथेलायामात्मजं पुरूरवसमुत्पादयामास ।

पुरूरवास्त्वतिदानशीलोऽतियज्वातितेजस्वी । यं सत्यवादिनमतिरूप-स्ववन्तं मित्रावरुणशापान्मानुषे लोके मया वस्तव्यम् इति कृतमतिरुर्व्वशी ददर्श (च)॥२०॥

दृष्टमात्रे च यस्मिन् अपहाय मानमशेषमपास्य स्वर्गसुखाभिलाषं तन्मना भूत्वा तमेवोपतस्थे (छ) ॥२१॥

सोऽपि च तामतिशयितसकललोकस्त्रीकान्ति-सौकुमार्य्य-लावण्यातिविलास-हासादिगुणामवलोक्य तदायत्तचित्तवृत्तिर्बभूव ॥२२॥

उभयमपि तन्मनस्कमनन्यदृष्टि परित्यक्तसमस्तान्यप्रयोजनमभूत् ॥२३॥

राजा तु प्रागल्भ्यात् तामाह ॥२४॥

सुभ्रु त्वामहमभिकामोऽस्मि प्रसीदानुरागमुद्वह इत्युक्ता लज्जावखण्डितमुर्व्वशी प्राह ॥२५॥

भवत्वेवं यदि मे समयपरिपालनं भवान् करोतीति ॥२६॥

आख्याहि मे समयमित्यथ पृष्टा पुनरब्रवीत् ॥२७॥

शयनसमीपे ममोरणकद्वयं पुत्रभूतं नापनेयम् ॥२८॥

स्फुरन्ती उच्छ्वसितयोर्विकसितयोरमलयोः कपोलयोर्गण्डयोः कान्तिर्यस्य सः ॥१९॥

बुध इलायां यथा पुरूरवसं जनयामास, तथा प्रागेवोक्तम्। स पुरूरवा उर्वश्यां षट् पुत्रान् जनयामास इति वक्तुं कथामाह—'पुरूरवास्त्व'इत्यादिना यावत्समाप्ति । अतिरूपं स्वं धनं यस्यास्ति तम् उर्वशी ददर्श इत्यन्वयः ॥२०॥

मानं गर्वमपहाय उपतस्थे अभजत् ॥२१॥

कान्तिः शोभा, सौकुमार्य्यं मार्दवं, लावण्यमङ्गसुन्दरत्वं, विलासः अङ्गचेष्टासु तात्कालिको विशेषः, अतिशयिताः स्वस्मिन्नधिकीकृताः सकललोकस्त्रीणां कान्त्यादयो गुणा यया ताम् ॥२२॥

एवमुभयं तत् मिथुनरूपं तन्मनस्कम् अन्योन्यासक्तचित्तमभूत्। तदेवाह—नास्त्यन्यस्मिन् दृष्टिर्यस्य, परित्यक्तं समस्तमन्यत् प्रयोजनं येन तत् ॥२३॥

प्रागल्भ्यादसंकोचात् ॥२४॥

लज्जया अवखण्डितं व्यक्ताव्यक्तं शिथिलं वा यथा स्यादेवं प्राह । लज्जया खण्डितमिति पाठे तु स्पष्टोऽर्थः ॥२५॥

शापावसाने यदि गन्धर्वा मां नेतुमिच्छन्ति, तदा समयभङ्गापराधमारोप्य गमिष्यामीति समयं करोति—'भवत्वेव'मिति ॥२६॥

पुरूरवसा 'आख्याहि समयमि'ति पृष्टा उक्ता सती समयमब्रवीत् ॥२७॥

उरणको मेषः ॥२८॥

(ङ) उडुपतिः नक्षत्रेशश्चन्द्रः । बुध्यते इति बुधः प्रज्ञासम्पन्नः इति व्युत्पत्तेः । बुद्धिपुर्वकमेव मातरं शप्तुमुपक्रमात् मात्रा प्रकृतप्रश्नोत्तरस्य कथनादेव तस्य कुमारस्य प्राज्ञत्वन्नतिपत्तिरिति प्रतिपत्त्वव्यम् । सोमस्य तारायां जारत्वात् तन्नाम्नः स्वमुखेन प्रकाशने तारायां लज्जा, तथा च तत्कथनमस्पष्टमिति लज्जा जाड्यमिति भावः

(च) अतिरूप-स्ववन्तम् अतिरूपं अतिरिक्तरूपं प्रभूतमित्यर्थः स्वं धनं तद्वन्तमित्यर्थोऽत्र श्रीधर सम्मत इति प्रतिभाति । परन्तु अत्र अतिमात्रं रूपं सौन्दर्य्यं तथा स्वं धनम् तद्वन्तमित्यप्यर्थान्तरं सम्भवति । अन्येषाम् अतिरूपवन्तमिति पाठः सम्मतो दृश्यते ।

(छ) तन्मनाः तस्मिन् पुरूरवसि मनो यस्याः सा । तमेव पुरूरवसमेव ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवांश्च मया नग्नो न द्रष्टव्यः, घृतमात्रञ्च ममाहारः। इत्येवमेवेति भूपतिराह। तया च सहावनीपतिरलकायां चैत्ररथादिवनेषु अमलपद्मषण्डेषु अभिरमणीयेषु मानसादिसरःसु अभिरममाण एव षष्टिवर्षसहस्राणि अनुदिनप्रवर्द्धमानप्रमोदोऽनयत्। उर्व्वशी च तदुपभोगात् प्रतिदिनप्रवर्द्धमानानुरागा अमरलोकवासेऽपि न स्पृहां चकार। विना चोर्व्वश्या सुरलोकोऽप्सरसां सिद्ध-गन्धर्व्वाणाञ्च नातिरमणीयोऽभवत् (ज) ॥२९॥

ततश्चोर्व्वशी-पुरूरवसोः समयविद् विश्वावसुर्गन्धर्व्वसमवेतो निशि शयनाभ्यासादेकमुरणकं जहार (झ) ॥३०॥

तस्य चाकाशे नीयमानस्योर्व्वशी शब्दमशृणोत्-आह च, ममानाथायाः पुत्रः केनाप्ययमपह्रियते, कं शरणमुपयामीत्याकर्ण्य राजा 'नग्नं मां देवी द्रक्ष्यती'ति न ययौ। अथान्यमप्युरणकमादाय गन्धर्व्वा ययुः। तस्याप्यपह्रियमाणस्य शब्दमाकाशे पुनरपि 'अनाथास्म्यहमभर्त्तृका कुरुष्व श्रयेति' आर्त्तराविणी बभूव। राजाप्यमर्षवशात् कारमेतदिति खड्गमादाय दुष्ट! दुष्ट! हतोऽसी व्याहरन्नभ्यधावत्। तावच्च गन्धर्व्वैरतीवोद्विद्युज्जनिता। तत्प्रभया चोर्व्वशी राजानमम्बरं दृष्ट्वा अपवृत्तसमया तत्क्षणादेवापक्रान्ता॥

परित्यज्य तावुरणकौ गन्धर्व्वाः सुरलोकमुपागा राजापि तौ मेषावादाय हृष्टमनाः स्वशयनमागा नोर्व्वशीं ददर्श (ञ)॥३२॥

ताञ्चापश्यन्नपगताम्बर एवोन्मत्तरूपो ब्रह्म कुरुक्षेत्रे चाम्भोजसरसि अन्याभिश्चतसृभिरप्सरोभि समवेतामुर्व्वशीं ददर्श। ततश्चोन्मत्तरूपो रा जायेह तिष्ठ, मनसि घोरे वचसि, इत्यनेकप्र सूक्तमवोचत् ॥३३॥

गन्धर्वैः समयभङ्गेन उर्वश्या निर्गमं दर्शयन्नाह—'विना चोर्वश्ये'त्यादिना 'तत्क्षणादेवापक्रान्ते'त्यन्तेन ॥२९॥

शयनाभ्यासाच्छयननिकटात् ॥३०॥

गमने,—हेतुः अपवृत्तोऽपगतः समयः स्थितिहेतुर्यस्याः सा ॥३१॥

पुनरुर्वशीसङ्गमादायुः प्रभृति-पुत्रोत्पत्तिं तल्लोकप्राप्त्युपायाग्निञ्च वक्तुमाह—कुरुक्षेत्रे इत्यादिना—यावदध्याय-समाप्ति। अम्भोजयुक्ते सरसि हे जाये! तिष्ठ, मनसि घोरे निर्दये! वचसि वाङ्मिश्रणार्थं तिष्ठ। यद्वा तिष्ठ, मद्वचनं कुर्व्वित्यर्थः। इत्याद्यनेकप्रकारं मितिपदं वेदस्थसूक्तत्वसूचनार्थम्। असूक्तमिति पाठे प्रलपितमित्यर्थः। एतेन "हये जाये मनसि तिष्ठ घोरे मिश्राणवावहै तु" इत्याद्यष्टादशर्चे तयोः संवादात्मके दोक्तसूक्ते पुरूरवसो वाक्यानि सूचितानि ॥३३॥

(ज) तया च उर्वश्या सह, अवनीपतिः पुरूरवाः।

(झ) गन्धर्वसमवेतः गन्धर्वैः सह मिलितः सन्। एकम् उरणकं मेषं जहार उर्वश्याः पुत्रद्वयभूतमेषद्वयमध्यादित्यर्थः।

(ञ) अमर्षवशात् कोपवशात्। अन्धकारम् अन्धकारमयं। नग्नस्यापि मम शत्रुशातनार्थं धावतो न दर्शनसम्भावना इति मत्वेत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आह चोर्व्वशी,—महाराज अलमनेनाविवेकचेष्टितेन। अन्तर्व्वत्नी अहम्, अब्दान्ते भवतात्रागन्तव्यम्, कुमारस्ते भविष्यति, एकाञ्च निशामहं त्वया सह वत्स्यामि, इत्युक्तः प्रहृष्टः स्वपुरमाजगाम। तासाञ्चाप्सरसामुर्व्वशी कथयामास, अयं स पुरुषोत्कर्षो, येन अहमेतावन्तं कालमनुरागाकृष्टमनसा सहोषिता (ट) ॥३४॥

इत्येवमुक्तास्ता अप्सरस ऊचुः—साधु साधु अस्य स्यम्, अनेन सहास्माकमपि सर्व्वकालमभिरन्तुं स्पृहा भवेदिति ॥३५॥

अब्दे च पूर्णे स राजा तत्राजगाम, कुमारञ्चायुषमस्मै तदोर्व्वशी ददौ, एकाञ्च निशां तेन राज्ञा सहोषित्वा पञ्चपुत्रोत्पत्तये गर्भमाप (ठ) ॥३६॥

उवाच चैनं राजानम्,—अस्मत्प्रीत्या महाराजाय सर्व्व एव गन्धर्व्वा वरदाः संवृत्ताः, तस्माद् व्रियतां वर इति ॥३७॥

आह राजा च विजित-सकलारातिरहतेन्द्रियसामर्थ्यो बन्धुमानमितबलकोषः, नान्यदस्माकमुर्व्वशीसालोक्याद् अप्राप्यमस्ति, तदहमनया सहोर्व्वश्या कालं नेतुमभिलषामि (ड)॥३८॥

इत्युक्ते गन्धर्व्वा राज्ञेऽग्निस्थालीं ददुः ॥३९॥

ऊचुश्च एनमग्निमाम्नायानुसारी भूत्वा त्रिधा कृत्वा उर्व्वशीसलोकतामनोरथमुद्दिश्य सम्यग् यजेथाः। ततोऽवश्यमभिलषितमवाप्स्यसि (ढ) ॥४०॥

इत्युक्तस्तामग्निस्थालीमादायाजगाम, अन्तरटव्यामचिन्तयत्,—अहो मे अतिमूढ़ता, यदग्निस्थाली मयानीता नोर्व्वशीति। अथैनामटव्यामेवाग्निस्थालीं तत्याज स्वपुरञ्चाजगाम ॥४१॥

'आह चोर्वशी'त्यनेनोर्वश्याः प्रतिवचनानि "पुरूरवो मा मृथा माप्रवसो मा त्वा वृकाशो अशिवा वास उक्षन्। न वै स्त्रैणानि सख्यानि सन्ति शाला वृकाणां हृदयान्येतता" इत्यादीनि सूचितानि। अन्तर्वत्नी गर्भिण्यहमिदानीं मत्सम्भोगासम्भवादब्दान्ते त्वया आगन्तव्यमित्याद्युक्तेन राज्ञा प्रहृष्टः सन् स्वपुरमाजगाम। पुरुषोत्कर्ष उत्कृष्टः पुरुष इत्यर्थः ॥३४॥

सर्वकालमिति स्पृहा सफला भवेदित्यर्थः। आस्येति पाठे आस्या स्थितिः। मनुष्यलोके तथासम्भवात् स्वर्गे वायमानीयतामिति भावः ॥३५॥

आयुषम् आयुर्नामानम्, एकामेकैकां निशाम्। एवं वारम् पञ्चपुत्रोत्पत्तये गर्भमवापेति व्याचक्षते ॥३६॥

अस्मत्प्रीत्या तुभ्यं सर्वे वरदा इत्यन्वयः ॥३७॥

(ट) स्वपुरमाजगाम पुरूरवा इति शेषः।

(ठ) आयुषम् तदाख्यं स्वपुत्रम्। तस्मै ददाविति तस्मै पुरूरवसे ददौ, बीजसेक्तुरेव सन्ततावधिकारादिति भावः।

'नान्यदस्माक'मित्यादि राजा चाहेत्यन्वयः। अन्यदप्राप्यं नास्तीत्यत्र हेतुः 'विजिते'त्यादि इत्युक्ते इत्यत्रेति-शब्दः पूर्वापरयोः सम्बध्यते ॥३८॥

उर्वशीलोकप्राप्तिश्च अग्निहोत्रसाध्येत्यग्निस्थालीं ददुः ॥३९॥

आम्नायानुसारी वेदविधौ दत्तचित्तः गार्हपत्याहवनीयदक्षिणाग्निरूपेणाग्निं त्रिधा कृत्वा मनोरथमुद्दिश्य कृत्वा ॥४०॥

शमीगर्भाश्वत्थमथनादुत्थित एवाग्निरग्निहोत्रोपयुक्त इति दर्शयन्नाह,—'अन्तरटव्या'मिति। यद्यप्यग्निं त्रिधा कृत्वा उर्वशीलोकमुद्दिश्य यजेथा इत्येवं गन्धर्वैरुक्तं नत्वियमुर्व्वशीति तथापि मोहवशात् पुरूरवा उर्वशीयमित्यवगत्य इदानीमचिन्तयदित्यर्थः ॥४१॥

(ड) विजित्येत्यादिराजविशेषणैः सकलारातिविजयादिरूपमिष्टं वस्तु अस्माभिः प्राप्तमेव, अतः न तद् वरणीयम् परं उर्वशीसालोक्यमेव वरणीयं यदस्माभिरप्राप्तं काम्यञ्चेति भावः सूच्यते।

(ढ) अभिलषितं स्वाभीष्टमुर्वशीसालोक्यमित्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यतीतार्द्धरात्रौ विनिद्रश्चाचिन्तयत्—ममोर्व्वशी-सालोक्यप्राप्त्यर्थमग्निस्थाली गन्धर्व्वैर्दत्ता, सा च मया अटव्यां परित्यक्ता। तदहं तत्र तदाहरणाय यास्यामि इत्युत्थाय तत्राप्युपगतो नाग्निस्थालीमपश्यत्। शमी-गर्भञ्चाश्वत्थमग्निस्थालीस्थाने दृष्ट्वा अचिन्तयत्—मयात्र स्थाली निक्षिप्ता, सा चाश्वत्थः शमी-गर्भोऽभूत्। तदेतमेवाहमग्निरूपमादाय स्वपुरमभि-गम्य अरणीं कृत्वा तदुत्पन्नाग्नेरुपास्तिं करिष्या-मीति ॥४२॥

एवमेव स्वपुरमुपगतोऽरणीं चकार ॥४३॥

तत्प्रमाणञ्चाङ्गुलैः कुर्व्वन् गायत्रीमपठत्। श्चाक्षरसंख्यान्येवाङ्गुलान्यरण्ययभवत् ॥४४॥

तत्राग्निं निर्म्मथ्याग्नित्रयमाम्नायानुसारी जुहाव, उर्व्वशीसालोक्यं चेह फलमभिसंहितवा तेनैवाग्निविधिना बहुविधान् यज्ञान् इष्ट्वा लोकान् प्राप्य उर्व्वश्या सह वियोगं नावाप ॥४५॥

एकोऽग्निरादावभवत्, ऐलेन त्वत्र मन्वन्तरे प्रवर्त्तिता ॥४६॥

इति श्रीविष्णुपुराणे चतुर्थांशे षष्ठः अध्यायः।

शमीगर्भं शम्या गर्भे स्थितमित्यर्थः ॥४२॥

एवमेव यथाचिन्तितमेव स्वपुरमुपगतोऽरणीं चकार ॥४३॥

गायत्र्यक्षरसंख्यान्यङ्गुलानि व्याप्यारणिरभवदिति गायत्रीं पठता तदक्षरसंख्याकाङ्गुलप्रमाणा अरणिः भावः ॥४४॥

इह होमे अभिसंहितवान्। अग्निविधिनाऽनु नेन ॥४५॥

त्रेता अग्नित्रयम् ॥४६॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे षष्ठोऽध्यायः॥

(ण) तत्र अटव्याम् तदाहरणाय परित्यक्ताग्निस्थाली-संग्रहाय। अरणीं अरणिकाष्ठं कृत्वा अनेन शमीगर्भेणाश्वत्थेनेति शेषः। अथवा अरणिं अरणिकाष्ठभूतं कृत्वा इममिति शेषः। उपास्तिम् उपासनाम्।

(त) अग्नित्रयम् गार्हपत्याहवनीयदक्षिण संज्ञमग्नित्रि आम्नायानुसारी वेदानुसारी। अभिसंहितवान् कामयामा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तमोऽध्यायः

[पुरूरवसो जह्नोश्च वंशकथनम्]

पराशर उवाच ।

तस्याप्यायुर्धीमानमावसु-विश्वावसु-शतायुः-श्रुतायुः (अयुतायुः) संज्ञाः षड़भवन् पुत्राः ॥१॥

अमावसोर्भीमो नाम पुत्रोऽभवत् । भीमस्य काञ्चनः, काञ्चनात् सुहोत्रः, तस्यापि जह्नुः । योऽसौ यज्ञवाटमखिलं गङ्गाम्भसा प्लावितमालोक्य क्रोधसंरक्तनयनो भगवन्तं यज्ञपुरुषमात्मनि परमेण समाधिना समारोप्याखिलामेव गङ्गामपिवत् ॥२॥

अथैनं देवर्षयः प्रसादयामासुः, दुहितृत्वे चास्य गङ्गामनयन् । जह्नोश्च सुजह्नुर्नाम पुत्रोऽभवत् । तस्याप्यजकः, ततो बलाकाश्वः, तस्मात् कुशः, कुशस्य कुशाश्व-कुशनाभामूर्त्तरयामावसवश्चत्वारः पुत्रा बभूवुः ॥३॥

तेषां कुशाश्वः "शक्रतुल्यो मे पुत्रो भवे"दिति तपश्चचार । तञ्चोग्रतपसमवलोक्य मा भवत्वन्योऽस्मत्तुल्यवीर्य्य" इत्यात्मनैवास्येन्द्रः पुत्रत्वमगच्छत् ॥४॥

गाधिर्नाम स कौशिकोऽभवत् । गाधिश्च सत्यवतीं नाम कन्यामजनयत् । ताञ्च भार्गव ऋचीको वव्रे ॥५॥

गाधिरप्यतिरोषणाय अतिवृद्धाय च ब्राह्मणाय दातुमनिच्छन्नेकतः श्यामकर्णानामिन्दुवर्च्चसामनिलरंहसामश्वानां सहस्रं कन्याशुल्कमयाचत(क) ॥६॥

तेनापि ऋषिणा वरुणसकाशादुपलभ्य अश्वतीर्थोत्पन्नं तादृशाश्वसहस्रं दत्तम् ॥७॥

सप्तमः अध्यायः

आदावमावसोर्वंशः सप्तमेऽल्पतयोच्यते । तत्र जह्न्वादिराजर्षिर्दौहित्राद् भार्गवो हरिः । तस्य पुरूरवसः षट् पुत्रा अभवन् ॥१॥

अथैनं जह्नुं देवर्षयः प्रसादयामासुः । ततस्तां मुमोच, ततो दुहितृत्वे अनयन् इत्यध्याहारेण योजनीयम् । अमूर्त्तरयामावसव इत्यत्र सन्धिरार्षः ॥३॥

आत्मनास्वयमेवेन्द्रः पुत्रत्वमगच्छत् ॥४॥

तदेवाह—'गाधि'रिति । कन्यायाः शुल्कं मूल्यम् ॥६॥

तेनापि ऋचीकेन अश्वतीर्थं कान्यकुब्जे गंगाप्रदेशविशेषः तत्रोत्पन्नं जातम्, तेन पथोद्गतमिति वा । उपलभ्य प्राप्य ॥७॥

(क) स इन्द्रः गाधिर्नाम कौशिकः कुशवंश्यः अभवत् । ताञ्च सत्यवतीं नाम कन्याम् । भार्गवः भृगुवंशीयः ऋचीकः । गाधिरपीत्याद्युत्तरवाक्येन तस्यातिरोषणस्वभावत्वम् अतिवृद्धत्वञ्च गम्यते । तथाहि गाधिना चिन्तितम्,—केन मार्गेण अतिरोषणः सुवृद्धो भार्गव ऋचीकः प्रत्याख्येय इति । तद् यदि तथाभूतमश्वानां सहस्रं कन्याशुल्कं कल्पयेयम्, तदा तद्दातुमसमर्थः स्वयमेवासौ प्रत्याख्यातः स्यादिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततस्तामृचीकः कन्यामुपयेमे। ऋचीकश्च तस्याश्चरुमपत्यार्थं चकार। तथा प्रसादितश्च तन्मात्रे क्षत्रवरपुत्रोत्पत्तये चरुमपरं साधयामास(ख) ॥८॥

एष चरुर्भवत्या अयमपरस्त्वन्मात्रा सम्यगुपयोज्य इत्युक्त्वा वनं जगाम ॥९॥

उपयोगकाले च तां माता सत्यवतीमाह,—सर्व्व एवात्मपुत्रमतिगुणं समभिलषति, नात्म-जायाभ्रातृ-गुणेष्वतीवादृतो भवतीत्यतोऽर्हसि मम त्वमात्मीयश्चरुं दातुं, मदीयश्चरुमात्मनोपयोक्तुम्(ग) ॥१०॥

मत्पुत्रेण हि सकलभूमण्डलपरिपालनं कार्य्यम्(घ)११

कियद्ब्राह्मणस्य बलवीर्य्यसम्पदित्युक्ता सा तस्मै चरुं मात्रे दत्तवती ॥१२॥

अथ वनादभ्यागत्य सत्यवतीमृषिरपश्यत्, उवाच चैनाम्,—अतिपापे ! किमिदमकार्य्यं भवत्या कृतम्, अतिरौद्रं ते वपुरालक्ष्यते, नूनं त्वया त्वन्मातृस्नेहकृतश्चरुरुपयुक्तः ; न युक्तमेतत् ॥१३॥

मया हि तत्र चरौ सकलैव शौर्य्य-वीर्य्य-बलसम्पद् रोपिता, त्वदीये चरावप्यखिलशान्ति-ज्ञान-तितिक्षादिका ब्राह्मणगुणसम्पत्। एतच्च विपरीतं कृत्वा त्यास्तवातिरौद्रास्त्रधारण-मारणनिष्ठः क्षत्रियाचारः पुत्रो भविष्यति, अस्याश्चोपशमरुचिर्ब्राह्मणाचारः(ङ) ॥

तत्प्रसादितः सत्यवत्या प्रसादितः, तन्मात्रे सत्यवत्या मात्रे दातुं क्षत्रवरपुत्रोत्पत्तये तदर्थम् ॥८॥

एष भवत्या अयमपरस्त्वन्मात्रोपयोज्यो भक्षणीय इत्युक्त्वा कुशाद्यर्थं वनं ययौ ॥९॥

आत्मनो जायाया भातृगुणेषु सर्वो नातीवादृतो भवति, मम मह्यं, हि यस्मात् ॥१०॥

कियत् प्रयोजनमिति शेषः। इत्युक्ता सती स्वं चरुं मात्रे दत्तवती, स्वयञ्च मातृचरुं भुक्तवतीति ज्ञेयम् ॥११॥

सत्यवतीमृषिरपश्यत्, रौद्ररूपामिति शेषः। मातृसत्क इति पाठे मातुः सत्कृतः। मातृसत्क इति पाठे मातुः सत् सम्बन्धीत्यर्थः। स्वार्थे कः ॥१३॥

(ख) तस्याः सत्यवत्याः अपत्यार्थमिति सम्बन्धः।

(ग) आत्मनः स्वस्य पुत्रम्, अतिगुणं समधिकगुणसम्पन्नम् अभिलषति कामयते, अतः ऋचीकस्यापि तादृशाभिलाषस्य स्वाभाविकतया त्वद्गर्भे भाविनः पुत्रस्य कृते यश्चरुः कृतः, नूनं स उत्तमगुणः कृतः। मम भावी पुत्रस्तु तस्य जायायास्तव भ्राता तदीयगुणेषु तस्यादरातिशयाभावस्य स्वाभाविकतया नूनं मदपत्यार्थं कृतश्चरुरपकृष्टगुणः कृतः, अत एव अर्हसि मम त्वमित्यादिकमुच्यत इति भावः। ममेति मह्यमित्यर्थः।

(घ) मत्पुत्रेण राज्यमधितिष्ठता सतेति शेषः। सकलभूमण्डलपरिपालनं कार्य्यम्, अतस्तदर्थं तस्य महती बलवीर्य्यादिसम्पदपेक्षणीयेति भावः। तव तु गर्भे ब्राह्मणः पुत्रो भविता, तस्य तावता बलवीर्य्यादिगुणेन प्रयोजनाभावादल्पगुणचरुरेव पर्य्याप्त इति भावः।

(ङ) तत्र तव मात्रर्थं कृते चरौ, ब्राह्मणगुणसम्पत् सम्पादितेति शेषः। क्षत्रियस्य आचार इव आचारो यस्य स तादृशस्तव पुत्रो भविष्यतीत्यन्वयः। अस्याः तव मातुश्च उपशमे गुणे रुचिः प्रीतिर्यस्य स तादृशः, ब्राह्मणस्य आचार इव आचारो यस्य तथाभूतः पुत्रो भविष्यतीति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्याकर्ण्यैव सा तस्य पादौ जग्राह। प्रणिपत्य च एनमाह,—भगवन्! मयैतदज्ञानादनुष्ठितं, प्रसादं मे कुरु, मैवंविधः पुत्रो भवतु, काममेवंविधः पौत्रो भवतु इत्युक्तो मुनिरप्याह—एवमस्तु इति(च) ॥१५॥

अनन्तरञ्च सा जमदग्निमजीजनत्। तन्माता च विश्वामित्रं जनयामास। सत्यवती च कौशिकी नाम नद्यभवत्। जमदग्निरिक्ष्वाकुवंशोद्भवस्य रेणोस्तनयां रेणुकामुपयेमे। तस्याञ्चाशेषक्षत्रवंशहन्तारं परशुरामसंज्ञं भगवतः सकललोकगुरोर्नारायणस्यांशं जमदग्निरजीजनत् ॥१६॥

विश्वामित्रपुत्रस्तु भार्गव एव शुनःशेफो नाम देवैर्दत्तः, ततश्च देवरातनामाभवत्। ततश्च ते मधुच्छन्द-जय-कृतदेव-देवाष्टक-कच्छप-हारीतकाख्या विश्वामित्रपुत्रा बभूवुः ॥१७॥

तेषाञ्च बहूनि कौशिकगोत्राणि ऋष्यन्तरेषु वैवाह्यानि भवन्तीति ॥१८॥

इति श्रीविष्णुपुराणे चतुर्थांशे सप्तमः अध्यायः ॥

मुनिरप्याह—'एवमस्त्वि'ति। 'आत्मा वै जायते पुत्र' इति न्यायात् मुनिवरवशाच्च पुत्रे चरुफलाभावेन 'न चेद् पुत्रेषु पौत्रेष्वि'ति न्यायाच्च तत्फलं पौत्रे जातमिति भावः ॥१५॥

भार्गवः भृगुवंशोद्भवः शुनःशेफः पितृविक्रीतो नरमेधे हरिश्चन्द्रपरीवर्त्तेन कृतपशुभावोऽपि स्तुतैर्देवैर्विश्वामित्रस्य दत्तः पुत्रो देवरातनामा पुत्रोऽभवदित्यर्थः। ततश्चान्ये मधुच्छन्दादयः पुत्रा औरसा बभूवुः ॥१७॥

एवं भार्गवस्य शुनःशेफस्य कौशिकगोत्रत्वं देवरातप्रवरत्वञ्च उक्तम्, अन्येषां चौरसानां मधुच्छन्दादिप्रवरत्वमिति प्रवरभेदात् बहूनि कौशिकगोत्राणि ऋष्यन्तरेषु वैवाह्यानि, न तु समानप्रवरेषु। एतच्च गोत्रान्तरेष्वपि तुल्यम्। तथाहि "एक एव ऋषिर्यत्र प्रवरेष्वनुवर्त्तते। तावत् समानगोत्रत्वमन्यद् भृग्वङ्गिरोऽगणत्॥" इति सूत्रकारोक्तेः ॥१८॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे सप्तमोऽध्यायः समाप्तः ॥

(च) सा सत्यवती, तस्य ऋचीकस्य पत्युः। एवंविधः अतिरौद्रास्त्रधारणमारणनिष्ठः क्षत्रियाचारः पुत्रो मा भवतु ममेति शेषः। काममेवंविधः पौत्रो भवतु गत्यन्तराभावादनिच्छन्त्यापि मयेदमनुमन्यत इति भावः, अकामानुमतौ काममिति कोषात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टमः अध्यायः

[आयुर्वंशकथनम्, धन्वन्तरेरुत्पत्तिः, तद्वंशवर्णनञ्च]

पराशर उवाच ।

पुरूरवसो ज्येष्ठः पुत्रो यस्त्वायुर्नामा, स बाहोर्दुहितरमुपयेमे । तस्यां स पञ्च पुत्रान् जनयामास । नहुष-क्षत्रवृद्ध-रम्भ-रजिसंज्ञाः, तथैवानेनाः पञ्चमः पुत्रोऽभूत् । क्षत्रवृद्धात् सुहोत्रः पुत्रोऽभूत् । काश-लैश-गृत्समदास्तस्य पुत्रास्त्रयोऽभवन् । गृत्समदस्य शौनकश्चातुर्वर्ण्यप्रवर्त्तयिताऽभूत् ॥१॥

काशस्य काशिराजः, ततो दीर्घतमाः पुत्रोऽभवत् । धन्वन्तरिस्तु दीर्घतमसोऽभूत् । स हि संसिद्धकार्य्य-करणः सकलसम्भूतिष्वशेषज्ञानवित् ॥२॥

भगवता नारायणेन च अतीतसम्भूतावस्मै वरो दत्तः ॥३॥

काशिराजगोत्रेऽवतीर्य्य त्वमष्टधा सम्यगायुर्वेदं करिष्यसि, यज्ञभाग् भविष्यसि इति ॥४॥

तस्य च धन्वन्तरेः पुत्रः केतुमान् । केतुमतो भीमरथः, तस्यापि दिवोदासः, ततः प्रतर्द्दनः स च मद्रश्रेण्यवंशविनाशादशेषाः शत्रवोऽनेन जिता इति शत्रुजिदभवत्(क) ॥५॥

तेन च प्रीतिमतात्मपुत्रो वत्स वत्सेत्यभिहितस्ततो वत्सोऽसावभवत्(ख) ॥६॥

सत्यव्रततया ऋतध्वजसंज्ञामवाप(ग) । पुनश्च कुवलयनामानमश्वं लेभे, कुवलयाश्व इत्यतः पृतिव्यां प्रथितः ॥७॥

अष्टमः अध्यायः

आयुषः पञ्चपुत्रेषु क्षत्रवृद्धस्य सन्ततिः । अल्पा प्रोक्ताष्टमे-यत्र जातौ धन्वन्तरिर्हरिः । चातुर्वर्ण्यप्रवर्त्तयिता-तद्वंशे चत्वारो वर्णा अभवन्नित्यर्थः ॥१॥

संसिद्धानि मर्त्यधर्मरहितानि कार्यकरणानि देहेन्द्रि-याणि यस्य सः । सकलसम्भूतिषु सर्वेषु जन्मसु, अशेषज्ञान-वित् सकलशास्त्रज्ञः ॥२॥

अतीतसम्भूतौ क्षीराब्धेर्जन्मनि ॥३॥

अष्टधेति । अष्टप्रकारमायुर्वेदं करिष्यसि । अष्टाङ्ग-मिति वा पाठः । तदुक्तं "कायबालग्रहोऽद्धा च शल्यं द्रंष्ट्रं जरा विषम् । अष्टावङ्गानि तस्याहुश्चिकित्सा येष संस्थिता ॥ यद्वा "शल्यं शलाका भूतविद्या कायशुद्धिश्च अङ्गं, तन्त्रं, रसायनं, बाजीकरणं कुमारतन्त्रम् । इत्यष्टधा ।

प्रतर्दनस्यैव शत्रुजित् वत्स इत्याद्याश्चतस्रः संज्ञा निर्वदि 'तेन चे'त्यादिना 'प्रथित' इत्यन्तेन ।

तेन दिवोदासेनात्मपुत्रः प्रतर्दनः वत्स वत्सेत्युपलालि भिहितस्ततो वत्ससंज्ञोऽभवत् ॥६॥

कुवलयनामानं कुं पृथिवीं बलयति वेष्टयतीति वर्त्तनेनाहा भ्रमतीति तथा तन्नामानमश्वं लेभे इति लयाश्वसंज्ञा इति ॥७॥

(क) वंशविनाशात् वंशस्य विनाशनात् ।

(ख) प्रीतिमता भूरिस्नेहशालिना । वत्सः वत्स इत्यभि पत्तिः ।

(ग) ऋतं सत्यं ध्वजो यस्य स इति ऋतध्वजश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्य च वत्सस्य पुत्रोऽलर्को नामाभवत्। यस्याय-
द्यापि श्लोको गीयते।—

षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च।
अलर्कादपरो नान्यो बुभुजे मेदिनीं युवा ॥८॥

तथालर्कस्य सन्नतिर्नामात्मजोऽभवत्। ततः
सुनीथः, तस्य सुकेतुः, ततो धर्म्मकेतुः, ततः सत्य-
केतुः, तस्माद् विभुः, तत्तनयः सुविभुः, ततश्च
सुकुमारः, तस्यापि धृष्टकेतुः, ततश्च वैनहोत्रः,
ततश्च भार्गः, भार्गस्य भार्गभूमिः, अतश्चातुर्व्वर्ण्य-
प्रवृत्तिः, इत्येते काश्यपा भूपतयः कथिताः। रजेस्तु
सन्ततिः श्रूयतामिति(घ) ॥९॥

इति श्रीविष्णुपुराणे चतुर्थांशे अष्टमः अध्यायः ॥

षट्षष्टिसहस्रवत्सरं यावत् अलर्कादपरो न युवा, तावत् कालं चालर्कादन्यो मेदिनीं न च बुभुजे इत्यन्वयः ॥८॥

भार्गभूमेः सकाशाच्चातुर्वर्ण्यप्रवृत्तिर्जाता ॥९॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्या वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे अष्टमोऽध्यायः ॥

(घ) काश्यपाः कश्यपसुताः। श्रूयतामिति वक्ष्यमाणाध्याये इति शेषः।

नवमः अध्यायः

[रजेर्दैत्यानाञ्च युद्धम्, क्षत्रवृद्धस्य वंशावलिकथनञ्च]

पराशर उवाच।

रजेः पञ्चपुत्रशतान्यतुलवीर्य्यसाराण्यासन्। देवासुरसंग्रामारम्भे परस्परवधेप्सवो देवाश्चासुराश्च ब्रह्माणं पप्रच्छुः ॥१॥

भगवन्! अस्माकमत्र विरोधे कतरः पक्षो जेता भविष्यतीति। अथाह भगवान्,—येषामर्थे रजिरात्ता-
युधो योत्स्यतीति। अथ दैत्यैरुपेत्य रजिरात्म-
साहाय्यदानायाभ्यर्थितः प्राह,—योत्स्येऽहं भवता-
मर्थे, यद्यहममर-जयाद् भवतामिन्द्रो भविष्यामि इति।
आकर्ण्यैतत् तैरभिहितो, न वयमन्यथा वदिष्यामो-
ऽन्यथा करिष्यामः। अस्माकमिन्द्रः प्रह्लादस्तद-
र्थमयमुद्यम इत्युक्त्वा गतेष्वसुरेषु देवैरप्यसाववनी-

नवमः जध्यायः

रजेः पुत्रशतञ्चैन्द्रात् पातितं वर्ण्यते पदात्। रम्भो-
ज्जनपत्यो नवमे क्षत्रवृद्धान्वयः पुनः। आयुःपुत्रस्य क्षत्रवृद्धस्य वंश-
मुक्त्वा तद्भ्रातॄ रजेर्वंशमाह—'रजे'रिति। रजेः पुत्रशतपञ्च-
कस्य पुत्रा नाभवन्निति वक्तुं कथां प्रस्तौति—'देवासुरे'ति ॥१॥

न वयमन्यथा 'भवानिन्द्र' इतीदानीं वदिष्यामः, सिद्धे कार्येऽन्यथा प्रह्लादमिन्द्रं करिष्यामः, किन्तु सर्वदास्माकमिन्द्रः प्रह्लाद इत्युक्त्वा निर्गतेषु समन्वीप्सितमनुमतम् ॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पतिरेवमेवोक्तः। तेनापि च तथैवोक्ते देवैरिन्द्रस्त्वं भविष्यसीति समन्वीप्सितम्(क) ॥२॥

रजिनापि देवसैन्यसहायेन अनेकैर्महास्त्रैस्तदशेषमसुरबलं निषूदितम्। अवजितारातिपक्षश्च इन्द्रो रजिचरणयुगलमात्मशिरसा निपीड्याह,—भयत्राणदानादस्मत्पिता भवान्, अशेषलोकानामुत्तमो भवान्, यस्याहं पुत्रस्त्रिलोकेन्द्रः(ख) ॥३॥

स चापि राजा प्रहस्याह,—एवमेवास्तु, अनतिक्रमणीया हि वैरिपक्षादप्यनेकविधचाटुवाक्यगर्भा प्रणतिः, इत्युक्ता स्वपुरमाजगाम(ग) ॥४॥

शतक्रतुरपीन्द्रत्वं चकार। स्वर्याते च रजौ नारदर्षिचोदिता राजसुताः शतक्रतुमात्मपितृपुत्रमाचाराद् राज्यं याचितवन्तः(घ) ॥५॥

अप्रदाने चावजित्येन्द्रमतिबलिनः स्वयमिन्द्रत्वं चक्रुः। ततश्च बहुतिथे काले व्यतीते बृहस्पतिमेकान्ते दृष्ट्वापहृतत्रैलोक्ययज्ञभागः शतक्रतुराह(ङ)।

वदरीफलमात्रमप्यर्हसि मम आप्यायनाय पुरोडाशखण्डं दातुमित्युक्तो बृहस्पतिरूचे,—यद्येवं पूर्वमेव त्वयाहं चोदितः स्यां, तन्मया त्वदर्थं किमकर्त्तव्यमिति ॥७॥

भयत्राणदानादिति "अन्नदाता भयत्राता कन्यादाता तथैव च। जनयितोपनेता च पञ्चैते पितरः स्मृताः"। इत्युक्तेः। भवानिति पदावृत्तिर्वाक्यभेदात् ॥३॥

अनेकविधानि चाटूनि प्रियाणि वाक्यानि गर्भे यस्याः सा प्रणतिः। वैरिपक्षादपि वैरिपक्षस्थितस्यापि अनतिक्रमणीया, वैरिणा प्रणयादुक्तमनुमन्तव्यम्, किं पुनर्भवादृशेनेति भावः ॥४॥

पितुश्च स्वं पुत्राणां भवतीति स्मृत्युक्ताचाराद् राज्यमिन्द्रत्वम्आत्मपितुः पुत्रत्वमापन्नमिन्द्रं याचितवन्तः ॥५॥

बहुतिथे काले दीर्घकाले, अपहृतं त्रैलोक्यं यज्ञभागः यस्य सः ॥६॥

किमकर्त्तव्यं कर्त्तुमशक्यं स्यादिति योज्यम्, वृद्धेः स्वबुद्ध्या त्वया क्लैव्यं कृतं, मयि ज्ञापिते उपायेन रजिः स्वर्गात् पातितः स्यादिति भावः ॥७॥

(क) कतरः पक्षः देवपक्षासुरपक्षयोर्मध्य इति शेषः। आत्तायुधः गृहीतशस्त्रः सन्। योत्स्यतीत्यत्र परस्मैपदमार्षम्। तदर्थं प्रह्लादस्य इन्द्रपदलाभार्थमित्यर्थः, अयम् उद्यमः अयमस्माकं युद्धयत्नः। युद्धजये सति त्वामेव इन्द्रं करिष्याम इत्यस्माभिः प्रह्लादाय प्रतिश्रुतेः कृतत्वात् त्वामिन्द्रं कर्त्तुं न शक्ष्याम इति भावः। असुरेषु गतेषु सत्सु। अवनीपतिः राजा रजिः।

(ख) अवजितः पराजितः अरिपक्षः शत्रुपक्षः यस्य सः।

(ग) प्रहस्येति अहो इन्द्रस्य चातुर्य्यमित्यादिकमनेकं विभाव्येति शेषः।

(घ) रजौ तदाख्ये राजनि, स्वर्याते स्वर्गं प्राप्ते त्यक्तजीविते सतीति यावत्। आत्मनः पितुः राज्ञो रजेः पुत्रं, भयात्तेन त्रायतेऽदतिदिष्टं पुत्रमित्यर्थः। राज्यं स्वर्गराज्यम्।

(ङ) अप्रदाने इन्द्रेण तत्प्रार्थनया स्वर्गराज्यस्य तेन अप्रतिपादने च इत्यर्थः। इन्द्रत्वं चक्रुः रजे राज्ञः औरसपुत्रा इति शेषः।

(च) तेषां रजेरौरसपुत्राणां बुद्धिमोहाय। ते चापि रजिसुताः। पुरोहितेन बृहस्पतिना देवपुरोधसा आप्यायितं पुष्टं वर्द्धितमिति यावत् तेजो बलं यस्य सः। आक्रामत् अधिचकार। स्वपदात् स्वकीयेन्द्रपदात् च्यवनम् पूर्वोक्तरूपो भ्रंशः रजिसुतप्रयुक्तं, आरोहणमिति पुनः सुरगुरोराभिचारिकक्रियाविशेषः तत्रैवारोहणमित्यर्थात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वल्पैरेवाहोभिस्त्वां निजं पदं प्रापयिष्यामि इत्यभिधाय तेषामनुदिनाभिचारिकं बुद्धिमोहाय शक्रस्य च तेजोवृद्धये जुहाव। ते चापि तेन बुद्धिमोहेनाभिभूयमाना ब्रह्मद्विषो धर्म्मत्यागिनो वेदवादपराङ्मुखा बभूवुः। ततश्च तानपेतधर्म्मा-चारान् इन्द्रो जघान। पुरोहिताप्यायिततेजाश्च त्रिदिवमाक्रामत्। एतदिन्द्रस्य स्वपदच्यवनारोहणं श्रुत्वा पुरुषः स्वपदभ्रंशं दौरात्म्यं वा न चाप्नोति(च)। रम्भस्त्वनपत्योऽभवत्। क्षत्रवृद्धसुतः प्रतिक्षत्त्रः, तत्पुत्रः सञ्जयः, ततश्च विजयः, तस्माच्च यज्ञकृत्, तस्य हर्षवर्द्धनः, हर्षवर्द्धन-सुतः सहदेवः, तस्माददीनः, तस्य जयसेनः, ततश्च संहुतिः, तत्पुत्रः क्षत्रधर्म्माः, इत्येते क्षत्रवृद्धस्य। अतो नहुषवंशं वक्ष्यामि इति ॥८॥

इति श्रीविष्णुपुराणे चतुर्थांशे नवमः अध्यायः ॥

पूर्वस्य क्षत्रवृद्धस्यायुःपुत्रस्य वंश उक्तः, तस्यैव वंशान्तरमाह— क्षत्रवृद्धेत्यादिना यावत् समाप्ति ॥८॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे नवमोऽध्यायः।

दशमः अध्यायः

(नहुषवंशवर्णनम्, ययातेरुपाख्यानञ्च)

यति-ययाति-संयाति-अयाति-वियति-कृतिसंज्ञा नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः। यतिस्तु राज्यं नैच्छत्। ययातिस्तु भूभृदभवत्, उशनसश्च दुहितरं देवयानीं शर्म्मिष्ठाञ्च वार्षपर्व्वणीमुपयेमे(क) ॥१

अत्रानुवंशश्लोको भवति।

यदुञ्च तुर्व्वसुञ्चैव देवयानी व्यजायत।
द्रुह्युञ्चानुञ्च पूरुञ्च शर्म्मिष्ठा वार्षपर्व्वणी(ख) ॥२॥

काव्यशापाच्च अकालेनैव ययातिर्जरामवाप(ग) ॥३

प्रसन्नशुक्रवचनाच्च जरां संक्रामयितुं ज्येष्ठं पुत्रं यदुमुवाच,—त्वन्मातामहशापादियमकालेनैव जरा मामुपस्थिता। तानहं तस्यैवानुग्रहाद् भवतः सञ्चारयाम्येकं वर्षसहस्रम्, न तृप्तोऽस्मि विषयेषु. त्वद्वयसा विषयानहं भोक्तुमिच्छामि(घ) ॥४॥

दशमः अध्यायः

दशमे नाहुषस्याथ ययातेर्वंश उच्यते। उद्गीतेनेह सर्वेषां वैतृष्ण्यमुपजायते। उपयेमे देवयानीं ब्राह्मेण शर्मिष्ठां गान्धर्वेणेत्यवधेयम् ॥१॥

(क) वृषपर्वणः तदाख्यस्यासुरराजस्य कन्याम्।

(ख) व्यजायत अजनयत्, जनिरयमन्तर्भूतणिजर्थः। शर्मिष्ठेति व्यजायतेति शेषः।

अनुवंशो वंशमनुगतः श्लोक इत्यर्थः ॥२॥

काव्यशापादिति। शर्मिष्ठायां दास्यां ययातिना पुत्रोत्पादनं देवयान्या कथितं श्रुत्वा क्रुद्धस्य शुक्रस्य शापादकाले जरां ययातिरवाप ॥३॥

(ग) काव्यस्य शुक्राचार्य्यस्य शापात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नात्र भवता प्रत्याख्यानं कर्त्तव्यमित्युक्तः स नैच्छत् तां जरामादातुम्। तञ्चापि पिता शशाप,—त्वत्-प्रसूतिर्न राज्यार्हा भविष्यतीति ॥५॥

अनन्तरञ्च द्रह्युं तुर्वसुमनुञ्च पृथिवीपतिर्जरा-ग्रहणार्थं स्वयौवनप्रदानाय च चोदयामास। तैरप्येकैकश्येन प्रत्याख्यातस्तांश्च शशाप। अथ शर्म्मिष्ठा-तनयमशेषकनीयांसं पूरुं तथैवाह, स चातिप्रवण-मतिः प्रणम्य पितरं सबहुमानो महान् प्रसादोऽय-मस्माकमित्युदारमभिधाय जरां प्रतिजग्राह। स्व-कीयञ्च यौवनं पित्रे ददौ। सोऽपि च नवं यौवन-मासाद्य धर्म्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयं चचार। सम्यक् प्रजापालन-मकरोत् ॥६॥

विश्वाच्या सहोपभोगं भुक्त्वा कामानामन्त-मवाप्स्यामीत्यनुदिनं तन्मनस्को बभूव ॥७॥

अनुदिनञ्च उपभोगतश्च कामानतीव मेने ॥८॥

ततश्चैवमगायत्।

ययातिरुवाच।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते(ङ) ॥९॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्य्याप्तं तदित्यतितृषं त्यजेत्(च) ॥१०॥
यदा न कुरुते भावं सर्व्वभूतेषु पापकम्।
समदृष्टेस्तदा पुंसः सर्व्वा एव सुखा दिशः (१)॥
या दुस्त्यजा दुर्म्मतिभिर्या न जीर्य्यति जीर्य्यतः।
तां तृष्णां सन्त्यजन् प्राज्ञः सुखेनैवाभिपूर्य्यते ॥१२॥

प्रसन्नशुक्रवचनादिति—पुनः प्रसन्नशुक्रस्य यद्वचनं यस्मिन् जरां संक्रामयिष्यसि, तस्मिन् स्थास्यति, तदीयं यौवनञ्च आप्स्यसीति। तस्माज्जरां संक्रामयितुमर्थाद् यौवनञ्चादातुं यदुमुवाच। वयसा यौवनेन ॥४॥

चचार बुभुजे ॥६॥

विश्वाच्या अप्सरसा ॥७॥

उपभोगतस्तद्वासनातः। अतिरम्यान् विषयान् अतीव मेने अतिशयेनाभिलषितवानित्यर्थः ॥८॥

ततश्च निर्वेदात् कामनिवृत्तिप्रकारमाह—'न जातु'त्या-दिना यावत्समाप्ति। कृष्णवर्त्मा अग्निः ॥९॥

यदिति तृष्णापूर्त्तेरशक्यतया दुःखहेतुत्वाद् दोषं कुर्वन् तां त्यजेदिति भावः ॥१०॥

तर्हि विषयत्यागे कथं सुखप्राप्तिस्तत्राह—यदा सर्व विषयेषु भावं गुणाध्यासं पापकं रागादिजनकं न कुरुते, तेषु भौतिकत्वेन समदृष्टिस्तदा ईप्सितालाभजन्यदुःखाभा सर्वा दिशः सुखमय्यः, दुःखाभावे सुखत्वोपचारात् ॥

ननु सा दुस्त्यजेति चेत्, सत्यं, दुर्मतिभिर्दुस्त्यज दोषदृष्टिपरश्चेत् त्यक्तुं शक्नोतीत्याह—या 'दुस्त्यजे सुखेनाभिपूर्य्यते इति पूर्वोक्तस्यानुवादः ॥१२॥

(घ) प्रसन्नस्य ययातेः कातर्येण तदनुनयादिना च लब्ध प्रसादस्य शुक्रस्य वचनात्। तव यदोः मातामहस्य मातुः देव-यान्याः पितुः शुक्रस्य शापात्। त्वत्प्रसूतिः तव सन्ततिः अशेषकनीयांसं सर्वकनिष्ठम्। सोऽपि च ययातिरपि च।

(ङ) जातु कदाचित्। कामानां काम्यभोग्यवि स्रक्चन्दनादीनाम् उपभोगेन कामः विषयभोगवासन शाम्यति। भूय एव अत्यर्थमेव।

(च) व्रीहयश्च यवाश्चेति व्रीहियवमिति समाहार तत् तत् सर्वं भुज्यमानं सदिति शेषः। एकस्यापि जनस्य कामोपशमने न पर्य्याप्तं समर्थम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न
जीर्य्यति(छ) ॥१३

पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वेव जायते(ज) ॥१४॥

तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्म्ममो भूत्वा चरिष्यामि मृगैः सह(झ)॥१५

पराशर उवाच ।

पूरोः सकाशादादाय जरां दत्त्वा च यौवनम् ।
राज्येऽभिषिच्य पूरुञ्च प्रययौ तपसे वनम्(ञ) ॥१६॥

दिशि दक्षिणपूर्व्वस्यां तुर्व्वसुं प्रत्यथादिशत् ।
प्रतीच्याञ्च तथा द्रुह्युं दक्षिणापथतो यदुम् ॥१७

उदीच्याञ्च तथैवानुं कृत्वा मण्डलिनो नृपान् ।
सर्व्वपृथ्वीपतिं पूरुं सोऽभिषिच्य वनं ययौ ॥१८॥

इति श्रीविष्णुपुराणे चतुर्थांशे दशमः अध्यायः ॥

दोषदृष्टिं दर्शयन् तृष्णायाः कालतोऽपि दुष्पूरतामाह—'जीर्य्यन्ती'ति द्वाभ्याम् ॥१३॥

पूर्वोक्तं निगमयन् कर्त्तव्यमध्यवस्यति—'तस्मा'दिति । एतां तृष्णाम् ॥१५॥

मण्डलिनः खण्डदेशाधिपान् ॥१८॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे दशमोऽध्यायः ॥

(छ) जीर्य्यतः जराग्रस्तस्य । जीर्य्यन्ति जीर्णतां गच्छन्ति । धनाशा—इतोऽप्यधिकानि मे धनानि भवन्तु, इत्येवं धनगोचरेच्छा-जीविताशा—इतोऽप्यधिकं कालमहं जीवेयमित्येवं स्वीयाधिकायु-र्विषयिणी इच्छा, न जीर्य्यति न क्षीणतां गच्छतीत्यर्थः ।

(ज) एतेषु विषयेष्वेव जायते, न तु भगवत्प्राप्तिप्रभृतिसद-र्थेष्वित्यर्थः । अथवा एतेषु तृष्णा जायत एव, न तु शाम्यतीत्यर्थः ।

(झ) एतां विषयतृष्णाम् ।

(ञ) प्रययौ ययातिरिति शेषः ।

(ट) दक्षिणा च पूर्वा च तयोरन्तरालवर्त्तिनी दिक दक्षिणपूर्वा, तस्याम् आग्नेय्यां दिशीत्यर्थः । प्रतीच्यां पश्चिमायां दिशि । दक्षिणापथतः दक्षिणापथे दाक्षिणात्यविषय इत्यर्थः । उदीच्याम् उत्तरस्याम् । एतेन शप्तानामपि तत्तत्पुत्राणां माण्डलिकभूपतित्वसाधनेन स्वयमेवातिदुस्त्यजतया विज्ञातेषु विषयभोगेषु अत्यासङ्गादेव पितृप्रार्थनायाः प्रत्याख्यानात् तमेव दोषमभिसन्धाय तेषां दण्डो न युक्त इत्येवमुदारा बुद्धिर्यया ते-र्व्यज्यते, पूरोश्चातिदुष्करकृतिप्रवृत्त्या सकलपृथ्वीसाम्राज्ये स्थापनेन विशेषगुणग्राहिता च ।

पाठान्तरम्—

(११—१)—सर्व्वाः सुखमया दिशः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकादशः अध्यायः

[यदुवंशस्य सहस्रहस्तार्ज्जुनचरित्रस्य च वर्णनम्]

पराशर उवाच ।

अतः परं ययातेः प्रथमपुत्रस्य यदोर्वंशमहं कथयामि । यत्राशेषलोकनिवासिमनुष्य-सिद्ध-गन्धर्व्व-यक्ष-राक्षस-गुह्यक-किम्पुरुषाप्सर-उरग-विहग-दैत्य-दानव-देवर्षि-द्विर्षि-मुमुक्षुभिर्धर्म्मार्थि-काम-मोक्षार्थिभिस्तत्फललाभाय सदाभिष्टुतापरिच्छेद्य-माहात्म्येनांशेन भगवाननादिनिधनो विष्णु-रवततार ॥१॥

अत्र श्लोकः ।

यदोर्वंशं नरः श्रुत्वा सर्व्वपापैः प्रमुच्यते ।
यत्रावतीर्णं विष्णाख्यं परं ब्रह्म निराकृति ॥२॥

सहस्रजित्-क्रोष्टृ-नल-रघुसंज्ञाश्चत्वारो यदुपुत्राः बभूवुः । सहस्रजित्पुत्रः शतजित् । तस्य हैहय-वेणुहयास्त्रयः पुत्रा बभूवुः । हैहयाद् धर्म्मनेत्र ततः कुन्निः, कुन्तेः साहञ्जिः, तत्तनयो महिष्मान् तस्माद् भद्रश्रेण्यः, ततो दुर्द्दमः, तस्माद् धनकः धनकस्य कृतवीर्य्य-कृताग्नि-कृतवर्म्म-कृतौजसश्चत्वारः पुत्राः । कृतवीर्य्यादर्ज्जुनः सप्तद्वीपपतिर्वभूव सहस्रो जज्ञे । योऽसौ भगवदंशमत्रिकुलमवतीर्णं दत्तात्रेयाख्यमाराध्य बाहुसहस्रमधर्म्मसेवानिवारणं धर्म्मेण पृथिवीजयं धर्म्मतश्चानुपालनमरातिभ्योऽपराजयमखिलजगत्प्रख्यातपुरुषाच्च मृत्युम्-

---

एकादशः अध्यायः

इतः पञ्चभिरध्यायैर्यदोर्वंशो निरूप्यते । यत्रासुर-सुराद्यात्मा हरिराविरभूत् स्वयम् । एकादशेऽर्जुनस्य कार्त्तवीर्य्योऽनुवर्ण्यते । योगेनैश्वर्य्यमत्तोऽसौ रावणं विनिपातितः । अंशेनेति । लीलागृहीतमृत्यूपहितदेह दंश इवांशस्तेन स्वरूपेणावततार ॥१॥

स्वयन्तु निराकृति ब्रह्मैव नराकृतीति वा पाठः ॥२॥

(क) धर्मार्थकाममोक्षार्थिभिरिति विशेषणं यथासम्भवं मानुषसिद्धगन्धर्वादीनां बोध्यम् । तत्फलानां धर्मार्थकाममोक्ष-रूपफलानां लाभाय सदा अभिष्टुतः अपरिच्छेद्यमाहात्म्यश्चेति विशेषणद्वयस्य कर्मधारयः । तथाहि मनुष्यादिषु केचिद्धर्मा-र्थिनः धर्मलाभाय केचिदर्थार्थिनः अर्थलाभाय केचित् कामार्थिनः कामलाभाय केचिच्च मोक्षार्थिनो मोक्षलाभाय यस्यांशस्य स्तुतिं कुर्वन्ति, तेनांशेन विष्णुरवततारेत्यर्थः । अपरिच्छेद्यं इयत्तया परिच्छेत्तुमशक्यं माहात्म्यं महिमा यस्य तथाभूतेन । अथवा अभिष्टुतं स्तुतिविषयीकृतम् अपरिच्छेद्यमाहात्म्यं यस्य तथा-भूतेनांशेनेत्यर्थः । अनादिनिधनः आद्यन्तरहितः नित्यस्वरूप इति यावत् ।

(ख) निः न विद्यते आकृतिः आकारो यस्य परब्रह्मण तदेव स्वस्य उपास्यत्वादिसम्पादनाय वैष्णव्या मायया दिव्यं विग्रहं धारयति । तदुक्तम्—निर्गुणस्याप्रमेयस्य निष्कलस्य शरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना । इति ब्रह्मण इति कर्त्तरि षष्ठी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्येतान् वरान् अभिलषितवान्, लेभे च। तेनेयमशेषद्वीपवती पृथ्वी सम्यक् परिपालिता। दशयज्ञसहस्राण्यसावयजत्। तस्य च श्लोकोऽद्यापि गीयते(ग) ॥३॥

नूनं न कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः।
यज्ञैर्दानैस्तपोभिर्वा प्रश्रयेण दमेन च ॥४॥

अनष्टद्रव्यता चं तस्य राज्येऽभवत्(घ) ॥५॥

एवं पञ्चाशीतिसहस्राण्यब्दानव्याहतारोग्यश्रीबलपराक्रमो राज्यमकरोत्। माहिष्मत्यां दिग्विजयाभ्यागतो नर्म्मदाजलावगाहनक्रीड़ानिपानमदाकुलेनायत्नेनैव तेनाशेषदेवदैत्यगन्धर्व्वेशजयोद्भूतमदावलेपोऽपि रावणः पशुरिव बद्ध्वा स्वनगरैकान्ते स्थापितः(ङ) ॥६॥

यः पञ्चाशीतिवर्षसहस्रोपलक्षणकालावसाने भगवन्नारायणांशेन परशुरामेण उपसंहृतः। तस्य पुत्रशतप्रधानाः पञ्च पुत्रा बभूवुः; शूर-शूरसेन-वृषण-मधुध्वजसंज्ञाः। जयध्वजात् तालजङ्घः पुत्रोऽभवत्। तालजङ्घस्य पुत्रशतमासीत्। येषां ज्येष्ठो बीतिहोत्रः, तथान्यो भरतः, भरताद् वृष-सुजातौ च। वृषस्य पुत्रो मधुरभवत्। तस्यापि वृष्णिप्रमुखं पुत्रशतमासीत्। यतो वृष्णिसंज्ञामेतद् गोत्रमवाप। मधुसंज्ञाहेतुश्च मधुरभवत्। यादवाश्च यदुनामोपलक्षणात्(च) ॥७

इति श्रीविष्णुपुराणे चतुर्थांशे एकादशः अध्यायः ॥

अनष्टद्रव्यता च तद्राज्येऽभवदित्यत्रातीतकाला न विवक्षिताः, यत इदानीमपि तन्नामाख्यानेन द्रव्यप्राप्तेः। "अनष्टद्रव्यता चैव तव नामाभिकीर्त्तनात्" इति कूर्म्मोक्तेः ॥३

माहिष्मत्यां पुर्य्यां दिग्विजयार्थमागतो रावणस्तेनार्जुनेन बद्ध्वा स्वनगरैकान्ते स्थापित इत्यन्वयः। कथम्भूतेन नर्मदाजलावगाहनक्रीड़ायां यन्निपानमतिपानं तेन यो मदो मत्तता तदाकुलेन। एवं हि हरिवंशे जलक्रीड़ासक्तार्जुनबाहुसहस्रबद्धनर्मदाप्रतिस्रोतःप्रसराप्लुतस्वशिविरो रावणः तदभिभवाय प्रवृत्तोऽर्जुनेन बद्ध्वा स्वनगरे स्थापित इति ॥६॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे एकादशोऽध्यायः।

(ग) बाहूनां सहस्रं तदयस्यास्ति सः सहस्रबाहुरित्यर्थः। कार्त्तवीर्य्यार्जुनस्तथैव पुराणादिषु प्रसिद्धः। अपराजयं स्वस्येति शेषः। मृत्युं स्वस्येति शेषः। मृत्युमित्यादौ इतीत्यव्ययत्वेनोऽपि प्रथमाया अभाव आर्षः। दशयज्ञसहस्राणि दशसहस्रसंख्यकान् यज्ञानित्यर्थः। अयजत् यथाविधि अन्वतिष्ठत्।

(घ) न नष्टम् अदर्शनं गतं लुप्तमित्यर्थः, द्रव्यं धनम् उपकरणं वा यस्य तस्य भावः। तदधिकृते राज्ये वसतः तन्नाम स्मरतो वा न कदापि द्रव्याभावजनितं दुःखमनुभवगोचरतां यातीति कूर्मांद्येकवाक्यतया भावः प्रतिपत्तव्यः।

(ङ) अशेषाः निखिला ये देवदैत्यगन्धर्वेशाः तेषां जयेन उद्भूतः मदावलेपः मत्तताजनितः गर्वः समधिकाहुङ्कारो वा यस्य सः। तादृशस्य रावणस्यापि बन्धनेन स्वनगरैकान्ते स्थापनात् तस्य सकलदेवाद्यतिशायि वीर्य्यं व्यज्यते।

(च) उपसंहृतः अन्तं नीतः निहत इत्यर्थः। प्रधाना इति तत्रेति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वादशोऽध्यायः

[यदुपुत्रक्रोष्टृवंशकथनम्]

पराशर उवाच ।

क्रोष्टुश्च यदुपुत्रस्यात्मजो वृजिनीवान् । ततश्च स्वाहिः, ततो रुषद्गुः, रुषद्गोश्चित्ररथः, तत्तनयः शशविन्दुश्चतुर्दशमहारत्नश्चक्रवर्त्त्यभवत् ॥१॥

तस्य च शतसहस्रं पत्नीनामभवत् । दशलक्षसङ्ख्याश्च पुत्राः । तेषाञ्च पृथुयशाः, पृथुकर्म्मा, पृथुजयः, पृथुदानः, पृथुकीर्त्तिः, पृथुश्रवाः, षट् पुत्राः प्रधानाः । पृथुश्रवसः पुत्रशतमः, तस्मादुशनाः । यो वाजिमेधानां शतमाजहार । तस्य च शितेषुर्नाम पुत्रोऽभूत्, तस्यापि रुक्मकवचः, ततः परावृत्, परावृतो रुक्मेषु-पृथुरुक्म-ज्यामघ-पालित-हरित-संज्ञाः पञ्चात्मजा बभूवुः । अत्राद्यापि ज्यामघस्य श्लोको गीयते ॥२॥

भार्य्याविश्यास्तु ये केचिद् भविष्यन्त्यथवा मृताः ।
तेषान्तु ज्यामघः श्रेष्ठः शैव्यापतिरभून्नृपः ॥

अपुत्रा तस्य सा पत्नी शैव्या नाम तथाप्यसौ ।
अपत्यकामोऽपि भयान्नान्यां भार्य्यामविन्दत ॥

स त्वेकदातिप्रभूत-गज-तुरग-सम्मर्द्देनातिदारुणं महाहवे युध्यमानः सकलमेवारातिचक्रमजयत्, तच्चारिचक्रमपास्तपुत्रकलत्रबन्धुबलकोषं स्वमधिष्ठानं परित्यज्य दिशः प्रविद्रुतम् (क)॥३॥

तस्मिंश्च विद्रुतेऽतित्रासाल्लोलायतलोचनयुगं त्राहि तात भ्रातरित्याकुलविलापविधुरं राजकन्यारत्नमद्राक्षीत् ॥४॥

द्वादशः अध्यायः

द्वादशे क्रोष्टृसंज्ञस्य यदुपुत्रस्य सन्ततिः । वंशकृद्वर्ण्यते यत्र ज्यामघः स्त्रीजिताग्रणीः । चतुर्दश महान्ति रत्नानि यस्य सः । रत्नानि चात्र स्वस्वजातिश्रेष्ठानि धर्मसंहितोक्तानि "चक्रं रथो मणिः खड्गश्चर्म रत्नञ्च पञ्चमम् । केतुर्निधिश्च सप्तैव प्राणहीनानि चक्षते ॥ भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः । पत्त्यश्वौ कल्पभाश्चेति प्राणिनः सप्त कीर्त्तिताः ॥ चतुर्दशेति रत्नानि सर्वेषाञ्चक्रवर्त्तिनाम्" ॥१॥

ज्यामघस्य वन्ध्यापतेः अपुत्रस्य भार्यावश्यत्वमेव पुत्रप्रदमासीदिति वक्ष्यन् कथामाह—'अत्राद्यापी'ति यत्समाप्ति । अधिष्ठानं निवासम् ॥३॥

(क) भयात् भार्य्यायां इति शेषः । महाहवे महासंग्रामे अरातिचक्रं शत्रुसमूहम् । अपास्तानि परित्यक्तानि पुत्रः पत्नी बन्धवः बलानि कीषश्च येन तथाभूतमिति । तथाच 'आत्मानं सततं रक्षेद् दारैरपि धनैरपी'त्यादिनीतिशास्त्रोक्तेः आत्मन एव निखिलकाम्यमूर्द्धन्यत्वात् । दिश इति बहुवचनेन शेषः । दिश इति बहुवचनेन शत्रुभयव्याकुलानां तदरातीनां यस्यां दिशि प्रस्थानेन जीवनं रक्षितं स्यात्, स तस्यामेव दिशं प्रतस्थे न त्वेकस्यामेव दिशि सर्वे पलायिता इति भावो गन्तव्यां दिशं गन्तव्यमित्यादिस्थलवद् वा दिशः प्रविद्रुतक्रियाकर्मतयैव दिश् शब्दोत्तरं द्वितीयोपपत्तिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्दर्शनाच्च तस्यामनुरागानुगतान्तरात्मा स भूपोऽचिन्तयत् ॥५॥

साध्विदं ममापत्यविरहितस्य बन्ध्याभर्त्तुः साम्प्रतं विधिनापत्यकारणं कन्यारत्नमुपपादितम्, तदेतत् समुद्वहामि। अथ चैनां स्यन्दनमारोप्य स्वमधिष्ठानं नयामि(ख) ॥६॥

तथैव देव्याहमनुज्ञातः समुद्वक्ष्यामीति। अथैनां रथमारोप्य स्वनगरमागच्छत् ॥७॥

विजयिनञ्च राजानमशेषपौरभृत्यपरिजनामात्यसमवेता शैव्या द्रष्टुमधिष्ठानद्वारमागता(ग) ॥८॥

सा च अवलोक्य राज्ञः सव्यपार्श्ववर्त्तिनीं कन्यामीषदुद्भूतामर्षस्फुरदधरपल्लवा राजानमवोचत्,—

अतिचपलचित्तात्र स्यन्दने केयमारोपिता इति। असावप्यनालोचितोत्तरवचनोऽतिभयात् तामाह,—

स्नुषा ममेयमिति(घ) ॥९॥

अथैनं शैव्योवाच।

नाहं प्रसूता पुत्रेण नान्या पत्न्यभवत् तव।
स्नुषासम्बन्धवाच्यैषा कतमेन सुतेन ते ॥१०॥

पराशर उवाच।

इत्यात्मेर्ष्याकोप-कलुषित-वचनमुषितविवेकतया दुरुक्तपरिहारार्थमिदमवनीपतिराह— ॥११॥

यस्ते जनिष्यत्यात्मजः, तस्येयमनागतमेव भार्य्या निरूपिता। इत्याकर्ण्योद्भूतमृदुहासा तथेत्याह-प्रविवेश च राज्ञा सहाधिष्ठानमिति ॥१२॥

लोलं चञ्चलम् आयतञ्च दीर्घं लोचनयुगलं यस्य कन्यारत्नस्य तत्। आकुलविलापञ्च तद् विधुरं बन्धुविमुक्तञ्च ॥४॥

अनुरागस्यानुगतोऽधोनोऽन्तरात्मा मनो यस्य सः ॥५॥

(ख) स्वम् अधिष्ठानं भवनम्।

(ग) अधिष्ठानस्य भवनस्य द्वारं प्रवेशस्य मुख्यं द्वारमित्यर्थः।

(घ) अतिचपलं समधिकं चञ्चलं चित्तं यस्य तत्सम्बोधने अतिचपलचित्तेति। असावपि स शैव्यापतिः ज्यामघोऽपि। न आलोचितं सम्यग्विचारितम् उत्तरवचनं येन सः, अतिभयात् शैव्यायाः स्वपत्न्या इति शेषः। एतदनालोचितोत्तरवचनत्वे बीजम्। वक्ष्यमाणमुत्तरवचनं प्रकृते सङ्गतमसङ्गतं वा स्यादित्यतिभयप्रयुक्तसम्भ्रमेण विशेषतोऽविचार्य्यैवेति भावः। तां शैव्याम्।

समुद्वहामि परिणेष्यामि ॥६॥

शैव्ययाहमनुज्ञातः समुद्वक्ष्यामीति निश्चितत्वात् शैव्यानुज्ञाभावे कन्यारत्नस्य स्नुषात्वेऽप्यदोषः ॥७॥

अधिष्ठानद्वारं पुरद्वारम् ॥८॥

ईषदुद्भूतामर्षेण स्फुरन्तधरपल्लवो यस्याः। अनालोचितमविचारितमुत्तरवचनं येन सः ॥९॥

नाहं प्रसूतापत्यवती अन्या च पुत्रेण विशिष्टा ते पत्नी नामवत्। कतमेन सुतेन निमित्तेन स्नुषासम्बन्धेन उपाधिना वाच्या, अपि तु न केनापीत्याक्षेपः ॥१०॥

आत्मनि राज्ञि शैव्याया ईर्ष्याकोपाभ्यां कलुषितं क्षुभितं यद्वचनं तेन मुषितो विवेको यस्य तत्तया दुरुक्तम् असम्भावितार्थमपि यद्वचनं तत् परिहारार्थम् ॥११॥

भार्या नवबधूः निरूपिता कल्पिता ॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनन्तरञ्चातिशुद्धलग्नहोरांशकावयवोक्त-कृतपुत्र-जन्मालापगुणाद् वयसः परिणाममुपगतापि शैव्या स्वल्पैरेवाहोभिर्गर्भमवाप(ङ) ॥१३॥

कालेन च पुत्रमजीजनत्। तस्य च विदर्भ इति पिता नाम चक्रे। स च तां स्नुषामुपयेमे ॥१४॥

तस्याञ्चासौ क्रथ-कौशिकसंज्ञौ पुत्रावजनयत्। पुनश्च तृतीयं रोमपादसंज्ञं कुमारमजीजनत्। रोम-पादाद् बभ्रुः, बभ्रोः पुत्रो धृतिः। कौशिकस्यापि चेदिः पुत्रोऽभूत्, यस्य सन्ततौ चैद्या भूपालाः। क्रथस्य स्नुषापुत्रस्य पुत्रः कुन्तिरभवत् ॥१५॥

कुन्तेर्वृष्णिः, वृष्णेर्निर्वृतिः, निर्वृतेर्दशार्हः, तस्मा व्योमा, तस्मादपि जीमूतः, तस्यापि वंशकृतिः, तस भीमरथः, तस्माद् नवरथः, ततश्च दशरथः, तस शकुनिः, तत्तनयः करम्भिः, करम्भेर्देवरातोऽभवत्। तस्माद् देवक्षत्रः, तस्य मधुः, मधोरनवरथः, अनवरथात् कुरुवत्सः, ततश्चानुरथः, ततः पुरुहोत्रो जज्ञे। ततश्च अंशः, ततश्च सत्वतः, सत्वतार्हो सात्वताः ॥१६॥

इत्येतां ज्यामघसन्ततिं सम्यक् श्रद्धासमन्वितः श्रुत्वा सर्वपापैः प्रमुच्यते ॥१७॥

इति श्रीविष्णुपुराणे चतुर्थांशे द्वादशः अध्यायः।

अनन्तरञ्च शैव्या गर्भमवापेत्यन्वयः। तत्र हेतुः अतिशुद्धा ये लग्नहोरांशकावयवास्तेषूक्तं तथास्त्विति। अस्तु-देवतयोक्तमुक्तिस्तेन सहकृतो यः शैव्याराजाभ्यां पुत्रजन्मा-त्मकः आलापस्तस्य गुणात् सादृगुण्यात्। अस्तु-देवताख्या काचिद्देवता हि शुभाशुभवचनं तथास्त्विति अनुमोदते, तत्र राशीनामुदयो लग्नं राशेरर्द्धं होराया नवमो भागोऽंशकः अवयवः द्वादशादिः, एतेषु शुभेषु उक्तं कृतश्चाक्तं भवतीत्यर्थः ॥१३॥

न च विदर्भः कथं ज्येष्ठामुपयेमे ? ज्यामघस्य पूर्वप्रतिज्ञा-त्वादित्याद्यूह्यम् ॥१४॥

स्नुषायाः ज्यामघस्य स्नुषायाः सत्याः पुत्रस्य ॥१५॥

सत्वताद् एते वक्ष्यमाणास्तद्वंश्याः सात्वताः ॥१६॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाभिधायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे द्वादशोऽध्यायः समाप्तः

(ङ) वयसः परिणाममुपगतापि परिणतवयस्कापि अति-क्रान्तसन्तानयोग्यवयोऽवस्थापीत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रयोदशोऽध्यायः

[सत्वतपुत्राणां वर्णनम्, स्यमन्तकमणिवृत्तान्तकथनञ्च]

पराशर उवाच ।

भजिन-भजमान-दिव्यान्धक-देवावृध-महाभोज-वृष्णिसंज्ञाः सत्वतस्य पुत्रा बभूवुः ॥१॥

भजमानस्य निमि-बृकण-वृष्णयः, तथान्ये तद्-वैमात्राः—शताजित्-सहस्राजिद्-अयुताजित् संज्ञाः ॥२

देवावृधस्यापि बभ्रुः पुत्रोऽभूत् । तस्य च अयं श्लोको गीयते ॥३॥

यथैव शृणुमो दूरात् सम्पश्यामस्तथान्तिकात् ।
बभ्रुः श्रेष्ठो मनुष्याणां दैवैर्देवावृधः समः ॥४॥

पुरुषाः षट् च षष्टिश्च षट् सहस्राणि चाष्ट च ।
येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥५॥

महाभोजस्त्वतिधर्म्मात्मा । तस्यान्वये भोजा मार्त्तिकावता बभूवुः ॥६॥

वृष्णेः सुमित्रो युधाजिच्च पुत्रोऽभवत् । ततश्चानमित्र-शिनी तथा ॥७॥

अनमित्रान्निघ्नः, निघ्नस्य प्रसेन-सत्राजितौ । तस्य च सत्राजितस्य भगवानादित्यः सखाभवत् ॥८॥

एकदा त्वम्भोधेस्तीरसंश्रयः सूर्य्यं सत्राजितस्तुष्टाव । तन्मनस्कतया च भास्वानभिष्टूयमानोऽग्रतस्तस्य तस्थौ, अस्पष्टमुर्त्तिधरं चैनमालोक्य सत्राजितः सूर्य्यमाह,—यथैव व्योम्नि त्वां वह्निपिण्डोपममहमपश्यं

त्रयोदशः अध्यायः

त्रयोदशे ज्यामघस्य सन्ततौ सत्वतान्वयः । स्यमन्तकस्य चाख्यानं प्रसङ्गादनुवर्ण्यते । सत्वतस्य भजिनादयः सप्त पुत्रा बभूवुः ॥१॥

तद्वैमात्राः तेषां निम्यादीनां वैमात्राः सापत्नाः ॥२॥

तस्य बभ्रोः चकारादेवावृधस्यापि श्लोको यशो गीयते ॥३॥

दूरात् दूरे स्थितं यथा शृणुमः, अन्तिकात् समीपे स्थितमपि प्रत्यक्षतया तथैव पश्यामः, न ततः किञ्चिदपि न्यूनम् । अतो बभ्रुर्मनुष्याणां मध्ये श्रेष्ठो देवावृधस्तु देवैः सम इति ॥४

बभ्रोर्देवावृधादपि ताभ्यामुद्दिष्टमार्गेण पुरुषास्तच्छिष्याः क्रमेण षट्षष्ट्यादयोऽमृतत्वं प्राप्ताः । बभ्रुदेवावृधाविति पाठे बभ्रुं देवावृधञ्चासाद्य इति शेषः । स एवार्थः ॥५॥

मृत्तिकावतं नाम पुरं तत्र स्थिता नृपा मार्त्तिकावताः ॥६॥

वृष्णेः सुमित्रयुधाजितौ पुत्रावित्यर्थः । ततः सुमित्रात् ॥७॥

सत्राजितप्रसङ्गात् स्यमन्तकोपाख्यानमाह—'तस्ये'त्यादिना यावत्समाप्ति ॥८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथैवाद्याग्रतो गतमप्यत्र न किञ्चिद्भगवता प्रसादीकृतं विशेषमुपलक्षयामि(क) ॥९॥

इत्येवमुक्ते (भगवता) सूर्य्येण निजकण्ठादुन्मुच्य स्यमन्तकनामा मणिरवतार्य्य एकान्ते न्यस्तः, ततस्तमाताम्रोज्ज्वलह्रस्ववपुषम् ईषदापिङ्गलनयनमादित्यमद्राक्षीत्। कृतप्रणिपातस्तवादिकञ्च सत्राजितमाह भगवान्,—वरमस्मत्तोऽभिमतं वृणीष्वेति। स च तदेव मणिरत्नमयाचत। स चापि तस्मै तद् दत्त्वा वियति स्वं धिष्ण्यमारुरोह (ख) ॥१०॥

सत्राजितोऽप्यमल-मणिरत्नसनाथकण्ठतया सूर्य्य इव तेजोभिरशेषदिगन्तराण्युद्भासयन् द्वारकां विवेश ॥११॥

द्वारकावासिजनपदस्तु तमायान्तमवेक्ष्य भगवन्तमनादिपुरुषं पुरुषोत्तममवनिभारावतारणार्थं मानुषरूपधारिणं प्रणिपत्याह—भगवन्! भगवान् नूनं द्रष्टुमायात्यादित्यः। इत्याकर्ण्य प्रहस्य तानाह भगवान्, नायमादित्यः सत्राजितोऽयमादित्यदत्तं स्यमन्तकाख्यं महामणिं बिभ्रदत्रोपायाति, तदेनं विश्रब्धाः पश्यत, इत्युक्तास्ते ययुः(ग) ॥१२॥

स च तं स्यमन्तकाख्यं महामणिमात्मनिकेते चक्रे (घ) ॥१३॥

प्रतिदिनञ्च तन्मणिरत्नप्रवरमष्टौ कनकभारान् स्रवति ॥१४॥

तत्प्रभावाच्च सकलस्यैव राष्ट्रस्योपसर्गा अनावृष्टिव्यालाग्निचौरदुर्भिक्षादिभयं न भवति ॥१५॥

यथा विशेषमुपलक्षयामि, तथा कुर्विति प्रथमं वरप्रार्थना ॥९॥

स्वधिष्ण्यं स्वस्थानम् अमलेन मणिरत्नेन मण्युत्तमेन सनाथकण्ठतया अलंकृतकण्ठतया ॥११॥

विश्रब्धाः निशङ्काः ॥१२॥

आत्मनिवेशने स्वगृहे चक्रे स्थापयामास ॥१३॥

मणिरत्नेषु मण्युत्तमेषु प्रवरं श्रेष्ठं कनकस्रावकरभारः प्रमाणं गणितशास्त्रोक्तम्, "माषो दशार्द्धगुञ्जः षोडश माषो निगद्यते कर्षः। स सुवर्णश्च सुवर्णस्तैरेव चतुर्भिश्च। तुला पलशतं प्रोक्तं भारः स्याद्विंशतितुलाः इति ॥१४॥

उपसर्गो रोगादिः ॥१५॥

(क) अस्पष्टा अविशदप्रत्यक्षा मूर्त्तिः तां धरतीति अस्पष्टमूर्त्तिधरस्तम्। व्योम्नि आकाशे सुदूरे इति भावः, वह्निपिण्डोपमं केवलतेजःपुञ्जमयपिण्डीभूतवह्निसदृशम्। अद्य साम्प्रतम्, अग्रतो गतमपि सन्निधावदूरे स्थितमपि त्वां तथैव वह्निपिण्डोपममेव पश्यामीति शेषः। न तत्र ते किमपि मूर्त्यादिकं पश्यामीति भावः। प्रसादीकृतं प्रसादरूपेणोपहृतं विशेषं वैलक्षण्यम् उपलक्षयामि। तथाहि यावत्त्वमप्रसन्नो दूरस्थ आसीः, तावद् यथा त्वं ममास्पष्टमूर्त्तिः प्रत्यभासीः, साम्प्रतमदूरस्थः प्रसन्नोऽपि त्वं तथैव भासीति भावः।

(ख) आताम्रं सम्यक् ताम्रवर्णम् उज्ज्वलं भास्वरं ह्रस्वाकारं वपुः शरीरं यस्य तथाभूतम्। भगवान् ऐश्वर्यवान् आदित्यः। तदेव मणिरत्नं मणिजातिषु श्रेष्ठभूतं स्यमन्तकं मणिम्। 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते।' इति गमात्।

(ग) पुरुषोत्तमं पुरुषश्रेष्ठं नारायणम्। मानुषरूपधारिणं श्रीकृष्णकलेवरं गृहीतवन्तम्।

(घ) स च सत्राजितश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अच्युतोऽपि तद्रत्नमुग्रसेनस्य भूपतेर्योग्यमेतदिति लिप्साञ्चक्रे, गोत्रभेदभयाच्च शक्तोऽपि न जहार(ङ) ॥१६॥

सत्राजितोऽप्यच्युतो मामेतद् याचिष्यतीत्यवगतरत्ललोभः स्वभ्रात्रे प्रसेनाय तद्रत्नं दत्तवान्(१) ॥१७॥

तच्च शुचिना म्रियमाणमशेषसुवर्णस्रावादिकं गुणमुत्पादयति, अन्यथा य एव धारयति, तमेव हन्तीति। असावपि प्रसेनः स्यमन्तकेन कण्ठासक्तेनाश्वमारुह्याटव्यां मृगयामगच्छत्। तत्र च सिंहाद् वधमवाप। साश्वञ्च तं निहत्य सिंहोऽप्यमलमणिरत्नमास्याग्रेणादाय गन्तुमुद्यतः ऋक्षाधिपतिना जाम्बवता दृष्टो घातितश्च। जाम्बवानप्यमलं तन्मणिरत्नमादाय स्वविलं प्रविवेश, सुकुमारकसंज्ञाय च बालकाय क्रीड़नमकरोत्(च) ॥१८॥

अनागच्छति च तस्मिन् प्रसेने कृष्णो मणिरत्नमभिलषितवान्, न च प्राप्तवान्; नूनमेतदस्य कर्म्म, नान्येन प्रसेनो हन्यत इत्यखिल एव यदुलोकः परस्परं कर्णाकर्ण्यकथयत्(छ) ॥१९॥

विदितलोकापवादवृत्तान्तश्च भगवान् यदुस्यैन्यपरिवारः प्रसेनाश्वपदवीमनुससार, ददर्श चाश्वसमेतं प्रसेनं निहतं सिंहेन। अखिलजनपदमध्ये सिंहपददर्शनकृतपरिशुद्धिः सिंहपदमनुससार(ज) ॥२०॥

ऋक्षविनिहतञ्च सिंहमप्यल्पे भूमिभागे दृष्ट्वा ततश्च तद्रत्नगौरवादक्षस्यापि पदान्यनुययौ। गिरितटे च सकलमेव यदुसैन्यमवस्थाप्य तत्पदानुसारी ऋक्षविलं प्रविवेश। अर्द्धप्रविष्टश्च धात्र्याः सुकुमारकमुल्लापयन्त्या वाणीं शुश्राव(झ) ॥२१॥

तद्रत्नवरलब्धं शुभदमपि भगवल्लिप्साभङ्गात् बह्वनर्थप्रदं जातमिति वक्तुमाह—'अच्युतोऽपी'ति ॥१६॥

कृष्णस्यावगतो रत्ने लोभो येन सः ॥१७॥

क्रीड़नं क्रीडासाधनम् ॥२८॥

कर्णाकर्णिं कर्णे कर्णे। कर्ण्याकर्ण्या इति पाठे कर्णपरम्परया इत्यर्थः ॥१९॥

सिंहपददर्शनेन कृता परिशुद्धिर्यस्य सः, सिंहेनैव प्रसेनो हतो न कृष्णेनेति जनपदेन ज्ञातत्वात्। तथापि मणिरत्नलोभात् सिंहपदमनुससार ॥२०॥

उल्लापयन्त्या आकांक्षाजनकं वचनमुल्लापनं तत् कुर्वत्याः ॥२१॥

(ङ) अच्युतः श्रीकृष्णः, लिप्सां लब्धुमिच्छाम्।

(१) स्वभ्रात्रे इत्यादिः—एवं हि नाम अविदितरत्नस्थानादिवृत्तः कृष्णो न तन्मणिरत्नं ग्रहीतुं वा शक्नुयादित्यभिसन्धिः।

(च) कण्ठासक्तेन कण्ठसंलग्नेन, मृगयामगच्छत् कर्त्तुमिति शेषः। अथवा मृगयार्थमगच्छदित्यर्थः। साश्वम् अश्वसहितं तं प्रसेनम्। आस्याग्रेण मुखाग्रेण। ऋक्षाधिपतिना भल्लूकराजेन।

(छ) कृष्णो मणिरत्नमित्यादि हन्यत इत्यन्तम् यदुलोकस्य कर्णाकर्णि कथनम्। एतत् प्रसेनहननम्, अस्य कृष्णस्य कर्म। अन्येन कृष्णभिन्नेन।

(ज) भगवान् कृष्णः। प्रसेनाश्वपदवीं प्रसेनेन वनगमनार्थं गृहीतस्य अश्वस्य मार्गम्।

(झ) तस्य ऋक्षस्य पदानुसारी चरणचिह्नानुवर्त्ती सन् ऋक्षस्य विलं गर्त्तम् प्रविवेश श्रीकृष्ण इति शेषः। सर्वत्रैव तत्तद्रक्षाक्षस्य चरणस्य चिह्नमेव पदचिह्न बोध्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः(अ) ॥२२

इत्याकर्ण्य लब्धस्यमन्तकोदन्तोऽन्तःप्रविष्टः कुमार-क्रीड़नकीकृतञ्च धात्रीहस्ते तेजोभिर्ज्जाज्वल्यमानं स्यमन्तकं ददर्श ॥२३॥

तञ्च स्यमन्तकाभिलाषचक्षुषमपूर्व्वं पुरुषमागत-मवेक्ष्य धात्री त्राहि त्राहीति व्याजहार ॥२४॥

तदार्त्तनादश्रवणानन्तरञ्चामर्षपूर्णहृदयः स जाम्बवान् आजगाम, तयोश्च परस्परं युध्यतोर्द्वयोर्युद्धमेकविंशति-दिनान्यभवत् । ते च यदुसैनिकास्तत्र सप्ताष्टदिनानि तन्निष्क्रान्तिमुदीक्षमाणास्तस्थुः । अनिष्क्रममाणे च मधुरिपौ असाववश्यमत्र विलेऽत्यन्तनाशमाप्तो भविष्यत्यन्यथा तस्य कथमेतावन्ति दिनानि शत्रु-जये व्याक्षेपो भवतीति कृताध्यवसाया द्वारकामाग हतः कृष्ण इति कथयामासुः(ट) ॥२५॥

तद्बान्धवाश्च तत्कालोचितमखिलमुपरतक्रिया-कलापं चक्रुः(ठ) ॥२६॥

तत्र चास्य युध्यमानस्यातिश्रद्धादत्तविशिष्टपात्रो युक्तान्नतोयादिना कृष्णस्य बलप्राणपुष्टिरभूत्(ड)॥

इतरस्यानुदिनमतिगुरुपुरुषभिद्यमानस्यातिनिष्ठु प्रहारपीड़िताखिलावयवस्य निराहारतया बलहानि निर्ज्जितश्च भगवता जाम्बवान् प्रणिपत्याह—अ सुर-यक्ष-गन्धर्व्व-राक्षसादिभिरप्यखिलैर्भगवान् जेतुं शक्यः, किमुतावनिगोचरैरल्पवीर्य्यैर्नरावय भूतैश्च तिर्य्यग्योन्यनुसृतिभिः, किं पुनरस्मद्वि रवश्यं भगवतोऽस्मत्-स्वामिनो नारायणस्य सक जगत्परायणस्यांशेन भगवता भवितव्यमित्युक्तः(ढ)

तदेवाह—'सिंहः प्रसेनम्' इति ॥२२॥

लब्धः स्यमन्तकस्योदन्तो वार्त्ता येन सः । लब्ध-स्यमन्तकोऽन्तरिति पाठे ज्ञातः स्यमन्तकः येन सः अन्तः प्रविष्ट इत्यर्थः । जाज्वल्यमानमतिप्रकाशमानम् ॥२३॥

तं कृष्णं स्यमन्तकस्याभिलाषसूचकं चक्षुर्यस्य तम् ॥२४॥

तन्निष्क्रान्तिं कृष्णनिर्गमम् । व्याक्षेपो विलम्बः । कृताध्यवसायाः कृतनिश्चयाः ॥२५॥

उपरतक्रियाकलापं मृतक्रियासमूहं श्राद्धादिकम् ॥२६॥

बलप्राणपुष्टिरभूदिति प्रसङ्गात् श्राद्धप्रशंसा उच्च तस्मादवश्यं श्राद्धादिकं कर्त्तव्यमिति भावः ॥२७॥

किमुतावनिगोचरैर्मनुष्यैस्तत्रापि नराणामवयवभूतैरु भूतैः क्रीड़ासाधनैरस्मद्विधैर्जेतुं न शक्य इति किं पु र्वक्तव्यमित्यर्थः ॥२८॥

(अ) सिंहः प्रसेनहन्ता सिंहः । जाम्बवता तव पित्रा ऋक्षवरेण हतः । अतः हे सुकुमारक ! मा रोदीः विलापं मा कुरु । एष स्यमन्तकः सिंहं हत्वा तस्मात् तव पित्रा गृहीतः क्रीड़नकरूपेण तुभ्यं वितीर्णश्च एषः स्यमन्तकनामा मणिः, तव हि तवैव । अथवा मा रोदीः, हि यस्मादित्यर्थः ।

(ट) तस्याः धात्र्याः आर्त्तनादस्य त्राहीति कातरतापूर्ण-शब्दस्य श्रवणानन्तरम् । अमर्षपूर्णहृदयः क्रोधपूरितचित्तः । तयोः श्रीकृष्ण-जाम्बवतोः । युध्यतोरित्यार्षम् । सप्त अष्टौ वा परिमाणमेषां तानि सप्ताष्टदिनानि व्याप्य । अनिष्क्रममाण इत्यत्र शानच्प्रत्यय आर्षः ।

(ठ) तत्कालोचितं मरणोत्तरकालकर्त्तव्यम् ।

(ड) अस्य कृष्णस्येति सम्बन्धः । अतिश्रद्धया श्रीकृष्णमुद्दिश्य विशिष्टस्य समुत्सृष्टं सम्पदादिगुणयुक्तस्य उच्च योग्यम् यत् अन्नतोयादि अत्युत्कृष्टमन्नजलादीत्यर्थः, तेन ।

(ढ) इतरस्य युध्यमानयोस्तयोर्मध्ये अपरस्य श्रीकृष्णादन्य जाम्बवत इत्यर्थः । अतिगुरुणा समधिकशक्त्यादिमता पु भिद्यमानस्य । बलहानिः शक्तिक्षयः । इमौ जाम्बवतः र जये श्रीकृष्णस्य जये हेतू । अनुसृतम् अनुसरणम् भावे क्त यात् । तिर्य्यग्योनेः अनुसृतं तद् विद्यते येषां तैः तिर्य्यग्यो मनुष्यत्वमानैः तिर्य्यग्भिरित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्मै भगवानखिलभवनिभारावतारमाचचक्षे ॥२९॥ प्रीत्याञ्जितकरतलस्पर्शनेन चैनमपगतयुद्धखेदं चकार ॥३०॥

स च प्रणिपत्यैनं पुनरपि प्रसाद्य जाम्बवतीं नाम कन्यां गृहागमनार्घ्यभूतां ग्राहयामास(ण) ॥३१॥

स्यमन्तकमणिमप्यसौ प्रणिपत्य तस्मै प्रददौ। अच्युतोऽप्यतिप्रणतात् तस्मादग्राह्यमपि तन्मणिरत्नमात्मशोधनाय जग्राह(त) ॥३२॥

सह जाम्बवत्या द्वारकामाजगाम। भगवदागमनोद्भूतहर्षोत्कर्षस्य द्वारकावासिजनस्य कृष्णावलोकनानुक्षणमेवातिपरिणतवयसोऽपि नवयौवनमिवाभवत्। आनकदुन्दुभिश्च दिष्ट्या दिष्टेति च सकलयादवाः स्त्रियश्च सभाजयामासुः ॥३३॥

भगवानपि यथानुभूतमशेषयादवसमाजे यथावदाचचक्षे, स्यमन्तकञ्च सत्राजिताय दत्त्वा मिथ्याभिशस्तिविशुद्धिमवाप; जाम्बवतीञ्चान्तःपुरे निवेशयामास। सत्राजितोऽपि मयास्याभूतमलिनमारोपितमिति जातसन्त्रासः स्वसुतां सत्यभामां भगवते भार्य्यां ददौ(थ) ॥३४॥

ताञ्चाक्रूर-कृतवर्म्म-शतधन्वप्रमुखा यादवाः पूर्वं वरयामासुः। ततस्तत्प्रदानादवज्ञातमात्मानं मन्यमानाः सत्राजिते वैरानुबन्धं चक्रुः। अक्रूर-कृतवर्म्मप्रमुखाश्च शतधन्वानमूचुः, अयमतिदुरात्मा सत्राजितो योऽस्माभिर्भवता चार्य्यर्थितोऽप्यात्मजामस्मान् भवन्तं चाविगणय्य कृष्णाय दत्तवान्, तदलमनेन जीवता। घातयित्वैनं तन्महारत्नं त्वया किं न गृह्यते? वयमप्यभ्युपपत्स्यामः यद्यच्युतस्तेवापि वैरानुबन्धं करिष्यतीति ॥३५॥

अवनेर्भारस्यावतारो यस्मात् तमात्मानमखिलं जन्मादिसहितम् आचचक्षे आख्यातवान्। यद्वा भारावतारं कृतं करिष्यमाणञ्चाख्यातवान् ॥२९॥

यथा तिलादिस्नेहयुक्तकरेण मर्दयन् श्रान्तस्य श्रममपनयति कश्चित्, तथा प्रीत्याञ्जितं अक्षितं युक्तं यत् करतलं तस्य स्पर्शनेनैनं जाम्बवन्तं विगतयुद्धश्रमं चकारेत्यर्थः ॥३०॥

कन्यां ग्राहयामास दत्तवान् ॥३१॥

(ण) गृहागमनार्घ्यभूतामिति—तथाहि पूजार्हेषु गृहागतेषु सत्सु गृहस्थैरर्घ्येण तत्पूजा कार्य्या। अत्र जाम्बवता स्वकन्यां जाम्बवतीमेव तत्स्थाने परिकल्प्य पूजार्हस्य भगवतो नारायणस्य स्वाभीष्टदेवस्य तथा पूजा कृतेति भावः।

(त) अग्राह्यमपीति—अतिप्रणतस्य जाम्बवतश्चित्तभङ्गभयात् सौजन्यभङ्गभयाद् वेति भावः।

आत्मशोधनाय लब्धमपि मणिं क्वचिन्निधायागत इति दुर्जनवचननिवारणाय ॥३२॥

दिष्ट्या दिष्ट्या भद्रं भद्रम् इत्यानन्देनापूजयन् ॥३३॥

प्रसङ्गागत-स्यमन्तकाख्यानजाम्बवतीविवाहवत् सत्यभामाविवाहमाह — 'सत्राजितोऽपी'ति। अभूतमलिनं मिथ्यादुर्यशः ॥३४॥

कृष्णे मिथ्यादोषारोपे फलं वक्तुमाह—'ताञ्चे'त्यादिना 'मणिरत्नमपहृतमि'त्यन्तेन। अभ्युपपत्स्यामः साहाय्यं करिष्यामः। यदि वैरानुबन्धमप्यच्युतः करिष्यतीत्यङ्गीकृतत्वादच्युतबलभद्राभ्यामुभाभ्यां वैरानुबन्धे साहाय्याकरणेऽपि न दोषः इति भावः ॥३५॥

(थ) यथा अनुभूतं स्यमन्तकानुसन्धानप्रवृत्तेन स्वेनेति शेषः तत् यथावत् पौर्वापर्य्येणाविकलमित्यर्थः आचचक्षे। मिथ्याभिशस्तेः मिथ्यादोषारोपस्य विशुद्धिमवाप। जातः सन्त्रासः तत्र मिथ्यादोषारोपेण तस्माद् भाव्यनिष्टाशङ्कनरूपं भयं यस्य सः। भार्य्यां ददौ भार्य्यात्वेन प्रतिपादयामास।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३५६ विष्णुपुराणम् चतुर्थांश

एवमुक्तस्तथेत्यसावप्याह । जतुगृहदग्धानाञ्च पाण्डुनन्दनानां विदितपरमार्थोऽपि भगवान् दुर्य्योधनप्रयत्नशैथिल्यार्थं कुल्यकरणाय वारणावतं गतः(द) ॥३६॥

गते च तस्मिन् सुप्तमेव सत्राजितं शतधन्वा जघान, मणिरत्नञ्चाददे । पितृवधामर्षपूर्णा च सत्यभामा शीघ्रं स्यन्दनमारूढ़ा वारणावतं गत्वा भगवतेऽहं प्रतिपादितेति अक्षान्तिमता शतधन्वना अस्मत्पिता व्यापादितः, तच्च स्यमन्तकमणिरत्नमपहृतम् । तदियमस्यावहासना । तदालोच्य यदत्र युक्तं, तत् क्रियतामिति कृष्णमाह(ध) ॥३७॥

तया चैवमुक्तः परितुष्टान्तःकरणोऽपि कृष्णः, सत्यभामाममर्षताम्रलोचनः प्राह,—सत्ये ! ममैषावहासना, नाहमेतां तस्य दुरात्मनः सहिष्ये ॥३८॥

न ह्यनुल्लङ्घ्य वरपादपं तत्कृतनीड़ाश्रयिणो विहङ्गा वध्यन्ते(न) ॥३९॥

तदलमत्यर्थममुनास्मत्पुरतः शोकप्रेरितवाक्यपरिकरेण, इत्युक्त्वा द्वारकामभ्येत्य बलदेवमेकान्ते वासुदेवः प्राह,—मृगयागतं प्रसेनमटव्यां मृगपतिर्जघान । सत्राजितोऽप्यधुना शतधन्वना निधनं प्रापितः । तदुभयविनाशात् तन्मणिरत्नमावाभ्यां सामान्यं भविष्यति ॥४०॥

तदुत्तिष्ठ, आरुह्यतां रथः, शतधनुर्निधनायोद्यमं कुरु, इत्यभिहितस्तथेति समन्वीप्सितवान् । कृतोद्योगौ च तावुभावुपलभ्य शतधन्वा कृतवर्माणमुपेत्य पार्ष्णिपूरणकर्मनिमित्तमचोदयत् । अह

कृष्णस्यान्यत्र गमनं विना सत्राजितवधासम्भवात् तत्प्रसङ्गमाह—'जतुगृहे'ति । सर्वज्ञोऽपि कृष्णः कुल्यार्थमागतश्चेत्तर्हि पाण्डवा मृता एवेति दुर्य्योधनस्य तदन्वेषणादियत्नशैथिल्यार्थं कुलोचितकरणाय वारणावतं हस्तिनापुरं गत इत्यर्थः ॥३६॥

इदानीमर्थनिमित्तान् बहूननर्थान् वक्ष्यन् कृष्णस्य पुनरपि मिथ्याभियोगभङ्गमाह — 'पितृवधामर्षे'त्यादि 'मरकादिकं नाभूदि'त्यन्तेन । अस्य एतत्कर्तृकावहासपरिभवः ॥३७॥

परितुष्टान्तःकरणोऽपि इत्यस्यायं भावः,—मदाज्ञालङ्घफलमेतादृशमेव । तस्य चापुत्रस्य तन्मणिरत्नं सत्यभामैवेति मम मद्विषयिणी अवहासना । सत्राजितस्य कथं भगवतोऽवहासनेत्यत आह,—'अनुल्लङ्घ्ये'ति । पादपस्थाने भगवान्, पक्षिस्थाने सत्राजितः ॥३८-३९॥

आवाभ्यामावयोः ॥४०॥

(द) कुल्यकरणायेति कुले साधु कुल्यं कुलोचितं कर्म तत्करणाय । तत्प्रत्यायनायेत्यर्थः । ये कुलीनास्तेषां कुलस्यायमाचारो यत् कस्मिंश्चिद् बान्धवे मृते सति तद्गृहजनानां सान्त्वनाद्यर्थं बान्धवास्तद्गृहं गच्छन्तीति । अत्रापि पाण्डवान् जतुगृहदग्धान् विज्ञाय तत एव श्रीकृष्णस्य वारणावते पाण्डवानां गृहे प्रस्थानमित्येवं दुर्य्योधनादीनां प्रत्ययजननायेति भावः ।

(न) अक्षान्तिमता अक्षान्तिरसहनं तद्वता सत्यभामाया कृष्णाय प्रतिपादनमसहमानेनेत्यर्थः । अस्मत्पिता सत्राजितः ।

(न) नह्यनुल्लङ्घ्ये ति—तथाहि यथा महापादपे नीड़ं निवसतां विहङ्गमानां वधेन तन्महापादपलङ्घनमर्थायातं तथैव मदाश्रितस्य तव पितुर्वधेन ममापि लङ्घनमायातीति इयं ममावहासनेति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चैनं कृतवर्मा, नाहं बलभद्र-वासुदेवाभ्यां सह विरोधायालम्, इत्युक्तश्चाक्रूरमचोदयत्। आह चासावपि,—नहि कश्चिद् भगवता पादप्रहार-परिकम्पितजगत्त्रयेण असुरवरवनितावैधव्यकारिणा प्रबलरिपुचक्राप्रतिहतचक्रेण चक्रिणा, मदमुदित-नयनावलोकितारिबलविशातनेन अतिगुरुवैरि-वारणाकर्षणाविष्कृत-महिमोरुसीरेण सीरिणा च सह सकलजगद्वन्द्यानाममरवराणामपि योद्धुं समर्थः, किमुताहम्। तदन्यतः शरणमभिलष्यताम्(प) ॥४१

इत्युक्तः शतधनुराह,—यद्यस्मत्परित्राणासमर्थं भवानात्मानमवगच्छति, तदयमस्मन्मणिः संगृह्य रक्ष्यताम्। इत्युक्तः सोऽप्याह,—यद्यन्त्यायामप्य-वस्थायां न कस्मैचिद्भवान् कथयिष्यति, तदहमेनं ग्रहीष्यामि। तथेत्युक्ते अक्रूरस्तन्मणिरत्नं जग्राह(फ)॥४२

शतधनुरप्यतुलवेगां शतयोजनवाहिनीं वड़वा-मारुह्यापक्रान्तः। शैव्य-सुग्रीव-मेघपुष्प-बलाहका-श्चचतुष्टययुक्तरथावस्थितौ बलदेव-वासुदेवौ तमनुप्रयातौ ॥४३॥

सा च वड़वा शतयोजनप्रमाणं मार्गमतीत्य पुनरपि वाह्यमाना मिथिलावनोद्देशे प्राणानुत्ससर्ज्ज। शतधनुरपि तां परित्यज्य पदातिरेवाद्रवत् ॥४४॥

कृष्णोऽपि बलभद्रमाह,—तावदत्रैव स्यन्दने भवता स्थेयम्। अहमेनमधमाचारं पदातिरेव पदातिमनुगम्य यावद् घातयामि। अत्र हि भूभागे दृष्टदोषा हयाः, नैतेऽश्वा भवतेमं भूमिभागमुल्लङ्घ्य नेयाः ॥४५॥

तथेत्युक्त्वा बलभद्रो रथ एव तस्थौ। कृष्णोऽपि द्विक्रोशमात्रं भूमिभागमनुसृत्य दूरस्थस्यैव चक्रं क्षिप्त्वा शतधनुषः शिरश्चिच्छेद। तच्छरीरा-म्बरादिषु च बहुप्रकारमन्विष्यन्नपि स्यमन्तकं मणिं नावाप यदा, तदोपगम्य बलभद्रमाह,—वृथैवास्माभि-र्घातितः शतधनुः न प्राप्तमखिलजगत्सारभूतं तन्मणि-

---

भगवता चक्रिणा कृष्णेन, सीरिणा बलभद्रेण सहा-मरवराणां मध्ये कश्चिद् योद्धुं न समर्थः—इत्यन्वयः। त्रिविक्रमावतारे पादप्रहारेण परिकम्पितं जगत्त्रयं येन। प्रबलरिपुचक्रेषु शत्रुसैन्येष्वप्रतिहतं चक्रं यस्य तेन चक्रिणा, सीरिणा च किम्भूतेन? मदमुदितनयनाभ्यां विलोकितेनैव अखिलं विनाशयतीति तथा तेन। अतिगुरवो महान्तो वैरिण एव वारणाः तेषामाकर्षणेनाविष्कृतो महिमा येन तथाविधः उरुर्महान् सीरो हलमस्यास्तीति तथाभूतेन ॥४१॥

स्यमन्तकमणिन्यासे विहिते भगवान् ज्ञास्यति—सत्रा-जितवधे अक्रूरस्यापि साहाय्यमस्तीति, तन्मा भूदित्युक्तम्—'यद्यन्त्यायामपी'ति ॥४२॥

अतुलवेगाम् अतिशीघ्रगामिनीं तावद् वर्त्म एकेना-ह्वागन्तुं समर्थाम् ॥४३॥

वाह्यमाना वहनाय प्रेष्यमाणा ॥४४॥

लोके हि सर्वस्य सर्वत्र धनार्थमविश्वास इति दर्शयितुं सर्वज्ञोऽपि भगवान् बलदेवं प्रति पुनराह,—'अत्रैवे'ति ॥४५॥

(प) असुरवराणां श्रेष्ठानामसुराणां हिरण्याक्षहिरण्यकशिपु-प्रभृतीनां या वनिताः तासां वैधव्यकारिणा, हिरण्याक्षादीनां तेषां हननकारिणेति भावः।

(फ) शतधन्वेति वक्तव्ये शतधनुरित्यार्षम्। अन्यत्राप्येवम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रत्नम्। इत्याकर्ण्य उद्भूतकोपो बलदेवो वासुदेवमाह,—धिक् त्वां यस्त्वमर्थलिप्सुः। एतच्च ते भ्रातृत्वान्मर्षये तदयं पन्थाः, स्वेच्छया गम्यताम्, न मे द्वारकया, न त्वया, न बन्धुभिः कार्य्यम्। अलमेभिर्ममाग्रतोऽलीकशपथैः। इत्याक्षिप्य तं तथा प्रसाद्यमानोऽपि न तस्थौ, विदेहपुरीं प्रविवेश ॥४६॥

जनकश्चार्घ्यपूर्व्वकमेवैनं गृहं प्रवेशयामास। स तत्रैव च तस्थौ। वासुदेवोऽपि द्वारकामाजगाम। यावच्च जनकराजगृहे बलभद्रोऽवतस्थे, तावद् धार्तराष्ट्रो दुर्य्योधनस्तत्सकाशाद् गदाशिक्षामशिक्षत ॥४७॥

वर्षत्रयान्ते च बभ्रूग्रसेनप्रभृतिभिर्यादवैर्न तद्रत्नं कृष्णेनापहृतमिति कृतावगतिर्विदेहपुरीं गत्वा बलदेवः संप्रत्याय्य द्वारकामानीतः ॥४८॥

अक्रूरोऽप्युत्तममणिसमुद्भूतसुवर्णध्यानपरस्ततो यज्ञानीजे ॥४९॥

सवनगतौ हि क्षत्त्रियवैश्यौ निघ्नन् ब्रह्महत्या भवतीत्यतो दीक्षाकवचं प्रविष्ट एव तस्थौ द्विपञ्चाशद् वर्षाणि(ब) ॥५०॥

एवं तन्मणिरत्नप्रभावात् तत्रोपसर्गदुर्भिक्षमरकादिकं नाभूत् ॥५१॥

अथाक्रूरपक्षीयैर्भोजैः शत्रुघ्ने सात्वतस्य प्रपौत्रे व्यापादिते भोजैः सहाक्रूरो द्वारकामपहृत्य अपक्रान्तः ॥५२॥

तदपक्रान्तिदिनादारभ्य तत्रोपसर्गव्यालानावृष्टिमरकाद्युपद्रवा बभूवुः। अथ यादव-बलभद्रोग्रसेनसमवेतोऽमन्त्रयद् भगवानुरगारिकेतनः,—कियदिदमेकदैव प्रचुरोपद्रवागमनमेतदालोच्यताम् ॥५३॥

इत्युक्ते अन्धकनामा यदुवृद्धः प्राह,—अस्याक्रूरस्य पिता श्वफल्को नाम यत्र यत्राभूत्, तत्र तत्र दुर्भिक्ष-मरकानावृष्ट्यादिकं नाभूत् ॥५४॥

तं श्रीकृष्णमाक्षिप्य तिरस्कृत्य ॥४६॥

प्रासङ्गिकमाह,—'यावच्चे'ति। अशिक्षत शिक्षाम् अकरोत् ॥४७॥

तदेवं सर्वज्ञयोः श्रीकृष्ण-बलभद्रयोः मण्यर्थं शपथादिकं भक्तस्याक्रूरस्य च ज्ञात्वा कृष्णाय मण्यप्रदानं धनदोषप्रदर्शनार्थमेवोक्तम्। बलभद्रागमनमाह—'वर्षत्रये'ति। सम्प्रत्याय्य शपथादिना विश्वास्य ॥४८॥

सुवर्णध्यानपरः एतावद्भिः सुवर्णैः किं क्रियते इति विचारपरः ॥४९॥

सवनगतौ दीक्षितौ ॥५०॥

मरको जनमारी ॥५१॥

अथ रामादीनां कृष्णेस्यमन्तकापहारशङ्कानिरासं वक्तुमाह—'अथाक्रूरे'त्यादिना यावदध्यायसमाप्ति ॥५२-५३॥

उरगारिकेतनो गरुड़ध्वजः। यद् यत इदं प्रचुरोपद्रवागमनम् एतन्निमित्तमालोच्यतामित्यर्थः ॥५३॥

श्वफल्कगान्दिन्योर्माहात्म्योक्तिस्ततपुत्राक्रूरमहिमज्ञापनाय ॥५४॥

(ब) सवनेत्यादि—तथाहि यद्यहं यज्ञदीक्षितस्तिष्ठे तथा दीक्षित-क्षत्रवधे ब्रह्महत्याजनितपापाशङ्कयैव नाहं हन्तुं शक्त इति बुद्ध्यैवाक्रूरस्तथा सुचिरं तस्थौ इति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काशिराजस्य विषयेऽत्यन्तानावृष्ट्यां श्वफल्कोऽनीयत, ततस्तत्क्षणादेव देवो ववर्ष। काशिराजस्य पत्न्याश्च गर्भे कन्या पूर्व्वमासीत् ॥५५॥

सापि पूर्णेऽपि प्रसूतिकाले नैव निश्चक्राम। एवञ्च तस्य गर्भस्य द्वादश वर्षाण्यनिष्क्रामतो ययुः। काशिराजस्तु तामात्मजां गर्भस्थामाह,—पुत्रि! कस्मान्न जायसे? निष्क्रम्यताम्, आस्यन्ते द्रष्टुमिच्छामि। स्वकाञ्च मातरं किमिति चिरं क्लेशयसि इत्युक्ता सा गर्भस्थैव व्याजहार,—तात! यद्येकैकां गां दिने दिने ब्राह्मणेभ्यः प्रयच्छसि, तदाहमन्यैस्त्रिभिर्वर्षैरस्माद् गर्भात् तावदवश्यं निष्क्रमिष्यामीति। एतच्च तद्वचनमाकर्ण्य राजा ब्राह्मणाय दिने दिने गां प्रादात्, सापि तावता कालेन जाता। ततस्तस्याः पिता गान्दिनीति नाम चकार। ताञ्च गान्दिनीं कन्यां श्वफल्कायोपकारिणे गृहागतायार्घ्यभूतां प्रादात्, सा च गान्दिनी प्रतिदिनं यावज्जीवं ब्राह्मणाय गां दत्तवती। तस्यामयमक्रूरः श्वफल्काज्जज्ञे। तस्यैवंगुणमिथुनादुत्पत्तिः(भ) ॥५६॥

तत् कथमस्मिन्नपक्रान्तेऽत्र मरकदुर्भिक्षाद्युपद्रवा न भविष्यन्ति। तदयमानीयतामिति, अलमत्रातिगुणवत्यपराधान्वेषणेन इति ॥५७॥

यदुवृद्धस्यान्धकस्य एतद्वचनमाकर्ण्य केशवोग्रसेनबलभद्रपुरोगमैर्यदुभिः कृतापराधतितिक्षाभवमभयं दत्त्वा श्वाफल्किः स्वपुरमानीतः, तत्र चागत एव तत्स्थ-स्यमन्तकमणेरनुभावादनावृष्टि-मरक-दुर्भिक्ष-व्यालाद्युपद्रवः शशाम। कृष्णश्च चिन्तयामास,—स्वल्पमेतत् कारणं, यदयं गान्दिन्यां श्वफल्केनाक्रूरो जनितः, सुमहांश्चायमनावृष्टिदुर्भिक्षमरकाद्युपशमनकारी प्रभावः(म) ॥५८॥

तन्नूनमस्य सकाशे स महामणिः स्यमन्तकाख्यस्तिष्ठति। तस्य ह्येवंविधाः प्रभावाः श्रूयन्ते। अयमपि यज्ञादनन्तरमन्यत् क्रत्वन्तरं, तस्माद् यज्ञान्तरं यजतीति। अल्पोपादानश्चास्य। असंशय-

---

गर्भे कन्या पूर्वमासीदिति निश्चयो ज्योतिःशास्त्रादिना। ॥५५॥

एवं पूर्वोक्ता गुणा यस्य मिथुनस्य तस्मात् ॥५६॥

इति पूर्वोक्तप्रकारेणातिगुणवत्यक्रूरे इतो निष्क्रान्ततया निमित्ते सति अपरनिमित्तानुसरणेनालं व्यर्थमित्यर्थः ॥५७॥

कृष्णश्चिन्तयामासेत्यतो भगवतस्तस्य सर्वज्ञस्य तत्परामर्शेन मणिसम्भावनं लोकवृत्तानुसरणमात्रं न तत्त्वतः, अन्यथा समस्तमंगलमूर्त्तौ भगवति कृष्णे सति तदरिष्टदर्शनमपि दुर्घटमिति। तथाह शुकः—"इत्यङ्गोपदिशत्येके विसृत्य प्रागुदाहृतम्। सुनिवासनिवासे किं घटेतारिष्टदर्शनम्॥" इति। तस्मादेतल्लोकानुसरणं परप्रत्ययेन स्वापवादपरिहारपरमेवेति। अल्पोपादानं स्वल्पजीविकाद्रव्यम्। अन्यत् प्रयोजनं विवाहादिकमुद्दिश्य समाजं समुदायमचीकरत् कारयामास ॥५८॥

(भ) सापि काशिराजपत्नीगर्भस्था कन्यापि। तावता कालेन गोदानारम्भदिवसात् प्रभृति जातेन वर्षत्रयपूर्त्तिकालेनेत्यर्थः।

(म) स्वल्पमेतदित्यादि—तथाहि अयमनावृष्ट्यादिप्रशमनकारी महान् प्रभावो न गान्दिन्यां श्वफल्केनाक्रूरस्य जननमात्रात् कारणादेव भवितुमर्हति, तदस्यागमनानन्तरमेवानावृष्ट्यादिदोषप्रशमने कारणान्तरेण भाव्यमिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३६० विष्णुपुराणम् [चतुर्थांश

मत्रासौ वरमणिस्तिष्ठतीति कृताध्यवसायोऽन्यत् प्रयोजनमुद्दिश्य सकलयादवसमाजमात्मगेहे एवाचीकरत्। तत्र चोपविष्टेष्वखिलेषु यादवेषु पूर्व्वप्रयोजनमुपन्यस्य पर्य्यवसिते च तस्मिन् प्रसङ्गागतपरिहासकथामक्रूरेण सह कृत्वा जनार्द्दनस्तमक्रूरमाह ॥५९॥

दानपते ! जानीम एव वयं,—यथा शतधन्वना अखिलजगत्सारभूतं स्यमन्तकरत्नं भवतः सकाशे समर्पितम्। तदेतद्राष्ट्रोपकारकं भवतः सकाशे तिष्ठतीति तिष्ठतु, सर्व्व एव वयं तत्प्रभावफलभुजः, किन्त्वेष बलभद्रोऽस्मानाशङ्कितवान्। तदस्मत्प्रीतये दर्शय, इत्यभिहितः सरत्नः सोऽचिन्तयत्। किमत्रानुष्ठेयम्? अन्यथा चेत् ब्रवीम्यहं, तत् केवलाम्बरतिरोधानमन्विष्यन्तो रत्नमेते द्रक्ष्यन्तीति, अतोऽन्वेषणं न क्षेममिति सञ्चिन्त्य तमखिलजगत्कारणभूतं नारायणमाहाक्रूरः,—भगवन्! ममैतत् स्यमन्तकमणिरत्नं शतधनुषा समर्पितम् ॥६०॥

अपगते च तस्मिन् अद्य श्वः परश्वो वा भगवान् मां याचिष्यतीति कृतमतिरतिकृच्छ्रेणैतावन्तं कालमधारयम्, अस्य च धारणक्लेशेनाहमशेष-भोगेष्वसङ्गिमानसो न वेद्मि स्वसुखकलामपि ॥६१॥

एतावन्मात्रमशेषराष्ट्रोपकारि धारयितुं शक्नोतीति मां भगवान् मंस्यत इत्यात्मना चोदितम् ॥६२॥

तदिदं स्यमन्तकरत्नं गृह्यताम्, इच्छया यस्यापि मतं तस्य समर्प्यताम्। ततः सोऽधरवस्त्र-निगोपितातिलघुकनकसमुद्गकं प्रकटीकृतवान्(य)।

ततश्च निष्क्राम्य स्यमन्तकमणिं तत्र यदुसभा-मुमोच। मुक्तमात्रे च तेनातिकान्त्या तदधिष्ठा-मास्थानमुद्द्योतितम् ॥६४॥

अथाहाक्रूरः,—स एष मणिर्यः शतधन्वनास्मभ्यं समर्पितः, यस्यायं, स एनं गृह्णात्विति। तत्र तं रत्नमालोक्य सर्व्वयादवानां साधु साध्विति विस्मितमनसां वाचोऽश्रूयन्त। तमालोक्य भगवान-मच्युतेनैव सामान्यः समन्विच्छित इति बलस्य सस्पृहोऽभवत्(र) ॥६५॥

यदर्थं यादवाः समाहृतास्तदुपन्यस्य युक्तमयुक्तं वेति पृष्ट्वा ॥५९॥

दानपते इति सम्बोधनं साक्रूतम् ॥६०॥

धारणाक्लेशेन क्लेशहेतुनियमेन। भोगेषु असङ्गि मानसं यस्य सोऽहं स्वसुखस्य कलां लेशमपि न वेद्मि ॥६१॥

तर्हि किमिति मयि नोक्तम्? तत्राह,—एतावन्मात्रं स्वल्पमपि अशेषराष्ट्रोपकारकमपि अयं धारयितुं न शक्नोतीत्यशक्तं मां भवान् मंस्यते इति भिया आत्मना मया तुभ्यं नोदितञ्च। अस्याशेषराष्ट्रेति पाठेऽस्य राज्ञ उग्रसेनस्येत्यर्थः ॥६२॥

कनकसमुद्गकं सुवर्णसंपुटकम् ॥६३॥

आस्थानं सभा ॥६४॥

मम बलभद्रस्यात्मना सह अयं मणिः साधारण इति अच्युतेन कृष्णेनैव समन्विच्छितः इति हेतोः सस्पृहोऽभवत्। इच्छेर्लिङ्धातोः क्तः ॥६५॥

(य) अधरवस्त्रम् अधोवसनं परिधानवास इति यावत्। निगोपितं प्रच्छादितम् अतिलघु अतिक्षुद्राकारम् कनकसमुद्गकं काञ्चनमयसम्पुटकम्।

(र) समन्विच्छित इत्यत्र समन्वीप्सित इति केचित् पठन्ति किन्तु श्रीधरेण 'समन्विच्छितम्' इत्यस्यैव व्याख्यानात्तस्य एव पाठो मूलेऽपि विन्यस्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ममैवेदं पितृधनमित्यतीव च सत्यभामापि स्पृहयाञ्चकार। बल-सत्याननावलोकनात् कृष्णोऽप्यात्मानं चक्रान्तरावस्थितमिव मेने ॥६६॥

सकलयादवसमक्षञ्चाक्रूरमाह,—एतद्धि मणिरत्नमात्मशोधनायैषां यदूनां दर्शितम्। एतच्च मम बलभद्रस्य च सामान्यं, पितृधनञ्चैतत् सत्यभामाया नान्यस्य ॥६७॥

एतच्च सर्व्वकालं शुचिना ब्रह्मचर्य्यगुणवता ध्रियमाणमशेषराष्ट्रस्योपकारकम्, अशुचिना ध्रियमाणमाधारमेव हन्ति ॥६८॥

अतोऽहमस्य षोड़शस्त्रीसहस्रपरिग्रहादसमर्थो धारणे ॥६९॥

कथञ्चैतत् सत्यभामा स्वीकरोतु? आर्य्येण बलभद्रेणापि मदिरापानाद्यशेषोपभोगपरित्यागः कथं कार्य्यः। तदयं यदुलोकोऽयं बलभद्रोऽहं सत्या च त्वां दानपते! प्रार्थयामः, एतद् भवानेव धारयितुं समर्थः, त्वत्स्थञ्चास्य राष्ट्रस्योपकारकं, तद्भवानशेषराष्ट्रोपकारनिमित्तमेतत् पूर्व्ववद् धारयतु। त्वयान्यथा न वक्तव्यमित्युक्ते दानपतिस्तथेत्युक्त्वा जग्राह तन्महामणिरत्नम्। ततः प्रभृति चाक्रूरः प्रकटेनैवातीव तेजसा जाज्वल्यमानेनात्मकण्ठासक्तेनादित्य इवांशुमाली चचार ॥७०॥

इत्येतां भगवतो मिथ्याभिशस्तिक्षालनां यः स्मरति, न तस्य कदाचिदल्पापि मिथ्याभिशस्तिर्भवति, अव्याहतेन्द्रियश्चाखिलपापमोक्षमवाप्नोति ॥७१॥

इति श्रीविष्णुपुराणे चतुर्थांशे त्रयोदशः अध्यायः ॥

चक्रयोरन्तरावस्थितमिव संशयितमात्मानं मेने। गोचक्रान्तरेति पाठे शकटचक्रबलीवर्द्दान्तर्गतमिवेत्यर्थः ॥६६॥

नान्यस्य एतत्त्रयमिन्नस्य ॥६७॥

ततः किमत आह—'एतदि'ति। आधारं धारकमेव हन्ति ॥६८॥

षोड़शस्त्रीसहस्रपरिग्रहादिति ब्रह्मचर्यं नैव घटत इति कल्पनार्थं हेतुः ॥६९॥

ततः प्रभृति प्रकटेनेति बलभद्रसत्यभामाद्यभ्यसूयाभावात्। भक्ते अक्रूरे भगवता स्थापितमिति लोकभयाच्च मणिं गुप्तं भगवदनुमतमेवाधारयत्। इदानीमभिशस्तिपरिहाराय स्वयमेव केवलं प्रकटीकृतमक्रूरो धृतवानित्यर्थः ॥७०॥

मिथ्याभिशस्तिक्षालनां मिथ्याभिशापनिवर्त्तनोपायभूतं हरिचरितं यः स्मरति। तस्य मिथ्याभिशापो न भवति। कृष्णेन स्वभक्ते मणिः स्थापित इति कृष्णाभियोगपरिहाराय पूर्वं गुप्तं दधार, अनेनैवाभिप्रायेण शतधन्वना मणौ समर्प्यमाणे यद्यन्तावस्थायामपि नान्यस्य कथयसि तर्ह्यादास्यामीत्युवाच। न तु सर्वज्ञकृष्णवञ्चनाय। यज्ञकवचधारणञ्च यादवभयादेव न तु कृष्णभयात्। अन्यथा मणिना सह सभाप्रवेशो न घटते। अतोऽक्रूरे महाभागवते मणिस्पृहादिकल्पनमतिमन्दमित्युपेक्षणीयमिति भावः ॥७१॥

इति श्रीधरस्वामिकतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थांशे त्रयोदशोऽध्यायः समाप्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्दशः अध्यायः

[अनमित्रान्धकयोर्वंशवर्णनम्]

पराशर उवाच ।

अनमित्रस्यानुजः शिनिर्नामाभवत् । तस्यापि सत्यकः, सत्यकात् सात्यकिर्युयुधाननामा, ततोऽप्यसङ्गः, तत्पुत्रश्च तूणिः, तूणेर्युगन्धर इति शैनेयाः ॥१॥

अनमित्रस्यैवान्वये पृश्निः, तस्माच्च श्वफल्कः । तत्प्रभावः कथित एव । श्वफल्कस्य कनीयांश्चित्रको नामाभवद् भ्राता, श्वफल्कादक्रूरो गान्दिन्यामभवत् । तथोपमद्गु-मृदर-विशारि-मेजय-गिरिक्षत्रोपक्षत्र-शत्रुघ्न-विमर्द्दन-धर्म्मधृग्दृष्टशर्म्म-गन्धमोजावाह-प्रतिवाहाख्याः पुत्राः सुताराख्या च कन्या । देववान् उपदेवश्च अक्रूरपुत्रौ । पृथु-विपृथुप्रमुखाश्चित्रकस्य पुत्रा बहवोऽभवन् ॥२॥

कुकुर-भजमान-शुचि-कम्बलबर्हिषाख्यास्तथान्धकस्य चत्वारः पुत्राः ॥३॥

कुकुराद् धृष्टः, तस्माच्च कपोतरोमा, तस्माद् विलोमा, तस्मादपि तुम्बुरुसखा भवसंज्ञकश्चन्दनोदकदुन्दुभिः । ततश्चाभिजित्, ततः पुनर्वसुः, तस्याप्याहुकः पुत्रः, आहुकी कन्याभूत् ॥४॥

आहुकस्य देवकोग्रसेनौ द्वौ पुत्रौ । देववानुपदेवसुदेवो देवरक्षितो देवकस्यापि चत्वारः पुत्राः तेषाञ्च वृकदेवा उपदेवा देवरक्षिता श्रीदेवाशान्तिदेवा सहदेवा देवकी च सप्त भगिन्यः । ताः सर्व्वा एव वसुदेवं उपयेमे । उग्रसेनस्यापि कंसन्यग्रोध-सुनाम-कङ्क-शङ्कु-सुभूमि-राष्ट्रपाल-युद्धमुष्टितुष्टिमत्संज्ञाः पुत्राः, कंसा कंसवती सुतनू राष्ट्रपाली कङ्की चोग्रसेनतनुजाः ॥५॥

चतुर्दशः अध्यायः

क्रमागता वृष्णिवंशाः शैनेयाद्याश्चतुर्दश । वर्ण्यन्ते शिशुपालस्य सायुज्यञ्चात्र सूच्यते । सत्वतस्य सप्तमः पुत्रो वृष्णिस्तत्पुत्रौ अनमित्र-शिनी । तत्रानमित्रस्य निघ्नतः तस्य प्रसेनसत्राजितावित्येको वंश उक्तः । तत्र प्रसङ्गागतस्यमन्तकोदाहरणमुक्तम्, इदानीमनमित्रानुजस्यान्यस्य शिनेर्वंश्याः शैनेयाः ॥१॥

पुनश्चानमित्रस्य वंशान्तरमाह—'अनमित्रस्यैत्यादि' 'बहवोऽभवन्नि'त्यन्तेन । चित्रकस्य श्वफल्कस्यानुजस्य प्रमुखाः पुत्राः ॥२॥

अन्धकस्य सात्वतपुत्रस्य कुकुरादयः पुत्राः ॥३॥

तत्र कुकुरस्य वंशमाह—'कुकुरा दित्यादिना 'तनुजा' इत्यन्तेन । भवसंज्ञस्यैव उपनाम दुन्दुभिरिति ॥४॥ तनुजाः कन्याः ॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भजमानाच्च विदूरथः पुत्रोऽभवत्। विदूरथात् शूरः, शूरात् शमी, शमिनः प्रतिक्षत्रः, तस्मात् स्वयम्भोजः, ततश्च हृदिकः ॥६॥

ततश्च कृतवर्म्मा, तस्मात् शतधनुर्देवमीढ़ुषाद्या बभूवुः ॥७॥

देवमीढ़ुषस्य शूरः, शूरस्यापि मारिषा नाम पत्न्यभवत् ॥८॥

अस्याञ्चासौ दश पुत्रानजनयद् वासुदेवपूर्व्वान्। वासुदेवस्य जातमात्रस्यैव एतद्गृहे भगवदंशावतारमव्याहतदृष्ट्या पश्यद्भिर्देवैर्दिव्या आनका दुन्दुभयश्च वादिताः (क) ॥९॥

ततस्तदेवानकदुन्दुभिसंज्ञामवाप। तस्यापि देवभाग-देवश्रवोऽनाधृष्टि-करुन्धक-वत्सबालक-सृञ्जय-श्याम-शमीक-गण्डूषसंज्ञा नव भ्रातरो बभूवुः, पृथा श्रुतदेवा श्रुतकीर्त्तिः श्रुतश्रवाः राजाधिदेवी च वसुदेवादीनां पञ्चभगिन्योऽभवन्। शूरस्य च कुन्तिभोजनामा सखाभवत्। तस्मै चापुत्राय पृथामात्मजां विधिना शूरोऽददात्। ताञ्च पाण्डुरुवाह। तस्याञ्च धर्म्मानिलशक्रैर्युधिष्ठिर-भीमार्ज्जुनाख्यास्त्रयः पुत्राः समुत्पादिताः। पूर्व्वमनूढ़ायाश्च भगवता भास्वता कर्णाख्यः कानीनः पुत्रोऽजन्यत(ख) ॥१०॥

तस्याश्च सपत्नी माद्री नामाभवत्। तस्याञ्च नासत्यदस्राभ्यां नकुल-सहदेवौ पाण्डोः पुत्रौ जनितौ। श्रुतदेवान्तु वृद्धशर्म्मा नाम कारूष उपयेमे। तस्यां दन्तवक्रो नाम महासुरो जज्ञे। श्रुतकीर्त्तिमपि कैकेयराज उपयेमे। तस्यां सन्तर्दनादयः पञ्च कैकेयाः पुत्रा बभूवुः। राजाधिदेव्यामावन्त्यौ विन्दानुविन्दौ जज्ञाते ॥११॥

श्रुतश्रवसमपि चेदिराजो दमघोषनामा उपयेमे। तस्यां शिशुपालमुत्पादयामास। स हि पूर्व्वमप्यनाचारविक्रमसम्पन्नो दैत्यादिपुरुषो हिरण्यकशिपुरभूत् ॥१२॥

यश्च भगवता सकललोकगुरुणा घातितः, पुनरप्यक्षतवीर्य्यशौर्य्यसम्पत्पराक्रमगुणः समाक्रान्तसकलत्रैलोक्येश्वरप्रभावो दशाननोऽभवत् ॥१३॥

भजमानस्य सात्वतपुत्रस्य कृमि-कृकण-वृष्ण्य इत्येको वंश उक्तः। इदानीं तस्यैव वंशान्तरमाह—'भजमानादित्यादिना' यावदध्यायसमाप्ति ॥६॥

हृदिकात् कृतवर्मशतधनुर्देवमीढ़ुषाद्याः पुत्रा बभूवुः। देववाहाद्या इति पाठे तु देवपदेन देवमीढ़ुष इत्येवोक्तः ॥७॥

देवमीढ़ुषस्य पुत्रो यः शूरस्तस्य मारिषा नाम पत्न्यभूदित्यर्थः ॥८॥

(क) भगवदंशावतारं भाविनमिति शेषः। अव्याहता भूतेषु भविष्यत्सु च निखिलेष्वेवार्थेषु अप्रतिबद्धा दर्शनक्रियासाधिका या दृष्टिस्तथा इत्यर्थः।

आनकाः पटहाः दुन्दुभयो भेर्य्यः ॥९॥

कानीनः कन्यकावस्थायां जातः ॥१०॥

अनाचारः स्वपुत्रादिद्वेषः, विक्रमः शौर्यं, ताभ्यां सम्पन्नः ॥१२

अक्षताः पूर्णा वीर्य्यादिगुणा यस्य सः। वीर्य्यं बलं, शौर्यमुत्साहः, पराक्रमः प्रभावः। समाक्रान्ताः त्रैलोक्येश्वरा येन तथाभूतः प्रभावो यस्य सः ॥१३॥

(ख) आनकदुन्दुभिसंज्ञामित्यादि—अत एव 'वसुदेवोऽस्य जनकः स एवानकदुन्दुभि' रिति कोषः। कानीन इति कन्यकावस्थायां जातः पुत्रः। 'कानीनः कन्यकासुत' इति कोषात्। कर्णाख्य इति तदानीं मातुः कुन्त्या अक्षतयोनितया कर्णरन्ध्रेण जातत्वात् तस्य कर्ण इति संज्ञा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३६४ विष्णुपुराणम् [चतुर्थांशे

बहुकालोपभुक्त-भगवत्सकाशादेवाप्त-शरीर-पातोद्भवपुण्यफलोऽथ भगवतैव राघवरूपिणा सोऽपि निधनमुपनीतः, पुनश्चेदिराज-दमघोषपुत्रः शिशुपालनामाभवत् ॥१४॥

शिशुपालत्वे च भगवतो भूभारावतारणायावतीर्णांशस्य पुण्डरीकनयनाख्यस्य उपरि द्वेषानुबन्धमतितरां चकार। भगवता च निधनमुपनीतस्तत्रैव परमात्मभूते मनसस्तदेकाग्रतया तत्रैव सायुज्यमवाप ॥१५॥

भगवान् हि प्रसन्नो यथाभिलषितं ददाति, अप्रसन्नोऽपि निघ्नन् दिव्यमनुपमं स्थानं प्रयच्छति ॥१६॥

इति श्रीविष्णुपुराणे चतुर्थांशे चतुर्दशः अध्यायः।

बहुकालमुपभुक्तं भगवत्सकाशादेवाप्तशरीरपातोद्भवपुण्यफलं येन सः ॥१४॥

अवान्तरान्वयात्तत्रशब्दस्य पुनरुक्तिर्न दोषाय ॥१५॥

भगवद्द्वेषादपि सायुज्यमुपपादयति 'भगवान्' इति। दिव्यत्वेऽप्यनुपमस्थानं तथा प्रयच्छतीति ॥१६॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे चतुर्दशोऽध्यायः

पञ्चदशोऽध्यायः।

[शिशुपालस्य पूर्व्व-पूर्व्वजन्मवृत्तान्तस्य वसुदेवस्य च सन्तानानां वर्णनम्।]

मैत्रेय उवाच।

हिरण्यकशिपुत्वे च रावणत्वे च विष्णुना।
अवाप निहतो भोगानप्राप्यानमरैरपि ॥
न लयं तत्र तेनैव निहतः स कथं पुनः।
सम्प्राप्तः शिशुपालत्वे सायुज्यं शाश्वते हरौ ॥

एतदिच्छाम्यहं श्रोतुं सर्व्वधर्म्मभृतां वर!
कौतूहलपरेणैतत् पृष्टो मे वक्तुमर्हसि ॥१॥

दैत्येश्वरस्य तु वधायाखिललोकोत्पत्तिस्थितिविनाशकारिणा पूर्व्वतनुं गृह्णता नृसिंहकमाविष्कृतम्। तत्र हिरण्यकशिपोर्व्विष्णुरयमिति न मनस्यभूत् ॥२॥

पञ्चदशः अध्यायः

हरेर्जनिः पञ्चदशे संख्यानुक्तिश्च यादवे। सायुज्यं शिशुपालस्य सोपपत्तिकमुच्यते। विष्णुनैव निहतत्वात् प्राग्जन्मन्येव किं न मुक्त इति। हिरण्यकशिपुत्व इत्यादिप्रश्नार्थः ॥१॥

वस्तुशक्त्या भगवन्नामकीर्त्तन-ध्यानादिना क्षीणकल्मषस्य तत्साक्षात्कारेणैवान्येषामपि मोक्षः। ततः शिशुपालत्वे च तत्सम्भवात् स मुक्तो नातः प्रागित्युत्तरार्थः। सनकादिग्रहात् तृतीयजन्मन्येवावश्यं भावित्वान्मोक्षस्य तत्रैव तस्य सम्भवमाह—'दैत्येश्वरस्ये'त्यादिना 'किमुत सम्यक् भक्तिमित्यन्तेन ॥२॥

(क) अमरैरपि देवैरपि अप्राप्यान्, का कथा परेषामिति शब्देन द्योत्यते। तेनैव भगवता विष्णुनैव, तत्र भगवति विष्णौ। कौतूहलपरेण मया पृष्टः, मे वक्तुमर्हसीति योजनयार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरतिशयपुण्यजातसम्भूतमेतत् सत्त्वमिति रजोद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात् ततोऽवाप्तवधहेतुकां निरतिशयामेवाखिलत्रैलोक्याधिक्यधारिणीं दशाननत्वे भोगसम्पदमवाप(ख) ॥३॥

नातस्तस्मिन्मनादिनिधने परब्रह्मभूते भगवत्यनालम्बनीकृते मनसस्तत्र लयम्(ग) ॥४॥

दशाननत्वेऽप्यनङ्गपराधीनतया जानकीसमासक्तचेतसो दाशरथिरूपधारिणस्तद्रूपदर्शनमेवासीत्, नायमच्युत इत्यासक्तिर्विपद्यतोऽन्तःकरणस्य मानुषबुद्धिरेव केवलमभूत्(घ) ॥५॥

पुनरच्युतविनिपातमात्रफलमखिल-भूमण्डलश्लाघ्यचेदिराजकुलजन्माव्याहतञ्चैश्वर्य्यं शिशुपालत्वे चावाप ॥६॥

तत्र त्वखिलान्येव भगवन्नामकारणान्यभवन्। ततश्च तत्कारणकृतानां तेषामशेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्द्धितविद्वेषानुबन्धिचित्तो विनिन्दन् सन्तर्ज्जनादिषु उच्चारणमकरोत् ॥७॥

तच्च रूपमुत्फुल्लपद्मदलामलाक्षमत्युज्ज्वलपीतवस्त्रधारि अमल-किरीट-केयूर-कटकोपशोभितमुदारपीवरचतुर्बाहु शङ्ख-चक्र-गदासिधरमतिप्रौढ़वैरानुभावादटन-भोजन-स्नानासन-शयनादिष्ववस्थान्तरेषु नैवापययावस्यात्मचेतसः(ङ) ॥८॥

ततस्तमेवाक्रोशेषूच्चारयन् तमेव हृदये धारयन्नात्मवधाय भगवदस्तचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परमब्रह्मस्वरूपमपगतरागद्वेषादिदोषं भगवन्तमद्राक्षीत् (च) तावच्च भगवच्चक्रेणाशु

रजोद्रेकेति सन्धिरार्षः। निरतिशयपुण्येत्यादिरूपा रजस उद्रेकेण प्रेरिता एकाग्रा तन्मात्रविषयिणी मतिर्यस्य सः। तद्भावनारूपात् योगात् ततोऽवाप्तवध एव हेतुर्यस्यां तामखिलत्रैलोक्यमध्ये आधिक्यधारिणीमतिशयितां भोगसम्पदमवापेत्यन्वयः ॥३॥

अतस्तस्मिन् मनसोऽनालम्बनीकृतेऽविषयीकृते परब्रह्मभूते तदा स्वयं सायुज्यं नावापेत्यनुषङ्गः ॥४॥

दशाननत्वेऽपि अस्य दाशरथिरूपदर्शनमेव पूर्वमासीत्। विपद्यमानस्य च तस्यान्तःकरणे मानुषबुद्धिरेवाभूत्। नायमच्युत इत्यासक्तिर्निश्चयोऽभूदित्यर्थः ॥५॥

अच्युतविनिपातनमात्रात् फलं श्रेष्ठं जन्म ऐश्वर्य्यञ्चाव्याहतं केवलमभूदिति ॥६॥

तदन्ते च मोक्षं सहेतुकमाह—'तत्र त्वि'त्यादिना 'लयमुपया'वित्यन्तेन। तत्र शिशुपालत्वे अच्युतनाम्नामुच्चारणमकरोदिति सम्बन्धः। किंविशिष्टानां—भगवन्नामकारणानि केशिकंसवधचक्रधारणादीनि यान्यभवन् तैः कारणैः प्रवृत्तिनिमित्तैः कृतानां संकेतितानां केशव-कंसध्वंसि-चक्रपाणिप्रभृतीनां सन्तर्जनं वाक्ताड़नं, तदनेन भगवन्नामकीर्त्तनावृत्तिरुक्ता ॥७॥

साकारध्याननिष्ठामाह—'तच्च रूपमि'ति। तद्रूपमटनादिषु आत्मनः शिशुपालस्य चेतसो नैवापययावित्यन्वयः। 'आत्मनो बुद्धेश्चेतसश्च नैवापययाविति चार्थः ॥८॥

ततश्च कीर्त्तनध्यानाभ्यां शुद्धान्तःकरणस्य मोक्षहेतुसाक्षात्कारमाह—'तत' इति। आक्रोशेष्वाद्येषूक्तिषु भगवता अस्तं क्षिप्तं यत् चक्रं तस्यांशुमालाभिरुज्ज्वलम् ॥९॥

(ख) तस्य भगवतो विष्णोः भावनायोगात् शत्रुरूपेण निरन्तरध्यानयोगात् ध्यानसम्बन्धात् ध्यानरूपाद्वा योगात्।

(ग) लयमित्यस्य अवापेति पूर्वेण सम्बन्धः।

(घ) विपद्यत इत्यार्षम्।

(ङ) उदारेत्यादिः उदाराः सुदीर्घाः पीवराः चत्वारः बाहव यत् तदिति रूपविशेषणम्। अथवा तादृशैः चतुर्भिः बाहुभिः शङ्खचक्रगदाधरमित्यर्थः। अतिप्रौढ़स्य अत्यर्थं वृद्धिं गतस्य वैरस्य शात्रवस्य अनुभावात् प्रभावात्; 'प्रवृद्धं प्रौढ़मेधित'मिति कोषात्, 'अनुभावः प्रभावे स्यात् सताञ्च मतिनिश्चये' इति कोषाच्च।

(च) आक्रोशेषु आद्येषूक्तिष्विति श्रीधरः। आद्येषूक्तिः कुत्सावचनम् 'अवर्णाद्येषनिर्वादपरीवादापवादवत्। उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे' इति कोषात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यापादितः। तेन तत्स्मरणदग्धाखिलाघसञ्चयो भगवतैवान्तमुपनीतस्तस्मिन्नेव लयमुपययौ ॥९॥

एतत् तवाखिलं मयाभिहितम्। भगवानिह कीर्त्तितः संस्मृतश्च द्वेषानुबन्धेनाप्यखिलसुरासुरादि-दुर्लभं फलं प्रयच्छति किमुत सम्यग् भक्ति-मताम्(छ) ॥१०॥

वसुदेवस्यानकदुन्दुभेः पौरवी-रोहिणी-मदिरा-भद्रा-देवकी-प्रमुखा बह्व्यः पत्न्योऽभवन्

बलभद्र-शारण-शठ-दुर्म्मदादीन् पुत्रान् रोहिण्या-मानकदुन्दुभिरुत्पादयामास। बलभद्रोऽपि रेवत्यां निशठोल्मुकौ पुत्रावजनयत्। मार्ष्टि-मार्षिम-च्छिशि-शिशु-सत्यधृतिप्रमुखाः शारणास्यात्मजाः ॥११॥

भद्राश्व-भद्रबाहु-दुर्द्दम-भूताद्या रोहिण्याः कुलजा ॥१२॥

नन्दोपनन्दकृतकाद्या मदिरायास्तनयाः भद्रायाश्चोपनिधि-गदाद्याः। वैशाल्यां च कौशिकमेकमजनयदानकदुन्दुभिः। देवक्यामपि कीर्त्तिमत्सुषेणोदापि-भद्रसेन-ऋजुदास-भद्रदेहाख्याः षट् पुत्रा जज्ञिरे। तांश्च सर्व्वानेव कंसो घातितवान् ॥१३॥

अनन्तरञ्च सप्तमं गर्भमर्द्धरात्रे भगवत्प्रहिता योगनिद्रा रोहिण्या जठरमपकृष्य नीतवती ॥१४॥

कर्षणाच्चासावपि सङ्कर्षणाख्यमवाप ॥१५॥

शिशुपालमुक्तिं निगमयति—'एतदि'ति। सुरादिदुर्लभं फलं मुक्तिरूपम् ॥१०॥

शिशुपालजन्मप्रसङ्गागतं समाप्य प्रकृतवंशमाह—'वसुदेवस्ये'ति। पौरवी पुरुवंशोद्भवेति रोहिण्या विशेषणम्। अत एव पौरव्या न पृथग्वंशकीर्त्तनम् ॥११॥

रोहिण्याः प्राधान्येन बलभद्रादीन् वंशानुक्त्वा अन्यानपि वंशानाह—'भद्राश्वे'ति। आद्यशब्देन पिण्डारकोषीनरयो-र्ग्रहणम्। अत्र पौरव्या इति पाठेऽपि रोहिणीनाम्ना इत्यर्थः। एतेषामेव रोहिण्यास्तनया दशेति हरिवंशे ग्रहणात्। कुलजा वंशाः ॥१२॥

कीर्त्तिमदादीनां प्राग्जन्मसंज्ञयैव कीर्त्तनमकृतनाम्नां तेषां कंसेन हननात् ॥१३॥

रोहिण्यास्तनयस्य सतो देवकीपुत्रत्वं बलदेवं समर्थयितुमाह — 'अनन्तरञ्चे'ति। देवकीजठरादाकृ रोहिणीजठरं नीतवती ॥१४॥

अनेनोपाधिना संकर्षणसंज्ञां निर्वक्ति—'कर्षणाच्चे' ॥१५॥

(छ) तस्य तथाविधस्य परमब्रह्मस्वरूपस्य भगवतो विष्णोः स्मरणेत दग्धः सबीजं विनाशितः अखिलः निःशेषः अघसञ्चयः पापसमूहः यस्य तथाभूतः। द्वेषानुबन्धेनापि द्वेषस्यानुवृत्त्यापि न केवलं मैत्रानुबन्धेनैवेत्यपिशब्दार्थः।

(ज) भगवता विष्णुना प्रहिता प्रेरिता।

अपकृष्य आकृष्य देवक्या उदरादिति शेषः; सप्तमं देवक्या इति शेषः। रोहिण्या जठरं नीतवतीति सम्बन्धः।

(झ) कर्षणात् आकर्षणात् असावपि बलदेवः सङ्कर्षणसङ्कर्षणसंज्ञाम् अवाप। अत एव बलदेवपर्य्याये 'सङ्कर्षणः पाणिः कालिन्दीभेदनो बल' इति कोषकारः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः सकलजगन्महातरुमूलभूतो भूतातीत-भविष्यदादिसकल-सुरासुर-मुनि-मनुज-मनसा-मप्यगोचरोऽज्जभवप्रमुखैरनलप्रमुखैश्च प्रणम्यावनि-भारावतारणाय प्रसादितो भगवाननादिमध्यो देवकीगर्भे समवततार वासुदेवः(अ) ॥१६॥

तत्प्रसादविवर्द्धितमानाभिमाना च योगनिद्रा नन्दगोपपत्न्या यशोदाया गर्भमधिष्ठितवती ॥१७॥

सुप्रसन्नादित्यचन्द्रादिग्रहमव्यालादिभयं सुस्थमानस-मखिलमेवैतज्जगदपास्ताधर्म्ममभवत् तस्मिंश्च पुण्डरी-कनयने जायमाने(ट) ॥१८॥

जातेन च तेनाखिलमेवैतत् सन्मार्गवर्त्ति जग-दक्रियत। भगवतोऽप्यत्र मर्त्यलोकेऽवतीर्णस्य षोड़शसहस्राण्येकोत्तरशताधिकानि स्त्रीणामभवन्। तासाञ्च रुक्मिणी-सत्यभामा-जाम्बवती-जालहासिनी-प्रमुखा अष्टौ पत्न्यः प्रधानाः। तासु चाष्टायुतानि लक्षञ्च पुत्राणां भगवानखिलमुर्त्तिरनादिमानजनयत् (ठ)॥१९॥

तेषाञ्च प्रद्युम्न-चारुदेष्ण-साम्बादयस्त्रयोदश प्रधानाः। प्रद्युम्नो हि रुक्मिणस्तनयां ककुद्वतीं नामोपयेमे। तस्यामस्यानिरुद्धो जज्ञे। अनिरुद्धो-ऽपि रुक्मिण एव पौत्रीं सुभद्रां नामोपयेमे। तस्यामस्य वज्रोऽभवत्। वज्रस्य प्रतिबाहुः, तस्यापि सुचारुः। एवमनेकशतसाहस्रपुरुषसङ्कस्य यदुकुलस्य पुरुषसंख्या वर्षशतैरपि ज्ञातुं न शक्यते। यतो हि श्लोकावत्र चरितार्थौ ॥२०॥

सकलं जगदेव महातरुस्तस्य मूलभूतः भूता वर्त्तमानाः अतीताश्च भविष्यन्तश्च आदिशब्दात् तत्तल्लोकवर्त्तिनो महान्तश्च सकला ये सुरासुरादयस्तेषां मनसामप्यगोचरः। अज्जभवो ब्रह्मा तत्प्रमुखैरीश्वरावताररूपैः अनलप्रमुखैः देवैश्च प्रसादितो वासुदेवो देवकीगर्भे समवततार इत्यन्वयः ॥१६॥

मानः सम्मानः, अभिमानो महिमा। तत्प्रसादेन वर्द्धितौ तौ यस्याः सा योगनिद्रा यशोदागर्भमधिष्ठितवती प्राप्ता ॥१७॥

तस्मिन् जायमाने सुप्रसन्नादित्यचन्द्रादिग्रहमित्यादि—विशेषणेन विशिष्टं जगदभवदित्यन्वयः ॥१८॥

आसु सर्वासु अष्टायुतानि लक्षश्चेति। एतेन रुक्मिण्या-दीनामष्टपत्नीनां दश दश पुत्रा ज्ञेयाः। अन्यासां यथा-सम्भवं पुत्रा ज्ञेयाः। अनादिमानादिमद्भिन्नः ॥१९॥

चरितार्थौ यथार्थौ ॥२०॥

(अ) न विद्यते आदिः मध्यश्च यस्य सः अनादिमध्यः। आदिमध्यपदे अन्तमप्युपलक्षयत इति केचित्। तेन अनादि-मध्यान्त इत्यर्थः। अतएवोक्तं श्रीमद्भगवद्गीतायाम् 'अनादिमध्यान्तमनन्तवीर्य्य' मिति।

(ट) सुप्रसन्नाः विशदप्रकाशाः आदित्यचन्द्रादयो ग्रहाः यत्र तथाभूतम्। न विद्यते व्यालादिभ्यः सर्पवृश्चिक-प्रभृतिदुष्ट-प्राणिभ्यो भयं यत्र तथाभूतमित्यर्थः, 'आशीविषो विषधरश्चक्री व्यालः सरीसृप' इति कोषात्। अपास्ता अपसारिता भगवतै-वेति शेषः, अधर्माः अनिष्टसाधकानि कर्माणि तज्जन्यदुरदृष्टानि वा यस्मात्। अपास्ता अपगता इति वा।

(ठ) न आदिमान् अनादिमान् अनुत्पादधर्मा, तस्य नित्यस्वरूपत्वात्। पदे पदे शास्त्रकृद्भिस्तस्य तथात्वस्योपपत्ति-पूर्वकमुपन्यासात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च ।
कुमाराणां गृहाचार्य्याश्चापयोग्यासु ये रताः ॥२१॥

सङ्ख्यानं यादवानां कः करिष्यति महात्मनाम् ।
यत्रायुतानामयुतं लक्षेणास्ते शताधिकम् ॥२२॥

देवासुरहता ये तु दैतेयाः सुमहाबलाः ।
ते चोत्पन्ना मनुष्येषु जनोपद्रवकारिणः(ड) ॥२३॥

तेषामुत्सादनार्थाय भुवि देवो यदोः कुले ।
अवतीर्णः कुलशतं यत्रैकाभ्यधिकं द्विज(ढ) ॥२४॥

विष्णुस्तेषां प्रमाणे च प्रभुत्वे च व्यवस्थितः ।
निदेशस्थायिनस्तस्य बभूवुः सर्व्वयादवाः ॥२५॥

प्रसूतिं वृष्णिवीराणां यः शृणोति नरः सदा ।
स सर्व्वपातकैर्मुक्तो विष्णुलोकं प्रपद्यते ॥२६॥

इति श्रीविष्णुपुराणे चतुर्थांशे पञ्चदशः अध्यायः ॥

अष्टाशीतिलक्षाधिककोटित्रयपरिमिताश्चापयोग्यासु चापशिक्षासु गृहस्थिता आचार्याः शिक्षकाः । एक आचार्यो बहून् पाठयतीत्यतः शिष्या अधिकाः कृतविद्याः बालाश्च ततोऽधिका इत्यतो यादवा असंख्याता इत्यर्थः ॥२१॥

यत्र यदुकुले संख्यानम् अयुतानां लक्षेण सहायुतं दशोत्तरं शतकोटि तदपि शताधिकम् आस्ते । सदाहुक इति पाठे आहुक उग्रसेनपिता अयुतानामयुतश्च तेन दशोत्तरकोटिमितेन विशिष्ट आस्त इत्यर्थः ॥२२॥

यादवानामसंख्यत्वे दुर्जयत्वे च हेतुमाह—'देवासुरे'ति । देवासुरसंग्रामे देवैर्हता इत्यर्थः ॥२३॥

एकाभ्यधिकं कुलशतं वृष्णिमधुसात्वतेत्यादिभेदेन ॥२४॥

प्रमाणे कार्याकार्यनियमे प्रभुत्वे पालकत्वे च निदेशस्थायिनः वचनस्था बभूवुः । ववृधुरिति पाठे पुत्रपौत्रैः वृद्धिं प्राप्ता इत्यर्थः ॥२५॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे पञ्चदशोऽध्यायः ॥

(ड) देवासुरहता इत्यत्र देवासुरपदं लक्षणया देवासुरसंग्रामपरम् । अतएव 'देवासुरेति—देवासुरसंग्रामे देवैर्हता इत्यर्थ' इत्येवमर्थविवरणं कृतं श्रीधरेण, यथाश्रुते असुराणां असुरहतत्वानुपपत्तेः ।

केचित्तु देवासुरपदे लक्षणामनङ्गीकृत्य दैतेयपदं देवानामप्युपलक्षकमित्याहुः । तन्न युक्तम्, देवानां प्रकृतश्लोकोत्तरार्द्धे जनोपद्रवकारित्वोक्तेरनुपपत्तिदुर्घटत्वात् ।

(ढ) तेषां जनोपद्रवकारिणां दैतेयानाम् उत्सादनार्थाय निःशेषविनाशनरूपप्रयोजनाय । देवः विष्णुः । यत्र यदुकुले ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षोड़शः अध्यायः

[तुर्व्वसुवंशकथनम्]

पराशर उवाच ।

इत्येष समासतस्ते कथितः, तुर्व्वसोर्वंशमवधारय ॥१

तुर्व्वसोर्वह्निरात्मजः, वह्नेर्गोभानुः, ततश्च त्रैशाम्बः, तस्माच्च करन्धमः, तस्मादपि मरुत्तः, सोऽनपत्योऽभवत् । ततश्च पौरवं दुष्मन्तं पुत्रमकल्पयत् । एवं ययातिशापात् तद्वंशः पौरवं वंशमाश्रितवान् ॥२॥

इति श्रीविष्णुपुराणे चतुर्थांशे षोड़शः अध्यायः ॥

षोड़शः अध्यायः

षोड़शे तुर्वसोर्वंशो मरुत्तान्तोऽनुवर्ण्यते । ययातिशापाद् दुष्मन्तं पौरवं यः समास्थितः । एष यदोर्वंशः ॥१

एवं यदुवंशं सविस्तरमभिधाय तदनुजस्य तुर्वसोर्वंशमाह,—'तुर्वसो'रिति यावत्समाप्ति । ययातिशापादिति,—अत्र यद्यपि राज्यानर्हत्वरूप एव शापः प्रतीयते, तथापि तुर्वसुं प्रति विशिष्य सन्तत्युच्छेदलक्षणः शापोऽपीत्येव ज्ञायते ॥२॥

इति श्रीधरस्वामिकृतायां स्वप्रकशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे षोड़शोऽध्यायः ॥

(क) समासतः—संक्षेपतः ।

(ख) ययातेः तत्प्रार्थनायाः प्रत्याख्यानेन क्रुद्धात् तदाख्यस्य पितुः शापात् । तस्य तुर्वसोः वंशः, पौरवं पूरुणा पितृप्रार्थितकारिणा पित्रनुगृहीतेन तदाख्येन ययातिपुत्रेण प्रवर्त्तितं वंशम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तदशः अध्यायः

[द्रुह्यु वंशविवरणम्]

पराशर उवाच ।

द्रुह्योस्तु तनयो बभ्रुः ॥१॥

ततः सेतुः, सेतुपुत्र आरद्धान् नाम, तदात्मजो गान्धारः, ततो धर्म्मः, धर्म्माद् धृतः, धृताद् दुर्गमः, ततः प्रचेताः, प्रचेतसः पुत्रशतमधर्म्मबहुलानां म्लेच्छानामुदीच्यादीनामाधिपत्यमकरोत् ॥२॥

इति श्रीविष्णुपुराणे चतुर्थांशे सप्तदशः अध्यायः।

सप्तदशः अध्यायः

द्रुह्योः सप्तदशे वंशः संक्षेपादनुवर्ण्यते। म्लेच्छानां य उदीच्यानामाधिपत्यमथाकरोत्। ज्येष्ठानुक्रमवशात् तुर्वसु-कनिष्ठस्य शर्मिष्ठापुत्रस्य द्रुह्योर्वंशमाह—'द्रुह्योरि'ति ॥१॥

म्लेच्छानामिति म्लेच्छाधिपत्यकथनात् ययातिशा-परिणामो म्लेच्छभावः सूचितः ॥२॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशायायां वा श्रीविष्णुपुराणटीकयां चतुर्थांशे सप्तदशोऽध्यायः।

(क) अधर्मः वेदस्मृत्यादिविरुद्धं कर्म तद्बहुलानाम् बाहुल्येन तदनुष्ठानपरायणानाम्। उदीच्यादीनामित्यादिपदेन प्रतीच्यादिपरि-ग्रहः, ययातिना प्रतीच्यां द्रुह्योर्नियोगस्य 'प्रतीचाञ्च तथा द्रुह्यु'-मित्यनेन पूर्वमत्रैवांशे दशमाध्याये वर्णनात्। उदीच्यानां म्लेच्छानामाधिपत्यमपि ये उदीचीभवा म्लेच्छाः कारणान्तरेण प्रतीच्यामायाताः, तेषामाधिपत्यमुपादाय कथञ्चिदुपपादनीयमिति दिक्। न च 'प्रतीच्यञ्च तथा द्रह्यु'मित्युक्त्या प्रतीच्येष्वेव द्रह्योः मुख्याधिपत्यस्य प्रतिपादनात् अत्र मुख्यतया शब्दतः प्रतीच्यानामादिशब्देन च गौणतयैव उदीच्यानां निर्देशस्योचित्य किमिति 'प्रतीच्यादीनामित्यनुक्त्वा उदीच्यादीनामित्युक्त्वा वाच्यम्। सत्यम्, किन्तु यदि प्रतीच्यादीनामित्युक्त्वा आदि उदीच्यानामुपग्रहः क्रियते तदा आदिशब्दार्थे प्रकृते विकल्पः क्रियते भवितुमर्हति। आदिशब्देन प्रतीच्यानामुपादाने विकल्पसम्भावना, तेषां 'प्रतीच्याञ्च तथा द्रुह्यु'मित्यादिना ग्रन्थेनैव तदधिकृतत्वस्य परिप्राप्तेरिति ध्येयम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टादशोऽध्यायः

(ययातिपुत्रस्यानोर्वंशवर्णनम्)

पराशर उवाच ।

ययातेश्चतुर्थस्य पुत्रस्य अनोः सभानर-चाक्षुष-परमेक्षुसंज्ञास्त्रयः पुत्रा बभूवुः ; सभानरपुत्रः कालानरः, कालानरात् सृञ्जयः, सृञ्जयात् पुरञ्जयः, तस्माज्जनमेजयः, ततो महामणिः, तस्माच्च महामनाः, तस्मादप्युशीनर-तितिक्षू द्वौ पुत्रावुत्पन्नौ । उशीनरस्यापि शिवि-नृग-नर-कृमि-खर्व्वाख्याः पञ्च पुत्रा बभूवुः । वृषदर्भ-सुवीर-केकय-मद्रकाश्चत्वारः शिविपुत्राः, तितिक्षोरुषद्रथः पुत्रोऽभूत् । ततो हेमः, हेमात् सुतपाः, तस्माद् बलिः, यस्य क्षेत्रे दीर्घतमसा अङ्ग-वङ्ग-कलिङ्ग-सुह्म-पुण्ड्राख्यं बालेयं क्षत्रमजन्यत ॥१॥

तन्नामसन्ततिसंज्ञाश्च पञ्च विषया बभूवुः ॥२॥

अङ्गसुतः पारः, ततो दिविरथः, तस्माद् धर्म्मरथः, ततश्चित्ररथः । रोमपादसंज्ञो यस्य पुत्रो दशरथो जज्ञे । यस्मै अजपुत्रो दशरथः शान्तां नाम कन्यामनपत्याय दुहितृत्वे युयोज(क) ॥७॥

रोमपादाच्च तुरङ्गः, तस्माच्च पृथुलाक्षः, ततश्चम्पः । यश्चम्पां निवेशयामास ॥४॥

चम्पस्य हर्य्यङ्गः, ततो भद्ररथो बृहद्रथो बृहत्-कर्म्मा च । बृहत्कर्म्मणश्च बृहद्भानुः, तस्माद् बृहन्मनाः, ततो जयद्रथः, जयद्रथस्तु ब्रह्मक्षत्रान्तरालसम्भूत्यां पत्न्यां विजयं नाम पुत्रमजीजनत् ॥५॥

अष्टादशः अध्यायः

अष्टादशेऽनुजस्यानोर्वंशः समनुवर्णितः । प्रातिलोम्यात् समुत्पत्तेर्योऽसौ सूतत्वामागतः । बलेः क्षेत्रे भार्य्यायां जातत्वाद् बालेयम् ॥१॥

तन्नामेति—तेषामङ्गादीनां नामानि यासां सन्ततीनां तासां संज्ञा येषां ते विषया देशा बभूवुः ॥२॥

ततश्चित्ररथ इति,—यस्य पुत्रो रोमपादसंज्ञो दशरथो जज्ञे, यस्मै अजपुत्रो दशरथः स्वकन्यां दुहितृत्वे युयोज दत्तवानित्यर्थः ॥३॥ चम्पां पुरीम् ॥४॥

प्रातिलोम्येन ब्रह्मक्षत्रयोरन्तराले सङ्करे सम्भूतिर्जन्म यस्यास्तस्यां सूतायामित्यर्थः । "ब्राह्मण्यां क्षत्रियाज्जातः सूतः" इति स्मृतेः, अतो 'मातृवद्वर्णसंकरा' इति वचनाद् विजयः सूत एव, अतश्च कर्णोऽपि तद्वंश्यत्वात् सूतत्वेन ख्यातः ॥५॥

(क) 'शान्त' नाम कन्यामित्यादि,—अत एव श्रीकण्ठः कविरुत्तररामचरिते—'कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् । अपत्यकृतिकां राज्ञे रोमपादाय यां ददा'विति प्राह । रोमपादस्यापि नाम दशरथेति, अत एवास्य अजपुत्रेण दशरथेन सह समाननामधारित्वादतिमैत्री समजायतेति मन्यते, यया स्वयमनपत्योऽप्यजतनूजो दशरथः शान्तां नाम कन्यामनपत्याय स्वामित्राय रोमपादाय कृतकपुत्रीत्वेन प्रददे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३७२ विष्णुपुराणम् [चतुर्थांश

विजयश्च धृतिं पुत्रमवाप। तस्यापि वृतव्रतः पुत्रोऽभूत्। धृतव्रतात् सत्यकर्म्मा, सत्यकर्म्मणस्त्वधिरथः। योऽसौ गङ्गां गतो मञ्जूषागतं पृथापविद्धं कर्णं पुत्रमवाप ॥६॥

कर्णाद् वृषसेन इत्येते अङ्गाः ॥७॥

अतश्च पुरोर्व्वंशं श्रोतुमर्हसीति ॥८॥

इति श्रीविष्णुपुराणे चतुर्थांशे अष्टादशः अध्यायः ॥

मञ्जूषागतं काष्ठपिञ्जरस्थं, पृथया कुन्त्या अपविद्धं कन्यावस्थायां जातत्वात् लज्जया परित्यक्तं कर्णं पुत्रमवाप। "मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा। यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते" इति स्मृतेः ॥६॥

इत्येते अङ्गाः अङ्गवंश्याः ॥७॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाभिधायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे अष्टादशोऽध्यायः।

(ख) अत्र 'कर्णोऽपि तद्वंश्यत्वात् सूतत्वेन ख्यात' इति श्रीधरः। तद्वंश्यत्वात् ब्राह्मण्यां क्षत्रियाज्जातस्य विजयस्य वंशे जातेन अधिरथेन पुत्रत्वेन परिग्रहणात्। सूतत्वेन सूतजातीयत्वेन ख्यातः। अत एव 'सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहं'मित्यादिका वेणीसंहारनाटकादिषु कर्णोक्तिः सङ्गच्छते।

एकोनविंशः अध्यायः

[पुरुवंशकथनम्।]

पराशर उवाच।

पुरोर्जनमेजयः पुत्रस्तस्यापि प्रचिन्वान्, प्रचिन्वतः प्रवीरः, तस्मान्मनस्युः, मनस्योश्चाभयदस्तस्यापि सुद्युम्नः, ततो बहुगवः, तस्य सम्पातिः, सम्पातेरहम्पातिस्ततो रौद्राश्वः। ऋतेयु-कृतेयु-कक्षेयु-स्थण्डिलेयु-धृतेयु-स्थलेयु-सन्ततेयु-धनेयु-वनेयुनामानो रौद्राश्वस्य दशात्मजा बभूवुः ॥१॥

ऋतेयो रन्तिनारः पुत्रोऽभूत्। तंसुमप्रतिरथं ध्रुवञ्च रन्तिनारः पुत्रानवाप। अप्रतिरथात् कण्वस्तस्यापि मेधातिथिः, यतः काण्वायना द्विजा बभूवुः। तंसोरैनिलः, ततो दुष्मन्ताद्याश्चत्वारः पुत्रा बभूवुः, दुष्मन्ताच्चक्रवर्त्ती भरतोऽभवत्, यन्नामहेतुर्देवैः श्लोको गीयते ॥२॥

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्मन्त मावमंस्थाः शकुन्तलाम् ॥३॥

एकोनविंशः अध्यायः

ऊनविंशे क्रमप्राप्तः पुरोर्वंशो निरूप्यते। दुष्मन्ताद् यत्र भरतो यन्नाम्ना भारतास्त्विमे। ऋतेयुरित्यादिशब्दाः प्रथमैकवचनान्तानुकरणान्येतानि नामानि येषामात्मजानां ते इत्येते रौद्राश्वास्यात्मजा इति पाठः सुगमः ॥१॥

दुष्मन्तो मृगयार्थमरण्यं गतो विश्वामित्रान्मेनकायां जातां शकुन्तलां नाम कन्यां कण्वाश्रमे दृष्ट्वा गान्धर्वेण विवाहेन संगम्य गर्भमाधाय स्वपुरं गतः सर्वं विस्मारं [illegible] ॥३॥

याञ्च जातपुत्रां कण्वप्रहितेन शिष्येणानीतां स्मृत्वा लोकापवादभयादस्वीकुर्वन्तं दुष्मन्तं प्रति देवैर्गीतोऽयं श्लोकः 'माते'ति। भस्त्रा चर्मपुटकं, तत्स्थानीया माता वीर्य्याधारत्वात् मात्रं, किन्तु पितुर्निषेक्तुरेव पुत्रः। किञ्च येन पित्रा जातः जनितः स एव पुत्रः तदंशभूतवीर्य्योपादानत्वात् 'आत्मा वै जायते पुत्र' इति वचनाच्च। अतः पुत्रं भरस्व विभृहि शकुन्तलाञ्च निर्दोषां मावमंस्था इति भरतनामनिरुक्तिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेतोधाः पुत्र उन्नयति नरदेव ! यमक्षयात् ।
त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥४॥

भरतस्य च पत्नीनां ये नव पुत्रा बभूवुः, नैते ममानुरूपाः पुत्रा इत्यभिहितास्तन्मातरो जघ्नुः परित्यागभयात् ॥५॥

ततोऽस्य पुत्रजन्मनि वितथे पुत्रार्थिनो मरुत्स्तोमयाजिनो(ख) दीर्घतमसा पार्ष्ण्यपास्तबृहस्पतिवीर्य्यादुतथ्यपत्नी-ममतासमुत्पन्नो भरद्वाजाख्यः पुत्रो मरुद्भिर्दत्तः । तस्यापि नामनिर्व्वचनश्लोकः पठ्यते ॥६॥

मूढ़े ! भर द्वाजमिमं भर द्वाजं बृहस्पते !
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम्(ग)॥७॥ इति ।

भरद्वाजश्च तस्य वितथे पुत्रजन्मनि मरुद्भिर्दत्तः, ततो वितथसंज्ञामवाप ॥८॥

किञ्च रेतोधाः रेतसा धीयते विधीयते रेतोधाः कर्मण्यसुन् । औरसः पुत्रोऽयमक्षयात् नरकात् तत्रस्थं पितरम् उन्नयति ऊर्द्ध्वं स्वर्गं नयति । यद्वा रेतोधाः रेतःसेक्ता तं पुत्रम् उन्नयति । ततः किम्, अत आह,—त्वं त्वस्य भरतस्य रेतोधाः रेतसेक्ता इति सत्यमेवाह, अतो भरस्वेत्यर्थः । नामनिरुक्तिरूपैककार्य्यपरत्वात् श्लोक इत्येकवचनमविरुद्धम् ॥४॥

नैते पुत्रा ममानुरूपा मत्सदृशा भवन्तीति भरतेनोक्तास्तेषां मातरोऽसत्पुत्रमातृत्वेन वेणमातरमङ्ग इवास्मान् परित्यज्य वनं यास्यतीति परित्यागभयात् तान् पुत्रान् जघ्नुः घातितवत्यः ॥५॥

वितथे व्यर्थे सति । दीर्घतमसेति,—अत्रेयं कथा,—बृहस्पतेरग्रजस्य उतथ्यस्य ममताख्यायां भार्यायां बृहस्पतिः कामाभिभूतो रेतोऽसृजत् । तच्च गर्भं प्रविशद् गर्भस्थितेन स्थानसंकोचभयात् पार्ष्ण्याघातेनापास्तं बहिःपातितमपि अमोघवीर्य्यतया भरद्वाजनामा पुत्रोऽभवत् । गर्भस्थश्च बृहस्पतिना शप्तोऽन्धो दीर्घतमा नाम्नाभवत् । स भरद्वाजो देवैर्दत्तः । तत्र च भरद्वाजनामनिरुक्तिपरस्तन्मातापित्रोर्विवादरूपः श्लोको देवैः पठितः ॥६॥

मूढे ! ममते ! द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्रं भर पुषाण, एवं ब्रुवन्तं बृहस्पतिं ममताह,—हे बृहस्पते ! त्वमेवेमं द्वाजं भर इति परस्परमुक्त्वा परित्यज्य पितरौ ममता-बृहस्पती यत् यस्मात् यातौ, ततः भरद्वाजशब्दोक्तेर्भरद्वाजसंज्ञोऽभूदित्यर्थः । 'यातौ यद्दुःखा'दिति पाठे विवदमानावित्यध्याहार्य्यम् ॥७॥

(क) शकुन्तलाम् अस्य पुत्रस्य मातरम् तदाख्यां तवैव पत्नीं गान्धर्वेण विवाहविधिना परिणीतामित्यर्थः । मा अवमंस्थाः साधारणमहिलावत् न अवहेलयेथाः, तत्मामस्य पुत्रस्य जातत्वात् त्वयापि च शास्त्रानुसारेण परिग्रहीतत्वादिति भावः ।

(ख) मरुतां देवानां स्तोमः समूहः तद्याजिनः तमुद्दिश्य यजनशीलस्य अस्य भरतस्य, 'देवैर्दत्त' इति श्रीधरव्याख्यानात् ।

(ग) 'मूढ़े' इत्यादिश्लोकपूर्वार्द्धः ममतां प्रति बृहस्पतेः, बृहस्पतिं प्रति च ममताया उक्ती । बृहस्पतिः ममतां प्रत्याह,—मूढ़े ! आवयोः क एनं पुत्रं पालयिष्यतीति ज्ञानाभावदुष्टे ! ममते ! द्वाजम् त्वया मया च द्वाभ्यां जनितम् इमं पुत्रं । द्विजमित्यत्र द्वाजमित्यार्षम् । भर तव पुत्रत्वेन त्वयास्य भरणीयत्वादिति भावः । ममता तदनन्तरं बृहस्तिमाह,—हे बृहस्पते ! द्वाजम् इमं त्वं भर । अयमभिसन्धिः,—देवगुरुस्त्वं बृहतां महतां पतिरसि, एष यथा मम पुत्रस्तथा तवापि, विशेषस्त्वेषः 'पितुः पुत्रो येन जातः स एव सः' इति । अतः त्वमेवेमं बृभूहि इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३७४ विष्णुपुराणम् [चतुर्थांश

वितथस्य भवन्मन्युः पुत्रोऽभूत्। बृहत्क्षत्र-महावीर्य्य-नर-गर्गाद्या भवन्मन्युपुत्राः। नरस्य संकृतिः, संकृतेः रुचिरधी-रन्तिदेवौ। गर्गाच्छिनिस्ततो गार्ग्याः शैन्याः क्षत्रोपेता द्विजातयो बभूवुः ॥९॥

महावीर्य्यादुरुक्षयो नाम पुत्रोऽभूत्। तस्य त्रय्यारुण-पुष्करिण्यौ कपिलश्च पुत्रत्रयमभूत्। तच्च त्रितयमपि पश्चाद् विप्रतामुपजगाम। बृहत्क्षत्रस्य सुहोत्रः, सुहोत्राद् हस्ती, य इदं हस्तिनापुरमारोपयामास। अजमीढ़-द्विमीढ़-पुरुमीढ़ाख्यो हस्तिनस्तनयाः, अजमीढ़ात् कण्वः, कण्वाद् मेधातिथिः, यतः काण्वायना द्विजाः ॥१०॥

अजमीढ़स्यान्यः पुत्रो बृददिषुः, बृहदिषोर्बृहद्वसुः, ततश्च बृहत्कर्म्मा, तस्माज्जयद्रथः। ततोऽपि विश्वजित्, ततश्च सेनजित्। रुचिराश्व-काश्य-दृढ़धनुर्वत्सहनुसंज्ञाः सेनजितः पुत्राः। रुचिराश्वस्य पृथुसेनः, तस्मात् पारः, पाराद् नीपः। तस्यैकशतं पुत्राणाम्, तेषां प्रधानः काम्पिल्याधिपतिः समरः(घ) ॥११॥

समरस्यापि पार-सम्पार-सदश्वाख्यः पुत्राः। पारात् पृथुः, पृथोः सुकृतिः, सुकृतेर्विभ्राजः, ततश्चानुहः। स च शुकदुहितरं कीर्त्तिं नामोपयेमे ॥१२॥

अनुहाद् ब्रह्मदत्तः, ततो विष्वक्सेनः, तस्योदक्सेनः, ततो भल्लाटः, तस्यात्मजो द्विमीढ़ः, द्विमीढ़स्य यवीनरसंज्ञः, तस्यापि धृतिमान्, ततः सत्यधृतिः, ततश्च दृढ़नेमिः, तस्माच्च सुपार्श्वः, ततः, सुमतिः, ततश्च सन्नतिमान्, सन्नतिमतः, कृतोऽभूत्। यं हिरण्यनाभो योगमध्यापयामास, यश्चतुर्व्विंशतिः प्राच्यसामगानां चकार संहिताः ॥१३॥

भरद्वाजस्यैव भरतपुत्रत्वदशायां वितथनाम्नो निरुक्तमाह—'भरद्वाजश्चे'ति। पितृभ्यां गते सति मरुद्भिर्भृतोऽपि मरुत्स्तोमयागतुष्टैस्तस्य वितथे पुत्रजन्मनि यतो दत्तस्ततो वितथसंज्ञामवापेत्यर्थः ॥८॥

ततस्ताभ्यां गार्ग्याः शैन्याश्च गर्गवंश्यत्वात् शिनिवंश्यत्वाच्च समाख्याताः क्षत्रिया एव केनचित् कारणेन ब्राह्मणाश्च बभूवुः ॥९॥

अजमीढस्य कण्वादिरेको वंशः, बृहदिष्वादिरपरो वंशः, नीलादिरपरः क्षत्रादिश्चापरः ॥१०॥

काम्पिल्यं नगरं तस्याधिपतिः ॥११॥

शुकस्य व्यासपुत्रस्य दुहितरं, हरिवंशे तथैव दर्शनात्।

तथोक्तम्,—"पराशरकुलोत्पन्नः शुको नाम महायशाः। व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन्। स तत्र पितृकन्यायां पीवर्य्यां जनयिष्यति। कृष्णं गौरमुं शम्भुं तथा भूरिश्रुतं जयम्। कन्यां कीर्त्तिमतीं षष्ठीं योगिं योगमातरम्। ब्रह्मदत्तस्य जननीं महिषीमनुहस्य च॥" इति वायुपुराणेऽपीदमेव वचः ॥१२॥

यः कृतः चतुर्विंशतिं संहिताश्चकार ॥१३॥

(घ) काम्पिल्याधिपतिः काम्पिल्यनामकस्य प्रसिद्धनगरस्य धीश्वरः। तदुक्तं शाब्दिकेन दुर्गसिंहेन कलापसूत्रवृत्तौ—"सिद्ध शब्दोऽत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा, यथा—सिद्धमन्नं काम्पिल्यः सिद्ध' इति। तत्र स्थिता काम्पिल्यवासिनी देवी दुर्गा; 'सुभद्रिकां काम्पिल्यवासिनी' मित्यन्तमन्त्रवर्णात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृताच्चोग्रायुधः, येन प्राचुर्य्येण नृपक्षयः कृतः ॥१४॥

उग्रायुधात् क्षेम्यः, तस्मात् सुवीरः, तस्य नृपञ्जयः, ततो बहुरथः। इत्येते पौरवाः। अजमीढ़स्य नीलिनी नाम पत्नी, तस्यां नीलसंज्ञः पुत्रोऽभवत्। तस्मादपि शान्तिः, शान्तेः सुशान्तिः, सुशान्तेः पुरुजानुः, ततश्चक्षुः, ततो हर्य्यश्वः, तस्माद् मुद्गल-सृञ्जय-बृहदिषु-प्रवीर-काम्पिल्याः। पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्राः, इति पित्राभिहिताः, अतस्ते पाञ्चालाः(ङ) ॥१५॥

मुद्गलाच्च मौद्गल्याः क्षत्त्रोपेता द्विजातयो बभूवुः। मुद्गलाद् वृद्धश्वः, वृद्धश्वाद् दिवोदासः-अहल्या च मिथुनमभूत्। शरद्वतोऽहल्यायां शतानन्दोऽभवत्। शतानन्दात् सत्यधृतिः धनुर्वेदान्तगो जज्ञे। सत्यधृतेस्तु वराप्सरसमुर्व्वशीं दृष्ट्वा रेतः स्कन्नं शरस्तम्बे पपात ॥१६॥

तच्च द्विधागतमपत्यद्वयं कुमारः कन्यका च अभवत्। मृगयामुपागतः शान्तनुर्दृष्ट्वा कृपया जग्राह ॥१७॥

ततः स कुमारः कृपः, कन्या चाश्वत्थाम्नो जननी कृपी द्रोणपत्न्यभवत्। दिवोदासस्य मित्रयुः, मित्रयोश्च्यवनो नाम राजा, च्यवनात् सुदासः, ततः सौदासः सहदेवः, तस्यापि सोमकः,ततो जन्तुः शतपुत्र-ज्येष्ठोऽभवत्। तेषां यवीयान् पृषतः, पृषताद् द्रुपदः, तस्माद् धृष्टद्युम्नः, तस्माद् धृष्टकेतुः। अजमीढ़स्यान्य ऋक्षनामा पुत्रोऽभूत्। ऋक्षात् संवरणः, संवरणात् कुरुः, य इदं धर्म्मक्षेत्रं कुरुक्षेत्रं चकार ॥१८॥

सुधनु-र्जह्नु-परिक्षित्-प्रमुखाः कुरोः पुत्रा बभूवुः। सुधनुषः सुहोत्रः, तस्माच्च्यवनः, च्यवनात् कृतकः, ततश्चोपरिचरो वसुः। बृहद्रथ-प्रत्यग्र-कुशाम्ब-मावेल्ल-मत्स्यप्रमुखा वसोः पुत्राः सप्ताजायन्त। बृहद्रथात् कुशाग्रः, तस्मादृषभः, ततः पुष्पवान्, तस्मात् सुधन्वा, तस्य च जन्तुः। बृहद्रथाच्चान्यः

नृपाः क्षत्रियविशेषास्तेषां क्षयः कृतः। पञ्चानां विषयाणां मदीयानां देशानाम् ॥१४-१५॥

शरद्वतो गौतमात्। स्कन्नं स्खलितम्। क्षत्त्रोपेता द्विजातय इति क्षत्रिया एव सन्तः केनचित् कारणेन ब्राह्मणा बभूवुरित्यर्थः ॥१६॥

कृपयेति नाम निरुक्त्यर्थम् ॥१७॥

कुरुणा स्वेनोपलक्षितं क्षेत्रं देवप्रसादाद्धर्मकारणं क्षेत्रं चकार ॥१८॥

(ङ) पञ्चानामित्यादिः पाञ्चालनामनिरुक्तिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शकलद्वयजन्मा जरया सन्धितो जरासन्धो नाम (च)। ततः श्रुतश्रवाः। इत्येते मागधा भूभृतः ॥१९॥

तस्मात् सत्यधृतः, तस्मात् सहदेवः, ततः सोमापिः, इति श्रीविष्णुपुराणे चतुर्थांशे एकोनविंशः अध्यायः।

शकलद्वयरूपं जन्म यस्य, जरया राक्षस्या सन्धितो योजितः ॥१९॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे एकोनविंशोऽध्यायः।

(च) शकलद्वयजन्मा शरीरार्द्धखण्डद्वयजन्मा। अत्रेयं कथा,—राजा बृहद्रथः पुत्रहीनः सुतरां निर्विण्णः काक्षीवतो गौतमस्य पुत्रमृषिमुपसृत्य तं तोषयामास। तोषितश्चासौ तदैव स्वाश्रितमूलादाम्रवृक्षादुत्सङ्गे पतितमाम्रफलं राज्ञे तदुपयोगेन तत्पत्न्याः पुत्रजननमुपदिश्य प्रादात्। राजा पत्नीद्वयाय तद्ददौ, पत्नीद्वयेन च तत्फलं द्विधा विभज्य भक्षितम्। अनन्तरं तत्प्रभावात् काले पत्नीद्वयेनैव सन्तानः प्रसूतः, परमेकैकशः खण्डद्वयेन। तच्च खण्डद्वयं धात्र्या चतुष्पथे निक्षिप्तं जरया नाम राक्षस्या प्राप्य मिथो योजितमखण्डैकरूपतां प्राप्तम्। तं जरया च राज्ञे विसृष्टम्। तेनैवासौ जरासन्धनाम्ना ख्यात इति। विस्तृतमेतद्वृत्तं महाभारत-सभापर्व-सप्तदशाध्यायादौ द्रष्टव्यम्।

विंशोऽध्यायः

[कुरुवंशवर्णनम्]

पराशर उवाच।

परिक्षितो जनमेजय-श्रुतसेनोग्रसेन-भीमसेनाश्चत्वारः पुत्राः ॥१॥

जह्नोस्तु सुरथो नामात्मजो बभूव ॥२॥

तस्य विदूरथः, विदूरथस्य सार्व्वभौमः, सार्व्वभौमाज्जयसेनः, तस्मादारावी, ततश्चायुतायुः, अयुतायोरक्रोधनः, तस्माद् देवातिथिः, ततः ऋक्षोऽन्यः(क) ॥३॥

विंशः अध्यायः

विंशे तु कुरुपुत्राणां वंशानाह पराशरः। यत्र स्वपुरसन्तानधृतराष्ट्रादिसन्ततिः॥ कुरोः पुत्राणां मध्ये सुधनुषो वंश उक्तः, इदानीं कुरुपुत्रस्यैव परिक्षितो वंश उच्यते—'परिक्षि'इति ॥१॥

कुरुपुत्रस्यैव जह्नोर्वंशमाह,—'जह्नोरि'ति ॥२॥

पूर्वोक्तात् अजमीढपुत्राद्दक्षादन्यः ॥३॥

(क) अन्य इति पूर्वोक्तात् संवरणपितुः ऋक्षात् अपरः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋक्षाद् भीमसेनः, ततश्च दिलीपः; दिलीपात् प्रतीपः, तस्यापि देवापि-शान्तनु-बाह्लीकसंज्ञास्त्रयः पुत्रा बभूवुः। देवापिर्बाल्य एवारण्यं विवेश ॥४॥

शान्तनुरवनीपतिरभवत्। अयञ्च तस्य श्लोकः पृथिव्यां गीयते ॥—

यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः।
शान्तिञ्चाप्नोति येनाग्र्यां कर्म्मणा तेन शान्तनुः ॥५॥

तस्य शान्तनो राष्ट्रे द्वादशवर्षाणि देवो न ववर्ष ॥६॥(क)

ततश्चाशेषराष्ट्रविनाशमवेक्ष्यासौ राजा ब्राह्मणानपृच्छत्,—भोः! कस्मादस्मिन् राष्ट्रे देवो न वर्षति, को ममापराध इति। ते तमूचुः—अग्रजस्य तेऽर्हेयमवनिस्त्वया भुज्यते, परिवेत्ता त्वम्, इत्युक्तः। स पुनस्तानपृच्छत्,—किं मया विधेयमिति। ते तमूचुः—यावद् देवापिर्न पतनादिभिर्दोषैरभिभूयते, तावत्तस्यार्हं राज्यं, तदलमेतेन, तस्मै दीयताम्, इत्युक्ते तस्य मन्त्रिप्रवरेणाश्मसारिणा तत्रारण्ये तपस्विने वेदवादविरोधवक्तारः प्रयोजिताः(ख) ॥७॥

तैरप्यत्यृजुमतेर्महीपतिपुत्रस्य बुद्धिर्वेदविरोधमार्गानुसारिण्यक्रियत ॥८॥

राजा च शान्तनुर्द्विजवचनोत्पन्नपरिवेदनशोकस्तान् ब्राह्मणानग्रणीकृत्य अग्रजराज्यप्रदानायारण्यं जगाम। तदाश्रममुपगताश्च तमवनीपतिपुत्रं देवापिमुपतस्थुः। ते ब्राह्मणा वेदवादानुबद्धानि वचांसि राज्यमग्रजेन कर्त्तव्यमित्यर्थवन्ति तमूचुः। असावपि वेदवादविरोधियुक्तिदूषितमनेकप्रकारं तानाह। ततस्ते ब्राह्मणाः शान्तनुमूचुः, आगच्छ भो राजन्! अलमत्रातिनिर्बन्धेन, प्रशान्त एवासावनावृष्टिदोषः, पतितोऽयमनादिकाल-महितवेदवचनदूषणोच्चारणात्। पतिते चाग्रजे नैव परिवेद्यं भवति, इत्युक्तः शान्तनुः स्वपुरमागत्य राज्यमकरोत्। वेदवादविरोधिवचनोच्चारणदूषिते च

देवापेर्वंशो नाभवदित्याशयेनाह—'देवापिरि'ति ॥४॥

यं यं जन्तुं स्पृशति, स स यौवनमेति, शान्तिञ्चाप्नोति। एतावता यौवनादिरूपं शं कल्याणं तनोतीति शान्तनुनामनिरुक्तिरुक्तेति ज्ञेयम् ॥५॥

प्रसंगात् परिवेदनदोषमाह—'तस्ये'त्यादिना 'न ववर्ष भगवान् पर्जन्य' इत्यन्तेन ॥६॥

(क) द्वादश वर्षाणि व्याप्य, कालाध्वनोरित्यादिना द्वितीया। देवः पर्जन्यः।

अश्मसारिणा अश्मसारिनाम्ना स्वयमेव तपस्विवेशधारिणः प्रव्राजिताः ॥७॥

अत्यृजुमतेः यथाश्रुतार्थग्राहिणः ॥८॥

(ख) ते तव अग्रजस्य ज्येष्ठस्य देवापेः अर्हा योग्या इयम् अवनिः भोक्तुमिति शेषः। त्वया तदनुजेनेति शेषः। एतेन तव अलम्। तस्मै अग्रजाय देवापये दीयतां तद् राज्यं त्वयेति शेषः। वेदवादानां वैदिकवचनानां यो विरोधः मिथो विरुद्धार्थ प्रतिपादकत्वं, तद्वक्तारः तदुपपादकवचनप्रयोक्तारः तत्प्रयोगक्षमाः। प्रयोजिताः प्रेरिता इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्येष्ठेऽस्मिन् भ्रातरि देवापावखिलशस्यनिष्पत्तये ववर्ष भगवान् पर्ज्जन्यः(ग) ॥९॥

बाह्लीकस्य सोमदत्तः पुत्रोऽभूत्। सोमदत्तस्यापि भूरि-भूरिश्रवः-शल्यसंज्ञास्त्रयः पुत्राः। शान्तनोरप्यमरनद्यां गङ्गायामुदारकीर्त्तिरशेषशास्त्रार्थविद् भीष्मः पुत्रोऽभूत्। सत्यवत्याञ्च चित्राङ्गद-विचित्रवीर्य्यौ पुत्रावजनयत् शान्तनुः। चित्राङ्गदस्तु बाल एव चित्राङ्गदेन गन्धर्व्वेणाहवे विनिहतः। विचित्रवीर्य्योऽपि काशिराजतनये अम्बिकाम्बालिके उपयेमे। तदुपभोगादिखेदाच्च यक्ष्मणा गृहीतः पञ्चत्वमगमत्। सत्यवतीनियोगाच्च मत्पुत्रः कृष्णद्वैपायनो मातुर्वचनमनतिक्रमणीयमिति विचित्रवीर्य्यक्षेत्रे धृतराष्ट्र-पाण्डू तत्प्रहितभुजिष्यायाञ्च विदुरमुत्पादयामास(घ) ॥१०॥

धृतराष्ट्रोऽपि दुर्य्योधन-दुःशासनादिप्रधानं पुत्रशतं (गान्धार्य्याम्) उत्पादयामास। पाण्डोरप्यरण्ये मृगशापोपहतप्रजाजननसामर्थ्यस्य धर्म्म-वायु-शक्रैर्युधिष्ठिर-भीमसेनार्ज्जुनाः कुन्त्यां, नकुल-सहदेवौ च अश्विभ्यां माद्र्यां पञ्च पुत्राः समुत्पादिताः। तेषां द्रौपद्यां पञ्च पुत्रा बभूवुः। युधिष्ठिरात् प्रतिविन्ध्यः, भीमसेनात् सुतसोमः, श्रुतकीर्त्तिरर्ज्जुनात्, शतानीको नकुलात्, श्रुतकर्म्मा सहदेवात्। अपरे च पाण्डवानामात्मजाः, तद्यथा—यौधेयं युधिष्ठिराद् देवकं पुत्रमवाप। हिड़िम्बा घटोत्कचं भीमसेनात् पुत्रमवाप। काशी च भीमसेनादेव सर्व्वत्रगं पुत्रमवाप। सहदेवाच्च विजया सुहोत्रं नाम पुत्रं प्राप्तवती। करेणुमत्याञ्च नकुलोऽपि निरमित्रमजीजनत्। अर्ज्जुनस्याप्युलूप्यां नाग-कन्यायामिरावान् नाम पुत्रोऽभूत्। मणिपुरपति-पुत्र्याञ्च पुत्रिकाधर्म्मेण बभ्रुवाहनं नाम पुत्रमजीजनत्(ङ) ॥११॥

शान्तनोर्वंशमतिविस्तरेणाग्रे वक्ष्यन् प्रथमं बाह्लीकवंशमाह—'बाह्लीकस्ये'ति ॥९॥

मम पराशरस्य पुत्रः मत्पुत्रः भुजिष्यायां दास्याम् ॥१०॥

मणिपुरं नाम नगरं तत्पतेः पुत्र्यां पुत्रिकाधर्मेण "अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति" कन्यादातुर्वाग्बन्धे ॥११॥

(ग) अग्रजाय ज्येष्ठाय देवापये राज्यस्य स्वेन भुज्यमानस्य प्रदानाय। ते शान्तनुना पुरःसरीकृता ब्राह्मणाः तम् देवापिम् ऊचुः। असावपि देवापिरपि तान् ब्राह्मणान् वेदविरोधिन्यो या युक्तयः ताभिः दूषितम् अनेकप्रकारमाह। अनादिकालात् महितं महर्ष्यादिभिर्मानितं यत् वेदवचनं तस्य दूषणोच्चारणात्, देवापौ तथा दूषिते सतीत्यर्थः।

(घ) सत्यवत्या स्वीयमातुः नियोगात् प्रवर्त्तनात्। विचित्रवीर्य्यस्य क्षेत्रे पत्न्याम्। तेन विचित्रवीर्य्यस्य क्षेत्रेण तत्पत्न्येत्यर्थः, प्रहितायां भीत्या आत्मनः स्थाने प्रेरितायां रत्यर्थं कृष्णद्वैपायनसमीपे इति शेषः, भुजिष्यायां स्वीयदास्याम्।

(ङ) मृगशापोपहतेत्यादिः—मृगस्य मृगरूपं धृत्वा मृगरमणरतस्य किन्दमाख्यस्य मुनेः शापेन रमणप्रवृत्तावेव जीवनान्तकरेण शापेन उपहतं व्याहतं प्रजननसामर्थ्यं सन्तानोत्पादनयोग्यत्वं यस्य तस्य। तथाहि मैथुनधर्मेणैव पुरुषाः प्रजननयोग्या भवन्ति, पाण्डं प्रति मुनेः मैथुनधर्मप्रवृत्तावेव जीवनान्तकरशापस्य प्रदानात् तत्परिहारार्थमेव तत्परिहारेण व्याहतं प्रजननसामर्थ्यमिति भावः। शापोऽयमुक्तो महाभारते आदिपर्वणि सप्तदशाधिकशततमाध्याये यथा,—'किं कृतं ते नरेन्द्र मामिहानागसं घ्नता। मुनिं मूलफलाहारं मृगवेशधरं वसमानमरण्येषु नित्यं शमपरायणम्। त्वयाहं हिंसितो यस्मात् तस्मात् त्वामप्यहं शपे। द्वयोर्नृशंसकर्त्तारमवशं काममोहितं जीवितान्तकरो भाव एवमेवागमिष्यति। प्रियया सह संवासं प्राप्य कामविमोहितः। त्वमप्यस्यामवस्थायां प्रेतलोकं गमिष्यसि।'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुभद्रायाश्चार्भकत्वेऽपि योऽसावतिबलपराक्रमसमस्तारातिरथविजेता सोऽभिमन्युरजायत। अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतः सकलसुरासुरवन्दित-चरणयुगलस्यात्मेच्छाकारणमानुषरूपधारिणोऽनुभावात् पुनर्ज्जीवितमवाप्य परिक्षित् जज्ञे ॥१२॥

योऽयं साम्प्रतमेतद् भूमण्डलमखण्डितायति धर्म्मेण पालयतीति ॥१३॥

इति श्रीविष्णुपुराणे चतुर्थांशे विंशः अध्यायः ॥

परिक्षीणेषु कुरुष्विति भगवतस्तद्रक्षणे परिक्षिन्नामनिरुक्तौ च हेतुः। आत्मेच्छामात्रकारणेन मानुषरूपं धर्त्तुं शीलं यस्य तस्य, पुनर्जीवितमवाप्य परिक्षित् जज्ञे ॥१२॥

साम्प्रतमित्यनेन परिक्षिद्राज्यकाल एव पराशरमैत्रेयसंवाद इति गम्यते। अखण्डिता आयतिः प्रभावो यत्र तद्यथा स्यादिति क्रियाविशेषणम्। 'स्यात् प्रभावेऽपि आयति'रित्यमरः। आयतिरुत्तरफलं धनादि सम्पत् सा अखण्डिता यत्र तद् यथा स्यादिति वा ॥१३॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे विंशोऽध्यायः ॥

एकविंशोऽध्यायः।

[भाविनृपतीनां विवरणम्]

परशार उवाच

अतः परं भविष्यानहं भूमिपालान् कीर्त्तयिष्ये। योऽयं साम्प्रतमवनीपतिः, तस्यापि जनमेजयश्रुतसेनोग्रसेन-भीमसेनाः पुत्राश्चत्वारो भविष्यन्ति ॥१

तस्यापरः शतानीको भविष्यति। योऽसौ याज्ञवल्क्याद् वेदमधीत्य कृपादस्त्राण्यवाप्य विषयविरक्तचित्तवृत्तिश्च शौनकोपदेशादात्मविज्ञानप्रवणः परं निर्व्वाणमवाप्स्यति(क) ॥२॥

शतानीकादश्वमेधदत्तो भविता, तस्मादप्यधिसीमकृष्णः, अधिसीमकृष्णाद् निचक्षुः, यो गङ्गयापहृते

एकविंशः अध्यायः

एकविंशे पुरोर्वंशो भविष्य उपवर्ण्यते। क्षेमकं प्राप्य यः संस्थां कलावुपगमिष्यति। कुरुपुत्र-परिक्षित इवास्यापि जनमेजयादिसंज्ञा एव चत्वारः पुत्राः ॥१॥

तस्य जनमेजयस्य। आत्मविज्ञानप्रवणस्तत्परः ॥२॥

(क) कृपात् कृपाचार्य्यात्। अस्त्राणि विद्यामयानि। परं निर्वाणं सायुज्यलक्षणाम् मुक्तिम्। विषयेषु भोग्येषु स्रक्चन्दनादिषु विरक्ता वैराग्यवती चित्तवृत्तिर्यस्य तथाभूतः। आत्मनः विज्ञानं विशिष्टं ज्ञानं तत्त्वज्ञानलक्षणमित्यर्थः, तत्प्रवणः तत्परः तदेकोन्मुख इत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३८० विष्णुपुराणम् [चतुर्थांश

हस्तिनापुरे कौशाम्ब्यां निवत्स्यति। तस्याप्युष्णः पुत्रो भविता। उष्णाच्चित्ररथः, ततः शुचिरथः, तस्माद् वृष्णिमान्, ततः सुषेणः, तस्मादपि सुनीथः, सुनीथादृचः, ततो नृचक्षुः, तस्यापि सुखाबलः, तस्मात् परिप्लवः, ततश्च सुनयः, ततो मेधावी, मेधाविनो नृपञ्जयः, ततो मृदुः, तस्मात् तिग्मः, तिग्माद् बृहद्रथः, तस्माद् वसुदानः, ततोऽप्यपरः शतानीकः ॥३॥

तस्माच्च उदयनः, उदयनादहीनरः,* ततश्च खण्ड-पाणिः, ततो निरमित्रः, तस्माच्च क्षेमकः। तत्रा श्लोकः।

ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिसत्कृतः।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ(ख)।

इति श्रीविष्णुपुराणे चतुर्थांशे एकविंशः अध्यायः

पूर्वोक्ताज्जनमेजयपुत्रादपरः शतानीकः ॥३॥

ब्रह्मणः ब्राह्मणस्य, क्षत्रस्य क्षत्रियस्य च योनिः कारणं क्षत्रियैरेव कैश्चित्तपोविशेषात् ब्राह्मण्यं लब्धमिति तथोक्तत्वात्। संस्थां समाप्तिम् ॥४॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे एकविंशोऽध्याय

(ख) प्राप्स्यत इत्यत्राप्नोतेः परस्मैपदित्वात् कर्त्तव्यात्मनेपद-प्रयोग आर्षः।* अहीनं प्रभूतं राति ददाति, अहीनाय अनपकृष्टाय सुयोग्यपात्रायेत्यर्थः, राति ददाति यः स इति वा अहीन शब्दार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वाविंशः अध्यायः

[भाविं-कालीनेक्ष्वाकुवंशीय-नृपाणां वर्णनम्]

पराशर उवाच ।

अतश्चेक्ष्वाकवो भविष्याः पार्थिवाः कथ्यन्ते । बृहद्बलस्य पुत्रो बृहत्क्षणः ॥१॥

तस्माद् गुरुक्षेपः, ततो वत्सः, वत्साद् वत्सव्यूहः, ततः प्रतिव्योमः, तस्यापि दिवाकरः, तस्मात् सहदेवः ॥२॥

ततो बृहदश्वः, तत्सूनुर्भानुरथः, तस्यापि सुप्रतीकः, ततो मरुदेवः, मरुदेवात् सुनक्षत्रः, तस्मात् किन्नरः, किन्नरादन्तरिक्षः, तस्मात् सुवर्णः, ततश्चामित्रजित्, ततश्च बृहद्राजः, तस्यापि धर्म्मो, धर्म्मिणः कृतञ्जयः, कृतञ्जयाद् रणञ्जयः, रणञ्जयात् सञ्जयः, तस्मात् शाक्यः, शाक्यात् शुद्धोदनः, तस्माद् रातुलः, ततः प्रसेनजित्, ततश्च क्षुद्रकः, ततः कुण्डकः, तस्मादपि सुरथः, ततश्च सुमित्रोऽन्यः,—इत्येते चेक्ष्वाकवो बृहद्-बलान्वयाः । अत्रानुवंशश्लोकः ।

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ(क) ॥३॥

इति श्रीविष्णुपुराणे चतुर्थांशे द्वाविंशः अध्यायः ॥

द्वाविंशः अध्यायः

सोमवंश-भविष्याणां राज्ञामत्र प्रसंगतः । द्वाविंशे सूर्य्यवंश्यानां भविष्यो वंश उच्यते । बृहद्बलस्येति—चतुर्थे-ऽध्याये अर्जुनतनयेनाभिमन्युना भारते युद्धे क्षयमनीयतेत्यत्र च दर्शितस्तस्येत्यर्थः ॥१॥

यत्र यत्र नाम्नां वैलक्षण्यं दृश्यते, तत्र कल्पयुगादिभेदेन व्यवस्थापनीयम् ॥२॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे द्वाविंशोऽध्यायः ॥

(क) ततः तस्मात् सुरथात् जातः सुमित्रः अन्यः पार्थिव इति शेषः । एवं सर्वत्र प्रागुक्तपार्थिवशब्दयोगेनार्थमभिप्रेत्यैव अन्य इत्युक्तम् । अन्यः अपरः बृहद्बलान्वयो वा । बृहद्बलस्य अन्वय एव अन्वयो येषां ते बृहद्बलान्वयाः । अथवा कुलविशेषप्रवर्त्तकत्वाद् बृहद्बलस्य अन्वयः सम्बन्धो यत्रेति व्यधिकरणबहुव्रीहिणा वृद्धद्बलान्वयपदनिष्पत्तिः । इक्ष्वाकवः इक्ष्वाकुवंशीयाः । अनुवर्त्ती वंशः अनुवंशः तस्य श्लोकः तद्विज्ञापकम् पद्यम् । इक्ष्वाकूणां इक्ष्वाकुवंशीयानाम्, अथवा इक्ष्वाकूणामिति गौरवे बहुवचनम् सुविश्रुतस्येक्ष्वाकोरित्यर्थः । सुमित्रः अन्तः चरमः यत्र स सुमित्रान्तः, 'अन्तो जघन्यं चरममन्त्य-पाश्चात्य-पश्चिमा' इति कोषात् । तं सुमित्रम् । स इक्ष्वाकु-वंशः, संस्थां समाप्तिम्, प्राप्स्यते प्राप्स्यति । प्राप्स्यत इत्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रयोविंशोऽध्यायः

[मगधवंशवर्णनम्]

पराशर उवाच ।

मागधानां बार्हद्रथानां भविष्याणामनुक्रमं कथयामि(क) ॥१॥

अत्र हि वंशे महाबला जरासन्धप्रधाना बभूवुः (ख) ॥२॥

जरासन्धसुतात् सहदेवात् सोमापिः, तस्मात् श्रुतवान्, तस्याप्ययुतायुः, ततश्च निरमित्रः, तत्तनयः सुक्षत्रः, तस्मादपि बृहत्कर्म्मा, ततश्च सेनजित्, तस्माच्च श्रुतञ्जयः, ततो विप्रः, तस्य च पु शुचिनामा भविष्यति । तस्यापि क्षेम्यः, तत सुव्रताद् धर्म्मः, ततः सुश्रमः, ततो दृढ़सेनः, त सुमतिः, तस्मात् सुबलः, तस्य सुनीतो भविता ततः सत्यजित्, सत्यजितो विश्वजित्, तस्मा रिपुञ्जयः पुत्रः, इत्येते बार्हद्रथा भूपतयो वर्षसह मेकं भविष्यन्ति(ग) ॥३॥

इति श्रीविष्णुपुराणे चतुर्थांशे त्रयोविंशः अध्यायः

त्रयोविंशः अध्यायः

बार्हद्रथानां वंशेऽपि भविष्यानवदन् नृपान्। अन्त्यो रिपुञ्जयो यत्र तदन्ते प्राभवत् कलिः। सोम-सूर्य्यवंशयो- र्भविष्यान् नृपानुक्त्वा सोमवंशपल्लवभूतानां बार्हद्रथानां भविष्यानाह—'मागधाना'मिति। तत्र च सङ्क्ष कीर्त्तितानामपि जरासन्धादीनामनुवादं कुर्वन्नयुतायुःश्र भविष्यानाह—'अत्र ही'त्यादिना यावत्समाप्ति ॥१-२

बार्हद्रथा बृहद्रथवंशोद्भवाः ॥३॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे त्रयोविंशोऽध्यायः

(क) बृहद्रथस्य अपत्यानि पुमांसः बार्हद्रथाः तेषाम्। बृहद्रथशब्दादपत्यार्थे ष्णप्रत्ययः।

(ख) जरासन्धः जरया तदाख्यया राक्षस्या सन्धा सन्धानं भागद्वयस्य मेलनं यत्र सः। वृत्तमेतद् वर्णितमेवाधस्ताद्। स एव प्रधानं येषां ते जरासन्धप्रधानाः।

(ग) एकं वर्षसहस्रं व्याप्य भूपतयः पृथिवीप भविष्यन्तीति सम्बन्धः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्विंशोऽध्यायः

[कलिकालस्थित-नृपाणां कलिधर्म्मस्य च वर्णनम् । राजवंशवर्णनोपसंहारश्च ।]

पराशर उवाच ।

योऽयं रिपुञ्जयो नाम बार्हद्रथोऽन्त्यः, तस्य सुनिको नामामात्यो भविष्यति(क) ॥१॥

स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानमभिषेक्ष्यति । तस्यापि पालकनामा पुत्रो भविता । ततश्च विशाखयूपः, तत्पुत्रो जनकः, तस्य च नन्दिवर्द्धनः, इत्येते अष्टत्रिंशदुत्तरमब्दशतं पञ्च-प्रद्योताः पृथिवीं भोक्ष्यन्ति(ख) ॥२॥

ततश्च शिशुनागः, तत्पुत्रश्च काकवर्णो भविता । तत्पुत्रः क्षेमधर्म्मा, तस्यापि क्षत्रौजाः, तत्पुत्रो विद्मसारः, ततश्चाजातशत्रुः, तस्माच्च दर्भकः, दर्भकाच्चोदयाश्वः, तस्मादपि नन्दिवर्द्धनः, ततो महानन्दी, इत्येते शैशुनागा दश भूमिपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि भविष्यन्ति ॥३॥

महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मानन्दः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविता (ग)॥४॥

ततः प्रभृति शूद्रा भूमिपाला भविष्यन्ति, स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यति(घ) ॥५॥

चतुर्विंशः अध्यायः

चतुर्विंशे कलेर्धर्मसंख्ये क्षुद्रास्तथा नृपाः । भूमेर्गीता-वंशिक्षा च वैराग्याय निरूपिताः । इदानीन्तु तद्वंश्यानेव भूभुजः कालेनाल्पबलपौरुषान् मलीमसान् दस्युप्रायांश्चाह—'योऽयमि'त्यादिना 'सर्वे पृथिव्यां भूभुजो भविष्यन्ती'त्यन्तेन ॥१॥

प्रद्योताः प्रद्योतनामानः । अत्र च राज्ञां तद्राज्यानां वर्षसंख्या आयराद्यल्पत्वप्रदर्शनं वैराग्यार्थम् ॥२॥

शैशुनागाः शिशुनागापत्यानि ॥३॥

'महापद्म' इति । 'कोटिशतगुणं पद्मं, पद्मशतगुणं खर्वं, तद्दशगुणं पुनः निखर्वं, तद्दशगुणं महापद्ममिहेष्यते' इत्युक्तेस्तावत्संख्यकस्य सैन्यस्य धनस्य वा स्वामी महापद्मानन्दः ॥४॥

एकमेव छत्रं यस्यां ताम् ॥५॥

(क) अन्ते अवसाने भवः अन्त्यः चरमः बार्हद्रथः बृहद्रथवंशीयः पूर्वाध्याये समुद्दिष्टः ।

(ख) सः सुनिकनामा अमात्यः । एनं रिपुञ्जयनामानम् । अभिषेक्ष्यति मगधराजपदे इति शेषः । भोक्ष्यन्ति पालयिष्यन्ति, अत्र भुजेरवनार्थत्वान्नात्मनेपदम्, अनवनार्थ एवात्मनेपदस्य विधानात् ।

(ग) अखिलक्षत्रान्तकारी तदानीन्तनसकलराजपरिभावी तद्विध्वंसकारी वा । शूद्रेत्यादि अतिलुब्ध इति च विशेषणद्वयं हेत्वर्थगर्भम् । तथाहि तस्य शूद्रागर्भजातत्वात् क्षत्रराजवृन्दकृतावज्ञानादिजनितरोषात् तथा लोभातिशयेन तेषां क्षत्रराजानां राज्याधिकाराभिलाषात् स तथा भावीति भावः ।

(घ) न उल्लङ्घितम् अतिक्रान्तं शासनम् आज्ञा केनापीति शेषः यस्य सः । भोक्ष्येति पालयिष्यति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्याप्यष्टौ सुताः सुमात्याद्या भवितारः। तस्य च महापद्मस्यानु पृथिवीं भोक्ष्यन्ति। महापद्मस्तत्पुत्राश्च एकं वर्षशतमवनीपतयो भविष्यन्ति। नवैव तान् नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति (ङ)॥६॥

तेषामभावे मौर्य्याश्च पृथिवीं भोक्ष्यन्ति। कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति(च) ॥७॥

तस्यापि पुत्रो विन्दुसारो भविष्यति। तस्यापि अशोकवर्द्धनः, ततः सुयशाः, ततो दशरथः, ततः सङ्गतः, ततः शालिशुकः, तस्मात् सोमशर्म्मा, तस्मात् शतधन्वा, तस्याप्यनु बृहद्रथनामा भविता। एवं मौर्य्या दश(छ) भूपतयो भविष्यन्ति अब्दशतं सप्तत्रिंशदुत्तरम्। तेषामन्ते पृथिवीं शुङ्गा भोक्ष्यन्ति ॥८॥

ततः पुष्पमित्रः सेनापतिः स्वामिनं हत्वा राज्यं करिष्यति ॥९॥

अस्यात्मजोऽग्निमित्रः, तस्मात् सुज्येष्ठः, ततो वसुमित्रः, तस्मादप्यार्द्रकः, ततः पुलिन्दकः, ततो घोषवसुः, तस्मादपि वज्रमित्रः, ततो भागवतः ॥१०॥

तस्माद् देवभूतिः, इत्येते दश शुङ्गा द्वाहशोत्तरं वर्षशतं पृथिवीं भोक्ष्यन्ति। ततः कण्वानेषा भूर्यास्यति(ज) ॥११॥

देवभूतिस्तु शुङ्गराजानं व्यसनिनं तस्यैवामात्यः कण्वो वसुदेवनामा निपात्य स्वयमवनीं भोक्ष्यति। तत्पुत्रो भूमिमित्रः, तस्यापि नारायणः, नारायणस्य सुशर्म्मा, एते काण्वायनाश्चत्वारः पञ्चचत्वारिंशद्वर्षाणि भूपतयो भविष्यन्ति। सुशर्म्मणां कण्वश्च भृत्यो बलात् शिप्रकनामा हत्वा अन्ध्रजातीयो वसुधां भोक्ष्यति। ततश्च कृष्णनामा तद्भ्राता भूपतिर्भावी। तस्य श्रीकान्तकर्णिः, तस्यापि पुर्णोत्सङ्गः, तत्पुत्रश्च शातकर्णिः, तस्माल लम्बोदरः, तस्माद् द्विविलकः, ततो मेघस्वातिः

नन्दान् नन्दं तत्पुत्रांश्च कौटिल्यः कौटिल्यप्रधानः वात्स्यायन-विष्णुगुप्तादिपर्य्यायश्चाणक्यः, समुद्धरिष्यति उन्मूलयिष्यति ॥६॥

चन्द्रगुप्तं नन्दस्यैव पत्न्यन्तरस्य मुरासंज्ञस्य पुत्रं मौर्य्यं प्रथमम् ॥७॥

शुङ्गाः शुङ्गसंज्ञाः ॥८॥

तानेवाह—'पुष्पमित्र' इति। पुष्पमित्रः शुङ्गानां प्रथम

अनमित्रादयो नव, एवं शुङ्गा दश ॥१०॥

कण्वान् कण्वसंज्ञनृपान् भूः यास्यति। ततः कण्वा भूर्यास्यति ॥११॥

(ङ) अनु परतः। भोक्ष्यन्ति ते सुमत्याद्या इति शेषः। नवैव तान् नन्दानिति—एको महापद्मः, तत्पुत्राः सुमत्याद्याश्चाष्टाविति मिलित्वा नव नन्दाः, तान्।

(च) तेषां नन्दानाम् अभावे सति तद्ध्वंसानन्तरमित्यर्थः। मौर्य्याः मौर्य्यवंशीयाः। मुरा नाम शूद्रा दासी, ततः प्रवृत्तो मौर्य्यवंशः, यस्य वंशस्याद्यः पुरुषश्चन्द्रगुप्तो नाम।

(छ) मौर्य्या दशेति चन्द्रगुप्त एकः विन्दुसारादयश्च नवेति दश।

(ज) यास्यति प्राप्स्यति, स्वामित्वेन समाश्रयिष्यतीत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः पटुमान्, ततश्च अरिष्टकर्म्मा, ततो हालः, हालात् पुत्तलकः, ततः प्रविल्लसेनः, ततः सुन्दरः शातकर्णी, तस्माच्चकोरः शातकर्णी(झ) ॥१२॥

ततः शिवस्वातिः, ततश्च गोमतीपुत्रः, तत्पुत्रः पुलिमान्, तस्यापि शातकर्णी शिवश्रीः, ततः शिवस्कन्धः, ततो यज्ञश्रीः, ततो विजयः, ततश्चन्द्रश्रीः, तस्यापि पुलोमाचिः, ऐवमेते त्रिंशन्त्वार्य्यब्दशतानि षट्पञ्चाशदधिकानि पृथिवीं भोक्ष्यन्ति अन्ध्रभृत्याः। सप्ताभीरा दश गर्द्दभिला भूभुजो भविष्यन्ति(ग) ॥१३॥

ततः षोड़श शका भूभुजो भवितारः। ततश्च अष्टौ यवनाः, चतुर्द्दश तुखाराः, मुण्डाश्च त्रयोदश, एकादश मौनाः, एते पृथिवीं त्रयोदश वर्षशतानि नवनवत्यधिकानि भोक्ष्यन्ति ॥१४॥

ततश्च पौरा एकादश भूपतयोऽष्टशतानि त्रीणि महीं भोक्ष्यन्ति ॥१५॥

तेषूच्छन्नेषु कैलकिला यवना भूपतयो भविष्यन्ति। मूर्द्धाभिषिक्तस्तेषां विन्ध्यशक्तिः ॥१६॥

ततः पुरञ्जयः, ततो रामचन्द्रः, तस्माद् धर्म्मः, धर्म्माद् वराङ्गः, कृतनन्दनः, सुषिनन्दिः, नन्दियशाः, शिशकप्रवारी च। एते वर्षशतं षड्वर्षाणि च भविष्यन्ति। ततस्तत्पुत्राश्चयोदशैव, वाह्लीकाश्च त्रयः, ततः पुष्पमित्र-पढ़ुमित्र-पद्ममित्राश्चयः, दश मेकलाश्च, सप्तकोशलायान्तु नवैव भूपतयो भविष्यन्ति। नैषधास्तु तावन्त एव भूपतयो भविष्यन्ति ॥१७॥

कण्वान् कथं भूर्य्यास्यति तत्राह—'देवभूतिस्त्वि'ति। शातकर्णीत्युपनाम ॥१२॥

एते तु अन्ध्रभृत्यास्त्रिंशदित्यन्वयः ॥१३॥

आभीराद्या मौनान्ता एकोनाशीतो राजान एकोनचतुर्द्दश-शतवर्षाणि पृथिवीं भोक्ष्यन्ति ॥१४॥

ततश्च पौराश्चीण्यब्दशतानि भोक्ष्यन्ति। क्वचित् पौरा इत्यत्र पुनर्मौना इति पाठः। तदा आभीरादिसप्तगणितानामपि मौनानां व्यतिरेकेण पूर्वराज्यवर्षसंख्या, इयन्तु ततः पृथगेव मौनानां राज्यवर्षशतत्रयसंख्येति ज्ञेयम् ॥१५॥

किलकिलानगरी तत्र भवाः कैलकिलाः, तेषां मूर्धाभिषिक्तो मुख्यः। विन्ध्यशक्तिर्मूर्धाभिषिक्तं इति पाठे क्षत्रियमुख्य इत्यर्थः ॥१६॥

तेषां विन्ध्यशक्त्यादीनां यथायथं त्रयोदश पुत्राः, बाह्लीकाश्च त्रयः, पुष्पमित्रादयश्चयः, दश मेकला मेकलदेशजाः, सप्तकोशलायां नवैव नैषधास्तावन्तः नवैव भूपतयो भविष्यन्ति। मेकलादिदेशानां मध्ये त्वप्रसिद्धा देशास्तत्तद्देशीया ज्ञेयाः ॥१७॥

(क) शुङ्गराजमित्यत्प्रत्ययेन वक्तव्ये शुङ्गराजानमिति प्रयोग आर्षः। व्यसनिनमिति व्यसनमत्र कामज-कोपजदोषाः तद्वन्तम्; 'व्यसनं विपदि भ्रंशे दोषे कामज-कोपजे' इति कोषात्। कण्वस्य अपत्यानि काण्वायनाः, कण्वशब्दादपत्यार्थे आयनण्प्रत्ययः।

(ख) अन्ध्रभृत्या अन्ध्रजातीयभृत्यवंशीयाः शिप्रकनाम्नः काण्वायनसुशर्मभृत्यात् प्रभृति प्रवृत्ते वंशे जाताः।

(ट) वर्षशतं षड् वर्षाणि च व्याप्य भविष्यन्ति भूपतय इति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३८६ विष्णुपुराणम् [चतुर्थांश

मागधायां विश्वस्फटिकसंज्ञोऽन्यान् वर्णान् करिष्यति कैवर्त्त-कटु-पुलिन्द-ब्राह्मण्यान् राज्ये स्थापयिष्यन्नुत्साद्याखिलक्षत्त्रजातिम्। नव नागाः पद्मावत्यां कान्तिपुर्य्यां मथुरायामनुगङ्गा-प्रयागं मागधा गुप्ताश्च भोक्ष्यन्ति। कोशलोड्र-(पुराड्र) ताम्रलिप्तान् समुद्रतटपुरीश्च देवरक्षितो रक्षिष्यति। कलिङ्गमाहिषिकमाहेन्द्रभीमा गुहां भोक्ष्यन्ति। नैषाद-नैनीषिक-कालतोयान् जनपदान् मणिधारवंशा भोक्ष्यन्ति। स्त्रीराज्य-(त्रैराज्य) मूषिकजनपदान् कनकाह्वया भोक्ष्यन्ति। सौराष्ट्रा-वन्तिशूद्रानर्वुदमरुभूमिविषयांश्च व्रात्या द्विजाभीर-शूद्राद्या भोक्ष्यन्ति। सिन्धुतटदार्व्वीकोर्व्वी-चन्द्रभागा-काश्मीरविषयान् व्रात्या म्लेच्छादयः शूद्रा भोक्ष्यन्ति। एते च तुल्यकालाः सर्व्वे पृथिव्यां भूभृतो भविष्यन्ति। अल्पप्रसादा बृहत्कोपाः सर्व्वकालमनृताधर्म्मरुचयः स्त्री-बाल-गो-वधकर्त्तारः परस्वादानरुचयोऽल्पसारा उदितास्तमितप्रायाः स्वल्पायुषो महेच्छा अत्यल्पधर्म्माश्च भविष्यन्ति (ठ)॥१८॥

तैश्च विमिश्रा जनपदास्तच्छीलवर्त्तिनो राजा-श्रयशुष्मिणो म्लेच्छाश्चार्य्याश्च विपर्य्ययेण वर्त्तमानाः प्रजाः क्षपयिष्यन्ति (ड) ॥१९॥

ततश्चानुदिनमल्पाल्पह्रासाद् व्यवच्छेदाद् धर्म्मार्थयोर्-र्जगतः संक्षेपो भविष्यति ॥२०॥

ततश्चार्थ एवाभिजनहेतुः, धनमेवाशेषधर्म्महेतुः, अनृतमेव रुचिरेव दाम्पत्यसम्बन्धहेतुः, अनृतमेव व्यवहारस्य हेतुः, स्त्रीत्वमेवोपभोगहेतुः, रत्नताम्रभागितैव पृथिवी-हेतुः, ब्रह्मसूत्रमेव विप्रत्वहेतुः, लिङ्गधारणमेवाश्रम-हेतुः, अन्याय एव वृत्तिहेतुः(ढ) ॥२१-२२॥

क्षत्त्रजातिं क्षत्त्रजां संकरजातिम् उग्रसूतादिरूपाम्। एते ततस्तत्पुत्रा इत्यारभ्य शूद्रा इत्यन्तास्तुल्यकालाः खण्डमण्डलपतयोऽल्पप्रसादत्वादिविशिष्टा भूभृतो भविष्यन्ती-त्यन्वयः ॥१८॥

राजाश्रयेण शुष्मिणो बलिनः, न तु धर्मेण। म्लेच्छाश्चा-र्य्याश्च विपर्ययेण म्लेच्छा मध्ये आर्याश्चान्ते इत्येतद्रूपेण ॥१९॥

जगति धर्मस्यानुदिनं ह्रासादर्थस्य च व्यवच्छेदात् संक्षयो भविष्यति ॥२०॥

(ठ) तुल्यः कालः येषां ते तुल्यकालाः समानकाला एक-कालीना इत्यर्थः। उदितास्तमितप्रायाः उदिता अनन्तरमेव विना विलम्बम् अस्तमिताः तत्प्रायाः उत्पन्नविनष्टप्राया इत्यर्थः। तथाहि एवं तेषामायुषः परिमाणमल्पं येन उत्पत्त्यनन्तरमत्य-ल्पेनैव कालेन ते विनंङ्क्ष्यन्तीति भावः।

रत्नताम्रभागिता रत्नभूततताम्रादिमत्त्वमेव पृथिवीहेतुरुक्त-भूमित्वे कारणं, न तु पुण्यतीर्थादिमत्त्वम्। उन्नताम्बुमत्त्वं पाठे उन्नते गिरितटादावम्बुमत्त्वम् ॥२१॥

वृत्तिः जीविका ॥२२॥

(ड) राजाश्रयशुष्मिण इत्यत्र राजाश्रयेण शुष्मिणो बलि इति व्याख्यानं श्रीधरस्य। तच्च 'द्रविणन्तरः सहोबलशौ स्थानं शुष्मञ्च' इति कोषप्रामाण्यात्।

(ढ) अर्थ अव अभिजनहेतुः कौलीन्यहेतुः। न तु विद्या सम्पदादिः। तथाहि धनवानत्यर्थमकुलीनोऽपि कुलीनतया सम्प माप्स्यति इति भावः। धनमेव अशेषधर्माणां हेतुः, न तु सदाचा दिकम्। तथाहि यो धनी, स यदि समतिक्रान्तसदाचारमर्यादोऽ दिरपि भवेत्, तथाप्यसौ धार्मिक इति पूजामाप्स्यति। य एव महता धनव्ययेन धर्मस्य वृथैव प्रचारं करिष्यति, स

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दौर्बल्यमेव अवृत्तिहेतुः, भयगर्भोच्चारणमेव पाण्डित्यहेतुः(ण) ॥२३॥

दानमेव धर्म्महेतुः, आढ्यतैव साधुत्वहेतुः(त) ॥२४

ज्ञानमेव प्रसाधनहेतुः, स्वीकरणं विवाहहेतुः, सद्वेशधार्य्येव पात्रं दूरायतनोदकमेव तीर्थमित्येवमनेकदोषोत्तरे भूमण्डले सर्व्ववर्णेष्वेव यो यो बलवान् स स भूपतिर्भविष्यति । एवञ्चातिलुब्धकरभारासहाः शैलानामन्तरा द्रोणीः प्रजाः संश्रयिष्यन्ति । मधुशाकमूलफलपत्रपुष्पाहाराश्च भविष्यन्ति, तरुवल्कलचीरप्रावरणाश्चातिबहुप्रजाः शीतवातातपवर्षसहा भविष्यन्ति । न च कश्चित् त्रयोविंशतिवर्षाणि जीविष्यति । अनवरतं चात्र कलियुगे क्षयमायात्यखिलमेवैष जनः क्षयमुपैष्यति ॥२५॥

श्रौतस्मार्त्तधर्म्मे विप्लवमत्यन्तमुपगते क्षीणप्राये च कलावशेषजगत्स्रष्टुश्चराचरगुरोरादिमयस्यान्तमयस्य सर्व्वमयस्य ब्रह्ममयस्यात्मस्वरूपिणो भगवतो वासुदेवस्यांशः सम्भलग्रामप्रधानब्राह्मणविष्णुयशसो गृहे

भयगर्भोच्चारणं भयोपदर्शनपूर्वकमुच्चारणम् ॥२३॥

दानमेव धर्महेतुः, न तु यागादिः । आढ्यतैव साधुत्वहेतुः ॥२४॥

धार्मिक इति ख्यातिं लप्स्यते, न तु निर्धनः प्रचारं विना तूष्णीमखण्डधर्मानुष्ठातेति भावः ।

अभिरुचिरेव दम्पत्योः परस्परं रूपादिप्रीतिरेव दाम्पत्यसम्बन्धहेतुः, न तु शास्त्राद्यनुसारेण विवाह्यत्वाविवाह्यत्वादि विचारेण योग्यतानिर्णयः । तथापि सति मिथःप्रणये अविवाह्यत्वादिदोषस्थलेऽपि दम्पत्योर्मिथः सम्बन्धो भवितेति भावः ।

अनृतमेवेति, इदन्तु प्रायिकम्, व्यवहाराजीविनामनृतपक्षाश्रयिणां बुद्धिवचनयोरतिचातुर्य्यस्थल एव तद् बोद्धव्यम् । स्त्रीत्वमेवेति—सम्बन्धविशेषादिविचारमकृत्वा स्वीयापरकीयादिचिन्तां हित्वा सर्वा एव स्त्रियो निर्विशेषं भोग्या भविष्यन्तीति भावः । रजताग्रेत्यादि—यत्र सौकर्य्येण प्राचुर्येण च द्रविणलाभः, सैव भूमिः प्रशस्या सैव च समाश्रयणीया भविष्यति, न तु तदन्यथाभूता प्रशस्ततीर्थादिभूमिरपि इति भावः । ब्रह्मसूत्रं यज्ञोपवीतमेव न तु त्रैकालिकसन्ध्यावन्दनादिरपि । लिङ्गस्य सन्न्यासाद्याश्रमचिह्नस्य वल्कलजटाजूटादिरूपस्य धारणमेव केवलं तदेवेत्यर्थः । आश्रमहेतुः, न तु निष्कामत्वादिकमपि इति । अन्याय एव न्यायवाह्याचरणमेव वृत्तेः जीविकायाः हेतुः । तथाहि प्रायेण जीविकार्थं जना अन्याय्यमेव पन्थानमकुतोभयाः समाश्रयिष्यन्तीत्यर्थः ।

स्वीकरणमेव विवाहहेतुः, न तु स्मृत्याद्युक्तविधिप्रकारः । सद्वेशधारी दाम्भिकः । कलियुगे क्षयमशेषं याति सति जनः क्षयमुपैष्यतीत्यन्वयः ॥२५॥

एवं कलेरन्ते कल्क्यवतारेण सत्ययुगप्रवृत्तिमाह—'श्रौतस्मार्त्ते'त्यादिना । आदिमयस्य सर्वकारणरूपस्यान्तमयस्य निषेधावधिभूतस्य अत एव सर्वमयस्य निखिलकार्य्यमयस्य । ततो विकारादिप्राप्तावाह—ब्रह्ममयस्य अष्टगुणर्द्धिसमन्वितः । "अणिमा लघिमा प्राप्तिः प्राकाम्यं वशिता तथा । अत्र कामावसायित्वं महिमेति गुणाष्टकम्" इति-

---

(ण) दौर्बल्यं बलशून्यतैव अवृत्तिहेतुः, जीविकाभावः निदानम्नान तु गुण नामभाव एव तथा । तथाहि निर्गुणोऽपि बलवान् यदा सगुणस्य बलहीनस्य जीविकां बलात्कातेणाच्छिन्द्यात् तदा दुर्बलस्य तत्प्रतिरोधे सामर्थ्याभावेन वृत्त्यभाव एवेति भावः ।

(त) दानमेव देशकाल पात्राद्यविचारेण दानमेवधर्मः धर्मत्वेन गृहीतो व्यापारः तस्य दातृत्वादि ख्याति जनकत्वात् लोकवशीकारादिना च स्वार्थानुकूलत्वात् । आढ्यतैत धन शालित्वमेव साधुत्वहेतुः । तथाहि य एव धनवान् स एव असाधुरपि साधुरितिसम्मानभाग् भविष्यतीति । अथवा सुतरामसाधु कर्म कृत्वापि आढ्यो जनः प्रभूतधनादिकमुत् कोचादिरूपेण दत्त्वा धर्माधिकरणादावपि साधुरिति ख्यातिं प्रपत्स्यत इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३८८ विष्णुपुराणम् [चतुर्थांश

अष्टगुणर्द्धिसमन्वितः कल्किरूपी जगत्यत्रावतीर्य्य सकलम्लेच्छदस्युदुष्टाचरणचेतसामशेषाणामपरिच्छिन्न-माहात्म्यशक्तिः क्षयं करिष्यति ॥२६॥

स्वधर्म्मेषु चाखिलं जगत् संस्थापयिष्यतीति। अनन्तरञ्चाशेषकलेरवसाने प्रबुद्धानां तेषामेव जनपदानाममलस्फटिकविशुद्धमतयो भविष्यन्ति ॥२७

तेषाञ्च बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्यति ॥२८॥

तानि च तदपत्यानि कृतयुगधर्म्मानुसारीणि भविष्यन्तीति ॥२९॥

अत्रोच्यते

यदा चन्द्रश्च सूर्य्यश्च तथा तिष्य-बृहस्पती।
एकराशौ समेष्यन्ति भविष्यति तदा कृतम् ॥३०॥

अतीता वर्त्तमानाश्च तथैवानागताश्च ये।
एते वंशेषु भूपालाः कथिता मुनिसत्तम ॥३१॥

यावत् परीक्षितो जन्म यावन्नन्दाभिषेचनम्।
एतद्वर्षसहस्रन्तु ज्ञेयं पञ्चदशोत्तरम् ॥३२॥

सप्तर्षीणाञ्च यौ पूर्वौ दृश्येतै उदितौ दिवि।
तयोस्तु मध्यनक्षत्रं दृश्यते यत् समं निशि।
तेन सप्तर्षयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ॥३३॥

ते तु पारीक्षिते काले मघास्वासन् द्विजोत्तम!
तदा प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः ॥३४॥

यदैव भगवद्विष्णोरंशो यातो दिवं द्विज!
वसुदेवकुलोद्भूतस्तदैव कलिरागतः ॥३५॥

प्रोक्त-गुणयुक्तः। अन्ये त्वन्यथा गुणाष्टकं वदन्ति। "अणिमा महिमा चैव लघिमा गरिमा तथा। ईशित्वञ्च वशित्वञ्च प्राकाम्यं काममेव चे"ति ॥२६॥

प्रबुद्धानामित्यनेन सत्त्वगुणोद्रेको दर्शितः। तेन कालेन कृतानामाहितशक्तीनामित्यर्थः ॥२७॥

'तत्कालकृते'ति पाठे प्रसूतेर्विशेषणम् ॥२८॥

कालस्वभावादेव कृतयुगधर्मानुसारीणि ॥२९॥

एतत् सर्वं कस्मिन् योगे भविष्यतीत्यपेक्षायामाह। 'अत्रोच्यते' इति। तिष्यः पुष्यः, चन्द्रार्कबृहस्पतीनां तिष्ययोगे कृतं सत्ययुगं भविष्यति। यद्यपि प्रतिद्वादशाब्दं कर्कटस्थे बृहस्पतौ अमावास्यायां त्रयाणां पुष्यर्क्षेण योगः स्यात्, तथाप्येकराशौ समेष्यन्तीति सहप्रवेशोक्तेर्नातिप्रसङ्गः ॥३०॥

उक्तं राजवंशं निगमयति—'अतीता' इति। अनागता भूपालाश्च उक्ताः ॥३१॥

अनागतः क्षत्रियवंशः कियत्कालं स्थास्यतीत्यपेक्षायामाह—'यावदि'ति। पञ्चदशोत्तरसहस्रवर्षपर्य्यन्तं शुद्धः क्षत्रियवंशः स्थास्यति। अनन्तरं नन्देन सर्वक्षत्रि-नाशादित्यर्थः ॥३२॥

कलेः प्रवृत्तिं वृद्धिञ्च वक्तुं तत्काललक्षणमाह-'सप्तर्षीणा'मिति। प्राग्ग्रं शकटाकारं तारासप्तकं सप्तर्षि-मण्डलं, तत्र पूर्वत ईषाकारेऽग्रमध्यमूलेषु मरीचि-सम्भव-वशिष्ठाङ्गिरसः, ततः पश्चिमे खट्वाकारे तारास्तु ऐशानाग्नेय-नैर्ऋत-वायव्य-कोणेष्वत्रि-पुलस्त्य-पुलह-क्रतु-यथाक्रमं तत्र यौ पूर्वौ प्रथमोदितौ पुलह-क्रतुसंज्ञौ द्रष्टृ तयोस्तत्पूर्वयोश्च मध्ये समं दक्षिणोत्तररेखायां समहो वस्थितं यदश्विन्यादिनक्षत्रेष्वन्यतमनक्षत्रं दृश्यते, तेन तै युक्ता नृणामब्दशतं तिष्ठति ॥३३॥

काललक्षणमुक्त्वा कलिप्रवृत्तिमाह—'त' इति। सन्ध्यासन्ध्यांशाभ्यां सह द्वादशाब्दशतात्मकः पूर्वसन्ध्या पूर्वं सन्ध्यारूपेण प्रवृत्तोऽपि सन्ध्यारूपमविहा स्वेन रूपेण प्रवृत्तः प्रकर्षेण वृत्त इत्यर्थः ॥३४॥

एतदेव स्पष्टयति, यदैवेति द्वाभ्याम् ॥३५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यावत् स पादपद्माभ्यां पस्पर्शेमां वसुन्धराम् ।
तावत् पृथ्वीपरिष्वङ्गे समर्थो नाभवत् कलिः ॥३६॥

गते सनातनस्यांशे विष्णोस्तत्र भुवो दिवम् ।
तत्याज सानुजो राज्यं धर्मपुत्रो युधिष्ठिरः ॥३७॥

विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षिते ॥३८॥

प्रयास्यन्ति यदा ते च पूर्व्वाषाढ़ां महर्षयः ।
तदा नन्दात् प्रभृत्येष कलिर्बृद्धिं गमिष्यति ॥३९॥

यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे ॥४०॥

त्रीणि लक्षाणि वर्षाणां द्विज ! मानुषसंख्यया ।
षष्टिश्चैव सहस्राणि भविष्यत्येष वै कलिः ॥४१॥

शतानि तानि दिव्यानि सप्त पञ्च च संख्यया ।
निःशेषेण ततस्तस्मिन् भविष्यति पुनः कृतम् ॥४२॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम !
युगे युगे महात्मानः समतीताः सहस्रशः ॥४३॥

बहुत्वान्नामधेयानां परिसंख्या कुले कुले ।
पुनरुक्तबहुत्वात्तु न मया परिकीर्त्तिता ॥४४॥

देवापिः पौरवो राजा मरुश्चेक्ष्वाकुवंशजः ।
महायोगबलोपेतौ कलापग्रामसंश्रयौ ॥४५॥

कृते युग इहागत्य क्षत्रप्रावर्त्तकौ हि तौ ।
भविष्यतो मनोर्वंशे बीजभूतौ व्यवस्थितौ ॥४६॥

एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा ।
कृतत्रेतादिसंज्ञानि युगानि त्रीणि भुज्यते ॥४७॥

कलौ तु बीजभूतास्ते केचित् तिष्ठन्ति भूतले ।
यथैव देवापि-मरू साम्प्रतं समवस्थितौ ॥४८॥

एष तूद्देशतो वंशस्त्वयोक्तो भूभुजां मया ।
निखिलो गदितुं शक्यो नैव जन्मशतैरपि ॥४९॥

पृथ्वीपरिष्वङ्गे भूमेः परिभवे समर्थ इत्युक्तेः पूर्वमपि कलिः प्रविष्ट इति गम्यते ॥३६॥

साक्षात् कलिप्रवेशे तु युधिष्ठिरादिभिः स्वराज्यं परित्यक्तमित्याह—'गत' इति द्वाभ्याम् ॥३७॥

कलेः प्रवृत्तिमुक्त्वा वृद्धिमाह—'प्रयास्यन्ति' इति ॥३९॥

पूर्वोक्तमेव कलिप्रवेशकालमनूद्य तत्संख्यामाह—'यस्मिन्निं'ति त्रिभिः ॥४०॥

त्रीणीति सन्ध्या—सन्ध्यांशाभ्यां विनेति ज्ञेयम् ॥४१॥

दिव्यानि दिव्यसंख्यया संख्यातानि सप्तपञ्चसंख्यया द्वादशाब्दशतानीत्यर्थः । निःशेषेण तस्मिन् गते सतीति शेषः । कृतं कृतयुगम् ॥४२॥

ब्राह्मणादिवंशः क्षतियवंशश्च सकलः किमिति नोक्त इत्यत आह—'ब्राह्मणा' इति द्वाभ्याम् ॥४३॥

कुले कुले अवान्तरकुलेषु नामधेयानां परिसंख्या बहुत्वात् समाननामतया पौनरुक्त्याच्च नोक्ता ॥४४॥

महापद्माख्यनन्दात् क्षत्त्रियाणां नाशेऽपि पुनः प्रवृत्तिमाह—'देवापि'रिति द्वाभ्याम् ॥४५॥

क्षत्रस्य प्रवर्त्तकौ भविष्यतः, यतो मनोर्वंशे सोमसूर्य्यवंशरूपे बीजभूतौ व्यवस्थितौ ॥४६॥

कलेः सन्ध्यायामेव क्षत्त्रियसत्त्वात् त्रीणि युगानि भुज्यत इत्युक्तम् ॥४७॥

देवापि-मरुवदन्यत्रापि कलौ ब्राह्मणादीनां बीजभूतानां स्थितिमाह—'कलौ त्वि'ति ॥४८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३६० विष्णुपुराणम् [चतुर्थांश

एते चान्ये च भूपाला यैरत्र क्षितिमण्डले ।
कृतं ममत्वं मोहान्धैर्नित्येऽनित्यकलेवरैः ॥५०॥

कथं ममेयमचला मत्पुत्रस्य कथं मही ।
मद्वंशस्येति चिन्तार्त्ता जग्मुरन्तमिमे नृपाः ॥५१॥

तेभ्यः पूर्व्वतराश्चान्ये तेभ्यस्तेभ्यस्तथापरे ।
भविष्याश्चैव यास्यन्ति तेषामन्ये च येऽप्यनु ॥५२॥

विलोक्यात्मजयोद्योग-यात्राव्यग्रान् नराधिपान् ।
पुष्पप्रहासैः शरदि हसतीव वसुन्धरा ॥५३॥

मैत्रेय ! पृथिवीगीताः श्लोकाश्चात्र निबोध तान् ।
यानाह धर्मध्वजिने जनकायासितो मुनिः ॥५४॥

पृथिव्युवाच ।

कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन फेनसधर्माणोऽप्यतिविश्वस्तचेतसः ॥५५॥

पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥५६॥

क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥५७॥

समुद्रावरणं याति मन्मण्डलमथो वशम् ।
कियदात्मजयादेतन्मुक्तिरात्मजये फलम् ॥५८॥

उत्सृज्य पूर्व्वजा याता यां नादाय गतः पिता ।
तां ममेति विमूढत्वाज्जेतुमिच्छन्ति पार्थिवाः ॥५९॥

मत्कृते पितृपुत्राणां भ्रातृणाञ्चापि विग्रहाः ।
जायन्तेऽत्यन्तमोहेन ममताधृतचेतसाम् ॥६०॥

पृथ्वी ममेयं सकला ममैषा
ममान्वयस्यापि च शाश्वतेयम् ।
यो यो मृतो ह्यत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥६१॥

दृष्ट्वा ममत्वाद्धतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्थस्य कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥६२॥

वंशकथनस्य वैराग्ये तात्पर्य्यमाह—'एते चे'ति । भूमण्डले नित्ये कल्पान्तस्थायिनि तदपेक्षया अनित्यानि अस्थिराणि कलेवराणि येषां तथाभूतैरपि ममत्वं कृतम् ॥५०॥

मोहान्धत्वमेवाह—'कथं ममेय'मिति द्वाभ्याम् ॥५१॥

तेभ्यस्तेभ्यः पूर्वतरा इत्यनेनातीतानां मोहावस्था दर्शिता, एवं भविष्या इत्यनागतानां मोहावस्था ॥५२॥

एतदेव पृथिवीगीतैः प्रपञ्चयति—'कथमेष' इति नवभिः । फेनसधर्माणः क्षणभङ्गुरा इत्यर्थः ॥५५॥

पूर्वमात्मजयमिति अजितेन्द्रियाणां मन्त्रिभृत्यादिजयाभावात् ॥५६॥

किञ्चैवं सर्वमात्मवशीकुर्वतो मम भुवो मण्डलं वशं याति । यद्यपि तथाप्यात्मनामिन्द्रियादीनां जयात् जातमेतदनित्यं राज्यं कियदत्यल्पम् । क्षयादात्मजये सति मुक्तिरत्यन्तं फलम् ॥५८॥

अनित्यत्वमेवाह—'उत्सृज्ये'ति । पूर्वजाः पूर्वेषामिति पाठः ॥५९॥

राज्ये पित्रादिवैरमपि दोषमाह—'मत्कृत'इति ॥६०॥

किञ्च मयि राज्ञां ममत्वबुद्धिवृ[illegible]थैवेत्याह—'पृथ्वी ममेयं' अत्र मयि यो यो राजा मृतो बभूव, तस्य तस्यैवेयं कुबुद्धिरासीत्, ततः पारमार्थिकफलाभावात् । अन्यत्रेति [illegible] मृतः स त्वन्यत्र राजा बभूव, तस्यापि वासनावशादिन्द्रि[illegible] कुबुद्धिः संसारप्रदासीदित्यर्थः ॥६१॥

किञ्चैवं चित्रमित्याह—'दृष्ट्वे'ति । मयि ममत्वाहतचि[illegible] सन्तमेव मृतं दृष्ट्वा तदन्वयस्थस्य हृदि मत्प्रभवं मदीयं ममत्वं कथमास्पदं करोतीति ॥६२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृथ्वी ममैषाशु परित्यजैनां
वदन्ति ये दूतमुखैः स्वशत्रुम् ।
नराधिपास्तेषु ममातिहासः
पुनश्च मूढेषु दयाभ्युपैति ॥६३॥

पराशर उवाच ।

इत्येते धरणीगीता श्लोका मैत्रेय ! यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हिमम् ॥६४॥

इत्येष कथितः सम्यङ्मनोर्व्वंशो मया तव ।
यत्र स्थितिप्रवृत्तस्य विष्णोरंशांशका नृपाः ॥६५॥

शृणुयाद् य इमं भक्त्या मनुवंशमनुक्रमात् ।
तस्य पापमशेषं वै प्रणश्यत्यमलात्मनः ॥६६॥

धनधान्यर्द्धिमतुलां प्राप्नोत्यव्याहतेन्द्रियः ।
श्रुत्वैवमखिलं वंशं प्रशस्तं शशिसूर्य्ययोः ॥६७॥

इक्ष्वाकु-जह्नु-मान्धातृ-सगरा-विक्षितान् रघून् ।
ययाति-नहुषाद्यांश्च ज्ञात्वा निष्ठामुपागतान् ।
महाबलान् महावीर्य्याननन्तधनसञ्चयान् ॥६८॥
कृतान् कालेन बलिना कथाशेषान् नराधिपान् ।
श्रुत्वा न पुत्रदारादौ गृहक्षेत्रादिके तथा ।
द्रव्यादौ च कृतप्रज्ञो ममत्वं कुरुते नरः ॥६९॥
तप्तं तपो यैः पुरुषप्रवीरै-
रुद्बाहुभिर्वर्षगणाननेकान् ।
इष्टाश्च यज्ञा बलिनोऽतिवीर्य्याः
कृतास्तु कालेन कथावशेषाः ॥७०॥
पृथुः समस्तान् प्रचचार लोका-
नव्याहतो योऽरिविदारिचक्रः ।
स कालवाताभिहतो विनष्टः
क्षिप्तं यथा शाल्मलितूलमग्नौ ॥७१॥
यः कार्त्तवीर्य्यो बुभूजे समस्तान्
द्वीपान् समाक्रम्य हतारिचक्रः ।
कथाप्रसङ्गे त्वभिधीयमानः
स एव सङ्कल्पविकल्पहेतुः ॥७२॥
दशानना-विक्षित-राघवाणा-
मैश्वर्य्यमुद्भासितदिङ्मुखानाम् ।
भस्मापि जातं न कथं क्षणेन
भ्रूभङ्गपातेन धिगन्तकस्य ॥७३॥

अपि च एतेऽतिशोच्या इत्याह—'पृथ्वी'ति । तेषु मम हासो भवति, मूढत्वाद् दयाभ्युपैति ममेति शेषः ॥६३॥

चतुर्थांशस्य श्रवणफलमाह—'शृणुयादि'ति । मनुवंश-स्थानां पुण्यकीर्त्तीनां श्रवणात् पापक्षयो धनादिवृद्धिश्च भवति ॥६६॥

निष्ठां नाशम् । तादृशानामपि नाशानुसन्धानात् ममतानिवृत्तिस्तु भवतीत्यर्थः ॥७८॥

न च तेषां तपःप्रभावाद्यभावात् कथावशेषत्वमित्याह, 'तप्त'मिति ॥७०॥

तानेवाह—'पृथु'रिति द्वाभ्याम् ॥६१॥

संकल्पविकल्पयोः केषाञ्चित् संकल्पस्य तथेति प्रत्ययस्य, केषाञ्चिद् विकल्पस्य किमासीन्न वेति सन्देहस्य, हेतुर्निमित्तं, संकल्पस्य मनसो विकल्पहेतुः ॥७२॥

उद्भासितानि दिङ्मुखानि यैः । उद्भासितदिग्वितानमिति पाठे ऐश्वर्य्यविशेषणम् । तेषां रावणादीनामैश्वर्य्यम् अन्तकस्य भ्रूभङ्गपातेन कथं भस्म न जातं, किन्तु जातमेव, तस्मादैश्वर्य्यं धिक् । यद्वा काष्ठं दग्धमपि भस्म भवति, ऐश्वर्य्यं भस्मापि न जातं किञ्चिदवशिष्टमपि कथं न जातं ? तस्मात् धिक् ॥७३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

---

आत्मन्यहंकारास्पदे देहेऽपि किं पुनः पुत्रदारादौ ॥७४॥

भगीरथाद्याः सत्यं जाताः, किन्तु क्व ते इति न विद्मः, कालेनादर्शनं नीता इत्यर्थः । अत्र राघवादीनां ग्रहणं लोकदृष्ट्या वैराग्यार्थम् ॥७५॥

तथा अन्येऽनुक्तास्तथाभिधेयाः कथामात्रावशेषा भविष्यन्तीत्यर्थः ॥७६॥

एतदंशतात्पर्य्यार्थं संक्षिप्याह—'एतदि'ति । तत्तदयस्तिष्ठन्तु, ममत्वं सुतरां न कार्यमित्यर्थः ॥७७॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां चतुर्थेऽंशे चतुर्विंशोऽध्यायः ।

चतुर्थोऽंशः सम्पूर्णः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चमांशः

प्रथमः अध्यायः

[वसुदेव-देवक्योर्विवाहः, ब्रह्मणः समीपे पृथिव्या गमनम् विष्णोः स्तोत्रम्,
कंसादीन् हन्तुं विष्णोरङ्गीकारश्च]

मैत्रेय उवाच ।

नृपाणां कथितः सर्व्वो भवता वंशविस्तरः ।
वंशानुचरितञ्चैव यथावदनुवर्णितम् ॥१॥

अंशावतारो ब्रह्मर्षे योऽयं यदुकुलोद्भवः ।
विष्णोस्तं विस्तरेणाहं श्रोतुमिच्छाम्यशेषतः ॥२॥

चकार यानि कर्म्माणि भगवान् पुरुषोत्तमः ।
अंशांशेनावतीर्य्योर्व्व्यां तत्र तानि मुने ! वद(क) ॥३॥

पराशर उवाच ।

मैत्रेय ! श्रूयतामेतद् यत् पृष्टोऽहमिदं त्वया ।
विष्णोरंशांश-सम्भूति-चरितं जगतो हितम्(ख) ॥४॥

देवकस्य सुतां पूर्व्वं वसुदेवो महामुने !
उपयेमे महाभागां देवकीं देवतोपमाम् ॥५॥

कंसस्तयोर्वररथं चोदयामास सारथिः ।
वसुदेवस्य देवक्याः संयोगे भोजवर्द्धनः ॥६॥

प्रथमः अध्यायः

अथातः पञ्चमांशे श्रीकृष्णलीलामहोदयः । बिन्दुमाधवतोषाय यथामति वितन्यते । उक्तानुवादपूर्वकं श्रीकृष्णावतारप्रकारं तच्चरितानि च पृच्छति—'नृपाणा'मिति त्रिभिः ॥१॥

विष्णोरंशावतारः परब्रह्मण एव परिच्छिन्ननराकारेणावतारः । विस्तरेणेति—यदर्थं यदा च येन च प्रकारेणावततार इत्याद्यविशेषतः श्रोतुमिच्छामि ॥२॥

तच्चरितञ्च विस्तरेण वदेत्याह—'चकारे'ति । परब्रह्मणोऽंश इवांशः क्षीराब्धिशायी, तस्यांश इवांशो नराकारः, तेनावतीर्य्य तत्र यानि चकार, तानि वदेत्यन्वयः ॥३॥

सम्भूतिश्च चरितञ्चेति द्वन्द्वैक्यम् ॥४।५॥

वररथं दाम्पत्यकल्पनार्थं रथं, प्रीत्या सारथिरिव स्थितश्चोदयामास इत्यर्थः । संयोगे वैवाहिकसम्बन्धे ॥६॥

(क) अंशांशेनेति—यद्यपि परब्रह्मणो निरंशत्वात् परब्रह्मरूपस्य पुरुषोत्तमस्य नांशो युज्यते, तथापि उपचारेणोत्प्रेक्ष्याह अंशांशेनेति । अतएव श्रीधरः—परब्रह्मणोऽंइवांशः क्षीराब्धिशायी, तस्यांश इवांशः नराकारस्तेनेति व्याख्यातवान् ।

(ख) अंशांशसम्भूतिचरितमिति—अत्र 'सम्भूतिश्च चरितञ्चेति द्वन्द्वैक्यमिति श्रीधरव्याख्यानम् । द्वन्द्वैक्यमिति—द्वन्द्वस्य समाहारद्वन्द्वस्य ऐक्यम् एकत्वम्, अत एव क्लीवलिङ्गम्, तदुक्तम्—द्वन्द्वैकत्वमिति सूत्रव्याख्याने दुर्गसिंहाचार्य्येण,—"समाहारस्यैकत्वात् समाहारद्वन्द्वे नपुंसकलिङ्गम्भवतीत्यर्थ" इति । न च समाहारद्वन्द्वः 'अनुवादे चरणाना' मित्याद्युक्तविषयनियत एवेति वाच्यम्, 'दर्शितेभ्योऽन्यत्रानियम' इति दुर्गसिंहेन; 'दर्शितेभ्योऽन्यत्र समाहार इतरेतरयोगश्च प्रवर्त्तते नियमस्याभावादिति त्रिलोचनदासेन, 'दर्शितेभ्योऽन्यत्रानियम' इति सुषेणाचार्य्येण द्वन्द्वैकत्वमिति सूत्रव्याख्यायामेवोपन्यस्यता समाहारेतरेतरयोगयोः 'अनुवादे चरणाना' मित्याद्युक्तस्थलातिरिक्तस्थलेषु तयोर्विकल्पेनैव प्रवृत्तेः सूचनात् । तत्रैव 'एषामभिधानव्यवस्था भाष्येऽप्याहता' इति वचनाद् भाष्यसमम्मतिरप्यत्र प्रतिपद्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथान्तरीक्षे वागुच्चैः कंसमाभाष्यसादरम् ।
मेघगम्भीरनिर्घोषं समाभाष्येदमब्रवीत् ॥७॥

यामेतां वहसे मूढ़ ! सह भर्त्रा रथे स्थिताम् ।
अस्यास्ते चाष्टमो गर्भः प्राणानपहरिष्यति (ग) ॥८॥

पराशर उवाच ।

इत्याकर्ण्य समादाय खड्गं कंसो महाबलः ।
देवकीं हन्तुमारब्धो वसुदेवोऽब्रवीदिदम् ॥९॥

न हन्तव्या महाबाहो ! देवकी भवता तव ।
समर्पयिष्ये सकलान् गर्भानस्योदरोद्भवान् (घ) ॥१०॥

पराशर उवाच ।

तथेत्याह च तं कंसो वसुदेवं द्विजोत्तम !
न घातयामास च तां देवकीं तस्य गौरवात्(ङ) ॥११॥

एतस्मिन्नेव काले तु भूरिभारावपीड़िता ।
जगाम धरणी मेरौ समाजे त्रिदिवौकसाम्(च) ॥१२॥

सब्रह्मकान् सुरान् सर्व्वान् प्रणिपत्याह मेदिनी ।
कथयामास तत् सर्व्वं खेदात् करुणभाषिणी(छ) ॥१३॥

पृथिव्युवाच ।

अग्निः सुवर्णस्य गुरुर्गवां सूर्य्यः परो गुरुः ।
ममाप्यखिललोकानां गुरुर्नारायणो गुरुः ॥१४॥

अन्तरीक्षे अशरीरवाक्। आभाष्यसादरमित्येकं पदम् आभाष्ये वक्तव्येऽर्थे यथासौ सादरः स्यात्तथा उच्चैः समाभाष्य सम्बोध्य मेघस्य गम्भीरो निर्घोषो यथा भवत्येवमिदं वक्ष्यमाणं वाक्यमब्रवीदित्यर्थः ॥७॥८॥

आरब्धः कर्त्तरि क्तः, हन्तुं प्रवृत्त इत्यर्थः ॥९॥

अस्योदरोद्भवानित्यार्षः सन्धिः। अस्य कलत्रस्येति वा। अस्य तवेति वान्वयः। यद्वा असुक्षेपण इति धातोरस्येति हि—लोपे रूपम् मया समर्पितान्यत्र क्वापि यथेच्छं क्षिपेत्यर्थः ॥१०॥११॥

ततश्चातिभयात् कंसे देवकीप्रसूतिप्रतीक्षया स्थिते सति भारावपीड़ितधरण्या प्रार्थितैर्देवैः संस्तुत्य प्रसादितो हरिः षड्गर्भादिपूर्वकमवततारेति वक्तुमाह—'एतस्मिन्नेवे'त्यादि। यावदध्यायसमाप्ति। धरणी गोरूपेण जगामेति हेः 'गौर्भूत्वाश्रुमुखी'ति शुकोक्तेः ॥१२॥

तत् सर्वं दैत्यभारपीड़ादि ॥१३॥

अग्निरित्यादेरयमर्थः,—यथाग्निः सुवर्णस्य गुरुर्जनकः 'अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः' स्मृतेः। अतो यथाग्निः सुवर्णस्य मलं दहन् सुवर्णं रः यथा च गवां सूर्य्यः परो गुरुः, अतस्ताः पर्जन्यरूपेण पुष्णा गावो रश्मयो वा, अतस्तान् यथा विवर्द्धयति, तथा म नारायणो गुरुः, यतोऽसावखिललोकानां गुरुः। अतः मम भारहर्त्ता पालकश्च। तथापि साक्षात्तद्विज्ञप्तौ सामर्थ्यात् भवताञ्च तदंशत्वाद् भवन्तो मया भारापन प्रार्थ्यन्त इति ॥१४॥

(ग) मूढ़ेति आत्मन एव नाशहेतोरज्ञानादिति भावः।

(घ) समर्पयिष्ये तुभ्यमिति शेषः। अस्य तवेति व्याख्यानपक्षे तुभ्यमिति नाध्याहार्य्यम्, किन्तु उदरोद्भवानित्यत्र अस्या देवक्या इत्यध्याहर्त्तव्यम्। ततस्त्वं तेषां यथेच्छं हननादिकं कृत्वा निःशङ्को भवितुं शक्ष्यसीति भावः।

(ङ) तस्य वसुदेवस्य गौरवात् उत्कर्षात् महत्त्वादित्यर्थः। तथाहि—वसुदेवस्तथा महान् पुरुषो यथा नायमन्यथा वक्ति अन्यथा च करोति, अतः स्वकथानुसारेणासौ सकलानेव देवक्या गर्भान् मह्यमर्पयिष्यति, येनाहं निःशङ्को भविष्यामीति भावः।

(च) मेरौ सुमेरुपर्वते, तस्य देवाधिष्ठानत्वात्। त्रिदिवौकसां स्वर्गवासिनां देवानां, समाजे सभायाम्।

(छ) ब्रह्मणा सह वर्त्तमानाम् सब्रह्मकान् ब्रह्मणा सहि बहुव्रीहौ कः। सब्रह्मकानित्यनेन समासे उपसर्जनीकृत्य प्रति स्यापि ब्रह्मणः पृथक्तया समुद्देशादेव सुरेष विशेषः प्रति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रजापतिपतिर्ब्रह्मा पूर्व्वेषामपि पूर्व्वजः ।
कला-काष्ठा-निमेषात्मा कालश्चाव्यक्तमूर्त्तिमान् ॥१५॥

तदंशभूतः सर्व्वेषां समूहो वः सुरोत्तमाः !
आदित्या मरुतः साध्या रुद्रा वस्वश्वि-वह्नयः ॥१६॥

पितरो ये च लोकानां स्रष्टारोऽत्रिपुरोगमाः ।
एतत् तस्याप्रमेयस्य रूपं विष्णोर्महात्मनः ॥१७॥

यक्ष-राक्षस-दैतेयाः पिशाचोरग-दानवाः ।
गन्धर्व्वाप्सरसश्चैव रूपं विष्णोर्महात्मनः ॥१८॥

ग्रहर्क्षतारकाचित्र-गगनाम्निजलानिलाः ।
अहश्च विषयाश्चैतत् सर्व्वं विष्णुमयं जगत् ॥१९॥

तथाप्यनेकरूपस्य तस्य रूपाण्यहर्निशम् ।
बाध्यबाधकतां यान्ति कल्लोला इव सागरे(ज) ॥२०॥

तत् साम्प्रतमिमे दैत्याः कालनेमिपुरोगमाः ।
मर्त्यलोकं समाक्रम्य बाधन्तेऽहर्निशं प्रजाः ॥२१॥

कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना ।
उग्रसेनसुतः कंसः सम्भूतः स महासुरः ॥२२॥

अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा ।
सुन्दोऽसुरस्तथात्युग्रो वाणश्चापि बलेः सुतः ॥२३॥

तथान्ये च महावीर्य्या नृपाणां भवनेषु ये ।
समुत्पन्ना दुरात्मानस्तान् न संख्यातुमुत्सहे ॥२४॥

अक्षौहिण्योऽत्र बहुला दिव्यमूर्त्तिधृतां सुराः ।
महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि ॥२५॥

तद्भूरिभारपीड़ार्त्ता न शक्नोम्यमरेश्वराः !
विभर्त्तुमात्मानमहमिति विज्ञापयामि वः ॥२६॥

क्रियतां तन्महाभागाः ! मम भारावतारणम् ।
यथा रसातलं नाहं गच्छेयमिति विह्वला ॥२७॥

पराशर उवाच ।

इत्याकर्ण्य धरावाक्यमशेषं त्रिदशैस्ततः ।
भुवो भारावतारार्थं ब्रह्मा प्राह प्रचोदितः ॥२८॥

ब्रह्मोवाच ।

यथाह वसुधा सर्व्वं सत्यमेतद्दिवौकसः !
अहं भवो भवन्तश्च सर्व्वं नारायणात्मकम् ॥२९॥

कालश्च तदंशभूतः तच्छक्तित्वात् ॥१५॥

सर्वेषां वो युष्माकञ्च समूहस्तदंशभूतः । विश्वरूपत्वात्तस्य एतदेव प्रपञ्चयति 'आदित्या' इत्यादि सार्द्धैस्त्रिभिः । वसवश्च अश्विनौ च वह्नयश्चेति विग्रहः ॥१६॥

महात्मनो विश्वरूपस्य विष्णो रूपम् ॥१७।१८॥

ग्रहादिभिश्चित्रमिति गगनविशेषणादेव तेषामपि तद्रूपतोक्ता । अहश्च भूः विषयाः शब्दादयः ॥१९॥

(ज) कल्लोला इवेत्यादि—तथाहि यथा एकस्य सलिलमयस्य सागरस्य अंशभूतेष्वेव सर्वेषु कल्लोलेषु सत्स्वपि तेषां मिथो बाध्यबाधकभावेन कश्चित् प्रतिहन्यते, कश्चिच्च प्रतिहन्ता भवति, तथैव एकस्य विष्णोरंशभूतेष्वेव देवदानवादिजीवनिवहेषु सर्वेषु मिथो विरोधात् केचिद् बाध्याः, केचिच्च बाधका इत्येवं विशेषः सम्भवत इति भावः ।

एकस्यैव रूपञ्चेत् सर्वं कुतोऽन्योन्यविरोधस्तत्राह—'तथापी'ति ॥२०।२१॥

ननु कालनेमिः श्रागेव हतः, तत्राह—'कालनेमि'रिति ॥२२

अक्षौहिणीसंख्या भारतोक्ता—'अक्षौहिण्याः प्रसंख्यानं रथानां दन्तिनां तथा । एकविंशतिसाहस्त्रं शतान्यष्टौ च सप्ततिः । ज्ञेयं शतसहस्रन्तु सहस्राणि तथा नव । नराणामपि पञ्चाशत् शतानि त्रीणि चैव हि । पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च । दशोत्तराणि षट् प्राहुरेवमक्षौहिणी बुधाः' इति ॥२५।२६।२७॥

अशेषत्रिदशैः सह धराया वाक्यमाकर्ण्य धरयैव प्रचोदितो ब्रह्मा प्राह ॥२८।२९॥

(झ) विभर्त्तुमिति विपूर्वस्य भृधातो रूपम्, विशेषेण धारयितुमित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विभूतयस्तु यास्तस्य तासामेव परस्परम् ।
आधिक्यन्यूनता बाध्यबाधकत्वेन वर्त्तते ॥३०॥

तदागच्छत गच्छामः क्षीराब्धेस्तटमुत्तरम् ।
तत्राराध्य हरिं तस्मै सर्व्वं विज्ञापयाम वै (ञ) ॥३१॥

सर्व्वदैव जगत्यर्थे स सर्व्वात्मा जगन्मयः ।
स्वल्पांशेनावतीर्य्योर्व्व्यां धर्म्मस्य कुरुते स्थितिम्(ट)॥३२

पराशर उवाच ।

इत्युक्त्वा प्रययौ विप्र ! सह देवैः पितामहः ।
समाहितमतिश्चैवं तुष्टाव गरुड़ध्वजम् ॥३३॥

ब्रह्मोवाच ।

द्वे विद्ये त्वमनाम्नाय परा चैवापरा तथा ।
ते एव भवतो रूपे मूर्त्तामूर्त्तात्मके प्रभो ॥३४॥

द्वे ब्रह्मणी त्वणीयोऽतिस्थूलात्मन् ! सर्व्व सर्व्ववित्
शब्दब्रह्म परञ्चैव ब्रह्म ब्रह्ममयस्य यत् ॥३५॥

ऋग्वेदस्त्वं यजुर्व्वेदः सामवेदस्त्वथर्व्व च ।
शिक्षा कल्पो निरुक्तञ्च छन्दो ज्योतिषमेव च ॥३६

इतिहास-पुराणे च तथा व्याकरणं प्रभुः ।
मीमांसा न्यायकं तत्त्वं (१) धर्म्मशास्त्राण्यधोक्षज
॥३७

आत्मात्मदेहगुणवद् विचाराचारि यद्वचः ।
तदप्यादिपते नान्यदध्यात्मात्मस्वरूपवत् ॥३८॥

त्वमव्यक्तमनिर्द्देश्यमचिन्त्यानामवर्णवत् ।
अपाणिपादरूपञ्च शुद्धं नित्यं परात्परम् ॥३९॥

आधिक्यं बाधकत्वेन न्यूनता च बाध्यत्वेन वर्त्तते इत्यर्थः ॥३०।३१।३२।३३॥

भो अनाम्नाय ! साक्षाद् वेदस्याप्यविषयीभूत ! द्वे विद्ये वेदितव्ये परा चैवापरा चेति श्रुतिप्रोक्ते परापरब्रह्मविषये द्वे विद्ये । ते एव तद्विषयभूते परापरे ब्रह्मणी मूर्त्तामूर्त्तात्मके भवतो रूपे ॥३४॥

एतदेव स्फुटयति—'द्वे ब्रह्मणीत्वि'ति । द्वे ब्रह्मणी भवतो रूपे इत्यन्वयः । एतदेव सम्बोधनद्वारेण दर्शयति—अणीयः सूक्ष्मतमम् । अतिस्थूलात्मन् स्थूलरूप ! त्वंपदलक्ष्यविराट्रूप ! अत एव सर्वविश्वरूप ! सर्ववित् सर्वज्ञ ! किञ्च यत् ज्ञापकं शब्दब्रह्म ज्ञाप्यञ्च परं ब्रह्म ते द्वे परब्रह्मात्मकस्य भगवतो रूपम् इत्यन्वयः ॥३५॥ तत्र कर्मविषयं शब्दब्रह्मत्वमित्याह—'ऋग्वेद' इति द्वाभ्याम् ॥३६-३७॥

परब्रह्मविषयमपि शब्दब्रह्मत्वमेवेत्याह—'आत्मात्मे' आत्मात्मशब्दाभ्यां जीवपरमात्मनोः देहशब्देन स्थूलसू शरीरे, गुणवच्छब्देन तत्कारणमव्यक्तम् । एतेषां वि माचरतीति तथा । एवञ्च विचारे क्रियमाणे यद्व स्वरूपं त्वंपदलक्ष्यम् आत्मस्वरूपञ्च तत्पदलक्ष्यं तद्ब्रह्म भूतमस्ति यस्मिन् वचसि तत्तथाभूतोपनिषद् वचस्त्वम् भवति । भो आद्यपते ब्रह्मादिस्वामिन् ! यद्वा ऋग्वेदादि रेवोपनिषद्रूपत्वस्याप्युक्तत्वादनेन श्लोकेन सांख्ययोग सारि तत्र तदाचार्योपदेशवचोरूपतोच्यते इति व्याख्येयम्

शब्दब्रह्मरूपतामुक्त्वा परब्रह्मरूपतामाह—'त्वमि अव्यक्तं चक्षुरादेरगोचरः, अनिर्देश्यं वाचामगो अचिन्त्यं मनसोऽप्यगोचरः, अचिन्त्यञ्च तदनामवर्णक पाणिपादवर्জ्जितस्वरूपं नित्यञ्च परादव्यक्तात् परम् । रूपादि शून्यत्वादिन्द्रियवाङ्मनसामविषयभूतं विदुर्योगिनस्तदपि त्वमेवेत्यन्वयः ॥३९॥

(ञ) विज्ञापयामेत्यत्र इष्टाशंसने जाताया लोट्विभक्तेरुत्तमपुरुषबहुवचनम् । तस्मै हरये सर्वस्य वस्तुनोऽस्माभिर्विज्ञापनं भवत्वित्यर्थः ।

(ट) जगत्याः सर्वस्य भुवनस्य अर्थे प्रयोजने साध्ये । अथवा जगति निखिले अर्थे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शृणोष्यकर्णः परिपश्यसि त्व-
मचक्षुरेको बहुरूपरूपः ।
अपादहस्तो जवनो ग्रहीता
त्वं वेत्सि सर्व्वं न च सर्व्ववेद्यः ॥४०॥

अणोरणीयांसमसत्स्वरूपं
त्वां पश्यतोऽज्ञाननिवृत्तिरग्र्या ।
धीरस्य धीर्यस्य बिभर्त्ति नान्यद्-
वरेण्य-रूपात् परतः परात्मन् ॥४१॥

त्वं विश्वनाभिर्भुवनस्य गोप्ता
सर्व्वाणि भूतानि तवान्तराणि ।
यद्भूतभव्यं तदणोरणीयः
पुमांस्त्वमेकः प्रकृतेः परस्तात् ॥४२॥

एकश्चतुर्द्धा भगवान् हुताशो-
वर्च्चो विभूतिं जगतो ददासि ।
त्वं विश्वतश्चक्षुरनन्तमूर्त्ते ! -
त्रेधा पदं संनिदधे विधातः ॥४३॥

यथाग्निरेको बहुधा समिध्यते
विकारभेदैरविकाररूपः ।
तथा भवान् सर्व्वगतैकरूपो
रूपाण्यशेषाण्यनुपुष्यतीश ॥४४॥

एकस्त्वमग्र्यं परमं पदं यत्
पश्यन्ति त्वां सूरयो ज्ञानदृश्यम् ।
त्वत्तो नान्यत् किञ्चिदस्ति त्वयीह
यद्वा भूतं यच्च भाव्यं परात्मन् ॥४५॥

ईश्वररूपतामाह—'शृणोषी'ति दशभिः । बहूनि रूपाणि रूपं यस्य सः । अपादोऽपि जवनो वेगवान्, अहस्तोऽपि ग्रहीता, श्रुतिश्च—"अपाणिपादो जवनो ग्रहीता, पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता, तमाहुरग्र्यं पुरुषं महान्तम्" ॥ इति ॥४०॥

ईश्वरमप्रच्युतब्रह्मस्वरूपं पश्यतस्तत्त्वदर्शित्वान्मोक्षः स्यादित्याह,—त्वामचिन्त्यशक्तिमीश्वरं अणोः अणीयांसं निरुपाधित्वेनातिसूक्ष्मतमम्, अत एवासत्स्वरूपमिवावस्थितम् । यद्वा असतः प्रपञ्चस्यात्मरूपं पश्यतस्तत्त्वदर्शिनोः अग्रथा आत्यन्तिकी अज्ञाननिवृत्तिर्भवति । कथम्भूतस्येत्यत आह—'धीरस्ये'ति । हे परतोऽव्यक्तात् परमात्मन् ! यस्य धीरस्य विपश्चितः धीर्वरेण्यरूपात् परमानन्दमूर्त्तेस्त्वत्तोऽन्यन्न विभर्त्ति न धारयति, तस्य स वासनाज्ञाननिवृत्त्या मोक्षो-भवतीत्यर्थः ॥४१॥

ननु मायाशवलस्य कथं प्रकृतेः परत्वं तत्राह—'त्वमि'ति विश्वस्य नाभिराश्रयः । आन्तराणि मध्ये स्थितानि । यद्यस्मात्त्वत्तो भूतं भव्यञ्च । एवंभूतोऽपि पुमानीश्वरस्त्वं अणोरणीयः प्रकृतेः परस्तात् स्थितं ब्रह्मैव । न तु प्रच्युत-ब्रह्मभावः, मायायाः स्वाश्रयानावरकत्वादिति भावः ॥४२॥

'भुवनस्य गोप्ते'ति यदुक्तं तत् प्रपञ्चयति-'एकश्चे'ति । श्रौतास्त्रयोऽग्नय औपासनश्चैक इत्येवं चतुर्धा । यद्वा 'ऐन्धनो जाठरश्चाग्निः वैद्युतो वाड़वस्तथे'त्येवं चतुर्धा । यद्वा वैद्युतनिर्मन्थ्य सौरजाठरात्मना चतुर्धा । वर्चस्तेजः विभूतिं सम्पदञ्च ददासि । त्रेधा पदं भूर्भुवः स्वर्लोकेषु त्रिविक्रमावतारे सन्निदधे निहितवान्, 'त्रेधा विष्णुरूपा माया विचक्रम' इति श्रुतेः ॥४३॥

'अनन्तमूर्त्ते' इति यदुक्तं तत् प्रपञ्चयति—'यथाग्नि'रिति त्रिभिः । अनुपुष्यति वर्द्धयति ॥४४।४५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यक्ताव्यक्तस्वरूपस्त्वं समष्टिव्यष्टिरूपवान् ।
सर्व्वज्ञः सर्व्वदक् सर्व्वशक्तिज्ञानबलर्द्धिमान् ॥४६॥

अन्यूनाप्याप्यवृद्धिश्च स्वाधीनो मादिमान् वशी ।
क्लम-तन्द्रा-भय-क्रोध-कामादिभिरसंयुतः ॥४७॥

निरवद्यः परप्रीतो निरनिष्टोऽक्षरक्रमः ।
सर्व्वेश्वरः पराधारो धाम्नां धामात्मकोऽक्षयः ॥४८॥

सकलावरणातीत ! निरालम्बनभावन !
महाविभूतिसंस्थान ! नमस्ते पुरुषोत्तम ॥४९॥

नाकारणात् कारणाद् वा कारणाकारणान्न च ।
शरीरग्रहणं वापि धर्म्मत्राणाय ते परम् ॥५०॥

पराशर उवाच ।

इत्येवं संस्तुतिं श्रुत्वा मनसा भगवानजः ।
ब्रह्माणमाह प्रीतात्मा विश्वरूपधरो हरिः ॥५१॥

श्रीभगवानुवाच ।

भो भो ब्रह्मन् ! त्वया मत्तः सह देवैर्यदिष्यते ।
तदुच्यतामशेषं वः सिद्धमेवावधार्य्यताम् ॥५२॥

पराशर उवाच ।

ततो ब्रह्मा हरेर्दिव्यं विश्वरूपमवेक्ष्य तत् ।
तुष्टाव भूयो देवेषु साध्वसावनतात्मसु ॥५३॥

ब्रह्मोवाच ।

नमो नमस्तेऽस्तु सहस्रमूर्त्ते !
सहस्रबाहो ! बहुवक्त्रपाद !
नमो नमस्ते जगतः प्रवृत्ति-
विनाश-संस्थानकराप्रमेय ॥५४॥

व्यक्तं महदादि, अव्यक्तं प्रधानम्, तत्स्वरूपस्त्वम्, अतः समष्टिर्विराड्देहः, व्यष्टिस्तद्विशेषश्चतुर्विधो भूतग्रामः तत्स्वरूपवान्, सर्वज्ञः सामान्येन, सर्वविद् विशेषतः ॥४६॥

तदेवं सर्वकार्यरूपत्वेऽपि कार्ये दोषराहित्यं वदन्नचिन्त्यमैश्वर्य्यमाह—'अन्यून' इति त्रिभिः । वशी नियन्ता । क्लमः श्रमः, तन्द्रा आलस्यम् ॥४७॥

निरवद्यो निर्मलः, निरनिष्टः प्रतिकूलशून्यः । पाठान्तरेऽधिष्ठानः शून्य इत्यर्थः । पराधारः ब्रह्मादीनामाश्रयः, धाम्नां तेजसां सूर्यादीनां धामात्मकः प्रकाशकरूपः ॥४८॥

सकलावरणातीत ! अन्नमयादिपञ्चकोषासंस्पृष्ट ! अतो निरालम्बनभावन ! निरुपाधित्वान्निर्विषयेण चित्तेन विभाव्य ! महाविभूतिर्विश्वप्रपञ्चात्मिका संस्थानं सन्निवेशो यस्य तथाभूत ॥४९॥

ननु कुतो ममावरणातीतत्वं मत्स्यकूर्माद्यनेकदेहावृत्तत्वादित्यत आह—'ने'ति अकस्य दुःखस्य अरणात् प्रापणादकारः सधर्मः, कस्य सुखस्यारणात् प्रापणात् कारणं धर्मः, तदुभयमिश्रितं कारणाकारणम् ; ऐतेभ्यो हि यथाक्रमं तिर्य्यक्सुरनरादीनां जन्म प्रतिषिद्धम् । ते तव तु नैवं जन्म, किन्तु धर्मत्राणायैव, सर्वस्य परमानन्दरूपस्य कर्मपारतन्त्र्याभावात् । यद्वा न विद्यतेऽकमेषामिति नाकाः देवास्तेषामावरणादाक्रोशात् । कस्य ब्रह्मण आवरणाद्वा कारणाकारणात्तदुभयाक्रोशाच्च ते शरीरग्रहणं न भवति, किन्तु जगतः कृपया, धर्मत्राणायैव केवलम् । न हि स्वेच्छावृतविशुद्धोर्जितसत्त्वविग्रहैरावरणं स्यादित्यर्थः ॥५०।५१॥

यदिष्यते अपेक्ष्यते ॥५२॥

साध्वसं भयं तेनावनतशरीरेषु सत्सु ॥५३॥

प्रवृत्तिः सृष्टिः, संस्थानं स्थितिः ॥५४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाण !
गरीयसामप्यतिगौरवात्मन् !
प्रधानबुद्धीन्द्रियवत्-प्रधान-
मूलात् परात्मन् ! भगवन् ! प्रसीद ॥५५॥

एषा मही देव ! महीप्रसूतै-
र्महासुरैः पीड़ित-शैलबन्धा ।
परायणं त्वां जगतामुपैति
भारावतारार्थमपारसारम् ॥५६॥

एते वयं वृत्ररिपुस्तथायं(ट)
नासत्यदस्रौ वरुणो यमश्च ।
इमे च रुद्रा वसवः ससूर्य्याः
समीरणाग्निप्रमुखास्तथान्ये ॥५७॥

सुराः समस्ताः सुरनाथ ! कार्य्य-
मेभिर्मया यच्च सदीश सर्व्वम् ।
आज्ञापयाज्ञां प्रतिपालयन्त-
स्तथैव तिष्ठाम सदास्तदोषाः(ठ) ॥५८॥

पराशर उवाच

एवं संस्तूयमानस्तु भगवान् परमेश्वरः ।
उज्जहारात्मनः केशौ सित-कृष्णौ महामुने ॥५९॥

उवाच च सुरानेतौ मत्केशौ वसुधातले !
अवतीर्य्य भुवो भार-क्लेशहानिं करिष्यतः ॥६०॥

सुराश्च सकलाः स्वांशैरवतीर्य्य महीतले ।
कुर्व्वन्तु युद्धमुन्मत्तैः पुर्व्वोत्पन्नैर्महासुरैः ॥६१॥

ततः क्षयमशेषास्ते दैतेया धरणीतले ।
प्रयास्यन्ति न सन्देहो मद्दृक्पातविचूर्णिताः ॥६२॥

वसुदेवस्य या पत्नी देवकी देवतोपमा ।
तस्यायमष्टमो गर्भो मत्केशो भविता सुराः ॥६३॥

अतिबृहत् प्रमाणं यस्य, अतिगौरवयुक्त आत्मा मूर्त्तिर्यस्य, प्रधानं प्रकृतिः, बुद्धिर्महत्तत्त्वम्, इन्द्रियवान् अहंकारः, एतेषां प्रधानः पुरुषः, स एव मूलं जगत्कर्त्तृत्वात्, तस्मादपि परात्मन्! तन्नियन्तृस्वरूप ॥५५॥

एवं स्तुत्वा प्रस्तुतमाह—'एषे'ति । मह्यां प्रसूतैर्महद्भिरसुरैः पीड़ितोऽतिश्लथीकृतः शैलबन्धः पर्वतरूपमूलबन्धो यस्याः सा, अपारसारम् अनन्तबलम्। अपारपारमिति पाठे अपारः अशक्यः पारः पर्य्यन्तो यस्येति ॥५६॥

अस्माभिश्च तव यत् साहाय्यं कार्यं तदाज्ञापयेत्याह—'एते वय'मिति द्वाभ्याम्। नासत्यदस्रौ अश्विनौ ॥५७॥५८॥

उज्जहार उत्पाटितवान्। अयं भावः,—मम दुष्करञ्चेत् युष्माभिः साहाय्यं कार्यं स्यात्, न त्वेतदस्ति, भूभारहरणादौ महत्यपि कार्य्ये मत्केशमात्रस्यैव समर्थत्वादिति। न तु केशमात्रावतार इति मन्तव्यम्। महृक्पातविचूर्णिता इति कृष्णाष्टम्यामहमुत्पत्स्यामीत्यादिषु साक्षात् स्वावतारतोक्तेः, सितकृष्णकेशधारणञ्च शोभार्थमेव श्रीवत्सरोमवत्, न त्वजरामरस्यार्द्धपलितत्वं सम्भवति। 'काष्ठामुहूर्त्तादिमयश्च कालो न यद्विभूतेः परिणामहेतु'रित्युक्तत्वात् ॥५९॥

भारनिमित्तस्य क्लेशस्य हानिं करिष्यतः ॥६०॥

तथापि युद्धादिक्रीड़ार्थं सुरानाज्ञापयति—'सुराश्चे'ति ॥६१॥

तैर्योद्धुमशक्ता वा वयमिति न भेतव्यमित्याह—'ततः क्षय'मिति ॥६२॥

(ट) वृत्ररिपुः वृत्रासुरहन्ता वासवः, 'वासवो वृत्रहा वृषा' इति कोषात्।

(ठ) प्रतिपालयन्तः अपेक्षमाणाः तिष्ठ्यामेति लोटि रूपम्। अस्तः क्षिप्तः दूरीकृत इत्यर्थः, अभिमानादि दोषः यैः ते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवतीर्य्य च तत्रायं कंसं घातयिता भुवि ।
कालनेमिं समुद्भूतमित्युक्त्वान्तर्दधे हरिः ॥६४॥

अदृश्याय ततस्तेऽपि प्रणिपत्य महात्मने !
मेरुपृष्ठं सुरा जग्मुरवतेरुश्च भूतले ॥६५॥

कंसाय चाष्टमो गर्भो देवक्यां धरणीधरः ।
भविष्यतीत्याचचक्षे भगवान् नारदो मुनिः ॥६६॥

कंसोऽपि तदुपश्रुत्य नारदात् कुपितस्ततः ।
देवकीं वसुदेवञ्च गृहे गुप्तावधारयत्(ड) ॥६७॥

जातं जातञ्च कंसाय तेनैवोक्तं यथा पुरा ।
तथैव वसुदेवोऽपि पुत्रमर्पितवान् द्विज ॥६८॥

हिरण्यकशिपोः पुत्राः षड्गर्भा इति विश्रुताः ।
विष्णुप्रयुक्ता तान् निद्रा क्रमाद् गर्भे न्ययोजयत्(ढ)॥६९

योगनिद्रा महामाया वैष्णवी मोहितं यया ।
अविद्यया जगत् सर्व्वं तामाह भगवान् हरिः ॥७०॥

श्रीभगवानुवाच

निद्रे ! गच्छ ममादेशात् पातालतल-संश्रयान् ।
एकैकत्वेन षड्गर्भान् देवकीजठरं नय(ण) ॥७१॥

हतेषु तेषु कंसेन शेषाख्योऽंशस्ततो मम ।
अंशांशेनोदरे तस्याः सप्तमः सम्भविष्यति ॥७२॥

गोकुले वसुदेवस्य भार्य्यान्या रोहिणी स्थिता ।
तस्याः स सम्भूतिसमं देवि ! नेयस्त्वयोदरम् ॥७३॥

सप्तमो भोजराजस्य भयाद् रोधोपरोधतः ।
देवक्याः पतितो गर्भ इति लोको वदिष्यति ॥७४॥

गर्भसङ्कर्षणात् सोऽथ लोके सङ्कर्षणेति वै ।
संज्ञामवाप्स्यते वीरः श्वेताद्रिशिखरोपमः(त) ॥७५॥

ततोऽहं सम्भविष्यामि देवकीजठरे शुभे ।
गर्भे त्वया यशोदाया गन्तव्यमविलम्बितम् ॥७६॥

अयं कृष्णवर्णो मत्केशः, रामलीलानामप्युपलक्षणमेतत् ॥६३।६४।६५।६६॥

गुप्तौ सुरक्षितौ ॥६७॥

तेनैव स्वेनैव पुरा यथोक्तं—'समर्पयिष्ये सकलान् पुत्रान स्योदरोद्भवा'निति ॥६८।६९॥

कथं सा विष्णुना प्रयुक्ता ? किं वापरं तस्याः कार्य्यमादिष्टम् ? इत्यपेक्षायामाह — 'योगनिद्रे'त्यादिना यावत्समाप्ति । योग एवात्मानुभूतिलक्षणो बाह्यानुभवाद्व्यावृत्तौ निद्रेव निद्रा सैव ब्रह्मादीनपि मोहयन्ती महामाया, सैव जीवानां ज्ञानमाच्छादयन्ती अविद्यारूपेण जगत् सर्वमावृत्य यया स्वशक्त्या मोहितं मिथ्याभिनिवेशवत् कृतं तामाहेत्यर्थः ॥७० ७१ । ७२॥

(ड) अधारयत् अस्थापयत्, धृङ् अवस्थाने इत्यस्य धृङ्-धातोर्णिचि रूपम् ।

(ढ) निद्रा योगनिद्रा ।

सम्भूतिः सममनुरूपं यथा भवत्येवं नेयः । प्रागेव वसुदेव-हितगर्भाया रोहिण्याः पश्चाद् गोकुलं गतायाः सप्तमे मासि वायुभूतं गर्भमपसार्य्य देवकीजठरात् सप्तमं गर्भमलक्षितमाकृष्य तस्या उदरं नेय इत्यर्थः । रोधोपरोधतः कारागारनिरोधात् ॥७३-३४॥

संकर्षणइति संज्ञामपाप्स्यति ॥७५॥

त्वया यशोदाया गर्भं प्रति गन्तव्यम् ॥७६॥

(ण) पातालतलसंश्रयान् पातालतलनिवासिनः । गर्भान् हिरण्यकशिपोः पुत्रान् ।

(त) अवाप्स्यत इत्यत्रात्मनेपदप्रयोग आर्षः । श्वेतवर्णः कैलासाचलः तस्य शिखरं शृङ्गं तदुपमः तत्तुल्यः । अथवा श्वेतं यत् अद्रिशिखरं तत्तुल्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रावृट्काले च नभसि कृष्णाष्टम्यामहं निशि ।
उत्पत्स्यामि नवम्याञ्च प्रसूतिं त्वमवाप्स्यसि(थ) ।७७

यशोदाशयने मान्तु देवक्यास्त्वामनिन्दिते !
मच्छक्तिप्रेरितमतिर्वसुदेवो नयिष्यति(द) ॥७८॥

कंसश्च त्वामुपादाय देवि ! शैलशिलातले ।
प्रक्षेप्स्यत्यन्तरीक्षे च त्वं स्थानं समवाप्स्यसि(ध) ।७९

ततस्त्वां शतदृक् शक्रः प्रणम्य मम गौरवात् ।
प्रणिपातानतशिरा भगिनीत्वे ग्रहीष्यति ॥८०॥

ततः शुम्भनिशुम्भादीन् हत्वा दैत्यान् सहस्रशः ।
स्थानैरनेकैः पृथिवीमशेषां मण्डयिष्यसि ॥८१॥

त्वं भूतिः सन्नतिः कीर्त्तिः क्षान्तिद्यौः पृथिवी धृतिः ।
लज्जा पुष्टिरुषा या च काचिदन्या त्वमेव सा ॥८२॥

ये त्वामार्य्येति दुर्गेति वेदगर्भेऽम्बिकेति च ।
भद्रेति भद्रकालीति क्षेम्या क्षेमङ्करीति च ॥८३॥

प्रातश्चैवापराह्णे च स्तोष्यन्त्यानम्रमूर्त्तयः ।
तेषां हि प्रार्थितं सर्व्वं मत्प्रसादाद्भविष्यति ॥८४॥

सुरामांसोपहारैस्तु भक्ष्यभोज्यैश्च पूजिता ।
नृणामशेषकामांस्त्वं प्रसन्ना सम्प्रदास्यसि ॥८५॥

ते सर्व्वे सर्व्वदा भद्रे ! मत्प्रसादादसंशयम् ।
असन्दिग्धा भविष्यन्ति गच्छ देवि ! यथोदितम् ।८६

इति श्रीविष्णुपुराणे पञ्चमांशे प्रथमः अध्यायः ॥

नभसि श्रावणे मासि निश्यर्द्धरात्रेऽष्टम्यामहमुत्पत्स्यामि । अर्द्धरात्रानन्तरं नवम्यां प्रविष्टायां यशोदाशयने मां नेष्यति त्वाञ्च देवक्याः शयने ॥७७-७८॥

तथापि त्वया न भेतव्यमित्याह—'कंसश्चे'ति ॥७९॥

तां प्रोत्साहयति—'ततस्त्वा'मिति सप्तभिः । शतशब्दोऽपरिमितवचनः सहस्रदृगित्यर्थः ॥८०॥

स्थानैर्योगपीठाख्यायतनैर्बिन्ध्यजालन्धराद्यैः ॥८१॥

तस्या विभूतिमाह—'त्वं भूति'रिति । या च काचिदन्यापि स्त्रीजातिः सापि त्वमेव ॥८२।८४॥

सुराद्युपहारैर्यथाधिकारं सर्वैः शूद्रादिभिरपि पूजिता सती ॥८५॥

ते सर्वे त्वया प्रसन्नया दत्ताः कामाः मत्प्रसादादसन्दिग्धा अव्यभिचरिता भविष्यन्ति । अतः असंशयं गच्छ ॥८६॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे प्रथमोऽध्यायः ॥

(थ) प्रावृट्काले वर्षाकाले । प्रसूतिम् उत्पत्तिम् । उत्पत्स्यामीत्यत्रपरस्मैपदमार्षम् ।

(द) नीधातोरत्र स्थापनरूपार्थविवक्षया यशोदाशयने इत्यत्राधिकरणे सप्तमी, तत्पक्षे देवक्या इत्यत्र शयने इत्यध्याहार्य्यम् । नेष्यतीति संस्कारेण वक्तव्ये नयिष्यतीत्यसंस्कृतप्रयोग आर्षः । नीधातोः स्वतःसिद्धप्रापणार्थत्वे तु शयनपदोत्तरं कर्मणि द्वितीयाप्रसक्तौ सप्तमीप्रयोग आर्षः । देवक्या इत्यत्र तु शयनमित्येव योजनीयम् ।

(ध) शैलशिलातले प्रस्तरखण्डतले । स्थानंसमवाप्स्यसि उत्पत्स्येति शेषः ।

(न) अत्र श्रीधरकृतव्याख्यानपक्षे 'भद्रे' इति देव्याः सम्बोधनम् । अत्र अर्थान्तरमप्युन्नीयते यथा—ये त्वां पूर्वोक्तरीत्या स्तोष्यन्ति, ते सर्वे सर्वदा मत्प्रसादात् भद्रे मङ्गले क्षिये असन्दिग्धाः सन्देहशून्या भविष्यन्ति । सन्दिग्धं सन्देहः संपूर्वदिह्-धातोर्भावे क्तप्रत्ययात् सन्दिग्धेतिपदनिष्पत्त्या न विद्यते सन्दिग्धं सन्देहो येषां ते असन्दिग्धा इति व्युत्पत्तेः । अन्यत् समम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयः अध्यायः

[यशोदागर्भे योगमायाया देवकीगर्भे भगवतश्च प्रवेशः। देवानां देवकीस्तुतिः।]

पराशर उवाच।

यथोक्तं सा जगद्धात्री देवदेवेन वै तदा।
षड्गर्भ-गर्भविन्यासं चक्रे चान्यस्य कर्षणम् ॥१॥

सप्तमे रोहिणीं प्राप्ते गर्भे गर्भं ततो हरिः।
लोकत्रयोपकाराय देवक्याः प्रविवेश वै(क) ॥२॥

योगनिद्रा यशोदायास्तस्मिन्नेव ततो दिने।
सम्भूता जठरे तद्वद् यथोक्तं परमेष्ठिना ॥३॥

ततो ग्रहगणाः सम्यक् प्रचचार दिवि द्विज!
विष्णोरंशे भुवं याते ऋतवश्चाभवन् शुभाः(ख) ॥४॥

न सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा।
जाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमाययुः ॥५॥

अदृष्टां पुरुषैः स्त्रीभिर्देवकीं देवतागणाः।
बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् ॥६॥

देवता ऊचुः।

प्रकृतिस्त्वं परा सूक्ष्मा ब्रह्मगर्भाभवः पुरा।
ततो वाणी जगद्धातुर्वेदगर्भासि शोभने ॥७॥

सूर्य्यस्वरूपगर्भासि सृष्टिभूता सनातनि!
बीजभूता तु सर्व्वस्य यज्ञभूताभवस्त्रयी ॥८॥

फलगर्भा त्वमेवेज्या वह्निगर्भा तथारणिः।
अदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः ॥९॥

ज्योत्स्ना वासरगर्भा त्वं ज्ञानगर्भासि सन्नतिः।
नयगर्भा परा नीतिर्लज्जा त्वं प्रश्रयोद्वहा(ग) ॥१०॥

द्वितीयः अध्यायः

षड्गर्भाख्यानं देवक्याः गर्भविन्यासं क्रमेण निक्षेपम् अन्यस्य सप्तमस्य गर्भस्य देवक्या उदराद्रोहिण्या जठरं प्रतिकर्षणञ्च चक्रे ॥१॥

देवक्या गर्भं हरिः प्रविवेशेत्यन्वयः ॥२॥

परमेष्ठिना परमेश्वरेण ॥३।४।५॥

तत्रस्थैः स्त्रीपुरुषैरदृष्टाः सन्तस्तुष्टुवुः ॥६॥

या पुरा ब्रह्मप्रतिबिम्बधारिणी प्रकृतिरभवत्, सा त्वन्वयः। एवं सर्वत्र ॥७।८।९॥

ज्योत्स्ना प्रकाशः, सन्नतिः सतां नतिः गुरुसेवेत्यर्थः। नयो न्यायः सामादिः गर्भे यस्य सा नीतिः शास्त्रं त्वम्, लज्जा अनौद्धत्येन वृत्तिः ॥१०॥

(क) देवक्या गर्भमिति सम्बन्धः। जगद्धात्री सा योगनिद्रा।

(ख) भुवं याते प्राप्ते देवकीगर्भद्वारेणेति शेषः।

(ग) प्रश्रयं प्रणयम् उद्वहति या सा प्रश्रयोद्वहा, 'प्रणयौ समा' विति कोषात्। प्रश्रयो विनय इति क्वचित्। प्रश्रयः प्रीत्या प्रार्थनमिति राय-भरतौ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कामगर्भा तथेच्छा त्वं तुष्टिः सन्तोषगर्भिणी ।
मेधा च बोधगर्भासि धैर्य्यगर्भोद्वहा धृतिः(घ) ॥११॥

ग्रहर्क्षतारकागर्भा द्यौरस्यखिलहैतुकी ।
एता विभूतयो देवि ! तथान्याश्च सहस्रशः ॥१२॥

तथासङ्ख्या जगद्धात्रि ! साम्प्रतं जठरे तव ।
समुद्राद्रि-नदी-द्वीप-वन-पत्तनभूषणा ॥१३॥

ग्राम-खर्व्वट-खेटाढ्या समस्ता पृथिवी शुभे !
समस्तवह्नयोऽम्भांसि सकलाश्च समीरणाः ॥१४॥

ग्रहर्क्षतारकाचित्रं विमानशतसङ्कुलम् ।
अवकाशमशेषस्य यद्ददातिनभःस्थलम् ॥१५॥

भूर्लोकश्च भुवर्लोकः स्वर्लोकोऽथ महर्ज्जनः ।
तपश्च ब्रह्मलोकश्च ब्रह्माण्डमखिलं शुभे ॥१६॥

तदन्तरे स्थिता देवा दैत्य-गन्धर्व्व-चारणाः ।
महोरगास्तथा यक्षा राक्षसाः प्रेतगुह्यकाः ॥१७॥

मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि !
तैरन्तःस्थैरनन्तोऽसौ सर्व्वेशः सर्व्वभावनः ॥१८॥

रूपकर्म्मस्वरूपाणि न परिच्छेदगोचरे ।
यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव ॥१९॥

त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरम्बरे ।
त्वं सर्व्वलोकरक्षार्थमवतीर्णा महीतले ॥२०॥

प्रसीद देवि ! सर्व्वस्य जगतः शं शुभे ! कुरु ।
प्रीत्या त्वं धारयेशानं धृतं येनाखिलं जगत् ॥२१॥

इति श्रीविष्णुपुराणे पञ्चमांशे द्वितीयः अध्यायः

कामः कामितार्थो गर्भे यस्याः सा फलाव्यभिचारिणीच्छा त्वमित्यर्थः । तुष्टिरलम्बुद्धिस्तन्निमित्तः सन्तोषो गर्भे यस्याः सा त्वम्, धैर्य्यमलौ, धृतिर्बुद्धेः स्थिरता अखिलहैतुकी वृष्ट्यादिद्वारा सर्वस्य हेतुरेव हैतुकी यतः प्रकृतिस्त्वमित्यादिनोक्ताः प्रतिनियतैकैकवस्तुगर्भास्तव विभूतयः, इदानीन्तु पृथिव्यादिसमस्तप्रपञ्चगर्भः श्रीविष्णुस्तव गर्भेऽस्तीति स्तुवन्तः प्राहुः साम्प्रतमित्यादि यावत्समाप्ति ॥११-१३॥

रूपं तत्त्वं, कर्म लीला, स्वरूपं मूर्त्तिः, नामकर्मेति वा पाठः । यस्य रूपादीन्यखिलानि प्रमाणानि चाल्पत्वमहत्त्वादिपरिमाणानि परिच्छेदस्य निर्द्धारस्य गोचरे न वर्त्तन्ते । पाठान्तरे यस्य नामादीन्यखिलानि प्रमाणानां परिच्छेद्यानि न भवन्ति, स विष्णुस्तव गर्भं प्राप्तः ॥१६-२०॥

प्रीत्या धारय, मा पुनः प्राग्गर्भसामान्यतो दृष्ट्या विषादं कुरु ॥२१॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमे-ऽंशे द्वितीयोऽध्यायः ॥

(घ) धैर्य्यरूपो यो गर्भः, तम् उद्वहति धारयतीति धैर्य्यगर्भोद्वहा धैर्य्यस्वरूपगर्भधारिणी ।

(ङ) ईशानम् ईश्वरम् । येन ईशानेन विष्णुना ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृतीयोऽध्यायः

[भगवत आविर्भावः, योगमायाद्वारा कंसस्य वञ्चना च]

एवं संस्तूयमाना सा देवैर्दैवमधारयत् ।
गर्भेण पुण्डरीकाक्षं जगतस्त्राणकारणम् ॥१॥
ततोऽखिलजगत्पद्मबोधायाच्युतभानुना ।
देवकीपूर्व्वसन्ध्यायामाविर्भूतं महात्मना(क) ॥२॥
तज्जन्मदिनमत्यर्थमाह्लाद्यमलदिङ्मुखम् ।
बभूव सर्वलोकस्य कौमुदी शशिनो यथा ॥३॥
सन्तः सन्तोषमधिकं प्रशमं चण्डमारुतः ।
प्रसादं निम्नगा याता जायमाने जनार्द्दने(ख) ॥४॥
सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम् ।
जगुर्गन्धर्व्वपतयो ननृतुश्चाप्सरोगणाः ॥५
ससृजुः पुष्पवर्षाणि देवा भुव्यन्तरीक्षगाः ।
जज्वलुश्चाग्नयः शान्ता जायमाने जनार्द्दने ॥६॥
मध्यरात्रेऽखिलाधारे जायमाने जनार्दने ।
मन्द्रं जगर्ज्जुर्जलदाः पुष्पवृष्टिमुचो द्विज ॥७॥
फुल्लेन्दीवरपत्राभं चतुर्बाहुमुदीक्ष्य तम् ।
श्रीवत्सवक्षसं जातं तुष्टावानकदुन्दुभिः(ग) ॥८॥
अभिष्टूय च तं वाग्भिः प्रसन्नाभिर्महामतिः ।
विज्ञापयामास तदा कंसाद्भीतो द्विजोत्तम(घ) ॥९॥

वसुदेव उवाच ।

ज्ञातोऽसि देवदेवेश ! शङ्ख-चक्र-गदाधर !
दिव्यरूपमिदं देव प्रसादेनोपसंहर(ङ) ॥१०॥
अद्यैव देव ! कंसोऽयं कुरुते मम घातनम् ।
अवतीर्ण इति ज्ञात्वा त्वमस्मिन् मम मन्दिरे ॥११॥

तृतीयोऽध्यायः

अखिलं जगदेव पद्मं तस्य वोधाय विकाशाय अच्युत-रूपेण भानुना देवक्येव पूर्वसन्ध्या तस्यामाविर्भूतम् ॥२॥

आह्लादि वभूव । अमलानि दिशां मुखानि यस्मिन् तत्, कौमुदी ज्योत्स्ना ॥३।४॥

सिन्धवः नद्यो वा ॥५॥

शान्ताः सौम्याः प्रदक्षिणावर्त्ताः ॥६॥

जगर्ज्जुः गर्ज्जितं चक्रुः ॥७।८।९॥

तव भयं नास्त्येव, तथापि मयि प्रसादेन हेतुनोपसंहर ॥१०॥

तदेवाह—'अद्यैवे'ति । 'कुरुते' इति भविष्यति वर्त्त निर्देशो वर्त्तमानसामीप्ये । इति एवञ्चतुर्भुजेन रूपेणा ज्ञात्वा ॥११॥

(क) पूर्वसन्ध्यायां प्रभातवेलायाम् ।

(ख) चण्डमारुतः प्रवलो वायुः झञ्झावायुरित्यर्थः । याता प्राप्ताः अस्य सर्वैः द्वितीयान्तपदैः सह सम्बन्धः ।

(ग) प्रफुल्लं विकसितं यत् इन्दीवरं नीलोत्पलं तत् दलं तदाभं तत्तुल्यं रूपम् । चत्वारः बाहवः यत्र तम् । रोमावर्त्तविशेषः, तेन युक्तं वक्षः यस्य तम् । अथवा अस्यास्तीति श्रीवत्सम, अस्त्यर्थे अप्रत्ययात्, तथाभूतं वक्ष तम् । आनकदुन्दुभिः वसुदेवः, अस्य नामनिरुक्तिरुक्तपू

(घ) विज्ञापयामास वक्ष्यमाणं वस्त्विति शेषः ।

(ङ) इदं दृश्यमानं दिव्यं लौकिकं रूपं शङ्खच लाञ्छनं चतुर्बाहुकं रूपमित्यर्थः, उपसंहर तिरोभावं नय। तव तादृशं रूपं दृष्ट्वा गगनवाणीयोगार्थ्यमनुभूय स कं सुतरां दुःसहं यातनं तव च न चिरेण वधादिकं करि भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवक्युवाच ।

योऽनन्तरूपोऽखिलविश्वरूपो
गर्भेषु लोकान् वपुषा बिभर्त्ति ।
प्रसीदतामेष स देवदेवः
स्वमायया विष्कृतबालरूपः(च) ॥१२॥

उपसंहर सर्व्वात्मन् ! रूपमेतच्चतुर्भुजम् ।
जानातु मावतारं ते कंसोऽयं दितिजाधमः ॥१३॥

श्रीभगवानुवाच ।

ततोऽहं यत् त्वया पूर्व्वं पुत्रार्थिन्या तदद्य ते ।
सफलं देवि ! सञ्जातं जातोऽहं यत् तवोदरात्(छ)॥१४

पराशर उवाच ।

इत्युक्त्वा भगवांस्तूष्णीं बभूव मुनिसत्तम !
वसुदेवोऽपि तं रात्रावादाय प्रययौ बहिः ॥१५॥

मोहिताश्चाभवंस्तत्र रक्षिणो योगनिद्रया ।
मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ(ज) ॥१६॥

वर्षतां जलदानाञ्च तोयमत्युल्वणं निशि ।
संछाद्यानुययौ शेषः फणेनानकदुन्दुभिम्(झ) ॥१७॥

यमुनां चातिगम्भीरां नानावर्त्तसमाकुलाम् ।
वसुदेवो वहन् विष्णुं जानुमात्रवहां ययौ(ञ) ॥१८॥

अखिलविश्वरूपः कृत्स्नजगद्रूपः ॥१२॥

दितिजाधमः दैत्येभ्योऽपि दुष्टः । दितिजात्मज इति पाठे दुमिलाख्येन दैत्येन उग्रसेनवेशधारिणा तद्भार्यायां कंस उत्पादित इति हरिवंशे नारदेनोक्तं ज्ञेयम् ॥१३॥

पूर्वं स्वायम्भुवेऽन्तरे ॥१४॥

तूष्णीं बभूवेति प्राकृतबालभावोक्त्यैव कंसवधपर्यन्तं पित्रोः प्रार्थनया चतुर्भुजत्वोपसंहारोऽपि कृत इति गम्यते ॥१५।१६।१७।

विष्णुं वहन्निति तद्वहनादेव जानुमात्रजलां कृत्वा ययावित्यर्थः । अयमेव हेतुः सर्वद्वारकपाटबन्धविवृतावपि द्रष्टव्यः । 'कृष्णवाहे वसुदेव आगते स्वयं व्यवर्षन्त यथा तमो रवे'रिति शुकोक्तेः ॥१८॥

(च) अखिलं निःशेषं विश्वं जगत् तद्रूपः तत्स्वरूपः । अनन्तानि रूपाणि यस्य सः । अथवा अनन्तरूपः नित्यरूपः अथवा अनन्तः शेषनागः । प्रसीदतामित्यत्रात्मनेपदमार्षम् । स्वमायया वैष्णव्या मायया आविष्कृतं प्रकटीकृतं बालस्य रूपं येन तथाभूतः सन्नित्यर्थः

(छ) पुत्रार्थिन्या मामेव पुत्रं प्रार्थयन्त्या । तत्पुत्रार्थिन्यास्तव प्राक्तनस्तुतिरूपं वस्तु, सफलं सार्थकम् मम पुत्ररूपेण त्वद्गर्भादुद्भूतत्वादिति भावः ।

(ज) आनकनुन्दुभौ वसुदेवे, व्रजति कारागाराद् बहिर्गच्छति सति । सर्व एवायं पुत्ररूपेणावतीर्णस्य विष्णोः प्रभाव इति ध्येयम् ।

(झ) अत्युल्वणं अतिप्रकटम् प्रबलतममित्यर्थः ; 'स्पष्टं स्फुटं प्रव्यक्तमुल्वण' मिति कोषात् । शेषः अनन्तनागः, फणेन मिथो योजनया एकीकृतेन फणसहस्रेणेत्यर्थः, अन्यथा सर्ववृष्टिनिरोधासम्भवादिति भावः । नातावेकवचनमित्यन्ये ।

(ञ) नाना आवर्त्तैः घूर्णमानसलिलसङ्घातैः समाकुलां परिव्याप्ताम्, अतिगम्भीराम् अतिदूरनिम्नतलस्पर्शाम् सुगभीरखातामित्यर्थः । जानुमात्रं जानुपर्य्यन्तपरिमाणमात्रं यथा स्यात् तथा वहति प्रवहति या सा । अथवा जानुमात्रं जानुपर्य्यन्तपरिमितं तत्परिमितंजलमित्यर्थः, वहति धारयति या तां तथाभूतां कृत्वेति शेषः । ययौ जगाम तां यमुनामुत्तीर्य्य गोकुलमिति शेषः, अथवा ययौ प्राप ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कंसस्य करमादाय तत्रैवाभ्यागतांस्तटे ।
नन्दादीन् गोपवृन्दांश्च यमुनाया ददर्श सः(ट) ॥१९॥

तस्मिन् काले यशोदापि मोहिता योगनिद्रया ।
तामेव कन्यां मैत्रेय ! प्रसूता मोहिते जने(ठ) ॥२०॥

वसुदेवोऽपि विन्यस्य बालमादाय दारिकाम् ।
यशोदाशयने तूर्णमाजगामामितद्युतिः(ड) ॥२१॥

ददृशे च प्रबुद्धा सा यशोदा जातमात्मजम् ।
नीलोत्पलदलश्यामं ततोऽत्यर्थं मुदं ययौ(ढ) ॥२२॥

आदाय वसुदेवोऽपि दारिकां निजमन्दिरम् ।
देवकीशयने न्यस्य यथापूर्वमतिष्ठत(ण) ॥२३॥

ततो बालध्वनिं श्रुत्वा रक्षिणः सहसोत्थिताः ।
कंसायावेदयामासुर्देवकीप्रसवं द्विज ॥२४॥

कंसस्तूर्णमुपेत्यैनां ततो जग्राह बालिकाम् ।
मुञ्च मुञ्चेति देवक्या सन्नकण्ठ्या निवारितः(त) ॥२५॥

चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थितिम् ।
अवाप रूपञ्च महत् सायुधाष्टमहाभुजम्(थ) ॥२६॥

प्रजहास तथैवोच्चैः कंसञ्च रुषिताब्रवीत् ।
किं मया क्षिप्तया मूढ़ ! जातो यस्त्वां वधिष्यति(द) ॥२७॥

अभिमुखमागतान् नन्दादींस्तैरदृष्टः स ददर्श ॥१९।२०॥

यशोदाशयने बालं विन्यस्य तत्कन्यामादाय जगाम । अमितद्युतिर्महाबुद्धिः ॥२१॥

यथापूर्वं पादयोः शृंखलां प्रतिमुच्यातिष्ठत् ॥२३॥

सन्नकण्ठ्या गद्गदकण्ठ्या निवारितोऽपि तां कन्यां जग्राह ॥२५॥

आकाशे स्थितिं च महद्रूपम् चावाप ॥२६।२७॥

(ट) कंसस्य करं राजग्राह्यभागं नियमेन तत्प्राप्यमित्यर्थः । गोपवृन्दानित्यत्र वृन्दशब्दस्य पुंसि प्रयोग आर्षः, 'वृन्दं निकुरम्बं कदम्बक' मित्यादिकोषेषु तस्य क्लीवलिङ्गोपदेशात् ; गोपसमूहानित्यर्थः ।

(ठ) प्रसूता प्रसूतवती, कर्त्तरि क्तप्रत्यय आर्षः । मोहित इति । तदा गोकुलवासिनां जनानां सर्वेषामेव योगनिद्रया मोहितत्वाद् यशोदायाः कन्याप्रसूतिर्न केनापि ज्ञाता । एतेन यशोदाशयने विन्यस्ते श्रीकृष्ण एव सर्वेषां यशोदापुत्रत्वनिश्चितिरनुकूलिता ।

(ड) दारिकां कन्याम् । तूर्णमिति स्वल्पमात्रमपि कालविलम्बमकृत्वेत्यर्थः । विलम्बे कंसचरादिभिः तद्वृत्तस्य ज्ञानतो विपत्पातसम्भवादिति भावः ।

(ढ) प्रबुद्धा विगतनिद्रा सतीत्यर्थः । ददृश इत्यार्षम् । नीलोत्पलदलवत् श्यामं श्यामवर्णम् ।

(ण) निजमन्दिरं मथुरायामवस्थितं कंसकारागारस्थं स्वावासं प्राप्येति शेषः । न्यस्य निःक्षिप्य स्थापयित्वेत्यर्थः । अतिष्ठतेत्यात्मनेपदमार्षम्, अतिष्ठदित्यर्थः ।

(त) सन्नः प्रसक्तक्रमात् भाविसन्तानानिष्टसम्भावनावसादग्रस्तः गद्गदभावयुक्त इत्यर्थः कण्ठः यस्याः तया ।

(थ) चिक्षेप कंस इति शेषः । वियति आकाशे स्थितिं अवाप उत्पत्य शून्ये गत्वा तत्रैव कञ्चित् कालं निवृत्तगतिकत्वं सायुधाः आयुधयुक्ताः अष्टौ महान्तो भुजा यत्र तादृशम् ।

(द) वधिष्यति हनिष्यति । आर्षो वधादेशः । मूढेति रे मूर्ख ! मामनिष्टहेतुं मत्वा मां हंसि, परं बुद्धिदोषात्सत्यमनिष्टकारिणं नावबुध्यस इति ते सुतरामज्ञानस्यैव विजृम्भितमिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्व्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते ।
तदेतत् सम्प्रधार्य्याशु क्रियतां हितमात्मनः (ध) ॥२८॥

इत्युक्त्वा प्रययौ देवी दिव्यस्रग्-गन्ध-भूषणा ।
पश्यतो भोजराजस्य स्तुता सिद्धैर्विहायसि ॥२९॥

इति श्रीविष्णुपुराणे पञ्चमांशे तृतीयः अध्यायः ॥

पुरा कालनेमिजन्मनि ॥२८॥

इति श्रीधरस्वामिकृतायां स्वप्रकशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमेऽंशे तृतीयोऽध्यायः ॥

(ध) सर्वस्वेति,—तेनैव सर्वदेवाधीश्वरेण देवानां सर्वाणि स्वानि सुरक्षितानि भवन्तीत्यत एव स सर्वस्वतया समुपचर्य्यत इति भावः। अथवा देवानां देवनशीलानां यत् सर्वं स्वम् ऐश्वर्य्यं सृष्टिकर्त्तृत्वादिलक्षणं तद् भूतः प्राप्तः। भूः प्राप्त्यर्थोऽपि पठ्यते। अथवा देवानां देववदुत्कृष्टचरितानां सत्त्वगुणप्रधानजीवानां सर्व्वस्वाय निखिलधनरत्नाय सकलकल्याणायेत्यर्थः, भूतः नरादिशरीरैरवतीर्ण इत्यादि। मृत्युः जीवनान्तकर इत्यर्थः। आसीत्। आशु कालकलामप्यनतीत्य आत्मनः हितं कल्याणं क्रियतां दुष्टाचारपरिहारेणेति शेषः, तथाहि त्वं पूर्वस्मिन् कालनेमिजन्मनि दुष्टाचारपरायणतयैव विष्णुना परमेश्वरेण विनाशितः, अद्यापि तथैव दुष्टाचारपरतया जगदपकारकत्वाद् विष्णुस्त्वां वध्यं निश्चित्य नररूपेणावतीर्णः। किन्तु अद्यापि यदि स्वं चरितमन्यथा कृत्वा जगतः कल्याणं कुर्य्याः, प्रतिनिवर्त्तेथाश्चानिष्टनिर्वर्त्तनात्तदा सम्भवेत्तव परित्राणमिति विचार्य्य तथा वर्त्तेथा इति भावः।

(न) स्रक् माल्यं गन्धः घृष्टचन्दनद्रवः तौ दिव्यौ अलौकिकौ स्रग्गन्धौ भूषणं यस्याः सा साधारणजनदुर्लभप्रशस्तमाल्यगन्धालङ्कृता। पश्यतो भोजराजस्येत्यनादरे षष्ठी, पश्यन्तं भोजराजमनादृत्येत्यर्थः। विहायसि गगने। सिद्धैरित्युपलक्षणम् देवादिभिरन्यैरपि स्तुतेत्यर्थः।

चतुर्थः अध्यायः

कारागाराद् वसुदेव-देवक्योर्मुक्तिलाभः।

पराशर उवाच ।

कंसस्ततोद्विग्नमनाः प्राह सर्व्वान् महासुरान् ।
प्रलम्बकेशिप्रमुखानाहूयासुरपुङ्गवान् ॥१॥

कंस उवाच ।

हे प्रलम्ब ! महाबाहो ! केशिन् ! धेनुक ! पूतने !
अरिष्टाद्यैस्तथा चान्यैः श्रूयतां वचनं मम ॥२॥
मां हन्तुममरैर्यत्नः कृतः किल दुरात्मभिः ।
मद्वीर्य्यतापितैर्वीरो न त्वेतान् गणयाम्यहम् ॥३॥
किमिन्द्रेणाल्पवीर्य्येण किं हरेणैकचारिणा ।
हरिणा वापि किं साध्यं छिद्रेष्वसुरघातिना ॥४॥

चतुर्थः अध्यायः

ततोद्विग्नमनाः ततं विततम् उद्विग्नमुद्वेगः, विततोद्वेगयुक्तचित्त इत्यर्थः। तदेति पाठः सुगमः ॥१॥

युष्माभिररिष्टाद्यैश्च मम वचः श्रूयताम् ॥२॥
किलेति प्रसिद्धौ ॥३॥
एकचारिणा तापसेन। छिद्रेषु अनवधानादिसमयेषु ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किमादित्यैः किं वसुभिरल्पवीर्य्यैः किमग्निभिः ।
किञ्चान्यैरमरैः सर्व्वैर्मद्बाहुबलनिर्ज्जितैः ॥५॥

किं न दृष्टोऽमरपतिर्मया संयुगमेत्य सः ।
पृष्ठेनैव वहन् वाणानपागच्छन्न वक्षसा ॥६॥

मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा ।
मद्बाणभिन्नैर्जलदैरापोऽमुक्ता यथेप्सिताः(क) ॥७॥

किमुर्व्व्यामवनीपाला मद्बाहुबलभीरवः ।
न सर्व्वे सन्नतिं याता जरासन्धमृते गुरुम्(ख) ॥८॥

अमरेषु च मेऽवज्ञा जायते दैत्यपुङ्गवाः ।
हास्यं मे जायते वीरास्तेषु यत्नपरेष्वपि(ग) ॥९॥

तथापि खलु दुष्टानां तेषामभ्यधिकं मया ।
अपकाराय दैत्येन्द्रा यतनीयं दुरात्मनाम्(घ) ॥१०॥

तद् ये यशस्विनः केचित् पृथिव्यां ये च यज्विनः ।
कार्य्यो देवापकाराय तेषां सर्व्वात्मना वधः ॥११॥

उत्पन्नश्चापि मृत्युर्मे भूतपूर्व्वः स वै किल ।
इत्येतद् बालिका प्राह देवकीगर्भसम्भवा ॥१२॥

तस्माद् बालेषु परमो यत्नः कार्य्यो महीतले ।
यत्रोद्रिक्तं बलं बाले स हन्तव्यः प्रयत्नतः(ङ) ॥१३॥

पराशर उवाच ।

इत्याज्ञाप्यासुरान् कंसः प्रविश्यात्मगृहं ततः ।
मुमोच वसुदेवञ्च देवकीञ्च निरोधतः(च) ॥१४॥

पृष्ठेनैव वहन्नपागच्छत् अपलायत ॥६॥

किमापः अमुक्ता इति च्छेदः । नापो मुक्ता इति वा पाठः ॥७॥

गुरुं श्वशुरं जरासन्धमृते किं सर्वे सन्नतिं न याताः ? ते सर्वे इति पाठे असन्नतिमिति च्छेदः ॥८।१०॥

यशस्विनो दाननिष्ठाः, देवापकारायेति- तेषां वधे हवि- दर्तृणामभावादेव देवानां वृत्तिनाशादपकारः स्यात्। 'यज्ञ दितः प्रदानं देवा उपजीवन्ती'ति श्रुतेः ॥११।१२।१३।१४॥

(क) यथेप्सिताः मया कृषकाद्यैर्वा देशोपकारार्थं यथा आकङ्क्षिताः, न तु अत्यल्पमात्रा इति शेषः ।

(ख) जरासन्धमृते गुरुमिति—अत्र जरासन्धमित्यस्य गुरुमिति विशेषणोपदानात् जरासन्धो मया गुरुत्वेनैव परिहृतः अन्यथा ममोदग्रेण वीर्य्येण सोऽपि नमित एवाभविष्यदिति ध्वन्यते ।

(ग) यत्नपरेष्वपि मद्विरोधेन विपुलं सन्नाहं कुर्वाणेषु सत्स्वपि मे हास्यं जायते, कथमेते व्यर्थमेवं मद्विरोधेन सन्नाहं कुर्वन्ति, मद्वीर्य्येण स्वल्पेनैव कालेन तेषां पराभवस्य भावित्वा- दित्यादिचिन्तयावज्ञादिकृतं हास्यं भवतीत्यर्थः ।

(घ) अभ्यधिकमित्यस्य दुष्टानाम् अपकाराय यतनीयं त्रिभिरेव सम्बन्धोऽर्थविशेषप्रतिपत्त्यर्थः । तथाहि स्वल्पमपि शालिनामपकाराकरणेऽपि नाधिका क्षत्रियजनसमाजस्य, हतो समधिकदोषशालिनः, अतः तेष्वनिगृहीतेषु दैत्यकुलस्य क्षतिर्भवेदिति तदपकाराय ध्रुवमेव यतितव्यमिति अत्र अपकारायेत्यत्र तद्विशेषणयोजनस्यायमभिसन्धिर्यथा,—तत्र यद्यहं तेषां स्वल्पमपकारं कुर्य्यां, भवन्तो वा स्वल्पमपकारं कुर्युः तदा ते तं स्वल्पमात्रमपकारं तुच्छं गणयित्वा स्वीये दुष्टाचरण लभास्तिष्ठेयुरुतस्तावानपकारः कार्य्यः, येन महापकारेण ते स्व वात्मानं दुष्टाचरणं वा जह्युरिति भावः । अभ्यधिकं यतनी मिति,—अत्र स्वल्पमात्रेण यत्नेन तादृशानां दुष्टानामपकारः न शक्यः, अतस्तदपकारार्थमधिको यत्नः कर्त्तव्य इति भावः ।

(ङ) परमो यत्नः तेषां वधार्थमिति भावः । उद्रिक्तं साधारणबालापेक्षया अत्यन्तमधिकमित्यर्थः ।

(च) निरोधतः कारावन्धनात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कंस उवाच ।

युवयोर्घातिता गर्भा वृथैवैते मयाधुना ।
कोऽप्यन्य एव नाशाय बालो मम समुद्गतः(छ) ॥१५
तदलं परितापेन नूनं तद्भाविनो हि ते ।
अर्भका युवयोर्दोषाच्चायुषो यद्वियोजिताः(ज) ॥१६॥
इत्याश्वास्य विमुक्त्वा(झ) च कंसस्तौ परिशङ्कितः ।
अन्तर्गृहं द्विजश्रेष्ठ प्रविवेश पुनः स्वकम् ॥१७॥

इति श्रीविष्णुपुराणे पञ्चमांशे चतुर्थः अध्यायः ॥

तत् सद्योमरणं भावि येषां ते तद्भाविनः ॥१६॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे चतुर्थोऽध्यायः ।

(छ) अन्यः त्वद्गर्भसम्भवादपरः बालः मम नाशाय समुद्गतः आविर्भूतः, तथैव त्वद्गर्भजया दिव्यरूपया बालया मया शिलायां तस्या निक्षेपानन्तरम् आकाशस्थया कथितत्वादिति ।

(ज) ते युवयोः अर्भकाः बालाः मया घातितपूर्वाः गर्भाः तद्भाविनः । तथाहि तेषां सद्योमरणस्यावश्यं भवितव्यत्वादेव ते मत्प्रयुक्तं नाशं प्राप्ता इति भावः । विहन्यते विगतप्राणः क्रियते यमेनेति शेषः । केनापि कारणोपनिपातेनेति वा शेषः ।

(झ) विमुक्त्वेत्यार्षम् ।

पञ्चमोऽध्यायः ।

[पूतनावधः]

पराशर उवाच ।

विमुक्तो वसुदेवोऽस्य नन्दस्य शकटं गतः ।
प्रहृष्टं दृष्टवान् नन्दं पुत्रो जातो ममेति वै(क) ॥१॥
वसुदेवोऽपि तं प्राह दिष्ट्या दिष्ट्येति सादरम् ।
वार्द्धकेऽपि समुत्पन्नस्तनयोऽयं तवाधुना ॥२॥
दत्तो हि वार्षिकः सर्व्वो भवद्भिर्नृपतेः करः ।
यदर्थमागतास्तस्मान्नावस्थेयं महाधनाः(ख) ॥३॥

पञ्चमः अध्यायः

कंसेन बालघाताय सर्वत्र दैत्याः प्रहिता इति जानन् वसुदेवो नन्दादीन् गोकुलरक्षार्थम् प्रस्थापयितं नन्दस्य शकटम् शकटावमोचनस्थानं गतः ॥१॥

कृतकार्य्यैर्धनिकैर्दुष्टराजसन्निधौ न स्थेयमित्युपदिशन्नाह—'दत्तो ही'ति द्वाभ्याम् ॥३॥

(क) शकटमिति—अत्र शकटं शकटावमोचनस्थानमिति व्याख्यातं श्रीधरेण । तथाहि नन्दः कंसाय वार्षिकं स्वदेयं करं दातुं शकटेन मथुरामागत्य यत्र शकटं त्यक्त्वा कंसगेहं गत्वा करं दत्त्वा आगतः, तत्स्थानं गत इत्यर्थः ।

(ख) नृपतेः कंसस्य राज्ञः । यदर्थं तस्मै करदानरूप-प्रयोजनाय, आगताः भवन्त इति शेषः । महत् प्रभूतं धनं येषां ते महाधना इति सम्बोधनपदम् । न अवस्थेयम् कार्य्यनिष्पत्य-नन्तरमपि अत्र नावस्थानं कर्त्तव्यं भवद्भिरिति शेषः । महाधना इति सम्बोधनं साभिप्रायम् । तथा हि भवद्भिः महानपि वार्षिको राजप्राप्यकरो निःशेषमेकदैव राज्ञे विसृष्टः, ततः परमपि यद्यत्र अवतिष्ठेध्वं, तदा कारणान्तरं व्यपदिश्य दुरात्मा कंस एतद्व्यतिरिक्तानि प्रभूतान्येव धनानि वा प्रार्थयेत । तदा तद्दाने भूयसामर्थानामकामतः क्षयः, तददाने च महान् राजरोष इति सत्वरं प्रस्थीयतामितः स्थानाद् भवद्भिरिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदर्थमागताः कार्य्यं तन्निष्पन्नं किमास्यते ?
भवद्भिर्गम्यतां नन्द ! तच्छीघ्रं निजगोकुलम् ॥४॥
ममापि बालकस्त्रत्र रोहिणीप्रसवो हि यः ।
स रक्षणीयो भवता यथायं तनयो निजः ॥५॥

पराशर उवाच ।

इत्युक्ताः प्रययुर्गोपा नन्दगोपपुरोगमाः ।
शकटारोपितैर्भाण्डैः करं दत्त्वा महाबलाः(ग) ॥६॥
वसतां गोकुले तेषां पूतना बालघातिनी ।
सुप्तं कृष्णमुपादाय रात्रौ तस्मै ददौ स्तनम् ॥७॥
यस्मै यस्मै स्तनं रात्रौ पूतना सम्प्रयच्छति ।
तस्य तस्य क्षणेनाङ्गं बालकस्योपहन्यते(घ) ॥८॥
कृष्णस्तस्याः स्तनं गाढ़ं कराभ्यामवपीड़ितम् ।
गृहीत्वा प्राणसहितं पपौ कोपसमन्वितः ॥९॥
सा विमुक्तमहारावा विच्छिन्नस्नायुबन्धना ।
पपात पूतना भूमौ म्रियमाणातिभीषणा(ङ) ॥१०॥
तन्नादश्रुतिसन्त्रासात् प्रबुद्धास्ते व्रजौकसः ।
ददृशुः पूतनोत्सङ्गे कृष्णं ताश्च निपातिताम्(च) ॥११॥
आदाय कृष्णं सन्त्रस्ता यशोदापि द्विजोत्तम !
गोपुच्छं भ्राम्य हस्तेन बालदोषमपाकरोत्(छ) ॥१२॥
गोः करीषमुपादाय नन्दगोपोऽपि मस्तके ।
कृष्णस्य प्रददौ रक्षां कुर्वंश्चैतदुदीरयन्(ज) ॥१३॥

नन्दगोप उवाच ।

रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः ।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्(झ) ॥१४॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् ।
वराहरूपधृग् देवः स त्वां रक्षतु केशवः ॥१५॥

किमास्यते किमत्र स्थीयते ॥४॥

रोहिण्यां प्रसवो यस्य सः । निज इति स्वीयत्वेनाभिमत इति गूढ़ोऽभिप्रायः ॥५॥७॥८॥

केवलं तस्याः स्तन्यमपथ्यमिव मन्वानस्तत्प्राणसहितं पपौ ॥९॥

विच्छिन्नं स्नायुलक्षणमस्थिबन्धनं यस्याः सा । प्रथमं मायया सौम्यरूपेण प्रविष्टापीदानीं म्रियमाणा अतिभीषणा सती पपातेत्यर्थः ॥१०॥११॥१२॥

करीषं गोमयचूर्णम् ॥१३॥

प्रकर्षेण भवन्त्यस्मादिति प्रभवः ॥१४॥१५॥१६॥

(ग) महाबला इत्यनेन सुतरां सत्वरं गमनं व्यज्यते ।

(घ) अङ्गं शरीरम्, उपहन्यते प्राणशून्यं क्रियते तयेति शेषः, कर्मकर्त्तरि वा प्रयोगः ।

(ङ) विमुक्तो महान् रावः शब्दः यया तथाभूता । म्रियमाणा मरणोन्मुखी । अतिभीषणा अतिभयङ्कररूपधारिणी सती, एतेन इतः पूर्वं मायया तस्याः सौम्यं रूपं व्यक्तं अत एव श्रीधरोऽपि प्रथमं मायया सौम्यरूपेणेत्यादि व्याच

(च) व्रजौकसः व्रजवासिनः, प्रबुद्धाः जागरिताः । उत्सङ्गे पूतनायाः राक्षस्याः क्रोड़े ।

(छ) सन्त्रस्ता भाव्यनिष्टसम्भावनाजनितसम्भ्रमा । भ्रामयं पदमार्षम् ।

(ज) एतत् वक्ष्यमाणं कर्त्तृ रक्षतु त्वा'मित्यादिकं वक्ष्य उदीरयन् रक्षां कुर्वन् गोः करीषं कृष्णस्य मस्तके प्रददौ सम्बन्धः ।

(झ) यस्य हरेः, नाभिसमुद्भूतपङ्कजात् नाभिसम्भूत कमलात् जगत् अभवत्, प्रथमतः नारायणनाभिकमलाद् ब्र समजनि, तस्माच्च ब्रह्मणः क्रमेण सर्वं जगदिति परम्परया नाभिसरोजजातमेतज्जगदिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नखाङ्कुरविनिर्भिन्न-वैरिवक्षःस्थलो विभुः ।
नृसिंहरूपी सर्व्वत्र स त्वां रक्षतु केशवः ॥१६

वामनो रक्षतु सदा भवन्तं यः क्षणादभूत् ।
त्रिविक्रमः क्रमाक्रान्त-त्रैलोक्यः स्फुरदायुधः ॥१७

शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः ।
गुह्यञ्च जठरं विष्णुर्जङ्घा-पादौ जनार्द्दनः ॥१८

मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारयणोऽव्ययः ॥१९

शार्ङ्ग-चक्र-गदा-खड्ग-(१) शङ्खनादहताः क्षयम् ।
गच्छन्तु प्रेत-कुष्माण्ड-राक्षसा ये तवाहिताः ॥२०

त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः ।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः ॥२१

एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः ।
शायितः शकटस्याधो बालपर्य्यङ्किकातले ॥२२

ते च गोपा महद् दृष्ट्वा पूतनायाः कलेवरम् ।
मृतायाः परमं त्रासं विस्मयं परमं ययुः ॥२३

इति श्रीविष्णुपुराणे पञ्चमांशे पञ्चमः अध्यायः ॥

क्रमाः पादविन्यासाः तैराक्रान्तं त्रैलोक्यं येन, संस्फुरन्त्यायुधानि यस्य सः। ऐकपद्यपाठे त्रिभिर्विक्रमैः क्रमेणाक्रान्तं त्रैलोक्यं येन तथाभूतो यः क्षणादभूदित्यर्थः ॥१७॥

बाहू-प्रबाहू च कुर्परस्योर्द्ध्वाधोभागौ ॥१८॥

कृतं स्वस्त्वयनं शान्तिकरं कर्म यस्य सः। बालपर्यङ्किका बालोचिता स्वल्पपर्यङ्कास्तस्यास्तले उपरि शायितः शकटस्याध इति शकटोच्चाटनप्रस्तावः ॥२२।२३॥

इति श्रीधरस्वामिकृतायांस्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे पञ्चमोऽध्यायः

(ञ) 'ऐकपद्यपाठे' इति श्रीधरः,—ऐकपद्येन एकपदीभावेन 'त्रिविक्रमक्रमाक्रान्तत्रैलोक्य' इत्येवं समासेन पाठे इत्यर्थः।

पाठान्तरम्—
(२०—१)—शार्ङ्ग-चक्र-गदापाणेः—।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठः अध्यायः

[शकटभञ्जनम्, बलदेव-कृष्णयोर्नामकरणञ्च]

पराशर उवाच ।

कदाचिच्छकटाधस्ताच्छयानो मधुसूदनः ।
चिक्षेप चरणावूर्द्ध्वं स्तन्यार्थी प्ररुरोद च ॥१

तस्य पादप्रहारेण शकटं परिवर्त्तितम् ।
विध्वस्तकुम्भभाण्डं वै विपरीतं पपात च ॥२

ततो हाहाकृतं सर्व्वो गोपगोपीजनो द्विज !
आजगामाथ ददृशे बालमुत्तानशायिनम् ॥३

गोपाः केनेति केनेदं शकटं परिवर्त्तितम् ।
तत्रैवं बालकाश्चोचुर्बालेनानेन पातितम् ॥४

रुदता दृष्टमस्माभिः पादविक्षेपताड़ितम् ।
शकटं परिवृत्तं वै नैतदन्यस्य चेष्टितम् ॥५

ततः पुनरतीवासन् गोपा विस्मितचेतसः ।
नन्दगोपोऽपि जग्राह बालमत्यन्तविस्मितः ॥६

यशोदा शकटारूढ़भग्नभाण्डकपालिकाः ।
शकटं चार्च्चयामास दधि-पुष्प-फलाक्षतैः ॥७

षष्ठः अध्यायः

विध्वस्तकुम्भभाण्डं विशीर्णं कुम्भाद्युपकरणम् । कूप्य-भाण्डमिति पाठे कूप्यं स्वर्णरजतातिरिक्तं द्रव्यम् ॥१।२।३॥

केन केनेति सम्भ्रमे वीप्सा ॥४।५।६॥

शकटारूढाः शकटे स्थापिताः भग्नानां भाण्ड-कपालिकाः ॥७॥

(क) ऊर्द्ध्वम् ऊर्द्ध्वदेशं प्रतीत्यर्थः । अथवा ऊर्द्ध्वः ऊर्द्ध्वदेशः अस्य अस्तीति व्युत्पत्त्या अस्तर्थे अत् प्रत्ययेन ऊर्द्ध्वमिति क्षेपण-क्रियाविशेषणम् ।

(ख) परिवर्त्तितं विपर्य्यासं नीतम्, पादप्रहारेण कर्त्रेति शेषः शङ्कटस्य ऊर्द्ध्वभागः अधस्तात् अधोभागश्च उपरिष्टात् जगामेत्येवं विपर्य्यासः । कुम्भाद्युपकरणं स्वभावत ऊर्द्ध्वमुखं तिष्ठति अन्यथा तद्गतवस्तूनां पतादिनानिष्टसम्भवात् तदा तु शकटस्य स्वाश्रयस्य परिवर्त्तनेन तस्याप्युपकरणस्य वैपरीत्येन पतनमभूदिति ध्येयम् ।

(ग) हाहाकृतमिति—हाहा इत्यस्य शब्दस्य कृतं करणं यत्र तद्यथा स्यात् तथा आजगाम । अथवा हाहाकृतं हाहा-शब्दोच्चारणं तत् यत्रास्तीत्यर्थे अत्प्रत्ययेन आजगामक्रिया-विशेषणम् । अथवा हाहाकृतं हाहाशब्दोच्चारणम् आप प्राप हाहाइत्येवं विपत्पाते व्याकुलताव्यञ्जकं-शब्दमुच्चा-मासेत्यर्थः । ददृशे इत्यात्मनेपदमार्षम् । उत्तानशा ऊर्द्ध्वमुखशायिनम् ।

(घ) रुदतेत्यस्य बालेनेत्यनेनान्वयः । पादवि बालस्यास्येत्यर्थः, ताड़ितम् आहतम् । शकटं परिवृत्तं वि प्राप्तमिति अस्माभिः दृष्टमित्यर्थः ।

(ङ) अर्च्चयामासेति तत्र देवताद्याधिष्ठानसम्भावनयेति अन्यथा बालस्य स्वल्पबलत्वात् शकटस्याप्यचेतनत्वादेवं वर्त्तनासम्भवादिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गर्गश्च गोकुले तत्र वसुदेवप्रणोदितः ।
प्रच्छन्न एव गोपानां संस्कारानकरोत् तयोः ॥८

ज्येष्ठञ्च राममित्याह कृष्णञ्चैव तथापरम् ।
गर्गो मतिमतां श्रेष्ठो नाम कुर्व्वन् महामतिः ॥९

स्वल्पेनैव हि कालेन रिङ्गिणौ तौ तदा व्रजे ।
घृष्टजानुकरौ तौ हि बभूवतुरुभावपि(च) ॥१०

करीषभस्मदिग्धाङ्गौ भ्रममाणावितस्ततः ।
न निवारयितुं शेके यशोदा न च रोहिणी(छ) ॥११

गोवाटमध्ये क्रीड़न्तौ वत्सवाटगतौ पुनः ।
तदहर्जातगोवत्सपुच्छाकर्षणतत्परौ(ज) ॥१२

यदा यशोदा तौ बालावेकस्थानचरावुभौ ।
शशाक नो वाररितुं क्रीड़न्तावतिचञ्चलौ ॥१३

यशोदा यष्टिमादाय कोपेनानुगता च तम् ।
कृष्णं कमलपत्राक्षं तर्ज्जयन्ती रुषा तदा ॥१४

दाम्ना बद्ध्वा तदा मध्ये निबध्याथ उदूखले ।
कृष्णमक्लिष्टकर्म्माणमाह चेदमसंमर्षिता ॥१५

यदि शक्नोषि गच्छ त्वमतिचञ्चलचेष्टित !
इत्युक्त्वा च निजं कर्म्म सा चकार कुटुम्बिनी(झ)॥१६

व्यग्रायामथ तस्यां स कर्षमाण उदूखलम् ।
यमलार्জ্জুনमध्येन जगाम कमलेक्षणः(ञ) ॥१७

कर्षता वृक्षयोर्मध्ये तिर्य्यग्गतमुदूखलम् ।
भग्नावुत्तुङ्गशाखाग्रौ तेन तौ यमलार्জ্জুनौ ॥१८

ततः कटकटाशब्दं समाकर्ण्य च कातरः ।
आजगाम व्रजजनो ददृशे च महाद्रुमौ(ट) ॥१९

'गोपानां प्रच्छन्न' इत्यत्र शुकोक्तिरनुसन्धेया। गर्गो हि गोकुलमागतो नन्देन बालयोर्नामकरणार्थं यदा प्रार्थितः, तदा तेनोक्तम्, अहं तावद् यदुकुलाचार्य्यः प्रख्यातः, त्वञ्च वसुदेवस्य प्रेष्ठः सखा। अशरीरदारिकावाक्याभ्यां देवक्याः पुत्रः स्वस्य शत्रुः क्वचिज्जातोऽस्तीति कंसो मन्यते, एवञ्च स्थिते सति मया यदुपुरोधसा नामकरणादि कृतं ज्ञात्वा देवकीपुत्र एव कथञ्चिद् गोकुलं प्राप्तो नन्देन स्वपुत्रतयाभिमत इति जातशङ्कः कंसो यदि हन्यात्तर्हि महाननर्थः स्यादिति। ततो नन्देनोक्तं मदीयैर्गोपैरप्यविज्ञातः सन् रहसि द्विजोचितं संस्कारमात्रं कुर्विति। तदेतदुक्तम्,—'प्रच्छन्न एव गोपानां संस्कारानकरोत्तयो'रिति 'महामति'-रिति च ॥८।९॥

'रिङ्गिणा'वित्यस्यैव विवृतिः 'घृष्टजानुकरा'विति, जानुभ्यां कराभ्यां च भुवं संघृष्य सञ्चरन्ताविति्यर्थः ॥१०॥

करीषभस्मभ्यां दिग्धाङ्गौ लिप्ताङ्गौ ॥११।१२।१३।१४।१५।१६॥

यमलयोर्युग्मभूतयोरर्জ্জुनवृक्षयोर्मध्येन ॥१७।१८॥

कटकटेति शब्दानुकृतिः ॥१९॥

(च) रिङ्गिणाविति सञ्चरणकारिणाविति्यर्थः। उभौ राम-कृष्णौ।

(छ) भ्रममाणाविति्यत्र परस्मैपदिनो भ्रमेः शानच्प्रत्यय-प्रयोग आर्षः।

(ज) तस्मिन्नेव अहनि तत्पुच्छाकर्षणदिन एव जाताः उत्पन्नाः ये गोवत्साः, तेषां पुच्छाकर्षणतत्परौ।

(झ) कुटुम्बिनी परिजनवती, एतेन तस्याः कर्मान्तर-परिहारेण कृष्ण एवावधानं न सम्भवतीति व्यज्यते।

(ञ) तस्यां यशोदायाम्, व्यग्रायां गृहोचितकर्मान्तरततत्परायां सत्याम्। एतेन तदानीं कृष्णक्रियमाणकृत्ये तस्या अनवधानं व्यज्यते।

(ट) ददृशे इत्यत्र दृशेः कर्त्तर्य्यात्मनेपदप्रयोग आर्षः। अत्र युग्मकेनान्वयसमाप्तिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भग्नस्कन्धौ निपतितौ भग्नशाखौ महीतले ।
नवोद्गताल्पदन्तांशु-सितहासञ्च बालकम् ॥२०

तयोर्मध्यगतं बद्धं दाम्ना गाढ़ं तथोदरे ।
ततश्च दामोदरतां स ययौ दामबन्धनात् ॥२१

गोपवृद्धास्ततः सर्व्वे नन्दगोपपुरोगमाः ।
मन्त्रयामासुरुद्विग्ना महोत्पातातिभीरवः ॥२२

स्थानेनेह न नः कार्य्यं . गच्छामोऽन्यन्महावनम् ।
उत्पाता बहवो ह्यत्र दृश्यन्ते नाशहेतवः ॥२३

पूतनाया विनाशश्च शकटस्य विपर्य्ययः ।
विना वातादि-दोषेण द्रुमयोः पतनं तथा(ठ) ॥२४॥

वृन्दावनमितः स्थानात् तस्माद् गच्छाम मा चिरम् ।
यावद्भौममहोत्पात-दोषो नाभिभवेद् व्रजम् ॥२५॥

इति कृत्वा मतिं सर्व्वे गमने ते व्रजौकसः ।
ऊचुः स्वं स्वं कुलं शीघ्रं गम्यतां मा विलम्ब्यताम् ॥२६

ततः क्षणेनः प्रययु शकटैर्गोधनैस्तथा ।
यूथशो वत्सबालांश्च कालयन्तो व्रजौकसः ॥२७

द्रव्यावयवनिर्द्धूतं क्षणमात्रेण तत् तथा ।
काक-काकी-समाकीर्णं व्रजस्थानमभूद् द्विज ॥२८

वृन्दावनं भगवता कृष्णेनाक्लिष्टकर्म्मणा ।
शुभेन मनसा ध्यातं गवां वृद्धिमभीप्सता ॥२९

ततस्तत्रातिरूक्षेऽपि घर्म्मकाले द्विजोत्तम !
प्रावृट्काल इवोद्भूतं नवं शस्यं समन्ततः(ड) ॥३०

स समावासितः सर्व्वो व्रजो वृन्दावने ततः ।
शकटीवाटपर्य्यन्तश्चन्द्रार्द्धाकारसंस्थितिः ॥३१॥

वत्सपालौ च संवृत्तौ राम-दामोदरौ ततः
एकस्थानस्थितौ गोष्ठे चेरतुर्बाललीलया ॥३२॥

बर्हिपत्रकृतापीड़ौ वन्यपुष्पावतंसकौ ।
गोपवेणुकृतातोद्य-पत्रवाद्यकृतस्वनौ ॥३३॥

नवोद्गतानामल्पानां दन्तानाम् अंशुभिः सितो हासो यस्य तं बालकञ्च ददर्शेत्यन्वयः ॥२०।२१।२२॥

इह वृहद्वने स्थानेन वासेन ॥२३॥

भौमः भूमिविशेषवासनिमित्तो महोत्पातरूपो दोषः ॥२५॥

कुलं कुटुम्बादि ॥२६॥

कालयन्तश्चालयन्तः ॥२७॥

द्रव्याणां दध्यादीनामन्नादीनां च अवयवैः शेषैर्निर्धूतम् आकीर्णं सत् ॥२८॥

नवमद्भुतं शस्यं बालतृणम् ॥३०॥

शकटीवाटः अल्पशकटावृतिः पर्यन्ते यस्य चन्द्रार्द्धाकारा संस्थितिः संनिवेशो यस्य सः ॥३१॥

एकस्मिन्नेव क्रीड़ास्थाने स्थितौ ॥३२॥

बर्हिपत्रकृतापीड़ौ मयूरपिच्छकृतशेखरौ, वन्यपुष्पावतंसकौ वन्यपुष्पमयकर्णाभरणौ । गोपोचितैरेव वेणुकृतातोद्यौ सम्पादितमृदङ्गादिवाद्यकृत्यौ तौ च तौ पत्रवाद्यैः कृतस्वनौ रचितनानाशब्दौ ॥३३॥

(ठ) द्रुमयोः पूर्वोक्तार्जुनवृक्षयोः ।

(ड) ततः गवां वृद्ध्यभीप्सया शुभेन मनसा ध्यातं ध्यानादित्यर्थः । अतिरूक्षेऽपि नवशस्योद्गमोपयोगिरसाभावेऽपि शून्येऽपि । घर्मकाले ग्रीष्मकाले ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काकपक्षधरौ बालौ कुमाराविव पावकी ।
हसन्तौ च रमन्तौ च चेरतुस्तौ महाबलौ(ढ) ॥३४॥
क्वचिद्धसन्तावन्योन्यं क्रीड़मानौ तथापरैः ।
गोपपुत्रैः समं वत्सांश्चारयन्तौ विचेरतुः(ण)॥३५॥
कालेन गच्छता तौ तु सप्तवर्षौ महाव्रजे ।
सर्व्वस्य जगतः पालौ वत्सपालौ बभूवतुः ॥३६॥
प्रावृट्कालस्ततोऽतीव मेघौघस्थगिताम्बरः ।
बभूव वारिधाराभिरैक्यं कुर्व्वन् दिशामिव ॥३७॥
प्ररूढ़नवशस्याढ्या शक्रगोपाचिता मही ।
तदा मारकतीवासीत् पद्मरागविभूषिता ॥३८॥
जग्मुरुन्मार्गवाहानि निम्नगाम्भांसि सर्व्वतः ।
मनांसि दुर्व्विनीतानां प्राप्य लक्ष्मीं नवामिव(त)॥३९
न रेजेऽन्तरितश्चन्द्रो निर्म्मलो मलिनैर्घनैः ।
सद्वाक्यवादो मूर्खाणां प्रगल्भाभिरिवोक्तिभिः(थ)॥४०
निर्गुणेनापि चापेन शक्रस्य गगने पदम् ।
अवाप्यताविवेकस्य नृपस्येव परिग्रहे ॥४१॥
मेघपृष्ठे बलाकानां रराज विमला ततिः ।
दुर्वृत्ते वृत्तचेष्टेव कुलीनस्यातिशोभना ॥४२॥
न बबन्धाम्बरे स्थैर्य्यं विद्युदत्यन्तचञ्चला ।
मैत्रीव प्रवरे पुंसि दुर्ज्जनेन प्रयोजिता ॥४३॥
मार्गा बभूवुरस्पष्टा नवशस्यचयावृताः ।
अर्थान्तरमनुप्राप्ताः प्रजड़ानामिवोक्तयः(द) ॥४४॥

काकपक्षधरौ शिखाधरौ बालौ । पावकी स्कन्दस्यांशौ शाखविशाखाविव ॥३४॥

एवं तौ वत्सपालौ सन्तौ कालेन गच्छता सप्तवर्षौ गोपालने समर्थौ बभूवतुरित्यर्थः ॥३६॥

प्रावृट्कालीनां गोपालक्रीड़ां वर्णयिष्यन् प्रावृषं तावद्वर्णयति—'प्रावृड़ि'त्याद्यष्टभिः । मेघैः स्थगितं छादितमम्बरं यस्मिन् सः ॥३७॥

शक्रगोपैरिन्द्रगोपाख्यैर्लोहितकीटैराचिता व्याप्ता मारकतीमरकतमयीव । पद्मरागैर्लोहितैर्विभूषिता ॥३८॥

मूर्खाणां वेदबाह्यानां प्रगल्भाभिः निःशङ्काभिः ॥४०॥

निर्गुणेन ज्यारहितेनापि शक्रस्य चापेन । अविवेकस्य परिग्रहे स्वीकारे यथा निर्गुणेनापि पुंसा प्रतिष्ठा अवाप्यते तद्वत् ॥४१॥

ततिः पंक्तिः, दुर्वृत्ते कपटे पुंसि, कुलीनस्य वृत्तचेष्टा निष्कपटा वृत्तिरिव ॥४२॥

अम्बरे महत्यपि विद्युत् स्थैर्य्यं न बबन्ध न चकार, प्रयोजिता कृता ॥४३॥

अस्पष्टाः सन्दिग्धाः जड़ानां मन्दानाम् अन्यद् विवक्षितान्यद् ब्रुवताम् उक्तयो यथा अर्थान्तरं प्राप्ताः सत्यः सन्दिग्धाः स्युः, तद्वत् । यद्वा प्रकृष्टानां जड़ानां योगिनामुक्तय इव । ते हि विवक्षितमर्थमर्थान्तराभिधानेन निगूढ़मिव वदन्तीत्यप्यस्पष्टास्तदुक्तयः ॥४४॥

तदेवं प्रावृषमनुवर्ण्य तत्कालोचितां क्रीड़ामाह—उन्मत्तेति यावत्समाप्ति । उन्मत्ताः शिखिनो मयूराः सारङ्गाश्च भ्रमन्तो यस्मिन् ॥४५॥

(ढ) रमन्तावित्यत्र रमेरात्मनेपदिनः शतृप्रयोग आर्षः ।

(ण) क्रीड़मानावित्यत्राप्यानश्प्रयोग आर्षः ।

(त) लक्ष्मीं सम्पदम्, नवां नूतनां पूर्वमनवस्थितामाकस्मिकीमित्यर्थः ।

(थ) सतां वेदानुगतानां वाक्यवादः वचनस्योक्तिः, अथवा सत् वेदार्थविरुद्धं यत् वाक्यं, तस्य वादः सन् वाक्यवादो वा, वादजल्पवितण्डारूपदर्शनसिद्धकथात्रयान्तर्गतः 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्ष-प्रतिपक्षपरिग्रहो वादः' इत्युक्तलक्षणो वा वादः ।

(द) अर्थान्तरम् तदाख्यं निग्रहस्थानमिति केचित् । तदुक्तं न्यायसूत्रे 'प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तर'मिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उन्मत्तशिखिसारङ्गे तस्मिन् काले महावने ।
कृष्ण-रामौ मुदा युक्तौ गोपालैश्चेरतुः सह ॥४५॥

क्वचिद् गोपैः समं रम्यं गेयनृत्यरतावुभौ ।
चेरतुः क्वचिदत्यर्थं शीतवृक्षतलाश्रयौ ॥४६॥

क्वचित् कदम्बस्रक्-चित्रौ मयूरस्रग्धरौ क्वचित् ।
विचित्रौ क्वचिदास्येतां विविधैर्गिरिधातुभिः(ध)॥४७

पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ ।
क्वचिद् गर्ज्जति जीमूते हाहाकाररवाद्दतौ ॥४८॥

गायतामन्यगोपानां प्रशंसापरमौ क्वचित् ।
मयूरकेकानुगतौ गोपवेणुप्रवादकौ ॥४९॥

इति नानाविधैर्भावैरुत्तमप्रीतिसंयुतौ ।
क्रीड़ासक्तौ वने तस्मिन् चेरतुः प्रीतमानसौ ॥५०॥

विकाले तु समं गोभिर्गोपवृन्दसमन्वितौ ।
आजग्मतुः कृष्ण-बलौ गोपवेशधरावुभौ ॥५१॥

विकाले च यथाजोषं व्रजमेत्य महाबलौ ।
गोपैः समानैः सहितौ चिक्रीड़ातेऽमराविव(न) ॥

इति श्रीविष्णुपुराणे पञ्चमांशे षष्ठः अध्यायः ॥

गोपैः सममत्यर्थं रम्यं यथा भवत्येवं गेयनृत्यरतौ चेरतुः । गेयतानरताविति पाठे तानो नाम स्वस्य गायतोऽन्येन क्रियमाणो वैणवादिश्रुत्यनुग्रहः । शीतवृक्षो वञ्जुलः तस्य तलम् उपान्तभूमिः तदाश्रयौ क्वचित् ॥४६॥

निद्रान्तरैषिणौ निद्रार्थमन्तरमवकाशमिच्छन्तौ ॥४८॥

मयूरकेकानुगतौ गोपवेणुप्रवादकौ च क्वचिदास्येतां पूर्वेणैवान्वयः ॥४९॥

भावैश्चेष्टाभिरभिप्रायैर्वा ॥५०॥

विकाले सन्ध्यायां रात्रौ च क्रीड़ासक्तौ क्वचिद्वनं चेरतुः ॥५१॥

क्वचिद्विकाले व्रजमेत्य यथासुखं चिक्रीड़ाते ॥५२॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे षष्ठोऽध्यायः

(ध) कदम्बस्रजा कदम्बकुसुममाल्येन चित्रौ, मयूरस्रक् मयूरपिच्छमयं माल्यं तद्धरौ । आस्येतामित्यार्षम् आसातामिति लौकिकसंस्कारसिद्धम् । गिरिधातुभिः गैरिकादिभिः ।

(न) अमराविवेति—तथाहि यथा देवताद्वयं स्वमैश्वर्यबलं कदाचित् साधरणैः समं क्रीड़ति, तथैव तौ कृष्णबलावपि देवभूतावपि तदा गृहे साधारणजनवत् बान्धवैः समं चक्रतुरित्यर्थः । चिक्रीड़ाते इत्यात्मनेपदप्रयोग आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तमः अध्यायः

[कालियदमनम् ।]

पराशर उवाच ।

एकदा तु विना रामं कृष्णो वृन्दावनं ययौ ।
विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्ज्वलः(क) ॥१॥

स जगामाथ कालिन्दीं लोलकल्लोलशालिनीम् ।
तीरसंलग्नफेनौघैर्हसन्तीमिव सर्व्वतः(ख) ॥२॥

तस्यां चातिमहाभीमं विषाग्निश्भृतवारिणम् ।
ह्रदं कालियनागस्य ददृशेऽतीव भीषणम् ॥३॥

विषाग्निना विसरता दग्धतीरमहातरुम् ।
वाताहताम्बुविक्षेप-स्पर्शदग्धविहङ्गमम् ॥४॥

तमतीव महारौद्रं मृत्युवक्त्रमिवापरम् ।
विलोक्य चिन्तयामास भगवान् मधुसूदनः(ग) ॥५॥

अस्मिन् वसति दुष्टात्मा कालियोऽसौ विषायुधः ।
यो मया निर्जितस्त्यक्त्वा दुष्टो नष्टः पयोनिधिम्(घ)॥६

सप्तमः अध्यायः

विषमयह्रदविलोड़नेन हि कालियदमनं रामः स्वस्नेहान्न मन्येतेति रामं विनैव ययौ ॥१॥

लोलैश्चञ्चलैः कल्लोलैः शालिनीं श्लाघ्याम् । फेनौघानां शौक्ल्याद्धसन्तीमिवेत्युत्पेक्षा, विषाग्निना श्रृतं तप्तं वारि यस्मिन् तं ह्रदम् अतिभीषणं यथा भवत्येवम् ॥२।३॥

विसरता प्रसर्पता । वाताहतस्याम्बुनो विक्षेपात् विक्षिप्यन्ते इति विक्षेपा विप्लुषः, तेषां स्पर्शेन दग्धा विहङ्गमा यस्मिन् ॥४।५॥

मयेति मद्विभूत्या गरुडेन निर्जितो दुष्टो भयंकरः पयोनिधिं तत्रस्थं रमणकं द्वीपं त्यक्त्वा यो नष्टः प्रपलायितः सोऽस्मिन् वसति । दुष्टात्मा दुष्टचित्तः, मत्स्यानुकम्पिनः सौभरेः शापाद् गरुड़स्यात्र प्रवेशाभावादिति शुकोक्तिः ॥६॥

(क) वन्यानां वनभवानां पुष्पाणां स्रजा माल्येन उज्ज्वलः ।

(ख) फेनौघैर्हसन्तीमिवेति—हासस्य धवलिमा कविसमयप्रसिद्धः, अतः शुभ्रफेनेषु हाससादृश्यात् हास्यत्वसम्भावनादुत्प्रेक्षालङ्कारः, अत उक्तं श्रीधरेण — फेनौघानां शौक्ल्याद्धसन्तीमिवेत्युत्प्रेक्षेति । तदुक्तं दर्पणकारेण — 'धवलता वर्ण्यते हासकीर्त्यो'रिति ।

(ग) अपरं प्रसिद्धमृत्युवक्त्रमिन्नं द्वितीयमित्यर्थः मृत्युवक्त्रं यमस्य मुखमिव इत्युत्प्रेक्षा । तथाहि यथा यमग्रासं गतो न जीवन् परावर्त्तते, तथा अत्र ह्रदे प्रविष्टोऽपि जीवन् न परावर्त्तते इति भावः ।

(घ) मया मद्विभूत्येति श्रीधरः । अत्र स्वीयविभूतौ स्वामेदोपचारः । अथवा लक्ष्मीवाचकमा-शब्दस्य ऐश्वर्य्यवाचकत्वात् मया लक्ष्म्या ऐश्वर्य्येणेत्यर्थः, ममेति शेषः । गरुड़ादयो हि भगवदैश्वर्य्यभूताः । नष्टः प्रपलायित इति श्रीधरः । अत्र नष्ट इति नश् अदर्शन इति गणपठितस्य नशे रूपम् । पलायनेन सुतरामदर्शनं गत इत्यर्थः ।

विषम् आयुधम् अस्त्रं यस्य सः, अन्येषां सैनिकादीना खड्ग-शूलादिकं युद्धसाधनं, येन परः पराजीयते, अस्य विषमेव तदिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेनेयं दूषिता सर्व्वा यमुना सागरं गता ।
न गोपैर्गोधनैर्वापि तृष्णार्त्तैरुपयुज्यते(ङ) ॥७॥

तदस्य नागराजस्य कर्त्तव्यो निग्रहो मया ।
निस्त्रासास्तु सुखं येन चरेयुर्व्रजवासिनः ॥८॥

एतदर्थं नृलोकेऽस्मिन्नवतारो मया कृतः ।
यदेषामुत्पथस्थानां कार्य्या शास्तिर्दुरात्मनाम् ॥९॥

तदेनं नातिदूरस्थं कदम्बमुरुशाखिनम् ।
अधिरुह्योत्पतिष्यामि ह्रदेऽस्मिन्ननिलाशिनः(च)॥१०

पराशर उवाच ।

इत्थं विचिन्त्य बद्ध्वा च गाढ़ं परिकरं ततः ।
निपपात ह्रदे तत्र सर्पराजस्य वेगितः ॥११॥

तेनापि पतता यत्र क्षोभितः स महाह्रदः ।
अत्यर्थं दूरजातांस्तु समसिञ्चन्महीरुहान्(छ) ॥१२

ते हि दुष्टविषज्वालातप्ताम्बुपवनोक्षिताः ।
जज्वलुः पादपाः सद्यो ज्वालाव्याप्तदिगन्तराः ॥१

आस्फोटयामास तदा कृष्णो नागह्रदे भुजम् ।
तच्छब्दश्रवणाच्चाशु नागराजोऽप्युपागमत् ॥१४॥

आताम्रनयनो दुष्ट-विषज्वालाकुलैर्मुखैः ।
वृतो महाविषैश्चान्यैरुरगैरनिलाशिभिः ॥१५॥

अगाधे ह्रदे स्थितस्य सर्पस्य ह्रदक्षोभनमृते निग्रहायोगात् तत्क्षोभोपायमध्यवस्यति 'तदेन'मिति। स तु कदम्बोऽमृतमानयता गरुडेनाक्रान्तत्वान्नादह्यतेति पुराणान्तरप्रसिद्धिः ॥१०॥

परितः क्रियते परिधीयते इति परिकरो वस्त्रं तत् प्र... बद्ध्वा, वेगितः वेगवान् ॥११॥

समसिञ्चत् सम्यक् सिषेच ॥१२।१३॥

दुष्ट-विषज्ज्वालाभिराकुलैर्व्याप्तैः फणैरु... आगमत् ॥१५॥

(ङ) तेन कालियेन। सर्वा यमुनेति,—ननु आदौ कालियः सागर आसीत्, अनन्तरमपि अस्मिन्नेव ह्रदे वर्त्तते, तत् कथं तेन सर्वा यमुना दूषितेत्याकाङ्क्षानिवर्त्तनायाह—'सागरं गते'ति। अतस्तस्य सागरावस्थानकाले सागरगतया यमुनया सह सम्बन्धात् सर्वैव यमुना तेन दूषितेति सङ्गच्छते। गोधनैः गोरूपैः धनैः, अत्र गोषु धनत्वारोपः साभिप्रायकः; तथाहि गोपाः खलु विवेकवन्तः, ते तदीयसलिलपानादनिष्टं बुद्ध्वा ततो निवर्त्तन्त इत्युपपद्यते, किन्तु गवां तथा विवेकाभावात् ततः कथं निवर्त्तनमित्याशङ्क्याह—'गोधनै'रिति। तथाहि यद्यपि गावः स्वविवेकेन तत्पानान्न निवर्त्तितुमर्हन्ति, तथापि गोषु गोपालानां धनत्वबुद्ध्या स्वधनरक्षणार्थं सर्वेषामेव प्रवृत्तेः स्वाभाविकत्वात्, त एव कालियविषदुष्टाया यमुनाया अनिष्टसाधनतामवधार्य्य तास्ततो निवर्त्तयन्तीति तैरपि तस्या नोपयोग इति ध्येयम्। उपयुज्यते पीयते।

(च) उरुः विशालः शाखी वृक्षः तम्, 'विशङ्कटं पृथु... विशालं पृथुलं महत्। वड्रोरु विपुल'मिति कोषात्। ... उर्व्वी विशाला शाखा तद्वन्तम् अतिशयाद्यर्थविशेष... मत्वर्थीयप्रत्ययोपपत्तिः। सामान्यतः कदम्बशाखानां ... दृढ़स्थूलशाखाधिरोहणे विपदाशङ्कानिवृत्त्यर्थमुरुशाखि... मित्यवधेयम्। अनिलाशिनः वायुभुजः कालियनागस्य।

(छ) समसिञ्चत् अत्यर्थं सिक्तानकरोत् क्षोभा... समुत्पत्य सुदूरं गतैः सलिलसङ्घातैरिति शेषः।

(ज) नागपत्नीनां हारीत्यादिविशेषणोपादानेन ... कट्यूर्द्ध्वभागे मनुष्याकारता प्रतिपद्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नागपत्न्यश्च शतशो हारिहारोपशोभिताः ।
प्रकम्पिततनुक्षेपचलत्कुण्डलकान्तयः ॥१६॥

ततः प्रवेष्टितः सर्पैः स कृष्णो भोगबन्धनैः ।
ददंशुश्चापि ते कृष्णं विषज्वालाविलैर्म्मुखैः ॥१७॥

तं तत्र पतितं दृष्ट्वा सर्पभोगनिपीड़ितम् ।
गोपा व्रजमुपागम्य चुक्रुशुः शोकलालसाः(झ) ॥१८॥

एष मोहं गतः कृष्णो मग्नो वै कालियह्रदे ।
भक्ष्यते सर्पराजेन तदागच्छत पश्यत ॥१९॥

तच्छ्रुत्वा ते तदा गोपा वज्रपातोपमं वचः ।
गोप्यश्च त्वरिता जग्मुर्यशोदाप्रमुखा ह्रदम् ॥२०॥

हा हा क्वासाविति जनो गोपीनामतिविह्वलः ।
यशोदया स सम्भ्रान्तो द्रुतं प्रस्खलितं ययौ ॥२१॥

नन्दगोपश्च गोपाश्च रामश्चाद्भुतविक्रमः ।
त्वरितं यमुनां जग्मुः कृष्णदर्शनलालसाः ॥२२॥

ददृशुश्चापि ते तत्र सर्पराजवशं गतम् ।
निष्प्रयत्नीकृतं कृष्णं सर्पभोगेन वेष्टितम् ॥२३

नन्दगोपश्च निश्चेष्टो न्यस्य पुत्रमुखे दृशौ ।
यशोदा च महाभागा बभूव मुनिसत्तम ॥२४॥

गोप्यस्त्वन्या रुदन्त्यश्च ददृशुः शोककातराः ।
प्रोचुश्च केशवं प्रीत्या भयकातर्य्यगद्गदम् ॥२५॥

सर्व्वा यशोदया सार्द्धं विशामोऽत्र महाह्रदे ।
नागराजस्य नो गन्तुमस्माकं युज्यते व्रजे ॥२६॥

दिवसः को विना सूर्य्यं विना चन्द्रेण का निशा
विना वृषेण का गावो विना कृष्णेन को व्रजः ॥२७

विनाकृता न यास्यामः कृष्णेनानेन गोकुलम् ।
अरण्यं नापि सेव्यञ्च वारिहीनं यथा सरः ॥२८॥

यत्र नेन्दीवरदलप्रख्यकान्तिरयं हरिः ।
तेनापि मातुर्वासेन रतिरस्तीति विस्मयः ॥२९॥

हारिभिर्मनोहरैर्हारैरुपशोभिताः, प्रकम्पितानां तनूनां क्षेपेणोल्लेपेण चलद्भिः कुण्डलैः कान्तिः शोभा यासान्ताः॥१६॥

भोगो देहः स एव बन्धनसाधनत्वाद् बन्धनं तत् प्रवेशितः कुण्डलीकृतैर्देहैरावेष्टित इत्यर्थः । ददंशुर्दष्टवन्तः ॥१७॥

शोकेन लालसाः साभिलाषाः उत्सुका इत्यर्थः ॥१८॥

व्रजं चुक्रुशुस्तदाह—'एष' इति ॥१९॥

द्रुतञ्च प्रस्खलितञ्च यथा भवत्येवं ययौ ॥२१॥

यशोदा च निश्चेष्टा बभूव ॥२४॥

शोकेन कातरा विवशाः भयकातर्य्याभ्यां गद्गदं यथा भवत्येवं प्रोचुः । यत् प्रोचुस्तदाह—'सर्वा' इति सप्तभिः ॥२६

कृष्णेन विनाकृता विरहिता न यास्यामः ॥२८॥

यत्रायं हरिर्नास्ति तेनापि मातुर्वासेन जननीगृहेणापि रतिर्भवतीति विस्मयोऽत्याश्चर्य्यं, कृष्णरहिते मातृगृहेऽपि सुखं नास्त्येवेत्यर्थः ॥२९॥

(झ) तत्र कालियह्रदे तं कृष्णं पतितम् आदौ अनन्तरं सर्पभोगनिपीड़ितं नागफणैः सुदृढ़ं वेष्टितम्। शोकलालसा इत्यत्र शोकेन लालसाः साभिलाषा उत्सुका इत्यर्थ इति श्रीधरः। अत्रायं भावः—गोपाः कृष्णस्य तत्र कालियह्रदे पतनं, ततो नागफणैस्तस्य दृढ़मावेष्टनञ्च दृष्ट्वा कृष्णस्य महाविपत्तिं सम्भाव्य शोकग्रस्ताः तस्य कथमपि रक्षणमभिलषन्तः व्रजमुपागम्य 'एष मोहं गतः कृष्ण इत्यादिवक्ष्यमाणरूपेन क्रोशनं कृतवन्त' इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्फुल्ल-पङ्कज-दलस्पष्ट-कान्तिविलोचनम् ।
अपश्यन्तो हरिं दीनाः कथं गोष्ठे भविष्यथ ॥३०॥

अत्यन्तमधुरालापहृताशेषमनोधनाः ।
न विना पुण्डरीकाक्षं यास्यामो नन्दगोकुलम् ॥३१॥

भोगेनावेष्टितस्यापि सर्पराजेन पश्यत ।
स्मितशोभि मुखं गोप्यः कृष्णस्यास्मद्विलोकने ॥३२॥

पराशर उवाच ।

इति गोपीवचः श्रुत्वा रौहिणेयो महाबलः ।
गोपांश्च त्रासविधुरान् विलोक्य स्मितेक्षणः ॥३३॥

नन्दञ्च दीनमत्यर्थं न्यस्तदृष्टिं सुताननें ।
मूर्च्छाकुलां यशोदाञ्च कृष्णमाहात्मसंज्ञया ॥३४॥

किमिदं देवदेवेश ! भावोऽयं मानुषस्त्वया ।
व्यज्यतेऽत्यन्तमात्मानं किमनन्तं न वेत्सि यत्(ञ)॥३५

त्वमस्य जगतो नाभिरराणामिव संश्रयः ।
कर्त्तापहर्त्ता पाता च त्रैलोक्यं त्वं त्रयीमयः ॥३६॥

सेन्द्र-रुद्रा-श्वि-वसुभिरादित्यैर्मरुदग्निभिः ।
चिन्त्यसे त्वमचिन्त्यात्मन्! समस्तैश्चैव योगिभिः ॥

जगत्यर्थं जगन्नाथ ! भारावतरणेच्छया ।
अवतीर्णोऽत्र मर्त्येषु तवांशश्चाहमग्रजः ॥३८॥

मनुष्यलीलां भगवन् ! भजता भवता सुराः ।
विड़म्बयन्तस्त्वल्लीलां सर्व्व एव समासते ॥३९॥

अवतार्य्य भवान् पूर्व्वं गोकुलेऽत्र सुराङ्गनाः ।
क्रीड़ार्थमात्मनः पश्चादवतीर्णोऽसि शाश्वतः ॥४०

अत्रावतीर्णा ये कृष्ण ! गोपा एव हि बान्धवाः ।
गोप्यश्च सीदतः कस्मात् त्वं बन्धून् समुपेक्षसे ॥४

दर्शितो मानुषो भावो दर्शितं बालचापलम् ।
तदयं दम्यतां कृष्ण ! दुरात्मा दशनायुधः(ठ) ॥

पराशर उवाच ।

इति संस्मारितः कृष्णः स्मितभिन्नोष्ठसम्पुटः ।
आस्फोट्य मोचयामास स्वदेहं भोगबन्धनात् ॥४

कथं भविष्यथ स्थास्यथेति ह गोपानुवक्तव्यः ॥३०॥

अत्यन्तमधुरैरालापैरपहृतमशेषं मनोरूपं धनं यासां ताः ॥३१॥

त्रासविधुरान् मृत्युभयशून्यान् मर्त्तुमुद्यतानित्यर्थः ॥३३॥

आत्मसंज्ञया स्वसंकेतेन कृष्णमाह, किमाहेत्यपेक्षायां तदाह—'किमिद'मित्यष्टभिः आत्मानम् अनन्तं किं न वेत्सि नानुसन्धत्से ? यदित्युत्तरेणान्वेति ॥३५॥

यस्मात्त्वमस्य जगतः संश्रयः आधारः अराणां नाभिरिव 'यस्मिन् प्रतिष्ठिता रथनाभाविवारा' इति श्रुतेः ॥३६॥

जगत्यर्थं भूमेर्हितार्थम् ॥३८॥

मनुष्यलीलां भजता भवता हेतुभूतेन गोपवेशः एव त्वल्लीलां विड़म्बयन्तोऽनुकुर्वन्तस्त्वया सह क्रीड़ वर्त्तन्ते, तथा सुराङ्गनाश्च भवानेवावतारितवान् ॥३९॥

अतोऽस्मदर्थे जातानेतान्नोपेक्षस्व ॥४१॥

अभुग्नशिरसः अनम्रशिरसः, आभुग्नशिरस इति च्छेदः, अवनतफणस्येत्यर्थः ॥४४॥

(ञ) मानुषस्यायं मानुषः, तस्येदमित्यर्थे ष्णप्रत्ययः । व्यज्यते प्रकटीक्रियते । अनन्तम् अविनश्वरम् ।

(ट) चत्वारिंशश्लोके श्रीधरटीकायां क्रीड़माना वर्त्तन्त क्रीड़न्तो वर्त्तन्त इति साधु । क्रीड़ेः परस्मैपदित्वेन शानच्प्रत्ययस्यासाधुत्वात् ।

(ठ) दशनः विषमयदन्त एव आयुधं यस्य सः । त्वयेति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आनम्य चापि हस्ताभ्यामुभाभ्यां मध्यमं फणम् ।
आरुह्याभुग्नशिरसः प्रननर्त्तोरुविक्रमः ॥४४॥

व्रणाः फणेऽभवंस्तस्य कृष्णस्याङ्घ्रिनिकुट्टनैः ।
यत्रोन्नतिञ्च कुरुते ननामास्य ततः शिरः ॥४५॥

मूर्च्छामुपाययौ भ्रान्त्या नागः कृष्णस्य रेचकैः ।
दण्डपातनिपातेन ववाम रुधिरं बहु ॥४६॥

तन्निर्भिन्नशिरोग्रीवमास्येभ्यः स्रुतशोणितम् ।
विलोक्य शरणं जग्मुस्तत्पत्न्यो मधुसूदनम् ॥४७॥

नागपत्न्य ऊचुः ।

ज्ञातोऽसि देवदेवेश ! सर्व्वेशस्त्वमनुत्तम !
परं ज्योतिरचिन्त्यं यस्तदंशः परमेश्वरः ॥४८॥

न समर्थाः सुराः स्तोतुं यमनन्यभवं प्रभुम् ।
स्वरूपवर्णनं तस्य कथं योषित् करिष्यति(ड) ॥४९॥

यस्याखिलं मही-व्योम-जलाग्नि-पवनान्तकम् ।
ब्रह्माण्डमल्पकांशांशः स्तोष्यामस्तं कथं वयम् ॥५०॥

यतन्तो न विदुर्नित्यं यत्स्वरूपं हि योगिनः ।
परमार्थमणोरल्पं स्थूलात् स्थूलं नताः स्म तम्(ढ)५१

न यस्य जन्मने धाता यस्य नान्ताय चान्तकः ।
स्थितिकर्त्ता न चान्योऽस्ति यस्य तस्मै नमः सदा ॥५२

कोपः स्वल्पोऽपि ते नास्ति क्षितिपालनमेव ते ।
कारणं कालियस्यास्य दमने श्रूयतामतः ॥५३॥

स्त्रियोऽनुकम्प्याः साधूनां मूढ़ा दीनाश्च जन्तवः ।
यतस्ततोऽस्य दीनस्य क्षम्यतां क्षमतां वर(ण) ॥५४॥

समस्त-जगदाधारो भवानल्पबलः फणी ।
त्वया च पीड़ितो जह्यान्मुहूर्त्तार्द्धेन जीवितम् ॥५५॥

नृत्यच्छलेनाङ्घ्रिभ्यां निकुट्टनैः संघट्टनैः ननाम नमयामासेत्यर्थः ॥४४॥

कृष्णस्य भ्रान्त्या नृत्यलीलाभ्रमणेन मूर्च्छां नागः प्राप्तः दण्डवत् पातो दण्डपातः तस्य निपातः तीव्रप्रहारः । पाठान्तरे तद्वत्पादनिपातेनेति स एवार्थः । यद्वा भ्रान्तिरेचकदण्डपादाख्या नृत्योक्ताः पादन्यासविशेषाः, यदाह भरतः,—अन्तर्भ्रमरिका ज्ञेया भ्रमरी वाह्यपूर्विका । अलग्नभ्रमरीव स्यादुचितभ्रमरी तथा । चित्रभ्रमरिका चैव वक्रभ्रमरिका तथा । निपातभ्रमरी चेति भ्रमाः सप्त प्रकीर्त्तिताः । पार्श्वे पार्श्वे च गमनं स्खलितैः स्खलितैः पुनः । विविधैश्चैव पादस्य पादरेचक उच्यते । नूपुरं चरणं कृत्वा पुरतः सम्प्रसारयेत् । क्षिप्रमाविद्धकार्य्यङ्गं दण्डपादेति सा स्मृते'ति ॥४५॥४६॥

न विद्यते उत्तमो यस्मात् हे अनुत्तम परं ज्योतिः स्वप्रकाशं यद्ब्रह्म यश्च तस्यांशः परमेश्वरः स त्वमिति ज्ञातोऽसि ॥४७॥

एवं चेन्मदीयं तत्त्वं वर्णयतेति चेत्तत्राहुः—'ने'ति द्वाभ्याम् । अनन्येषु भवतीत्यनन्यभवस्तस्य स्वरूपवर्णनं योषिदस्माद्दक् कथं करिष्यति ॥५८॥

यस्य स्थितिकर्त्ता अन्यो नास्ति विष्ण्वन्तराभावात् ॥५१॥

एवं स्तुत्वा तद्रक्षां प्रार्थयन्ते—'कोप' इति । कोपेन चेदस्य दमनं स्यात्तर्हि कोपाधिक्ये वधोऽपि युक्तः स्यात्, लोकरक्षणार्थे तु दमने दमनानन्तरं क्षमैव युक्ता इत्यर्थः ॥५२॥५५॥

न तव द्वेष्यस्यायं विषय इत्याहुः—यथा प्रीतिः समगोचरा एवं द्वेष उत्कृष्टगोचरः, न तु दीने द्वेषो युक्तः ॥५६॥

(ड) अनन्यभवम् स्वयम्भूस्वरूपम् ।

(ढ) यतन्त इति शत्रन्तमार्षम् । अणोरित्यादि—'अणोरणीयान् महतो महीया'नित्याद्यागमप्रामाण्यात् ।

(ण) क्षमतां वरेत्यार्षम्, क्षमेरात्मनेपदित्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्व पन्नगोऽल्पवीर्य्योऽयं क्व भवान् भुवनाश्रयः ।
प्रीति-द्वेषौ समोत्कृष्ट-गोचरौ च यतोऽव्यय ॥५६

ततः कुरु जगत्स्वामिन् ! प्रसादमवसीदतः ।
प्राणांस्त्यजति नागोऽयं भर्त्तृभिक्षा प्रदीयताम्(त)।५७

पराशर उवाच ।

इत्युक्ते ताभिराश्वस्य क्लान्तदेहोऽपि पन्नगः ।
प्रसीद देवदेवेति प्राह वाक्यं शनैः शनैः ॥५८॥

कालिय उवाच ।

तवाष्टगुणमैश्वर्य्यं नाथ ! स्वाभाविकं बलम् ।
निरस्तातिशयं यस्य तस्य स्तोष्यामि किन्त्वहम्(थ)॥५९

त्वं परस्त्वं परस्याद्यः परं त्वत्तः परात्मक !
परस्मात् परमो यस्त्वं ततः स्तोष्यामि किं त्वहम्

यस्माद् ब्रह्मा च रुद्रश्च चन्द्रेन्द्रमरुतोऽश्विनौ ।
वसवश्च सहादित्यैस्तस्य स्तोष्यामि किं त्वहम् ॥६१

एकावयवसूक्ष्मांशो यस्यैतदखिलं जगत् ।
कल्पनावयवस्त्वेष तं स्तोष्यामि कथं त्वहम् ॥६२

सदसद्रूपिणो यस्य ब्रह्माद्यास्त्रिदशोत्तमाः ।
परमार्थं न जानन्ति तस्य स्तोष्यामि किं त्वहम्

ब्रह्माद्यैरर्च्यते दिव्यैर्यश्च पुष्पानुलेपनैः ।
नन्दनादिसमुद्भूतैः सोऽर्च्यते वा कथं मया ॥६

यस्यावताररूपाणि देवराजः सदार्च्चति ।
न वेत्ति परमं रूपं सोऽर्च्यते वा कथं मया ॥६

यत एवं ततोऽस्य दीनस्य प्रसादमेव कुरु, न चात्र विलम्बः कार्य इत्याहुः—'प्राणा'नितिः ॥५७॥

ताभिर्भर्त्तृभिक्षा प्रदीयतामित्युक्ते कृष्णस्यांघ्रिकुट्टनादि-शैथिल्यमिवालक्ष्य किञ्चिदाश्वस्य न हनिष्यतीति विश्वस्य कालियः शनैः प्राह ॥५८॥

यस्य तवाष्टगुणं परं निरतिशयम् ऐश्वर्य्यं तस्याष्ट-गुणैश्वर्य्यं किमहं स्तोष्यामि ? नैकदेशमपि स्तोतुं समर्थ इति भावः ॥५९॥

निरतिशयैश्वर्यमेव दर्शयन्नाह—'त्व'मिति। त्वं परः सर्वोत्कृष्टः, एतदेवाह—परस्य हिरण्यगर्भस्याद्यो जनकस्त्वम्, "यो ब्रह्माणं विदधाति पूर्व'मिति श्रुतेः, तत्र हेतुः—परस्मा त्वत्तः प्रवर्त्तते, हे परात्मक ! तत्प्रेरकेश्वररूप ! त इत्यत्राह—परस्मादिन्द्रियादेः परमो यस्त्वम्, "इन्द्रियेभ्यः ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः पर सः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरु परं किञ्चित् सा काष्ठा सा परा गतिः।' इति श्रुतेरित्थं पाठान्तराण्यप्यनयैव रीत्या व्याख्येयानि ॥६०॥

परमत्वमेव प्रपञ्चयन्नाह—'यस्मा'दिति सप्तभिः ॥६

यदीयस्यैकस्यावयवस्य सूक्ष्मांशोऽखिलमिदं ज ननु चिदात्मकस्य जड़ं जगत् कथमंशः स्यात् त 'कल्पने'ति, उपासनार्थाः कल्पनामया अवयवा य 'पादोऽस्य विश्वा भूतानी'त्यादिश्रुतेः ॥६२॥

सदसद्रूपिणः कार्यकारणात्मकस्य ॥६३॥

(त) प्रदीयताम् अस्मभ्यमिति शेषः ।

(थ) किं स्तोष्यामि कीदृशीम् उत्कर्षज्ञापनात्मिकां स्तुतिं करिष्यामि ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषयेभ्यः समाहृत्य सर्व्वाक्षाणि च योगिनः ।
समर्च्चयति ध्यानेन सोऽर्च्च्यते वा कथं मया(द)॥६६

हृदि सङ्कल्प्य यद्रूपं धानेनार्च्चन्ति योगिनः ।
भावपुष्पादिना नाथ ! सोऽर्च्च्यते वा कथं मया ॥६७

सोऽहं ते देवदेवेश ! नार्च्चमायां स्तुतौ न च ।
सामर्थ्यवान् कृपामात्र-मनोवृत्तिः प्रसीद मे ॥६८॥

सर्पजातिरियं क्रूरा यस्यां जातोऽस्मि केशव !
तत्स्वभावोऽयमत्रास्ति नापराधो ममाच्युत ॥६९॥

सृज्यते भवता सर्व्वं तथा संह्रियते जगत् ।
जाति-रूप-स्वभावाश्च सृज्यन्ते जगतां त्वया ॥७०॥

यथाहं भवता सृष्टो जात्या रूपेण चेश्वर !
स्वभावेन च संयुक्तस्तथेदं चेष्टितं मम ॥७१॥

यदन्यथा प्रवर्त्तेयं देवदेव ! ततो मयि ।
न्याय्यो दण्डनिपातो वै तवैव वचनं यथा(ध) ॥७२॥

तथापि यज्जगत्स्वामी दण्डं पातितवान् मयि ।
स सोढ़ोऽयं वरं दण्डस्त्वत्तो नान्यत्र मे वरः ॥७३

हृतवीर्य्यो हृतविषौ दमितोऽहं त्वयाच्युत !
जीवितं दीयतामेकमाज्ञापय करोमि किम्(न) ॥७४॥

श्रीभगवानुवाच ।

नात्र स्थेयं त्वया सर्प ! कदाचिद् यमुनाजले ।
सभृत्यपरिवारस्त्वं समुद्रसलिलं व्रज ॥७५॥

मत्पदानि च ते सर्प ! दृष्ट्वा मूर्द्धनि सागरे ।
गरुड़ः पन्नगरिपुस्त्वयि न प्रहरिष्यति ॥७६॥

पराशर उवाच ।

इत्युक्त्वा सर्पराजानं मुमोच भगवान् हरिः ।
प्रणम्य सोऽपि कृष्णाय जगाम पयसां निधिम् ॥७७॥

पूर्वश्लोकार्थप्रपञ्चः—'हृदी'ति । भावपुष्पादिना मनोमयपुष्पधूपाद्युपचारेण । यद्वा भावेनाहिंसादिमयेन पुष्पाष्टकादिना, तदुक्तम्—"अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूतदया पुष्पं दमः पुष्पं विशिष्यते । शमः पुष्पं तपः पुष्पं ध्यानं पुष्पञ्च सप्तमम् । सत्यं वै चाष्टमम् पुष्पमेतैस्तुष्यति केशव" इति ॥६७॥

तदेवं स्तुत्वा प्रसादं प्रार्थयते—'सोऽह'मिति । कृपामात्रा केवलं करुणामयी मनोवृत्तिर्यस्य तथाभूतः सन् प्रसीद । क्रियामात्रेति पाठे केवलं तदर्च्चनादिक्रियायां मनोरथ एव न तु सामर्थ्यं यस्येत्यर्थः ॥६८॥

त्वं दण्ड्य एव,—न त्वनुकम्प्यः क्रूरत्वादिति चेत्तत्राह 'सर्प जाति'रिति षड्भिः ॥६९॥

जातिरूपस्वभावाश्च—जातिः सर्पत्वादिः, रूपं फणित्वादि, स्वभावः क्रौर्यादि ॥७०-७१॥

तवैव वचनं श्रुतिस्मृत्यादि यथा ;—'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥' इत्यादि । साधुत्वञ्च त्वदादिष्टकर्माचरणम्, तदेव मया कृतं, नान्यदित्यर्थः ॥७२॥

त्वत्तो दण्डोऽपि वरं श्लाघ्यत्वात् । त्वदन्यतो वरोऽपि न श्लाघ्यः । मामेत्ययं वरमिति पाठे दण्डमिषेणायं वर एव त्वत्तो मामुपैति ॥७३॥

(द) सर्वाङ्गाणि सर्वाणीन्द्रियाणि । यतेऽङ्गे शारिफलेकेऽप्याकर्षोऽयात्तमिन्द्रिये' इति कोषात् । समर्चयन्ति यमिति शेषः ।

(ध) प्रवर्त्तेयमित्यार्षम् ।

(न) एकं केवलम्, 'एके मुख्यान्यकेवला' इति कोषात् ।

(प) सर्पराजमिति समासान्तात्प्रत्ययेन वक्तव्ये सर्पराजानमिति प्रयोग आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पश्यतां सर्व्वभूतानां सभृत्यापत्यबान्धवः ।
समस्तभार्य्यासहितः परित्यज्य स्वकं ह्रदम् ॥७८॥

ततः सर्व्वे परिष्वज्य मृतं पुनरिवागतम् ।
गोपा मूर्द्धनि गोविन्दं सिषिचुर्नेत्रजैर्जलैः(फ) ॥७९॥

कृष्णमक्लिष्टकर्म्माणमन्ये विस्मितचेतसः ।
तुष्टुवुर्मुदिता गोपा दृष्ट्वा शिवजलां नदीम्(ब) ॥८०॥

गीयमानः स गोपीभिश्चरितैश्चारुचेष्टितैः ।
संस्तूयमानो गोपैस्तु कृष्णो व्रजमुपागमत् ॥८१॥

इति श्रीविष्णुपुराणे पञ्चमांशे सप्तमः अध्यायः ॥

गोपा नन्दाद्याः । हार्देन इति पाठे प्रीत्या मिलिताः सिषिचुः ॥७९॥

अन्ये श्रीदामाद्याः सवयसो गोपास्तुष्टुवुः ॥८०॥

इति श्रीधरस्वामिकृतायां स्वप्रकशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे सप्तमोऽध्यायः ॥

(फ) नेत्रजैर्जलैः नयनप्रस्रुतानन्दाश्रुभिः ।

(ब) नदीं यमुनां, शिवं कल्याणमयम् अनिष्टाजनकत्वात् जलं यस्याः तथाभूताम् ।

अष्टमोऽध्यायः

[धेनुकासुरवधः]

पराशर उवाच ।

गाः पालयन्तौ च पुनः सहितौ बल-केशवौ ।
भ्रममाणौ वने तस्मिन् रम्यं तालवनं गतौ(क) ॥१॥

तत्तु तालवनं दिव्यं धेनुको नाम दानवः ।
मृगमांसकृताहारः सदाध्यास्ते खराकृतिः(ख) ॥२॥

तत्तु तालवनं पक्व-फलसम्पत्समन्वितम् ।
दृष्ट्वा स्पृहान्विता गोपाः फलादानेऽब्रुवन् वचः ॥३॥

हे राम ! हे कृष्ण ! सदा धेनुकेनैष रक्ष्यते ।
भूप्रदेशो यतस्तस्मात् पक्वानीमानि सन्ति वै(ग) ॥४॥

फलानि पश्य तालानां गन्धामोदितदीशि च ।
वयमत्तुमभीप्सामः पात्यन्तां यदि रोचसे ॥५॥

अष्टमः अध्यायः

फलानामादाने स्पृहान्विताः सन्तोऽब्रुवन् ॥३।४॥

गन्धामोदितदीशि गन्धेनामादिताः दिशो यैस्तानि फलानि पश्य । पाठान्तरे गन्धेनामोदिता दिशः गन्धेनामोदवत्यो दिश इत्यर्थः ॥५॥

(क) सहितौ मिथो मिलितौ । भ्रममाणावित्यार्षम् ।

(ख) मृगमांसैः पशुमांसैः कृतः आहारः भोजनं यस्य सः । 'पशवोऽपि मृगा' इति नानार्थकोषात् । गर्द्दभस्य आकृतिरिव आकृतिर्यस्य सः खराकृतिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति गोपकुमाराणां श्रुत्वा सङ्कर्षणो वचः ।
कृष्णश्च पातयामास भुवि तालफलानि वै ॥६॥

फलानां पततां शब्दमाकर्ण्य स दुरासदः ।
आजगाम सुदुष्टात्मा कोपाद् दैतेयगर्द्दभः(घ) ॥७॥

पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां बली बलम् ।
जघानोरसि ताभ्याञ्च स च तेनाप्यगृह्यत(ङ) ॥८॥

गृहीत्वा भ्रामणेनैव सोऽम्बरे गतजीवितम् ।
तस्मिन्नेव च चिक्षेप वेगेन तृणराजनि(च) ॥९॥

ततः फलान्यनेकानि तालाग्रान्निपतन् खरः ।
पृथिव्यां पातयामास महावातोऽम्बुदानिव(छ) ॥१०॥

अन्यानप्यस्य वै ज्ञातीनागतान् दैत्यगर्द्दभान् ।
कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च लीलया ॥११॥

क्षणेनालङ्कृता पृथ्वी पक्वैस्तालफलैस्तथा ।
दैत्यगर्द्दभदेहैश्च मैत्रेय ! शुशुभेऽधिकम् ॥१२॥

ततो गावो निराबाधास्तस्मिंस्तालवने द्विज !
नवशस्यं सुखं चेरुर्यन्न भुक्तमभूत् पुरा(ज) ॥१३॥

इति श्रीविष्णुपुराणे पञ्चमांशे अष्टमः अध्यायः ॥

पातयामास बाहुभ्यामिति ज्ञेयम्, 'बाहुभ्यां तालान् सम्परिकम्पयन्निति शुकोक्तेः ॥६।७॥

ताभ्यां तयोः पादयोः, स च धेनुकस्तेन रामेणागृह्यत ॥८॥ गृहीत्वा धेनुकं स रामस्तृणराजनि ताले च चिक्षेप ॥९॥

महावातेरितानि वेति पाठे वा-शब्द उपमार्थः ॥१०।११।१२।१३॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशेऽष्टमोऽध्यायः ॥

(ग) 'इमानि पक्वानि फलानि सन्तीति-धेनुकेन एतेषामन्यतो क्षणाद् वृक्ष एव सुचिरं तेषामवस्थानेन पाकावसरलाभादिति भावः। अत्तुं भोक्तुम् इमानि फलानीति शेषः। रोचसे कामयसे, धातूनामनेकार्थत्वात्।

(घ) दैतेयगर्द्दभः गर्द्दभाकारः धेनुकदैत्यः।

(ङ) पश्चिमाभ्यां पश्चाद्भागस्थिताभ्यां पद्भ्यां चरणाभ्याम्। उरसि वक्षसि अवच्छेदे सप्तमी।

(च) तृणराज इत्यदन्ततया वक्तव्ये तृणराजनीत्यार्षम्। तृणराजनि ताले इति श्रीधरव्याख्या, 'तृणराजाह्वयस्ताल' इति कोषात्।

(छ) खरः गर्द्दभाकृतिर्धेनुकासुरः। महावातः प्रबला वात्या अम्बुदानिव जलदानिव।

(ज) निः न विद्यते आबाधा विशेषविघ्नो यासां ताः। सुखम् अनायासं यथा स्यात् तथा चेरुः प्रापुः भोजनार्थमिति शेषः। सर्वेषामेव गत्यर्थधातूनां प्राप्त्यर्थत्वस्यानुशिष्टेः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नवमोऽध्यायः

[प्रलम्बासुरवधः]

पराशर उवाच ।

तस्मिन् रासभदैतेये सानुगे विनिपातिते
सेव्यं गो-गोप-गोपीनां रम्यं तालवनं बभौ ॥१॥

ततस्तौ जातहर्षौ तु वसुदेवसुतावुभौ ।
हत्वा धेनुकदैतेयं भाण्डीर-वटमागतौ ॥२॥

क्ष्वेड़मानौ प्रगायन्तौ विचिन्वन्तौ च पादपान् ।
चारयन्तौ च गा दूरे व्याहरन्तौ च नामभिः ॥३॥

निर्योगपाशस्कन्धौ तौ वनमालाविभूषितौ ।
शुशुभाते महात्मानौ बालशृङ्गाविवर्षभौ ॥४॥

सुवर्णाञ्जनवर्णाभ्यां तौ तदा रुषिताम्बरौ ।
महेन्द्रायुधसंयुक्तौ श्वेतकृष्णाविवाम्बुदौ(क) ॥५॥

चेरतुर्लोकसिद्धाभिः क्रीड़ाभिरितरेतरम् ।
समस्तलोकनाथानां नाथभूतौ भुवं गतौ ॥६॥

मनुष्यधर्म्माभिरतौ मानयन्तौ मनुष्यताम् ।
तज्जातिगुणयुक्ताभिः क्रीड़ाभिश्चेरतुर्वनम्(ख) ॥७॥

ततः स्यन्दोलिकाभिश्च नियुद्धैश्च महाबलौ ।
व्यायामं चक्रतुस्तत्र क्षेपणीयैस्तथाश्मभिः(ग) ॥८॥

नवमः अध्यायः

भाण्डीराख्यं वटम् ॥२॥

क्ष्वड़मानौ सिंहवन्नदन्तौ, 'क्ष्वेड़ा तु सिंहनादः स्या'दित्यभिधानात् । विचिन्वन्तौ वृक्षारोहक्रीड़ार्थमन्विच्छन्तौ, दूरे स्थितौ सन्तौ गा व्याहरन्तौ आह्वयन्तौ ॥३॥

निर्युज्यन्ते निबध्यन्ते दुह्यमाना गाव एभिरिति निर्योगाः पादबन्धनरज्जवः अधृष्यगवां धर्षणार्थाः पाशाश्च स्कन्धे ययोः तौ निर्योगपाशस्कन्धौ । बालशृङ्गाविति वयोविशेषस्य लक्षणम् ॥४॥

रुषिताम्बरौ रञ्जितवस्त्रौ महेन्द्रायुधमिन्द्रधनुस्तत्संयुक्तावम्बुदाविव ॥५।६।७॥

स्यन्दोलिकाभिः गोपहस्तमयदोलारोहणैर्वृक्षा[illegible]
दिमद्दोलाक्रीड़ाभिर्वा । नियुद्धैर्बाहुयुद्धैः व्यायामं [illegible]
॥८॥

(क) सुवर्णाञ्जनवर्णाभ्यामिति-द्वन्द्वात् परः श्रूयमाणः प्रत्येकमभिसम्बध्यत इति नियमाद् यथायोग्यं सुवर्णवर्णेन पीतवर्णेन अञ्जनवर्णेन नीलवर्णेन च रुषिताम्बरौ । कृष्णस्य पीताम्बरस्य वस्त्रं पीतवर्णरञ्जितम् नीलाम्बरस्य बलरामस्य वस्त्रञ्च [illegible] वर्णमिति ध्येयम् ।

महेन्द्रायुधस्य नानावर्णरञ्जितत्वाद् बलदेवकृष्णयोश्च [illegible] श्वेतकायकृष्णकायत्वात् महेन्द्रधनुषः पीतांशयुक्तेन कृष्ण[illegible] पीताम्बरस्य श्रीकृष्णस्य, नीलांशयुक्तेन श्वेताम्बुदेन नीलाम्बरस्य बलरामस्य सादृश्यं प्रतिपत्तव्यम् ।

(ख) तज्जातिः गोपजातिः तस्याः यो गुणः धर्मः इति यावत् तत्र युक्ताभिः योग्याभिः उपयुक्ताभिः अथवा तद्युक्ताभिः तत्सम्बलिताभिः, स्वीयतदानीं भावमुचिताभिरित्यर्थः ।

(ग) अश्मभिः प्रस्तरखण्डैः क्षेपणीयैरिति परस्परस्य मधिकमिति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तल्लिप्सुरसुरस्तत्र ह्यु भयो रममाणयोः ।
आजगाम प्रलम्बाख्यो गोपवेशतिरोहितः ॥९॥

सोऽवगाहत निःशङ्कस्तेषां मध्यममानुषः ।
मानुषं वपुरास्थाय प्रलम्बो दानवोत्तमः(घ) ॥१०॥

तयोश्छिद्रान्तरं प्रेप्सुरविषह्यममन्यत ।
कृष्णं ततो रौहिणेयं हन्तुं चक्रे मनोरथम् ॥११॥

हरिणाक्रीड़नं नाम बालक्रीड़नकं ततः ।
प्रकुर्व्वन्तो हि ते सर्व्वे द्वौ द्वौ युगपदुत्पतन्(ङ)॥१२॥

श्रीदाम्ना सह गोविन्दः प्रलम्बेन तथा बलः ।
गोपालैरपरैश्चान्ये गोपालाः पुप्लुवुस्ततः(च) ॥१३॥

श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः ।
जितवान् कृष्णपक्षीयैर्गोपैरन्ये पराजिताः ॥१४॥

ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्धमेत्य वै ।
पुनर्निववृतुः सर्व्वे ये यैश्चात्र पराजिताः ॥१५॥

सङ्कर्षणन्तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः ।
न तस्थौ स जगामैव सचन्द्र इव वारिदः(छ) ॥१६॥

असहन् रौहिणेयस्य स भारं दानवोत्तमः ।
ववृधे सुमहाकायः प्रावृषीव बलाहकः(ज) ॥१७॥

सङ्कर्षणस्तु तं दृष्ट्वा दग्धशैलोपमाकृतिम् ।
स्रग्दामलम्बाभरणं मुकुटाटोपमस्तकम् ॥१८॥

रौद्रं शकटचक्राक्षं पादन्यास-चलत्क्षितिम् ।
ह्रियमाणस्ततः कृष्णमिदं वचनमब्रवीत्(ञ) ॥१९॥

कृष्ण ! कृष्ण ! ह्रियाम्येष पर्व्वतोदग्रमूर्त्तिना ।
केनापि पश्य दैत्येन गोपालच्छद्मरूपिणा ॥२०॥

तल्लिप्सुः तौ जिघृक्षुः । 'गोपवेशेन तिरोहितः असुरोऽसावित्यलक्षितः ॥९॥

अवगाहत प्राविशदित्यर्थः ॥१०॥

छिद्रान्तरप्रेप्सुः प्रमादावसरं प्रतीक्षमाणः, अविषह्यमधृष्यम् ॥११॥

हरिणाक्रीड़नं उत्प्लुत्योत्प्लुत्य गमनम्, यत्र द्वयोः सहोत्प्लुतयोर्यः पुरतो याति, स जेता, इतरस्तु जितः । यत्र च जितो जेतारं वहन् भाण्डीरकं वटं नीत्वा पुनः उत्प्लुतिस्थानं नयेदिति पणबन्धः उत्पतन्त उत्पतन्तः ॥१२॥

पुप्लुवुः उत्प्लुतवन्तः । तत्र प्रलम्बः श्रीदामपक्षीयः ॥१३।१४।१५।१६।१७॥

दग्धशैलोपमा तादृशी आकृतिर्यस्य तम् । स्रगभिर्ग्रथितं स्थूलं दाम स्रग्दाम तदेव लम्बमाभरणं यस्य तम् । मुकुटेनाटोपि संरम्भयुक्तं मस्तकं यस्य तम् ॥१८॥

रौद्रं घोरं शकटस्य चक्रे इव अक्षिणी यस्य तम् पादन्यासेन चलन्ती क्षितिर्यस्य तम् ॥१९॥

(घ) अवागाहतेति वक्तव्ये अवगाहतेति प्रयोग आर्षः ।

(ङ) युगपत् द्वौ द्वौ मिथो मिलित्वेति शेषः । उत्पतन्त इत्यर्थे उत्पतन्नित्यार्षम् ।

(च) प्रलम्बेन गोपबालकरूपधारिणा प्रलम्बासुरेण सह । बलः बलरामः ।

(छ) चन्द्रेण सह वर्त्तमानः सचन्द्रः चन्द्रसहितः वारिदः जलपूर्णमेघ इव । जलपूर्णमेघस्य काष्ण्यात् कृष्णवर्णे प्रलम्बासुरे तत्साम्यम्, चन्द्रस्य शुभ्रत्वाच्च शुभ्रवर्णे बलरामे तत्साम्यमिति ध्येयम् । चन्द्रस्य वारिदेन सह चलनाभावेऽपि अभिमानतस्तथोक्तिः ।

(ज) असहन्नित्यत्र शतृप्रत्यय आर्षः । रौहिणेयस्य रोहिणीपुत्रस्य बलरामस्य । बलाहकः मेघः ।

(झ) ह्रियमाणः तेन प्रलम्बासुरेण दूरं नीयमानः । इदं 'कृष्ण कृष्णे'त्यादि वक्ष्यमाणम् ।

(ञ) गोपालस्य गोपबालकस्य छद्मरूपं कपटाकारः तद्वन्तम्, एषः अहं बलरामः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदत्र साम्प्रतं कार्य्यं मया मधुनिषूदन !
तत् कथ्यतां प्रयात्येष दुरात्मा दानवाधमः(ट) ॥२१॥

पराशर उवाच ।

तमाह रामं गोविन्दः स्मितभिन्नौष्ठसम्पुटः ।
महात्मा रौहिणेयस्य बलवीर्य्यप्रमाणवित्(ठ) ॥२२॥

किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते ।
सर्व्वात्मन् ! सर्व्वगुह्यानां गुह्यगुह्यात्मना त्वया ॥२३

स्मराशेषजगद्बीजकारणं कारणाग्रजम् ।
आत्मानमेकं तद्वच्च जगत्येकार्णवे च यत् ॥२४॥

किन्न वेत्सि यथाहञ्च त्वञ्चैकं कारणं भुवः ।
भारावतारणार्थाय मर्त्यलोकमुपागतौ(ड) ॥२५॥

नमः शिरस्तेऽम्बुमयी च मूर्त्तिः
पादौ क्षितिर्वक्त्रमनन्त ! वह्निः
सोमो मनस्ते श्वसितं समीरो
दिशश्चतस्रोऽव्यय ! बाहवस्ते ॥२६
सहस्रवक्त्रो भगवान् महात्मा
सहस्रहस्ताङ्घ्रिशरीरभेदः
सहस्रपद्मोद्भवयोनिराद्यः
सहस्रशस्त्वां मुनयो गृणन्ति ॥२७
दिव्यं हि रूपं तव वेत्ति नान्यो
देवैरशेषैरवतारस्थः
तवार्च्यते वेत्सि न किं यदन्ते
त्वय्येव विश्वं लयमभ्युपैति ॥२८

ह्वियामि ह्विये कर्मणि परस्मैपदमार्षम्, पर्वतवदुदग्रा उन्नता मूर्त्तिर्यस्य तेन ॥२०।२१॥

पूर्वं कालियभोगाततं मां 'किमात्मानं परमेश्वरं न वेत्सी'ति तत्त्वं संस्मार्य स्वयमिदानीं मूह्यतीति विस्मयात् स्मितेन भिन्नमोष्ठसंपुटं यस्य सः ॥२२॥

सर्वात्मनः सर्वरूपगुह्यानां सर्वेषां सूक्ष्माणां कारणानां गुह्यकारणभूतः । अत एव गुह्यात्मना प्रलयेऽप्यवशिष्यमाणचैतन्यरूपेण ॥२३॥

एतत् प्रपञ्चयन्नाह—'स्मरे'ति द्वाभ्याम् । अशेषजगद्बीजं कारणं, सर्वजगन्मूलस्याव्यक्तस्यापि कारणमात्मानं स्मर, तत्र हेतुः कारणस्याग्रजम् अव्यक्तस्यापि प्रवर्त्तकत्वेन स्थितं, तद्वच्च तथैव जगत्येकार्णवे प्रलीनावस्थे सति यत् मवशिष्यते तदेवाहमित्यात्मानं स्मर ॥२४।२५॥

विराड्रूपेण स्तौति—'नम' इति ॥२६॥

तदाधारविश्वरूपेण स्तौति—'सहस्रवक्त्र' इति । नि मपरिमिता हस्तांघ्रिशरीराणां भेदा यस्य, शरीरेषु सहस्रपद्मोद्भवा ब्रह्माणस्तेषां योनिजनकः ॥२७॥

तत्र दिव्यन्ते विश्वरूपं मदन्यो न वेत्ति । वेत्सि अतः किम् ॥२८॥

(ट) मधुनिषूदनेति सम्बोधनस्यायमभिप्रायो यथा,—त्वं मधुनामकस्य दैत्यस्य निहन्तासि, अतो दैत्यनिषूदनस्य रीतिं जानासि, तत्तां रीतिं मां शिक्षय, ययाहमिममनायासं हत्वा आत्मानं ततो रक्षितुमलं भवेयमिति भावः ।

(ठ) रौहिणेयस्य बलरामस्य बलवीर्य्ययोः शरीरान्तरशक्त्योः प्रमाणं ज्ञापकं तद् वेत्ति यः सः ।

(ड) भारावतारणार्थाय भारस्य दुष्टदानवादिकृतस्य अवतारणार्थाय अवतारणरूपप्रयोजनाय भारोपशमनायेत्यर्थः ।

(ढ) न विद्यते अन्तः नाशो यस्य तत्सम्बोधनम् न विद्यते व्ययः विनाशो यस्य तत्सम्बोधनमव्ययेति, एतत्पदद्वयेन सम्बोधनात् त्वमविनश्वर एवेति पुनः पुनस्त्वा तदलमस्माद् दानवादात्मनो वृथा विपदमाशङ्क्येति गम्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वया धृतेयं धरणी बिभर्त्ति
चराचरं विश्वमनन्तमूर्त्ते !
कृतादिभेदैरज ! कालरूपो
निमेषपूर्व्वो जगदेतदत्सि(ञ) ॥२९॥

अत्तं यथा वाड़ववह्निनाम्बु
हिमस्वरूपं परिगृह्य कास्तम् ।
हिमाचले भानुमतोऽंशुसङ्गा-
ज्जलत्वमभ्येति पुनस्तदेव(ट) ॥३०॥

एवं त्वया संहरणेऽत्तमेत-
ज्जगत् समस्तं पुनरप्यवश्यम् ।
तवैव सर्गाय समुद्यतस्य
जगत्त्वमभ्येत्यनुकल्पमीश(ठ) ॥३१॥

भवानहञ्च विश्वात्मन्नेकमेव हि कारणम् ।
जगतोऽस्य जगत्यर्थे भेदेनावां व्यवस्थितौ ॥३२॥

तत् स्मर्य्यतामभेयात्मन् ! त्वयात्मा जहि दानवम् ।
मानुष्यमेवावलम्ब्य बन्धूनां क्रियतां हितम् ॥३३॥

पराशर उवाच ।

इति संस्मारितो विप्र ! कृष्णेन सुमहात्मना ।
विहस्य पीड़यामास प्रलम्बं बलवान् बलः ॥३४॥

अत्सि ग्रससे ॥२९॥

जगत्प्रलयोद्भवहेतुत्वं दृष्टान्तेनाह—'अत्त'मिति द्वाभ्याम् । सामुद्रमम्बु वाडवाख्येन वह्निनाऽत्तं जग्धं कास्तं केन वायुना वड़वाग्निगतेनार्करश्मिनाडीमयेन अस्तं हिमाचले क्षिप्तं हिमस्वरूपं परिगृह्य स्थितं सत् ग्रीष्मे भानुमतो रवेरंशुभिः सङ्गात् पुनश्च जलत्वं प्राप्नोति यथा । अयमर्थः,—'सरित्-समुद्रभूमिस्थास्तथापः प्राणिसम्भवाश्चतुःप्रकारा भगवानादत्ते सविता मुने । विक्षानष्टभिर्मासैरादाय जगतो जलं सोमे मुञ्चत्यथेन्दुश्च वायुनाड़ीमये दिवि । हिमोष्णवातवृष्टीनां हेतुः खसमयङ्गत' इत्यादि—पूर्वोक्तरीत्या नद्यादिरूपेणागतं जलं जलधौ सवायुना वड़वाग्निना पीतं घनीभवद् हिमतां गतं तेन वायुना नाड़ीमयरविरश्मिना चन्द्रद्वारा हिमाद्रौ क्षिप्तं ग्रीष्मे पुनस्तदेव तपनातपेन विलीयमानं हिमत्तौ जलतां याति यथा ॥३०॥

तथैव त्वया संहरणकाले वड़वाग्निस्थानीयेन रुद्रादि-रूपेणात्तं भक्षितं जगत् त्वदधीनं त्वय्येव हिमाद्रिस्थानीये परमपुरुषे कारणात्मना संक्षिप्तं सदेव तपनातपेन कालवेगेन विलीयमानं जलतां प्राप्य यावत्प्रलयं स्थितं सत् पुनर्हिरण्य-गर्भात्मना सर्गोद्यतस्य सूर्य्यस्थानीयस्य सृज्यसंस्कारेच्छा-सम्बन्धात् पुनर्विराडात्मकस्थूलजगद्रूपत्वं प्रतिकल्पमेतीति वाक्यार्थोपमा । यथाह दण्डी,—'वाक्यार्थेनैव वाक्यार्थ कोऽपि यद्युपमीयते । एकानेके त्वशब्दत्वात् सा वाक्यार्थोपमा मता' ॥३१॥

एवम्भूतः परमेश्वरस्त्वमेव नाहमिति चेत्तत्राह—'भवानहञ्चे'ति ॥३२॥

(ञ) अनन्तः शेषनागः स एव मूर्त्तिः आकारः यस्य तत्सम्बोधनमनन्तमूर्त्ते इति । अथवा अनन्ता संख्यातीता मूर्त्तिर्यस्येति । कृतादिभेदैः सत्ययुगादिभेदैः । निमेषपूर्वः निमेषः निमेषमात्रः खण्डकालः स पूर्वो यस्य, निमेष-मात्रात् कालादारभ्य सत्ययुगादिभेदैरुपलक्षितः कालरूप इत्यर्थः ।

(ट) 'यपि चादो जग्धि' रित्यनुशासनेन अदेः क्तप्रत्यये जग्ध्यादेशस्य प्राप्तेर्जग्धमिति वक्तव्ये अत्तमिति प्रयोग आर्षः ।

(ठ) अत्तमिति प्रयोगः पूर्ववदार्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुष्टिना चाहनन्मूर्द्ध्नि कोपसंरक्तलोचनः ।
तेन चास्य प्रहारेण बहिर्याते विलोचने(ड) ॥३५॥

स निष्कासितमस्तिष्को मुखाच्छोणितमुद्वमन् ।
निपपात महीपृष्ठे दैत्यवर्य्यो ममार च ॥३६॥

प्रलम्बं निहतं दृष्ट्वा बलेनाद्भुतकर्म्मणा ।
प्रहृष्टास्तुष्टुवुर्गोपाः साधु साध्विति चाब्रुवन् ॥३७॥

संस्तूयमानो गोपैस्तु रामो दैत्ये निपातिते ।
प्रलम्बे सह कृष्णेन पुनर्गोकुलमाययौ ॥३८॥

इति श्रीविष्णुपुराणे पञ्चमांशे नवमः अध्यायः ।

यद्यपि दैत्येन निजं रूपमाविष्कृतं, तथापि बन्धुसौख्याय त्वयाऽनेनैव रूपेण स हन्तव्य इत्याह मानुष्यमेवेति ॥३३।३४।३५॥

निष्कासितं मस्तिष्कं मस्तकस्नेहो यस्य सः ॥३८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रभाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमेऽंशे नवमोऽध्यायः ।

(ड) 'अहन्' इति वक्तव्ये अहनदित्यार्षः प्रयोगः ।

(ढ) दैत्यवर्य्यः प्रलम्बासुरः ।

दशमः अध्यायः

[शरद्वर्णनम्, गोवर्द्धनपूजा च]

पराशर उवाच ।

तयोर्विहरतोस्तत्र राम-केशवयोर्व्रजे ।
प्रावृट् व्यतीता विकसत्-सरोजा चाभवच्छरत् ॥१॥

अवापुस्तापमत्यर्थं शफर्य्यः पल्वलोदके ।
पुत्रक्षेत्रादिसक्तेन ममत्वेन यथा गृही ॥२॥

मयूरा मौनिनस्तस्थुः परित्यक्तमदा वने ।
असारतां परिज्ञाय संसारस्येव योगिनः ॥३॥

उत्सृज्य जलसर्वस्वं निर्म्मलाः सितमूर्त्तयः ।
तत्यजुश्चाम्बरं मेघा गृहं विज्ञानिनो यथा ॥४॥

दशमः अध्यायः

गोवर्धनमखादीनि शरत्कर्माणि वर्णयन् । शरदं वर्णयत्यादावध्यात्मार्थोपमानतः

तदेवं हरेः प्रावृट्क्रीड़ां निरूप्य गोवर्धनपूजा-तदुद्धरणाद्याः शरत्क्रीड़ा वर्णयिष्यन् शरदन्तावद्वैराग्य-ज्ञानगर्भाभिरुपमाभिर्वर्णयति—'तयो'रित्यादि पञ्चदशभिः । विकसन्ति सरोजानि यस्यां सा ॥१॥

शफर्यः क्षुद्रमत्स्याः पल्वलोदके स्वल्पगर्त्तोदके ॥२॥

परित्यक्तो मदो दर्पो यैस्ते ॥३॥

जलमुदकं जड़महंकारादि च तदेव सर्वस्वं हित्वा अहंकारकार्यं रागादिश्च तद्रहिताः सितमूर्त्तयः शुभ्राः शुद्धसत्त्वाश्च विज्ञानिनः आत्मज्ञाः ॥४॥

(क) पुत्रक्षेत्रादयः पुत्रकलत्रादयः तेषु सक्तेन मग्नेन तद्गतेनेत्यर्थः, ममत्वेन मदीयत्वाभिमानेन, गृही गृहस्थः तापं दुःखम् अवाप्नोति तद्विरहादिभिरिति शेषः, तथा पल्वलोदके शरदि सलिलशोषणात् तापम् अवापुरित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरत्सूर्य्यांशुतप्तानि ययुः शोषं संरासि च ।
बह्वालम्बि-ममत्वेन हृदयानीव देहिनाम्(ख) ॥५॥

कुमुदैः शरदम्भांसि योग्यतालक्षणं ययुः ।
अवबोधैर्मनांसीव सम्बन्धममलात्मनाम्(ग) ॥६॥

तारका विमले व्योम्नि रराजाखण्डमण्डलः ।
चन्द्रश्चरमदेहात्मा योगी साधुकुले यथा(घ) ॥७॥

शनकैः शनकैस्तीरं तत्यजुश्च जलाशयाः ।
ममत्वं क्षेत्रपुत्रादिरूढ़मुच्चैर्यथा बुधाः ॥८॥

पूर्व्वत्यक्तैः सरोऽम्भोभिर्हंसा योगं पुनर्ययुः ।
क्लेशैः कुयोगिनोऽशेषैरन्तरायहता इव(ङ) ॥९॥

निभृतोऽभवदत्यर्थं समुद्रः स्तिमितोदकः ।
क्रमावाप्त-महायोगो निश्चलात्मा यथा यतिः ॥१०॥

सर्व्वत्रातिप्रसन्नानि सलिलानि तदाभवन् ।
ज्ञाते सर्व्वगते विष्णौ मनांसीव सुमेधसाम् ॥११॥

बभूव निर्म्मलं व्योम शरदा ध्वस्ततोयदम् ।
योगाग्निदग्धक्लेशौघं योगिनामिव मानसम्(च)॥१२॥

शरदम्भांसि स्वच्छजलानि कुमुदैः सितैर्योग्यतालक्षणं ययुः अन्योन्यरूपात्मकं संबन्धं ययुः। अमलात्मनां वीतरागाणां मनांसि अवबोधैस्तत्त्वविषयज्ञानैरिव ॥६॥

तारकाभिरुपलक्षिते विमले व्योम्नि अखण्डमण्डलः सम्पूर्णप्रकाशः पूर्णिमाप्रान्ते चन्द्रो रराज—यथा तारकैर्विद्याचारादिभिर्विमले साधूनां कुले पूर्णब्रह्मप्रकाशो योगी चरमे देहे आत्मा यस्य सः ॥७।८॥

अन्तरायहताः विघ्नाभिभूताः योगिनो योगभ्रष्टाः। अविद्यादिभिः क्लेशैर्यथा पुनर्युज्यन्ते तद्वत् ॥९॥

निभृतो निर्विकारः, स्तिमितोदको निश्चलाम्बुः, यमनियमादिक्रमेणावाप्तो महायोगः सम्प्रज्ञातसमाधिलक्षणो येन स यतिर्यथा ॥१०॥

सर्वत्र नद्यादौ सर्वत्र शत्रुमित्रादिषु सुमेधसां मनांसीव ॥११।१२।१३॥

(ख) शरदः शरत्कालस्य यः सूर्य्यः तस्य अंशुभिः रश्मिभिः तप्तानि तापं नीतानि। ययुः प्रापुः। बहून् असंख्यान् विषयानालम्बत इति बह्वालम्बि तादृशेन ममत्वेन बहुगोचरममकारेणेत्यर्थः।

(ग) अन्योन्यरूपात्मकं सम्बन्धं ययुरिति श्रीधरः।—तथाहि शरदि यथा जलं स्वच्छं भवति, तथा तत्र शुभ्राणि कुमुदानि विकसन्ति, तदा तेषां द्वयेषां शुभ्रतया तुल्यं रूपं भवति। वीतरागेषु पुरुषेष्वपि तत्त्वज्ञानं जायते, तेन तत्त्वज्ञानेन च तेषां सर्वेषामेवैकरूप्येण विषयव्यावृत्तानि मनांसि जायन्त इति उभयेषां मिथःसादृश्यमवसेयम्।

(घ) चरमे तदीयनिखिलदेहान्तिमभूते देहे शरीरे आत्मा यस्य सः, यद्देहपरिग्रहानन्तरं तस्यात्मनः अपरदेहपरिग्रहो न भावी, परं विदेहमुक्तिरेव, तद्देहावच्छिन्नः। आत्मा यस्य स इत्यर्थः।

(ङ) वर्षासु हंसाः साधारणसरांसि परिहाय मानसं सरः समुपयान्तीति प्रसिद्धम्। तदेवाधिकृत्योक्तं पूर्वत्यक्तैरित्यादि। क्लेशा अविद्यादयः पञ्च योगशास्त्रोक्ताः, तदुक्तं योगसूत्रे पातञ्जले—'अविद्या-स्मिता-राग-द्वेषा-भिनिवेशाः पञ्च क्लेशा' इति। वर्षासु सरोऽम्भसां हंसरोगहेतुत्वादिदोषदुष्टत्वात् क्लेशानाञ्च तापहेतुत्वादिदोषदुष्टत्वात् मिथः साम्यम्।

(च) ध्वस्ताः नष्टाः अदर्शनं गता इत्यर्थः, तोयदाः जलदाः जलदायिनो मेघा इत्यर्थः, यत्र तथाभूतम् जलवाहिमेघशून्यमित्यर्थः, तेन शरदि जलहीनशुभ्रमेघानां व्योम्नि सत्त्वेऽपि न क्षतिः। योगाग्निना चित्तवृत्तिनिरोधरूपवह्निना दग्धाः सबीजं नाशिताः क्लेशौघाः अविद्यादिलक्षणाः पञ्च क्लेशा यस्य तथाभूतं योगिनां मानसमिव —अन्तःकरणतत्त्वं बुद्धितत्त्वमिवेति सांख्यादिसिद्धान्तमनुसृत्योक्तम्। तन्मते अविद्यादीनां तदाधारत्वात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूर्य्यांशुजनितं तापं निन्ये तारापतिः शमम् ।
अहङ्कारोद्भवं दुःखं विवेकः सुमहानिव ॥१३॥

नभसोऽभ्रान् भुवः पङ्कान् कालुष्यं चाम्भसः शरत् ।
इन्द्रियाणीन्द्रियार्थेभ्यः प्रत्याहार इवाहरत् ॥१४॥

प्राणायाम इवाम्भोभिः सरसां कृतपूरकैः ।
अभ्यस्यतेऽनुदिवसं रेचकाकुम्भकादिभिः ॥१५॥

विमलाम्बरनक्षत्रे काले चाभ्यागतो व्रजम् ।
ददर्शेन्द्रमहारम्भायौद्यतांस्तान् व्रजौकसः(छ) ॥१६॥

कृष्णस्तानुत्सुकान् दृष्ट्वा गोपानुत्सवलालसान् ।
कौतूहलादिदं वाक्यं प्राह वृद्धान् महामतिः ॥१७॥

कोऽयं शक्रमहो नाम येन वो हर्ष आगतः ।
प्राह तं नन्दगोपश्च पृच्छन्तमतिसादरम् ॥१८॥

मेघानां पयसां चेशो देवराजः शतक्रतुः ।
तेन सञ्चोदिता मेघा वर्षन्त्यम्बुमयं रसम् ॥१९॥

तद्वृष्टिजनितं शस्यं वयमन्ये च देहिनः ।
वर्त्तयामोपयुञ्जानास्तर्पयामश्च देवताः ॥२०॥

क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः ।
तेन संवर्द्धितैः शस्यैः पुष्टास्तुष्टा भवन्ति वै ॥२१॥

नाशस्या नातृणा भूमिर्न बुभुक्षार्दितो जनः ।
दृश्यते यत्र दृश्यन्ते वृष्टिमन्तो बलाहकाः(ज) ॥२२॥

भौममेतत् पयो दुग्धं गोभिः सूर्य्यस्य वारिदाः ।
पर्जन्यः सर्व्वलोकस्य भवाय भुवि वर्षति ॥२३॥

तस्मात् प्रावृषि राजानः सर्व्वे शक्रं मुदा युताः ।
महैः सुरेशमर्च्चन्ति वयमन्ये च मानवाः(झ) ॥२४॥

नभआदिभ्योऽब्दपङ्ककालुष्याणि शरदहरत्। यथा शब्दादिभ्यः श्रोत्रादीनि प्रत्याहारस्तद्वियोजनप्रयत्नो हरति ॥१४॥

सरसामम्भोभिः कृतपूरकैराकुम्भकादिभिश्च प्राणायामोऽभ्यसत इव। अभ्यास्यतेति पाठेऽभ्यस्त इवेत्यर्थः। तानि हितकुल्या जलैरापूर्य्य कुम्मितवायुवत् कञ्चित् कालं तथैवावस्थाप्य पुनर्यथाकालं केदाराद्यर्थं प्रणालिकया निःसार्यन्त इति प्राणायामसाम्यम् रेचककुम्भकादिभिरित्यत्रादिशब्दबहुवचनाभ्यां तदावृत्तिरुक्ता। पूरकादिलक्षणञ्च योगशास्त्रे प्रोक्तम्,—'पूरकः पूरणं वायोः कुम्भकः स्थापनं क्वचित्। बहिर्निःसारणं तस्य रेचकः परिकीर्त्तितः' इति ॥१५॥

इन्द्रस्य महः पूजोत्सवः तदारम्भायोद्यतान् कृष्णो ददर्श ॥१६॥

(छ) विमले अम्बरं नक्षत्रञ्च यत्र तथाभूते काले शरत्काले।

उत्सुकान् युक्तान् ॥१७।१८।१९।२०।२१।२२॥

ननु सूर्यः स्वरश्मिभिर्भौमं रसमाकृष्य वर्षं प्रसिद्धम्। नेन्द्रस्तत्राह भौममिति। दुग्धम् आत्तं इन्द्रः। स हि भूगतं जलं सूर्यस्य रश्मिभिरात्तं मेघेषु जगत उद्भवाय वर्षति। याभिरादित्यस्तपति रश्मिस्तामिः पर्यन्यो वर्षतीति श्रुतेः ॥२३॥

प्रावृषि गतायामिति शेषः। शरत्काले शक्रप्रस्तुतत्वात् ॥२४॥

(ज) यत्र यस्यां भूमौ वृष्टिमन्तः वर्षणकारिणो मेघा दृश्यन्ते नभसीति शेषः। सा भूमिः अशस्या शस्यशून्या अतृणा तृणशून्यापि न, अतस्तत्र जनः बुभुक्षार्दितो न, किन्तु तृणशस्यादिजीवनो जीव इत्यर्थः शस्यसमृद्धया मानवो समृद्धया पशोरपि तत्र बुभुक्षाशान्तेरनायासमुपपत्तेरिति।

(झ) अन्ये वयञ्च अर्चाम इति योजना। महैः 'क्षण उद्धर्षो मह उद्धव उत्सव' इति कोषात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

नन्दगोपस्य वचनं श्रुत्वेत्थं शक्रपूजने ।
कोपाय त्रिदशेन्द्रस्य प्राह दामोदरस्तदा ॥२५॥

न वयं कृषिकर्त्तारो वाणिज्यजीविनो न च ।
गावोऽस्मद्दैवतं तात ! वयं वनचरा यतः ॥२६॥

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथापरा ।
विद्याचतुष्टयं त्वेतत् वार्त्तामत्र शृणुष्व मे(ञ) ॥२७॥

कृषिर्वणिज्या तद्वत्तु तृतीयं पशुपालनम् ।
विद्या ह्येता महाभाग ! वार्त्ता वृत्तित्रयाश्रयाः (ट)
॥२८॥

कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनाम् ।
अस्माकं गाः परा वृत्तिर्वार्त्ताभिर्दैरियं त्रिभिः ॥२९॥

विद्यया यो यया युक्तस्तस्य स दैवतं महत् ।
सैव पूज्यार्च्चनीया च सैव तस्योपकारिका(ठ) ॥३०॥

योऽन्यस्य फलमश्नन् वै पूजयत्यपरं नरः ।
इह च प्रेत्य चैवासौ तात ! नाप्नोति शोभनम्(ड)।३१

कृष्यन्ता प्रथिता सीमा सीमान्तश्च पुनर्वनम् ।
वनान्ता गिरयः सर्व्वे ते चास्माकं परा गतिः ॥३२॥

न द्वारबन्धावरणा न गृहक्षेत्रिणस्तथा ।
सुखिनः सकले लोके यथा वै चक्रचारिणः ॥३३॥

आन्वीक्षिकी तर्कविद्या, त्रयी वेदत्रयात्मिका, वार्त्ता वक्ष्यमाणा, दण्डनीतिरर्थशास्त्रम्, एतद्विद्याचतुष्टयं यथायथं सर्वेषां ब्राह्मणादीनां दृष्टादृष्टार्थसाधनम् ॥२७॥

तत्र वार्त्ताख्या ह्येका विद्या कृष्यादिवृत्तित्रयाश्रया ॥२८॥

गाः गावः एवमियं वार्त्ता त्रिभिर्भेदैः स्थिता ॥२९॥

ततः किमत आह—'विद्यये'ति। पूज्या मान्या। अर्चनीया च गन्धपुष्पादिभिः ॥३०॥

विपक्षे दोषमाह—'योऽन्यस्य' इति ॥३१॥

किञ्च नास्माकं कर्षकाणामिव शक्रपूजा युक्ता भिन्नस्थानत्वादित्याशयेनाह—'कृष्यन्ता' इति। कृषिः कर्षणीयं क्षेत्रं तदन्ते सीमा मर्यादा साधरणप्रचारभूमिः। सीमाया अन्ते च वनं अस्मन्निवासस्थानं वनानामन्ते च गिरयः। ते च गिरयोऽस्माकं वनचारिणां परा गतिः स्वैरगतिः स्वैरविहारस्थानत्वात् ॥३२॥

तदेवाह—'न द्वारे'ति। न विद्यते द्वारबन्धः कपाटादिरावरणं येषाम्, न द्वारबन्धस्यावरणञ्च कुड्यादि येषामिति वा, न चास्ति नियतं गृहं क्षेत्रञ्च येषां ते वयं सर्वत्र प्रभूततृणोदकादिमति गिरिवनादौ यथेच्छं विचरन्तः सर्वस्मिन् जने सुखिनः। यथा वै चक्रचारिणः चक्रोपलक्षितेन शकटेन चरन्तो नियतावासाः। यद्वा यथा यत्र सायंगृहाख्या मुनयस्तथा अतो गृहाणां क्षेत्राद्यभिमानवतां पण्यकृष्यादिजीविनामिव नास्माकमिन्द्रेण किञ्चित् कार्यमिति भावः ॥३३॥

(ञ) शृणुष्वेत्यात्मनेपदमार्षम्।

(ट) वृत्तित्रयं जीवनोपायत्रयम् आश्रयः अवलम्बनं यासां ताः।

(ठ) सैव पूज्यार्चनीया चेत्यत्र हेतूपन्यासायाह—'सैव तस्योपकारिके'ति। उपकारिकाया अपि तस्या अपूजने अनर्चने च कृतघ्नतादोषापात इति भावः।

(ड) अन्यस्य कारणस्य फलं कार्य्यम् अन्यकृतमुपकारमित्यर्थः, अश्नन् भुञ्जानः अपरम् उपकारकादन्यं पूजयति मानयति अर्चयति च गन्ध-पुष्पाद्यैरित्यपि प्रसङ्गायातम्। इह अस्मिन् लोके जीवदवस्थायाम्, प्रेत्य मृत्वा परलोके चेत्यर्थः, शोभनं शुभं मङ्गलमित्यर्थः, नाप्नोति। लोकद्वय एव तस्याहितं भवतीति भावः। अत एव नास्माकं शक्रपूजा कार्य्येति मुख्यतात्पर्य्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[पञ्चमांशे

श्रूयन्ते गिरयश्चामी वनेऽस्मिन् कामरूपिणः ।
तत्तद्रूपं समास्थाय रमन्ते स्वेषु सानुषु ॥३४॥
यदा चैतेऽपराध्यन्ते* तेषां ये काननौकसः ।
तदा सिंहादिरूपैस्तान् घातयन्ति महीधराः ॥३५॥
गिरियज्ञस्त्वयं तस्माद् गोयज्ञश्च प्रवर्त्यताम् ।
किमस्माकं महेन्द्रेण गावः शैलाश्च देवताः ॥३६॥
मन्त्रयज्ञपरा विप्राः सीतायज्ञाश्च कर्षकाः ।
गिरि-गोयज्ञशीलाश्च वयमद्रिवनाश्रयाः(ढ) ॥३७॥
तस्माद् गोवर्द्धनः शैलो भवद्भिर्विविधार्हणैः ।
अर्च्यतां पूज्यतां मेध्यं पशुं हत्वा विधानतः(ण)।३८
सर्व्वघोषस्य सन्दोहो गृह्यतां मा विचार्य्यताम् ।
भोज्यन्तां तेन वै विप्रास्तथा ये चाभिवाञ्छकाः(त)
॥३९॥

समर्च्चिते कृते होमे भोजितेषु द्विजातिषु ।
शरत्पुष्पकृतापीड़ाः परिगच्छन्तु गोगणाः(थ) ॥४०
एतन्मम मतं गोपाः सम्प्रत्याद्रियते यदि ।
ततः कृता भवेत् प्रीतिर्गवामद्रेस्तथा मम(द) ॥४१
इति तस्य वचः श्रुत्वा नन्दाद्यास्ते व्रजौकसः ।
प्रीत्युत्फुल्लमुखा विप्र ! साधु साध्वित्यथाब्रुवन्(ध)
शोभनं ते मतं वत्स ! यदेतद्भवतोदितम् ।
तत् करिष्यामहे सर्व्वं गिरियज्ञः प्रवर्त्यताम्(न)

पराशर उवाच ।

तथा च कृतवन्तस्ते गिरियज्ञं व्रजौकसः ।
दधि-पायस-मांसाद्यैर्ददुः शैलबलिं ततः ॥४४॥
द्विजांश्च भोजयामासुः शतशोऽथ सहस्रशः ।
अन्यानप्यागतानित्थं कृष्णेनोक्तं यथा पुरा ॥४५॥

किञ्च इन्द्रादिपूजापदैरस्माभिर्यदि गिरयोऽवज्ञास्यन्ते तर्हि महाननर्थः स्यादित्याह—'श्रूयन्त' इति द्वाभ्याम् ॥३४॥

ये काननौकसः तेऽपि यदा अपराध्यन्ते तेषां गिरीणां वा अवज्ञादिलक्षणमपराधं कुर्वन्ति । तदा च सिंहव्याघ्र-सर्पादिरूपैस्ते तान् मारयन्ति ॥३५।३६॥

मन्त्रयज्ञपराः केवलं मन्त्रोक्तदेवतार्चनपरा विप्राः, न तु प्रत्यक्षं देवताः पश्यन्ति । वयन्तु गिरिगोयज्ञशीलाः प्रत्यक्षा देवा गिरयो गावश्च तद्भजनशीलाः ॥३७।३८॥

घोषो गोपालपल्ली सर्वस्यापि घोषस्य सन्दोहः समूहो दोहो दुग्धादिगृह्यताम् ॥३९॥

परितो गच्छन्तु प्रदक्षिणीकुर्वन्तु ॥४०।४१।४२।४३।४४।४५।४६॥

---

* राधेः पवस्मैपदित्वादपराध्यन्त इति कर्त्तरि प्रयोग आर्षः ।

(ढ) सीता लाङ्गलपद्धतिरिति कोषात् सीता लाङ्गलपद्धतिः । तद्यज्ञाः तद्भजनशीलाः, अथवा सीताशब्द उपचारेण तत्साधन-रूपक्रियापरः, सैव यज्ञः अर्चनीया देवता येषां ते सीतायज्ञाः । अद्रिः पर्वतः वनञ्च आश्रयः येषां ते, अथवा अद्रिवनं पर्वतसन्निहितमरण्यम् आश्रयः येषां ते ।

(ण) मेध्यं पवित्रं बलिदाने शास्त्रानुमतं छागमेषादिक-मित्यर्थः । विधानतः शास्त्रविध्यनुसारेण उत्सर्गादिकं कृत्वा न तु विधिमतिक्रम्येत्यर्थः ।

(त) तेन दुग्धादिना । ये च अभिवाञ्छकाः विशेषेण अपरेऽपि ये भोजनेप्सव इत्यर्थः ।

(थ) शरदः शरत्कालस्य यानि पुष्पाणि शेफालिकादीनि सप्तच्छदादीनि तैः कृतः आपीड़ः शेखरः शिरोमाल्यमित्यर्थः, येषां ते, 'शिखास्वापीड़शेखरा' वितिकोषात् ।

(द) आद्रियते युष्माभिरिति शेषः ।

(ध) प्रीत्या सन्तोषेण उत्फुल्लं प्रसन्नं मुखं येषां ते ।

(न) करिष्यामह इत्यत्र फलवत्कर्त्तरि विहितस्यात्मनेपदस्य निर्देशात् एतदनुष्ठानेनैव वयं शुभफलशालिनो भविष्याम इति तेषां नन्दादीनां दृढ़प्रत्ययो व्यज्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गावः शैलं ततश्चक्रुः श्रार्च्चितास्ताः प्रदक्षिणम् ।
ऋषभाश्चापि नर्दन्तः सतोया जलदा इव ॥४६॥

गिरिमूर्द्धनि कृष्णोऽपि शैलोऽहमिति मूर्त्तिमान् ।
बुभुजेऽन्नं बहु तदा गोपवर्य्याहितं द्विज ॥४७॥

अन्येन कृष्णो रूपेण गोपैः सह गिरेः शिरः ।
अधिरुह्यार्च्चयामास द्वितीयामात्मनस्तनुम् ॥४८॥

अन्तर्द्धानं गते तस्मिन् गोपा लब्ध्वा ततो वरान् ।
कृत्वा गिरिमहं गोष्ठं निजमभ्याययुः पुनः ॥४९॥

इति श्रीविष्णुपुराणे पञ्चमांशे दशमः अध्यायः ॥

इन्द्रवैलक्षण्यार्थं शैलाभिमानिदेवतारूपेणात्मानं प्रदर्श्य शैलोऽहमिति ब्रुवन् गोपवर्य्यैराहितं दत्तं बह्वन्नं बुभुजे ॥४७॥

गोपानां भक्त्युद्रेकार्थमन्येन जनकरूपेण तां मूर्त्तिमर्चयामास ॥४८॥

ततः शैलदेवाद् वरं लब्ध्वान्तर्धानं गते तस्मिन् गोपा निजगोष्ठमभ्याययुः ॥४९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमेऽंशे दशमोऽध्यायः ॥

(घ) गिरिमहं गोवर्द्धनगिरिमहोत्सवं कृत्वा समाप्य ।

एकादशोऽध्यायः

[इन्द्रस्य क्रोधः, श्रीकृष्णस्य गोवर्द्धनपर्व्वतधारणञ्च]

पराशर उवाच ।

महे प्रतिहते शक्रो मैत्रेयातिरुषान्वितः ।
संवर्त्तकं नाम गणं तोयदानामथाब्रवीत्(क) ॥१॥

भो भो मेघा ! निशम्यैतद् वचनं वदतो मम ।
आज्ञानन्तरमेवाशु क्रियतामविचारितम् ॥२॥

नन्दगोपः सुदुर्बुद्धिर्गोपैरन्यैः सहायवान् ।
कृष्णाश्रयबलाध्मातो महभङ्गमचीकरत्(ख) ॥३॥

आजीवो यः परस्तेषां याश्च गोपत्वकारणम् ।
ता गावो वृष्टिवातेन पीड्यन्तां वचनान्मम(ग) ॥४॥

एकादशः अध्यायः

संवर्तकं संहारकम् ॥१।२॥

कृष्णाश्रय एव बलं तेनाध्मातः उत्सिक्तः, अघवान् अपराधी, अचीकरत् कारितवान् ॥३॥

तेषामाजीवो जीवनहेतुर्या गावः याश्च गोपत्वस्य कारणं ता गावः पीड्यन्ताम् ॥४॥

(क) महे गोकुलवासिभिर्गोपैश्चिराचरिते शक्रमहोत्सवे प्रतिहते पूर्वाध्यायोक्तरीत्या श्रीकृष्णेन निरुद्धे सति । अतिरुषा स्वीयपूजाप्रतिरोधकृतेन कोपातिशयेन अन्वितः ।

(ख) महभङ्गं शक्रोत्सवलङ्घनं तदननुष्ठानमित्यर्थः, अचीकरत् तदनुमतिप्रदानेनेति शेषः ।

(ग) गोपत्वकारणमिति—यदि गावो न स्युस्तदा गोपालनमूलं गोपत्वमेव तेषां विघटेतेति भावः । वृष्टिश्च वातश्च वृष्टिवातमिति समाहारद्वन्द्वैकत्वम्, तेन वृष्ट्या वात्यया चेत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहमप्यद्रिशृङ्गाभं तुङ्गमारुह्य वारणम् ।
साहाय्यं वः करिष्यामि वार्य्यम्बूत्सर्गयोजितम्(घ)॥५

पराशर उवाच ।

इत्याज्ञप्ताः सुरेन्द्रेण मुमुचुस्ते बलाहकाः ।
वातवर्षं महाभीममभावाय गवां द्विज(ङ) ॥६॥

ततः क्षणेन धरणी ककुभोऽम्बरमेव च ।
एकं धारामहासारपूरणेनाभवन्मुने(च) ॥७॥

विद्युल्लताकशाघातत्रस्तैरिव घनैर्घनम् ।
नादापूरितदिक्चक्रैर्धारासारमपात्यत ॥८॥

अन्धकारीकृते लोके वर्षद्भिरनिशं घनैः ।
अधश्चोर्द्ध्वं च तिर्य्यक् च जगदाप्यमिवाभवत् ॥९॥

गावस्तु तेन पतता वर्षवातेन वेगिना ।
धूताः प्राणान् जहुः सन्नत्रिकसक्थिशिरोधराः(छ)

क्रोड़ेन वत्सानाक्रम्य तस्थुरन्या महामुने ।
गावो विवत्साश्च कृता वारिपूरेण चापराः(ज)॥

वत्साश्च दीनवदनाः पवनाकम्पिकन्धराः ।
त्राहि त्राहीत्यल्पशब्दाः कृष्णमूचुरिवार्त्तकाः(झ)॥

ततस्तद् गोकुलं सर्व्वं गो-गोपी-गोपसंकुलम् ।
अतीवार्त्तं हरिर्दृष्ट्वा मैत्रेयाचिन्तयत् तदा ॥१३॥

एतत् कृतं महेन्द्रेण महभङ्गविरोधिना ।
तदेतदखिलं गोष्ठं त्रातव्यमधुना मया ॥१४॥

वार्य्यम्बुनोरुत्सर्गेण योजितम् अनुबद्धं साहाय्यं सहकारित्वम् ॥५॥

अभावाय नाशाय ॥६॥

धाराणां महानासारः अजस्रसम्पातस्तस्य पूरणेन धरण्यादिकमेकममवत् ॥७॥

विद्युल्लतैव कशा तया घातस्ततस्तैरिव नादेन गर्जितेनापूरितं दिशाञ्चक्रं समूहो यैस्तैर्घनैः घनं निविड़ं यथा भवत्येवं धाराणां सारं श्रेष्ठं वर्षमपात्यत । यद्वा धारा अपात्यत, कथम् आसारं समन्तात् प्रसरणं यथा भवत्येवमित्यर्थः । यथा लोके कशाघातत्रस्तैरश्वैः क्लिश्यद्भिः कक्षविनिक्षिप्तं सर्वस्वं निपात्यते तद्वदित्युत्प्रेक्षा ॥८॥

आप्यम् अस्मयमिव जगदभवत् ॥९॥

धूताः कम्पिताः त्रिकः कटिः सक्थिः ऊरुः शिरोधरा ग्रीवा एते सन्ना अवसन्ना आकुञ्चिता यासां ताः प्राणान् जहुः मूर्च्छां प्राप्ता इत्यर्थः ॥१०॥

क्रोड़ेण कुक्ष्या आक्रम्य आच्छाद्य ॥११

पवनेनाकम्पिन्यः कन्धरा येषां ते ॥१२।१३॥

महभङ्गाद्विरोधिना प्रतिकूलेन सता प्रत्यक्षदेवत्वेनेष्टोऽस्माभिः स एवास्मान् रक्षतीति विस्रम्भाय विचारयति इमामिति ॥१४॥

(घ) अद्रिशृङ्गाभं पर्वतशिखरतुल्यम् तुङ्गं समुन्नतम् ।

(ङ) वातश्च वर्षश्च तयोः समाहारः वातवर्षम् । महाभीमम् अतिभयहेतुम्, एतेन विशेषणेन वातवर्षस्य विशेषणात्ततो गोपानां सुमहती भीतिर्ज्ञायते । तत्र गोपानामिति योजने तत्प्रतीतिः साक्षात् शब्दत एवेति बोध्यम् ।

(च) ककुभः दिशः, अम्बरम् आकाशम् ।

(छ) प्राणात् जहुः मूर्च्छां प्राप्ता इत्यर्थ इति श्रीधरः अत्र यथाश्रुतार्थपरिग्रहे श्रीकृष्णानुभावलाघवप्रसक्तिः स्यान्न्यथार्थः कुत इति ध्येयम् ।

(ज) विगताः वत्साः यासां ताः आत्मनां रक्षायां कृतभावात् परित्यक्तवत्सा इत्यर्थः, सर्वापेक्षया आत्मन्येव प्रीत्यतिशयात् । अतएव 'न वारे पुत्रस्य कामाय पुत्रः प्रियो भवति किन्तु आत्मनस्तु कामायेति उपनिषदाह ।

(झ) अल्पः वर्षवाताभ्यामत्यर्थमभिभवादनुत्थानशब्दः येषां ते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इममद्रिमहं धैर्य्यादुत्पाट्योरुशिलाघनम् ।
धारयिष्यामि गोष्ठस्य पृथुच्छत्रमिवोपरि(ञ) ॥१५॥

पराशर उवाच ।

इति कृत्वा मतिं कृष्णो गोवर्द्धनमहीधरम् ।
उत्पाट्यैककरेणैव धारयामास लीलया ॥१६॥

गोपांश्चाह जगन्नाथः समुत्पाटितभूधरः ।
विशध्वमत्र त्वरिताः कृतं वर्षनिवारणम्(ट) ॥१७॥

सुनिर्व्वृतेषु देशेषु यथाजोषमिहास्यताम् ।
प्रविश्यतां न भेतव्यं गिरिपातस्य निर्भयैः* ॥१८॥

इत्युक्तास्ते ततो गोपा विविशुर्गोधनैः सह ।
शकटारोपितैर्भाण्डैर्गोप्यश्चासारपीड़िताः(ठ) ॥१९॥

कृष्णोऽपि तं दधारैव शैलमत्यन्तनिश्चलम् ।
व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः(ड) ॥२०॥

गोप-गोपीजनैर्हृष्टैः प्रीतिविस्तारितेक्षणैः ।
संस्तूयमानचरितः कृष्णः शैलमधारयत् ॥२१॥

सप्तरात्रं महामेघा ववर्षुर्नन्दगोकुले ।
इन्द्रेण चोदिता विप्र ! गोपानां नाशकारिणः(ढ)॥२२

ततो धृते महाशैले परित्राते च गोकुले ।
मिथ्याप्रतिज्ञो बलभिद् वारयामास तान् घनान् ।२३

धैर्य्यात् प्रागल्भ्यात् उरुशिलाघनं विशालाभिः शिलाभिर्घनं सान्द्रम् ॥१५।१६।१७।

यथाजोषं यथासुखम् । निर्भयैर्वर्षादिभयशून्यैरिह गिरिमूलगर्त्ते प्रविश्यतां मद्धस्ताद् गिरिः पतिष्यतीति न भेतव्यं भयं न कार्यम् ॥१८।१९॥

व्रजे एवैकत्र वसन्तीति व्रजैकवासिनः तैः व्रजौकवासिभिरिति पाठे तु ओकःशब्दस्यादन्तत्वमार्षम् ॥२०।२१।२२

बलमिदिन्द्रः ॥२३॥

(ञ) उत्पाट्य भूमितो विश्लिष्टमूलं कृत्वा । पृथुच्छत्रमिव विशालातपत्रमिव ।

(ट) समुत्पाटितः विच्छिन्नमूलमुत्पातितः भूधरः गोवर्द्धनगिरिः येन सः । विशध्वमित्यात्मनेपदप्रयोग आर्षः । वर्षस्य निवारणं प्रतिषेधः कृतम् । एतेन मया छत्रवदुपरि धारितेन गोवर्द्धनेनास्याधस्तादिति शेषः ।

(*) निः न विद्यते वातः झञ्झावायुः यत्र ते निर्वाताः, सु अतिशयेन निर्वाताः तेषु सुतरां वातोपद्रवशून्येषु, देशेषु आस्यतां स्थीयतां युष्माभिरिति शेषः । इह गिरिमूलगर्त्ते इति श्रीधरः । —गिरेः उत्पाटनेन तन्मूलविश्लिष्टभूमिस्थाने यो गर्त्तः समजनि तस्मिन्नित्यर्थः । गिरिपातस्येत्यत्र भीत्यर्थधातुयोगे अपादाने पञ्चमीप्राप्तौ सम्बन्धसामान्यविवक्षया 'तावद् भयस्य भेतव्य' मित्यादिष्विव षष्ठी ।

(ठ) शकटेषु शकटाकारेषु भाण्डवहनोपकरणेषु आरोपितानि उत्थापितानि भाण्डानि दध्यादिपात्राणि यैः, एतेन भूरिभाराणां भाण्डानां वहने रक्षणे च महत् सौकर्य्यं व्यज्यते । आसारैः धारासम्पातैः पीड़िताः अत्यर्थं कष्टं नीता इत्यर्थः, 'धारासम्पात आसार' इति कोषात् ।

(ड) तं शैलं दधारैव न तु क्षणमपि परिश्रममनुभूय अवरोपयामास तदिच्छां वा पुपोष इति भावः । व्रजैकवासिभिरित्यनेन तेषां स्थानान्तरगमनाभावान्महावीरान्तराणां वीर्य्यातिशयेन सार्द्धमपरिचयादेव विस्मयातिशयोपपत्तिरिति सूच्यते ।

(ढ) सप्त रात्रयः समाहृता इति सप्तरात्रम् । संख्याशब्दपूर्वत्वाद् रात्रिशब्दात् समासान्तः अत्प्रत्ययः । कालाध्वनोरित्यादिना द्वितीया, सप्त रात्रीः व्याप्येत्यर्थः । नाशकारिणः नाशं कर्त्तुं प्रवृत्तस्येत्यर्थः, यथाश्रुतार्थे कृष्णविभवलाघवप्रसङ्गात् ।

(ण) मिथ्या व्यर्थां कृष्णस्य महता वैभवेनेति शेषः, प्रतिज्ञा वृष्टिवाताभ्यां गोपानां पीड़नविषया यस्य सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यभ्रे नभसि देवेन्द्रे वितथात्मवचस्यथ ।
निष्क्रम्य गोकुलं सर्व्वं स्वस्थाने पुनरागमत्(त) ॥२४॥

मुमोच कृष्णोऽपि तदा गोवर्द्धनमहाचलम् ।
स्वस्थाने विस्मितमुखैर्दृष्टस्तैस्तु व्रजौकसैः(थ) ॥२५॥

इति विष्णुपुराणे पञ्चमांशे एकादशः अध्यायः ॥

वितथे आत्मवचसी प्रयत्नप्रतिज्ञे यस्य तस्मिन् ॥२४॥

व्रजौकसैः व्रजौकोभिः ॥२५॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे एकादशोऽध्यायः ॥

(त) विगता अभ्रा मेघा यस्मात् तथाभूते वीतबलाहके सति 'वितथे आत्मवचसी प्रयत्नप्रतिज्ञे यस्य तस्मिन्' इति श्रीधरः, —'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चे'ति नानार्थ—कोषात् आत्मशब्दः प्रयत्नार्थकः । वितथे विफले इत्यर्थः । विफलम् आत्मनः स्वस्य वचः मेघान् प्रति गोपानां पीड़नं स्वस्य ततसाहाय्यञ्चाधिकृत्य प्रयुक्तं वाक्यो यस्य तथाभूते सतीत्यप्यत्र मूलार्थसम्भवी । सर्वं गोकुलं सर्वे गोकुलवासिनो जना इत्यर्थः, निष्क्रम्य गोवर्द्धनगिरिमूलगर्त्तान्निर्गत्य स्वस्थाने स्व पुनरागमत् ।

(थ) व्रजः गोकुलम् ओकः स्थानं येषां तैः गोकुलवासि रित्यर्थः । अत्र संस्कारेण व्रजौकोभिरिति वक्तव्ये व्रजौकै प्रयोग आर्षः । विस्मितानि कृष्णस्यालौकिककृत्यदर्शनेन समुपजातस्य विस्मयस्य सूचकेन विस्फारितनेत्रत्वादिलक्षणेन युक्तानि मुखानि येषां तैः ।

द्वादशः अध्यायः

[इन्द्रस्यागमनम्, इन्द्रेण श्रीकृष्णस्य अभिषेकश्च]

पराशर उवाच ।
धृते गोवर्द्धने शैले परित्राते च गोकुले ।
रोचयामास कृष्णस्य दर्शनं पाकशासनः ॥१॥
सोऽधिरुह्य महानागमैरावतममित्रजित्(क) ।
गोवर्द्धनगिरौ कृष्णं ददर्श त्रिदशेश्वरः ॥२॥

चारयन्तं महावीर्य्यं गावो गोपवपुर्धरम्(ख) ।
कृष्णञ्च जगतो गोपं वृतं गोपकुमारकैः ॥३॥
गरुड़ञ्च ददर्शोच्चैरन्तर्द्धानगतं द्विज !
कृतच्छायं हरेर्मूर्द्ध्नि पक्षाभ्यां पक्षिपुङ्गवम्(ग) ॥

द्वादशः अध्यायः

गावो गाश्चारयन्तम् । गोपं गोप्तारम् ॥१।२।३।४।५॥

(क) महानागं कुञ्जरश्रेष्ठम्, 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी'ति कोषात् ।

(ख) गा इति कर्मणि द्वितीयया वक्तव्ये गाव प्रथमान्तपदप्रयोग आर्षः ।

(ग) उच्चैः ऊर्द्ध्वभागे अन्तर्धानगतं साधारणदृष्टेरगो प्राप्तम् । पक्षाभ्यां स्वीयपतत्राभ्यां हरेर्मूर्द्ध्नि कृता छाया आवरणं वा येन तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवरुह्य स नागेन्द्रादेकान्ते मधुसूदनम् ।
शक्रः सस्मितमाहेदं प्रीतिविस्फारितेक्षणः ॥५॥

कृष्ण ! कृष्ण ! शृणुष्वेदं यदर्थमहमागतः ।
त्वत्समीपं महाभाग ! नैतच्चिन्त्यं त्वयान्यथा (घ)॥६

भारावतारणार्थाय पृथिव्याः पृथिवीतलम् ।
अवतीर्णोऽखिलाधारस्त्वमेव परमेश्वर ॥७॥

महभङ्गविरुद्धेन मया गोकुलनाशकाः ।
समादिष्टा महामेघास्तैश्चेदं कदनं कृतम् (ङ) ॥८॥

त्रातास्तात ! त्वया गावः समुत्पाट्य महागिरिम् ।
तेनाहं तोषितो वीर ! कर्म्मणात्यद्भुतेन ते ॥९॥

साधितं कृष्ण देवानामहं मन्ये प्रयोजनम् ।
त्वयायमद्रिप्रवरः करेणैकेन यद्धृतः(च) ॥१०॥

गोभिश्च चोदितः कृष्ण ! त्वत्सकाशमिहागतः ।
त्वया त्राताभिरत्यर्थं युष्मत्सत्कारकारणात् ॥११॥

स त्वां कृष्णाभिषेक्ष्यामि गवां वाक्यप्रचोदितः ।
उपेन्द्रत्वे गवामिन्द्रो गोविन्दस्त्वं भविष्यसि ॥१२॥

अथोपबाह्यादादाय घण्टामैरावताद् गजात् ।
अभिषेकं तया चक्रे पवित्रजलपूर्णया(छ) ॥१३॥

क्रियमाणेऽभिषेके तु गावः कृष्णस्य तत्क्षणात् ।
प्रस्रवोद्भूतदुग्धार्द्रां सद्यश्चक्रुर्वसुन्धराम् ॥१४॥

त्वत्समीपमहमागतो यदर्थं तवाभिषेकार्थं तदिदं शृणुष्व, अन्यथा विरोधबुद्ध्येति न विचिन्त्यम् ॥६॥

कार्यं विज्ञापयिष्यन् प्रथमं तावत् कृष्णैश्वर्यमभिनन्दति —'भारावतारणे'ति चतुर्भिः ॥७॥

मया गोकुलवधायोद्यतापि त्वया तद्रक्षणादहं तोषितोस्मीत्याह—'महभङ्गे'ति । कदनं विमर्दः ॥८।९।१०॥

प्रस्तुतं विज्ञापयति—'गोभिश्चे'ति । गोलोकस्थाभिः कामधेनुभिस्त्वया तत्सन्ततित्राणात् त्राताभिः ॥११॥

उपेन्द्रत्वे सत्यलोकोपरिस्थितलोकैश्वर्य्ये, तथा चेन्द्रवाक्यं हरिवंशे,—'ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः । उपेन्द्र इति लोके त्वां गास्यन्ति दिवि देवता' इति । अतो गवामिन्द्र इति निरुक्त्या गोविन्दश्च त्वं भविष्यसि ॥१२॥

उप बाह्यात् राजवाहनात् ॥१३॥

(घ) शृणुष्वेत्यात्मनेपदमार्षम् ।

(ङ) महस्य इन्द्रपूजामहोत्सवस्य भङ्गः प्रतिरोधः तद्विरुद्धेन तत्प्रतिपक्षेण तद्विरोधिनेत्यर्थः । अथवा महभङ्गेन विरुद्धः त्वया कृतवैरः तेनेत्यर्थः । मया इन्द्रेण । गोकुलनाशकाः गोकुलस्थानस्य गोकुलवासिनाञ्च ध्वंसयोग्या महामेघाः संवर्त्तकाख्याः श्रेष्ठा जलदाः । कदनम् अस्य गोकुलस्य लोकातिगं समुद्वेजनं विमर्दनमित्यर्थः ।

(च) हे कृष्ण ! अयं अद्रिप्रवरः गिरिश्रेष्ठः गोवर्द्धनः एकेन करेण एकमात्रेण हस्तेन, अथवा केवलेन अनन्यसहायेन करेणेत्यर्थः, यद् धृतः गो-गोपादीनामुपरि धारितः, तदिदं देवानाम् अमानुषक्रीड़ाकारिणाम् ऐश्वर्य्यशालिनां सुराणां प्रयोजनं कार्य्यं साधितम् । एकेन करेण तादृशगिरिधारणस्य परेषां कल्पनाया अपि अगोचरत्वादिति भावः ।

अथवा एकेन देवानां मुख्यभूतेन त्वया करेण यत् अयम् अद्रिप्रवरः धृतः, तत् देवानां प्रयोजनं साधितम् । तथाहि 'देवो भुवनरक्षक' इति तथा जगतो विपदि सर्वेषां देवानामेव तत्परित्राणं प्रयोजनम्, तत् त्वया साधितम्, त्वया एकेनैव वा, इति महदिदं मे देवेन्द्रस्य सन्तोषस्थानमिति भावः ।

(छ) पवित्रेण जलेन पूर्णया तया घण्टया । जलस्यैव प्रधानतया अभिषेकसाधनत्वात् तदानीमिन्द्रस्य जलपात्रान्तराभावाद् घण्टामेव जलपात्रीकृत्य तद्गतेन जलेन अभिषेकं चक्रे इति भावः । अथवा पवित्रजलपूर्णया पूतसलिलसहकृतया तया घण्टया, पूतसलिलेन घण्टया चेत्यर्थः, उभयोरेव अभिषेकसाधनत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

४४० विष्णुपुराणम् [पञ्चमांशे

अभिषिच्य गवां वाक्याद् देवेन्द्रो वै जनार्द्दनम् ।
प्रीत्या सप्रश्रयं कृष्णं पुनराह शचीपतिः ॥१५॥
गवामेतत् कृतं वाक्यं तथान्यदपि मे शृणु ।
यद् ब्रवीमि महाभाग ! भारावतरणेच्छया ॥१६॥
ममांशः पुरुषव्याघ्र पृथायां पृथिवीतले ।
अवतीर्णोऽर्ज्जुनो नाम स रक्ष्यो भवता सदा(ज)॥१७
भारावतारणे साह्यं स ते वीरः करिष्यति ।
स रक्षणीयो भवता यथात्मा मधुसूदन ॥१८॥

श्रीभगवानुवाच ।

जानामि भारते वंशे जातं पार्थं तवात्मजम् ।
तमहं पालयिष्यामि यावदस्मि महीतले-॥१९॥
यावन्महीतले शक्र ! स्थास्याम्महमरिन्दम !
न तावदर्ज्जुनं कश्चिद् देवेन्द्र ! युधि जेष्यति ॥२०॥

कंसो नाम महाबाहुर्दैत्योऽरिष्टस्तथापरः ।
केशी कुवलयापीड़ो नरकाद्यास्तथापरे ॥२१॥
हतेष्वेतेषु देवेन्द्र ! भविष्यति महाहवः ।
तत्र विद्धि सहस्राक्ष भारावतरणं कृतम् ॥२२॥
स त्वं गच्छ न पुत्रार्थे सन्तापं कर्त्तुमर्हसि ।
नार्ज्जुनस्य रिपुः कश्चिन्मत्तोग्रे प्रभविष्यति(ञ)॥२३
अर्ज्जुनार्थे त्वहं सर्व्वान् युधिष्ठिरपुरोगमान् ।
निवृत्ते भारते युद्धे कुन्त्या दास्याम्यविक्षतान्(ट)॥२४
इत्युक्तः सम्परिष्वज्य देवराजो जनार्द्दनम् ।
आरुह्यैरावतं नागं पुनरेव दिवं ययौ(ठ) ॥२५॥
कृष्णोऽपि सहितो गोभिर्गोपालैश्च पुनर्व्रजम् ।
आजगामाथ गोपीनां दृष्टिपूतेन वर्त्मना(ड) ॥२६॥
इति श्रीविष्णुपुराणे पञ्चमांशे द्वादशः अध्यायः ॥

प्रस्रवः स्तन्योद्गमः तेनोद्भूतं यद्दुग्धं तेनार्द्रोम् ॥१४॥ १५।१६।१७॥

साह्यं साहाय्यं, स च यथात्मा अहं तथा संरक्षणीयः ॥१८।१९॥

यावत् स्थास्यामि भूतल इति ब्रुवन् पश्चाद्भाविनमाभीरेभ्यः पराभवं सूचयति ॥२०।२१॥

महाहवो भारतयुद्धम् ॥२२।२३॥

अविक्षतान् शस्त्रक्षतशून्यान् ॥२४।२५॥

कृष्णदर्शनौत्सुक्येन गोपीभिस्तन्मार्गेक्षणाद् गोदृष्टिपूतेन वर्त्मनेत्युक्तम् अयञ्च रासक्रीड़ाप्रस्तावः ॥२६॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे द्वादशोऽध्यायः

(ज) पृथायां कुन्त्यां पाण्डुपत्न्याम् । ममांश इति—एतद्विवरणं महाभारतादावनुसन्धेयम् ।

(झ) तत्र महति आहवे युद्धे भारतयुद्धे इत्यर्थः, भारस्य धराभारस्य पापिराजन्यवर्गकृतस्य इत्यर्थः, अवतरणम् अवरोहणं कृतं सम्पादितं मयेति शेषः, विद्धि जानीहि । तत्र संख्यातीतदुष्टराजन्यवर्गविध्वंसनादिति भावः ।

(ञ) पुत्रार्थं सन्तापं पुत्रमधिकृत्य सन्तापं तदीयभाव्यनिष्टसम्भावनादिप्रसूतं दुःखमित्यर्थः, न कर्त्तुमर्हसि चित्ते नोत्पादयितुमर्हसि । ममाग्रे मदभिमुखे । प्रभविष्यति स्वं प्रभावं प्रकटयितुं शक्ष्यति तं पराभवितुं न पारयिष्यतीत्यर्थः ।

(ट) कुन्त्याः दास्यामि तव प्रियायाः कुन्त्या उपहारं अर्पयिष्यामि ।

(ठ) इति उक्तरूपं वस्तु, उक्तः कथितः देवराजः हेवचेर्द्विकर्मकत्वाद् दुहाद्यन्तर्गतत्वाच्च अप्रधानस्य कर्मणो राजस्य उक्तत्वाद् देवराज इति प्रथमा । नागं कुञ्जरम् ।

(ड) अयञ्च रासक्रीड़ाप्रस्ताव इति श्रीधरः ।—श्लोके गोपीनां दृष्टिपूतेन वर्त्मनेत्यनेन कृष्णदर्शने तासां औत्सुक्यस्य सूचनात् कृष्णे लोकातिशायिन्याः प्रीतेः तासां कृष्णेन सह अचिरोत्तरं रासक्रीड़ा भाविनीति सूच्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रयोदशोऽध्यायः

[गोपानां श्रीकृष्णप्रभाववर्णनम्, गोपीभिः सह तस्य रासक्रीड़ा च]

पराशर उवाच ।

गते शक्रे तु गोपालाः कृष्णमक्लिष्टकारिणम् ।
ऊचुः प्रीत्या धृतं दृष्ट्वा तेन गोवर्द्धनाचलम्(क)॥१॥

वयमस्मान्महाबाहो ! भवता महतो भयात् ।
गावश्च भवता त्राता गिरिधारणकर्म्मणा(ख) ॥२॥

बालक्रीड़ेयमतुला गोपालत्वं जुगुप्सितम् ।
दिव्यञ्च कर्म्म भवतः किमेतत् तात ! कथ्यताम्(ग)॥३

कालियो दमितस्तोये प्रलम्बो विनिपातितः ।
धृतो गोवर्द्धनश्चायं शङ्कितानि मनांसि नः(घ) ॥४॥

सत्यं सत्यं हरेः पादौ शपामोऽमितविक्रम(ङ) !
यथा त्वद्वीर्य्यमालोक्य न त्वां मन्यामहे नरम् ॥५॥

प्रीतिः सस्त्रीकुमारस्य व्रजस्य तव केशव !
कर्म्म चेदमशक्यं यत् समस्तैस्त्रिदशैरपि ॥६॥

त्रयोदशः अध्यायः

कृष्णं गोपीरतं गोपा नासूयन् रासकेलिषु। इति द्योतयितुं तेषां कृष्णैश्वर्य्यज्ञतेर्य्यते।—'शक्र' इत्यादिना 'तस्मिन् प्रणयकोपवा'नित्यन्तेन ॥१।२॥

बालक्रीड़ेयं पूतनाघोषणशकटोच्चाटनादि दिव्यञ्च अलौकिकं कर्म ॥३॥

तदेवाह 'कालिय' इति, 'प्रलम्बो विनिपातित' इति, कृष्णस्मारितैश्वर्येण रामेण निपातितत्वात् कृष्णेनैव निपातित. इत्युच्यते ॥४॥ पादौ पादाभ्यां शपामः ॥५॥

(क) 'ऊचुः प्रीत्ये'ति,—अत्र 'कृष्णं गोपीरतं गोपा नासूयन् रासकेलिषु' इत्याद्युक्तं श्रीधरेण।—तथाहि-श्रीकृष्णो रासक्रीड़ायां तेषां गोपानां प्रियाभिः सह रेमे, ते तज्ज्ञात्वापि कृष्णं प्रति असूयां न प्राप्तवन्तः, परं तत्र महान्तं मानं प्रणयञ्च मेजिरे। तत्र हेतुस्तेषां कृष्णैश्वर्य्यविज्ञानमेव, यतस्ते श्रीकृष्णस्य महतैश्वर्य्येण युक्तं साधारणजनविलक्षणं मेनिरे, अत एव साधारणजनयोग्याम-सूयां तत्र न कृतवन्त इति भावः।

(ख) महान् प्रभावयुक्तः गिरिधारणरूपमहाकृत्ये समर्थः बान्धवस्त्वं तथाभूतेति। भवता अचिरात् पूर्वं जातेन गिरि-धारणकर्मणेति सामीप्ये वर्त्तमानार्थकशतृप्रत्ययः। अनन्यसाधारण-तया तत्र श्रीकृष्णे सम्मानातिशयप्रदर्शनार्थं हर्षातिशयद्योतनार्थं च भवता भवतेति द्विरुक्तिरिति परे।

(ग) जुगुप्सितम् अपकृष्टत्वात् साधुभिः निन्दितं गोपालत्वं गोपालनरूपं कर्म पशुपालनरूपं कर्मेत्यर्थः। दिव्यं लोकबाह्यं कर्म एकेन करेण गिरिधारणादिरूपं कार्य्यमित्यर्थः। एतत् तथाभूतविसदृशकर्मणामेकत्र त्वयि सम्बलनरूपं वस्तु किं कीदृशम्? कथमेतदुपपन्नमिति कथ्यतामिति भावः।

(घ) शङ्कितानि 'देवो वा दानवो वा त्व'मित्यादिरूप-संशययुक्तानि, सांख्यादिनये चित्तलक्षणानां मनसां साक्षाज् ज्ञानाधारत्वात्। न्यायवैशेषिकादिमते तु मनसो ज्ञानकारणत्वात् तत्सम्बन्धेनैव तद्वत्त्वम्।

(ङ) पादाभ्यामिति तृतीयार्थे पादाविति द्वितीयाप्रयोग आर्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बालत्वं चातिवीर्य्यञ्च जन्म चास्मास्वशोभनम् ।
चिन्त्यमानममेयात्मन् ! शङ्कां कृष्ण प्रयच्छति(च)॥७

देवो वा दानवो वा त्वं यक्षो गन्धर्व्व एव वा ।
किं वास्माकं विचारेण बान्धवोऽसि नमोऽस्तु ते ॥८

पराशर उवाच ।

क्षणं भूत्वा त्वसौ तूष्णीं किञ्चित् प्रणयकोपवान् ।
इत्येवमुक्तस्तैर्गोपैः कृष्णोऽप्याह महामुने ॥९॥

श्रीभगवानुवाच ।

मत्सम्बन्धेन भो गोपा ! यदि लज्जा न जायते ।
श्लाघ्यो वाहं ततः किं वो विचारेण प्रयोजनम् ॥१०

यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि ।
तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि ॥११

नाहं देवो न गन्धर्व्वो न यक्षो न च दानवः ।
अहं वो बान्धवो जातो नास्ति चिन्त्यमतोऽन्यथा॥१२

पराशर उवाच ।

इति श्रुत्वा हरेर्वाक्यं बद्धमौनास्ततो वनम् ।
ययुर्गोपा महाभाग ! तस्मिन् प्रणयकोपिनि (छ) ॥१३

कृष्णस्तु विमलं व्योम शरच्चन्द्रस्य चन्द्रिकाम् ।
तथा कुमुदिनीं फुल्लामामोदितदिगन्तराम्(ज) ॥१४

वनराजिं तथा कूजद्भृङ्गमालां मनोरमाम् ।
विलोक्य सह गोपीभिर्मनश्चक्रे रतिं प्रति(झ) ॥१५

सह रामेण मधुरमतीव वनिताप्रियम् ।
जगौ कलपदं शौरिर्नानातन्त्री-कृतव्रतम्(ञ) ॥१६॥

सर्वस्यापि व्रजस्य त्वत्प्रीतिः सर्वस्यात्मत्व शंकां करोतीति भावः, कर्म चेदम् ॥६।७८९॥

मनुष्य एवाहमित्युक्ते अनृतं स्यात, ईश्वरोऽहमित्युक्ते च तेषां तद्बन्धुसौख्यं हीयेत, अतः प्रणयकोपव्याजेन स मुग्धमुत्तरमाह—'मत्सम्बन्धेने'ति त्रिभिः ॥१०॥

आत्मनो जीवस्य बन्धुः परमेश्वरः तत्सदृशी परमप्रेमास्पदबुद्धिर्मयि वो युष्माभिः क्रियताम् ॥११॥

अधुना तावन्नाहं देवो गन्धर्वो वा अपि तु युष्माकं बान्धवो जातोऽस्मि, अतोऽन्यथा च किञ्चिन्न चिन्त्यं न जिज्ञास्यम् ॥१२॥

रासक्रीड़ार्थं गोपीः सम्मेलयिष्यन् जगावित्याह—'सह रामेणे'ति । कलपदं अव्यक्तमधुराक्षरं, नानातन्त्रीभिः कृतं व्रतं स्वरनियतिरस्मिन् । नानामात्रेति पाठे द्रुतसमविलम्बिताख्यं त्रिमात्रलयनियमेनेत्यर्थः । तारमन्द्रकृतक्रम इति पाठे तारमन्द्राभ्यामुच्चोपांशुस्वनाभ्यां कृतः क्रमो यस्मिंस्तम् इत्यर्थः ॥१६॥

(च) अस्मासु गोपजातीयेषु तव अशोभनं अननुरूपं जन्म च । शङ्कां वक्ष्यमाणरूपं संशयम् ।

(छ) प्रणयकोपिनि प्रेममूलक्रोधयुक्ते मानयुक्त इत्यर्थः, तस्मिन् श्रीकृष्ण बद्धमौनाः तूष्णीम्भावमाश्रिताः किमपि परमनुक्तवन्त इत्यर्थः ।

(ज) आमोदितानि सुरभीकृतानि दिगन्तराणि स्वकीयसौरभेण यया ताम् । अथवा आमोदितानि आनन्दितानि तथा सौरभानुभवेन सुखं प्रापितानि दिगन्तराणि तद्गताः सर्वे प्राणिन इत्यर्थः यया ताम् ।

(झ) कूजन्त्यः मधुरं गुञ्जन्त्यः भृङ्गमालाः भ्रमरपङ्क्तयो यत्र । कूजन्त्यः कामभावसूचकं शब्दविशेषं कुर्वत्यः भृङ्गमाला यत्रेति वार्थः । एतेन तदा कालविशेषप्रभावाद् भ्रमरादीनामपि रतिकामना व्यज्यते ।

(ञ) रामेण बलरामेण, शौरिः वासुदेवः कृष्णः । वनितानां प्रियम् प्रीतिकरम् । एतच्च वक्ष्यमाणं तद्गीतध्वनिश्रवणेन गोपीनां तत्रागमनं समर्थयितुमुक्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रम्यं गीतध्वनिं श्रुत्वा सन्त्यज्यावसथांस्तदा ।
आजग्मुस्त्वरिता गोप्यो यत्रास्ते मधुसूदनः ॥१७॥

शनैः शनैर्ज्जगौ गोपी काचित् तस्य लयानुगम् ।
दत्तावधाना काचित्तु तमेव मनसास्मरत्(ट) ॥१८॥

काचित् कृष्णेति कृष्णेति प्रोक्त्वा लज्जामुपागता ।
ययौ च काचित् प्रेमान्धा तत्पार्श्वमविलज्जिता(ठ)।१९

काचिदावसथस्यान्तः स्थिता दृष्ट्वा बहिर्गुरून् ।
तन्मयत्वेन गोविन्दं दध्यौ मीलितलोचना(ड) ॥२०॥

तच्चिन्ताविपुलाह्लाद-क्षीणपुण्यचया तथा ।
तदप्राप्ति-महादुःख-विलीनाशेषपातका(ढ) ॥२१॥

चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥२२॥

गोपीपरिवृतो रात्रिं शरचन्द्रमनोरमाम् ।
मानयामास गोविन्दो रासारम्भरसोत्सुकः ॥२३॥

आवसथान् गृहान् ॥१७॥

लयानुगमिति द्रुतमध्यविलम्बिताख्यत्रितयात्मकतार-विश्रान्तिकालानुगुणं जगौ । तदुक्तं—'तालान्तरालवर्त्ती यः कालोऽसौ लयनाल्लय' इति ॥१८।१९ ॥

काचिद्गोपकन्यका आवसथस्यान्तः स्थित्वा बहिः गुरून् मातृपादीन् दृष्ट्वा अलब्धनिर्गमा तन्मयत्वेन गोविन्दं दध्यौ, तस्य तत्क्षणमेव भोगेन क्षीणाशेषपुण्यपापा कान्तबुद्ध्या अनुगो जगत्कारणं परब्रह्मरूपिणं तमेव चिन्तयन्ती निरुच्छ्वासतया सद्य एव मुक्तिं गतेति त्रयाणामन्वयः ॥२०॥

नन्वेकजन्माभ्यस्तयोगानामपि ब्रह्मविदां प्रारब्धकर्म-भोगं विना न क्षीयते, तत् किं एतस्यास्तत्क्षणमेव क्षीणम् ? भोगादेव क्षीणमित्याह—'तच्चिन्ते'ति । तस्य चिन्तया यो महानाह्लादस्तेन क्षीणः पुण्यचयो यस्याः सा तथा । तस्या-प्राप्त्या यन्महादुःखं तेन विलीनानि अशेषपातकानि यस्याः सा ॥२१॥

तदेवं तत्क्षणमेव भोगेन क्षीणासमस्तपुण्यपापा भगवद्-ध्यानमहिम्ना च लब्धापरोक्षात्मज्ञानात् सद्य एव मुक्तिं प्राप ॥२२॥

रासस्यारम्भे रसो रागः तस्मिन्नुत्सुकः । अन्योन्य-व्यतिषक्तहस्तानां स्त्रीपुसानां गायतां मण्डलीरूपेण भ्रमतां नृत्यविनोदः रासो नाम । तथा च भरतः—'अनेक-नर्त्तकीयोग्यं चित्रताललयान्वितम् । आचतुःषष्टियुग्मत्वा-द्रासकं मसृणोद्गत'मिति ॥२३॥

(ट) दत्तम् अवधानं एकनिष्ठत्वं यया सा अनन्यपरेत्यर्थः तमेव कृष्णमेव मनसा अस्मरत् ।

(ठ) प्रोक्त्वा प्रकर्षेण उच्चैरित्यर्थः, उक्त्वा स्वीयपरिजन-प्रतीपादाविति शेषः । प्रोच्येति संस्कारेण वाच्ये प्रोक्त्वेति पूर्वकालान्तप्रयोग आर्षः । प्रेम्णा प्रणयेन श्रीकृष्णगतेनेत्यर्थः, तस्या परिजनसान्निध्यादिज्ञानशून्या । अविलज्जिता परिहृत-लज्जाविशेषा सती तत्पार्श्वं श्रीकृष्णसन्निधिं ययौ ।

(ड) मीलितं मुद्रितं लोचनं यया सा ।

(ढ) पुण्यं पापञ्च कर्म द्वेधा प्रारब्ध सञ्चितभेदात् । तत्र सञ्चित-कर्मणः क्षये भोगो नियमेन नापेक्ष्यः, प्रायश्चित्तादिनापि तस्यक्षयात् प्रारब्धकर्मणोः क्षये तु भोगो नियमेनापेक्ष्यः । 'नाभुक्तं क्षीयते' कर्म कल्पकोटिशतैरपि इति शास्त्रं तद्विषयम् । सति प्रारब्ध-कर्मणि देहारम्भस्यावश्यम्भावान्न मुक्तिः, अत एव तदा प्रारब्ध-कर्मणो भोगादेव क्षयमुपपादयितुमाह—'तच्चिन्ते'त्यादि 'तदप्राप्ती'त्यादि च । प्रारब्धकर्मणोः पुण्यपापयोः फलीभूत-सुखदुःखभोग एव तयोर्भोग इति ध्येयम् ।

(ण) जगत्सूतिं जगत्कारणभूतम् । निरुच्छ्वासतया निष्प्राण-तया, मुक्तिं विदेह मुक्तिं गता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोप्यश्च वृन्दशः कृष्णचेष्टास्वायत्तमूर्त्तयः ।
अन्यदेशं गते कृष्णे चेरुर्वृन्दावनान्तरम् ॥२४॥

कृष्णे निरुद्धहृदया इदमूचुः परस्परम् ।
कृष्णोऽहमेतल्ललितं व्रजाम्यालोक्यतां गतिः ।
अन्या ब्रवीति कृष्णस्य मम गीतिर्निशम्यताम्(त)॥२५

दुष्टकालिय ! तिष्ठात्र कृष्णोऽहमिति चापरा ।
बाहुमास्फोट्य कृष्णस्य लीलासर्व्वस्वमाददे ॥२६॥

अन्या ब्रवीति भो गोपा ! निःशङ्कैः स्थीयतामिह ।
अलं वृष्टिभयेनात्र धृतो गोवर्द्धनो मया(थ) ॥२७॥

धेनुकोऽयं मया क्षिप्तो विचरन्तु यथेच्छया ।
गोपी ब्रवीति वै चान्या कृष्णलीलानुकारिणी(द)॥२८

एवं नानाप्रकारासु कृष्णचेष्टासु तास्तदा ।
गोप्यो व्यग्राः समं चेरू रम्यं वृन्दावनान्तरम्(ध)॥२९

विलोक्यैका भुवं प्राह गोपी गोपवराङ्गना ।
पुलकाञ्चितसर्व्वाङ्गी विकाशि-नयनोत्पला(न) ॥३०॥

ध्वजवज्राङ्कुशाब्जाङ्क-रेखावन्त्यालि पश्यत ।
पदान्येतानि कृष्णस्य लीलालङ्कृतगामिनः ॥३१॥

कापि तेन समं याता कृतपुण्या मदालसा ।
पदानि तस्याश्चैतानि घनान्यल्पतनूनि च(प) ॥३२॥

पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम् ।
येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मनः ॥३३॥

अन्यदेशं गते कृष्णे सति कृष्णचेष्टास्वायत्तास्तदनुकारिण्यो मूर्त्तयो यासां ताः। कृष्णमन्विच्छन्त्यो वृन्दावनमध्ये चेरुः ॥२४॥

कृष्णचेष्टा एवाह—'कृष्णोऽह'मिति पञ्चभिः। यदि कृष्णमन्विच्छथ तर्हि इतः समायातः, यतोऽहमेव कृष्ण इति ॥२५।२६।२७।२८।

व्यग्रा उत्सुकाः ॥२९॥

अन्वेषणप्रकारमाह—'विलोक्ये'ति दशभिः। पुलकैराचितं व्याप्तं सर्वमङ्गं यस्याः सा ॥३०॥

ध्वजवज्रांकुशाब्जांकरेखावन्ति ध्वजादिलक्षणा या रेखाः तद्युक्तानि पश्यत। हे आलि ! सखि ! बहुवचनार्थे चैकवचनम्। लीलयालंकृतं यथा भवत्येवं गमनशीलस्य ॥३१॥

घनानि मन्थरगतित्वादल्पान्तराणि अल्पतनूनि अदीर्घाण्यस्थूलानि चेति स्त्रीपदत्वे लिङ्गानि ॥३२॥

उच्चैः ऊर्द्ध्वीभूय स्थित्वा पुष्पावचयं चक्रे, तत्र लिङ्गं 'येने'ति। अग्रेणैव प्रपदेनैवाक्रान्तिमात्रं ईषद्भूमसंस्पर्शो येषां तानि ॥३३॥

(त) अहं कृष्ण इति तयोक्ते यदि कृष्णस्त्वं तदा तद्वत् ललितं व्रज इत्याकाङ्क्षायामाह—'एतल्ललितं व्रजामीति, कृष्णवदितिः शेषः। गतिः गमनं ममेति शेषः।

(थ) निःशङ्कैः निर्भीकैः सद्भिः स्थीयतां भवद्भिरिति शेषः।

(द) विचरन्तु भवन्त इति शेषः। कृष्णस्य लीलां क्रीडां अनुकरोति या सा।

(ध) समम् तुल्यरूपेण वनं चेरुः तत्र विचरणं कृतवत्यः।

(न) विकाशिनी विकसिते नयने एव उत्पले यस्याः सा. विस्फारितनेत्रोपलयुगलेत्यर्थः।

(प) पदानि पदचिह्नानि। एतानि प्रत्यक्षं दृश्यमानानि। मदेन कामजन्यमत्ततया अलसा मन्थरगतिः। घनानीत्यादि विशेषणभावः श्रीधरेणैव वर्णितः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रोपविश्य सा तेन कापि पुष्पैरलङ्कृता ।
अन्यजन्मनि सर्व्वात्मा विष्णुरभ्यर्च्चितो यया(फ)॥३४

पुष्पबन्धनसम्मान-कृतमानामपास्य ताम् ।
नन्दगोपसुतो यातो मार्गेणानेन पश्यत(ब) ॥३५॥

अनुयानेऽसमर्थान्या नितम्बभरमन्थरा ।
या गन्तव्ये द्रुतं याति निम्नपादाग्रसंस्थितिः ॥३६॥

हस्तन्यस्ताग्रहस्तेयं तेन याति तथा सखि !
अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः ॥३७॥

हस्तसंस्पर्शमात्रेण धूर्त्तेनैषा विमानिता ।
नैराश्यमन्दगामिन्या निवृत्तं लक्ष्यते पदम् ॥३८॥

नूनमुक्ता त्वरामीति पुनरेष्यामि तेऽन्तिकम् ।
तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः(भ) ॥३९॥

प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते ।
निवर्त्तध्वं शशाङ्कस्य नैतद्दीधितिगोचरे(म) ॥४०॥

निवृत्तास्तास्ततो गोप्यो निराशाः कृष्णदर्शने ।
यमुनातीरमागत्य जगुस्तच्चरितं तदा ॥४१॥

ततो ददृशुरायान्तं विकाशिमुखपङ्कजम् ।
गोप्यस्त्रैलोक्यगोप्तारं कृष्णमक्लिष्टचेष्टितम् ॥४२॥

काचिदालोक्य गोविन्दमायान्तमतिहर्षिता ।
कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदैरयत् ॥४३॥

कृष्णजानुमध्योपवेशचिह्नं दृष्ट्वाह—'अत्रोपविश्ये'ति ॥३४

पुष्पबन्धनरूपेण सम्मानेन कृतो मानो गर्वो यया ताम् ॥३५॥

तस्य पृष्ठतोऽन्यस्याः पदानि दृष्ट्वा कल्पयन्ति—'अनुयाने'ति नितम्बभरेण मन्थरा स्थिरापि या कृष्णेन सह गन्तव्ये गमने कर्त्तव्ये सति द्रुतं याति, तत्र लिङ्गं निम्नैः पादाग्रैः संस्थितिर्यस्याः सा ॥३६॥

कृष्णेन स्वहस्ते न्यस्तोऽग्रहस्तो हस्ताग्रं यस्याः सेयं तेन सह याति। तत्र लिङ्गम् अनायत्तः अस्वाधीनः पदन्यासो यस्याः तथाभूता हि पदपङ्क्तिर्लक्ष्यते ॥३७॥

ततश्च हस्तग्रहणमात्रं कृत्वा तेन धूर्त्तेन शठेनैषा विमानिता अवज्ञया त्यक्ता। तत्र लिङ्गं नैराश्यमन्दगामिन्याः निराशतया मन्दं गच्छन्त्या निवृत्तं प्रतिलोमं पदं न लक्ष्यते ॥३८॥

'नूनमुक्ते'ति,—त्वमत्रैव तिष्ठ, इतः कश्चिद्राक्षसोऽस्ति, तं हन्तुम्, अहं त्वरामि शीघ्रं यामि, पुनश्च तवान्तिकमार्गमिष्यामीति नूनमेव तेनोक्ता। तत्र लिङ्गं येनैषा कृष्णस्य पदानां पद्धतिः पङ्क्तिः त्वरिता शीघ्रा निम्नाग्रा लक्ष्यते ॥३९

कृष्णान्वेषणात्तासां निवृत्तिमाह—'प्रविष्ट' इति द्वाभ्याम्। गहनं निविडं दुर्गमं वनं प्रविष्टः अतएव शशाङ्करश्मिप्रवेशाभावात् तस्य पदमत्र न लक्ष्यते ॥४०॥

ततो निवृत्ताः सत्यो यमुनातीरं प्राक्तनं रासस्थानं शीघ्रमागत्य कृष्णोपलब्धये तच्चरितं जगुः ॥४१॥

स्वप्रेमगानमाकर्ण्य गते कृष्णे तासां तद्दर्शनोत्सवमाह—'तत' इति चतुर्भिः ॥४२।४३॥

(फ) अन्यजन्मनि तया नूनं महाफलप्रदं श्रीविष्णोरभ्यर्चनं कृतं येन जन्मन्यस्मिन् तत्फलभूतं श्रीकृष्णेन क्रोड़े सन्निवेश्य पुष्पैरलङ्करणमनुभूयत इति भावः। एतेन तथालङ्करणे तथा पुष्पफलत्वसूचनात्तत्र स्वीया महती कामना व्यज्यते।

(ब) पुष्पबन्धनेत्यादि,—अनेन तस्या विशेषणेन अयं भावो व्यज्यते यथा,—सत्यहङ्कारममकारादौ भगवान् न शक्यते लब्धुम्, परमसौ तेन जीवं परिहाय गच्छतीति अतो भगवान् लब्धव्यश्चेत् अहङ्कारादिदोषस्त्याज्य इति।

(भ) त्वरेरात्मनेपदिनस्त्वरामीति परस्मैपदमार्षम्।

(म) एतत् पदचिह्नम् शशाङ्कस्य चन्द्रस्य दीधितिगोचरे किरणविषये न अस्तीति शेषः। अतः गहनं प्रविष्टस्य कृष्णस्य चन्द्रकिरणसाहायकेनापि पदचिह्नं न विज्ञातुं शक्यमतो निवर्त्तध्वमित एवेति सरलार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काचिद् भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम् ।
विलोक्य नेत्रभृङ्गाभ्यां पपौ यन्मुखपङ्कजम् (य) ॥४४

काचिदालोक्य गोविन्दं निमीलित-विलोचना ।
तस्यैव रूपं ध्यायन्ती योगारूढ़ेव चाबभौ(र) ॥४५॥

ततः काश्चित् प्रियालापैः काश्चिद् भ्रूभङ्गवीक्षणैः ।
निन्येऽनुनयमन्याञ्च करस्पर्शेन माधवः ॥४६॥

ताभिः प्रसन्नचित्ताभिर्गोपीभिः सह सादरम् ।
रराम रासगोष्ठीभिरुदारचरितो हरिः(ल) ॥४७॥

रासमण्डलबन्धोऽपि कृष्णपार्श्वमनुज्झता ।
गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥४८॥

हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम् ।
चकार तत्करस्पर्श-निमीलितदृशं हरिः ॥४९॥

ततः स ववृते रासश्चलद्वलयनिःस्वनः ।
अनुयातशरत्काव्यगेयगीतिरनुक्रमात् ॥५०॥

कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् ।
जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः ॥५१॥

'काचिद् भ्रूभङ्गुर'मिति। प्रणयकोपेन वक्रिताभ्यां भ्रूभ्यां भङ्गुरम् आकुञ्चितं ललाटफलकं कृत्वा हरिं विलोक्य नेत्ररूपाभ्यां भृङ्गाभ्यां तस्य मुखपंकजं पपौ ॥४४॥

काचिद् गोविन्दमालोक्य विवृतेन नेत्रद्वारेणान्तः प्रवेश्य विवृतेन नेत्रद्वारेणैव पुनर्यास्यतीति निमीलितलोचना ध्यायन्ती सती बभौ ॥४५॥

तासामनुनयपूर्वकं ताभिः रासक्रीड़ामाह —'तत' काचि'दित्यादिना 'क्षपिताहित' इत्यन्तेन। अनुनयं निने सान्त्वयायास ॥४६।४७॥

'रासमण्डलबन्धोऽपी'ति।—कृष्णस्य पार्श्वमनुज्झता अत्यजता एकस्मिन्नेव स्थाने कृष्णसमीप एवाहमहमिकया स्थिरात्मना निश्चलचित्तेन गोपीजनेन रासोचितो मण्डल-बन्धोऽपि नैवाभूत्, कुतः पुनः रासक्रीड़ा ॥४८॥

तदा च हरिर्यथा रासमण्डलं कृतवान् तदाह—'हस्ते प्रगृह्ये'ति। हरिः एकां गोपीं हस्ते गृहीत्वैकत्र स्थापितवान्, सा च तत्करस्पर्शसुखेन निमीलिताक्षी आसीत्। तां च अन्यस्याः स्वकरस्पर्शसुखपरवशाया हस्तं ग्राहयामास, तामप्येवमन्यस्या हस्तमित्येकैकां हस्ते गृहीत्वा रासमण्डलीं चकार, ताश्च सर्वा हरिहस्तस्पर्शसुखपरवशाः प्रत्येकं हरिणैव गृहीतहस्तमात्मानं मेनिरे ॥४९॥

चलतां वलयानां निःस्वनो यस्मिन् सः। अनुयातशरत्-काव्यगेयगीतिरिति—शरद्वर्णनादिरूपं यत् काव्येषु गेयं तस्य या गीतिर्गानं सा अनुयाता अनुसृता यस्मिन् स रासः प्रवृत्तः ॥५०॥

एतदेवाह—'कृष्णः शरच्चन्द्रमस'मिति ॥५१॥

(य) नेत्रभृङ्गाभ्यां तन्मुखपङ्कजं पपावित्यत्र नेत्रे भृङ्गत्वारोपेण तस्य श्रीकृष्णस्य मुखे च पङ्कजत्वारोपेण भृङ्गौ यथा पङ्कज-रसं साग्रहं पिबतः गोपीनां प्रत्येकं नेत्रे तथैव श्रीकृष्णमुखलावण्यं साग्रहं ददृशतुरिति सूच्यते।

(र) निमीलिते मुद्रिते लोचने यया सा। तस्यैव प्रियस्य गोविन्दस्यैव रूपं मूर्त्तिं ध्यायन्ती योगारूढ़ेव योगमास्थितेव बभौ। योगारूढ़ो हि जनः बहिर्विषयाद् दृष्टिं निवर्त्तयितुं निमीलितलोचन इष्टं ध्यायति, सा गोपिकापि तथैव प्रियं कृष्णं ध्यायतीति द्वयोः साम्यम्।

(ल) प्रसन्नं श्रीकृष्णप्रयुक्तेनानुनयेन पूर्वभावपरिहारेण लब्धप्रसादं चित्तं यासां ताभिः। रासगोष्ठीभिः रासक्रीड़ा-सम्पादनार्थं श्रीकृष्णेन घटिताभिः रासमण्डलीभिः करणभूताभिः, उदारम् असङ्कीर्णं चरितम् आचरणं यस्य सः। एतेन सर्वासु गोपीषु श्रीकृष्णस्य तुल्यप्रीतिपूर्वकव्यवहारो व्यज्यते। रमेरात्मने-पदिनो रराभेति परस्मैपदमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परिवर्त्तश्रमेणैका चलद्वलयलापिनीम् ।
स्कन्धे बाहुलतां गोपी मधुनिघातिनः(व) ॥५२॥
काचित् प्रविलसद्बाहुः परिरभ्य चुचुम्ब तम् ।
गोपी गीतस्तुतिव्याज-निपुणा मधुसूदनम्(श) ॥५३॥
गोपी-कपोल-संश्लेषमभिपत्य हरेर्भुजौ ।
पुलकोद्गमशस्याय स्वेदाम्बुघनतां गतौ ॥५४॥
रासगेयं जगौ कृष्णो यावत् तारतरध्वनिः ।
साधु कृष्णेति कृष्णेति तावत् ता द्विगुणं जगुः ॥५५॥
ते तु गमनं चक्रुर्वलने सम्मुखं ययुः ।
प्रतिलोमानुलोमाभ्यां भेजुर्गोपाङ्गना हरिम् ॥५६॥
स तथा सह गोपीभी रराम मधुसूदनः ।
यथाब्दकोटिप्रमितः क्षणस्तेन विनाभवत्(ष) ॥५७॥
ता वार्य्यमाणाः पतिभिः पितृभिर्भ्रातृभिस्तथा ।
कृष्णं गोपाङ्गना रात्रौ रमयन्ति रतिप्रियाः ॥५८॥
सोऽपि कैशोरकवयो मानयन् मधुसूदनः ।
रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः(ह) ॥५९॥
तद्धूर्त्तृषु तथा तासु सर्व्वभूतेषु चेश्वरः ।
आत्मस्वरूपरूपोऽसौ व्याप्य सर्व्वमवस्थितः ॥६०॥
यथा समस्तभूतेषु नभोऽग्निः पृथिवी जलम् ।
वायुश्चात्मा तथैवासौ व्याप्य सर्व्वमवस्थितः ॥६१॥

इति श्रीविष्णुपुराणे पञ्चमांशे त्रयोदशः अध्यायः ॥

चलद्भिर्वलयैर्लापिनी मुखरा ॥५२॥

पुलकोद्गम एव शस्यं तदर्थं स्वेदरूपस्याम्बुनो घनतां भेषमावं गतौ। परिरभ्य गोप्या हि हरिभुजचुम्बने क्रियमाणे हरेर्भुजयोः स्वेदः तस्याः कपोलयोः रोमोद्गमं वर्द्धयामासेत्यन्योन्यानुरागोक्तिः ॥५३।५४।५५॥

वलने आवृत्तौ। 'प्रतिलोमानुलोमाभ्या'मिति—गमने अनुलोमगत्या वलने च प्रतिलोमगत्येत्यर्थः ॥५६।५७।५८॥

कैशोरकं कौमारं वयो मानयन् तद्वयःस्थोचितं चापलमनुकुर्वन् रेमे ॥५९॥

ननु धर्मस्थापनायावतीर्णो भगवान् कथं गोपाङ्गनाः पापे प्रवर्त्तयन् स्वयमपि पापं चकारेत्यत्राह—'तद्भर्त्तृष्वि'ति न तावद्गोपीनां पापमस्ति स्वभक्ताहितक्षपणस्य तस्य तद्दोषक्षपणेऽपि समर्थत्वात्। न च तस्य दोषः, तद्भर्त्रादिसर्वव्यापिपरमात्मरूपत्वात् ॥६०॥

सर्वव्यापित्वमेव दृष्टान्तेनाह—'यथे'ति ॥६१॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे त्रयोदशोऽध्यायः ॥

(व) परिवर्त्तः रासक्रीड़ोचिता भ्रमिः तस्य श्रमेण तज्जनितेन क्लमेन। एका गोपी, मधुनिघातिनः मधुसूदनस्य अतिबलवीर्य्यशालिनः श्रीकृष्णस्य। एतेन तस्य तावता परिवर्त्तेन श्रान्त्यभावः स्वाच्चुम्बञ्च व्यज्यते।

(श) प्रकर्षेण विलसन्तौ सविलासं सञ्चलन्तौ बाहू यस्याः सा, तथाभूता काचिद् गोपी गीतस्तुतिः गीतेन या स्तुतिः प्रशंसा श्रीकृष्णस्येति शेषः, सैव व्याजः व्यपदेशः तत्र निपुणा सा। परिरभ्य आलिङ्गय। आत्मनः श्रीकृष्णपरिरम्भणचुम्बनाभिप्रायमपह्नोतुं तथा निपुणं व्याजाश्रयणमिति ध्येयम्।

(ष) अत्रापि रराभेत्यार्षम्। तेन मधुसूदनेन श्रीकृष्णेन विना क्षणः अतिसूक्ष्मः खण्डकालोऽपि अब्दानां वत्सराणां कोटिः कोटिः संवत्सरा इत्यर्थः, तत्प्रमितः तत्परिमितः अभवत्। आभिमानिकोऽयं क्षणस्य वर्षकोटिपरिमितभाव इति ध्येयम्। इत्थमेवाह कविः श्रीहर्षोऽपि नैषधीयचरितमहाकाव्ये—'अहो अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रति तां स्मरार्द्रिताम्। तपर्त्तुपूर्त्तावपि मेदसो भरा विभावरीभिर्विभराम्बभूविरे' ॥ इति

(ह) क्षपितम् अपनीतम् अहितम् अनिष्टं येन सः अपनीतनिखिलविघ्न इत्यर्थः। एतेन निर्विघ्नं रेमे इति सूच्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्दशः अध्यायः

[वृषभासुरवधः ।]

पराशर उवाच ।

प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने ।
त्रासयन् समदो गोष्ठमरिष्टः समुपागतः(क) ॥१
सतोय-तोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः ।
खुराग्रपातैरत्यर्थं दारयन् वसुधातलम्(ख) ॥२
लेलिहानः सनिष्पेषं जिह्वयोष्ठौ पुनः पुनः ।
संरम्भाविद्धलाङ्गूलः कठिनस्कन्धबन्धनः ॥३
उदग्रककुदाभोगः प्रमाणाद् दुरतिक्रमः ।
विण्मूत्रलिप्तपृष्ठाङ्गो गवामुद्वेगकारकः ॥४
प्रलम्बकण्ठोऽतिमुखस्तरुघाताङ्कितानन: ।
पातयन् स गवां गर्भान् दैत्यो वृषभरूपधृक् ।
सूदयंस्तापसानुग्रो वनान्यटति यः सदा(ग) ॥५
ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः ।
गोपा गोपस्त्रियश्चैव कृष्ण कृष्णेति चुक्रुशुः ॥६॥
सिंहनादं ततश्चक्रे तलशब्दञ्च केशवः ।
तच्छब्दश्रवणाच्चासौ गोविन्दाभिमुखं ययौ ॥७॥
अग्रन्यस्तविषाणाग्रः कृष्णकुक्षि-कृतेक्षणः ।
अभ्यधावत दुष्टात्मा कृष्णं वृषभदानवः(घ) ॥८॥
आयान्तं दैत्यवृषभं दृष्ट्वा कृष्णो महाबलः ।
न चचाल ततः स्थानादवज्ञास्मितलीलया ॥९॥
आसन्नं चैव जग्राह ग्राहवन्मधुसूदनः ।
जघान जानुना कुक्षौ विषाणग्रहणाचलम्(ङ) ॥१०॥

चतुर्दशः अध्यायः

प्रदोषार्द्धे सन्ध्यावसाने अरिष्टो नाम वृषभाकृतिर्दैत्यः समदो गोष्ठं त्रासयन् समुपागतः ॥१॥

अर्कवल्लोचने यस्य सः ॥२॥

सनिष्पेषं ससङ्घर्षं यथा भवत्येवमोष्ठौ जिह्वया लेलिहानः, संरम्भादाविद्धमुन्नमितं लाङ्गूलं येन, कठिनं स्कन्धबन्धनं यस्य ॥३॥

उदग्रस्योच्छ्रितस्य ककुदो गलपृष्ठशृङ्गस्यामोगो विस्तारो यस्य सः उच्चतरप्रमाणादन्यैर्दुरतिक्रमः ॥४॥५॥६॥७॥

अग्रे पुरतो न्यस्ते विषाणाग्रे येन । कृष्णस्य कुक्षौ कृतमीक्षणं येन ॥८॥

अवज्ञया स्मितं सैव लीला तया ॥९॥

विषाणग्रहणादचलं स्थिरं सन्तं जघान ॥१०॥

(क) मदेन मत्ततया सह वर्त्तमानः, मदः गर्वः तद्युक्तो वा । गोष्ठं व्रजं त्रासयन् भयं लम्भयन् ।

(ख) सतोयः जलयुक्तः यः तोयदः मेघः तस्य छाया कान्तिरिव छाया कान्तिर्यस्य सः कृष्णवर्ण इत्यर्थः । खुराग्रेति खुरस्य अग्रभागस्यैव सुतीक्ष्णत्वात् तत्पातैरेव वसुधातलदारणं समञ्जसम् ।

(ग) प्रलम्बः सुदीर्घः कण्ठः यस्य सः । अतिमुखः विशालवक्त्रः । तरुघातेन वृक्षसमूहाघातचिह्नेन अङ्कितं चिह्नितम् आननं मुखं यस्य, सूदयन् नाशयन् ।

(घ) अभ्यधावतेत्यात्मनेपदमार्षम् । कृष्णमुद्दिश्येति शेषः; अथवा अभ्यधावतेत्यत्र अभिशब्दः कर्मप्रवचनीयः पृथगभूतं पदं, तदयोगे कृष्णमिति द्वितीया ।

(ङ) ग्राहवत् ग्राह इव, ग्राहः जलजन्तुर्मकरः ; तद्वत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्य दर्पबलं भङ्क्त्वा गृहीतस्य विषाणयोः ।
अपीड़यदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरम्(च) ॥११॥
उत्पाट्य शृङ्गमेकन्तु तेनैवाताड़यत् ततः ।
ममार स महादैत्यो मुखाच्छोणितमुद्वमन् (छ) ॥१२॥
तुष्टुवुर्निहते तस्मिन् दैत्ये गोपा जनार्द्दनम् ।
जम्भे हते सहस्राक्षं पुरा देवगणा यथा(ज) ॥१३॥

इति श्रीविष्णुपुराणे पञ्चमांशे चतुर्द्दशः अध्यायः ॥

इति श्रीधरस्वामिकृतायाम् आत्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमाऽंशे चतुर्दशोऽध्यायः ॥

(च) दर्पः अहङ्कारः बलं वीर्य्यं तयोः समाहारः दर्पबलं तत् । अथवा दर्परूपं बलम् । भङ्क्त्वा विनाश्य । विषाणयोः शृङ्गयोः, अवच्छेदे सप्तमी । क्लिन्नं जलार्द्रम् अम्बरं वस्त्रमिव । तथा हि जलमोक्षणाय यथा वस्त्रं जनः पीड़यति तद्वदिति ।

(छ) तेनैव उत्पाटितेन तस्य शृङ्गेणैव ।

(ज) जम्भे जम्भासुरे हते सहस्राक्षेण इन्द्रेण हते सति, सहस्राक्षम् इन्द्रम् ।

पञ्चदशः अध्यायः

[श्रीकृष्णमानेतुं कंसेनाक्रूरस्य प्रेषणम् ।]

पराशर उवाच ।
ककुद्मिनि हतेऽरिष्टे धेनुके विनिपातिते ।
अलम्बे निहिते वीरे धृते गोवर्द्धनाचले ॥१॥
दमिते कालिये नागे भग्ने तुङ्गतरुद्वये ।
हतायां पूतनायाञ्च शकटे परिवर्त्तिते(क) ॥२॥
कंसाय नारदः प्राह यथावृत्तमनुक्रमात् ।
यशोदादेवकीगर्भपरिवर्त्ताद्यशेषतः ॥३॥
श्रुत्वा तत् सकलं कंसो नारदाद् देवदर्शनात् ।
वसुदेवं प्रति तदा कोपं चक्रे सुदुर्म्मतिः(ख) ॥४॥
सोऽतिकोपादुपालभ्य सर्व्वयादवसंसदि ।
जगर्ह यादवांश्चैव कार्य्यञ्चैतदचिन्तयत् ॥५॥

पञ्चदशः अध्यायः

वसतो गोकुले चित्रं कर्म कृष्णस्य वर्णितम् । अथाह मथुराकृत्यं प्रस्तोतुं नारदागमम् । तदेवम् गोकुले रास-क्रीड़ादिविनोदैः कंसवधादिदेवकार्यं हरिणा विस्मृतमिवा-वदत् तत्स्मरणप्रसंगात् नारदागमनादिकमाह—'ककुद्मिनी'-त्यादिना यावदध्यायसमाप्ति । ककुद्मिनि वृषभाकृतौ दैत्ये ॥१।२

यशोदा-देवक्योर्गर्भयोरपत्ययोः परिवर्त्तादिः ॥३।४॥
वसुदेवमुपालभ्य निर्भर्त्स्य जगर्ह निन्दितवान् ॥५॥

(क) तुङ्गतरुद्वये समुन्नत-यमलार्जुनवृक्षद्वये ।

(ख) देवस्य दर्शनमिव दर्शनं यस्य तस्मात् । अथवा देवानामिव दर्शनं दिव्यदृष्टिर्यस्य तस्मात्, एतेन नारदेन वृत्तस्य सर्ववस्तुनः दिव्यदृष्ट्या अवलोकनात् तत्र कंसस्य दृढ़ः प्रत्ययः सूच्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यावन्न बलमारूढौ राम-कृष्णौ सुबालकौ ।
तावदेव मया वध्यावसाध्यौ रूढ़यौवनौ(ग) ॥६॥

चाणूरोऽत्र महावीर्य्यो मुष्टिकश्च महाबलः ।
एताभ्यां मल्लयुद्धेन घातयिष्यामि दुर्म्मदौ ॥७॥

धनुर्म्महमहायागव्याजेनानीय तौ व्रजात् ।
तथा तथा यतिष्यामि यास्येते सङ्क्षयं यथा(घ) ॥८॥

श्वफल्कतनयं सोऽहमक्रूरं यदुपुङ्गवम् ।
तयोरानयनार्थाय प्रेषयिष्यामि गोकुलम् ॥९॥

वृन्दावनचरं घोरमादेक्ष्यामि च केशिनम् ।
तत्रैवासावतिबलस्तावुभौ घातयिष्यति ॥१०॥

गजः कुवलयापीड़ो मत्समीपमुपागतौ ।
घातयिष्यति वा गोपौ वसुदेवसुतावुभौ ॥११॥

पराशर उवाच ।

इत्यालोच्य स दुष्टात्मा कंसो राम-जनार्द्दनौ ।
हन्तुं कृतमतिर्वीरमक्रूरं वाक्यमब्रवीत् ॥१२॥

कंस उवाच ।

भो भो दानपते ! वाक्यं क्रियतां प्रीतये मम ।
इतः स्यन्दनमारुह्य गम्यतां नन्दगोकुलम् ॥१३॥
वसुदेवसुतौ तत्र विष्णोरंशसमुद्भवौ ।
नाशाय किल सम्भूतौ मम दुष्टौ प्रवर्द्धतः(ङ) ॥१४॥
धनुर्महो ममाप्यत्र चतुर्द्दश्यां भविष्यति ।
आनेयौ भवता गत्वा मल्लयुद्धाय तावुभौ ॥१५॥
चाणूर-मुष्टिकौ मल्लौ नियुद्धकुशलौ मम ।
ताभ्यां सहानयोर्युद्धं सर्व्वलोकोऽत्र पश्यतु ॥१६॥
नागः कुवलयापीड़ो महामात्रप्रचोदितः ।
स वा निहंस्यते पापौ वसुदेवात्मजौ शिशू(च) ॥१७॥
तौ हत्वा वसुदेवञ्च नन्दगोपञ्च दुर्म्मतिम् ।
हनिष्ये पितरं चैनमुग्रसेनं सुदुर्म्मतिम् ॥१८॥
ततः समस्तगोपानां गोधनान्यखिलान्यहम् ।
वित्तं चापि हरिष्यामि दुष्टानां मद्वधैषिणाम् ॥१९॥
त्वामृते यादवाश्चैते दुष्टा दानपते ! मयि ।
एतेषाञ्च वधायाहं प्रयतिष्याम्यनुक्रमात्(छ) ॥२०॥
ततो निष्कण्टकं सर्व्वं राज्यमेतदयादवम् ।
प्रशासिष्ये त्वया तस्मान्मत्प्रीत्या वीर! गम्यताम्(ज) ॥२१॥

कंसस्य मनोरथप्रकारमाह—'यावदि'ति षड्भिः ॥६॥
स्वाभिप्रायं निवेदयन् कंसोऽक्रूरमादिशति—'भो भो' इत्यादि—दशभिः ॥१३॥

(ग) बलं शारीरशक्तिम् आरूढौ आश्रितौ भवतः वयोवृद्धयेति शेषः। ऊढम् आश्रितं यौवनं तारुण्यं याभ्यां तथाविधौ सन्तौ तौ रामकृष्णौ असाध्यौ अशक्यप्रतीकारौ भविष्यत इति शेषः, अतः साम्प्रतमेव तद्वधप्रबन्धः कर्त्तव्य इति भावः।

(घ) धनुर्महः धनुरुत्सवः स एव महायागः तद्व्याजेन तद्व्यपदेशेन। तौ रामकृष्णौ व्रजात् आनीय अत्रेति शेषः। यतिष्यामि यास्येते इतिपदद्वयमार्षम्।

प्रवर्द्धतः प्रकर्षेण वर्द्धेते ॥१४॥
नियुद्धकुशलौ द्वन्द्वयुद्धाभिज्ञौ ॥१५।१६॥
महामात्रो हस्तिपस्तेन प्रचोदितः ॥१७।१८।१९।२०।२१॥

(ङ) तत्र गोकुले, विष्णोः अंशात् समुद्भवः उत्पत्तिर्ययोः तौ। प्रवर्द्धत इत्यत्र परस्मैपदमार्षम्।

(च) सः कुवलयापीड़ो नागः, निहंस्यते निहनिस्यति, वसुदेवात्मजाविति निहन्तेः कर्म। निहंस्यत इति प्रयोग आर्षः। निहंस्यत इत्यात्मनेपदमार्षम् इड़भावश्च आर्षः।

(छ) प्रयतिष्यामीत्यत्र परस्मैपदमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा च माहिषं सर्पिर्दधि वाप्युपहार्य्य वै ।
गोपाः समानयन्त्याशु त्वया वाच्यास्तथा तथा (ङ)॥२२

पराशर उवाच ।

इत्याज्ञप्तस्तदाक्रूरो महाभागवतो द्विज ।
प्रीतिमानभवत् कृष्णं श्वो द्रक्ष्यामीति सत्वरः ॥२३॥

तथेत्युक्त्वा च राजानं रथमारुह्य शोभनम् ।
निश्चक्राम ततः पुर्य्या मथुराया मधुप्रियः ॥२४॥

इति श्रीविष्णुपुराणे पञ्चमांशे पञ्चदशः अध्यायः ॥

उपहार्यं उपायनीकृत्य ॥२२॥

मधुप्रियः मधोर्वंश्यानां प्रियः ॥२४॥

(ख) निः न विद्यते कण्टकः क्षुद्रशत्रुः यस्य तथाभूतम् । 'क्लीबे क्षुद्रशत्रौ च रोमहर्षे च कण्टक' इति कोषात् । दार्ढ्यार्थे इत्यात्मनेपदमार्षम् ।

(ङ) महिष्या इदं माहिषम्, सर्पिः घृतम् महिषीक्षीरजातं घृतमित्यर्थः । दधीत्यत्रापि माहिषमित्यन्वेति तस्यैवातिगाढ़-तादिना उत्कर्षविशेषात् ।

अतएवोक्तं केनचित्कविना—'कालिदासकविता नवं वयो माहिषं दधि सशर्करं पयः । एणमांसमवला च कोमला सम्भवन्तु मम जन्म जन्मनि' । इति । उपहार्य्येत्यत्र स्वार्थे णिच् । उपहृत्येत्यर्थः । राज्ञो मम उपहाररूपेण कल्पयित्वेति निर्गलितार्थः ।

इति श्रीविष्णुपुराणटीकायां श्रीधरस्वामिकृतायां पञ्चमांशे पञ्चदशोऽध्यायः ॥

षोड़शोऽध्यायः

(केशिवधः)

पराशर उवाच ।

क्रूरेऽथ चापि बलोदग्रः कंसदूत-प्रणोदितः ।
कृष्णस्य निधनाकाङ्क्षी वृन्दावनमुपागमत् ॥१॥

स्वखुरक्षतभूपृष्ठः सटाक्षेपधूताम्बुदः ।
प्लुतविक्रान्तचन्द्रार्कमार्गे गोपानुपाद्रवत् ॥२॥

तस्य ह्रेषितशब्देन गोपाला दैत्यवाजिनः ।
गोप्यश्च भयसंविग्ना गोविन्दं शरणं ययुः ॥३॥

षोड़शः अध्यायः

बलोद्रेकः बलेनोद्धतः कंसस्य दूतेन स्वस्थानादेव प्रेषितः । न तु कंसेनाहूय स्वयं प्रेषितः आशु कार्यत्वात् । कृष्णस्य तावद्विलम्बासहनात् ॥१॥

स्वखुरैः क्षतं भूपृष्ठं येन सटानां केशराणां क्षेपेण धूननेन धूता विचलिता अम्बुदा येन । प्लुतेन प्लवनेन विक्रान्तौ विलंघितौ चन्द्रार्कमार्गौ येन ॥२।३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्राहि त्राहीति गोविन्दः श्रुत्वा तेषां तदा वचः ।
सतोयजलदध्वानगम्भीरमिदमुक्तवान् (क)॥४॥

श्रीकृष्ण उवाच ।

अलं त्रासेन गोपालाः केशिनः किं भयातुरैः ।
भवद्भिर्गोपजातीयैर्वीरवीर्य्यं विलोप्यते ॥५॥

किमनेनाल्पसारेण ह्येषिताटोपकारिणा ।
दैतेयबलावहेन वल्गता दुष्टवाजिना ॥६॥

एह्येहि दुष्ट कृष्णोऽहं पूष्णस्त्विव पिनाकधृक् ।
पातयिष्यामि दशनान् वदनादखिलांस्तव ॥७॥

इत्युक्त्वास्फोट्य गोविन्दः केशिनः सम्मुखं ययौ ।
विवृतास्यस्तु सोऽप्येनं दैतेयश्चाप्युपाद्रवत् (ख)॥८॥

बाहुमाभोगिनं कृत्वा मुखे तस्य जनार्दनः ।
प्रवेशयामास तदा केशिनो दुष्टवाजिनः ॥९॥

केशिनो वदनं तेन विशता कृष्णबाहुना ।
शातिता दशनाः पेतुः सिताभ्रावयवा इव (ग)॥१०॥

कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विज ।
विनाशाय यथा व्याधिरासम्भूतेरुपेक्षितः ॥११॥

विपाटितोष्ठो बहुलं सफेनं रुधिरं वमन् ।
सोऽक्षिणी विवृते चक्रे निःसृते मुक्तबन्धने ॥१२॥

जघान धरणीं पादैः शकृन्मूत्रं समुत्सृजन् ।
स्वेदार्द्रगात्रः श्रान्तश्च निर्यत्नः सोऽभवत् ततः (घ)॥१३॥

व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना ।
निपपात द्विधाभूतो वैद्युतेन द्रुमो यथा (ङ)॥१४॥

सतोयस्य जलदस्य ध्वानो गर्जितं तद्वद्गम्भीरं यथा भवत्येवमुक्तवान् ॥४॥

किं वीरवीर्य्यं विलोप्यत इति। यदा स्वामिनि सन्निहिते सत्यपि परिजनो भयातुरः स्यात्तदासौ स्वामी मन्दवीर्य्य इत्यन्येषां बुद्धिः स्यात्। अतो मदीयैर्भवद्भिर्भीरुतया मम वीर्य्यस्य वीर्यलोपः किमिति क्रियत इत्यर्थः ॥५॥

ह्येपितमेवाटोपस्तत्कारिणा दैत्येन बलाद् वाह्येन दैत्यैर्हि बलादाक्रम्यायमारुह्यते अतो दैत्यहन्तृणामस्माकं किमनेन भवेदित्यर्थः। वल्गतात्रिक्रमवनस्य गच्छता। तदुक्तं वल्गितं तु नतत्रिक्रमिति ॥६॥

पूष्णो दन्तान् पिनाकधृक् वीरभद्र इव पूष्णोरिवेति पाठे पौष्णश्चरुरैन्द्रा पौष्णश्चरुरित्यादिषु पूष्ण एव केवलरूपेणेन्द्रसाहित्यरूपेण च देवतारूपभेदाद् द्विवचनम् ॥७॥८॥

आभोगिनं विस्तारिणम् ॥९॥

शातिताः आहताः ॥१०॥

आसम्भूतेरुत्पत्तेर्वृद्धिपर्यन्तम् ॥११॥१२॥१३॥

व्यादितं विवृतमास्यं यस्य वैद्युतेन अशनिना ॥१४॥

(क) इदं वक्ष्यमाणम्।

(ख) विवृतं व्यात्तम् आस्यं मुखं येन तथाभूतः सन्।

(ग) सिताभ्रस्य शुभ्रमेघस्य अवयवाः आंशिकाङ्गविशेषा इव दशनानां शुभ्रत्वात् सिताभ्रावयवसाम्यम्। सिता अभ्रावयवा इवेति वार्थः।

(घ) शकृत् पुरीषं विष्ठेत्यर्थः, 'उच्चारावस्करौ शकृत्' शकृत्। गूथं पुरीषं वर्च्चस्कमस्त्री विष्ठाविषौ स्त्रिया' मिति कोषात्। स्वेदेन घर्मजलेन आर्द्रं सिक्तं गात्रं यस्य सः। निर्यत्नः निश्चेष्टः,

(ङ) व्याङ्पूर्वस्य दाञः क्तप्रत्ययेन व्यात्तास्य इति वक्तव्ये व्यादितास्य इति प्रयोग आर्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्विपादपृष्ठपुच्छार्द्धे श्रवणैकाक्षिनासिके ।
केशिनस्ते द्विधाभूते शकले द्वे विरेजतुः (च) ॥१५॥
हत्वा तु केशिनं कृष्णो गोपालैर्मुदितैर्वृतः ।
अनायस्ततनुः स्वस्थो हसंस्तत्रैव तस्थिवान् (छ) ॥१६॥
ततो गोप्यश्च गोपाश्च हते केशिनि विस्मिताः ।
तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरमम् (ज) ॥१७॥
अथाहान्तरितो विप्रो नारदो जलदे स्थितः ।
केशिनं निहतं दृष्ट्वा हर्षनिर्भरमानसः (झ)॥१८॥
साधु साधु जगन्नाथ लीलयैव यदच्युत !
निहतोऽयं त्वया केशी क्लेशदस्त्रिदिवौकसाम् (ञ)॥१९
युद्धोत्सुकोऽहमत्यर्थं नरवाजि-महाहवम् ।
अभूतपूर्व्वमन्यत्र द्रष्टुं स्वर्गादुपागतः (ट)॥२०॥
कर्म्माण्यत्रावतारे ते कृतानि मधुसूदन !
यानि तैर्विस्मितं चेतस्तोषमेतेन मे गतम् (ठ) ॥२१॥
तुरङ्गस्यास्य शक्रोऽपि कृष्ण ! देवाश्च विभ्यति ।
धुतकेशरजालस्य ह्रेषतोऽभ्रावलोकिनः (ड) ॥२२॥
यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्द्दन !
तस्मात् केशवनाम्ना त्वं लोके गेयो भविष्यसि ॥२६

द्वौ द्वौ पादौ ययोः पृष्ठपुच्छे च अर्द्धरूपे ययोः। एकशब्दः श्रवणपदात् प्राग्योज्यः तेन एकैकाः श्रवणाक्षिनामिका ययोस्ते च तथोक्ते ॥१५।१६॥

युद्धोत्सुकः युद्धदर्शनोत्सुकः ॥२०।२१॥

धुतं कम्पितं केशराणां जालं समूहो येन तस्य ह्रेषतः ह्रेषारवं कुर्वतः ॥२२॥

केशिवधात् केशव इत्यक्षरसाम्यान्नामनिरुक्तिः ॥२३॥

(च) शकले द्वे खण्डे, 'भित्तं शकल-खण्डे वा' इति कोषात्।

(छ) अनायस्ता आयासमप्राप्ता तनुः यस्य तथाभूतः। स्वस्थः स्वभावस्थः अपनीतशारीरवृद्धिरित्यर्थः। कृष्णेन केशिदानववधार्थं पूर्वं शरीरं विवर्द्धितम्, इदानीं पुनर्गोपानामुद्वेगनिवृत्त्यर्थं तदुपसंहृत्य स्वल्पीकृतमिति भावः।

(ज) अनुरागेण कृष्णप्रेम्णा मनोरमं मनोज्ञं यथा स्यात् तथा तुष्टुवुः। अथवा अनुरागेण गोपगोपिकासु प्रीत्या मनोरमम् सुखस्मितादिसुभगं पुण्डरीकाक्षमिति सम्बन्धः। मनसि रममाणं क्रीड़न्तं गोपगोपिकानामिति वार्थः।

(झ) अन्तरितः प्रच्छन्नः गोपगोपिकानां दृष्टेरगोचरः अस्त्वित्यर्थः। वचनमपि तदीयश्रवणबहिर्भूतमिति ध्येयम्।

(ञ) त्रिदिवौकसाम् त्रिदिववासिनां देवानां देवर्षिप्रभृतीनाञ्चेत्यर्थः। क्लेशदः जगदपकारादिना दुःखदः।

(ट) नरः मानवः प्रकृते नररूपधारी श्रीकृष्णः, वाजी अश्वः प्रकृते अश्वरूपः केशिदानवः, तयोः नरवाजिनोः महाहवं महायुद्धम्। अन्यत्र अस्मादपरस्थाने अभूतपूर्वम् अवृत्तपूर्व्वं पूर्वमज्ञातमित्यर्थः। स्वर्गात् उपागतः अपूर्ववस्तुदर्शनलोभादिति भावः।

(ठ) ते तव अवतारे कृष्णरूपेण अस्मिन् अवतारे यानि सुकर्माणि जगदुपद्रवप्रतीकारपरत्वादुत्कृष्टानि पूतनावधादीनि कर्माणि कृतानि त्वयेति शेषः। एतेन केशिवधरूपेण साम्प्रतिककर्मणा। गतं प्राप्तम्।

(ड) अस्य तुरङ्गस्य अश्वरूपस्य केशिदानवस्य, बिभ्यतीति भीत्यर्थभीधातुयोगेऽपि सम्बन्धसामान्यविवक्षया षष्ठी। शक्रोऽपि वज्रायुधः पुरन्दरोऽपि, का कथा अन्येषामित्यपिशब्दद्योत्यम्। अभ्रं गगनं तदवलोकिनः तदभिमुखे दृष्टिनिक्षेपकारिणः। 'द्यो दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खम्'। इति कोषात्। तथा हि गगनस्य देवमार्गतया तदवलोकनं देवानामनुसन्धानार्थं वा स्यादिति मत्वा देवा बिभ्यतीति भावः। अथवा देवावासभूमेः स्वर्गस्य ऊर्द्ध्वगतत्वेन ऊर्द्धे नभसि दृष्टिपातात् अनन्तरमसौ देवानाक्रमितुं स्वर्गं वा समागतः स्यादिति बुद्ध्या भीतिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वस्त्यस्तु ते गमिष्यामि कंसयुद्धेऽधुना पुनः ।
परश्वोऽहं समेष्यामि त्वया केशिनिसूदन (ढ) ॥२४॥

उग्रसेनसुते कंसे सानुगे विनिपातिते ।
भारावतारकर्त्ता त्वं पृथिव्याः पृथिवीधर ॥२५॥

तत्रानेकप्रकाराणि युद्धानि पृथिवीक्षिताम् ।
द्रष्टव्यानि मया युस्मत्प्रणीतानि जनार्द्दन ॥२६॥

सोऽहं यास्यामि गोविन्द ! देवकार्य्यं महत् कृतम् ।
त्वया सभाजितश्चायं स्वस्ति तेऽस्तु व्रजाम्यहम् ॥२७

पराशर उवाच ।

नारदे तु गते कृष्णः सह गोपैरविस्मितः ।
विवेश गोकुलं गोपी-नेत्रपानैकभाजनम् ॥२८॥

इति श्रीविष्णुपुराणे पञ्चमांशे षोड़शः अध्यायः ॥

अधुना गमिष्यामि परश्वः कंसयुद्धे पुनस्त्वया समेष्यामि ॥२४॥

पृथिव्या भारहर्त्ता त्वं भविष्यसि ॥२५॥

तत्र भारावतारकरणे आयुष्मता त्वया प्रणीतानीति लोकोक्तिः ॥२६॥

इत्थं मनोहरैः कर्मभिः सभाजितः सत्कृतः ॥२७॥

गोपीनेत्राणां पानस्यादरवीक्षणस्यैकमेव भाजनं विषयः कृष्णो विवेश ॥२८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे षोडशोऽध्यायः ।

(ढ) त्वया समेष्यामि मिलितो भविष्यामि । अथवा त्वया सह कंसयुद्धे कंसस्य युद्धे, समेष्यामि समागमिष्यामि । त्वया हेतुना कंसयुद्धे त्वद्वधं निमित्तीकृत्य कंसेनायोजयिष्यमाणे युद्धे इत्यर्थो वा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तदशोऽध्यायः

[अक्रूरस्य गोकुलयात्रा]

पराशर उवाच ।

अक्रूरोऽपि विनिष्क्रम्य स्यन्दनेनाशुगामिना ।
कृष्णसन्दर्शनायैकः प्रययौ नन्दगोकुलम् (क) ॥१॥

चिन्तयामास चाक्रूरो नास्ति धन्यतरो मया ।
योऽहमंशावतीर्णस्य मुखं द्रक्ष्यामि चक्रिणः ॥२॥

अद्य मे सफलं जन्म सुप्रभाता च मे निशा ।
पद्मनिद्राब्जपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखम् (ख) ॥३॥

अद्य मे सफले नेत्रे अद्य मे सफला गिरः ।
जन्मे परस्परालापो दृष्ट्वा विष्णुं भविष्यति ॥४॥

पापं हरति यत् पुंसां स्मृतं सङ्कल्पनामयम् ।
तत् पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखम् (ग) ॥५॥

निर्जग्मुश्च यतो वेदा वेदाङ्गान्यखिलानि च ।
द्रक्ष्यामि तत् परं धाम धाम्नां भगवतो मुखम् ॥६॥

यज्ञेषु यज्ञपुरुषः पुरुषैः पुरुषोत्तमः ।
इज्यते योऽखिलाधारस्तं द्रक्ष्यामि जगत्पतिम् ॥७॥

इष्ट्वा यमिन्द्रो यज्ञानां शतेनामरराजताम् ।
अवाप तमनन्तादिमहं द्रक्ष्यामि केशवम् (घ) ॥८॥

सप्तदशः अध्यायः

श्रीकृष्णो गोकुलं विवेश, अक्रूरोऽपि मथुराया विनिष्क्रम्य गोकुलं प्रययौ ॥१॥

पथि गच्छतोऽक्रूरस्य मनोरथानाह—'चिन्तयामासे'-त्यादिना 'अक्रूरेति वक्ष्यती'त्यन्तेन। मया सदृशो धन्यतरो नास्ति ॥२।३।४॥

संकल्पनामयं ध्यानमात्रालम्बनमपि ॥५॥

धाम्नां तेजोमयानां सूर्य्यादीनां परं धाम आश्रयं मुखावयवेषु लोचनरसनवदनेषु सूर्य्यवरुणाग्नीनामाश्रयत्वात् ॥६।७॥

नास्त्यन्तश्चादिश्च यस्य तमनन्तादिम् ॥८॥

(क) स्यन्दनेन युद्धोपयोगिना रथेन 'याने चक्रिणि युद्धार्थे [illegible] स्यन्दनो रथ' इति कोषात्। एतेन कृष्णप्रयुक्तयुद्धाशङ्क-[illegible] तादृशयानव्यवस्था कंसेन विहितेति व्यज्यते। केचित्तु [illegible]गामिनेति स्यन्दनविशेषणात् आशुगमनार्थमेव तादृशः [illegible] गृहीत इति वदन्ति। कृष्णसन्दर्शनाय भगवतः कृष्णस्य [illegible]काराय, एतेन अक्रूरस्य मथुरायां कंसाभिमतमागमनं न [illegible]मुद्देश्यं परं कृष्णसन्दर्शनमेवेति तस्य कृष्णे भगवति महती [illegible] सूच्यते, सा चानन्तरमेव स्पष्टा।

(ख) उन्निद्रं विकसितं यत् अब्जं पङ्कजं तस्य पत्रे इव [illegible] चक्षुषी यत्र तथाभूतम्। उन्निद्रेत्यादिमुखविशेषणेन [illegible] मया कृष्णस्य मुखदर्शनं कर्त्तव्यं, किन्तु सोऽपि विकाश-[illegible] चक्षुषा मामवलोकयिष्यतीति सुमहदिदं मे सौभाग्यमिति [illegible] सूच्यते।

(ग) पुण्डरीकवत् श्वेतपद्मवत् नयने यत्र तत्। एतेन अक्रूरस्य कंसेन प्रेषितत्वे सत्यपि तस्य कृष्णभक्ततया तं प्रति कृष्ण-नयनयोः क्रोधप्रयुक्तरक्तत्वाभावप्रत्यायनात् विद्वेषाभावो गम्यते।

(घ) अनन्तः शेषनागरूपो देवः तदादिं तत्प्रमुखं अनन्तादि-निखिलदेवतास्वरूपमिति वा। श्रीधरगृहीतादर्थादनन्तादि शब्दस्यान्योऽर्थः। एतेन तद्दर्शनात् सकलदेवदर्शनं मे भविष्यतीति अक्रूरस्य मतिर्व्यज्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न ब्रह्मा नेन्द्र-रुद्रा-श्वि-वस्वा-दित्य-मरुद्गणाः ।
यस्य स्वरूपं जानन्ति स्प्रक्ष्यत्यङ्गं स मे हरिः (ङ)॥९

सर्व्वात्मा सर्व्ववित् सर्व्वः सर्व्वभूतेष्ववस्थितः ।
यो वितत्याव्ययो व्यापी स वक्ष्यति मया सह(च)१०

मत्स्य-कूर्म-वराहा-श्व-सिंहरूपादिभिः स्थितिम् ।
चकार जगतो योऽजः सोऽद्य मामालपिष्यति(छ)॥११

साम्प्रतञ्च जगत्स्वामी कार्य्यमात्महृदि स्थितम् ।
कर्त्तुं मनुष्यतां प्राप्तः स्वेच्छादेहधृगव्ययः ॥१२॥

योऽनन्तः पृथिवीं धत्ते शेखरस्थितिसंस्थिताम् ।
सोऽवतीर्णो जगत्यर्थे मामक्रूरेति वक्ष्यति ॥१३॥

पितृ-पुत्र-सुहृद्-भ्रातृ-मातृ-बन्धुमयीमिमाम् ।
यन्मायां नालमुत्तर्त्तुं जगत् तस्मै नमो नमः (ज)॥१

तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते ।
योगी मायाममेयाय तस्मै विद्यात्मने नमः ॥१५॥

यज्विभिर्यज्ञपुरुषो वासुदेवश्च सात्वतैः ।
वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम्(ञ)१६

यथा तत्र जगद्धात्रि धातर्य्येतत् प्रतिष्ठितम् ।
सदसत् तेन सत्येन मय्यसौ यातु सौम्यताम् ॥१७॥

स्मृते सकलकल्याण-भाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥१८॥

वितत्यावस्थितः, वक्ष्यति वदिष्यति ॥१०॥

मत्स्य-कूर्म-वराहाश्व-सिंहरूपादिभिः अश्वः हयग्रीवः सिंहो नृसिंहः मामालपिष्यति। अक्रूरेति तातेत्याभाषिष्यते ॥११॥

शेखरस्येव स्थित्या सन्निवेशेन स्थितां सोऽवतीर्णो रामः ॥१३॥

तद्दर्शनप्रतिबन्धकपातकनिवृत्तये तमेव प्रणमति—'यस्मि पुत्रे'ति त्रिभिः ॥१४॥

अविद्याम् आत्मच्छादिकां तामेव मायाम् अहंकार-ममकारादिमोहकरीं बुद्ध्यानेन तरति ॥१५॥

यज्विभिः कर्मनिष्ठैः, सात्वतैरुपासकैः, वेदान्तवेदिभिः ज्ञाननिष्ठैश्च यज्ञपुरुषादिशब्दैर्यः प्रोच्यते ॥१६॥

अथ कंसस्य दूतोऽहमिति मय्यसूयामकुर्वन् प्रसन्नो भवत्विति प्रार्थयते 'यथे'ति। सदसत् कार्यकारणात्मकं साध्वसाधुवृत्तं वा जगदेतत् यस्मिन् धाम्नि आश्रये प्रतिष्ठितं तेन सत्येन सर्वाधारतया सर्वसाक्षित्वेन मयि सौम्यतां प्रसन्नतां यातु ॥१७॥

सत्यपराधे तत् सर्वं क्षम्यतामित्याशयेनाह—'स्मृत' इति ॥१८॥

(ङ) मे मम अङ्गं स्प्रक्ष्यति एकत्र स्यन्दने अतिसान्निध्येन अवस्थानात् प्रणामानन्तरं शिरःस्पर्शादिना वा ।

(च) सर्वात्मा सर्वेषामन्तरात्मस्वरूपः, सर्वः सर्वस्थूलदेहादि स्वरूपः, वक्ष्यति वदिष्यति संवादं करिष्यतीत्यर्थः ।

(छ) जगतः चराचरस्य सर्वभुवनस्य स्थितिं रक्षां चकार ।

(ज) जगत् चेतनात्मकं भुवनं सर्वम् । यन्मायां यस्य विष्णोः मायाम् अघटनघटनपटीयसीं वैष्णवीं मायाशक्तिम् । उत्तर्त्तुम् अतिक्रमितुम् न अलं न समर्थम् ।

(ञ) विष्णुः सर्वव्यापनशीलं परं ब्रह्मेत्यर्थः । तं श्रीकृष्णम् नतः प्रणतः अस्मि अहमिति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



भगवता श्रीकृष्णेन कंसस्य विनशः ।

[५शः, २०यः, पृष्ठाङ्कः— ४७४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

इत्थं सञ्चिन्तयन् विष्णुं भक्तिनम्रात्ममानसः ।
अक्रूरो गोकुलं प्राप्तः किञ्चित् सूर्य्ये विराजति(अ)१९

तु ददर्श तदा तत्र कृष्णमादोहने गवाम् ।
वत्सममध्यगतं फुल्लनीलोत्पलदलच्छविम्(ट) ॥२०॥

अस्पष्टपद्मपत्राक्षं श्रीवत्साङ्कितवक्षसम् ।*
आयाम्बबाहुमायामि-तुङ्गोरःस्थलमुन्नसम् ॥२१॥

सविलासस्मिताधारं बिभ्राणं मुखपङ्कजम् ।
तुङ्गरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितम्(ठ) ॥२२॥

विभ्राणं वाससी पीते वन्यपुष्पविभूषितम् ।
सार्द्रनीललताहस्तं सिताम्भोजावतंसकम्(ड) ॥२३॥

हंसकुन्देन्दुधवलं नीलाम्बरधरं द्विज !
तस्यानु बलभद्रञ्च ददर्श यदुनन्दनम्(ण) ॥२४॥

प्रांशुमुन्नतबाह्वंसं विकाशिमुखपङ्कजम् ।
मेघमालापरिवृतं कैलासाद्रिमिवापरम् ॥२५॥

भक्त्या नम्र आत्मा बुद्धिर्मानसञ्च यस्य सः ॥१६॥

आदोहने दोहनस्थाने । आयामि विस्तारवत्तुङ्गमुरःस्थलं यस्य तम् ॥२० २१॥

(अ) भक्तिनम्रात्ममानस इति—अत्र भक्त्या नम्र आत्मा बुद्धिर्मानसञ्च यस्य स इति श्रीधरः ।—इदञ्च सांख्यप्रमुखदर्शनमाश्रित्योक्तं श्रीधरेण । तन्मते बुद्धेर्निश्चयात्मकवृत्तिशालिन्या मनश्च संकल्पविकल्पात्मकवृत्तिशालिनो वृत्तिभेदेन मिथो भेदात् । स्वान्तरे तु भक्तिनम्रः भक्त्या तं प्रति आवर्जितः तदनुगत इत्यर्थः, आत्मा स्वभावो यस्य तथाभूतं मानसं मनः अन्तःकरणमित्यर्थः, यस्य तथाभूतम्, इति भिन्नोऽर्थः । सूर्य्ये किञ्चित् अल्पमात्रं विराजति दीप्यमाने सति । एतेन प्रायः प्रदोषकालः सूच्यते । किञ्चिद् विराजति अर्द्धास्तमिते इति वार्थः ।

(ट) फुल्लं विकसितं यत् तस्य नीलोत्पलं दलवत् छविः शरीरकान्तिर्यस्य तम् ।* अस्पष्टं मुकलितं यत् पद्मं तस्य पत्रवत् अक्षिणी यस्य तम् । श्रीवत्सेन रोमावर्त्तविशेषरूपचिह्नेन अङ्कितं चिह्नितं वक्षः यस्य तम् । उद्गता उन्नता नासा यस्य तम्, नासा शब्दस्य नसादेशः ।

(ठ) सविलासं विभ्रमयुक्तं यत् स्मितं मृदुहास्यं तदाधारं तदाधुकम् । तुङ्गः उन्नतमुखः रक्तश्च नखो यत्र तद् यथा स्यात् तथा । सुप्रतिष्ठितं दृढ़मवस्थितम् ।

(ड) आर्द्रस्य भावः आर्द्रम् आर्द्रता सरसता तेन सह वर्त्तमाना या नीललता श्यामवर्णा लता तद्वत् हस्तो यस्य तम् सरसस्निग्धश्यामलतासदृशभुजशालिनम् । अत्र आर्द्रनीललताहस्तमिति पाठः समीचीनो भाति । सिताम्भोजं श्वेतपद्मम् अवतंसः कर्णभूषा शिरोभूषणं वा यस्य तम्, बहुव्रीहौ कः ; 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे' इति कोषात् । इदमन्तानि श्रीकृष्णविशेषणानि ।

(ढ) अतः परं बलभद्रं विशेषयति—हंसेत्यादिना । तस्य श्रीकृष्णस्य अनु पश्चात्, तस्य श्रीकृष्णदर्शनस्य अनु इति वा । यदुनन्दनः यदुवंशजः अक्रूर इत्यर्थः ।

(ण) प्रांशुम् उन्नतदेहम्, 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे' इति कोषात् । उन्नतौ बाह्वंसौ भुजस्कन्धौ यस्य तम् । 'स्कन्धो भुजशिरोऽंसोऽस्त्री'ति कोषात् । विकाशि प्रफुल्लं मुखमेव पङ्कजं यस्य तम् विकचपद्मसदृशसुस्मितमुखम् । मेघमालया नीलजलधरसमूहेन परिवृतम् अपरं द्वितीयं कैलासाद्रिं कैलासशैलमिव बलभद्रं ददर्शेति पूर्वेणान्वयः । अत्र बलभद्रस्य हंसकुन्देन्दुधवलत्वात् नीलाम्बरपरिवेष्टितत्वाच्च नीलमेघमालापरिवेष्टितेन धवलवर्णकैलासशैलेन साम्यं समञ्जसमिति ध्येयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तौ दृष्ट्वा विकसद्वक्त्रसरोजः स महामतिः ।
पुलकाञ्चितसर्व्वाङ्गस्तदाक्रूरोऽभवन्मुने (त) ॥२६॥

एतत् तत् परमं धाम तदेतत् परमं पदम् ।
भगवद्वासुदेवांशो द्विधा योऽयमवस्थितः ॥२७॥

साफल्यमक्ष्णोर्युगमेतदत्र
दृष्टे जगद्धातरि यातमुच्चैः ।
अप्यङ्गमेतद् भगवत्प्रसादाद्
दत्तेऽङ्गसङ्गे फलवन्मम स्यात् (थ) ॥२८॥

अप्येष पृष्ठे मम हस्तपद्मं
करिष्यति श्रीमदनन्तमूर्त्तिः ।
यस्याङ्गुलिस्पर्शहताखिलाघै-
रवाप्यते सिद्धिरनाशदोषा (द) ॥२९॥

येनाग्निविद्युद्विरविरश्मिमाला-
करालमत्युग्रमपास्य चक्रम् ।
चक्रं घ्नता दैत्यपतेर्हृतानि
दैत्याङ्गनानां नयनाञ्जनानि (ध) ॥३०॥

यत्राम्बु विन्यस्य बलिर्म्मनोज्ञा-
नवाप भोगान् वसुधातलस्थः ।
तथामरत्वं त्रिदशाधिपत्यं
मन्वन्तरं पूर्णमपेतशत्रुः (न) ॥३१॥

अप्येष मां कंसपरिग्रहेण
दोषास्पदीभूतमदोषदुष्टम् ।
कर्त्तावमानोपहतं धिगस्तु
तज्जन्मनः साधुबहिष्कृतं यत् (प) ॥३२॥

भगवता स्वाङ्गसङ्गे दत्ते सति तत्प्रसादादेतन्ममाङ्गमपि फलवत् स्यादित्याशंसा ॥२८॥

(त) विकसत् वक्त्रमेव सरोजं यस्य सः । महती भगवद्भक्तिवशादतिप्रशस्ता मतिर्यस्य सः । एतच्च श्रीभगवतोः रामकृष्णयोः सन्दर्शनेन वक्त्रविकाशस्य सर्वाङ्गेषु पुलकोद्गमस्य सात्त्विकभावजस्य समर्थनार्थमुक्तम् । महती तयोः साक्षाद्भगवत्त्वपरिज्ञानादतिप्रशस्ता मतिर्यस्य इति वार्थः । तदर्थकं तदपि पूर्वोक्तसात्त्विकभावाभिव्यक्तिसमर्थकमिति व्योध्यम् ।

(थ) अत्र द्विधावस्थिते भगवद्वासुदेवांशे दृष्टे सति उच्चैः अतिमात्रं साफल्यं यातं प्राप्तम् ।

(द) अङ्गुलिस्पर्शेन हतानि विनाशितानि अखिलानि अघानि पापानि येषां तैः । अनेन अङ्गुलिस्पर्शस्य महाप्रभावः तेन च यदीयाङ्गुलिस्पर्शमात्रस्यैव तथा प्रभावः तस्य हस्तस्य मत्पृष्ठे सामग्रेण स्पर्शस्य ततोऽधिक एव प्रभावः स्यात् । ततः मम भाग्येन किमु तादृशः सकल—करस्पर्शः पृष्ठे सम्भवेदिति भावः सूच्यते । न विद्यते नाशरूपो दोषः यस्याः तथाभूता अक्षया सिद्धिरित्यर्थः । सिद्धिः निःश्रेयसरूपा । यस्य हस्ताङ्गुलिस्पर्शेन हताखिलाघैरिति पवित्रतोक्ता ॥२९

येन हस्तेन चक्रमपास्याक्षिप्य दैत्यपतेः कालनेमिप्रभृतेश्चक्रं सैन्यं घ्नता मारयता दैत्याङ्गनानां नयनानां जलानि तद्भर्तृवधादुपहृतानीति शौर्य्योक्तिः । यत्राम्बु विन्यस्येति हस्तौदार्य्यमुक्तम् वसुधातलस्थः भूतले स्थितः ॥३०।३१॥

(ध) दैत्यानां स्वहस्तापास्तचक्रेण विनाशितानां कालनेमिप्रमुखदैत्यानां या अङ्गनास्तासाम् । नयनाञ्जनानि शोभार्थं नेत्रेषु समर्पितानि कज्जलानि हृतानि विनाशितानि अदर्शनं नीतानीत्यर्थः, भर्तृवधजनितशोकातिशयेन नेत्रेभ्यो निरन्तरप्रसृतैरश्रुजलप्रवाहैस्तेषां नेत्रेभ्यः क्षालनादिति भावः ।

(न) यत्र वामनरूपस्य भगवतो हस्ते अम्बु दानार्थं जलं विन्यस्य, अमरत्वं 'अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः' इत्यादिवचनोपात्तं चिरजीवित्वम् । अपेतः अपगतः शत्रुर्यस्य सः । अपमानोपहतं कर्त्ता नः अस्माकं ममेत्यर्थः यत् जन्म साधुभिः एतादृशैर्महद्भिः बहिष्कृतम् अवमाननया साधुजन्मकोटेरपसारितं तत् जन्म धिगस्तु ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानात्मकस्यामलसत्त्वराशे-
रपेतदोषस्य सदा स्फुटस्य
किं वा जगत्यत्र समस्तपुंसा-
मज्ञातमस्यास्ति हृदि स्थितस्य ॥३३॥

तस्मादहं भक्तिविनम्रचेता
व्रजामि सर्व्वेश्वरमीश्वराणाम् ।
अंशावतारं पुरुषोत्तमस्य
अनादिमध्यान्तमयस्य विष्णोः(फ) ॥३४॥

इति श्रीविष्णुपुराणे पञ्चमांशे सप्तदशः अध्यायः ॥

अथोप दुष्टमपि मां दोषास्पदीभूतं मत्वा अपि यदि अवमानो- ष्यतं कर्त्ताकरिष्यतीत्याशङ्क्य स्वयमेव तन्न संभवतीत्याह, —ज्ञानात्मकस्येति। जीवस्य ज्ञानात्मकत्वेऽपि रजस्तमो- व्याप्तत्वान्न सर्वज्ञता, ईश्वरस्य तु तन्तास्तीत्याह अमलेति। दुष्टसत्त्वमयस्य न च जीववद्रागादिभिर्ज्ञानभ्रमोप इत्याह,— अपेतदोषस्येति। न च चक्षुराद्यपेक्षस्य जीवस्येव कादाचित्कं ज्ञानमीश्वरस्येत्याह,—सदा स्फुटस्येति। न च जीवस्यैवोपाधि- परिच्छेदादसार्वज्ञमित्याह,—सर्वपुंसां हृदि स्थितस्येति अतोऽत्र किं नाम तस्याज्ञातमस्ति तस्मान्निःशङ्कस्तमहं व्रजामीत्याह,—तस्मादिति ॥३३-३४॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे सप्तदशोऽध्यायः ॥

(फ) तस्मादिति—यस्माद्धेतोः समस्तपुंसां हृदि स्थितत्वात् सर्व्वेषां हृदयगतं वस्तु सर्वमेव ज्ञातमस्य, अतः मम हृदि एनं प्रति भक्तिर्दृढा स्थितायां साप्यनेन ज्ञाता स्यात्, परन्तु सा नास्ति, अत एव मां वृथा दोषास्पदीभूतं मत्वा नायं मामपमानोपहतं करिष्यतीति यस्मात् तस्मादित्यर्थः। अत्र तृतीयपादेन सह चतुर्थपादस्य सन्धिप्रक्रियाभाव आर्षः।

अष्टादशोऽध्यायः

[भगवतः श्रीकृष्णस्य मथुरागमनम्, गोपीनां विरहवर्णनम्, अक्रूरस्य मोहश्च।]

पराशर उवाच ।

चिन्तयन्निति गोविन्दमुपागम्य स यादवः ।
अक्रूरोऽस्मीति चरणौ ननाम शिरसा हरेः ॥१॥

सोऽप्येनं ध्वजवज्राब्ज-कृतचिह्नेन पाणिना ।
संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे(क) ॥२॥

अष्टादशः अध्यायः

यादवोऽक्रूरोऽस्मीति यादवोक्त्या स्वस्य तत्सम्बन्धितां ज्ञापयन् प्रणमति ॥१॥

परिषस्वजे आलिङ्गितवान् ॥२॥

(क) सोऽपि हरिरपि। एनं यादवमक्रूरम्। ध्वज- वज्राब्जैः रेखाकारैः ध्वजकुलिशपद्मैः कृतं चिह्नं यत्र तेन पाणिना करेण। सुगाढम् अतिनिविड़ं यथा स्यात्तथा, क्रियाविशेषणमिदम्। अनेन प्रीतेरान्तरिकत्वं गम्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतसंवादनौ (क) तेन यथावद् बल-केशवौ ।
ततः प्रविष्टौ संहृष्टौ तमादायात्ममन्दिरम् ॥३॥

सह ताभ्यां तदाक्रूरः कृतसंवादनादिकः (ख) ।
भुक्तभोज्यो यथान्यायमाचचक्षे ततस्तयोः ॥४॥

यथा निर्भर्त्स्यते तेन कंसेनानकदुन्दुभिः ।
यथा च देवकी देवी दानवेन दुरात्मना(ग) ॥५॥

उग्रसेने यथा कंसः सुदुरात्मा च वर्त्तते ।
यं चैवार्थं समुद्दिश्य स कंसेन विसर्ज्जितः(घ) ॥६॥

तत् सर्व्वं विस्तराच्छ्रुत्वा भगवान् केशिसूदनः ।
उवाचाखिलमप्येतज्ज्ञातं दानपते ! मया ॥७॥

करिष्ये च महाभाग ! यदत्रौपयिकं मतम् ।
विचिन्त्यं नान्यथैतत् ते विद्धि कंसं हतं मया ॥८॥

अहं रामश्च मथुरां श्वो यास्यावः समं त्वया ।
गोपवृद्धाश्च यास्यन्ति आदायोपायनं बहु(ङ) ॥९॥

निशेयं नीयतां वीर ! न चिन्तां कर्त्तुमर्हसि ।
त्रिरात्राभ्यन्तरे कंसं हनिष्यामि सहानुगम्(च) ॥१०॥

पराशर उवाच ।

समादिश्य ततो गोपानक्रूरोऽपि सकेशवः ।
सुष्वाप बलभद्रश्च नन्दगोपगृहे सुखम् ॥११॥
ततः प्रभाते विमले कृष्ण-रामौ महामती ।
अक्रूरेण समं गन्तुमुद्यतौ मथुरां प्रति(छ) ॥१२॥

रामश्च ननामेति सूचयन्नाह,—कृतसंवादनौ तेनेति ॥३॥

(क) रामश्च ननामेति सूचयन्नाह 'कृतसंवादनौ तेने'ति श्रीधरः ।—अत्रायमभिप्रायः—रामः कृष्णस्याग्रजः, कृष्णो रामस्यानुजः, तयोरुभयोः सन्निहितयो रामं त्यक्त्वा यदि कृष्णस्य प्रणतिरक्रूरेण कृता, तदा समुद्धतस्वभावो रामः स्वीयमानभङ्गं मत्वा तेन संवादमेव नाकरिष्यत्, अतः श्रीरामकृष्णाभ्यां सममेव तेन सह संवादस्य कृतत्वात् अक्रूरेण रामस्यापि नतिः कृतेति सूच्यते ।

(ख) अस्मिन् कल्पे संवादनं संवादः, स्वार्थे णिच्प्रत्ययः । कृतं संवादनं संवादः मिथो वाक्यालापः याभ्याम् तौ । तेन सहेति शेषः । अतएवोत्तरत्र कृतं संवादनादिकं संवादादि येन स इत्यर्थः प्रदर्शितः श्रीधरेण । अथवा संवादनेत्यत्र हेतुकर्त्तर्य्येव णिच्प्रत्ययः । तथाहि तेन प्रयोजककर्त्रा अक्रूरेण कृतं संवादनं संवादस्य प्रवर्त्तनं ययोः तौ । एवञ्च अक्रूरेणाकृते रामस्य प्रणामे मानभङ्गबुद्धया तस्य संवादप्रवृत्तिरेव विघटेत, तदभावाच्च संवादप्रवर्त्तनमपि न स्यात्, अतः कृतसंवादनावित्यनेन रामप्रणतिरपि सूचितेति । अत्र 'कृतसंवन्दनौ तेन' इति उत्तरत्र चतुर्थश्लोके च 'कृतसंवन्दनादिक' इति पाठद्वयं साक्षादेव द्वयो रामकृष्णयोः प्रणतिज्ञापकत्वात् समीचीनौ प्रतिभासेते ।

कृतं संवादनादिकं संवादादि येन सः । यथान्यायं सम्मानपूर्वकं भुक्तं भोज्यं भोजनार्हं सुसंस्कृतमन्नादि येन सः ॥४॥५॥६॥७॥

औपयिकम् उपयोगियोग्यमित्यर्थः ॥८॥१०॥

राजादेशनिवेदनेन गोपान् समादिश्य नन्दगोपगृहे सुष्वापेति वदन् अतः परं नन्दे पितृत्वव्यवहारानुवृत्तिं सूचयति ॥११॥

(ग) आनकदुन्दुभिः वसुदेवः ।

(घ) सः अक्रूरः कंसेन विसर्जितः प्रेषितः गोकुले इति शेषः ।

(ङ) उपायनम् उपहारद्रव्यं राज्ञे देयमित्यर्थः ।

(च) सहानुगं सानुचरम् ।

(छ) महती ग्राम्यत्वाभावादत्युदारा नागरिकजनोचितेत्यर्थः मतिर्ययोः तौ, अन्यथा अतिग्राम्यभावापन्ने गोपकुले वर्द्धितत्वात्तौ नगरगमनाद् भीत्यादिना निवृत्तौ वा स्यातामिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दृष्ट्वा गोपीजनः सास्रः श्लथद्वलयबाहुकः ।
निश्चयस्य चातिदुःखार्त्तः प्राह चेदं परस्परम् ॥१३॥
मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति ।
नागरस्त्री-कलालापमधु श्रोत्रेण पास्यति ॥१४॥
विलासिवाक्यपानेषु नागरीणां कृतास्पदम् ।
चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति ॥१५॥
सारं समस्तगोष्ठस्य विधिना हरता हरिम् ।
बहुशं गोपयोषित्सु निर्गुणेन दुरात्मना ॥१६॥
भावगर्भस्मितं वाक्यं विलासललिता गतिः ।
नागरीणामतीवैतत् कटाक्षेक्षितमेव च ॥१७॥
ग्राम्यो हरिरयं तासां विलासनिगड़ैर्युतः ।
भवतीनां पुनः-पार्श्वं कया युक्त्या समेष्यति ॥१८॥
एषैष रथमारुह्य मथुरां याति केशवः ।
क्रूरेणाक्रूरकेणात्र निराशेन प्रतारितः(ज) ॥१९॥
किं न वेत्ति नृशंसोऽत्र अनुरागपरं जनम् ।
येनेममक्ष्णोराह्लादं नयत्यन्यत्र नो हरिम्(झ) ॥२०॥
एष रामेण सहितः प्रयात्यत्यन्तनिर्घृणः ।
रथमारुह्य गोविन्दस्त्वर्य्यतामस्य वारणे(ञ) ॥२१॥

गन्तुमुद्यतौ दृष्ट्वा गोपीजनः प्राहेत्यन्वयः, 'दृष्ट्वे'त्यादिना गोऽपि रेणुर्न 'लक्ष्यते' इत्यन्तेन गोपीविरहालापोक्तेः । सास्रः बाष्पेण श्लथद्वलया बाहवो यस्येति विरहदुःखकार्श्यमुक्तम् ॥१३॥

कथमेष्यति ? न कथञ्चित्, तत्र हेतुमाह —'नागरे'ति सार्द्धेन । नागरस्त्रीणां कलः अव्यक्तमधुराक्षरो य आलापः तदेव मधु तद् यस्मात् पास्यति ॥१४॥

विलासवन्ति यानि वाक्यानि तेषां पानेषु, वाक्यानाञ्च तेषां शृङ्गारादिरसवत्त्वात् मधुत्वोक्तेश्च ॥१५॥

अस्मदैववैमुख्यादपि नायास्यतीत्याह—'सार'मिति समस्तगोष्ठस्य सारभूतं हरिं हरता विधिना गोपयोषित्सु बहुशं प्रहारः कृतः ॥१६॥

किञ्च 'भावगर्भस्मित'मित्यादि, भावादेर्लक्षणम्—'बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत् । भावः स कथ्यते तद्विज्ञेयोत्कर्षो रसः स्मृतः । विलासो नेत्रजो ज्ञेयो विभ्रमो नयनान्तज इति ।' नागरीणामेतद्वाक्यादिकम् अतीव सुपूजितमिव ॥१७॥

विलासरूपैर्निगड़ैर्युतो यतः । यत इति पाठे यतः संयतो बद्ध इत्यर्थः ॥१८॥

एषैष इति विस्मयाद् वीप्सा, सन्धिस्त्वार्षः, अक्रूरकेणेति इत्यस्य कः ॥१९॥

नृशंसः क्रूरः, अत्र व्रजे, किं न वेत्तीति—येन हेतुना नोऽस्माकं अक्ष्णोराह्लादं हरिमन्यत्र नयतीति तत् किमनुरागपरं जनं न वेत्तीति । यद्यसौ काप्यनुरागरसाभिज्ञो भवेत्, तर्हि तद्वियोगजदुःखं जानन्नेवं न कुर्यादिति भावः ॥२०॥

(ज) निः न विद्यते आशा भविष्यत्क्षेमसम्भावना यस्य तेन निराशेन हतभाग्येनेत्यर्थः । अथवा निः न विद्यते आशा आशंसनं कस्यापि क्षेमस्येति शेषः, यस्मात् तथाभूतेन । तथाहि स तथा क्रूरप्रकृतिरस्ति, यतः तस्मात् किमपि शिवमस्माभिराशासितुं न शक्यम् । तेन तु श्रीकृष्णः मिथ्याप्रलोभनेन प्रतारितः प्रवञ्चित एव मथुरां गन्तुमुद्यत इति भावः ।

(झ) आह्लादम् आनन्दाभिन्नम् । अत्र आनन्देन सह आनन्दहेतोः कृष्णस्य अभेदवर्णनात् हेतुनामालङ्कारः । तदुक्तं दर्पणे—'अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सहे'ति । अनेन तस्य आनन्दातिशयहेतुत्वं गम्यते ।

(ञ) अत्यन्तनिर्घृणः अतिमात्रनिर्दयः, तद्विरहकातरेषु गोपगोपीजनेष्विति शेषः । तथाहि यदि तस्य परदुःखप्रहाणेच्छारूपा दया स्वल्पाप्यभविष्यत्, तदा चिरबान्धवभूतगोपीजनानां तद्विरहप्रसूतदुःखातिशयप्रहाणाय मथुरागमनात् प्रतिनिवृत्त एवाभविष्यदिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरूणामग्रतो वक्तुं किं ब्रवीषि न नः क्षमम् ।
गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना (ट)॥२२
नन्दगोपमुखा गोपा गन्तुमेते समुद्यताः ।
नोद्यमं कुरुते कश्चिद् गोविन्दविनिवर्त्तने(ठ) ॥२३॥
सुप्रभाताद्य रजनी मथुरावासियोषिताम् ।
पास्यन्त्यच्युतवक्त्राब्जं यासां नेत्रालिपङ्क्तयः (ड)॥२४
धन्यास्ते पथि ये कृष्णमितो यान्त्यनिवारिताः ।
उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितम्(ढ) ॥२५॥
मथुरानगरीपौरनयनानां महोत्सवः ।
गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति ॥२६॥
को नु स्वप्नः सुभाग्याभिर्दृष्टस्ताभिरधोक्षजम् ।
विस्तारिकान्तिनयना या द्रक्ष्यन्त्यनिवारितम्(ण)॥२७
अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम् ।
उद्धृतान्यत्र नेत्राणि विधात्राकरुणात्मना(त) ॥२८॥

ये जना इतः केनाप्यनिवारिताः सन्तो यान्ति, ते धन्याः, यस्मात् पथि यान्तं कृष्णं पश्यन्तः स्वदेहं पुलकव्याप्तमुद्वहिष्यन्ति धारयिष्यन्तीत्यर्थः ॥२५॥

मथुरानगर्य्याः पौरस्त्रीनयनानाम् ॥२६॥

विस्तारीणि कान्तिमन्ति नयनानि यासां ताः ॥२७॥

अत्र प्रमाणे,—महानिधितुल्यं श्रीकृष्णं दर्शयित्वा नेत्राणि उद्धृतानि उद्धृतप्रायाणि विरहदुःखाद् वस्त्वन्तरदर्शनस्यापेक्षाया निवृत्तेः ॥२८॥

(ट) नः अस्माकं वक्तुं कृष्णस्य परपुरुषस्य विरहागमप्रभवं कातर्यं तथा तथा प्रकटयितुं न क्षमं नोचितमिति किं ब्रवीषि । इदं कस्यचित् विरहकातर्य्यात् पूर्वोक्तरूपं वचनं प्रयुञ्जानां काश्चिद् गोपिकां प्रति प्रतिषेधवाक्यम् । प्रतिषिध्यमाना गोपिका ब्रवीति गुरव इत्यादि । तथाहि यदि वयं गुर्वादिभयात् कृष्णस्य निवर्त्तने विरताः स्याम, तदा विरहाग्निना कृष्णस्येति शेषः, वयं विदग्धाः भवेम, तदा तत्प्रतीकाराय गुरवः किं करिष्यन्ति ? न किमपि करिष्यन्ति, तदेवमात्मरक्षणार्थमेवास्माभिः स्वयमात्मकातर्य्यं निवेद्य तन्निवर्त्तनं कार्य्यमेवानन्यगतिकत्वादिति भावः ।

(ठ) गन्तुं मथुरायामिति शेषः । गोविन्दस्य श्रीकृष्णस्य विनिवर्त्तने गमनान्निवृत्तिसम्पादने । उद्यमं यत्नम् । तथाहि यदि नन्दप्रमुखा गोपास्तन्निवर्त्तने यत्नमकरिष्यन्, तदास्माभिः प्रागल्भ्येन नैवं स कर्त्तव्यः समभविष्यदिति भावः ।

(ड) अच्युतस्य श्रीकृष्णस्य वक्त्राब्जं मुखकमलम्, नेत्रालिपंक्तयः नयनरूपभ्रमरसमूहाः ।

(ढ) अनिवारिता अनिषिद्धाः गुर्वादिभिरिति शेषः । तेषां गुर्वादिभिरनिवारितानां जनानां श्रीकृष्णदर्शनादिप्रयुक्तधन्यत्वार्थाद् गुर्वादिभिर्निवारिता वयं तदभावादधन्या इति प्रस्तुतार्थप्रत्यायनाद् वैधर्म्येणाप्रस्तुतप्रशंसालङ्कारः । उद्वहिष्यन्तीति संस्कारेण वक्तव्ये उद्वहिष्यन्तीति प्रयोग आर्षः ।

(ण) विस्तारिकान्तिनयना इति—कान्तं कान्तिः, भावे क्तप्रत्ययात्, तद् विद्यते येषां तानि कान्तीनि कान्तिमन्ति, अत एव 'विस्तारीणि कान्तिमन्ति नयनानि यासां ता' इति व्याख्यातं श्रीधरेण । अत्र विस्तारिण्यः कान्तयः येषां तानि विस्तारिकान्तीनि तथाभूतानि नयनानि यासां ताः विस्तारिकान्तिनयना इत्यप्यर्थः सम्भवति । वयमत्र 'विस्तारिकान्तनयना' इति मूलपाठं समीचीनतया सम्भावयामः ।

(त) अत्र 'उद्धृतानि उद्धृतप्रायाणि विरहदुःखाद् वस्त्वन्तरदर्शनापेक्षाया निवृत्ते'रिति श्रीधरव्याख्यानम् । अत्र अर्थान्तरम्प्येवं भवितुमर्हति, यथा—विधात्रा अकरुणात्मना निर्दयात्मना सता महानिधिं कृष्णरूपमनुत्तमं निधिं दर्शयित्वा नेत्राणि उद्धृतानि उच्चाकांक्षावन्ति कृतानि अत्युत्तमवस्तुमात्रदर्शनकामानि विहितानि । एतेन कृष्णरूपस्य निधेर्महत्त्वकथनात्तदपेक्षया वस्त्वन्तराणामपकर्षस्य सूचितत्वात् गोपीनेत्राणामपरनिखिलवस्तुभ्य एव विनिवृत्तिर्व्यज्यते । न हि दृष्टा लोके राजभोग्यवस्तुव्यवहाराभ्यस्तस्य भिक्षुभोग्येषु भोगेषु क्वचिदपि प्रवृत्तिरिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुरागेण शैथिल्यमस्मासु व्रजता हरेः !
शैथिल्यमुपयान्त्याशु करेषु वलयान्यपि ॥२९॥

अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान् ।
एवमार्त्तासु योषित्सु घृणा कस्य न जायते(थ) ॥३०॥

हा हा कृष्णरथस्योच्चैश्चक्ररेणुर्निरीक्ष्यताम् ।
दूरीकृतो हरिर्येन सोऽपि रेणुर्न लक्ष्यते ॥३१॥

इत्येवमतिहार्द्देन गोपीजननिरीक्षितः ।
तत्याज व्रजभूभागं सह रामेण केशवः ॥३२॥

गच्छन्तो जविताश्वेन रथेन यमुनातटम् ।
प्राप्ता मध्याह्नसमये रामाक्रूरजनार्द्दनाः ॥३३॥

अथाह कृष्णमक्रूरो भवद्भ्यां तावदास्यताम् ।
यावत् करोमि कालिन्द्यामाह्निकार्हणमम्भसि ॥३४॥

तथेत्युक्ते ततः स्नातः स्वाचान्तः स महामतिः ।
दध्यौ ब्रह्म परं विप्र ! प्रविश्य यमुनाजले(द) ॥३५॥

फणासहस्रमालाढ्यं बलभद्रं ददर्श सः ।
कुन्दमालाङ्गमुन्निद्र-पद्मपत्रारुणेक्षणम्(ध) ॥३६॥

...च 'अनुरागेणे'ति—अस्मासु शैथिल्यं व्रजता हरेरनुरागेण ...स्मत्करेषु वलयान्यपि शैथिल्यमुपयान्ति कृष्णानुरागा-...भूता अस्मांस्त्यक्त्वा वलयान्यपि तमेवानुजि-...पन्तीत्यर्थः। पाठान्तरे अस्मास्वनुरागेण शैथिल्यं व्रजन्तः ...रागं शिथिलं कुर्वन्तः सन्तो वलयान्यपि करेषु ...थिलयन्ति इत्यर्थः ॥२९॥

क्रूरहृदयो निर्घृणः—'तत्र हेतुः' 'एवमार्त्तास्वि'ति ॥३०॥

व्रजभूभागं व्रजप्रान्तम् ॥३२॥

जविताः वेगयुक्ताः अश्वा यस्मिन् रथे तेन ॥३३॥

आह्निकार्हणं माध्याह्निकस्नानं देवपूजादि च ॥३४।३५॥

भवद्भ्यां तावदत्रैवास्यतामित्यक्रूरस्योक्त्या तस्य मनसि ...तौ दुष्टकंससकाशं मया वृथैवानीताविति सशङ्कमिवा-लक्ष्य जले स्वीयमैश्वरं रूपं ताभ्यां दर्शितमसौ दृष्ट्वा तुष्टावेत्याह—'फणासहस्रे'त्यादिना यावत्समाप्ति। फणानां सहस्रस्य मालया पङ्क्त्या युक्तम् कुन्दानां मालेवातिश्वेतमङ्गं यस्य तम् ॥३६॥

(थ) हयान् रथवाहकानश्वान् शीघ्रं प्रेरयते अग्रे गन्तुं ...। क्रूरहृदयत्वादार्त्तानां योषितां कृष्णादर्शनप्रयुक्ता-...गणयित्वेत्यर्थः। अक्रूरस्य तथा क्रूरहृदयत्वमेव समर्थयितु-...'एवमार्त्तास्वि'त्यादि। कस्य अक्रूरहृदयस्य जनस्य दया ...? अपि तु सर्वस्यैव जायते। तथाहि अक्रूरहृदयश्चेत् ...तदा कृष्णादर्शने अस्माकमिमामार्त्तिमगणयित्वा सत्वरमश्वान् प्रेरयितुं नाशक्ष्यत्, अतः सत्वरमस्य कृष्णस्य अस्मद्दृष्टिवाह्यतासम्पादनाय शीघ्रं हयप्रेरणेनायं क्रूरहृदय एव इति निश्चीयत इति भावः। अथवा अक्रूरः क्रूरहृदयश्चेत् कथ-मार्त्तानामुपेक्षणेन सत्वरं हयान् प्रेरयत इत्याकांक्षायामाह एवमार्त्तास्वित्यादि। तथाहि अक्रूरस्य रथः यावत्कालमत्र स्थास्यति, तावत्कालमेव अस्माकमार्त्तिं दृष्ट्वा दुःखमनुभवितव्यम् अतः शीघ्रं हयान् प्रेरयन्नसौ स्वीयदुःखसम्भावनामेव निवर्त्तय-तीति सर्वस्यैतादृशार्त्तिदर्शनेन दुःखस्य स्वाभाविकत्वादिति भावः।

(द) स्वाचान्तः सुष्ठु कृताचमनः, दध्यौ ध्यातवान् चिन्त-यामासेत्यर्थः।

(ध) उन्निद्रस्य त्यक्ताकुञ्चनस्य विकसितस्येत्यर्थः। पद्मस्य पत्रवत् अरुणे रक्ते ईक्षणे यस्य तम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृतं वासुकिरम्भाद्यैर्महद्भिः पवनाशिभिः ।
संस्तूयमानं गन्धर्व्वैर्वनमालाविभूषितम् ॥३७॥

दधानमसिते वस्त्रे चारुपद्मावतंसकम् ।
चारुकुण्डलिनं भान्तमन्तर्जलतले स्थितम् ॥३८॥

तस्योत्सङ्गे घनश्याममाताम्रायतलोचनम् ।
चतुर्बाहुमुदाराङ्गं चक्राद्यायुधभूषणम् ॥३९॥

पीते वसानं वसने चित्रमाल्य-विभूषणम् ।
शक्रचापतड़िन्माला-विचित्रमिव तोयदम्(न) ॥४०॥

श्रीवत्सवक्षसञ्चारुकेयूरमुकुटोज्ज्वलम् ।
ददर्श कृष्णमक्लिष्ट-पुण्डरीकावतंसकम् ॥४१॥

सनन्दनाद्यैर्मुनिभिः सिद्धयोगैरकल्मषैः ।
विचिन्त्यमानं तत्रस्थैर्नासाग्रन्यस्तलोचनैः ॥४२॥

बल-कृष्णौ तथाक्रूरः प्रत्यभिज्ञाय विस्मितः ।
सोऽचिन्तयद् रथाच्छीघ्रं कथमत्रागताविति ॥४३॥

विवक्षोः स्तम्भयामास वाचं तस्य जनार्द्दनः ।
ततो निष्क्रम्य सलिलाद् रथमभ्यागतः पुनः ॥४४॥

ददर्श तत्र चैवोभौ रथस्योपर्य्यधिष्ठितौ ।
राम-कृष्णौ यथापूर्व्वं मनुष्यवपुषान्वितौ ॥४५॥

निमग्नश्च ततस्तोये स ददर्श तथैव तौ ।
संस्तूयमानौ गन्धर्व्व-मुनि-सिद्ध-महोरगैः ॥४६॥

ततो विज्ञातसद्भावः स तु दानपतिस्तथा ।
तुष्टाव सर्व्वविज्ञानमयमच्युतमीश्वरम् ॥४७॥

सन्मात्ररूपिणेऽचिन्त्यमहिम्ने परमात्मने ।
व्यापिने नैकरूपैकस्वरूपाय नमो नमः ॥४८॥

सत्त्वरूपाय तेऽचिन्त्य ! हविर्भूताय ते नमः ।
नमोऽविज्ञातपाराय पराय प्रकृतेः प्रभो ॥४९॥

भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् ।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ॥५०॥

प्रसीद सर्व्व सर्व्वात्मन् क्षराक्षरमयेश्वर ।
ब्रह्म-विष्णु-शिवाद्याभिः कल्पनाभिरुदीरितः ॥५१॥

वासुकिरम्भाद्यैः सर्पैर्वृतम् ॥३७-४६॥

विज्ञातः सद्भावः तयोः परमार्थो येन सः, सर्वेषां यद्-विज्ञानं तन्मयम् ॥४॥

नैकरूपोऽनेकरूपः स चासौ एकस्वरूपश्च तस्मै कार्य्य-कारणरूपाय ॥४८॥

हे अचिन्त्य ! हविर्भूताय 'यत् पुरुषेण हविषे'ति श्रुतेः । अविज्ञातः पारोऽन्तो यस्य तस्मै । प्रकृतेः पराय तामतिक्रम्य स्थिताय, 'आदित्यवर्णं तमसः परस्ता'दिति श्रुतेः ॥४९॥

भूतात्मा महाभूतरूपः, इन्द्रियात्मा इन्द्रियरूपः, प्रधानात्मा प्रकृतिरूपः, आत्मा भूतादित्रितयोपाधिपुरुषः, परमात्मा निरुपाधिः ॥५०॥

हे सर्व ! समस्तभूतरूप ! सर्वस्यात्मन् ! अत एव क्षराक्षरमय ईश्वर ! क्षराक्षरनियामक ! तदुक्तं गीतासु —'क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः' इति । कल्पनाभिर्गुणोपाधिब्रह्मादिसंज्ञाभिरुदीरितस्ततः ॥५१॥

(न) शक्रचापेन इन्द्रधनुषा तड़िन्मालया विद्युन्मालया च विचित्रं शबलं तोयदं जलपूर्णं मेघमिव श्यामवर्णमित्यर्थः । लोचनयोराताम्रत्वात्, वसनयोः पीतत्वात्, आत्मनः श्यामत्वात् माल्यस्य वर्णान्तरादितश्च शक्रचापादिविचित्रतोयदसाम्यम् ।

(प) अक्लिष्टश्चासौ पुण्डरीकावतंसकश्च इति विशेषणद्वयं कर्मधारयः । अथवा अक्लिष्टम् अमर्दितं यत् पुण्डरीकं तदेव अवतंसः कर्णाभरणं यस्य सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनाख्येयस्वरूपात्मन् ! अनाख्येयप्रयोजन !
अनाख्येयाभिधानं त्वां नतोऽस्मि परमेश्वर ॥५२॥

न यत्र नाथ ! विद्यन्ते नामजात्यादिकल्पनाः ।
तद् ब्रह्म परमं नित्यमविकारि भवानजः ॥५३॥

न कल्पनामृतेऽर्थस्य सर्व्वस्याधिगमो यतः ।
ततः कृष्णाच्युतानन्तविष्णुसंज्ञाभिरीड्यसे ॥५४॥

सर्व्वार्थस्त्वमज ! विकल्पनाभिरेतद्
देवाद्यं जगदखिलं त्वमेव विश्वम् ।
विश्वात्मंस्त्वमिति विकारभावहीनः
सर्व्वस्मिन् न हि भवतोऽस्ति किञ्चिदन्यत् (क) ॥५५

त्वं ब्रह्मा पशुपतिरर्य्यमा विधाता
धाता त्वं त्रिदशपतिः समीरणोऽग्निः ।
तोयेशो धनपतिरन्तकस्त्वमेको
भिन्नार्थैर्जगदपि पासि शक्तिभेदैः ॥५६॥

विश्वं भवान् सृजति सूर्य्यगभस्तिरूपो
विश्वञ्च ते गुणमयोऽयमज ! प्रपञ्चः ।
रूपं परं सदितिवाचकमक्षरं यज्-
ज्ञानात्मने सदसते प्रणतोऽस्मि तस्मै ॥५७॥

ॐ नमो वासुदेवाय नमः सङ्कर्षणाय ते ।
प्रद्युम्नाय नमस्तुभ्यमनिरुद्धाय ते नमः ॥५८॥

इति श्रीविष्णुपुराणे पञ्चमांशे अष्टादशः अध्यायः ॥

अनाख्येयस्वरूपः अनिर्देशार्हस्वरूप आत्मा स्वभावो यस्य । अनाख्येयं स्वरूपम् आत्मा मूर्त्तिश्च यस्येति वा । अनाख्येयं प्रयोजनं यस्य आप्तकामत्वेन लीलाव्यतिरेकेण सृष्ट्यादिप्रयोजनस्यानाख्येयत्वात् । यद्वा—अनाख्येयप्रयोजनं निर्गुणानन्दस्तद्रूप ! अनाख्येयानि अभिधानानि यस्य तम् अनामत्वादनन्तनामत्वाद्वा ॥५२॥

तन्नामत्वे हेतुमाह—'न यत्रे'ति ॥५३॥

मायया नन्तनामत्वमाह—'न कल्पनामि'ति ॥५४॥

रूपानन्त्येनानन्तनामत्वं प्रपञ्चयन्नाह—'सर्वार्थस्त्वमि'ति त्रिभिः ॥५५।५६॥

सूर्यगभस्तिरूप इति सूर्यरश्मिरूपेण वर्षन् भवान् चराचरं विश्वं सृजति । गभस्तिरूपः प्रकाशात्मा । सदिति पदं वाचकं यस्य तदक्षरं तव रूपं तस्मै, तुमो लोपे चतुर्थी, तं प्रसादयितुमित्यर्थः ॥५७॥

चतुर्व्यूहरूपं प्रणमति—'ओं नम' इति ॥५८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे अष्टादशोऽध्यायः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकोनविंशः अध्यायः

[श्रीकृष्णस्य रजकवधः, मालाकारगृहे प्रवेशश्च]

पराशर उवाच ।

एवमन्तर्जले विष्णुमभिष्टूय स यादवः ।
अर्च्चयामास सर्व्वेशं पुष्पैर्धूपैर्मनोरमैः ॥१॥

परित्यक्तान्यविषयो मनस्तत्र निवेश्य सः ।
ब्रह्मभूते चिरं स्थित्वा विरराम समाधितः ॥२॥

कृतकृत्यमिवात्मानं मन्यमानो महामतिः ।
आजगाम रथं भूयो निर्गम्य यमुनाम्भसः ॥३॥

राम-कृष्णौ च ददृशे यथापूर्व्वं रथे स्थितौ ।
विस्मिताक्षस्तदाक्रूरस्तञ्च कृष्णोऽभ्यभाषत(क) ॥४॥

नूनं ते दृष्टमाश्चर्य्यमक्रूर ! यमुनाजले ।
विस्मयोत्फुल्लनयनो भवान् संलक्ष्यते यतः ॥५॥

अक्रूर उवाच ।

अन्तर्जले यदाश्चर्य्यं दृष्टं तत्र मयाच्युत !
तदत्रापि हि पश्यामि मूर्त्तिमत् पुरतः स्थितम् ॥६॥

जगदेतन्महाश्चर्य्यं रूपं यस्य महात्मनः ।
तेनाश्चर्य्यवरेणाहं भवता कृष्ण ! सङ्गतः ॥७॥

तत् किमेतेन मथुरां व्रजामो मधुसूदन !
बिभेमि कंसाद्विग् जन्म परपिण्डोपजीविनाम् ॥८॥

इत्युक्त्वा चोदयामास तान् हयान् वातरंहसः ।
सम्प्राप्तश्चातिसायाह्ने सोऽक्रूरो मथुरां पुरीम् ॥९॥

विलोक्य मथुरां कृष्णं रामश्चाह स यादवः ।
पद्भ्यां यातं महावीर्य्यौ रथेनैको विशाम्यहम् ॥१०॥

गन्तव्यं वसुदेवस्य भवद्भ्यां न तथा गृहम् ।
युवयोर्हि कृते वृद्धः स कंसेन निरस्यते(ख) ॥११॥

पराशर उवाच ।

इत्युक्त्वा प्रविवेशाथ सोऽक्रूरो मथुरां पुरीम् ।
प्रविष्टौ रामकृष्णौ च राजमार्गमुपागतौ(ग) ॥१२॥

एकोनविंशः अध्यायः ।

विस्मिते अक्षिणी यस्य तथाभूतोऽक्रूरस्तदाभवत् ॥४।५॥

तेनाश्चर्य्यवरेण भवतैवाहमन्तर्जले चात्र च सङ्गतोऽस्मि । अतो जल एव विशेषेणाश्चर्य्यं किं पृच्छसीत्यर्थः ॥७॥

रथे स्थितं मां जले त्वं दृष्टवानिति मोहयन्तमिवाह—'तत् किमेतेने'ति । परमेश्वरे साक्षाद्दृष्टेऽपि विलम्बे सति कंसः कुप्येदिति कंसाद् बिभेमि, अतः परपिण्डम् अन्यैर्दत्तमन्नं ये उपजीवन्ति तेषां जन्म धिक् ॥८॥

(क) ददृश इत्यत्रात्मनेपदमार्षम् ।

वातस्येव रंहो वेगो येषां तान् ॥९॥

कृष्णमायामोहितः सन् कंसभयादिव तौ शिक्षयन्नाह—पद्भ्यां युवां यातं गच्छतम् ॥१०॥

यतो युवयोः कृते युष्मन्निमित्तं निरस्यते आक्षिप्यते ॥११॥ १२।१३॥

(ख) स वृद्धः वसुदेवः निरस्यते आक्षिप्यते भर्त्सयते पीड्यते वेत्यर्थः ।

(ग) राजमार्गं राजपथम् उपागतौ उपाश्रितौ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सीमन्तिनीभिश्च सानन्दं लोचनैरभिवीक्षितौ ।
जग्मतुर्लीलया वीरौ दृप्तौ बालगजाविव ॥१३॥

भ्रममाणौ तु तौ दृष्ट्वा रजकं रङ्गकारकम् ।
अयाचेतां सुरूपाणि वासांसि रुचिराननौ(घ) ॥१४॥

ततस्य रजकः सोऽथ प्रसादारूढविस्मयः ।
कृष्णाक्षेपवाक्यानि प्राहोच्चै राम-केशवौ (ङ) ॥१५॥

तलप्रहारेण कृष्णस्तस्य दुरात्मनः ।
पातयामास कोपेन रजकस्य शिरो भुवि(च) ॥१६॥

हृत्वादाय च वस्त्राणि पीतनीलाम्बरौ ततः ।
कृष्ण-रामौ मुदा युक्तौ मालाकारगृहं गतौ ॥१७॥

विकाशिनेत्रयुगलौ मालाकारोऽतिविस्मितः ।
एतौ कस्य कुतो वैतौ मैत्रेयाचिन्तयत् तदा ॥१८॥

पीतनीलाम्बरधरौ तौ दृष्ट्वातिमनोहरौ ।
स तर्कयामास तदा भुवं देवावुपागतौ ॥१९॥

विकाशिमुखपद्माभ्यां ताभ्यां पुष्पाणि याचितः ।
भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीम्(छ)॥२०

प्रसादपरमौ नाथौ मम गेहमुपागतौ ।
धन्योऽहमर्च्चयिष्यामीत्याह तौ माल्यजीवकः(ज)॥२१

ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः ।
चारूण्येतान्यथैतानि प्रददौ स विलोभयन् ॥२२॥

पुनः पुनः प्रणम्यासौ मालाकारो नरोत्तमौ ।
ददौ पुष्पाणि चारूणि गन्धवन्त्यमलानि च ॥२३॥

मालाकाराय कृष्णोऽपि प्रसन्नः प्रददौ वरान् ।
श्रीस्त्वां मत्संश्रया भद्र ! न कदाचित् प्रहास्यति॥२४

बलहानिर्न ते सौम्य ! धनहानिस्तथैव च ।
यावद्दिनानि तावच्च न नशिष्यति सन्ततिः(झ) ॥२५॥

भुक्त्वा च विपुलान् भोगांस्तमन्ते मत्प्रसादजम् ।
ममानुस्मरणं प्राप्य दिव्यं लोकमवाप्स्यसि ॥२६॥

रजको वस्त्राणां निर्णेजकः। स एव तानि धातुभी रञ्जयन् रङ्गकारः तम् ॥१४॥

प्रसादारूढविस्मयः राज्ञः प्रसादेन गर्वमारूढः ॥१५।१६। १७।१८।१९।२०॥

प्रसादपरमौ अनुग्रहपरौ ॥२१॥

कामतस्तदिच्छातः पुष्पाणि दत्त्वा पुनश्चैतानि चारूणि अथैतानि ततोऽपि चारूणीति प्रलोभयन् अनुरागं जनयत् ददौ ॥२२।२३॥

(घ) भ्रममाणावित्यत्र भ्रमेः परस्मैपदिनः शानच्प्रत्यय रङ्गः रञ्जनं धात्वादिभिः वस्त्राणामिति शेषः, तस्य कारकः जनकः तम् ।

(ङ) आक्षेपवाक्यानि अधिक्षेपवचनानि ।

(च) तलप्रहारेण करतलाघातेन चपेटाघातेनेत्यर्थः ।

(छ) हस्ताभ्यां भुवं भूमिं विष्टभ्य संश्रित्य भूमिन्यस्तहस्तद्वयोपरि पूर्वशरीरभारं न्यस्येत्यर्थः ।

(ज) माल्येन जीवति यः स माल्यजीवकः मालाजीवी मालाकार इत्यर्थः ।

(झ) नशिष्यतीत्यत्र इट्प्रयोग आर्षः । यावत् यावत्कालपर्य्यन्तं दिनानि सूर्य्यावच्छिन्नाः कालाः, तावत् तत्कालपर्य्यन्तं, यावत् सूर्य्यः गगने सञ्चरिष्यति तावदित्यर्थः । सन्ततिः वंशः त्वदीया वंशधारा तावदेव स्थास्यतीति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्म्मे मनश्च ते भद्र ! सर्व्वकालं भविष्यति ।
युष्मत्सन्ततिजातानां दीर्घमायुर्भविष्यति ॥२७॥
नोपसर्गादिकं दोषं युष्मत्सन्ततिसम्भवः ।
सम्प्राप्स्यति महाभाग ! यावत् सूर्य्यो धरिष्यति(ञ) ॥२८॥

पराशर उवाच ।

इत्युक्त्वा तद्गृहात् कृष्णो बलदेवसहायवान् ।
निर्ज्जगाम मुनिश्रेष्ठ ! मालाकारेण पूजितः ॥२९॥

इति श्रीविष्णुपुराणे पञ्चमांशे एकोनविंशः अध्यायः ॥

मत्संश्रया मम वक्षसि स्थिता श्रीस्त्वां न त्यक्ष्यति सर्व-सम्पत्प्रदैरनुग्रहकटाक्षैस्त्वामवलोकयिष्यतीत्यर्थः ॥२४।२५।२६।२७॥

यावत् सूर्य्यो धरिष्यति स्थास्यति ॥२८।२९॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे एकोनविंशोऽध्यायः

(ञ) युस्माकं सन्ततौ वंशे सम्भवः उत्पत्तिर्यस्य सः, रजक-वंशीयः कश्चिदपीत्यर्थः । अवस्थानार्थकस्य धृङ आत्मनेपदित्वात् धरिष्यतीत्यत्र परस्मैपदमार्षम् ।

विंशः अध्यायः

[श्रीकृष्णस्य कुब्जानुग्रहः, धनुःशालाप्रवेशः, कंसवधश्च ।]

पराशर उवाच ।

राजमार्गे ततः कृष्णः सानुलेपनभाजनाम् ।
ददर्श कुब्जामायान्तीं नवयौवनगोचराम् ॥१॥
तामाह ललितं कृष्णः कस्येदमनुलेपनम् ।
भवत्या नीयते सत्यं वदेन्दीवरलोचने ॥२॥

सकामेनेव सा प्रोक्ता सानुरागा हरिं प्रति ।
प्राह सा ललितं कुब्जा तद्दर्शनबलात्कृता(क) ॥३॥
कान्त ! कस्मान्न जानासि कंसेनाभिनियोजिताम् ।
नैकवक्रेति विख्यातामनुलेपनकर्म्मणि ॥४॥

विंशः अध्यायः

अनुलेपनभाजनसहितां कुब्जाम् ॥१।२॥
तस्य दर्शनेन बलात्कृता आकृष्टचित्ता सती प्राह ॥३॥

अनुलेपनकर्मणि गन्धवस्तूनां साधने कंसेन निक्षिप्तां नैकवक्रा त्रिवक्रेत्यर्थः ॥४॥

(क) सकामेन कामयुक्तेन जनेन इव तेन श्रीकृष्णेन प्रोक्ता । इवार्थसादृश्यस्यात्र सकामभिन्नत्वे सति सकामगतभूयोधर्मवत्त्वार्थकत्वात् भगवतः श्रीकृष्णस्य कुब्जां प्रति याथार्थ्येन कामाभावो ज्ञेयः । सानुरागेति हरेस्तां प्रति यथार्थं कामं सम्भावयति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गान्धपिष्टं हि कंसस्य प्रीतये ह्यनुलेपनम् ।
भवाम्यहमतीवास्य प्रसादधनभाजनम् ॥५॥

श्रीकृष्ण उवाच ।

युक्तमेतद् राजार्हं रुचिरं रुचिरानने !
आवयोर्गात्रसदृशं दीयतामनुलेपनम् ॥६॥

पराशर उवाच ।

इत्येतदाह सा कुब्जा गृह्यतामिति सादरम् ।
अनुलेपञ्च प्रददौ गात्रयोग्यमथोभयोः ॥७॥

भक्तिच्छेदानुलिप्ताङ्गौ ततस्तौ पुरुषर्षभौ ।
शक्रचापौ विराजेतां सितकृष्णाविवाम्बुदौ ॥८॥

ततस्तां चिबुके शौरिरुल्लापनविधानवित् ।
उत्पाट्य तोलयामास द्व्यङ्गुलेनाग्रपाणिना (१) ॥९

चकर्ष पद्भ्याञ्च तदा ऋजुत्वं केशवोऽनयत् ।
ततः सा ऋजुतां प्राप्ता योषितामभवद् वरा ॥१०॥

विलासललितं प्राह प्रेमगर्भभरालसम् ।
वस्त्रे प्रगृह्य गोविन्दं व्रज गेहं ममेति वै ॥११॥

आयास्ये भवतीगेहमिति तां प्रहसन् हरिः (ख) ।
विससर्ज्ज जहासोच्चै रामस्यालोक्य चाननम् ॥१२

भक्तिच्छेदानुलिप्ताङ्गौ नीलपीताम्बरौ च तौ ।
धनुःशालां ततो यातौ चित्रमाल्योपशोभितौ ॥१३॥

आयोगञ्च धनूरत्नं ताभ्यां पृष्टैश्च रक्षिभिः ।
आख्याते सहसा कृष्णो गृहीत्वापूरयद्धनुः ॥१४॥

ततः पूरयता तेन भज्यमानं बलाद्धनुः ।
चकार सुमहाशब्दं मथुरा येन पूरिता ॥१५॥

अनुयुक्तौ ततस्तौ तु भग्ने धनुषि रक्षिभिः ।
रक्षिसैन्यं निहत्योभौ निष्क्रान्तौ कार्मुकालयात् ॥१६

अन्येन पिष्टं गन्धवस्तुयोगेन सम्मर्दितं कंसस्य प्रीतये न भवति, अतोऽहमतीवास्य कंसस्य प्रसादधनभाजनं प्रीतिजनस्य पात्रभूता ॥५॥

गात्रसदृशं वर्णानुरूपम् ॥६।७॥

कुंकुमादिवर्णकैः कपोलवक्षस्थलभुजादिषु पत्रभङ्गिरचना भक्तिच्छेदः । भक्तिच्छेदविधिनानुलिप्ताङ्गौ, अत एव चित्रमाल्यानुलेपनेन स्वाङ्गकान्त्या च तयोरिन्द्रचापसहितसितकृष्णाम्बुदसादृश्यम् ॥८॥

अनुलेपनार्पणफलं सद्य एव दर्शितवानित्याह—'तत' इति सार्द्धेन । उल्लापनमृजूकरणं, पाठान्तरे उल्लापनमरोगीकरणं, तत्प्रकारज्ञः शौरिः मध्यमातर्जनीरूपद्वयङ्गुलोपलक्षितेनाग्रपाणिना पाण्यग्रेण चिबुके मुखस्याधस्तात् उत्पाट्य ऊर्द्धं कृत्य तोलयामास उच्चालितवान् ॥९॥

तदनन्तरं च पादयोस्ताभ्यां चकर्ष आक्रान्तवान्, एवं ऋजुमनयत् ॥१०॥

विलासेन कटाक्षनिरीक्षणादिना ललितं यथा भवत्येवं प्राह । लालित्यमेवाह—प्रेमगर्भभरालसं प्रेमातिशयेन मन्थरं यथा भवत्येवम् ॥११॥

कंसं हत्वा बन्धूनां सौख्यं विधाय भवत्या गेहमायास्य इति तां प्रस्थापितवान् । असमय एव स्त्रीणां कामातुरत्वं दृष्ट्वैव जहास च ॥१२।१३॥

आयोगम् आभिमुख्येन प्राप्तयोगं पूजायामुद्देश्यं, पाठान्तरे आजोज्यं समन्तात् योज्यं बहुभिर्योज्यमित्यर्थः । धनूरत्नं श्रेष्ठं धनुः कास्तीति पृष्टैः रक्षिभिस्तस्मिन्नाख्याते सति ॥१४।१५

(ख) आयास्ये इत्यत्र याधातोः परस्मैपदिन आत्मनेपदप्रयोग आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अक्रूरागमवृत्तान्तमुपलभ्य तथा धनुः ।
भग्नं श्रुत्वाथ कंसोऽपि प्राह चाणूर-मुष्टिकौ ॥१७॥

कंस उवाच ।

गोपालदारकौ प्राप्तौ भवद्भ्यां तौ ममाग्रतः ।
मल्लयुद्धेन हन्तव्यौ मम प्राणहरौ हि तौ(ग) ॥१८॥
नियुद्धे तद्विनाशेन भवद्भ्यां तोषितो ह्यहम् ।
दास्याम्यभिमतान् कामान् नान्यथैतन्महाबलौ ॥१९॥
न्यायतोऽन्यायतो वापि भवद्भ्यां तौ ममाहितौ ।
हन्तव्यौ तद्वधाद् राज्यं सामान्यं नो भविष्यति(घ)।२०
इत्याज्ञाप्य स तौ मल्लौ तत आहूय हस्तिपम् ।
प्रोवाचोच्चैस्त्वया मेऽद्य समाजद्वारि कुञ्जरः (ङ)॥२१
स्थाप्यः कुवलयापीड़स्तेन तौ गोपदारकौ ।
घातनीयौ नियुद्धाय रङ्गद्वारमुपागतौ ॥२२॥
तमथाज्ञाप्य दृष्ट्वा च मञ्चान् सर्व्वानुपाकृतान् ।
आसन्नमरणः कंसः सूर्य्योदयमुदैक्षत(च) ॥२३॥

ततः समस्तमञ्चेषु नागरः स तदा जनः ।
राजमञ्चेषु चारूढाः सहामात्यैर्म्महीभृतः ॥२४॥
मल्लप्राश्निकवर्गश्च रङ्गमध्यसमीपतः ।
कृतः कंसेन कंसोऽपि तुङ्गमञ्चे व्यवस्थितः ॥२५॥
अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः ।
अन्ये च वारमुख्यानामन्ये नागरयोषिताम् ॥२६॥
नन्दगोपादयो गोपा मञ्चेष्वन्येष्ववस्थिताः ।
अक्रूर-वसुदेवौ च मञ्चप्रान्ते व्यवस्थितौ ॥२७॥
नागरीयोषितां मध्ये देवकी पुत्रगृद्धिनी ।
अन्तकालेऽपि पुत्रस्य द्रक्ष्यामि रुचिरं मुखम्(छ) ॥२८
वाद्यमानेषु तूर्य्येषु चानूरे चापि वल्गति ।
हाहाकारपरे लोके ह्यास्फोटयति मुष्टिके* ॥२९॥
हत्वा कुवलयापीड़ं हस्त्यारोहप्रणोदितम् (ज)।
मदासृगनुलिप्ताङ्गौ गजदन्तवरायुधौ ॥३०॥

अनुयुक्तौ आक्षिप्तौ अवरुद्धाविति वा ॥१६।१७।१८।१९॥

(ग) गोपालदारकौ गोपबालकौ। प्राणहरौ प्राणहरणयोग्यौ दैववाण्यादिभिः तथात्वेन विज्ञातावित्यर्थः।

(घ) तद्वधात् तयोर्हननाद्धेतोः राज्यं ममेदं मथुराधिपत्यं नः अस्माकं सामान्यं समानं भविष्यति, इदं राज्यं यथा मम तथा युवयोरपि भविष्यतीति भावः।

(ङ) हस्तिपं हस्तिपकं हस्तिनः महामात्रमित्यर्थः। समाजद्वारि समाद्वारे स्थाप्य इत्युत्तरेणान्वयः।

(च) सूर्य्योदयमुदैक्षतेति,—एतच्च तस्यासन्नमरणस्य कंसस्यामङ्गलसूचनार्थमुक्तम्, 'नोच्चैतोद्यन्तमादित्य' मित्यादिशास्त्रैः उद्यत्सूर्यदर्शनस्य निषेधात्।

न्यायतः मल्लशास्त्रोक्तमार्गेण, अन्यायतः तदतिक्रमेण वा। सामान्यं समानम् ॥२०।२१।२२॥

उपाकृतान् उपकल्पितान् ॥२३।२४॥

मल्लप्राश्निकाः मल्लयुद्धेषु युक्तायुक्तपरीक्षकास्तेषां वर्गः समूहः ॥२५।२६।२७।२८॥

पुत्रगृद्धिनी पुत्रक्षेमाभिकांक्षिणी पुत्रस्य मुखं द्रक्ष्यामीति स्थिता ॥२९॥

(छ) नागरीयोषितामित्यत्र कर्मधारयसमासे नागरीशब्दस्य पुंवद्भावे प्राप्ते तदभावेन प्रयोग आर्षः।

(ज) हस्त्यारोहेण हस्त्यारूढमहामात्रेण प्रणोदितम् अग्रतः प्रेरितम् रामकृष्णवधार्थमिति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मृगमध्ये यथा सिंहौ गर्व्वलीलाविलोकितौ ।
प्रविष्टौ सुमहारङ्गं बलभद्र-जनार्द्दनौ ॥३१॥

हाहाकारो महान् जज्ञे सर्व्वमञ्चेष्वनन्तरम् ।
कृष्णोऽयं बलभद्रोऽयमिति लोकस्य विस्मयः ॥३२॥

घोरा यं येन हता घोरा पूतना सा निशाचरी ।
क्षिप्तश्च शकटं येन भग्नौ च यमलार्ज्जुनौ ॥३३॥

घोरं यः कालियं नागं ननर्त्तारुह्य बालकः ।
धृतो गोवर्द्धनो येन सप्तरात्रं महागिरिः ॥३४॥

घातितो धेनुकः केशी लीलयैव महात्मना ।
हिंसिता येन दुर्वृत्ता दृश्यतां सोऽयमच्युतः ॥३५॥

पश्चात्यस्य महाबाहुर्बलभद्रोऽग्रजोऽग्रतः ।
घातति लीलया योषिन्मनोनयननन्दनः(झ) ॥३६॥

यं स कथ्यते प्राज्ञैः पुराणार्थाविलोकिभिः ।
पालो यादवं वंशं मग्नमभ्युद्धरिष्यति ॥३७॥

यं स सर्व्वभूतस्य विष्णोरखिलजन्मनः ।
अवतीर्णो महीमंशो नूनं भारहरो भुवः ॥३८॥

इत्येवं वर्णिते पौरै रामे कृष्णे च तत्क्षणात् ।
उरस्तताप देवक्याः स्नेहस्नुतपयोधरम्(ञ) ॥३९॥

महोत्सवमिवासाद्य पुत्राननविलोकनम् ।
युवेव वसुदेवोऽभूद् विहायाभ्यागतां जराम् ॥४०॥

विस्तारिताक्षियुगलो राजान्तःपुरयोषिताम् ।
नागरस्त्रीसमूहश्च द्रष्टुं न विरराम तम्(ट) ॥४१॥

सख्यः पश्यत कृष्णस्य मुखमत्यरुणेक्षणम् ।
गजयुद्धकृतायास-स्वेदाम्बुकणिकाचितम् ॥४२॥

विकाशि-शरदम्भोजमवश्यायजलोक्षितम् ।
परिभूय स्थितं जन्म सफलं क्रियतां दृशोः ॥४३॥

श्रीवत्साङ्कं महद्धाम बालस्यैतद् विलोक्यताम् ।
विपक्षक्षपणं वक्षो भुजयुग्मञ्च भामिनि ॥४४॥

किन्न पश्यसि दुग्धेन्दु-मृणालधवलाननम् ।
बलभद्रमिमं नील-परिधानमुपागतम् ॥४५॥

मदास्रगनुलिप्ताङ्गौ गजस्य मदरक्ताभ्यामुक्षितगात्रौ दन्तावेव वरायुधौ ययोस्तौ ॥३०।३१।३२।३३।३४।३५।

सर्वभूतस्य विष्णोरिति व्यधिकरणे षष्ठी। सर्वभूतस्य व्यापकस्य यो विष्णुर्व्यापकस्तस्य। अस्य हेतुगर्भं विशेषणम् अखिलजन्मनः सर्वकारणस्यांशो महीमवतीर्ण इति सम्बन्धः ॥३८—४०॥

राजान्तःपुरयोषितां समूह इति शेषः ॥४१॥

स्त्रीणां विस्मयोक्तिमाह—'सख्य' इत्यादि—नवभिः।

गजयुद्धकृतेनायासेन स्वेदाम्बुकणिकाभिराचितं व्याप्तम् ॥४२॥

अवश्यायजलोक्षितं हिमवार्य्यलंकृतं शरत्कालीन-मम्भोजं परिभूय स्वशोभाधिक्येन तिरस्कृत्य स्थितं मुखं पश्यत, तेन च दृशोर्जन्म सफलं क्रियताम् ॥४३॥

महद्धाम महत्या लक्ष्म्या देव्या धाम आश्रयभूतं वक्षः। विपक्षक्षपणञ्च भुजयुग्मं विलोक्यताम् ॥४४।४५॥

(झ) योषितां मनोनयनयोः चित्तस्य लोचनस्य च नन्दनः उत्फुल्लतासम्पादक इत्यर्थः।

(ञ) स्नेहेन स्नुतौ क्षीरक्षरणकारिणौ पयोधरौ स्तनौ यत्र तथाभूतम् उरः वक्षः ततापान्तर्गतस्य उष्णक्षीरस्य प्रस्नुतस्य सम्बन्धादिति भावः।

(ट) विस्तारितं आग्रहातिशयेन विस्फारितं अक्षियुगलं नेत्रद्वयं येन तथाभूतः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वल्गता मुष्टिकेनेतच्चाणूरेण तथा सखि !
क्रियते बलभद्रस्य हास्यमीषद्विलोक्यताम् ॥४६॥

सख्यः ! पश्यत चाणूरो नियुद्धार्थमयं हरिम् ।
समुपैति न सन्त्यत्र किं वृद्धा युक्तकारिणः ॥४७॥

क्व यौवनोन्मुखीभूत-सुकुमारतनुर्हरिः ।
क्व वज्रकठिनाभोगि-शरीरोऽयं महासुरः ॥४८॥

इमौ सुललितौ रङ्गे वर्त्तेते नवयौवनौ ।
दैतेयमल्लाश्चाणूर-प्रमुखास्त्वतिदारुणाः ॥४९॥

नियुद्ध-प्राश्निकानान्तु महानेष व्यतिक्रमः ।
यद् बालबलिनोर्युद्धं मध्यस्थैः समुपेक्ष्यते ॥५०॥

पराशर उवाच ।

इत्थं पुरस्त्रीलोकस्य वदतश्चालयन् भुवम् ।
ववल्ग बद्धकक्षोऽन्तर्जनस्य भगवान् हरिः ॥५१॥

बलभद्रोऽपि चास्फोट्य ववल्ग ललितं यदा ।
पदे पदे तदा भूमिर्यन्न शीर्णा तदद्भुतम् ॥५२॥

चाणूरेण तदा कृष्णो युयुधेऽमितविक्रमः ।
नियुद्धकुशलो दैत्यो बलभद्रेण मुष्टिकः ॥५३॥

सन्निपातावधूतैस्तु चाणूरेण समं हरिः ।
क्षेपणैर्मुष्टिभिश्चैव कीलवज्रनिपातनैः ॥५४॥

जानुभिश्चाश्मनिर्घातैस्तथा बाहुविघट्टितैः ।
पादोद्धूतैः प्रसृष्टैश्च तयोर्युद्धमभून्महत् ॥५५॥

अशस्त्रमतिघोरं तत् तयोर्युद्धं सुदारुणम् ।
बलप्राणविनिष्पाद्यं समाजोत्सवसन्निधौ ॥५६॥

यावद् यावच्च चाणूरो युयुधे हरिणा सह ।
प्राणहानिमवापाग्र्यां तावत्तावल्लवाल्लवम् ॥५७॥

कृष्णोऽपि युयुधे तेन लीलयैव जगन्मयः ।
खेदाचालयता कोपान्निजशेखरकेशरम् ॥५८॥

बलक्षयं विवृद्धिञ्च दृष्ट्वा चाणूरकृष्णयोः ।
वारयामास तूर्य्याणि कंसः कोपपरायणः ॥५९॥

वल्गता प्रनृत्यता ॥४६।४७॥

वज्रवत् कठिनमाभोगि विशालं शरीरं यस्य सः ॥४८।४९॥

समुपेक्ष्यते न निवार्य्यते ॥५०॥

(ठ) युक्तं उचितं कर्त्तुं शीलं येषां ते युक्तकारिणः, यदि ते अत्र स्युः, तदा नूनं बालं कृष्णं प्रति महासुरस्य चाणूरस्य नियुद्धार्थमागमनं प्रतिरुन्ध्युः ; अतः केनापि तदकरणात् युक्तकारिणमेवात्रासद्भावः सम्भाव्यते ।

(ड) यौवनोन्मुखीभूता यौवनावस्थोन्मुखी न तु सम्यक् प्राप्तयौवना असञ्जात प्रकृष्टशरीरपुष्टिरिति भाव सुकुमारतनुर्यस्य

बद्धकक्षः दृढीकृतपरिकरः सन् जनस्यान्तः रङ्गमध्ये ववल्ग ननर्त्त ॥५१।५२।५३॥

सन्निपातैः परस्परसंश्लेषैः अवधूतैरर्वाक्पातनैः क्षेपणैः दृढम् आकृष्य निरसनैः । मुष्टिभिर्मुष्टिप्रपातैः कीलनिपातनैः । कूर्परेण घातैः, वज्रनिपातनैः अरनिद्वयेन घातैः कीलवज्रनिपातिभिरिति पाठे कीलवत् वज्रवच्च निपातौ येषां तैः स्त इति मुष्टिविशेषणम् । पादोद्भूतैः पद्भ्यामुत्क्षेपणैः प्रसृष्टैः सर्वावयवसंश्लेषेण पिण्डीकरणैः ॥५४—५६॥

बलेन शौर्य्येण प्राणेन च देहशक्त्या विनिष्पाद्यम् ॥५७॥

प्राणहानिं बलक्षम् अग्र्याम् आद्यां प्रागदृष्टामित्यर्थः ।

लवाल्लवं किञ्चित् किञ्चित् ॥५८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुन्दुभ्यादिषु तूर्य्येषु प्रतिषिद्धेषु तत्क्षणात् ।
हे राजन्नात्यवाद्यन्त देवतूर्य्याण्यनेकशः ॥५९॥

अथ गोविन्द ! चाणूरं जहि केशव ! दानवम् ।
दूरस्थार्द्धनगा देवास्तदोचुरतिहर्षिताः ॥६०॥

चाणूरेण चिरं कालं क्रीड़ित्वा मधुसूदनः ।
सूपाट्य भ्रामयामास तद्वधाय कृतोद्यमः(ढ) ॥६१॥

भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् ।
भुवावास्फोटयामास गगने गतजीवितम्(ण) ॥६२॥

भुवावास्फोटितस्तेन चाणूरः शतधाव्रजत् ।
तत्स्राव-महापङ्कां चकार स तदा भुवम्(त) ॥६७॥

स्वदेवोऽपि तत्कालं मुष्टिकेन महाबलः ।
युयुधे दैत्यमल्लेन चाणूरेण यथा हरिः ॥६४॥

तोष्येनं मुष्टिना मूर्द्ध्नि वक्षस्याहत्य जानुना ।
पातयित्वा धरापृष्ठे निष्पिपेष गतायुषम्(थ) ॥६५॥

कृष्णस्तोषलकं भूयो मल्लराजं महाबलम् ।
वाममुष्टिप्रहारेण पातयामास भूतले ॥६६॥

चाणूरे निहते मल्ले मुष्टिके विनिपातिते ।
नीते क्षयं तोषलके सर्व्वे मल्लाः प्रदुद्रुवुः(द) ॥६७॥

ववल्गतुस्तदा रङ्गे कृष्णसङ्कर्षणावुभौ ।
समानवयसो गोपान् बलादाकृष्य हर्षितौ ॥६८॥

कंसोऽपि कोपरक्ताक्षः प्राहोच्चैर्व्यापृतान् नरान् ।
गोपावेतौ समाजौघान्निष्काश्येतां बलादितः ॥६९॥

नन्दोऽपि गृह्यतां पापो निगड़ैरायसैरिह ।
अवृद्धार्हेण दण्डेन वसुदेवोऽपि वध्यताम् (ध) ॥७०॥

वल्गन्ति गोपाः कृष्णेन ये चेमे सहिताः पुरः ।
गावो ह्रियन्तामेतेषां यच्चास्ति वसु किञ्चन ॥७१॥

एवमाज्ञापयानञ्च प्रहस्य मधुसूदनः(न) ।
उत्पत्यारुह्य तं मञ्चं कंसं जग्राह वेगतः ॥७२॥

खेदात् कोपाच्च निजशेखरे स्वशिरोभूषणे स्थितं भ्रंशचालयता वारं वारं धुन्वता तेन चाणूरेण ॥५९।६०।६१

शतगुणं शतवारम् ॥६२।६३॥
तत्कालं तस्मिन्नेव काले ॥६४।६५।६६।६७॥
ववल्गतुः नृत्यञ्चक्रतुः ॥६८॥
व्यापृतान् सर्वतः स्थितान् समाजौघात् समाजस्थानात् लोकानां समूहात् ॥६९।७०॥

(ढ) चिरं कालं सुदीर्घं कालं व्याप्य क्रीड़ित्वा क्रीड़ासाम्येन मायायुद्धं कृत्वा। एतेन कृष्णः सत्यामिच्छायां प्रारम्भ एव चाणूरं हन्तुमशक्नुवत्, किन्तु केवलं दर्शकजनानां प्रीत्यादिजनकत्वार्थमेव तावन्तं कालमसौ चाणूरेण सह युद्धलीलां निर्वर्त्तयामासेति व्यज्यते। तद्वधाय तस्य चाणूरस्य मारणाय।

(ण) अमित्रजित् शत्रुजित्; गगने आकाशे शतवारम् ऊर्द्ध्वं यावत्कालपर्य्यन्तमेवेति शेषः, गतं जीवितं प्राणा यस्य तं दैत्यमल्लं चाणूरम्। भूमौ आस्फोटयामास उत्पात्य सवेगं पातयामास।

(त) रक्तस्रावेण चाणूरशरीरशोणितप्रवाहेण महान् पङ्कः कर्दमः तथाभूताम्।

(थ) गतायुषं गतजीवितम्।

(द) प्रदुद्रुवुः धावन्तः पलायामासुः भयेनेति शेषः।

(ध) आयसैः लोहमयैः निगड़ैः शृङ्खलैः, अवृद्धार्हेण अवृद्धजनोचितेन दण्डेन युवजनोचितकठोरदण्डेनेत्यर्थः। अवृद्धार्हेण इति दण्डविशेषणात् वसुदेवे वृद्ध इति कृत्वा दण्डस्य किमपि लाघवं न करणीयमिति कंसाभिप्रायः सूच्यते। वध्यतां निरुध्यताम्।

(न) आज्ञापयमानमिति वक्तव्ये आज्ञापयानमित्यार्षः प्रयोगः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केशेष्वाकृष्य विगलत्किरीटमवनीतले ।
कंसं स पातयामास तस्योपरि पपात च ॥७३॥

निःशेष-जगदाधार-गुरुणा पततोपरि ।
कृष्णेन त्याजितः प्राणानुग्रसेनात्मजो नृपः(प) ॥७४॥

मृतस्य केशेषु तदा गृहीत्वा मधुसूदनः ।
चकर्ष देहं कंसस्य रङ्गमध्ये महाबलः ॥७५॥

गौरवेणातिमहता परिखा तेन कृष्यता ।
कृता कंसस्य देहेन वेगेनेव महाम्भसः(फ) ॥७६॥

कंसे गृहीते कृष्णेन तद्भ्राताभ्यागतो रुषा ।
सुमाली बलभद्रेण लीलयैव निपातितः ॥७७॥

ततो हाहाकृतं सर्व्वमासीत् तद्रङ्गमण्डलम् ।
अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम् ॥७८॥

कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरः ।
देवक्याश्च महाबाहुर्बलभद्रसहायवान्(ब) ॥७९॥

उत्थाप्य वसुदेवस्तं देवकी च जनार्द्दनम् ।
स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थितौ ॥८०॥

वसुदेव उवाच ।

प्रसीद सीदतां नाथ ! देवानां वरदः प्रभो !
तथावयोः प्रसादेन कृतोद्धारश्च केशव ॥८१॥

आराधितो यद्भगवानवतीर्णो गृहे मम ।
दुर्व्वृत्तनिधनार्थाय तेन नः पावितं कुलम् ॥८२॥

त्वमन्तः सर्व्वभूतानां सर्व्वभूतेष्ववस्थितः ।
प्रवर्त्तते समस्तात्मन् ! त्वत्तो भूतभविष्यती ॥८३॥

यज्ञैस्त्वमिज्यसे नित्यं सर्व्वदेवमयाच्युत !
त्वमेव यज्ञो यष्टा च यज्ञानां परमेश्वरः ॥८४॥

वसु धनम् ॥६१७३॥

निःशेषस्य जगत आधारेण अभिव्याप्य धारणेन गुरुणा ॥७४॥

मृतस्य देहस्याप्याकर्षणं पित्रोः परितोषार्थम् ॥७५॥

कृष्यता आकृष्यमाणेन तेन देहेन परिखा कृता ॥७६।७७।७८।७९॥

स्मृतजन्मोक्तवचनाविति—'स्तुतोऽहं यत् त्वया पूर्वं पुत्रार्थिन्या तदद्य ते। सफलं देवि ! संजातं जातोऽहं यत्तवोदरा'दिति भगवता जन्मसमये यदुक्तं वचनं तत् स्मृतं याभ्यां तौ ॥८०॥

हे केशव ! सीदतां प्राणिनां प्रसीद। यथा देवानाञ्च वरो भूभारहरणलक्षणो दत्तः, तथावयोश्च प्रसादेन पुत्रत्वेनोत्पत्त्या कृतोद्धारोऽसि, कृत उद्धारः संसारस्य उद्धरणं येन तथाभूतोऽसि। पाठान्तरे—आवयोर्यः प्रसादः कृतः पुत्रो भविष्यामीत्येवं प्रतिज्ञालक्षणः, स च कृतोद्धारः कृताविष्कारः स्फुटीकृत इति यावत्, एवमन्येषामपि सीदतां प्रसन्नो भवेत्यर्थः ॥८१॥

किञ्च यदुशापाभिभूतं चास्मत्कुलं पवित्रीकृतमित्याह—'आराधित'। इति न चैतावता त्वं मत्पुत्रः परमेश्वरत्वादित्याशयेनाह—'त्वमन्त'रिति द्वाभ्याम्। किञ्च मदाराधनं निमित्तीकृत्य दुर्व्वृत्तानां निधनाय त्वं मद्गृहेऽवतीर्णोऽसि ॥८२।८३।८४॥

(प) आधारेण अभिव्याप्य धारणेनेति श्रीधरः।—अत्र आपूर्वस्य धरतेर्भावे घञ् प्रत्ययः। आध्रियन्ते अस्मिन्नित्यधिकरणार्थे घञ् प्रत्यये तु जगदाधारश्चासौ गुरुश्चेति कर्मधारयः, जगत आधारः अत एव गुरुः तेनेत्यर्थः।

(फ) कृष्यमाणेनेति वक्तव्ये कृष्यतेत्यार्षप्रयोगः। गौरवेण हेतुना अतिमहता अतिमात्रगौरवशालिना देहेन।

(ब) बलभद्रसहायवान् बलरामेण सहितः, कृष्णवत् बलरामोऽपि तयोः पादौ जग्राह इति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सापह्नवं मम मनो यदेतत् त्वयि जायते ।
देवक्याश्चात्मजप्रीत्या तदत्यन्तविड़म्बना ॥८५॥

क कर्त्ता सर्व्वभूतानामनादिनिधनो भवान् ।
क्व मे मनुष्यकस्यैषा जिह्वा पुत्रेति वक्ष्यति ॥८६॥

जगदेतज्जगन्नाथ ! सम्भूतमखिलं यतः ।
कथा युक्तया विना मायां सोऽस्मत्तः सम्भविष्यति(भ)
॥८७॥

यस्मिन् प्रतिष्ठितं सर्व्वं जगत् स्थावरजङ्गमम् ।
स कोष्ठोत्सङ्गशयनो मानुषाज्जायते कथम् ॥८८॥

स त्वं प्रसीद परमेश्वर ! पाहि विश्व-
मंशावतारकरणैर्न ममासि पुत्रः ।
आब्रह्मपादपमयं (१) जगदेतदीश !
त्वं नो विमोहयसि किं परमेश्वरात्मन् (२)॥८९॥

मायाविमोहितदृशा तनयो ममेति
कंसाद्भयं कृतमपास्तभयातितीव्रम् ।
नीतोऽसि गोकुलमितोऽतिभयाकुलस्य (३)
वृद्धिं गतोऽसि मम नास्ति ममत्वमीश ॥९०

कर्म्माणि रुद्र-मरुदश्वि-शतक्रतूनां
साध्यानि यानि न भवन्ति निरीक्षितानि ।
त्वं विष्णुरीश ! जगतामुपकारहेतोः
प्राप्तोऽसि नः परिगतो विगतो हि मोहः ॥९१॥

इति श्रीविष्णुपुराणे पञ्चमांशे विंशः अध्यायः ॥

यत्तेतन्मम च देवक्याश्च मनस्त्वय्यात्मज इति प्रीत्या आप्तमावभ्रान्तियुक्तं जायते तत् अपहास्यतैव ॥८५॥

एतदेव स्पष्टयति—'क कर्त्ते'ति त्रिभिः ॥८६।८७॥

कोष्ठोत्सङ्गशयनः उदरान्तर्वर्त्ती भूत्वा ॥८८॥

तदेवं परमेश्वर इति ज्ञात्वा प्रार्थयते—'स त्व'मिति। मंशावतारकरणैर्विश्वं पाहि। जगदेतत् त्वत्तो भवति ॥८९॥

त्वन्मायामोहितेन मया त्वय्येतावन्तं कालं या पुत्रबुद्धिः कृता, अधुना तु सा बुद्धिर्निवृत्तेत्याह—'मायाविमोहिते'ति। हे अपास्तभय ॥९०॥

ममत्वाभावे हेतुमाह—'कर्माणी'ति। यस्य तव कर्माणि रुद्रादीनामपि साध्यानि न भवन्ति निरीक्षितानि च प्रत्यक्षतः सर्वैर्जनैर्नापलपितुं शक्यन्ते, स त्वं साक्षात् विष्णुरेव जगतामुपकाराय नोऽस्मान् प्राप्तोऽसीति परिगतः सम्यक् ज्ञातोऽसि अति विमोहो विगतः विनष्टः ॥९१॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे विंशोऽध्यायः।

(भ) यतः यस्मात् त्वद्भूतात् कारणात् सम्भूतं समुत्पन्नम्।

पाठान्तराणि—

(८९—१) आब्रह्मापादपमिदं— ।

(८९—२) त्वत्तो विमोहयसि किं पुरुषोत्तमास्मान् ।

(९०—३) नीतोऽसि गोकुलमरातिभयाकुलेन ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकविंशः अध्यायः

[उग्रसेनस्य राज्याभिषेकः, भगवतो वासुदेवस्य विद्याध्ययनञ्च ।]

पराशर उवाच ।

तौ समुत्पन्नविज्ञानौ भगवत्कर्म्मदर्शनात् ।
देवकी-वसुदेवौ तु दृष्ट्वा मायां पुनर्हरिः ।
मोहाय यदुचक्रस्य वितनान स वैष्णवीम्(क) ॥१॥

उवाच चाम्ब ! भोस्तात ! चिरादुत्कण्ठितेन मे ।
भवन्तौ कंसभीतेन दृष्टौ सङ्कर्षणेन च(ख) ।२॥

कुर्व्वतां याति यः कालो मातापित्रोरपूजनम् ।
तत्खण्डमायुषो व्यर्थमसाधूनां हि जायते (१)(ग)॥३

गुरु-देव-द्विजातीनां मातापित्रोश्च पूजनम् ।
कुर्व्वतां सफलं जन्म देहिनां तात ! जायते ॥४॥

तत् क्षन्तव्यमिदं सर्वमतिक्रमकृतं पितः !
कंसप्रतापवीर्य्याभ्यामार्त्तयोः परवश्ययोः(घ) ॥५॥

पराशर उवाच ।

इत्युक्त्वाथ प्रणम्योभौ यदुवृद्धाननुक्रमात् ।
यथावदभिपूज्याथ चक्रतुः पौर-माननम् ॥६॥

कंसपत्न्यस्ततः कंसं परिवार्य्य हतं भुवि ।
विलेपुर्मातरश्चास्य दुःखशोकपरिप्लुताः ॥७॥

बहुप्रकारमत्यर्थं पश्चात्तापातुरो हरिः ।
ताः समाश्वासयामास स्वयमस्राविलेक्षणः(ङ) ॥८॥

एकविंशः अध्यायः

तयोर्मोहाय यदुचक्रस्य च मोहाय मायां विस्तारितवान् ॥१।२॥

(क) भगवतः ऐश्वर्य्यशालिनः स्वस्य कर्मदर्शनात् कंसवधादिरूपादद्भुतकार्य्यदर्शनात् ।

(ख) मे मया, तृतीयार्थे षष्ठीप्रयोग आर्षः । चिरात् बहुकालात् प्रभृति उत्कण्ठितेन भवद्दर्शनार्थं पर्य्याकुलेन ।

(ग) अपूजनं पूजनाभावः, स चाकृतकः, अतः अपूजनं पूजनाभावं कुर्वतामित्यर्थो न युज्यते, अत एवाह श्रीधरः 'अपूजनं पूजाविरुद्धमन्यत् कुर्वतामित्यर्थ इति । 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः' इत्यादिषु नञो विरोधार्थस्य श्रवणात् । अन्ये तु 'अ' इत्यभावार्थकं व्यस्तमव्ययपदम्, 'अभावे नञ्य नो नापी'-त्यव्ययवर्गकोषात् । तदर्थश्च कुर्वतामित्यत्रान्वेति, तेन पूजनमकुर्वतां पूजनक्रियारहितानामित्यर्थः । आयुषः जीवनकालस्य तत् खण्डम् अंशः, निरंशस्यापि महाकालस्य अंशकथनमौपाधिकभेदमधिकृत्येति ज्ञेयम् ।

(घ) अतिक्रमकृतं भवदीयपूजालङ्घनजनितम् । कंसस्य प्रतापः प्रभावः वीर्य्यं बलं ताभ्याम् आर्त्तयोः भयमूलकार्त्तिं गतयोः, तथाहि यदि पितृपुत्रभावमधिकृत्यावां तव पूजनार्यगुरुगतावभविष्याव, तदा नूनमसौ प्रतापवीर्य्यवानावाम् अहनिष्यत्, युवयोरपि महापीड़ामजनयिष्यदित्यार्त्तिहेतुः । तथा परवश्यतमपि बालयोरावयोस्तदतिक्रमहेतुरिति भावः ।

(ङ) पश्चात्तापेन कंसमारणजनितानुतापेन आतुरः आर्त्तः । अस्रेण अश्रुजलेन आविले कलुषिते ईक्षणे यस्य सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः ।
अभ्यषिञ्चत् तथैवैनं निजराज्ये हतात्मजम्(च) ॥९॥

राज्याभिषिक्तः कृष्णेन यदुसिंहः सुतस्य सः ।
चकार प्रेतकार्य्याणि ये चान्ये तत्र घातिताः(छ)॥१०

हतानां कृतमौर्द्ध्वदैहिकं चैनं सिंहासनगतं हरिः ।
उवाचाज्ञापय विभो ! यत् कार्य्यमविशङ्कितः(ज)।११

ययातिशापाद् वंशोऽयमराज्यार्होऽपि साम्प्रतम् ।
मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः(झ) ॥१२॥

पराशर उवाच ।

इत्युक्त्वा सोऽस्मरद् वायुमाजगाम स तत्क्षणात् ।
उवाच चैनं भगवान् केशवः कार्य्यमानुषः(ञ) ॥१३॥

गच्छेन्द्रं ब्रूहि वायो ! त्वमलं गर्व्वेण वासव !
दीयतामुग्रसेनाय सुधर्म्मा भवता सभा(ट) ॥१४॥

कृष्णो ब्रवीति राजार्हमेतद्बलमनुत्तमम् ।
सुधर्म्माख्या सभा युक्तमस्यां यदुभिरासितुम्(ठ)।१५॥

पराशर उवाच ।

इत्युक्तः पवनो गत्वा सर्व्वमाह शचीपतिम् ।
ददौ सोऽपि सुधर्म्माख्यां सभां वायोः पुरन्दरः(ड)१६

पौर-माननं पौराणां सम्मानम् ॥६।७।८।९।१०॥

हतानां कृतमौर्द्ध्वदैहिकं श्राद्धादि येन तम् ॥११।१२॥
कार्येण निमित्तेन मानुषः ॥१३॥

(च) हतः कृष्णेन मारितः आत्मजः पुत्रः कंसो यस्य तम् । पुरा मथुरायामुग्रसेन एव राजासीत्, कंसस्तु दुर्वृत्तः पुत्रस्तं बलात्कारेण राजसिंहासनादपसार्य्य राजा बभूव, अतस्तस्य कंसनिहतस्योग्रसेनस्यैवेदं राज्यमत आह 'निजराज्यम्' इति ।

(छ) अन्ये ये घातिताः कृष्णबलरामाभ्यां मारिताः तेषामपि प्रेतकार्य्याणि चकारेति सम्बन्धः ।

(ज) यत् कार्य्यं मयेति शेषः । आज्ञापय तदिति शेषः । अविशङ्कितः इति—अयं कंसं राजानं राज्यलिप्सया यदि हनिष्यति, तदा तेनैव हेतुना मामपि वा निहन्यात् वीर्य्याहङ्कारेण प्रजां वा न पालयेदित्यादिशङ्काशून्य इत्यर्थः ।

(झ) अराज्यार्होऽपि राजत्वस्य अयोग्योऽपि अयं वंशः यदुवंशः, देवान् आज्ञापयतु देवानामप्युपरि आधिपत्यं करोतु इत्यर्थः । नृपैः किं नृपाणां का कथा इत्यर्थः । अथवा मयि भृत्ये स्थिते अयं वंशः साम्प्रतं भवतो भृत्यरूपेण मदीय-देहावस्थायां वर्त्तमानायाम् अपि अराज्यार्हः ? अपि तु नैव इत्यर्थः । अपिरत्र प्रश्ने । अतः मदीयप्रभावादेव शापप्रभावा दूरीकृता अराज्यार्होऽपि अयं वंशः सम्प्रति मम प्रभावाद् राज्यार्ह इतीति भावः । अतः देवान् अपि आज्ञापयतु भवानिति शेषः ।

(ञ) कार्य्यमानुषः अत्र कार्य्येण निमित्तेन मानुष इति श्रीधरः ।—अयमर्थः,—कार्य्येण कंसवधादिरूपकृत्यविशेषेण निमित्तेन निमित्तभूतेन, तत्कार्य्यसाधनार्थमित्यर्थः, मानुषः मनुष्य-देहधारी । अथवा कार्य्येण करणभूतेन मानुषः न तु प्रभावेणापि मानुषः, अलौकिकशक्तिशालित्वादिति भावः ।

(ट) सुधर्मा तदाख्या सभा देवसभा 'स्यात् सुधर्मा देव-सभे'ति कोषात् ।

(ठ) अस्यां सुधर्माख्यायां सभायाम् यदुवंशीयैः राजभिः प्रकृते उग्रसेनेन यदुराजेनेत्यर्थः, आसितुं युक्तमुचितम्, अतस्तस्मै उग्रसेनाय इयं सभा दीयतामिति पूर्वेण वाक्यार्थसमाप्तिः । वायो-रेवाशुसञ्चारित्वात् सुशीघ्रमादेशनिष्पादनयोग्यत्वाद् वायुं प्रत्येव देवताद्यन्तरमपहाय प्रकृतः कृष्णादेश इति बोद्धव्यम् ।

(ड) पुरन्दर इत्यनेन पुरं दारयतीति व्युत्पत्त्या तस्य शची-पतेः पुरदारणक्षमत्वादिरूपमहाप्रभावशालित्वेऽपि गोवर्द्धन-धारणादिरूपस्य कृष्णप्रभावस्य तेन पूर्वमनुभूतत्वात् तत्स्मरणादेव कृष्णादेशेन प्रकृते तस्य पुरन्दरस्य प्रवृत्तिरिति सूच्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वायुना चाहृतां (२) दिव्यां सभां ते यदुपुङ्गवाः ।
बुभुजुः सर्व्वरत्नाढ्यां गोविन्दभुजसंश्रयात् (३)(ढ)।१७

विदिताखिलविज्ञानौ सर्व्वज्ञानमयावपि ।
शिष्याचार्य्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ(ण) ।१८॥

ततः सान्दीपनिं काश्यमवन्तीपुरवासिनम् ।
अस्त्रार्थं (४) जग्मतुर्वीरौ बलदेव-जनार्द्दनौ ॥१९॥

तस्य शिष्यत्वमभ्येत्य गुरुवृत्तपरौ हि तौ* ।
दर्शयाञ्चक्रतुर्वीरावाचारमखिले जने ॥२०॥

सरहस्यं धनुर्व्वेदं ससंग्रहमधीयताम् ।
अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद् द्विज ॥२१॥

सान्दीपनिरसम्भाव्यं तयोः कर्म्मातिमानुषम् ।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्र-दिवाकरौ ॥२२॥

अस्त्रग्राममशेषञ्च प्रोक्तमात्रमवाप्य तौ ।
ऊचतुर्न्नियतां या ते दातव्या गुरुदक्षिणा ॥२३॥

सोऽप्यतीन्द्रियमालोक्य तयोः कर्म्म महामतिः ।
अयाचत मृतं पुत्रं प्रभासे लवणार्णवे ॥२४॥

गृहीतास्त्रौ ततस्तौ तु सार्घ्यपात्रो महोदधिः ।
उवाच न मया पुत्रो हृतः सान्दीपनेरिति(ध) ॥२५॥

दैत्यः पञ्चजनो नाम शङ्खरूपः स बालकम् ।
जग्राह सोऽस्ति सलिले ममैवासुरसूदन ॥२६॥

इत्युक्तोऽन्तर्ज्जलं गत्वा हत्वा पञ्चजनं खलम् ।
कृष्णो जग्राह तस्यास्थि-प्रभवं शङ्खमुत्तमम् ॥२७॥

वक्तव्यमाह—'अलं गर्वेण'त्यादि-पादोनद्वाभ्याम् ॥१४।१५।१६।१७।१८।

(ढ) वायुना चाहृतामित्यत्र वायुनोपकृतामिति पाठे उपकृतां वहनाद्यपेक्षितक्रियासाधनेनानुकूलिताम् ।

(ण) शिष्याचार्य्यक्रमं गुरुशिष्ययोर्मिथ आचरणक्रमं ख्यापयन्तौ स्वीयव्यवहारपरम्परया प्रकाशयन्तौ बोधयन्ताविति यावत्, लोकसंग्रहार्थमिति शेषः ।

(त) अस्त्रार्थम् अस्त्रविद्याशिक्षार्थम् । वीरावित्यनेन स्वत एव तयोर्वीर्य्यवत्त्वेन वीर्य्यस्य यथाशास्त्रप्रयोगशिक्षणस्यैव तत्साफल्यसम्पादकत्वादिति भावः ।

(थ) गुरोः सान्दीपनिमुनेः यद्वृत्तं चरित्रम् आचरणमिति यावत्, अथवा गुरौ यद्वृत्तं कर्त्तव्यमाचरणं तत्परौ, तदेकान्तौ ।

(द) ससंग्रहम् अस्त्रप्रयोगविधिसहितम् । अथवा संग्रहेण संक्षेपेण स्वल्पकालग्रहणयोग्यतां नीतम् । अधीयतामित्यार्षम् । तत् चतुःषष्ट्या अहोरात्रैः समग्रस्य सरहस्यः ससंग्रह—धनुर्वेदस्य शिक्षाया निर्व्वर्त्तनरूपं कर्म, अद्भुतं आश्चर्य्यकरमभूत् जनानामिति शेषः । अन्येन तथा कर्त्तुमशक्यत्वादिति भावः ।

काश्यां वाराणस्यां जातम् ॥१९।२०॥

सरहस्यम् अस्त्रमन्त्रोपनिषत् सहितम् । संग्रहः शास्त्रप्रयोगस्तत्सहितमधीतवन्तौ ॥२१।२२॥

(ध) गृहीतम् अस्त्रं याभ्यां समुद्रस्य भयप्रदर्शनादिनिमित्तमिति शेषः । तौ बलदेवजनार्द्दनौ । सार्घ्यपात्रः अर्घ्यपात्रेण सह वर्त्तमानः, अर्घ्येण सह वर्त्तमानं पात्रं यस्य सः इति वा । एतेन तौ गृहीतास्त्रौ सन्निहितौ दृष्ट्वा भयेन महासमुद्रस्य शरीरं परिगृह्य तत्पूजनार्थमर्घ्यमादाय तयोः समीपाविर्भावौ गच्छते ।

(न) असुरसूदनेति प्राधान्येन कृष्णस्यैव सम्बोधनमिति ध्येयम् । बलदेवजनार्द्दनयोः प्रत्येकं वा पृथक् पृथक् सम्बोधनमिदम् । अनेन विशेषणेन हे कृष्ण ! हे बलदेव ! युवाभ्यां बलदेवजनार्द्दनाभ्यां तं पञ्चजनं नाम शंखासुरं हत्वा सान्दीपनिमुनेः पुत्रः समुद्धर्त्तव्य इति समुद्रस्य प्रार्थना व्यज्यते ।

(प) इति उक्तरूपं वस्तु उक्तः कृष्ण समुद्रेणेति शेषः । तस्य शंखासुरस्य अस्थिप्रभवम् अस्थिजन्यं शंखं पाञ्चजन्यं ततः प्रसिद्धम् इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्य नादेन दैत्यानां बलहानिरजायत ।
देवानां ववृधे तेजो यात्यधर्म्मश्च संक्षयम् ॥२८॥
तं पाञ्चजन्यमापूर्य्य गत्वा यमपुरीं हरिः ।
बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् ॥२९॥
तं बालं यातनासंस्थं यथापूर्व्वशरीरिणम् ।
पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वरः ॥३०॥
मथुराञ्च पुनः प्राप्तावुग्रसेनेन पालिताम् ।
प्रहृष्टपुरुषस्त्रीकावूभौ राम-जनार्द्दनौ ॥३१॥

इति श्रीविष्णुपुराणे पञ्चमांशे एकविंशः अध्यायः ॥

अतीन्द्रियम् अन्यत्रादृष्टपूर्वम् ॥२४।२६॥

यथा पूर्वशरीरिणं पूर्वं तस्य यादृशं शरीरमासीत्तादृश-शरीरयुक्तं स्वमायया निर्माय ददौ ॥३०।३१॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायमात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे एकविंशोऽध्यायः ।

(प) प्रहृष्टाः पुरुषाः स्त्रियश्च याभ्यां तौ । बहुव्रीहौ कः ।

पाठान्तराणि—
(३—१) व्यर्थम् साधूनां हि जायते ।
(१७—२) वायुनोपकृतां— ।
(१७—३) गोविन्दभुजसंश्रयाः ।
(१६—४) विद्यार्थं— ।
*'वेदाभ्यासकृतप्रीती सङ्कर्षण-जनार्द्दनौ ।
†'साङ्गांश्च चतुरो वेदान् सर्व्वशास्त्राणि चैव हि ।'

द्वाविंशोऽध्यायः

[जरासन्धस्य पराजयः ।]

पराशर उवाच ।
जरासन्धसुते कंस उपयेमे महाबलः ।
अस्ति प्राप्तिञ्च मैत्रेय ! तयोर्भर्त्तृहनं हरिम् ॥१॥
महाबलपरीवारो मगधाधिपतिर्बली ।
हन्तुमभ्याययौ कोपाज्जरासन्धः सयादवम्(क) ॥२॥
उपेत्य मथुरां सोऽथ रुरोध मगधेश्वरः ।
अक्षौहिणीभिः सैन्यस्य त्रयोविंशतिभिर्वृतः(ख) ॥३॥
निष्क्रम्याल्पपरीवारावुभौ राम-जनार्द्दनौ ।
युयुधाते समं तस्य बलिनौ बलिसैनिकैः(ग) ॥४॥

द्वाविंशः अध्यायः

अस्तिप्राप्तिसंज्ञे जरासन्धस्य सुते । तयोर्भर्त्तृहनं कंस-हन्तारम् ॥१॥
मगधाधिपतिर्जरासन्धः सयादवं यादवैः सह हरिम् ॥२॥
सैन्यस्य च त्रयोविंशत्याऽक्षौहिणीभिर्वृतः ॥३॥

(क) हन्तुमित्यस्य पूर्वश्लोकोक्तेन तयोर्भर्त्तृहन हरिमित्यनेन सम्बन्धः । तयोर्भर्त्तृहनमिति हरिविशेषणात् जामातृवधप्रयुक्त-एव प्रकृतः कोप इति प्रतीयते ।

(ख) त्रयोविंशतिभिरित्यत्र बहुवचनमार्षम्, 'विंशत्याद्याः सदैकत्वे' इत्याद्यनुशासनेन एकवचनस्यैवौचित्यात् ।

(ग) अल्पे जरासन्धपरीवारापेक्षया स्वल्पसंख्यकाः परिवारा ययोः तौ । एतच्च लौकिकदृष्ट्योक्तम् । तस्य जरासन्धस्य बलिसैनिकैः बलवद्भि बहुसैनिकैः समं सार्द्धं, समं तुल्यरूपं यथा स्यात् तथेति क्रियाविशेषणं वा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो बलश्च कृष्णश्च चक्राते मतिमुत्तमाम् ।
आयुधानां पुराणानामादाने मुनिसत्तम(घ) ॥५॥

अनन्तरं हरेः शार्ङ्गं तूणौ चाक्षयसायकौ ।
आकाशादागतौ वीर ! तथा कौमोदकी गदा(ङ) ॥६

हलञ्च बलभद्रस्य गगनादागतं कवे (१) !
मनसोऽभिमतं विप्र ! सौनन्दं मुसलं तथा ॥७॥

ततो युद्धे पराजित्य ससैन्यं मगधाधिपम् ।
पुरीं विविशतुर्वीराबुभौ राम-जनार्द्दनौ ॥८॥

जिते तस्मिन् सुदुर्वृत्ते जरासन्धे महामुने !
जीवमाने गते कृष्णस्तं नामन्यत निर्ज्जितम्(२)(च)।९

पुनरप्याजगामाथ जरासन्धो बलान्वितः ।
जितश्च राम-कृष्णाभ्यामपक्रान्तो द्विजोत्तम(छ)॥१०॥

दश चाष्टौ च संग्रामानेवमत्यन्तदुर्म्मदः ।
यदुभिर्मागधो राजा चक्रे कृष्णपुरोगमैः(ज) ॥११॥

सर्व्वेष्वेतेषु युद्धेषु यादवैः स पराजितः ।
अपक्रान्तो जरासन्धः स्वल्पसैन्यैर्बलाधिकः(झ) ॥१२

तद् बलं यादवानां तैरर्ज्जितं यदनेकशः (३) ।
तत्तु सन्निधिमाहात्म्यं विष्णोरंशस्य चक्रिणः(ञ)॥१३

मनुष्यधर्म्मशीलस्य लीला सा जगतः पतेः (४) ।
अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति(ट) ॥१४॥

मनसैव जगत्सृष्टिं संहारञ्च करोति यः ।
तस्यारिपक्षक्षपणे कोऽयमुद्यमविस्तरः (५) ॥१५॥

तथापि यो मनुष्याणां धर्म्मस्तमनुवर्त्तते ।
कुर्व्वन् बलवता सन्धिं हीनैर्युद्धं करोत्यसौ ॥१६॥

तस्य बलिभिः सैनिकैः सह ॥४।५।६।७८॥

(घ) पुराणानां वर्त्तमाननरूपावतारे अव्यवह्रियमाणानां दैवतरूप एवातीते व्यवहृतपूर्वाणामित्यर्थः ।

(ङ) अक्षया पुनः पुनः प्रयोगेऽप्यनपचिताः सायका बाणा ययोः तौ ।

(च) जीवमाने जीवति गते सति । जीव्धातोः परस्मैपदिनः शानच्प्रयोग आर्षः ।

(छ) जितः पराभूतः । अपक्रान्तः पराङ्मुखः सन् पलायितः ।

(ज) कृष्णः पुरोगमः सम्मुखगामी येषां तैः, कृष्णेन अग्रतः स्थित्वा परिचालितैः यदुभिः सहेति शेषः ।

तं निर्जितं नामन्यत पुनस्तदागमस्यावश्यम्भावित्वात् । पाठान्तरे तेनैव निर्जितमात्मानममन्यत इत्यर्थः ॥९।१३॥

ननु चक्रिणः सन्निधिमात्रमाहात्म्यं तन्न भवति स्वयमेवानेकविधास्त्रप्रयोगात्तत्राह—'मनुष्यधर्मशीलस्ये'ति ॥१४॥

(झ) स जरासन्धः । स्वल्पानि जरासन्धबलापेक्षया अल्पसंख्यानि सैन्यानि योद्धारः येषां तैः । बलैः आपेक्षिकाधिकसंख्यकसैन्यैः अधिकः अधिकस्यैन्यसम्पन्न इत्यर्थः ।

(ञ) स्वल्पबलैरपि यदुभिः कथं बलाधिकस्य जरासन्धस्य पराभव इत्याकाङ्क्षानिवर्त्तनायाह तद्बलमित्यादि ।

(ट) मुञ्चति क्षिपति स जगत्पतिः शत्रुसंहारार्थमिति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साम चोपप्रदानञ्च तथा भेदं प्रदर्शयन् ।
करोति दण्डपातञ्च क्वचिदेव पलायनम् ॥१७॥

मनुष्यदेहिनां चेष्टामित्येवमनुवर्त्ततः (६)।
लीला जगत्पतेस्तस्य च्छन्दतः सम्प्रवर्त्तते (७)(ठ)॥१८

इति श्रीविष्णुपुराणे पञ्चमांशे द्वाविंशः अध्यायः ॥

लीलात्वमेव प्रपञ्चयति—'मनसैवे'ति यावत्समाप्ति ॥१५॥

छन्दतः इच्छातः ॥१८॥

१७।१८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रमाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे द्वाविंशोऽध्यायः ॥

(ट) मनसैव बाह्योद्यमं विना मनःसंकल्पमात्रेणैव। कः-दृशः ?

(ठ) अनुवर्त्तमानस्येति वक्तव्ये अनुवर्त्तत इति प्रयोग आषः।

पाठान्तराणि—

(७—१) महत्।
(८—२) —स्तैनामन्यत नाजितम्।
१२—३) न तद्बलं यादवानां विदितं—।
(१४—४) —जगतीपतेः।
(१५—५) —कियानुद्यमविस्तरः।
१८—६) —मनुवर्त्तते।
(१८—७) —परिवर्त्तते।

त्रयोविंशः अध्यायः

[द्वारकाया दुर्गनिर्म्माणम्, कालयवनदहनम्, मुचुकुन्दस्य भगवत्स्तुतिश्च।]

पराशर उवाच।

गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विज !
यदूनां सन्निधौ सर्व्वे जहसुः सर्व्वयादवाः (१) ॥१॥

ततः कोपसमाविष्टो दक्षिणाब्धिमुपेत्य सः।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम्(क) ॥२॥

आराधयन् महादेवं सोऽयश्चूर्णमभक्षयत्।
ददौ वरञ्च तुष्टोऽस्मै वासरे द्वादशे हरः(ख) ॥३॥

त्रयोविंशः अध्यायः

'क्वचित् पलायनं करोती'त्युक्तस्य पलायनस्य प्रस्तावाय कालयवनोत्पत्त्यादिप्रकारमाख्यायिकया वर्णयति—'गार्ग्य'-मित्यादिना 'मथुराञ्च पुरीं यया'वित्यन्तेन। गार्ग्यश्च श्यालः अनपत्यत्वात् षण्ढ इत्युपहसन्नुक्तवान् ॥१२॥

स च गार्ग्यो महादेवमाराधयन्नयश्चूर्णं व्रतरूपेणा-भक्षयत् ॥३॥

(क) यदुचक्रस्य यदुवंशीयजनसङ्घस्य भयावहम् भवि-ष्यदनिष्टसम्भावनाजनकम्।

(ख) अयसां लोहानां चूर्णं चूर्णीकृतानि लोहानीत्यर्थः। अस्मै तथा तपस्तप्यमानाय गार्ग्याय।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सभाजयामास च तं यवनेशो ह्यनात्मजः ।
तद्योषित्सङ्गमाच्चास्य पुत्रोऽभूदलिसन्निभः (ग)॥४॥

तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ।
अभिषिच्य वनं यातो वज्राग्रकठिनोरसम् (घ) ॥५॥

स तु वीर्य्यमदोन्मत्तः पृथिव्यां बलिनो नृपान् ।
पप्रच्छ नारदस्तस्मै कथयामास यादवान् (ङ) ॥६॥

म्लेच्छकोटिसहस्राणां सहस्रैर्बहुभिर्वृतः ।
गजाश्वरथपत्त्योघैश्चकार परमोद्यमम् ॥७॥

प्रययौ चाव्यवच्छिन्नं छिन्नयानो दिने दिने ।
यादवान् प्रति सामर्षो मैत्रेय ! मथुरापुरीम् ॥८॥

कृष्णोऽपि चिन्तयामास क्षयितं यादवं बलम् ।
यवनेन रणे गम्यं मागधस्य भविष्यति ॥९॥

मागधस्य बलं क्षीणं स कालयवनो बली ।
हन्ता तदिदमायातं यदूनां व्यसनं द्विधा ॥१०॥

तस्माद् दुर्गं करिष्यामि यदूनामतिदुर्ज्जयम् ।
स्त्रियोऽपि यत्र युध्येयुः किं पुनर्वृष्णिपुङ्गवाः ॥११॥

मयि मत्ते प्रमत्ते वा सुप्ते प्रवसिते तथा ।
यादवाभिभवं दुष्टा मा कुर्व्वन् परयोधकाः (च)(२)॥१२॥

इति सञ्चिन्त्य गोविन्दो योजनानि महोदधिम् ।
ययाचे द्वादश पुरीं द्वारकां तत्र निर्म्ममे (छ)॥१३॥

तदेवं लब्धवरमागतं ज्ञात्वा अनात्मजोऽपुत्रो यवनेशः स्वभार्यायां पुत्रोत्पादनाय प्रार्थयिष्यन् संपूजयामास। अलिसन्निभः भृङ्गवत् कृष्णवर्णः ॥४॥

वज्राग्रवत् कठिनोरसम् ॥५।६।७॥

छिन्नयान इति अन्तरान्तरा श्रान्तं गजाश्वादि वाहनं त्यक्त्वा वाहनान्तरेण पूर्वमेव तत्र तत्र स्थापितेनाव्यवच्छिन्नं यथा भवत्येवं त्वरया मथुरां प्रययावित्यर्थः ॥८॥

'कृष्णोऽपी'ति। एकतः कालयवने अन्यतश्च मागधे प्राप्नुवति श्रीकृष्णश्चिन्तयामास, कथं यवनेन रणे युद्धे तेन क्षयितं क्षीणप्रायं यादवं बलं मागधस्य गम्यं जय्यम् ॥९॥

तेन च क्षयितं स कालयवनो बली हन्ता हनिष्यति, तदेवं द्विधा उभयतो यदूनां व्यसनं प्राप्तम् ॥१०॥

तस्माद् दुर्गं करिष्यामीति ॥११॥

किञ्च 'मयी'ति,—मत्ते मद्यादिना प्रमत्ते अनवहिते प्रवसिते अन्यत्र गते ॥१२॥

द्वादशयोजनानि भूमिं समुद्रं याचितवान् ॥१३॥

(ग) तं महादेवात् लब्धवरं गार्ग्यम् अनात्मजः अपत्यरहितः यवनेशः समाजयामास पूजानुनयादिभिः प्रीणयामास। तस्य यवनेशस्य योषितः भार्य्यायाः सङ्गमात्। अस्य गार्ग्यस्य।

(घ) वज्रस्य कुलिशस्य अग्रवत् अग्रभागवत् कठिनं दुर्भेद्यम् उरः वक्षःस्थलं यस्य तम्।

(ङ) स कालयवनः, वीर्य्यमदेन स्ववीर्यजनितेनाहङ्कारेण उन्मत्तः क्षीवतुल्यः सन्। पृथिव्यां के समधिकबलशालिनो नृपा इति पप्रच्छ नारदमिति शेषः। तस्मै यादवान् कथयामास बलिनो नृपानिति शेषः, यादवा नृपाः पृथिव्यामिदानीं सर्वापेक्षया समधिकशक्तिशालिन इति कथितवानित्यर्थः।

(च) यदूनां यदुवंशीयानां दुर्गं शत्रुभिरनायासेन गन्तुमशक्यं वासस्थानम्। करिष्यामि अहमिति शेषः। युध्येयुरिति परस्मैपदप्रयोग आर्षः। परयोधकाः शत्रुपक्षीया योद्धारः। परयोधिका परान् योधयन्ति ये ते परयोधिनः, त एव परयोधिकाः। स्वार्थेकः। प्रोषित इति वक्तव्ये प्रवसित इत्यार्षः प्रयोगः।

(छ) महोदधिं महासमुद्रं द्वादशयोजनानि तत्परिमितस्थानानि समुद्रेणाधिकृतानि ययाचे तादृशदुर्गनिर्माणार्थमिति शेषः। याचेर्द्विकर्मकत्वात् कर्मद्वयी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महोद्यानां महावप्रां तड़ागशतशोभिताम् ।
प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम् (ज) ॥१४॥

मथुरावासिनो लोकांस्तत्रानीय जनार्द्दनः ।
आसन्ने कालयवने मथुराञ्च स्वयं ययौ (झ) ॥१५॥

बहिरावासिते सैन्ये मथुराया निरायुधः ।
निर्ज्जगाम स गोविन्दो ददृशे यवनेश्वरम् (३)(ञ)॥१६

स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः ।
अनुयातो महायोगि-चेतोभिः प्राप्यते न यः ॥१७॥

तेनानुयातः कृष्णोऽपि प्रविवेश महागुहाम् ।
यत्र शेते महावीर्य्यो मुचुकुन्दो नरेश्वरः ॥१८॥

सोऽपि प्रविश्य यवनो दृष्ट्वा शय्यागतं नृपम् ।
पादेन ताड़यामास मत्वा कृष्णं सुदुर्म्मतिः ॥१९॥

दृष्टमात्रस्तु तेनासौ जज्वाल यवनोऽग्निना* ।
तत्क्रोधजेन मैत्रेय ! भस्मीभूतश्च तत्क्षणात् ॥२०॥

स हि देवासुरे युद्धे गतो जित्वा महासुरान् ।
निद्रार्त्तः सुमहाकालं निद्रां वव्रे वरं सुरान् (ठ)२१॥

प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति ।
देहजेनाग्निना सद्यः स तु भस्मीभविष्यति(ड) ॥२२॥

एवं दग्ध्वा स तं पापं दृष्ट्वा च मधुसूदनम् ।
कस्त्वमित्याह सोऽप्याह जातोऽहं शशिनःकुले (ढ) ।
वसुदेवस्य तनयो यदेवंशसमुद्भवः ॥२३॥

महान् वप्रो यस्याः प्राकाराधारभूता कृत्रिमोच्छ्रिता भूमिर्वप्रसंज्ञा। प्राकारगृहसम्बाधां दुर्गैर्गृहैश्च संकीर्णाम् ॥१४।१५॥

आवासिते पुरमवरुध्य निवेशिते ॥१६॥

स यवनस्तं वासुदेवं नारदोक्तैर्लक्षणैर्ज्ञात्वा अनुयातः अन्वधावत्। कथम्भूतं महायोगिनाञ्चेतोभिरपि यो न प्राप्यते तम् ॥१७।१८।१९॥

'तत्क्रोधजेने'ति तत्क्रोधोद्दीपितेन स्वदेहजेनेत्यर्थः ॥२०॥

तस्य भस्मीभावे कारणमितिहासेनाह—'स ही'ति द्वाभ्याम् ॥२१॥

(ज) महान्ति विस्तारेण गुणैश्च प्रकृष्टानि उद्यानानि उपवनानि यत्र तथाभूतां, युगपद् बहुजनविहारयोग्यैः पुष्पलतापादपविलासवापीप्रभृत्यलङ्कृतैरुद्यानैरलङ्कृतामित्यर्थः ।

(झ) कालयवने आसन्ने समीपवर्त्तिनि सति मथुराक्रमणाय सन्नद्धं मथुरासमीपमागते सतीत्यर्थः । ययौ तत्प्रतिरोधार्थमिति शेषः ।

(ञ) बहिः आवासिते कालयवनेनेति शेषः । सैन्ये सैन्ये । ददृश इत्यत्र दृशेः परस्मैपदिनः कर्त्तर्य्यात्मनेपदप्रयोग आर्षः । निः न विद्यते आयुधम् अस्त्रादि प्रहरणं साधारणयोद्धृजनोचितं यस्य सः बाहुनात्रप्रहरण इत्यर्थः । एतेन श्रीकृष्णस्य चित्रकर्मकारिणः किञ्चिदुत्तरमेवाश्रयणीयश्चित्रव्यापारः सूच्यते ।

(ट) स कालयवनः । बाहुप्रहरणः बाहुमात्रप्रहरणः, निरायुधस्य प्रतिपक्षस्यायुधेन समाक्रमणस्य वीरनयबाह्यत्वादिति भावः । अनुयातः अभिलक्ष्य पुरः समुपससार यः वासुदेवः महायोगिनां महायोगसमाहितानामपि चेतोभिः न प्राप्यते । महागुहाहितत्वात्, तदुक्तं 'गुहाहितं गह्वरेष्ठं पुराण' मित्यादि, तं प्रति अनुयातः, परं तस्य महागुहायां प्रविष्टत्वादसौ तेन न प्राप्त इति व्यज्यते ।

(ठ) सुमहान् अतिसुदीर्घः कालः तम् व्याप्य, कालाध्वनोरत्यन्तसंयोग इति द्वितीया, वव्रे ययाचे, अत्र वृधातोः प्रार्थनार्थकत्वात् दुहाद्यन्तर्गतत्वेन द्विकर्मकत्वम् ।

(ड) देहजेन स्वशरीरसमुद्भूतेन ।

(ढ) शशिनः चन्द्रस्य कुले वंशे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुचुकुन्दोऽपि तत्रासौ वृद्धगार्ग्यवचोऽस्मरत् ।
संस्मृत्य प्रणिपत्यैनं सर्व्वभूतेश्वरं हरिम् ॥२४॥

प्राह ज्ञातो भवान् विष्णोरंशस्त्वं परमेश्वरः(ण) ।
पुरा गार्ग्येण कथितमष्टाविंशतिमे युगे ।
द्वापरान्ते हरेर्ज्जन्म यदोर्वंशे भविष्यति (त) ॥२५॥

स त्वं प्राप्तो न सन्देहो मर्त्यानामुपकारकृत् ।
तथापि सुमहत् तेजो नालं सोढ़ुमहं तव ॥२६॥

तथाहि सजलाम्भोद-नादधीरतरं तव(थ) ।
वाक्यं नमति चैवोर्व्वी यस्य पादप्रपीड़िता (४)॥२७

देवासुरे महायुद्धे दैत्यसैन्ये महाभटाः ।
न शेकुर्मम तत्तेजस्त्वत्तेजो न सहाम्यहम् (द)॥२८॥

संसारपतितस्यैको जन्तोस्त्वं शरणं परम् ।
स प्रसीद प्रपन्नार्त्तिहर्त्ता हर ममाशुभम् (५) (ध)२९॥

त्वं पयोनिधयः शैलाः सरितस्त्वं वनानि च ।
मेदिनी गगनं वायुरापोऽग्निस्त्वं तथा मनः ॥३०॥

बुद्धिरव्याकृतं प्राणाः प्राणेशस्त्वं तथा पुमान् ।
पुंसः परतरं यच्च व्याप्यजन्माविकारि यत्(६)(न)॥३१

शब्दादिहीनमजरममेयं क्षयवर्ज्जितम् ।
अवृद्धिनाशं तद्ब्रह्म त्वमाद्यन्तविवर्ज्जितम् ॥३२॥

त्वत्तोऽमराः सपितरो यक्ष-गन्धर्व्व-किन्नराः ।
सिद्धाश्चाप्सरसस्त्वत्तो मनुष्याः पशवः खगाः (प) ॥३३

सरीसृपा मृगाः सर्व्वे त्वत्तः सर्व्वे महीरुहाः ।
यच्च भूतं भविष्यच्च किञ्चिदत्र चराचरम् ॥३४॥

अमूर्त्तं मूर्त्तमथवा स्थूलं सूक्ष्मतरं स्थितम् (७) ।
तत्सर्व्वं त्वं जगत्कर्त्ता नास्ति किञ्चित् त्वया विना
॥३५॥

हरेर्जन्म भविष्यतीति मे गर्गेण कथितम् ॥२५॥

गर्गेण कथितो हरिस्त्वमेवेत्यत्र लिङ्गान्याह—'तथाही'ति सार्द्धद्वाभ्याम् ॥२७-२८॥

त्वं हि प्रपन्नार्त्तिहर्त्ता अतो ममाशुभं हर ॥२९।३०॥

व्यापि सर्वकार्य्यानुगतम्, अजन्म अविकारि जन्मादि-विकारशून्यम् ॥३१॥

आद्यन्तविवर्जितं देशतोऽप्यपरिच्छिन्नम् ॥३२॥

(ण) भवान् ज्ञातः प्रत्यभिज्ञातः मयेति शेषः ।

(त) अष्टाविंशतितमे अष्टाविंशे इति वा वक्तव्ये अष्टाविंशतिमे इत्यार्षम् । अथवा अष्टाविंशतिः मा परिमाणं यस्य तत् अष्टाविंशतिमम् तस्मिन् युगे इति लौकिकशब्दानुशासनसिद्धमेवैतत् । कथितमिति भविष्यतीत्यन्तमिति शेषः ।

(थ) सजलस्य जलपूर्णस्य अम्भोदस्य मेघस्य नादवत् गर्जितवत् धीरतरं गम्भीरतरम् अतिगम्भीरमित्यर्थः ।

(द) देवा असुराश्च सन्त्यस्मिन् योद्धृत्वेन इत्यस्यार्थे अत्-प्रत्ययेन कमलेत्यादिपदवद्देवासुर इति पदमत्र सिद्धम् । महा-वीरा योद्धारः न शेकुः सोढ़ुमिति शेषः । किन्तु अहं स एवाहमिदानीमिति शेषः । सहतेः परस्मैपदप्रयोग आर्षः ।

(ध) संसारपतितस्य संसाररूपे गर्त्ते निपतितस्य । संसारं स्वादृष्टोपनिबद्धशरीरपरिग्रहं पतितस्य प्राप्तस्य, शरणं गतिः । पतिरत्र गत्यर्थः ।

(न) बुद्धिः महत्तत्त्वम्, अव्याकृतं विकृतिभिन्नं मूलप्रकृति-भूतम् 'मूलप्रकृतिरविकृति'रिति सांख्योक्तेः । अजन्मविकारवदिति जन्म शरीरसम्बन्धः विकारः परिणामः तौ विद्येते यस्य तत् जन्मविकारवत् तथाभूतं न भवतीत्यजन्मविकारवत् ।

(प) त्वत्तः तद्रूपात् भवन्तीति शेषः । सपितृका इति वक्तव्ये सपितर इत्यार्षम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मया संसारचक्रेऽस्मिन् भ्रमता भगवन् सदा ।
तापत्रयाभिभूतेन न प्राप्ता निर्वृतिः क्वचित्(फ)॥३६
दुःखान्येव सुखानीति मृगतृष्णा जलाशया ।
तथा नाथ ! गृहीतानि तानि तापाय चाभवन् ॥३७॥
राष्ट्रमुर्व्वी बलं कोशो मित्रपक्षस्तथात्मजाः ।
भार्य्या भृत्यजना ये च शब्दाद्या विषयाः प्रभो ॥३८
सुखबुद्ध्या मया सर्व्वं गृहीतमिदमव्यय !
परिणामे तदेवेश तापात्मकमभून्मम ॥३९॥
त्रैलोक्यमिमं प्राप्तो नाथ ! देवगणोऽप्ययम् ।
(ब) साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृतिः(ब)॥४०
तामनाराध्य जगतां सर्व्वेषां प्रभवास्पदम् ।
शाश्वती प्राप्यते केन परमेश्वर ! निर्वृतिः ॥४१॥
त्वन्मायामूढ़मनसो जन्म-मृत्यु-जरादिकान् ।
अवाप्य तापान् पश्यन्ति प्रेतराजाननं नराः (भ)॥४२
ततो निजक्रियासूतिनरकेष्वतिदारुणम् ।
प्राप्नुवन्ति नरा दुःखमस्वरूपविदस्तव ॥४३॥
अहमत्यन्तविषयी मोहितस्तव मायया ।
ममत्वगर्व्वगर्त्तान्तर्भ्रमामि परमेश्वर ॥४४॥
सोऽहं त्वां शरणमपारमीशमीड्यं (ग)
सम्प्राप्तः परमपदं यतो न किञ्चित् ।
संसाराश्रमपरितापतप्तचेता (घ)
निर्व्वाणे परिणतधाम्नि साभिलाषः ॥४५॥

इति श्रीविष्णेपुराणे पञ्चमांशे त्रयोविंशः अध्यायः ॥

यथा जलाशया मृगतृष्णा मूढैर्गृह्यते तथा दुःखान्येव सुखबुद्ध्या गृहीतानि ॥३७।४२॥

ततो नरकेषु निजक्रियासूति स्वकर्मजं दुःखं प्राप्नुवन्ति तव स्वरूपमजानन्तः ॥४३॥

ममत्वञ्च तन्निमित्तो गर्वश्च स एव गर्त्तस्तन्मध्ये भ्रमामि ॥४४॥

परमपदरूपत्वं यतस्त्वत्तो न किञ्चिद् व्यतिरिक्तमस्ति तं त्वां परिणतधाम्नि परिपक्वयोगिनामाश्रये निर्वाणे ॥४५॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे त्रयोविंशोऽध्यायः ॥

(फ) तापत्रयाभिभूतेन आध्यात्मिकाधिदैविकाधिभौतिकभेदेन त्रिविधदुःखदुर्गतेन । निर्वृतिः शान्तिः ।

(ब) देवगणोऽपि विलक्षणैश्वर्य्यसमन्वितः देवतासमाजोऽपि, किमुत अन्येषामित्यपिशब्दद्योत्यम् । साहाय्यकाम सहायताभिलाषी, तेनैव तस्य देवगणस्यापि सर्वथा निवृतेरभावः प्रतीयत इति भावः ।

(भ) तव मायया अघटनघटनपटीयस्या वैष्णव्या शक्त्या मूढं विभ्रान्तं मनः येषां ते । प्रेतराजस्य यमस्य आननं मुखं पश्यन्ति यमपुरं यातनाभोगाय गच्छन्तीत्यर्थः ।

पाठान्तराणि—

(१—१)—जहसुर्यादवास्तदा ।
(१२—२)—मा कुर्वन्त्वरयोऽधिकाः ।
(१६—३) निर्जगाम च गोविन्दो ददर्श यवनश्च तम् ।
(२७—४)—युष्मत्पादप्रपीडिता ।
(३६—५) प्रसीद त्वं प्रपन्नार्त्तिहर नाशय मेऽशुभम् ।
(३१—६)—व्याप्यजन्मविकारवत् ।
(३५—७) मूर्त्तामूर्त्तं तथा चापि स्थूलं सूक्ष्मतरं तथा ।
(४२—८)—प्रेतराजमनन्तरम् ।
(४५—९)—शरणमपारमप्रमेयं ।
४५—१०) संसारभ्रमपरितापतप्तचेता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्विंशोऽध्यायः

[तपसे मुचुकुन्दस्य प्रस्थानम्, बलरामस्य व्रजयात्रा च ।]

पराशर उवाच ।

इत्थं स्तुतस्तदा तेन मुचुकुन्देन धीमता ।
प्राहेशः सर्व्वभूतानामनादिर्भगवान् हरिः ॥१॥

श्रीभगवानुवाच ।

यथाभिवाञ्छितान् दिव्यान् गच्छ लोकान् नरेश्वर !
अव्याहतपरैश्वर्य्यो मत्प्रसादोपबृंहितः (क) ॥२॥

भुक्त्वा भोगान् महादिव्यान् भविष्यसि महाकुले ।
जातिस्मरो मत्प्रसादात् ततो मोक्षमवाप्स्यसि ॥३

पराशर उवाच ।

इत्युक्तः प्रणिपत्येशं जगतामच्युतं नृपः ।
गुहामुखाद् विनिष्क्रान्तो ददृशे सोऽल्पकान् नरान् (ख)॥४॥

ततः कलियुगं ज्ञात्वा प्राप्तं तप्तुं नृपस्तपः ।
नरनारायणस्थानं प्रययौ गन्धमादनम् ॥५॥

कृष्णोऽपि घातयित्वारिमुपायेन हि तद्बलम् ।
जग्राह मथुरामेत्य हस्त्यश्वस्यन्दनोज्ज्वलम् (ग)॥६॥

आनीय चोग्रसेनाय द्वारवत्यां न्यवेदयत् ।
पराभिभवनिःशङ्कं बभूव च यदोः कुलम् (घ) ॥७॥

बलदेवोऽपि मैत्रेय ! प्रशान्ताखिलविग्रहः ।
ज्ञातिसन्दर्शनोत्कण्ठः प्रययौ नन्दगोकुलम् ॥८॥

चतुर्व्विंशः अध्यायः

कृतानां काम्यानां कर्मणां फलमादौ भुङ्क्ष्व, जन्मान्तरे तु मोक्षं दास्यामीत्याह—यथाभिवाञ्छितानिति द्वाभ्याम् । ॥२।३॥

(क) अव्याहतम् अबाधितं परम् उत्तमम् ऐश्वर्य्यं विभूतिः यस्य-सः । मम प्रसादेन अनुग्रहेण उपबृंहितः समृद्धः ।

(ख) अल्पकान् स्वापेक्षया क्षुद्राकारान् कलिकालोचित-स्वल्पपरिमाणविशिष्टदेहधारिण इत्यर्थः । युगान्तरणिस्य मुचुकुन्दस्य युद्धपरिश्रान्तस्य विश्रामार्थं गुहायां निद्रया बहुकालातिक्रमात् तदा कलियुगप्रादुर्भावो जात इति नराणां तदुचितकायपरिमाणाल्पता जातेति सा च तेन तदैव दृष्टा, पूर्वमितः शैलगुहायामेव स्थितत्वात् बहिर्जनसम्बन्धाभावादिति भावः । ध्येयम् । प्रकृते ददृश इति पदमार्षम् ।

मम सद् शुद्धयभावाभगवतैवमुक्तमिति मत्वासौ तप-स्तप्तुं ययावित्याह—'इत्युक्त' इति द्वाभ्याम् ॥४।५॥

उपायेन मुचुकुन्ददृशा ॥६।७॥

कृष्ण एकाक्येव गिरिगुहां गत्वा यवनं घातयित्वा द्वारकामागतः । तथा रामोऽप्येकाकी गोवर्द्धनं गत्वा

(ग) उपायेनेति अत एव एकाकिनोऽपि कृष्णस्य दुर्दान्त-कालयवनहननं सुकरमभूदिति व्यज्यते । तद्बलं तस्य कालयवनस्य बलं सैन्यं जग्राह स्वायत्तीचकार । तद्बलं मथुरायां परित्यज्यैव कालयवनस्य कृष्णमनुसृत्य शैलप्रवेशादिति भावः ।

(घ) द्वारवत्यां द्वारकायां न्यवेदयत् ददौ । न्यवेदयत् सर्वं वृत्तम् उग्रसेनं विज्ञापितवानिति वा । पराभिभवाद् शत्रुकृताभिभवात् अपरकृतपराभवाद् वा निःशङ्कं निर्भयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो गोपीश्च गोपांश्च यथापूर्व्वममित्रजित् ।
तथैवाभ्यवदत् प्रेम्णा बहुमानपुरःसरम् (ङ)॥९॥
कैश्चापि सम्परिष्वक्तः कांश्चित् स परिषस्वजे ।
हास्यञ्चक्रे समं कैश्चिद् गोपैर्गोपीजनैस्तथा ॥१०॥
प्रियाण्यनेकान्यवदन् गोपास्तत्र हलायुधम् ।
गोप्यश्च प्रेमकुपिताः प्रोचुः सेर्ष्यमथापराः ॥११॥
गोप्यः पप्रच्छुरपरा नागरीजनवल्लभः ।
कच्चिदास्ते सुखं कृष्णश्चलत्प्रेमलवात्मकः ॥१२॥
अस्मच्चेष्टामुपहसन् कच्चिन्न पुरयोषिताम् ।
सौभाग्यमानमधिकं करोति क्षणसौहृदः (च)॥१३॥
कच्चित् स्मरति नः कृष्णो गातानुगमनं कलम् ।
अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति (छ) ॥१४॥
अथवा किं तदालापैरपरा क्रियतां कथा ।
तस्यास्माभिर्विना तेन विनास्माकं भविष्यति(ज)॥१५॥
पिता माता तथा भ्राता भर्त्ता बन्धुजनश्च किम् ।
न त्यक्तस्तत्कृतेऽस्माभिरकृतज्ञध्वजो हि सः ॥१६॥
तथापि क्वचिदालापमिहागमनसंश्रयम्(झ) ।
करोति कृष्णो वक्तव्यं भवताकृष्ण नानृतम् ॥१७॥

[illegible]न्द्याकर्षणादिकं कृत्वा गत इति वक्ष्यन्नाह—'वलदेवो-[illegible]'त्यदिना यावदुत्तराध्यायसमाप्ति। ज्ञातीनां दर्शने [illegible]कण्ठः औत्सुक्यवान् ॥८।९॥

ज्येष्ठैः सम्परिष्वक्तः, कनिष्ठान् परिषस्वजे, समैर्हास्यं [illegible] ॥१०॥

हलायुधं प्रति काश्चिद् गोप्यः कृष्णवल्लभाः प्रेमकुपिताः [illegible], ता एवापराः सेर्ष्यं प्रोचुः ॥११॥

[illegible] कृष्णवल्लभानां प्रश्नमाह—'गोप्य' इत्यादि— सप्तभिः। [illegible]प्रेम आत्मा स्वभावो यस्य सः ॥१२॥

तदेवाहुः—'अस्मदि'ति। अस्माकं ग्राम्याणां चेष्टामुपहसन् सौभाग्यमानं सौभाग्यगर्वमधिकं कच्चिन्न करोति प्रायशः करोतीति सेर्ष्यः प्रश्नः ॥१३॥

विदग्धम्मन्या ऊचुः—'कच्चिदि'ति। गीतेनानुगमनमनुवृत्तिं स्वगीतानुगुणमस्मद्गानं कलं मधुरं कच्चित् स्मरति न वेत्यर्थः प्रणयकोपादाहुः। अप्यसौ मातरमिति ॥१४॥

निर्वेदादूचुः—'अथवे'ति। यथास्माभिर्विना तस्य स्थितिस्तथास्माकमपि तेन विनादुःखेनापि तावत् स्थितिर्भविष्यत्येवेत्यर्थः ॥१५॥

शोकतप्ता ऊचुः—'तथापी'ति। अकृष्णेति च्छेदः धवलेत्यर्थः। अथवा कृष्णावेशाद्रामस्य कृष्णेति सम्बुद्धिः ॥१७॥

(ङ) अभ्यवदत् समभाषत, अनेन यथापूर्वमित्यस्य सम्बन्धः [illegible]स्य च प्रेम्णा वहुमानपुरःसरमित्यनयोः सम्बन्ध इति न [illegible]म्।

(च) सौभाग्यस्य मानं परिमाणम् अधिकं प्रवृद्धं महदित्यर्थ [illegible] वा अर्थः। तथाहि तासां स्वल्पमानं सौभाग्यं पूर्वमासीदेव [illegible] ताभिः कृष्णः प्रणयितया प्राप्तः, साम्प्रतं तदेव सौभाग्यं [illegible]च्चेष्टाया उपहासेन तच्चेष्टाया उत्कर्षप्रत्यायना-[illegible] नयतीतिति भावः। क्षणम् अत्यल्पकालं व्याप्य स्थितं [illegible] प्रेम यस्य सः। तथाहि अस्मासु तस्य क्षणभङ्गुरत्वात्त-[illegible] नास्ति, अत एव शक्यमिदानीं तेनास्मच्चेष्टितमुपहसितु-[illegible] भावः।

(छ) 'अप्यसौ मातरं द्रष्टु'मित्यादि, तथाहि अस्मासु यत् प्रेम तस्य साम्प्रतमभावात् तत्प्रयुक्तमस्मद्दर्शनार्थमागमनं मास्तु, किन्तु मातृस्नेहस्यापत्यैः परिहातुमशक्यत्वात् मातृदर्शनार्थमागमनं सम्भाव्यत इति भावः।

(ज) 'तस्यास्माभि'रित्यादौ स्थितिरित्यध्याहारेणार्थसङ्गतिः। तथाहि स यदि अस्मानपहाय स्थातुं शक्नुयात्, तर्हि किं वयमपि तमपहाय तथैवादुःखेन न स्थातुं शक्नुयाम इति तासां मनोगतं व्यज्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दामोदरोऽसौ गोविन्दः पुरस्त्रीन्यस्तमानसः ।
अपेतप्रीतिरस्मासु दुर्दृशः प्रतिभाति नः ॥१८॥

पराशर उवाच ।

आमन्त्रितः स कृष्णेति पुनर्दामोदरेति च ।
जहसुः सुस्वरं गोप्यो हरिणा हृतचेतसः (ञ) ॥१९॥

सन्देशैः साममधुरैः प्रेमगर्भैरगर्व्वितैः ।
रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः ॥२०॥
गोपैश्च पूर्व्ववद् रामः परिहासमनोरमाः ।
कथाश्चकार रेमे च सह तैर्व्रजभूमिषु ॥२१॥

इति श्रीविष्णुपुराणे पञ्चमांशे चतुर्व्विंशः अध्यायः ।

नैराश्यात् परस्परमूचुः—'दामोदर' इति असाविति रामं लक्ष्यीकृत्य कृष्णाविष्टचित्ततया दामोदर गोविन्द इति च तमेवाभिदधत्योऽस्मासु विगतप्रीतित्वात् दुर्दृशः प्रतिभातीति राममेवालक्ष्योचुः । पूर्वोक्ताभिप्रायेण वा ॥१८॥

पुनश्च कृष्णवार्त्ताः प्रष्टुं हे कृष्ण ! हे दामोदरेति च स राम एवाभिमन्त्रितस्ताभिः यतो हरिणा हृतचेतसः अतः सहसा स्वीयं कृष्णनाम्ना रामसम्बोधनलक्षणं मोहं ज्ञात्वा सुस्वरमुच्चैर्जहसुः ॥२०॥

साम्ना प्रियोक्त्या मधुरैः कृष्णस्य सन्देशैराश्वासिताः ॥२१॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे चतुर्विंशोऽध्यायः ।

(ऋ) इह अस्मदधिष्ठाने गोकुले आगमनसंश्रयम् आगमनविषयालापं करोति किमिति काक्वा व्यज्यते ।

(ञ) अत्र हरिणा हृतचेतसः या गोप्तः हरिहृतचित्तत्वात् राममेव कृष्णेत्यादिपदैरामन्त्रयामासुः ताः गोपीः अपरा गोपः सुस्वरमुपहसितवत्य इति वाथः ।

पञ्चविंशः अध्यायः

[बलभद्रस्य व्रजविहारः, यमुनाकर्षणञ्च ।]

पराशर उवाच ।

वने विचरतस्तस्य सह गोपैर्महात्मनः ।
मानुषच्छद्मरूपस्य शेषस्य धरणीभृतः ॥१॥

निष्पादितोरुकार्य्यस्य कार्य्येणोर्व्वीविचारिणः ।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् (क) ॥२॥

अभीष्टा सर्व्वदा यस्य मदिरे त्वं ! महौजसः ।
अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ॥३॥

इत्युक्ता वारुणी तेन सन्निधानमथाकरोत् ।
वृन्दावनवनोत्पन्न-कदम्बतरुकोटरे ॥४॥

(क) निष्पादितानि समापितानि उरूणि महान्ति कार्य्याणि प्रलम्बवधादीनि येन तस्य । कार्य्येण कर्त्तव्यकर्मणा निमित्तभूतेन उर्वीविचारिणः मर्त्यभूमिविहारिणः । अनेन विशेषणद्वयेन वरुणस्य बलरामे प्रीत्यतिशयो जगदुपकारकारित्वात् कृतज्ञत्वात् चेति द्वाभ्यां रामं प्रति वारुणीप्रेषणं व्यज्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विचरन् बलदेवोऽपि मदिरागन्धमुत्तमम् ।
आघ्राय मदिरातर्षमवापाथ पुरातनम् ॥५॥

ततः कदम्बात् सहसा मद्यधारां स लाङ्गली ।
पतन्तीं वीक्ष्य मैत्रेय ! प्रययौ परमां मुदम् ॥६॥

पपौ च गोपगोपीभिः समवेतो मुदान्वितः ।
प्रगीयमानो ललितं गीतवाद्यविशारदैः ॥७॥

समन्तोत्पन्न-घर्म्माम्भःकणिकामौक्तिकोज्ज्वलः ।
आगच्छ यमुने ! स्नातुमिच्छामीत्याह विह्वलः(ग) ॥८

तस्य वाचं नदी सा च मत्तोक्तामवमत्य वै ।
नाजगाम ततः क्रुद्धो हलं जग्राह लाङ्गली(घ) ॥९॥

गृहीत्वा तां तटे तेन चकर्ष मदविह्वलः ।
पापे नायासि नायासि गम्यतामिच्छयात्मनः ॥१०॥

सा कृष्टा तेन सहसा मार्गं सन्त्यज्य निम्नगा ।
यत्रास्ते बलभद्रोऽसौ प्लावयामास तद्वनम्(ङ) ॥११॥

शरीरिणी तथोत्पत्य त्रासविह्वललोचना ।
प्रसीदेत्यब्रवीद् रामं मुञ्च मां मुषलायुध(च) ॥१२॥

सोऽब्रवीदवजानासि मम शौर्य्यबले यदि ।
सोऽहं त्वां हलपातेन विनेष्यामि सहस्रधा(छ) ॥१३॥

पराशर उवाच ।

इत्युक्तथातिसन्त्रासात् तया नद्या प्रसादितः ।
भूभागे प्लाविते तस्मिन् मुमोच यमुनां बलः(ज)॥१४

पञ्चविंशः अध्यायः

मदिरायास्तर्षं पानेच्छाम् ॥५।७॥

अत्यन्तं घर्म्माम्भः कणिका एव मौक्तिकानि तैरुज्ज्वलः । स्नातुमिच्छामि इत्युवाचेति शेषः ॥८।९॥

(ख) ललितं यथा स्यात्तथा गीयमानः प्रगीतैर्वाद्यैश्च वाद्यमानः ।

(ग) समन्तम् अत्यन्तम् उत्पन्नाभिः देहान्निर्गताभिः घर्म्माम्भःकणिकाभिः स्वेदजलविन्दुभिरेव मौक्तिकैरुज्ज्वलः । देहे स्वेदोद्गमश्च रामस्य समधिकवारुणीपानजनिततापाद्यतिशयादिति ज्ञेयम् ।

(घ) मत्तं मदः, भावे क्तप्रत्ययात्, तेन हेतुभूतेन उक्तां तस्य बलरामस्य वाचम् अवमत्य अवज्ञया उपेक्ष्य । मत्तोक्तामिति हेत्वंशमंविशेषणम् । केचिन्तु मत्तेत्यत्र कर्त्तर्य्येव क्तप्रत्ययं मत्वा मत्तेन सता तेन रामेण उक्तामित्यर्थमभिमन्यन्ते, तन्न समीचीनम्, तस्य वाचमित्यत्र तस्येति षष्ठ्या वाच्यत्वार्थकतया वाचि तद्-वाच्यकत्वान्वयस्य द्विधा भानानुपपत्तेः । लाङ्गली लाङ्गल-धरो बलरामः । हलं जग्राह यमुनामाकर्ष्टुमिति शेषः ।

कोपात्तदपराधस्मरणार्था नायासि नायासीति वीप्सा । यदि शक्तोऽसि तर्हि स्वेच्छया गम्यताम् ॥१०।१२॥

शौर्यबले शौर्य्यञ्च बलञ्चावजानासि ॥१३।१४॥

(ङ) मार्गं स्वीयखातरूपं स्वस्रोतःप्रवृत्तिपथम् ।

(च) शरीरिणी मूर्त्तिमती सती, उत्पत्य जलाद्युत्थाय, त्रासेन बलरामादात्मनोऽनिष्टसम्भावनया विह्वले व्याकुले लोचने यस्याः सा ।

मुषलम् आयुधं यस्य तत्सम्बोधनं मुसलायुधेति । अनेन हलेन यथा मामाकृष्टवानसि, अतः परं मुषलेन स्वायुधेनापि मा मां जहीति यमुनायाः प्रार्थना व्यज्यते ।

(छ) सहस्रधा सहस्राणि भागरूपान् प्रकारान् विनेष्यामि विशेषतः प्रापयिष्यामि, सहस्रैर्भागैर्विभक्तां करिष्यामीत्यर्थः । अथवा त्वां सहस्रधा कृत्वेति शेषः, विनेष्यामि शिक्षयिष्यामि किं मया हलिना शौर्य्यबलाभ्यां कर्त्तुं शक्यमित्येतदर्थं बोधं लम्भयिष्यामीत्यर्थः । सहस्रधा सुबहुभिः प्रकारैः त्वां विनेष्यामि, शिक्षयिष्यामीति सामान्यतो यमुनां प्रति तर्जनं वा ।

(ज) अतिसंत्रासात् लोकातिगभयातिशयात्, अतिशब्द-संशब्दाभ्यामत्र त्रासस्य लोकोत्तरत्वं प्रतिपाद्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः स्नातस्य वै कान्तिराजगाम महात्मनः ।
अवतंसोत्पलं चारु गृहीत्वैकञ्च कुण्डलम् ॥१५॥
वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम् ।
समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत(झ) ॥१६॥
कृतावतंसः स तदा चारुकुण्डलभूषितः ।
नीलाम्बरधरः स्रग्वी शुशुभे कान्तिसंयुतः ॥१७॥
इत्थं विभूषितो रेमे तत्र रामस्तथा व्रजे ।
मासद्वयेन यातश्च पुनः स द्वारकां पुरीम् ॥१८॥
रेवतीं नाम तनयां रैवतस्य महीपतेः ।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ(ञ) ॥१९॥
इति श्रीविष्णुपुराणे पञ्चमांशे पञ्चविंशः अध्यायः ॥

कान्तिः लक्ष्मीः अवतंसोत्पलम् एकस्य कर्णस्याभरणार्थ-मुत्पल-मन्यस्य चैकं कुण्डलं गृहीत्वा, तथा हरिवंशे लक्ष्मी-वाक्यम्,—"जातरूपमयञ्चैकं कुण्डलं रत्नभूषणम्। आदि-पद्मञ्च पद्मादि दिव्यं श्रवणभूषणम्। देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियामिति ॥१५।१८।

अथ श्रीकृष्णस्य विवाहान् पुत्रांश्च वक्ष्यन्तादौ तावत् ज्येष्ठस्य श्रीरामस्य पूर्वोक्तं विवाहादिकमनुस्मारयति रेव-तीमिति ॥१९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे पञ्चविंशोऽध्यायः ॥

(झ) वरुणेन प्रहितां प्रेरिताम्, न म्लानं कदापि म्लानि-मप्राप्तं सर्वदैवाम्लथरमणीयदलं पङ्कजं यस्याः तां मालाम्। अयच्छतेत्यार्षम्।

(ञ) तस्यां रेवत्याम्। निशठोल्मुकौ तदाख्यौ पुत्रौ जज्ञाते समुत्पन्नौ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षड्विंशः अध्यायः

[रुक्मिणीहरणम्]

पराशर उवाच ।

भीष्मकः कुण्डिने राजा विदर्भविषयेऽभवत् ।
रुक्मी तस्याभवत् पुत्रो रुक्मिणी च वराङ्गना (क) ॥१॥

रुक्मिणीं चकमे कृष्णः सा च तं चारुहासिनी ।
न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे(ख) ॥२॥

ददौ च शिशुपालाय जरासन्धप्रदेशितः ।
भीष्मको रुक्मिणा सार्द्धं रुक्मिणीमुरुविक्रमः(ग) ॥३॥

विवाहार्थं ततः सर्व्वे जरासन्धमुखा नृपाः ।
भीष्मकस्य पुरं जग्मुः शिशुपालप्रियैषिणः ॥४॥

कृष्णोऽपि बलभद्राद्यैर्यादवैर्बहुभिर्वृतः ।
प्रययौ कुण्डिनं द्रष्टुं विवाहञ्चैव भूभृतः (क) ॥५॥

श्वोभाविनि विवाहे तु तां कन्यां हृतवान् हरिः ।
विपक्षभारमासज्य रामाद्येष्वथ बन्धुषु(घ) ॥६॥

ततश्च पौण्ड्रकः श्रीमान् दन्तवक्रो विदूरथः ।
शिशुपाल-जरासन्ध-शाल्वाद्याश्च महीभृतः ॥७॥

कुपितास्ते हरिं हन्तुं चक्रुरुद्योगमुत्तमम् ।
निर्ज्जिताश्च समागम्य रामाद्यैर्यदुपुङ्गवैः ॥८॥

कुण्डिनं न प्रवेक्ष्यामि अहत्वा युधि केशवम् ।
कृत्वा प्रतिज्ञां रुक्मी च हन्तुं कृष्णमभिद्रुतः ॥९॥

हत्वा बलं सनागाश्व-पत्ति-स्यन्दनसङ्कुलम् ।
निर्जितः पातितश्चोर्व्व्यां लीलयैव स चक्रिणा(ङ)॥१०

हन्तुं कृतमतिः कृष्णो रुक्मिणं युद्धदुर्म्मदम् ।
प्रणम्य याचितो ब्रह्मन् रुक्मिण्या भगवान् हरिः॥
॥११॥

षड्विंशः अध्यायः

रुक्मिणीं कन्यां, ददौ चेति वाचा दत्तवानित्यर्थः ॥१।२। ३।४।५॥

(क) विदर्भविषये विदर्भाख्यजनपदे, कुण्डिने तदाख्ये नगरे, भीष्मकः तदाख्यः राजा अभवत् ।

(ख) याचते च प्रार्थयमानायापि चक्रिणे श्रीकृष्णाय ।

(ग) जरासन्धेन प्रदेशितः उपदेशैरनेकैः प्रेरितः, उरुः महान् विक्रमः पराक्रमो यस्य तथाभूतः । अनेन विशेषणेन महावीरेण जरासन्धेन सह तस्य प्रणयो व्यज्यते, तेनैव च जरासन्धोपदेशात् कृष्णमपहाय शिशुपालाय रुक्मिण्या वाचा दानं भीष्मकस्यानुमतमिति सूच्यते ।

पुराद् बहिरम्बिकापूजार्थं विनिर्गतां हृतवान् हरिः । विपक्षभारं विपक्षैः सह कार्यं युद्धादिसंरम्भं रामादिष्वासज्य आरोप्य ॥६।७।८॥

(घ) विवाहे रुक्मिण्या इति शेषः, श्वो भाविनि आगामिदिवसे सम्भविष्यति सति, तद्विवाहदिनपूर्वदिने इति भावः । तां कन्याम् अजातोपयमां रुक्मिणीम् । कन्यामित्युक्त्वा श्रीकृष्णस्य परदारग्रहणजन्यदोषाभावः सूच्यते ।

(ङ) नागाः हस्तिनः अश्वाः पत्तयः पदातयः स्यन्दनानि रथाः तैः सह वर्त्तमानाः विविधाः योद्धारः तैः सङ्कुलं परिव्याप्तं बलं रुक्मिणः सहायभूतं सैन्यं हत्वा, उर्व्यां भूमौ लीलया अनायासेनैव पातितः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एक एव मम भ्राता न हन्तव्यस्त्वयाधुना ।
कोपं नियम्य देवेश ! भ्रातृभिक्षा प्रदीयताम् (च)॥१२

इत्युक्तेन परित्यक्तः कृष्णेनाक्लिष्टकर्म्मणा ।
रुक्मी भोजकटं नाम पुरं कृत्वावसत् तदा ॥१३॥

निर्जित्य रुक्मिणं सम्यगुपयेमे स रुक्मिणीम् ।
राक्षसेन विवाहेन सम्प्राप्तां मधुसूदनः ॥१४॥

तस्यां जज्ञेऽथ प्रद्युम्नो मदनांशः स वीर्य्यवान् ।
जहार शम्बरो यं वै यो जघान च शम्बरम्(छ) ॥१५

इति श्रीविष्णुपुराणे पञ्चमांशे षड्विंशः अध्यायः ॥

कुण्डिनं न प्रवेक्ष्यामीति प्रतिज्ञां कृत्वा रुक्मी अन्वधावत् ॥६॥

पातित एव केवलं, न तु हतः, रुक्मिणीभ्रातृत्वात् ॥१०॥ ११।१२।१३॥

राक्षसेन 'राक्षसो युद्धहरणा'दिति स्मृतिप्रसिद्धेन ॥१४॥

मदनांशः कामस्यांशभूतः । अत एव पूर्ववैरमनुस्मरन् शम्बरोऽयं जहार, यश्च तं हतवान् ॥१५॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे षड्विंशोऽध्यायः ॥

(च) प्रदीयताम् मह्यमिति शेषः ।

(छ) तस्यां रुक्मिण्याम्, मदनस्य हरकोपानलेन पूर्वं दग्धस्य कामस्य अंशः । शम्बरः शम्बरनामा असुरः । पूर्ववैरं स्मरनिति श्रीधरः,— अस्य 'यस्य' इत्यंशे अन्वयः ।

सप्तविंशः अध्यायः

[प्रद्युम्नहरणं शम्बरवधश्च]

मैत्रेय उवाच ।

शम्बरेण हृतो वीरः प्रद्युम्नः स कथं मुने !
शम्बरश्च महावीर्य्यः प्रद्युम्नेन कथं हतः* ॥१॥

पराशर उवाच ।

षष्ठेऽह्नि जातमात्रन्तु प्रद्युम्नं सूतिकागृहात् ।
ममैष हन्तेति मुने ! हृतवान् कालशम्बरः ॥२॥

हृत्वा चिक्षेप चैवैनं ग्राहोग्रे लवणार्णवे ।
कल्लोलजनितावर्त्ते सुघोरे मकरालये(क) ॥३॥

पतितं तत्र चैवैको मत्स्यो ज़ग्राह बालकम् ।
न ममार च तस्यापि जठरेऽनलदीपितः(ख) ॥४॥

सप्तविंशः अध्यायः

कालशम्बरः मृत्युतुल्यः शम्बरः ॥२॥

ग्राहैरुग्रे भयंकरे ॥३॥

न ममार भगवद्वीर्य्यजत्वात् कामांशत्वाच्च । न हि क़ामो जलादिभिः संह्रियते ॥४॥

(क) लवणार्णवे लवणसमुद्रे । कल्लोलैः महातरङ्गैः जनितः उत्पादित आवर्त्तः सलिलभ्रमिः यत्र तथाभूते, 'अथोर्मिंषु महत्सु स्यात्कल्लोलकल्लोला'विति कोषात् ।

(ख) अनलेन तस्य मत्स्यस्य जाठरेणाग्निना दीपितः दग्धः सन् न ममार स बालक इति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मत्स्यबन्धैश्च मत्स्योऽसौ मत्स्यैरन्यैः सह द्विज !
घातितोऽसुरवर्य्याय शम्बराय निवेदितः ॥५॥

तस्य मायावती नाम पत्नी सर्व्वगृहेश्वरी ।
कारयामास सूदानामाधिपत्यमनिन्दिता(ग) ॥६॥

दारिते मत्स्यजठरे सा ददर्शातिशोभनम् ।
कुमारं मन्मथतरोर्दग्धस्य प्रथमाङ्कुरम्(घ) ॥७॥

कोऽयं कथमयं मत्स्यजठरं समुपागतः (१) ।
इत्येवं कौतुकाविष्टां तां तन्वीं प्राह नारदः(ङ) ॥८॥

अयं समस्तजगतः सूतिसंहारकारिणा ।
शम्बरेण हृतः कृष्ण-तनयः सूतिकागृहात्(च) ॥९॥

क्षिप्तः समुद्रे मत्स्येन निगीर्णस्ते वशं गतः (२)।
नररत्नमिदं सुभ्रू विस्रब्धा परिपालय(छ) ॥१०॥

पराशर उवाच ।

नारदेनैवमुक्ता सा पालयामास तं शिशुम् ।
बाल्यादेवातिरागेण रूपातिशयमोहिता(ज) ॥११॥

स यदा यौवनाभोग-भूषितोऽभून्महामते !
साभिलाषा तदा साति बभूव गजगामिनी(झ) ॥१२॥

मायावती ददौ तस्मै मायाः सर्व्वा महामुने !
प्रद्युम्नायातिरागान्धा तन्न्यस्तहृदयेक्षणा(ञ) ॥१३॥

मत्स्यबन्धैर्मत्स्यघातिभिः ॥५॥

'तस्य मायावती नाम पत्नी'ति,— मायारूपेण तस्य पत्नी-त्वेवं मोहोत्पादनात् तत्पत्नीति व्यवहारः। यद्वा नाम पत्नी पत्नीनाममात्रेणेत्युच्यते, वस्तुतस्त्वनिन्दिता पति-व्रता कामस्य भार्य्येत्यर्थः। एतच्चाग्रे स्फुटीभविष्यति ॥६॥

दग्धस्य रुद्रकोपाग्निनेति ॥७॥

विस्रब्धा प्रत्यययुक्ता सती परिपालयेत्यनेन त्वद्भर्त्ता कामोऽयमिति सूचितम् ॥१०।११॥

यौवनाभोगेन तारुण्यविस्तारेण भूषितो यदाभूत् ॥१२।१३॥

(ग) सर्वस्य गृहस्य ईश्वरी आधिपत्यशालिनी निखिल-[illegible]कृत्येषु लब्धाधिकारा इत्यर्थः। सूदानां पाककर्मण्यधिकृतानां [illegible]काराणाम्।

(घ) दारिते अस्त्रेण विदारिते, मत्स्यस्य तस्य प्रद्युम्न-[illegible]सिनः धीवरैः शम्बराय निवेदितस्य महामीनस्य जठरे उदरे। [illegible] काम एव तरुः तस्य, प्रथमाङ्कुरम् बालोचितक्षुद्राकार-[illegible] प्रथमजाताङ्कुरस्वरूपम्।

(ङ) कौतुकाविष्टां कौतूहलवतीं तां मायावतीम्, नारद इति [illegible]परतया तत्र तदा समुपनत इति शेषः।

(च) सूतिः प्रसूतं बालापत्यं तत्संहारकारिणा तद्विनाश-[illegible]शीलेन शम्बरेण, 'स्थितिसंहारकारिण' इति पाठे कृष्ण-[illegible]मिदम्, तत्रापि सापेक्षत्वेन कृष्णतनय इत्यत्र षष्ठीतत्-[illegible]समासासम्भवेऽपि आर्षत्वात् समासः।

(छ) निगीर्णः कवलीकृतः गलादधोनीत इत्यर्थः। ते तव वशं गतः अधीनो जातः असौ बाल इति शेषः। क्षिप्तेत्यादेः नररत्नविशेषणत्वे तु क्षिप्तेत्यादौ सर्वत्र क्लीवलिङ्गं योज्यम्। नररत्नमिति नरेषु सुतरामुत्तमं वस्तु 'जातौ जातौ यदुत्कृष्टं तद् रत्नमिति कथ्यते' इति शास्त्रात्।

(ज) रूपातिशयेन तस्य बालस्य सौन्दर्य्यमहिम्ना मोहिता सुतरामाकृष्टा सती, अतिरागेण सातिशयेन प्रेम्ना।

(झ) सा मायावती, अति अत्यर्थं साभिलाषा तं प्रद्युम्नं प्रति सकामा बभूव।

(ञ) तत्र प्रद्युम्ने न्यस्ते अर्पिते हृदयम् अन्तरम् ईक्षणं नेत्रञ्च यया सा, आदौ केवलमान्तरमेव रागं तत्र सा पुपोष, इदानीं प्राप्तकाला बहिर्नेत्रादिभिरापि तत्र रागं प्रकटयामासेति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसज्जन्तीन्तु तामाह स कार्ष्णिः कमलेक्षणाम् ।
मातृभावमपाहाय किमेवं वर्त्तसेऽन्यथा(ट) ॥१४॥

सा चास्मै कथयामास न पुत्रस्त्वं ममेति वै ।
तनयं त्वामयं विष्णोर्हृतवान् कालशम्बरः ॥१५॥

क्षिप्तः समुद्रे मत्स्यस्य सम्प्राप्तो जठरान्मया ।
सा तु रोदिति ते माता कान्ताद्याप्यतिवत्सला(ठ)
॥१६

पराशर उवाच ।

इत्युक्तः शम्बरं युद्धे प्रद्युम्नः स समाह्वयत् ।
क्रोधाकुलीकृतमना युयुधे च महाबलः(ड) ॥१७॥

हत्वा सैन्यमशेषन्तु तस्य दैत्यस्य माधविः ।
सप्त माया व्यतिक्रम्य मायां प्रयुयुजेऽष्टमीम् (ढ) ॥१८

तया जघान तं दैत्यं मायया कालशम्बरम् ।
उत्पत्य च तया सार्द्धमाजगाम पितुर्गृहम्(ण) ॥१९

अन्तःपुरे निपतितं मायावत्या समन्वितम् ।
तं दृष्ट्वा कृष्णसंकल्पा बभूवुः कृष्णयोषितः(त) ॥२०॥

प्रसज्जन्तीं कामतः सज्जमानाम् अपाहाय हित्वा ॥१४॥ १५।१६।१७।१८।१९॥

(ट) कृष्णस्य अपत्यं कार्ष्णिः, अपत्यार्थे कृष्णशब्दात् ष्णिप्रत्ययेन कार्ष्णिरिति सिद्धम् । अन्यथा मार्य्याधात्वेन भोग्यस्त्रीजनोचितकामभावेनेत्यर्थः, किं कथं वर्त्तसे ।

(ठ) ते तव अतिवत्सला त्वयि पुत्रे सुतरां वात्सल्यवती माता अद्यापि त्वज्जन्मकालावधिक यौवनकालपर्य्यन्तातिदीर्घकालातिक्रमेऽपि, रोदिति त्वदीयस्मरणेनेति शेषः । एतेन तदीयमातृवात्सल्यस्य लोकविलक्षणातिशयो व्यज्यते, तेन तथाविधां मातरमुपेक्ष्य नाद्यापि त्वया वर्त्तितव्यं, किन्तु स्वं शत्रुं शम्बरं हत्वा तत्समीपमचिराद् गन्तव्यमिति मायावत्या आकूतं सूच्यते ।

(ड) समाह्वयत् सुतरां स्पर्द्धया आमन्त्रयामास । स्पर्द्धायामाङ्पूर्वस्य ह्वयतेः 'स्पर्द्धायामाङ' इत्यात्मनेपदे प्राप्ते परस्मै पदप्रयोग आर्षः । क्रोधेन सूतिकागृहात् स्वापहरणरूपापकारस्मरणप्रसूतेन शम्बरासुरं प्रति कोपातिशयेन आकुलीकृतं पूर्वं कोपकारणाभावादनाकुलमपि मायावत्या अपकारस्योपन्यासादनन्तरमेवाकुलं कृतं मनो यस्य सः ।

(ढ) माधवस्य कृष्णस्य अपत्यं माधविः, माधवशब्दात् ष्णिप्रत्ययार्थे ष्णिः । सप्त माया इत्यादि—एतच्च पूर्वमेव मायावत्या स्वगतसर्वमायानां प्रद्युम्नाय दानादुपपद्यते । तदुक्तमघस्तात्—'मायावती ददौ चास्मै सर्वा माया महात्मने' इति ।

(ण) तया अष्टम्या मायया, उत्पत्य आकाशमार्गेण ऊर्द्ध्वं समुत्थाय तयैव मायेति शेषः, तया मायावत्या सार्द्धम्, पितुः कृष्णस्य गृहं द्वारकां नाम पुरीमित्यर्थः । आजगाम स प्रद्युम्न इति शेषः ।

(त) अन्तःपुरे द्वारकाया इति शेषः, निपतितम् आकाशमार्गेण द्वारकाया उपरिभागमागत्य तस्मादूर्द्ध्वदेशादधस्तात् कृत्वावतरणमित्यर्थः । कृष्णयोषितः कृष्णस्य भार्य्याः कृष्णसंकल्पाः कृष्ण एवायमिति संकल्पात्मकचित्तवृत्तिशालिन्यः बभूवुः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रुक्मिणी चावदत् प्रेम्णा साश्रुदृष्टिरनिन्दिता ।
धन्यायाः खल्वयं पुत्रो वर्त्तते नवयौवने(थ) ॥२१॥

अस्मिन् वयसि पुत्रो मे प्रद्युम्नो यदि जीवति ।
सभाग्या जननी वत्स ! त्वया कापि विभूषिता ॥२२

अथवा यादृशः स्नेहो मम यादृग् वपुस्तव ।
हरेरपत्यं सुव्यक्तं भवान् वत्स ! भविष्यति ॥२३॥

पराशर उवाच

एतस्मिन्नन्तरे प्राप्तः सह कृष्णेन नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन्(ध) ॥२४॥

एष ते तनयः सुभ्रु ! हत्वा शम्बरमागतः ।
हृतो येनाभवद् बालो भवत्याः सूतिकागृहात् ॥२५॥

इयं मायावती भार्य्या तनयस्यास्य ते सती ।
शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम्(न) ॥२६॥

मन्मथे तु गते नाशं तदुद्भवपरायणा ।
शम्बरं मोहयामास मायारूपेण रूपिणी(प) ॥२७॥

व्यवायाद्युपभोगेषु (३) रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा(फ) ॥२८॥

कामोऽवतीर्णः पुत्रस्ते तस्येयं दयिता रतिः ।
विशङ्का नात्र कर्त्तव्या स्नुषेयं तव शोभना(ब) ॥२९॥

अतिसादृश्यात् कृष्णोऽयमिति संकल्पो मनोवृत्तिर्यासां ताः ॥२०।२१।२२।२३।२४।२५।२७॥

मदिरेक्षणा मदिरेव मादकमीक्षणं यस्याः सा ॥२८।२९॥

(थ) प्रेम्णा स्वपुत्रोचितशरीरसंस्थानवयोऽवस्थादिदर्शनेन [illegible] प्रति पुत्रोचितवात्सल्यभावेन । अथवा दृश्यमानस्य कुमारस्य [illegible]वयोऽवस्थादिदर्शनेन सुचिरात् पूर्वं सूतिकागृह एव विघटि[illegible] स्वीयपुत्रस्य जीवितस्य सतस्तथैव स्वरूपकल्पनया तद्गतस्नेहा[illegible]येन साश्रुः सवाष्पा दृष्टिः चक्षुः यस्याः सा, अनिन्दिता [illegible]पातिव्रत्यशालिनी, अनेन विशेषणेन कृष्णस्य योषिदन्त[illegible]या वैलक्षण्यविशेषो व्यज्यते, तथाहि अन्याः कृष्णयोषितः [illegible]म्नं दृष्ट्वा कृष्ण एवायमिति संकल्पवत्यो बभूवुः, तेन च [illegible]त्वेन तत्र तासां कामव्याकुलतापि समजनिष्ट, रुक्मिण्यास्तु [illegible]त्यसमुत्कर्षेण कृष्णशरीरादिगतविशेषविज्ञानसामर्थ्याद् [illegible]माने जने कृष्णभेदबुद्धिस्तया च तत्र कामभावानुद्रेक इत्यादि [illegible]। सूच्यते धन्यायाः सौभाग्यशालिन्याः अनेन पुत्रेणेति शेषः, [illegible] रमण्या अयं पुत्रः खलु नवयौवने वर्त्तते । मम तु [illegible]स्यापि पुत्रस्य सूतिकागृह एव हरणादेवं नवयौवनावस्थायां [illegible]सम्भवादहमत्यर्थमधन्येति प्रस्तुतमप्रस्तुताद् व्यज्यते ।

(द) मे मम पुत्रः प्रद्युम्नः यदि जीवति, अद्यापि यदि [illegible]सादात् समुच्छ्वसिति, तदा सः सम्प्रति अस्मिन् वयसि वर्त्तते इत्यर्थः । सभाग्येत्याद्युक्त्या त्वया त्वत्सदृशेन पुत्रेणाविभूषितत्वादहमभाग्यास्मीति रुक्मिण्या मनोगतं व्यज्यते ।

(ध) अन्तःपुरचरीम् अन्तःपुरगताम्, अन्तःपुरे चरतीति व्युत्पत्त्या अन्तःपुरपदोपपदाच्चरेष्टः, टकारानुबन्धप्रत्ययाच्च स्त्रियामीप् ।

(न) अत्र अस्याः शम्बरभार्य्यात्वाभावे कारणं ज्ञापको हेतुः ।

(प) तस्य हरकोपानलेन नष्टस्य मन्मथस्य उद्भवः पुनः समुत्पादः शरीरसम्बन्ध इति यावत्, स एव परं केवलम् अयनम् आलम्बनं लक्ष्यं वस्तु यस्याः तथाभूता । मायारूपेण रूपिणी मायाप्रसूतरूपाभिन्नरूपशालिनी सती । तथाहि येन रूपेण सा शम्बरं मोहितवती तद्रूपमस्या न स्वीयं स्वाभाविकं रूपम् अपि तु मायिकं मिथ्याभूतम्, अतः तेन रूपेण शम्बरस्य परपुरुषस्य मोहनेऽपि नास्याः पातिव्रत्यव्याघात इति भावः ।

(फ) व्यवायः रतिक्रियारूपो ग्राम्यधर्मः स आदिर्येषां तथाभूतेषु उपभोगेषु अस्या इति शेषः, 'व्यवायो ग्राम्यधर्मश्च रतं निधुवनञ्च सः' इति कोषात् ।

(ब) इयं मायावती तस्य तव पुत्ररूपेणावतीर्णस्य कामस्य दयिता प्रिया रतिः । अत्र अस्यां विशङ्का परपुरुषभोगादिशङ्का न कर्त्तव्या । स्नुषा पुत्रवधूः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो हर्षसमाविष्टा रुक्मिणी केशवस्तथा ।
नगरी च समस्ता सा साधु साध्वित्यभाषत ॥३०॥

चिरं नष्टेन पुत्रेण संयुक्तां प्रेक्ष्य रुक्मिणीम् ।
अवाप विस्मयं सर्व्वो द्वारवत्यां जनस्तदा ॥३१॥

इति श्रीविष्णुपुराणे पञ्चमांशे सप्तविंशः अध्यायः ।

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे सप्तविंशोऽध्यायः ॥

पाठान्तराणि —
(८—२)—प्रविवेशितः ।
(१०—२)—ग्रहं गतः ।
(२८—३)—विहाराद्युपभोगेषु— ।

अष्टाविंशोऽध्यायः

[रुक्मिवधः]

पराशर उवाच ।

चारुदेष्णं सुदेष्णञ्च चारुदेवञ्च वीर्य्यवान् ।
सुषेणं चारुगुप्तञ्च भद्रचारुं तथापरम्(क) ॥१॥
चारुविन्दं सुचारुञ्च चारुञ्च बलिनां वरम् ।
रुक्मिण्यजनयत् पुत्रान् कन्यां चारुमतीं तथा ॥२॥
अन्याश्च भार्य्याः कृष्णस्य बभूवुः सप्त शोभनाः ।
कालिन्दी मित्रविन्दा च सत्या नाग्नजिती तथा ॥३॥
देवी जाम्बवती चापि रोहिणी कामरूपिणी ।
मद्रराजसुता चान्या सुशीला शीलमण्डना(ख) ॥४॥
साग्नाजिती सत्यभामा लक्ष्मणा चारुहासिनी ।
षोड़शासन् सहस्राणि स्त्रीणामन्यानि चक्रिणः(ग)॥५॥
प्रद्युम्नोऽपि महावीर्य्यो रुक्मिणस्तनयां शुभाम् ।
स्वयंवरस्थां जग्राह (१) सा च तं तनयं हरेः ॥६॥
यस्यामस्याभवत् पुत्रो महाबलपराक्रमः ।
अनिरुद्धो रणे क्रुद्धो वीर्य्योदधिररिन्दमः ॥७॥
तस्यापि रुक्मिणः पौत्रीं वरयामास केशवः ।
दौहित्राय ददौ रुक्मी तां स्पर्द्धन्नपि शौरिणा ॥८॥

अष्टाविंशः अध्यायः

वीर्य्यवानिति वीर्य्यवन्तमित्यर्थः । प्रद्युम्नस्तु प्रागेवोक्तः ॥२।३॥

जाम्बवत्येव रोहिणीसंज्ञा । अतो न संख्याधिक्यम् अत एव तस्या ऋक्षजातित्वात् कामरूपिणीति विशेषणम् । केचित्तु रोहिणी नाम पट्टमहिषीतुल्या अन्यैवेति ब्रुवते । तथा चोपरिष्टात्तयोः सन्तानभेदोक्तिरुपपत्स्यते ॥४॥

हरेस्तनयञ्चकमे इति शेषः । शौरिणा स्पर्द्धमानोऽपि रुक्मी ददौ ॥८॥

(क) वीर्य्यवानिति द्वितीयान्तस्थाने प्रथमान्तप्रयोग आर्षः ।

(ख) शीलं चरित्रं मण्डनम् अलङ्कारः यस्याः सा प्रशस्तशीलशालिनी, सु शोभनं शीलं यस्या इति व्युत्पत्त्या नामधेयमस्या अन्वितार्थम् ।

(ग) सत्राजितस्य अपत्यं स्त्री सात्राजिती, ष्यञ्प्रत्ययान्तात् स्त्रियामीप् ।

(घ) स्पर्द्धन्नित्यात्मनेपदिनोऽपि धातोः शतृप्रत्यय आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्या विवाहे रामाद्या यादवा हरिणा सह ।
रुक्मिणो नगरं जग्मुर्नाम्ना भोजकटं द्विज ॥९॥
विवाहे तत्र निर्वृत्ते प्राद्युम्नेः सुमहात्मनः ।
कलिङ्गराजप्रमुखा रुक्मिणं वाक्यमब्रुवन् (ङ) ॥१०॥
अनक्षज्ञो हली द्यूते तथास्य व्यसनं महत् ।
न जयामो बलं कस्माद् द्यूतेनैनं महाद्युतेः(च) ॥११॥

पराशर उवाच ।

तथेति तानाह नृपान् रुक्मी बलसमन्वितः ।
सभायां सह रामेण चक्रे द्यूतञ्च वै तदा ॥१२॥
सहस्रमेकं निष्काणां रुक्मिणा विजितो बलः ।
द्वितीयेऽपि पणे चान्यत् सहस्रं रुक्मिणा जितम् ॥१३
ततो दश सहस्राणि निष्काणां पणमाददे ।
बलभद्रोऽजयत्तानि रुक्मी द्यूतविदां वरः ॥१४॥
ततो जहास स्वनवत् कलिङ्गाधिपतिर्द्विज !
दन्तान् विदर्शयन् मूढ़ो रुक्मी चाह मदोद्धतः(छ)॥१५
अविज्ञोऽयं मया द्यूते बलदेवः पराजितः ।
मुधैवाक्षावलेपान्धो यः स्वं मेनेऽक्षकोविदम् ॥१६॥
दृष्ट्वा कलिङ्गराजं तं प्रकाशदशनाननम् ।
रुक्मिणञ्चापि दुर्व्वाक्यं कोपं चक्रे हलायुधः ॥१७॥
ततः कोपपरीतात्मा निष्ककोटिं हलायुधः ।
ग्लहं जग्राह रुक्मी च तदर्थेऽक्षानपातयत् ॥१८॥
अजयद् बलदेवस्तं प्राहोच्चैस्तं जितं मया ।
मयेति रुक्मी प्राहोच्चैरलीकोक्तेरलं बल(ज) ॥१९॥
त्वयोक्तोऽयं ग्लहः सत्यं न ममैषोऽनुमोदितः ।
एवं त्वया चेद् विजितं मया न विजितं कथम्(झ)॥२०

सद्भाफलं वक्तुमाह—'तस्या विवाहे' इत्यादिना यावत्समाप्ति ॥९।१०।११॥

तथाप्यस्य द्यूते महद्व्यसनमस्ति ॥१२।१३॥

बलभद्रो निष्काणां सुवर्णचतुष्टयानां दश सहस्राणि समाददे। तानि च रुक्मी अजयत् ॥१४॥

स्वनवत् सशब्दं यथा भवत्येवं जहास ॥१५॥

द्यूते अविज्ञो ज्ञानशून्यः मुधा वृथैव अक्षाबलेपान्धः अक्षज्ञानगर्वमूढ़ः स्वम् आत्मानम् ॥१६॥

प्रकाशदशाननं विवृतदन्तमाननं यस्य तम् दुष्टानि वाक्यानि यस्य तम् ॥१७॥

ग्लहं पणम् ॥१८॥

तं ग्लहं तं रुक्मिणमुच्चैः सामर्षम् अलीकोक्तैः मिथ्याभाषणैः ॥१९॥

मया जितमित्यत्र रुक्मिणेत्यर्थः, हेतुमाह—'त्वयोक्तोऽयमिति ॥२०॥

(ङ) निर्वृत्ते निष्पन्ने सति, प्रद्युम्नस्य अपत्यं प्राद्युम्निः वसिष्ठः तस्य अपत्यार्थेष्णिः ।

(च) न अक्षज्ञः अनक्षज्ञः नैपुण्येनाक्षपतने अनभिज्ञः, हली बलरामः, एनं द्यूते वृथाव्यसनशालिनं बलं बलरामम् ।

(छ) दन्तानि दर्शयन्निति पाठे दन्तानीत्यत्र क्लीवलिङ्गप्रयोग आर्षः, 'रसना दशना दन्ता रदा' इति मनुष्यवर्गकोषात् ।

(ज) उत्तरार्द्धे मयेति रुक्मिणेत्यर्थः, जितमिति शेषः, रुक्मिण उक्तिरियम् ।

(झ) अयं निष्ककोटिरूपः ग्लहः पणः, त्वया उक्त इति सत्यं, किन्तु एषः ग्लहः मया रुक्मिणा न अनुमोदितः स्वीकृतः । तदेवमुभयस्वीकृतग्लहस्यैवाक्षपातनेन जये जयपराजयनियमात् तदभावेन अत्र तव जय इत्युक्तिरलीकैवेति भावः । एवम् अत्र पणे मत्स्वीकाराभावेन तव जयाभावेऽप्यलीकं जयमधिकृत्य यदि त्वया 'मया जित'मिति वक्तुं शक्यते, तदा मयापि अलीकमात्मजयमधिकृत्य कथं 'मया जित' मिति वक्तुं न शक्यम्, अतः 'मया जित' मित्यलीकोक्तिः परित्यज्यतामिति रुक्मिणो बलं प्रति विवक्षितं बोध्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथान्तरिक्षे वागुच्चैः प्राह गम्भीरनादिनी ।
बलदेवस्य तत्कोपं वर्द्धयन्ती महात्मनः(ञ) ॥२१॥
जितं बलेन धर्म्मेण रुक्मिणो भाषितं मृषा ।
अनुक्तापि वचः किञ्चित् कृतं भवति कर्म्मणा ॥२२॥
ततो बलः समुत्थाय कोपसंरक्तलोचनः ।
जघानाष्टापदेनैव रुक्मिणं सुमहाबलः(ट) ॥२३॥
कलिङ्गराजञ्चादाय विस्फुरन्तं बलाद् बलः ।
बभञ्ज दन्तान् कुपितो यैः प्रकाशं जहास सः(ठ) ॥२४
आकृष्य च महास्तम्भं जातरूपमयं बलः ।
जघान येऽन्ये तत्पक्षा भूभृतः कुपितो बलात्(ड) ॥२५
ततो हाहाकृतं सर्व्वं पलायनपरं द्विज !
तद्राजमण्डलं भीतं बभूव कुपिते बले ॥२६॥
बलेन निहतं श्रुत्वा रुक्मिणं मधुसूदनः ।
नोवाच किञ्चिन्मैत्रेय ! रुक्मिणी-बलयोर्भयात्(ढ) ॥२७
ततोऽनिरुद्धमादाय कृतोद्वाहं द्विजोत्तम !
द्वारकामाजगामाथ यदुचक्रं सकेशवम् (४)(ण)॥२८॥

इति श्रीविष्णुपुराणे पञ्चमांशे अष्टाविंशः अध्यायः ॥

यदुक्तं रुक्मिणा मयैषोऽनुमोदित इति तत्राह अशरीरवाक् ॥२१॥

अनुक्तवापीति अनुमोदकवचनमनुक्तवापि कर्मणैवाक्षपातनादिरूपेणानुमोदनं कृतं भवति। अन्यथा अनुमोदनोत्तरकालीनस्याक्षपातनादेः कर्मणोऽसम्भवात् ॥२२

अष्टापदेन अक्षद्यूतफलकेन ॥२३।२४॥

जातरूपमयं स्वर्णमयं महान्तं स्तम्भं सभामण्डपस्थमाकृष्य तेनैव जघान ॥२८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे अष्टाविंशोऽध्यायः।

(ञ) वाक् अशरीरिणी दैववाणी, महात्मनः प्रशस्तस्वभावस्य बलदेवस्य तत्कोपं 'मया जितम्' 'अलीकोक्तैरलं बल' इति रुक्मिणः प्रागुक्तवचसैव समुद्भूतं रुक्मिणं प्रति क्रोधम् वर्द्धयन्ती वृद्धिं नयन्ती। प्रकृतदैववाण्या रुक्मिणं प्रति बलदेवकोपवर्द्धनप्रयोजकत्वञ्च प्रशस्तस्वभावस्य बलदेवस्यातिदुर्णयविरोधित्वात् रुक्मिणो दुर्णयस्य कथनादिकं द्वारीकृतेति ध्येयम्। बलदेवस्य महात्मन इति विशेषणं तत्सूचकमिति मन्तव्यम्। अथवा महात्मानः अन्यैः स्वेषु मिथ्याभाषित्वाद्यपवादमारोपितं न सहन्ते, अपवादकान् प्रति च कुप्यन्ति, सोऽयमपवादो यदा केनापि दृढ़प्रमाणेन मिथ्येति प्रतिपाद्यते, तदा तत्कोपस्य वृद्धिर्भवति, अत्रापि तथा। अत एव प्रकृते महात्मन इति बलदेवस्य विशेषणमुपात्तम् इति चिन्त्यम्।

(ट) कोपेन वृद्धिं गतेन क्रोधेन संरक्ते अतिमात्रलोहिते लोचने यस्य तथाभूतः।

(ठ) बलात् बलजनिताहङ्कारात् विस्फुरन्तं बहुधा सञ्चलत्कलेवरम्। बलस्य तथा दर्पमसहमानमिति भावः।

(ड) तस्य कलिङ्गराजस्य पक्षाः पक्षाश्रिताः भूभृतः राजानः।

(ढ) मधुसूदनः किञ्चित् हर्षसूचकं विषादसूचकं वा न उवाच। कुत इत्याह रुक्मिणीत्यादि। तथाहि यदि अत्र हर्षसूचकं वाक्यमुच्यते, तदा रुक्मिणो भगिनी रुक्मिणी कुप्येत्, यदि तत्कोपपरिहारार्थं विषादसूचकं वचनमुच्यते, तदा तद्वधकारी बलभद्रः कुप्येदत एव तदुभयपरिहारेण माध्यस्थ्यमेव स्वीकृतं श्रीकृष्णेनेति भावः।

(ण) कृतः उद्वाहो येन तम्।

पाठान्तराणि—

(६—१) स्वयवरे ता जग्राह— ।
(२५—३) जघान तान् ये तत्पक्षे थूथूतः कुपितो वृशम्।
(२७—४) यदुचक्रञ्च कृशवः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकोनत्रिंशः अध्यायः

[नरकासुरवधः]

पराशर उवाच ।

द्वारवत्यां ततः शौरिं (१) शक्रस्त्रिभुवनेश्वरः ।
आजगामाथ मैत्रेय ! मत्तैरावतपृष्ठगः(क) ॥१॥

प्रविश्य द्वारकां सोऽथ समेत्य हरिणा ततः ।
श्रवणामास दैत्यस्य नरकस्य विचेष्टितम् ॥२॥

त्वया नाथेन देवानां मनुष्यत्वेऽपि तिष्ठता ।
प्रशमं सर्व्वदुःखानि नीतानि मधुसूदन ॥३॥

तपस्वि-जननाशाय सोऽरिष्टो धेनुकस्तथा ।
चाणूरो मुष्टिकः केशी ते सर्व्वे निहतास्त्वया(ख)॥४॥

कंसः कुवलयापीड़ः पूतना बालघातिनी ।
नाशं नीतास्त्वया सर्व्वे येऽन्ये जगदुपद्रवाः ॥५॥

युष्मद्दोर्दण्ड-सद्बुद्धि (२) परित्राते जगत्त्रये ।
यज्वियज्ञांशसम्प्राप्त्या तृप्तिं यान्ति दिवौकसः(ग) ॥६

सोऽहं साम्प्रतमायातो यन्निमित्तं जनार्द्दन !
तच्छ्रुत्वा तत्प्रतीकारप्रयत्नं कर्त्तुमर्हसि ॥७॥

भौमोऽयं नरको नाम्ना प्राग्ज्योतिषपुरेश्वरः ।
करोति सर्व्वभूतानामुपघातमरिन्दम ॥८॥

देवसिद्धासुरादीनां नृपाणाञ्च जनार्द्दन !
हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे ॥९॥

छत्रं यत् सलिलस्रावि तज्जहार प्रचेतसः ।
मन्दरस्य तथा शृङ्गं हृतवान् मणिपर्व्वतम्(घ) ॥१०

एकोनत्रिंशः अध्यायः

इदानीं भौमवधप्रसङ्गेन हरेः सहस्रशो भार्यालाभं वक्तुं तत्रादित्यागमनादिमाह—'द्वारवत्यामि'त्यादिना 'प्रविमृष्यता'-न्तेनान्तेन ॥१-५॥

(क) मत्तस्य मदोन्मत्तस्य ऐरावतस्य स्ववाहनभूतस्य पृष्ठगः पृष्ठं गच्छतीति तथाभूतः । ऐरावतस्य मत्तेति विशेषणं दैत्यजितिलाभाय ।

(ख) तपस्विजनानां नाशाय ध्वंसरूपफलाय तज्जनक इत्यर्थः, तादर्थ्ये चतुर्थी ।

यज्विनां यज्ञांशाः यज्ञभागास्तेषां सम्प्राप्त्या ॥६-१०॥

(ग) युष्माकं दोर्दण्डेन बाहुदण्डेन तथा सद्बुद्धया हित-कारिण्या चतुरमत्या परित्राते रक्षिते । दोर्दण्डेन रक्षितं कंसादिभ्यः, चतुरमत्या च रक्षितं कालयवनादिभ्यः । दिवौकसः स्वर्गस्थिताः यज्ञहविर्जीवना देवा इत्यर्थः ।

(घ) सलिलं जलं स्रावयितुं शीलं यस्य तत् सलिलस्रावि । अन्यत्र तु वारुणस्य छत्रस्य काञ्चनस्रावित्वं लभ्यते, यथोक्तं सप्तशत्यां देवीमाहात्म्ये 'छत्रन्ते वारुणं गेहे काञ्चनस्रावि तिष्ठती'ति । प्रचेतसः वरुणस्य, 'प्रचेता वरुणः पाशी'त्यादि-कोषात् । मणिपर्वतं रत्नमयशैलं, शृङ्गं शिखरम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अमृतस्राविणी दिव्ये मन्मातुः कृष्ण ! कुण्डले ।
जहार सोऽसुरोऽदित्या वाञ्छत्यैरावतं गजम्(ङ)॥११
दुर्णीतमेतद् गोविन्द ! मया तस्य तवोदितम् ।
यदत्र प्रतिपत्तव्यं तत् स्वयं प्रविमृष्यताम् (च) ॥१२॥

पराशर उवाच ।

इति श्रुत्वा स्मितं कृत्वा भगवान् देवकीसुतः ।
गृहीत्वा वासवं हस्ते समुत्तस्थौ वरासनात् ॥१३॥
चिन्तयामास च विभुर्मनसा पन्नगाशनम् ।
सञ्चिन्तितमुपारुह्य गरुड़ं गगनेचरम् ।
सत्यभामां समारोप्य यौ प्राग्ज्योतिषं पुरम् ॥१४॥
आरुह्यैरावतं नागं शक्रोऽपि त्रिदिवालयम् ।
ततो जगाम मैत्रेय ! पश्यतां द्वारकौकसाम् ॥१५॥
प्राग्ज्योतिषपुरस्यासीत् समन्ताच्छतयोजनम् ।
आचिता मौरवैः पाशैः क्षुरान्तैर्भूर्द्विजोत्तम ॥१६॥
तांश्चिच्छेद हरिः पाशान् क्षिप्त्वा चक्रं सुदर्शनम् ।
ततो मुरुः समुत्तस्थौ तं जघान च केशवः(छ) ॥१७॥
मुरोश्च तनयान् सप्त सहस्रांस्तांस्ततो हरिः ।
चक्रधाराग्निनिर्दग्धांश्चकार शलभानिव(ज) ॥१८॥
हत्वा मुरुं हयग्रीवं तथा पञ्चजनं द्विज !
प्राग्ज्योतिषपुरं धीमांस्त्वरावान् समुपागतः ॥१९॥
नरकेणास्य तत्राभून्महासैन्येन संयुगः ।
कृष्णस्य यत्र गोविन्दो जघ्ने दैत्यान् सहस्रशः(झ)॥२०
शस्त्रास्त्रवर्षं मुञ्चन्तं भौमं तं नरकं बली ।
क्षिप्त्वा चक्रं द्विधा चक्रे चक्री दैतेयचक्रहा ॥२१॥
हते तु नरके भूमिर्गृहीत्वादितिकुण्डले ।
उपतस्थे जगन्नाथं वाक्यं चेदमथाब्रवीत्(ञ) ॥२२॥

पृथिव्युवाच

यदाहमुद्धृता नाथ ! त्वया शूकरमूर्त्तिना ।
त्वत्स्पर्शसम्भवः पुत्रस्तदायं मय्यजायत ॥२३॥

कुण्डले जहार ॥११॥

दुर्णीतमन्यायः ॥१२॥

सम्प्रति कार्यार्थं मामुपसर्पति, कृतकार्यस्तु पारिजातार्थं मया विरोत्स्यत इति स्मितं कृत्वा ॥१३॥

सञ्चिन्तितं स्मृतिमात्रेणोपगतम्। सत्यभामां समारोप्येत्यत्र हरिवंशोक्तं कारणं द्रष्टव्यम्। तद्यथा नारदानीते परिजातकुसुमे रुक्मिण्यै दत्ते तदीर्ष्याप्रकुपितां सत्यभामां सान्त्वयता भगवतोक्तं—तुभ्यं परिजाततरुमेवाहरिष्यामीति, तदर्थं तां निन्य इति ॥१४।१५॥

क्षुरान्तैः क्षुरधारावत्तीक्ष्णैः मौरवैः मुरुसंज्ञेन राक्षसेन निर्मितैराचिता व्याप्ता भूरासीत् ॥१६।१७॥

सप्त सहस्राणि परिमाणं येषां तान् ॥१८।१९॥

महत् सैन्यं यस्य तेन ॥२०॥

(ङ) अमृतस्राविणी पीयूषक्षरणकारिणी, मम मातुः अदित्याः ।

(च) प्रविमृष्यतां विशेषतो विचार्य्यताम् ।

(छ) मुरुः तन्नामा तत्पाशनिर्मांता राक्षसः । तं मुरुनामानं राक्षसम् ।

(ज) चक्रस्य सुदर्शनस्य धारा एव अग्निः तेन निर्दग्धान् निःशेषं दग्धान् शलभान् पतङ्गविशेषानिव ।

(झ) संयुगः युद्धम्, भौमं भूमेः पृथिव्याः अपत्यम्, दैत्यानां चक्राणि सैन्यानि हन्ति यः सः दैत्यचक्रहा ।

(ञ) अदितेः वासवस्य मातुः तदाख्यायाः, कुण्डले नरकेण हृतपूर्वं कुण्डलयुगलम् ।

(ट) तव स्पर्शात् सम्भवः उत्पत्तिर्यस्य सः, अयं नरकः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राज्यं त्वयैव दत्तो मे त्वयैव विनिपातितः ।
हरण कुण्डले चेमे पालयास्य च सन्ततिम्(ठ) ॥२४॥
भारावतारणार्थाय ममैव भगवानिमम् ।
अंशेन लोकमायातः प्रसादसुमुखः प्रभो ॥२५॥
त्वं कर्त्ता त्वं विकर्त्ता च संहर्त्ता प्रभवोऽप्ययः ।
जगतां त्वं जगद्रूपः स्तूयतेऽच्युत ! किं तव ॥२६॥
व्यापी व्याप्यः क्रिया कर्त्ता कार्य्यञ्च भगवान् यथा ।
सर्व्वभूतात्मभूतस्य स्तूयते तव किं तदा(ड) ॥२७॥
परमात्मा च भूतात्मा महात्मा चाव्ययो भवान् ।
कथा तदा स्तुतिर्नाथ ! किमर्थं ते प्रवर्त्तते(ढ) ॥२८॥
प्रसीद सर्व्वभूतात्मन् ! नरकेण हि यत् कृतम् ।
तत् क्षम्यतामदोषाय त्वत्सुतः त्वन्निपातितः ॥२९॥

पराशर उवाच ।

एवंति चोक्त्वा धरणीं भगवान् भूतभावनः ।
रत्नानि नरकावासाज्जग्राह मुनिसत्तम ॥३०॥
कन्यापुरे स कन्यानां षोड़शातुलविक्रमः ।
शताधिकानि ददृशे सहस्राणि महामते(ण)(१) ॥३१
चतुर्दन्तान् गजाश्चोग्रचान् षट्सहस्रान् स दृष्टवान् (२) ।
काम्बोजानां तथाश्वानां नियुतान्येकविंशतिम्(त)॥३२
कन्यास्ताश्च तथा (३) नागांस्तानश्वान् द्वारकां पुरीम् ।
प्रेषयामास (४)गोविन्दः सद्यो नरककिङ्करैः ॥३३॥
ददृशे वारुणं छत्रं तथैव मणिपर्व्वतम् ।
आरोपयामास हरिर्गरुड़े पन्नगाशने(थ) (५)॥३४॥
आरुह्य च स्वयं कृष्णः सत्यभामा-सहायवान् ।
अदित्याः कुण्डले दातुं जगाम त्रिदिवालयम्
(६) ॥३५॥

इति श्रीविष्णुपुराणे पञ्चमांशे एकोनत्रिंशः अध्यायः ॥

जगतां त्वं कर्त्ता उत्पादकः । विकर्त्ता विशेषेण वृष्ट्यादिना धर्त्ता पोषकः । प्रभवन्त्यस्मादिति प्रभव उपादानकारणम् । अप्ययोऽस्मिन्नित्यप्ययो लयस्थानम् । अत एव जगद्रूपश्चत्वम् अजस्रप्रभावादिकं किं मया स्तूयते कथं स्तोतुं शक्यते ॥२६ इतश्च स्तोतुं न शक्यमित्याह,—'व्यापी'ति द्वाभ्याम् ॥२७-२८॥

किञ्च अदोषाय दोषनिवृत्त्यर्थं त्वत्पुत्रोऽपि त्वयैव निपातितः वधदण्डेन निष्पापः कृतः, किमत्र मया प्रार्थ्यमिति भावः ॥२९-३१॥

षट्सहस्रान् षट् सहस्राणि संख्या येषां तान् । नियुतानि दश लक्षाणि ॥३२-३५॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे एकोनत्रिंशोऽध्यायः ।

(ठ) अस्य नरकस्य सन्ततिं कुलम्,

(ड) सर्वभूतानि आत्मभूतानि आत्मस्वरूपाणि यस्य तस्य सर्वभूतस्वरूपस्येत्यर्थः ।

(ढ) स्तुतिर्नास्ति किमर्थां इति पाठे किमर्थां कस्यार्थस्य हेतोरादिका ते तव प्रवर्त्तते स्तुतिरिति शेषः । देवानां स्वरूपकथनस्य स्तुतित्वादनन्तालौकिक स्वरूपस्य तव स्वरूपस्य केनापि वक्तुमशक्यत्वादिति भावः ।

(ण) कर्त्तरि ददृश इति प्रयोग आर्षः ।

(त) चतुर्दन्तानिति चत्वारः दन्ता येषां तान् गजान्, गजानां चतुर्दंष्ट्रत्वस्यातिदुर्लभत्वाद् विशेषेणोपादानम् ।

(थ) अत्रापि ददृशे इत्यार्षम् । वारुणं वरुणस्य इदमिति ष्णः ।

पाठान्तराणि—

(१—१) द्वारवत्यां स्थिते कृष्णे— ।
(१—२) युष्मत्दोर्दण्डसम्भुति— ।
(३१—३)—महामुने ।
(३२—४)चतुर्दन्तान् गजांश्चाग्रान् षट् सहस्रांश्च दृष्टवान् ।
(३३—३) ताः कन्यास्तांस्तथा— ।
(३३—४) प्रापयामास— ।
(३४—५)—पतगेश्वरे ।
(३५—६) त्रिदशालयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्रिंशोऽध्यायः

[पारिजातहरणम् ।]

पराशर उवाच ।

गरुड़ो वारुणं छत्रं तथैव मणिपर्व्वतम् ।
सभार्य्यञ्च हृषीकेशं लीलयैव वहन् ययौ ॥१॥
ततः शङ्खमुपाध्मासीत् स्वर्गद्वारगतो हरिः ।
उपतस्थुस्तथा देवाः सार्घ्यहस्ता जनार्द्दनम्(क) ॥२॥
स देवैरर्चितः कृष्णो देवमातुर्निवेशनम् ।
सिताभ्रशिखराकारं प्रविश्य ददृशेऽदितिम्(ख) ॥३॥
स तां प्रणम्य शक्रेण सह ते कुण्डलोत्तमे ।
ददौ नरकनाशञ्च शशंसास्यै जनार्द्दनः ॥४॥
ततः प्रीता जगन्माता धातारं जगतां हरिम्(ग) ।
तुष्टावादितिरव्यग्रा कृत्वा त्वत्प्रवणं मनः ॥५॥

अदितिरुवाच ।

नमस्ते पुण्डरीकाक्ष ! भक्तानामभयङ्कर ।
सनातनात्मन् सर्व्वात्मन् ! भूतात्मन् ! भूतभावन ॥६॥
प्रणेता मनसो (१) बुद्धेरिन्द्रियाणां गुणात्मक !
त्रिगुणातीत ! निर्द्वन्द्व ! शुद्धसत्त्व ! हृदि स्थित ॥७॥
सितदीर्घादिनिःशेष-कल्पनापरिवर्ज्जित !
जन्मादिभिरसंस्पृष्ट ! स्वप्नादिपरिवर्ज्जित ॥८॥
सन्ध्या रात्रिरहोभूमिर्गगनं वायुरम्बु च ।
हुताशनो मनो बुद्धिर्भूतादिस्त्वं तथाच्युत ॥९॥
सृष्टि-स्थिति-विनाशानां कर्त्ता कर्त्तृपतिर्भवान् !
ब्रह्म-विष्णु-शिवाख्याभिरात्ममूर्त्तिभिरीश्वर ॥१०॥
देवा यक्षास्तथा दैत्या राक्षसाः सिद्ध-पन्नगाः ।
कुष्माण्डाश्च पिशाचाश्च गन्धर्व्वा मनुजास्तथा ॥११॥
पशवो मृगमातङ्गास्तथैव च (२) सरीसृपाः ।
वृक्ष-गुल्म-लता बल्ल्यः समस्तास्तृणजातयः ॥१२॥

त्रिंशः अध्यायः

उपाध्मासीत् वादितवान् ॥२।३।४॥

तत्प्रवणं तदेकाग्रम् ॥५॥

सनातनात्मन् नित्यमूर्त्ते, सर्वात्मन् सर्वान्तर्यामिन्, भूतात्मन् भूतरूप, भूतभावन भूतोत्पादक ॥६॥

प्रणेता कर्त्ता, गुणात्मकेत्यनेन तमसा भूतभावकत्वं सत्त्वेन मनसः प्रणेतृत्वं, रजसा च बुद्धेरिन्द्रियाणाञ्च प्रणेतृत्वं समर्थ्यते। वस्तुतस्तु त्रिगुणातीत अतो निर्द्वन्द्व! एवं भूततया शुद्धसत्त्वानां ज्ञानिनां हृदि स्थित ॥७॥

सितदीर्घाद्याभिर्वर्णपरिमाणाद्याभिर्निःशेषाभिः कल्पनाभिः परिवर्जित, जन्मादिभिर्विकारैरसंस्पृष्ट, स्वप्नादिभिरवस्थाभिः परिवर्जित ॥८।९॥

ब्रह्मादिसंज्ञाभिः स्वमूर्त्तिभिः स्वयमेव सृष्ट्यादीनां कर्त्ता। कर्त्तृपतिः अवान्तरसृष्ट्यादिकर्त्तॄणां दक्षादीनां पतिः ॥१०।११॥

(क) अर्घ्यपात्रेण सह वर्त्तमानाः सार्घ्यपात्राः भगवतः श्रीकृष्णस्य प्रत्युद्गमनार्थमिति शेषः। उपतस्थुः उपगताः। उपतस्थुरर्चित्तवन्त इति वा।

(ख) देवमातुः अदितेः निवेशनं मन्दिरम्, अत्रापि ददृशे इत्यार्षम्।

(ग) जगन्माता जगतां मातृस्वरूपा देवमातृत्वादिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थूला मध्यास्तथा सूक्ष्माः स्थूल-सूक्ष्मतराश्च ये(३) ।
देहभेदा भवान् सर्व्वे ये केचित् पुद्गलाश्रयाः(घ)॥१३
माया तवेयमज्ञातपरमार्थातिमोहिनी ।
अनात्मन्यात्मविज्ञानं यया मूढ़ो निरुध्यते(ङ) ॥१४॥
अस्वे स्वमिति भावोऽत्र यत् पुंसामुपजायते ।
अहं ममेति भावोऽत्र यत् प्रायेणाभिजायते ।
संसारमातुर्मायायास्तवैतन्नाथ ! चेष्टितम्(च) ॥१५॥
यः स्वधर्म्मपरैर्नाथ ! नरैराराधितो भवान् ।
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ॥१६॥
ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा ।
विष्णुमायामहावर्त्तमोहान्धतमसावृताः ॥१७॥
आराध्य त्वामभीप्सन्ते कामानात्ममवक्षयम् ।
वदेते पुरुषा माया सैवेयं भगवंस्तव ॥१८॥

मया त्वं पुत्रकामिन्या वैरिपक्षक्षयाय च (४) ।
आराधितो न मोक्षाय मायाविलसितं हि तत् ॥१९॥
कौपीनाच्छादनप्राया वाञ्छा कल्पद्रुमादपि ।
जायते यदपुण्यानां सोऽपराधः स्वदोषजः ॥२०॥
तत् प्रसीदाखिलजगन्मायामोहकराव्यय !
अज्ञानं ज्ञानसद्भावभूतं भूतेश ! नाशय ॥२१॥
नमस्ते चक्रहस्ताय शार्ङ्गहस्ताय ते नमः ।
गदाहस्ताय ते विष्णो ! शङ्खहस्ताय ते नमः ॥२२॥
एतत् पश्यामि ते रूपं स्थूलचिह्नोपलक्षितम् ।
न जानामि परं यत्ते प्रसीद परमेश्वर ॥२३॥

पराशर उवाच ।

अदित्यैवं स्तुतो विष्णुः प्रहस्याह सुरारणिम् ।
माता देवि ! त्वमस्माकं प्रसीद वरदा भव ॥२४॥

पूर्यन्ते गलन्ति चेति पुद्गलाः वृद्ध्यपक्षयभाजो येऽवयवा-स्तदाश्रयाः देहभेदाः । यथाहुः—'पूरणाद् गलनाद्देहे पुद्गलाः प्रमाणव' इति ॥१३॥

अथ मायास्वरूपानुवादपूर्वकं तन्निवृत्तिं प्रार्थयते—'मया त्वं'त्यादिना 'नाशं नये'त्यन्तेन । अज्ञातपरमार्थानां जीवाना-मतिमोहिनी । मोहनमेवाह—'अनात्मनी'ति ॥१४॥

एतत् स्पष्टयति,—संसारस्य मातुर्जनन्यास्तव मायाया-श्चेष्टितम् ॥१५॥

विष्णुमायाया ये महान्त आवर्त्ताः स्वदेहेऽहं-ममाभि-मानाः तेषु मोहान्धतमसं कर्त्तृत्वभोक्तृत्वाभिनिवेशरूपं तेनावृताः ॥१७।१८-१९॥

स्वदोषजः स्वकर्मजः ॥२०॥

ज्ञानसद्भावभूतं विद्वानहमित्यभिमानात्मकम् ॥२१॥

प्रहस्य हासेन मोहयित्वा सुरारणिं सुराणां जन्मभूमिं मातरम् ॥२४॥

(घ) स्थूलसूक्ष्मतराश्च स्थूलतराः सूक्ष्मतराश्चेत्यर्थः, [illegible] परं श्रूयमाणस्य प्रत्येकमभिसम्बन्धात् ।

(ङ) अनात्मनि आत्मभिन्ने देहादौ आत्मविज्ञानम् [illegible]सम्बन्धेन आत्मप्रकारकं ज्ञानम् । यया मायया मूढ़ः [illegible]ध्यते आविश्यते ।

(च) अत्र संसारे, अस्वे स्वस्वत्वशून्ये वस्तुनि यत् स्वं [illegible]दिति भावः भावना बुद्धिरित्तर्थः अहं ममेति भावः [illegible] ममकारश्चेत्यर्थः । चेष्टितं विलसितं कार्य्यमित्यर्थः ।

(छ) आत्मनः भवः जन्म, क्षयः विनाशश्च यस्मात् तद् यथा [illegible], कामान् भोग्यविषयान् अभीप्सन्ते आप्तुमिच्छन्ति इति [illegible] तवैव माया मायाप्रभवं वस्त्वित्यर्थः । अभीप्सन्ते [illegible]मार्षम् ।

(ज) कल्पद्रुमात् निखिलकाम्यवस्तुप्रदानक्षमात् कल्प-वृक्षादपि यत् अपुण्यानां शुभादृष्टरहितानां जीवानां कौपीनाच्छादन-प्राया प्रायेण कौपीनवस्त्राद्यालम्बना वाञ्छा कामना जायते, स तेषां स्वदोषजः अपराधः । अतो मया यत् त्वत्सकाशात् मोक्षं लब्धुमनिच्छन्त्या वैरिपक्षक्षयार्थं भवदाराधना कृता तत्र स्वयमेवा-हमपराधिनीति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अदितिरुवाच ।

एवमस्तु यथेच्छा ते त्वमशेषैः सुरासुरैः ।
अजेयः पुरुषव्याघ्र ! मर्त्यलोके भविष्यसि ॥२५॥

पराशर उवाच ।

ततोऽनन्तरमेवास्य शक्राणीसहितादितिम् (५) ।
सत्यभामा प्रणम्याह प्रसीदेति पुनः पुनः(झ) ॥२६॥

अदितिरुवाच ।

मत्प्रसादान्न ते सुभ्रु ! जरा वैरूप्यमेव च ।
भविष्यत्यनवद्याङ्गि ! सुस्थिरं नवयौवनम् ॥२७॥

पराशर उवाच ।

अदित्या तु कृतानुज्ञो देवराजो जनार्दनम् ।
यथावत् पूजयामास बहुमानपुरःसरम् ॥२८॥

शची च सत्यभामायै पारिजातस्य पुष्पकम् ।
न ददौ मानुषीं मत्वा स्वयं पुष्पैरलङ्कृता ॥२९॥

ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् ।
देवोद्यानानि हृद्यानि नन्दनादीनि सत्तम ॥३०॥

ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
नित्याह्लादकरं ताम्रबालपल्लवशोभितम् ॥३१॥

मथ्यमानेऽमृते जातं जातरूपोपमत्वचम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः(ञ) ॥३२॥

तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम !
कस्मान्न द्वारकामेष नीयते देवपादपः (६) ॥३३॥

यदि ते तद्वचः सत्यं सत्यात्यर्थं (७) प्रियेति मे ।
मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः(ट) ॥३४॥

न मे जाम्बवती तादृगभीष्टा न च रुक्मिणी ।
सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत् प्रियम् ॥३५॥

सत्यं तद् यदि गोविन्द ! नोपचारकृतं तव ।
तदस्तु पारिजातोऽयं मम गेहविभूषणम् ॥३६॥

बिभ्रती पारिजातस्य केशपक्षेण मञ्जरीम् ।
सपत्नीनामहं मध्ये शोभेयमिति कामये(ठ) ॥३७॥

पराशर उवाच ।

इत्युक्तः सम्प्रहस्यैनं (८) पारिजातं गरुत्मति ।
आरोपयामास हरिस्तमूचुर्वनरक्षिणः ॥३८॥

मोहिता सत्युवाच—'एवमस्त्वि'त्यादि ॥२५।२६॥

निष्कुटार्थाय गृहोद्यानार्थम् ॥३३।३४।३५॥

केशपक्षेण बहुकेशभरेण ॥३६॥

(ऋ) शक्राणी इन्द्राणी शची तत्सहिता। अष्टात्रिंश-श्लोकात् परम् एष एकोनत्रिंशः श्लोकः सर्वत्र पुस्तके न दृश्यते, किन्तु निरुक्तश्लोकस्य प्राकरणिकार्थं विशेषोपयोगादयमत्र नोपेक्षित इति ध्येयम्।

(ञ) जातरूपसमा सुवर्णतुल्यवर्णा त्वक् यस्य तथाभूतम्। 'चामीकरं जातरूपं महारजतकाञ्चने' इति कोषात्।

(ट) सत्या सत्यभामा मे मम श्रीकृष्णस्य अत्यर्थं प्रि इति ते तद् वचः पूर्वोक्तं वचः यदि सत्यम्। मम गेहस्य निष्कुटः आरामः उपवनमित्यर्थः तदर्थाय, 'गृहारामास्तु निष्कु इति कोषात्।

(ठ) उपचारकृतं मिथ्यारोपप्रयुक्तं यदि नेत्यर्थः, तथा यदि सत्यभामायां मयि तव सत्यतया प्रीत्यभावेऽपि सत्यभा मे सर्वतः प्रियेति मिथ्यारोपेण नोक्तवानसि तदेत्यर्थः।

(ड) शोभेयमित्यत्र शुभेरात्मनेपदिनः परस्मैपदमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शचीं शची देवराजस्य महिषी तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम्*॥३९॥

शचीविभूषणार्थाय देवैरमृतमन्थने ।
समुत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि (ड)॥४०॥

देवराजो मुखप्रेक्षी यस्यास्तस्याः परिग्रहम् ।
मौढ्यात् प्रार्थयसे क्षेमी गृहीत्वैनं
हि को व्रजेत् ॥४१॥

अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः(ढ) ॥४२॥

तदलं सकलैर्देवैर्विग्रहेण तवाच्युत !
विपाककटु यत् कर्म्म तन्न शंसन्ति पण्डिताः(ण)॥४३

पराशर उवाच ।

इत्युक्ते तैरुवाचैतान् सत्यभामातिकोपिनी ।
का शची पारिजातस्य को वा शक्रः सुराधिपः ॥४४

सामान्यः सर्व्वलोकानां यद्येषोऽमृतमन्थने ।
समुत्पन्नः सुराः (९) कस्मादेको गृह्णाति वासवः
॥४५॥

यथा सुरा यथैवेन्दुर्यथा श्रीर्वनरक्षिणः ।
सामान्याः सर्व्वलोकस्य पारिजातस्तथा द्रुमः(त)॥४६

भर्त्तृबाहुमहागर्व्वाद् रुणद्धयेनं यथा शची ।
तत् कथ्यतामलं क्षान्त्या सत्या हारयति द्रुमम्(थ)॥४७

कथ्यताञ्च द्रुतं गत्वा पौलोम्या वचनं मम ।
सत्यभामा वदत्येतदतिगर्वोद्धताक्षरम्(द) ॥४८॥

औत्सुक्यात् स्त्रियोऽनर्थं न जानन्तीति प्रहस्य ॥३६-४०॥
निष्कृतिं यास्यति प्रतीकारं करिष्यति ॥४१॥

(ड) शच्याः इन्द्रमहिष्याः पुलोमजायाः विभूषणं विशेषेण वज्रदूषणम् तदर्थाय तद्रूपप्रयोजनाय । क्षेमी कुशली न गमिष्यसि, तथाहि यदि आत्मनः क्षेममभीष्टं तदा एनं पारिजातं परिहायैव गच्छेति भावः ।

(ढ) वज्रं इन्द्रस्य विशेषप्रहरणं कुलिशं उद्यतम् उत्थापितं येन तथाभूतः करो यस्य तम् । आहिताग्न्यादिषु पाठस्वीकारादुद्यतेत्यस्य परनिपातः । अथवा वज्रेण उद्यतः युद्धोद्यमयुक्तः करो यस्य तम् । तथाहि एकतः पुरन्दरो वज्रकरः, अन्यतश्च सकलदेवाः सर्वे देवाः, येषां मृत्युर्नास्ति, अतस्तैः समं शात्रवे विग्रहे तव कुशलस्य अणुमात्रापि सम्भावना नास्तीति भावो व्यक्तार्थः ।

(ण) न शंसन्ति न प्रशंसन्ति, अपि तु परिणामे अनर्थकत्वात् तत् निन्दन्त्येव इति भावः ।

विपाककटु परिणामेऽनर्थकम् ॥४२।४७॥

(त) वनरक्षिण इति सम्बोधनम् । सामान्याः तुल्याः, अतः अस्माकमपि सर्वलोकान्तःपातित्वाद् वासवादिवदस्माकमपि पारिजाततरौ अधिकारो वर्त्तते इति भावः ।

(थ) भर्त्तुः स्वामिनः इन्द्रस्य बाहुना बाहुबलेन भुजवीर्य्येणेत्यर्थः महान् गर्वो यस्याः सा शची यथा एनम् अस्माभिः ह्रियमाणं पारिजातं रुणद्धि प्रतिबध्नाति, अस्मत्तो रक्षति इत्यर्थः, तत्तथा कथ्यतां शचीसमीपे गत्वा युष्माभिरिति शेषः । क्षान्त्या क्षमया अलं, वयं न क्षमाभिक्षवः, परं संग्रामकामा एव इति भावः ।

(द) पौलोम्याः पुलोमजायाः शच्याः, मम सत्यभामायाः, अतिगर्वेण उद्धतानि औद्धत्यव्यञ्जकानि अक्षराणि वर्णाः यत्र तत् यथा स्यात् तथा एतत् वक्ष्यमाणं वस्तु वदति वाचा विज्ञापयति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदि त्वं दयिता भर्त्तुर्यदि वश्यः पतिस्तव ।
मद्भर्त्तुर्हरतो वृक्षं तत् कारय निवारणम्(ध) ॥४९॥

जानामि ते पतिं शक्रं जानामि त्रिदिवेश्वरम्(१०)।
पारिजातं तथाप्येनं मानुषी हारयामि ते(न) ॥५०॥

पराशर उवाच ।

इत्युक्ता रक्षिणो गत्वा शच्या ऊचुर्यथोदितम् ।
शची चोत्साहयामास त्रिदशाधिपतिं पतिम् (११)
॥५१॥

ततः समस्तदेवानां सैन्यैः परिवृतो हरिम् ।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज (१२) ॥५२

ततः परिघ-निस्त्रिंश-गदा-शूल-वरायुधाः ।
बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते(प) ॥५३॥

ततो निरीक्ष्य गोविन्दो नागराजोपरि स्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम्(फ) ॥५४॥

चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
मुमोच शरसङ्घातान् सहस्रायुतशः शितान् ॥५५॥

ततो दिशो नभश्चैव दृष्ट्वा शरशतैश्चितम् ।
मुमुचुस्त्रिदशाः सर्व्वे अस्त्रशस्त्राण्यनेकशः ॥५६॥

एकैकमस्त्रं शस्त्रञ्च देवैर्मुक्तं सहस्रधा ।
चिच्छेद लीलयैवेशो जगतां मधुसूदनः ॥५७॥

पाशं सलिलराजस्य समाकृष्योरगाशनः ।
चकार खण्डशश्चञ्चा बालपन्नगदेहवत्(भ) ॥५८॥

यमेन प्रहृतं दण्डं गदाविक्षेपखण्डितम् ।
पृथिव्याः पातयामास भगवान् देवकीसुतः ॥५९॥

शिविकाञ्च धनेशस्य चक्रेण तिलशो विभुः ।
चकार शौरिरर्कञ्च दृष्टिदग्धहतौजसम्(म) ॥६०॥

नीतोऽग्निः शतशो (१३) वाणैर्द्राविता वसवो दिशः।
चक्रविच्छिन्नशूलाग्रा रुद्रा भुवि निपातिताः(य) ॥६१॥

स्वभर्त्रा निवारणं कारय ॥४८-५१॥
सज्जाः सन्नद्धाः ॥५२।५३॥

अस्त्रं मन्त्राभिमन्त्रितं, शस्त्रं तदितरत् ॥५५।५६॥
चञ्च्वा तुण्डेन ॥५८।६०॥

(ध) वृक्षं पारिजाततरुं हरतः बलात्कारेण गृह्णतः मम सत्यभामायाः भर्त्तुः श्रीकृष्णस्य निवारणं तेन स्वभर्त्रा प्रतिषेधनं कारय, तत्र बाधामुत्पादयेत्यर्थः ।

(न) यदहं मानुषी भूत्वापि स्वामिना शक्रभर्त्तृकायास्तव पारिजाततरुं हारयामि, तदिदमज्ञानविजृम्भितं न मन्तव्यम्, तव त्वदीयस्वामिनश्च प्रभावं सर्वथा जानतीषु तद्विरोधितया वर्त्तनस्य सामर्थ्यमस्मास्वस्तीति कृत्वैवेदं करोमीति भावः ।

(प) परिघः प्रतिघातसाधनमुद्गरविशेषः, निस्त्रिंशः खड्गः, गदा शूलञ्च वराणि उत्तमानि आयुधानि येषां ते, वज्रं करे यस्य तस्मिन् ।

(फ) देवाः परीवाराः यस्य तं देवगणपरिवृतम् सर्वदेवैः सहागतमित्यर्थः ।

(ब) शरशतैः आचितं व्याप्तम्, अस्त्राणि क्षेपणयोग्यान्यायुधानि शस्त्राणि तदितराणि । अस्त्रं मन्त्राभिमन्त्रितम्, शस्त्रं तदितरदिति श्रीधरः ।

(भ) उरगाशनः सर्पभुक् गरुड़ः, बालस्य अतिकोमलदेहस्य शिशोः पन्नगस्य सर्पस्य देहवत् अनायासेनेति शेषः ।

(म) दृष्ट्या चक्षुषा दृष्टम् अवलोकितं तथा हतं विनाशितम् ओजस्तेजः यस्य तथाभूतं, दृष्टिपातमात्रेण निस्तेजस्कं चकारेत्यन्वयः ।

(य) द्राविता दिशः नाना दिशः प्रति धावनं कारिताः नाना दिक्षु द्रुतं गमिता इत्यर्थः ।

चक्रेण श्रीहरेः सुदर्शनेन विच्छिन्नं शूलाद् वियोजितं शूलाग्रं येषां ते रुद्राः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साध्या विश्वेऽथ मरुतो गन्धर्व्वाश्चैव सायकैः ।
शार्ङ्गिणा प्रेरितैरस्ता व्योम्नि शाल्मलितूलवत् ॥६२
गरुत्मानपि वक्त्रेण पक्षाभ्यां नखराङ्कुरैः (१४) ।
भक्षयंस्ताड़यन् देवान् दारयंश्च चचार वै ॥६३॥
ततः शरसहस्रेण देवेन्द्र-मधुसूदनौ ।
परस्परं ववर्षाते धाराभिरिव तोयदौ ॥६४॥
ऐरावतेन गरुड़ो युयुधे तत्र संयुगे (१५) ।
देवैः समस्तैर्युयुधे शक्रेण च जनार्द्दनः ॥६५॥
छिन्नेष्वशेषबाणेषु शस्त्रेष्वस्त्रेषु च त्वरन् ।
जग्राह वासवो वज्रं कृष्णश्चक्रं सुदर्शनम्(र) ॥६६॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम !
वज्र-चक्रधरौ दृष्ट्वा देवराज-जनार्द्दनौ ॥६७॥
क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान् हरिः ।
न मुमोच तदा चक्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥६८॥
प्रनष्टवज्रं देवेन्द्रं गरुड़क्षतवाहनम् ।
सत्यभामाब्रवीद् वीरं पलायनपरायणम्(ल) ॥६९॥
त्रैलोक्येश ! न ते युक्तं शचीभर्त्तुः पलायनम् ।
पारिजातस्रगाभोगा त्वामुपस्थास्यते शची (ब) ॥७०॥
कीदृशं देवराज्यन्ते पारिजातस्रगुज्ज्वलाम् ।
अपश्यतो यथापूर्व्वं प्रणयादागतां शचीम् ॥७१॥
अलं शक्र ! प्रयातेन न व्रीड़ां गन्तुमर्हसि ।
नीयतां पारिजातोऽयं देवाः सन्तु गतव्यथाः(श)॥७२॥
पतिगर्व्वावलेपेन बहुमानपुरःसरम् ।
न ददर्श गृहे यातामुपचारेण मां शची (ष) ॥७३॥
स्त्रीत्वादगुरुचित्ताहं स्वभर्त्तृश्लाघनापरा ।
ततः कृतवती शक्र भवता सह विग्रहम्(स) ॥७४॥

अस्ताः निरस्ताः ॥६१॥

वक्त्रेण भक्षयन्। पक्षाभ्यां ताड़यन् नखरांकुरैर्दारयन् ॥६३॥

सोल्लुण्ठमाह—'त्रैलोक्येश्वरे'ति त्रिभिः। पारिजातस्रगाभोगा तन्मालाभिव्याप्ता सती ॥७०॥

किमर्थं तर्हि विग्रहः कृतः ? तत्राह—'पती'ति त्रिभिः। स्त्रीत्वाद्यो गर्वस्तन्निमित्तेनावलेपेन मदेन ॥७३॥

(र) त्वरन्नित्यत्रात्मनेपदिनस्त्वरेः शतृप्रयोग आर्षः।

(ल) प्रनष्टम् अकृतार्थं वज्रं यस्य तं कृष्णस्य लक्ष्यीभूतस्य कर्त्तुमसामर्थ्यादिति भावः। गरुड़ेन कृष्णस्य वाहनभूतेन क्षतं वाहनम् ऐरावतः यस्य तम्।

(ब) त्वामुपस्थास्यते शचीत्यत्र 'उपकृतं बहु तत्र किमुच्यते' इत्यादिवत् विपरीतलक्षणया अतः परं पुनः कदापि शची तथा-भूता सती त्वां नोपस्थास्यत इति प्रतिपाद्यते।

पतिगर्वावलेपं शच्या दोषमुद्भाव्य स्वभर्त्तृश्लाघन-पराहमिति वदन्त्यास्तस्या अपि तया साम्यमापन्नं परि-हरति—'रूपेण गर्विते'ति ॥७४॥

(श) प्रयातेन गमनेन, भावे क्तप्रत्ययात्। गता पारि-जातस्य पुनर्लाभेन व्यथा मानुषेण श्रीकृष्णेन पारिजातस्य हरण-जनिता पीड़ा येषां तथाभूताः सन्तु। सोल्लुण्ठनोक्तिरियम्।

(ष) गृहे यातां गृहगताम् अतिथिभूतामित्यर्थः। उपचारेण अतिथिजनोचितमाननेन न मां ददर्श, परं मानुषीति मत्वा मामवज्ञया ददर्शेति भावः।

(स) अगुरुचित्ता लघुचित्ता अहम्, स्वभर्त्तुः स्वीयस्वामिनः श्लाघनापरा प्रकर्षख्यापनपरा, ततः तस्मात् हेतोः, कृतवती भर्त्रा कारितवती, रूपेणेत्यादि—तथाहि भर्त्तृगर्वेण गर्वः तस्या मम च यद्यपि तुल्यः, तथापि रूपकृतो गर्वस्तस्या एव, न ममापीति आवयोर्वैषम्यमवधेयम्। तस्य रूपगर्वश्च पारिजातेन वर्द्धित इति तन्मूलो विग्रहः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदलं पारिजातेन परस्वेन हृतेन नः ।
रूपेण गर्व्विता सा तु भर्त्रा स्त्री का न गर्व्विता ॥७५

पराशर उवाच ।

इत्युक्तो विनिवृत्तोऽसौ देवराजस्तथा द्विज !
प्राह चैनामलं चण्डि ! सख्युः खेदातिविस्तरैः ॥७६

न चापि सर्ग-संहार-स्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीड़ा जायते विश्वरूपिणा ॥७७॥

यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्माद् यतश्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भव-प्रलय-पालनकारणेन
व्रीड़ा कथं भवति देवि ! निराकृतस्य (ह) ॥७८

सकलभुवनसूतेर्मूर्त्तिरस्यानुसूक्ष्मां
विदितसकलवेदैर्ज्ञायते यस्य नान्यैः ।
तमजमकृतमीशं शाश्वतं स्वेच्छयैनं
जगदुपकृतिमर्त्त्यं को विजेतुं समर्थः(क्ष) ॥७९॥

इति श्रीविष्णुपुराणे पञ्चमांशे त्रिंशः अध्यायः ॥

चण्डि ! धृष्टे ! सख्युर्मित्रभूतस्य मम खेदहेतुभिरुक्ति-विस्तरैरलम् ॥७६॥

न व्रीड़ां गन्तुमर्हसीति यदुक्तं तत्राह—'न चापी'ति त्रिभिः ॥७७॥

यस्मादुपादानकारणभूतात् यतश्च निमित्तकारणभूतात् जगदभूद् भविष्यति चेत्यर्थः ॥७८॥

अकृतमीशं स्वतः सिद्धमीश्वरं, न तु कर्मनिमित्तमैश्वर्यं तस्येत्यर्थः । जगदुपकृतये स्वेच्छया गृहीतमर्त्यावतारम् ॥७९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे त्रिंशोऽध्यायः ॥

(ह) निराकृतस्य पराजितस्य मम कथं व्रीड़ा लज्जा भवति ।

(च) सकलभुवनानां सकलभुवनवर्त्तिस्थावरजङ्गमानां सर्वेषामित्यर्थः, सूतेः जनकस्य, विदिताः गृहीतार्थाः कृताः सकलाः वेदाः यैः तथाभूतैः ।

पाठान्तराणि—

(७—१) प्रणेतुर्मनसो—।
(१२—२) पशवश्च मृगाश्चैव पतङ्गाश्च—।
(१३—३)—सूक्ष्मात् सूक्ष्मातराश्च ये ।
(१६—४)—वैरिपक्षजयाय च ।
(२६—५) ततः कृष्णस्य पत्नी च शक्रपत्न्या सहादितिम् ।
(३३—६)—कृष्ण ! पादपः ।
(३४—७)—त्वमत्यर्थं—।
(३८—८) इत्युक्तः स प्रहस्यैनं—।

उत् पन्नो देवराजाय दत्तः सोऽपि ददौ पुनः। महिषी सुमहाभाग देव्यै शच्यै कुतूहलात् ॥
(४५—९) समुत्पन्नस्तरु—।
(५०—१०)—त्रिदशेश्वरम् ।
(५१—११)—शची शक्रं सुराधिपम् ।
(५२—१२)—योद्धुं द्विजोत्तम ।
(६१—१३)—नीतोऽग्निः शीतता—।
(६३—१४)—तुण्डेन पक्षाभ्याञ्च नखाङ्कुरैः ।
(६५—१५)—सङ्कुले ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकत्रिंशोऽध्यायः

[श्रीभगवतो द्वारकापुरीप्रत्यावर्त्तनम्। शताधिकषोड़शसहस्ररमणीभिः सह विवाहश्च।]

पराशर उवाच।

संस्तुतो भगवानित्थं देवराजेन केशवः।
प्रहस्य भावगम्भीरमुवाचेदं द्विजोत्तम ॥१॥

श्रीकृष्ण उवाच।

देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते!
क्षन्तव्यं भवता चेदमपराधकृतं मम ॥२॥
पारिजाततरुश्चायं नीयतामुचितास्पदम्।
गृहीतोऽयं मया शक्र! सत्यावचनकारणात्(क) ॥३॥
वज्रञ्चेदं गृहाण त्वं यत्त्वया प्रहितं मयि (१)।
तत्तेनैतत् प्रहरणं शक्र! वैरिविदारणम्(ख) ॥४॥

शक्र उवाच।

विमोहयसि मामीश! मर्त्त्योऽहमिति किं वदन्।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥५॥
योऽसि सोऽसि जगत्त्राण! प्रवृत्तौ नाथ! संस्थितः।
जगतः शल्यनिष्कर्षं करोष्यसुरसूदन(ग) ॥६॥
नीयतां पारिजातोऽयं कृष्ण! द्वारवतीं पुरीम्।
मर्त्यलोके त्वया त्यक्ते नायं संस्थास्यते भुवि*(घ) ॥७

पराशर उवाच।

तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः।
प्रसक्तैः सिद्ध-गन्धर्व्वैः स्तूयमानस्तथर्षिभिः (२) ॥८॥
ततः शङ्खमुपाध्माय द्वारकोपरि संस्थितः।
हर्षमुत्पादयामास द्वारकावासिनां द्विज(ङ) ॥९॥
अवतीर्य्याथ गरुड़ात् सत्यभामासहायवान्।
निष्कुटे स्थापयामास पारिजातं महातरुम्(च) ॥१०॥

एकत्रिंशः अध्यायः

उचितास्पदं यथोचितं स्थानम् ॥३।४॥

तत् तव यथादृष्टमात्रं रूपं जानीमः, न तु तव सूक्ष्मरूपविदः ॥५॥

शल्यनिष्कर्षं कण्टकोद्धारम् ॥६॥

न च ममाप्यात्यन्तिकः परिजातवियोग इत्याह—'मर्त्तलोक' इति ॥७॥

प्रसक्तैरनुषक्तैरनुगच्छद्भिः स्तूयमानः ॥८-१०॥

(क) सत्यायाः सत्यभामायाः वचनमेव कारणं तस्मात्।

(ख) मयि प्रहितं प्रेरितं निक्षिप्तमिति यावत्, मम हननार्थमिति शेषः। वैरिणां शत्रूणां विदारणं विदारण साधनम्।

(ग) जगतां भुवनानां त्राणे रक्षायां प्रवृत्तौ प्रयत्ने संस्थितः कृतजगद्रक्षाप्रवृत्त इत्यर्थः। असुरसूदन असुरध्वंसकारिन्! अनेन विशेषणेन असुरान् हत्वा त्वं जगतः शल्यनिष्कर्षं करोषीति सूच्यते।

(घ) त्वया मर्त्यलोके त्यक्ते सति तव मर्त्यलोकत्यागानन्तरमित्यर्थः। अयं पारिजाततरुः। भुवि न संस्थास्यते किन्तु स्वर्गास्पदमेवागमिष्यति।

(ङ) द्वारकोपरि द्वारकाया उपरि गगनमार्गे संस्थितः सन् शङ्खं निजं पाञ्चजन्यम् उपाध्माय वादयित्वा स्वजनान् स्वागमनं वेदयितुमिति शेषः।

(च) निष्कुटे द्वारकास्थिते सत्यभामाया गृहोद्याने।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यमभ्येत्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
वास्यते यस्य पुष्पोत्थगन्धेनोर्व्वी त्रियोजनम्(छ) ॥११

ततस्ते सादराः सर्व्वे (३) देहबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्व्वन्तो मुखदर्शनम् ॥१२॥

किङ्करैः समुपानीतं हस्त्यश्वादि ततो धनम् † ।
स्त्रियश्च कृष्णो जग्राह नरकस्य परिग्रहान् ॥१३॥

ततः काले शुभे प्राप्ते उपयेमे जनार्द्दनः ।
ताः कन्या नरकेणासन् सर्व्वतो याः समाहृताः ॥१४

एकस्मिन्नेव गोविन्दः काले तासां महामते !
जग्राह विधिवत् पाणीन् पृथग्गेहेषु धर्म्मतः ॥१५॥

षोड़शस्त्रीसहस्राणि शतमेकं तथाधिकम् ।
तावन्ति चक्रे रूपाणि भगवान् मधुसूदनः(ज) ॥१६

एकैकश्येन (४) ताः कन्या मेनिरे मधुसूदनम् ।
ममैव पाणिग्रहणं भगवान् कृतवानिति(झ) ॥१७॥

निशासु च जगत्स्रष्टा तासां गुहेषु केशवः ।
उवास विप्र ! सर्व्वासां विश्वरूपधरो हरिः(ञ) ॥१८

इति श्रीविष्णुपुराणे पञ्चमांशे एकत्रिंशः अध्यायः ॥

पौर्विकीं पूर्वजन्मसम्बन्धिनीम् ॥११॥
अमानुषान् देहबन्धान् स्वदेहान् देवाकारान् ददृशुः तस्य जातिस्मारकत्वात् ॥१२॥
परिग्रहान् विवाहार्थमवरुद्धाः कन्याः ॥१३॥१८॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे एकत्रिंशोऽध्यायः ।

(छ) पारिजातस्य महातरोर्महाविभूतिमाह—'यमभ्येत्ये'-त्यादिना । वास्यते सुरभीक्रियते । त्रियोजनं व्याप्य ।

(ज) तावन्ति एकशताधिकषोड़शसहस्राणि रूपाणि आत्मनो यथावस्थितानि स्वरूपाणि चक्रे कायव्यूहशक्तिमहिम्नेति शेषः ।

(झ) ममैव एकस्याः, न तु अन्यस्या अपि, येन मद्गेह एवासौ तिष्ठति नान्यस्या अपीत्येवं मधुसूदनं मेनिरे एकैकमात्र-कन्यापाणिग्राहकत्वेन सम्भावयाञ्चक्रुः, सर्वनिशासु सर्वासां गेहेष्वेव कायव्यूहमहिम्ना तुल्यरूपमविच्छेदमवस्थानादिति भावः ।

(ञ) जगत्स्रष्टेति विशेषणेन यः श्रीहरिः स्वीयविलक्षण-विभूत्या सर्वं जगदेव सृजति, तस्य कायव्यूहमहिम्ना तावत्-संख्यकस्वीयमूर्त्तिसम्पादनं नाश्चर्य्यकरमिति भावः सूच्यते ।

पाठान्तराणि—

—यदत्र प्रहितं त्वया ।

(४—१) सकलभुवनसृतिमूर्त्तिरल्पाल्पसूक्ष्मा ।
* "देवदेव जगन्नाथ कृष्ण विष्णो महाभुज ।
शङ्ख—चक्र-गदापाणे क्षमस्वैतद् व्यतिक्रमम् ॥

(७—२)—सुरर्षिभिः ।

(१२—३) ततस्ते यादवाः सर्व्वे— ।
विभज्य प्रददौ कृष्णो बान्धवानां महामतिः ।
कन्याश्च कृष्णो जग्राह नरकस्य परिग्रहान् ॥

(१३—४) एकैकमेव— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वात्रिंशोऽध्यायः

[ऊषाचरितम् ।]

पराशर उवाच ।

प्रद्युम्नाद्या हरेः पुत्रा रुक्मिण्याः कथितास्तव ।
चारुः भैमरिकञ्चैव (१) सत्यभामा व्यजायत (क)॥१

क्षेमिमान् ताम्रपक्षाद्या रोहिण्यां तनया हरेः ।
बभ्रुवृषाम्बिवत्याञ्च शाम्बाद्या बलशालिनः ॥२॥

जाम्बवत्या भद्रविन्दाद्या नाग्नजित्यां महाबलाः ।
संग्रामजित्प्रधानास्तु शैव्यायान्त्वभवन् सुताः(ख) ॥३

वृकाद्याश्च सुता माद्र्यां गात्रवत्प्रमुखान् सुतान् (२)।
अवाप लक्ष्मणा पुत्राः कालिन्द्याञ्च श्रुतादयः(ग) ॥४॥

अन्यासाञ्चैव भार्य्याणां समुत्पन्नानि चक्रिणः ।
अयुतानि पुत्राणां सहस्राणां शतं तथा ॥५॥

प्रद्युम्नः प्रथमस्तेषां सर्व्वेषां रुक्मिणीसुतः ।
प्रद्युम्नादनिरुद्धोऽभूद् वज्रस्तस्मादजायत ॥६॥

अनिरुद्धो रणे रुद्धो बलेः पौत्रीं महाबलः ।
बाणस्य तनयामूषामुपयेमे द्विजोत्तम ॥७॥

यत्र युद्धमभूद् घोरं हरि-शङ्करयोर्महत् ।
छिन्नं सहस्रं बाहूनां यत्र वाणस्य चक्रिणा ॥८॥

मैत्रेय उवाच ।

कथं युद्धमभूद् ब्रह्मन्नूषार्थे हर-कृष्णयोः ।
कथं क्षयञ्च वाणस्य बाहूनां कृतवान् हरिः ॥९॥

एतत् सर्व्वं महाभाग ! समाख्यातुं त्वमर्हसि ।
महत् कौतूहलं जातं कथां श्रोतुमिमां हरेः ॥१०॥

पराशर उवाच ।

ऊषा वाणसुता विप्र ! पार्व्वतीं सह शम्भुना ।
क्रीड़न्तीमुपलक्ष्योच्चैः स्पृहाञ्चक्रे तदाश्रयाम् (घ)॥११

ततः सकलचित्तज्ञा गौरी तामाह भामिनीम् ।
अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥१२॥

इत्युक्ते सा तदा चक्रे (३) कदेति मतिमात्मनः ।
को वा भर्त्ता ममेत्येतां पुनरप्याह पार्व्वती ॥१३॥

द्वात्रिंशः अध्यायः

पूर्वोक्तपुत्रानुवादपूर्वकं हरेः सर्वान् पुत्रानाह—'प्रद्युम्नाद्या इत्यादिपञ्चभिः ॥१।२॥

(क) व्यजायतेत्यत्र जनिरन्तर्भूतणिजर्थः, व्यजायत जनयत्।

(ख) संग्रामजित् तदाख्यः पुत्रः प्रधानं यत्र तथाभूताः अभवन्।

(ग) गात्रवत्प्रमुखान् गात्रवदादीन्।

शैव्यायां मित्रविन्दायाम् ॥३।५॥

अनिरुद्धस्य विवाहान्तरं वक्तुं प्रद्युम्नाद्यनुवादः—प्रद्युम्न इति ॥६।७॥

यत्र यस्मिन् विवाहे युद्धमभूत्। यत्र युद्धे वाणस्य बाहूनां सहस्रं चक्रिणा छिन्नम् ॥८।१०॥

तदाश्रयां स्वभर्त्रा सह क्रीड़ाविषयां स्पृहां चक्रे ॥११॥

इत्युक्ते तया गौर्य्या सा ऊषा भर्त्रा रतिरात्मनः कदा स्यादिति मतिं चक्रे ॥१२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पार्व्वत्युवाच ।

वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव ।
करिष्यति स ते भर्त्ता राजपुत्रि ! भविष्यति ॥१४॥

पराशर उवाच ।

तस्यां तिथौ पुमान् स्वप्ने यथा देव्या उदीरितम् ।
तथैवाभिभवं चक्रे रागञ्चक्रे तथैव सा (४)(ङ)॥१५॥

ततः प्रबुद्धा पुरुषमपश्यन्ती तमुत्सुका (५) ।
क्व गतोऽसीति निर्लज्जा मैत्रेयोक्तवती सखीम् ॥१३

वाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा तु तत्सुता ।
तस्याः सख्यभवत् सा च प्राह कोऽयं त्वयोच्यते ॥१७
यदा लज्जाकुला नास्यै कथयामास सा सती (६) ।
तदा विश्वासमानीय सर्व्वमेवाभ्यवादयत् (च) ॥१८॥

विदितार्थान्तु तामाह पुनरूषा यथोदितम् ।
देव्या तथैव तत्प्राप्तौ योऽभ्युपायः कुरुष्व तम्*(छ)॥१

पराशर उवाच ।

ततः पटे सुरान् दैत्यान् गन्धर्व्वांश्च प्रधानतः ।
मनुष्यांश्चाभिलिख्यास्यै चित्रलेखा व्यदर्शयत्(ज)॥२

अपास्य सा तु गन्धर्व्वांस्तथोरगसुरासुरान् ।
मनुष्येषु ददौ दृष्टिं तेष्वप्यन्धकवृष्णिषु (झ) ॥२१॥

कृष्ण-रामौ विलोक्यासौ सुभ्रुर्लज्जाजड़ेव सा ।
प्रद्युम्नदर्शने व्रीड़ा-दृष्टिं निन्येऽन्यतो द्विज (ञ) ॥२२

दृष्टमात्रे ततः कान्ते प्रद्युम्नतनये द्विज ।
दृष्ट्वात्यर्थविकाशिन्या लज्जा कापि निराकृता(ट)॥२३

अभिभवम् आक्रम्य सम्भोगम् ॥१४।१५॥

औत्सुक्यात् कान्तभ्रान्त्या क्व गतोऽसीति सखीमेवोक्तवती ॥१६।१७॥

अभ्यवादयत् आभिमुख्येन यथावृत्तमुषामवादयत् कथनमकारयत् ॥१८॥

देव्या यथोदितं स ते भर्त्ता भविष्यतीति तथैव तस्य भर्त्तुः प्राप्तावुपायश्च यथोदितः ॥१९।२०॥

(घ) उच्चैः अत्यर्थम् ; तदाश्रयां स्पृहां कामनां चक्रे, तथैव व्रीड़ां कामयाञ्चक्रे इत्यर्थः ।

(ङ) तस्यां पार्वत्या उक्तपूर्वायां वैशाखशुक्लद्वादश्यां तिथौ । तथैव अनिरुद्धो यथा ऊषायां तादृगेव, रागम् अनुरागं चक्रे अनिरुद्धे इति शेषः ।

(च) सखि ! कथय नाहं कस्यापि समीपे रहस्यं भेत्स्यामि, तद् विश्वस्ता भवेत्यादिवचनैः विश्वासम् आनीय विश्वासं लम्भयित्वा तामिति शेषः ।

(छ) विदितः ऊषाया वचनात् ज्ञातः अर्थः प्रकृतो विषयः यया तथाभूताम्, तां चित्रलेखां सखीम् ।

मनुष्येषु कान्तसाजात्यात् दृष्टिं ददौ, तत्राप्यन्धकवृष्णिषु कान्तसमानवेशत्वात् ॥२१॥

कृष्णरामौ तु श्वशुरौ प्रद्युम्नसदृशौ विलोक्य लज्जया जड़ेवासीत् । प्रद्युम्नदर्शने तस्य कान्तसादृश्येन श्वशुरत्वनिश्चयाद् व्रीड़ायुक्ता दृष्टिमन्यतो निन्ये ॥२२।२३॥

(ज) अभिलिख्य वर्णकयोजनेन चित्रगतान् कृत्वा व्यदर्शयत् विशेषेण दर्शयामास ऊषामिति शेषः ।

(झ) अपास्य निराकृत्य, तेषु मनुष्येष्वपि अन्धकवृष्णिषु अन्धकयादववंशीयेषु वृष्णियादववंशीयेषु च दृष्टिं ददौ किन्तु विशेषरूपेणेति शेषः, तेषामनिरुद्धरूपतुल्यरूपदर्शनादिति भावः ।

(ञ) लज्जया श्वशुरादिदर्शनजनितयेव त्रपया जड़ा शक्तिशालिनीव । व्रीड़ादृष्टिं लज्जासमुचितां दृष्टम् अनिरुद्धं प्रद्युम्नादितरत्र निन्ये ।

(ट) कान्ते तस्याः कामनाविषयीभूते प्रद्युम्नतनये अनिरुद्धे चित्रगत इति शेषः ; अत्यर्थविकाशिन्या अतिमात्रं विस्फारितया दृष्ट्या, निराकृता विसर्जिता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सोऽयं सोऽयमितीत्युक्ते तया सा योगगामिनी ।

ययौ द्वारवतीमूषां समाश्वास्य ततः सखीम् (ठ)॥२४

इति श्रीविष्णुपुराणे पञ्चमांशं द्वात्रिंशः अध्यायः ॥

योगगामिनी योगबलादाकाशगामिनी ॥२४॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे द्वात्रिंशोऽध्यायः।

(ठ) तया ऊषया, स खप्नदृष्टः, अयं चित्रे प्रत्यक्षं दृश्यमानः, सा चित्रलेखा, योगगामिनी सतीति शेषः। समाश्वास्य 'सखि! स्थिरा भव, यावदहं तव कान्तमनिरुद्धमचिरेणैवात्र समानेष्यामि' इत्यादिवचनैराश्वस्तां कृत्वा।

पाठान्तराणि—

(१—१) भानु-भौमरिकाद्यांश्च—।

(४—२)—गात्रवत्प्रमुखान् सुतान्।

(१३—३) इत्युक्ता सा तया चक्रे—।

त्रयस्त्रिंशः अध्यायः

[कृष्ण-बाणासुरयोः संग्रामः।]

पराशर उवाच ।

बाणोऽपि प्रणिपत्याग्रे मैत्रेयाह त्रिलोचनम् ।

देव! बाहुसहस्रेण निर्व्विण्णोऽहं विनाहवम् ॥१॥

क्वचिन्ममैषां बाहूनां साफल्यजनको रणः ।

भविष्यति विना युद्धं भाराय मम किं भुजैः ॥२॥

श्रीशङ्कर उवाच ।

मयूरध्वजभङ्गस्ते यदा बाण! भविष्यति ।

पिशिताशिजनानन्दं प्राप्स्यसे त्वं तदा रणम् (क)॥३॥

पराशर उवाच ।

ततः प्रणम्य मुदितः शम्भुमभ्यागतो गृहम् ।

भग्नञ्च ध्वजमालोक्य हृष्टो हर्षान्तरं ययौ (ख) ॥४॥

एतस्मिन्नेव काले तु योगविद्याबलेन तम् ।

अनिरुद्धमथानिन्ये चित्रलेखा वराप्सराः ॥५॥

त्रयस्त्रिंशः अध्यायः

अथ युद्धे बाणबाहुच्छेदं वक्ष्यन् शम्भोरपि तत्सम्मतमिति दर्शयन्नाह बाणोऽपीति चतुर्भिः। अग्रे अनिरुद्धागमनात् प्राक् ॥१।२॥

पिशिताशिनो मांसभुजो जनान् पिशाचादीन् आनन्दयतीति शम्भोर्वाक्यं श्रुत्वा बाणो गृहमागत्य तं मयूरचिह्नध्वजं भग्नमालोक्य पुनर्हर्षान्तरं ययाविति द्वयोरन्वयः ४।५॥

(क) ते तव मयूरध्वजभङ्ग मयूरलक्षणस्य ध्वजस्य भङ्गः, तेन लक्षणेन मयूरध्वजस्य सम्बन्धः। पिशितेत्यादि रणविशेषणम्। प्राप्स्यसे इत्यत्रात्मनेपदमार्षम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कन्यान्तःपुरमध्ये तं रममाणं सहोषया ।
विज्ञाय रक्षिणो गत्वा शशंसुर्दैत्यभूपतेः (ख) ॥६॥
आदिष्टं किङ्कराणान्तु सैन्यं तेन दुरात्मना ।
जघान परिघं लोह (३)-मादाय परवीरहा ॥७॥
हतेषु तेषु बाणोऽपि रथशस्त्रद्वधोद्यतः ।
युध्यमानो यथाशक्ति यदा वीर्य्येण निर्जितः (ग)(४)॥८
मायया युयुधे तेन स तदा मन्त्रिचोदितः ।
ततस्तं पन्नगास्त्रेण बबन्ध यदुनन्दनम् (घ) ॥९॥
द्वारतत्यां क्व यातोऽसावनिरुद्धेति जल्पताम् ।
यदूनामाचचक्षे तं बद्धं बाणेन नारदः ॥१०॥
तं शोणितपुरे श्रुत्वा नीतं (५) विद्याविदग्धया ।
योषिता प्रत्ययं जग्मुर्यादवा नामरैरिति (ङ) ॥११॥
ततो गरुड़मारुह्य स्मृतमात्रागतं हरिः ।
बल-प्रद्युम्नसहितो बाणस्य प्रययौ पुरम् ॥१२॥
पुरीप्रवेशे प्रमथैर्युद्धमासीन्महात्मनः ।
ययौ बाणपुराभ्यासं नीत्वा तान् संक्षयं हरिः (च)॥१३
ततस्त्रिपादस्त्रिशिरा ज्वरो माहेश्वरो महान् ।
वाणरक्षार्थमत्यर्थं युयुधे शार्ङ्गधन्वना (छ)॥१४॥
तद्भस्मस्पर्शसम्भूततापः कृष्णाङ्गसङ्गमात् ।
अवाप बलदेवोऽपि श्रममामीलितेक्षणः ॥१५॥
ततः स युध्यमानस्तु सह देवेन शार्ङ्गिणा ।
वैष्णवेन ज्वरेणाशु कृष्णदेहान्निराकृतः ॥१६॥
नारायणभुजाघातपरिपीड़नविह्वलम् ।
तं वीक्ष्य क्षम्यतामस्येत्याह देवः पितामहः ॥१७॥
ततश्च क्षान्तमेवेति प्रोक्त्य (क) तं वैष्णवं ज्वरम् ।
आत्मन्येव लयं निन्ये भगवान् मधुसूदनः (ज) ॥१८॥

तेन बाणेन व्यादिष्टं सैन्यं परवीरहा अनिरुद्धो जघान ॥७॥

अनिरुद्धेत्यत्रार्षः सन्धिः। अनिरुद्धः क्व यात इति जल्पतामित्यर्थः ॥१०॥

नारदवाक्यादेव योगविद्यानिपुणया चित्रलेखया नीतं शोणितपुरे वर्त्तमानं तं श्रुत्वा अमरैर्न नीत इति प्रत्ययं निश्चयं जग्मुः। पारिजताहरणे पराभूतैरमरैः प्रणीतः स्यादिति शंकां जहुरित्यर्थः ॥११॥

प्रमथैः रुद्रपार्षदैः ॥१३।१४॥

'त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचन' इति मन्त्रलिङ्गात्तस्य ज्वरस्य प्रहरणभूतं यद्भस्म तस्य स्पर्शात् सम्भूतस्तापो यस्य बलदेवस्य स तथा तप्तोऽपि तेन तापेन चामीलिताक्षोऽपि कृष्णाङ्गसङ्गमात्तदालिङ्गनात् शमं स्वास्थ्यमवाप। पाठान्तरे तद्भस्मस्पर्शात् सम्भूततापं यत् कृष्णस्याङ्गं तस्य सङ्गमात् स्पर्शाद् बलदेवोऽपि श्रमं तापमवापेत्यर्थः ॥१५॥

ततः स माहेश्वरो ज्वरो विष्णोर्देहं प्रविश्य तेन सह युध्यमानस्तदानीमेव सृष्टेन वैष्णवेन ज्वरेण तद्देहाद्बहिर्निःसारितः ॥१६।१७॥

(ख) दैत्यभूपतेः असुरराजस्य वाणस्य शशंसुः कथयामासुः प्रकृतं वृत्तमिति शेषः,।

(ग) निर्जितः पराभवं नीतः अनिरुद्धेनेति शेषः।

(घ) पन्नगास्त्रेण नागपाशास्त्रेण, तम् अनिरुद्धम्।

(ङ) विद्यायां योगविद्यायां विदग्धया निपुणया योषिता स्त्रिया चित्रलेखयेत्यर्थः।

(च) महात्मनः हरेः, तान् प्रमथान्, संक्षयं नीत्वा हत्वा हरिः वाणपुरस्य अभ्यासं सन्निधिम् ययौ।

(छ) शार्ङ्गं धनुर्यस्य तेन, बहुव्रीहौ धनुःशब्दस्य धन्वन् आदेशः।

(ज) प्रोच्येत्यत्र प्रोक्त्वेति पाठे सोपसर्गस्यापि वचेः क्त्वाप्रत्ययेन प्रयोग आर्षः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मम त्वया समं युद्धं ये स्मरिष्यन्ति मानवाः ।
विज्वरास्ते भविष्यन्तीत्युक्त्वा चैनं ययौ ज्वरः (झ)॥१९

ततोऽग्नीन् भगवान् पञ्च जित्वा नीत्वा तथा क्षयम् ।
दानवानां बलं विष्णुश्चूर्णयामास लीलया ॥२०॥

ततः समस्तसैन्येन दैतेयानां बलेः सुतः ।
युयुधे शङ्करश्चैव कार्त्तिकेयश्च शौरिणा (ञ) ॥२१॥

हरि-शङ्करयोर्युद्धमतीवासीत् सुदारुणम् ।
क्षुभुः सकला लोकाः शस्त्रास्त्रांशुप्रतापिताः ॥२२॥

प्रलयोऽयमशेषस्य जगतो नूनमागतः ।
मेनिरे त्रिदशा यत्र वर्त्तमाने महाहवे ॥२३॥

जृम्भणास्त्रेण गोविन्दो जृम्भयामास शङ्करम् ।
ततः प्रणेशुर्दैतेयाः प्रमथाश्च समन्ततः ॥२४॥

जृम्भाभिभूतश्च हरो रथोपस्थ उपाविशत् ।
न शशाक तथा योद्धुं कृष्णेनाक्लिष्टकर्म्मणा ॥२५॥

गरुड़क्षतवाहश्च प्रद्युम्नास्त्रप्रपीड़ितः ।
कृष्णहुङ्कारनिर्द्धूतशक्तिश्चापि ययौ गुहः (७) (ट)॥२६

जृम्भिते शङ्करे नष्टे दैत्यसैन्ये गुहे जिते ।
नीते प्रमथसैन्ये च संक्षयं शार्ङ्गधन्वना ॥२७॥

नन्दीश (८)-संगृहीताश्वमधिरूढो महारथम् ।
बाणस्तत्राययौ योद्धुं कृष्ण-कार्ष्णिबलैः सह (ठ)॥२८

बलभद्रो महावीर्य्यो बाणसैन्यमनेकधा ।
विव्याध बाणैः प्रभ्रश्य धर्म्मतस्तत् पलायत ॥२९॥

आकृष्य लाङ्गलाग्रेण मुषलेनावपोथितम् (ग) ।
बलं बलेन ददृशे बाणो बाणैश्च चक्रिणा (ड) ॥३०॥

सर्वं सौक्ष्म्यं निन्ये, न तु नाशं, भगवतैव ज्वरद्वयकार्य-व्यवस्थापनात्। तदुक्तं हरिवंशे,—"युवां ज्वरौ ज्वरवतः पीड़ायां मरणे प्रभू। पीड़ने तु भवानस्तु मरणे मामको ज्वरः।" इति ॥१८।१९॥

अग्नीन् पञ्च आहवनीयदक्षिणाग्नि-सभ्यावसथ्यान् ॥२०।२१॥

अस्त्राणामंशुभिः प्रकर्षेण तापिताः सन्तः ॥२२॥

प्रलयो नूनमागत इति मेनिरे ॥२३॥

प्रणेशुः पलायिताः ॥२४॥

जृम्भाभिभूतः आलस्यव्याप्तः रथोपस्थे रथपृष्ठे ॥२५॥

कृष्णस्य हुंकारेण निर्धूता निरस्ता शक्तिरायुधं यस्य स गुहश्चापक्रान्तः ॥२६।२८॥

धर्मतः युद्धधर्मात् प्रभ्रस्य बाणसैन्यं पलायत पलायन-मकरोत् ॥२९॥

अवपोथितं प्रताड़ितं चक्रिणा च बाणैस्ताड़ितं स्वबलं बाणो ददर्श ॥३०॥

(क) ये मानवाः ज्वरवन्त इति शेषः। विगतः ज्वरः रोगो येषां ते तथाभूताः ज्वरशून्याः भविष्यन्ति।

(ख) दैतेयानाम् असुराणाम्, समस्तसैन्येन निखिलसैन्य-सहितेन। शौरिणा नारायणेन सह। शङ्करकार्त्तिकेययोरपि नारायणप्रतिपक्षतया बाणपक्षमाश्रित्य युद्धं बाणस्य शिवभक्तत्वेन तत्सहायत्वादिति बोध्यम्।

(ट) गरुड़ेन श्रीकृष्णस्य वाहनभूतेन क्षतः चञ्चुनखरादिना क्षतविक्षताङ्गः कृतः वाहः मयूररूपवाहनं यस्य सः। गुहः कार्त्तिकेयः। ययौ पलायितः।

(ठ) नन्दीशेन शङ्करानुचरेण नन्दिकेश्वरेण संगृहीतः नियन्त्रितः अश्वो यस्य तथाभूतं सञ्चालितं महारथमित्यर्थः, दैत्यसैन्यानां सर्वेषां पलायितत्वादन्यस्य च सारथेरभावादिति भावः। कृष्णस्य कार्ष्णेः कृष्णतनयस्य प्रद्युम्नस्य च बलैः सैन्यैः सह।

(ड) बलेन बलभद्रेण। ददृशे इति कर्त्तरि आर्षः प्रयोगः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः कृष्णस्य बाणेन युद्धमासीत् समस्यतोः ।
परस्परमिषून् दीप्तान् कायत्राणविभेदकान्(१०)॥३१

कृष्णश्चिच्छेद बाणौघान् बाणेन प्रहिताञ्छरान् ।
बिभेद केशवं बाणो बाणं विव्याध चक्रभृत्(११)॥३२

मुमुचाते तथास्त्राणि बाण-कृष्णौ जिगीषया ।
परस्परं क्षतिपरौ परमामर्षणौ द्विज (च) (ढ) ॥३३॥

छिद्यमानेष्वशेषेषु शरेष्वस्त्रे च सीदति ।
प्राचुर्य्येण हरिर्बाणं हन्तुञ्चक्रे ततो मनः ॥३४॥

ततोऽर्कशतसङ्घाततेजसा सदृशद्युति ।
जग्राह दैत्यचक्रारिर्हरिश्चक्रं सुदर्शनम् ॥३५॥

मुञ्चतो बाणनाशाय तत्र चक्रं मधुद्विषः ।
नग्ना दैतेयविद्याभूत् कोटरी पुरतो हरेः (ण) ॥३६॥

तामग्रतो हरिर्दृष्ट्वा मीलिताक्षः सुदर्शनम् ।
मुमोच बाणमुद्दिश्य च्छेत्तुं बाहुवनं रिपोः (त)॥३७॥

क्रमेण तत्तु बाहूनां बाणस्याच्युतनोदितम् ।
छेदञ्चक्रेऽसुरापास्तशस्त्रौघक्षपणादृतम् ॥३८॥

छिन्ने बाहुवने तत्तु करस्थं मधुसूदनः ।
मुमुक्षुर्बाणनाशाय विज्ञातस्त्रिपुरद्विषा ॥३९॥

स उपेत्याह गोविन्दं सामपूर्व्वमुमापतिः ।
विलोक्य बाणं दोर्दण्डच्छेदासृक्स्रावर्षिणम् (थ)॥४०॥

रुद्र उवाच ।

कृष्ण ! कृष्ण ! जगन्नाथ जाने ! त्वां पुरुषोत्तमम् ।
परेशं परमानन्दमनादि-निधनं परम् ॥४१॥

देव-तिर्य्यङ्-मनुष्येषु शरीरग्रहणात्मिका ।
लीलेयं सर्व्वभूतस्य तव चेष्टोपलक्षणा ॥४२॥

तत् प्रसीदाभयं दत्तं बाणस्यास्य मया प्रभो !
तत्त्वया नानृतं कार्य्यं यन्मया व्याहृतं वचः (द)॥४३॥

अस्मत्संश्रयवृद्धोऽयं नापराध्यस्तवाव्यय !
मया दत्तवरो दैत्यस्ततस्त्वां क्षामयाम्यहम् (ध) ॥४४॥

समस्यतोरित्यादि वाक्यान्तरम्। कायत्राणं कवचं तद्भेदकानिषून् परस्परं सम्यगस्यतोः क्षिपतोः कृष्ण-बाणयोर्मध्ये कृष्णस्य बाणेन प्रयुक्तान् शरांश्चिच्छेद ॥३२।३३॥

अस्त्रे च प्राचुर्य्येण सीदति सति ॥३४॥

अर्कशतसंघातस्य यत्तेजस्तत्सदृशी द्युतिर्यस्य तद्दैत्यचक्रघातकं सुदर्शनं चक्रं जग्राह ॥३५॥

कोटरी नाम दैतेयानां विद्या मन्त्रमयी कुलदेवता रुद्राण्या अष्टमोऽंशः ॥३६।३७॥

(ढ) जिगीषया परस्परं जेतुमिच्छया, परमामर्षणौ परस्परं प्रति सुतरां क्रोधसम्पन्नौ परस्परमसहमानौ इति वा। क्षतिपरौ क्षयव्याप्तौ।

(ण) नग्ना वीतवसना, दैतेयविद्या दैत्यानां विद्या मन्त्रमयी मूर्त्तिमती सतीत्यर्थः।

(त) मीलितं मुद्रितम् अक्षि येन, नग्नायाः स्त्रिया दर्शननिषेधात् तत्परिहारार्थमिति शेषः। बाहुवनं भुजसमूहम्, रिपोः शत्रोर्बाणस्येत्यर्थः।

(थ) दोर्दण्डानां भुजदण्डानां छेदेन हरिणा सुदर्शनक्षिप्त्वा कर्त्तनेन यः असृक्स्रावः प्रस्रुतं शोणितं तद्वर्षिणम्, भावविहित-कृत्प्रत्ययो द्रव्यवत् प्रकाशत इति नियमात्।

(द) नानृतं न मिथ्या कार्य्यम्; तथाहि यदि त्वया बाणस्य क्षपणं कुर्य्याः, तदा मम तं प्रति मम अभयदानवचनं मिथ्याभूतं स्यादिति, अतः त्वया बाणस्य वधाकरणेनाभयवचनं मम सत्यं कार्य्यमिति भावः।

(ध) क्षामयामि क्षमार्थं प्रवर्त्तयामि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

इत्युक्तः प्राह गोविन्दः शूलपाणिमुमापतिम् ।
प्रसन्नवदनो भूत्वा गतामर्षोऽसुरं प्रति (न) ॥४५॥

श्रीभगवानुवाच ।

युष्मद्दत्तवरो बाणो जीवतामेष शङ्कर !
त्वद्वाक्यगौरवादेतन्मया चक्रं निवर्त्तितम् (प)॥४६॥
त्वया यदभयं दत्तं तद्दत्तमखिलं मया ।
मत्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शङ्कर ॥४७॥

योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम् ।
अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः*(फ)॥४८॥

इत्युक्ता प्रययौ कृष्णः प्राद्युम्निर्यत्र तिष्ठति ।
तद्बन्धफणिनो नेशुर्गरुड़ानिलभीषिताः(क) (ब)॥४९॥

ततोऽनिरुद्धमारोप्य सपत्नीकं गरुत्मति ।
आजग्मुर्द्वारकां रामकार्ष्णिदामोदराः पुरीम्† (भ)॥५०

इति श्रीविष्णुपुराणे पञ्चमांशे त्रयस्त्रिंशः अध्यायः ॥

असुरैरपास्तस्य शस्त्रौघस्य क्षपणे आदृतं सादरम् ॥४६॥ मत्तोऽविभिन्नमिति च्छेदः ॥४७।५०॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे त्रयस्त्रिंशोऽध्यायः ॥

(न) असुरं बाणासुरं प्रति गतामर्षः विगतकोपः सन् ।

(प) जीवतेः परस्मैपदिनः जीवतामित्यात्मनेपदप्रयोग आर्षः । निवर्त्तितं प्रतिसंहृतम् ।

(फ) अविद्यया अज्ञानेन मोहित आत्मा येषाम् तथाभूताः । भिन्नं त्वां माञ्च मिथः पृथग्रूपं द्रष्टुं शीलं येषां ते भिन्नदर्शिनः ।

(ब) प्राद्युम्निः प्रद्युम्नपुत्रः अनिरुद्धः, तस्य अनिरुद्धस्य बन्धफणिनः पाशभूताः सर्पाः, पूर्वमेव अनिरुद्धस्य नागपाशवद्धत्वादिति भावः । गरुड़स्य कृष्णवाहनस्य सर्पभुजो वैनतेयस्य यः अनिलः अनिरुद्धसमीपे समुत्पतनप्रभवो वायुः तेन भीषिताः भयं प्रापिताः, तदीयपक्षवातस्य विशेषेण तैः प्रत्यभिज्ञानात्तद्वायुसम्पर्काद् गरुड़ागमननिश्चयादिति भावः ।

(भ) रामं बलरामः, कार्ष्णिः प्रद्युम्नः, दामोदरः श्रीकृष्णः, ते ।

पाठान्तराणि—

(१—१)—निर्व्विण्णोऽस्म्याहवं विना ।
(४—२) समग्नं ध्वजमालोक्य हृष्टो हर्षं पुनर्ययौ ।
(७—३) जघान परिघं घोर— ।
(८—४)—यदुवीरेण निर्ज्जितः ।
(११—५) तं शोणितपुरं नीतं श्रुत्वा— ।
(१८—६)—प्रोच्य— ।
(२६—७)—शक्तिञ्चापययौ गुहः ।
(२८—८) नन्दिना— ।
(३०—९) मुसलेनाशु ताड़ितम् ।
(३१—२०) ततः कृष्णेन बाणस्य युद्धमासीत् सुदारुणम् । [illegible]तोरिषून् दीप्तान् कायत्राणविभेदिनः ॥

(३२—११) विव्याध केशवं बाणो बाणं विव्याध चक्रधृक् ।
(३३—१२)—लाघवादनिशं द्विज ।

कस्मिंश्चित् ग्रन्थे अधिकश्लोकाः—

योऽहं स त्वं जगच्चेदं सदेवासुर-मानुषम् ।
मत्तो नान्यदशेषं यत्तत् त्वं ज्ञातुमिहार्हसि ॥
अविद्यामोहितात्मानः पुरुषो भिन्नदर्शिनः ।
वदन्ति येदं पश्यन्ति यावयोरन्तरं हर ॥
प्रपन्नोऽहं गमिष्यामि त्वं गच्छ वृषभध्वज ॥

(४९—१३)—गरुड़ानिलपोथिताः ।

पुत्र-पौत्रः परिवृतस्तत्र रेमे जनार्द्दन ।
देवीभिः सततं विप्र भूभारतरणेच्छया ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुस्त्रिंशोऽध्यायः

[पौण्ड्रकवधः, काशीदहनञ्च ।]

मैत्रेय उवाच ।

चक्रे कर्म्म महच्छौरिर्बिभ्राणो मानुषीं तनुम् ।
जिगाय शक्रं सर्व्वञ्च सर्व्वदेवांश्च लीलया ॥१॥

यच्चान्यदकरोत् कर्म्म दिव्यचेष्टाविघातकृत् ।
तत् कथ्यतां महाभाग ! परं कौतूहलं हि मे ॥२॥

पराशर उवाच ।

गदतो मम विप्रर्षे ! शृणुतामिदमादरात् ।
नरावतारे कृष्णेन दग्धा वाराणसी यथा ॥३॥

पौण्ड्रको वासुदेवस्तु वासुदेवोऽभवद् भुवि ।
अवतीर्णस्त्वमित्युक्तो जनैरज्ञानमोहितैः ॥४॥

स मेने वासुदेवोऽहमवतीर्णो महीतले ।
नष्टस्मृतिस्ततः सर्व्वं विष्णुचिह्नमचीकरत् (क) ॥५॥

दूतञ्च प्रेरयामास कृष्णाय सुमहात्मने ।
त्यक्त्वा चक्रादिकं चिह्नं मदीयं नाम चात्मनः ॥६॥
वासुदेवात्मकं मूढ़ ! मुक्त्वा सर्व्वं विशेषतः (१) ।
आत्मनो जीवितार्थाय ततो मे प्रणतिं व्रज (ख) ॥७॥
इत्युक्तः सम्प्रहस्यैनं दूतं प्राह जनार्द्दनः ।
निजचिह्नमहं चक्रं समुत्सृक्ष्ये त्वयीति वै (ग) ॥८॥
वाच्यः स पौण्ड्रको गत्वा त्वया दूत ! वचो मम ।
ज्ञातस्त्वद्वाक्यसद्भावो यत् कार्य्यं तद्विधीयताम् ॥९॥
गृहीतचिह्न एवाहमागमिष्यामि ते पुरम् ।
समुत्सृक्ष्यामि ते चक्रं निजचिह्नमसंशयम् (घ) ॥१०॥
आज्ञापूर्व्वञ्च यदिदमागच्छेति त्वयोदितम् ।
सम्पादयिष्ये श्वस्तुभ्यं तदप्येषोऽविलम्बितम् (२) ॥११॥

चतुस्त्रिंशः अध्यायः

दिव्यानां दिवि भवानां चेष्टा पराक्रमस्तद्विघातकृत् तिरस्कर्त्ता ॥२।३॥

पौण्ड्रकः पौण्ड्रदेशजः, प्राकृतैर्जनैः संस्तुवद्भिर्वासुदेवोऽवतीर्णस्त्वमित्युक्तः सन् ॥४॥

सत्यमेवाहं वासुदेवोऽवतीर्ण इति स मेने ॥५—७॥

समुत्सृक्ष्ये त्वयीति बुद्धिसन्निहितं पौण्ड्रकमभिसन्धायोक्तम् ॥ चिह्नं चक्रं क्षिप्त्वा तं हनिष्यामीति भावः ॥८॥

एतत् स्पष्टयन्नाह—'वाच्यश्चे'ति चतुर्भिः । तद्वाक्यस्य सद्भावः याथार्थ्यम् ॥९॥

निजचिह्नं मच्चिह्नं चक्रं त्वयि प्रयोक्ष्ये ॥१०।११॥

(क) नष्टस्मृतिः विलुप्तात्मस्वरूपविज्ञान इत्यर्थः, स्मृतिरत्र विस्मृतस्वीययथार्थरूप इत्यर्थः । विष्णुचिह्नं विष्णोर्यद् यत् लक्षणं तत्सर्वमित्यर्थः, अचीकरत् प्राकाशयत् ।

(ख) जीवितार्थाय जीवनरूपप्रयोजनाय प्रणतिं मदन्तिके प्रणतो भव । तथाहि यदि त्वं तथा तथा न मदन्तिके प्रणतो न स्यास्तदा ते जीवनमेव न स्यादिति भावः ।

(ग) समुत्सृक्ष्ये त्वद्वचनानुसारेण त्यक्ष्यामि इति तर्हि किन्तु तत् न तव व्यवहारार्थं किन्तु तव वधार्थमिति भावः । समुत्सृक्ष्ये इति दिवादिगणीयस्य सृजेरात्मनेपदिनो रूपम् ।

(घ) अत्र समुत्सृक्ष्यामि त्यक्ष्यामीति तुदादिगणीयस्य सृजेः परस्मैपदिनो रूपम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरणं ते समभ्येत्य कर्त्तास्मि नृपते ! तदा ।
यथा त्वत्तो भयं भूयो न मे किञ्चिद्भविष्यति ॥१२॥

इत्युक्तेऽपगते दूते संस्मृत्याभ्यागतं हरिः ।
गरुत्मन्तमथारुह्य त्वरितं तत्पुरं (३) ययौ (ङ)॥१३॥

तच्चापि (४) केशवोद्योगं श्रुत्वा काशिपतिस्तदा ।
सर्वसैन्यपरीवारः पार्ष्णिग्राह उपाययौ (च) ॥१४॥

ततो बलेन महता काशिराजबलेन च ।
पौण्ड्रको वासुदेवोऽसौ केशवाभिमुखं ययौ (५)॥१५॥

तं ददर्श हरिर्दूरादुदारस्यन्दने स्थितम् ।
चक्रहस्तं गदाखड्गबाहुं (६) पाणिगताम्बुजम् ॥१६

सुपर्णरचितं ध्वजं घृतशार्ङ्गञ्च (७) सुपर्णरचितध्वजम् ।
वक्षःस्थले कृतञ्चास्य श्रीवत्सं ददृशे हरिः ॥१७॥

किरीटकुण्डलधरं पीतवासःसमन्वितम् (८) ।
दृष्ट्वा तं भावगम्भीरं जहास गरुड़ध्वजः (ज) ॥१८॥

युयुधे च बलेनास्य हस्त्यश्वबलिना द्विज !
निस्त्रिंशर्ष्टिगदाशूलशक्तिकार्म्मुकशालिना ॥१९॥

क्षणेन शार्ङ्गनिर्म्मुक्तैः शरैरिषुविदारणैः ।
गदाचक्रनिपातैश्च सूदयामास तद्बलम् (झ)॥२०॥

काशिराजबलञ्चैव क्षयं नीत्वा जनार्द्दनः ।
उवाच पौण्ड्रकं मूढ़मात्मचिह्नोपलक्षणम् (ञ)॥२१॥

श्रीभगवानुवाच ।

पौण्ड्रकोक्तं त्वया यत्तु दूतवक्त्रेण मां प्रति ।
समुत्सृजेति चिह्नानि तत्ते सम्पादयाम्यहम् ॥२२॥

शरणं त्वदीयं पुरं समभ्येत्य त्वत्तो यथा मे भयं भूयो न भविष्यति, तथा कर्त्तास्मि करिष्यामि त्वां हनिष्यामीत्यर्थः॥१२

(ङ) संस्मृत्या कृष्णकर्त्तृकस्मरणमात्रेण अभ्यागतं कृष्णसमीपे स्थितम्। अथवा संस्मृत्य गरुड़स्य आगमनमभिसन्धाय तेन, तत्र आरुह्येत्यनेनैककर्त्तृकत्वं बोध्यम्। तत्पुरं तस्य पौण्ड्रकस्य राज्ञः पुरम्।

(च) केशवस्य श्रीकृष्णस्य उद्योगं पौण्ड्रकप्रतिपक्षतया प्रस्थानम् श्रुत्वा। काशिपतिः काशिराजः सर्वसैन्यपरीवारः सर्वसैन्यबलपरिवृतः, पार्ष्णिग्राहः पृष्ठरक्षी सन्, तथाहि यः शत्रुमित्रयुद्धानस्य हितार्थं पृष्ठरक्षार्थं वर्त्तते, स पार्ष्णिग्राहः, 'पार्ष्णिग्राहस्तु पृष्ठतः' इति कोषात्।

(छ) उदारस्यन्दने महति रथे, अथवा उदारे विशेषाभिधानशून्ये, एतच्च तदवर्त्तिनः पौण्ड्रकस्य निखिलचिह्नानां श्रीकृष्णेन सम्यग् दर्शनसम्पादनार्थमुक्तम्। 'चक्रहस्तं' इत्यादिना 'पीतवासःसमन्वि'तमित्यन्तेन पौण्ड्रकस्य श्रीकृष्णचिह्नधारित्वमभिव्यक्तम्। चक्रं हस्ते यस्य तं गदाखड्गौ प्रहरणार्थं यस्य तम्, प्रहरणार्थेभ्यः परे निष्ठासप्तम्यावित्युनुशासनात्। पाणिगतं हस्तस्थितम् अम्बुजं पद्मं यस्य तम्। सुपर्णेन प्रतिकृतिमयेन गरुड़ेन रचितः निर्मितः ध्वजः रथस्येति शेषः, यस्य तम्। एतेषां विशेषणानां प्रागुक्तेन तं ददर्शेत्यनेनान्वयः। कृतं क्रियया सम्पादितम् कृत्रिममित्यर्थः। ददृशे इति कर्त्तर्य्यात्मनेपदमार्षम्।

(ज) भावेन मनसि कल्पितेन स्वीयवासुदेवभावेन गम्भीरम् तं पौण्ड्रकं दृष्ट्वेत्यन्वयः। अथवा भावगम्भीरं यथा स्यात् तथा जहासेति क्रियाविशेषणमिदम्।

(झ) तद्बलं तस्य पौण्ड्रकस्य सैन्यम्, सूदयामास नाशयामास।

(ञ) आत्मनः स्वस्य श्रीकृष्णस्य चिह्नानि चक्रादीनि लक्षणानि उपलक्षणानि परिचयसाधनानि यस्य तम्। पौण्ड्रक एव यथार्थवासुदेवतया आत्मप्रत्ययनार्थं श्रीकृष्णस्य चिह्नधारणे व्यसनी नान्य इति लोकानां निश्चयसत्त्वात् तच्चिह्नदर्शने नैवायं स पौण्ड्रक इति लक्षयितुं शक्यत इति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चक्रमेतत् समुत्सृष्टं गदेयं ते विसर्जिता ।
गरुत्मानेष निर्दिष्टः समारोहतु ते ध्वजम् ॥२३॥

पराशर उवाच ।

इत्युच्चार्य्य विमुक्तेन चक्रेणासौ विदारितः ।
पोथितो गदया भग्नो गरुत्मांश्च गरुत्मता (ट) ॥२४

ततो हाहाकृते लोके काशिपुर्य्यधिपो बली ।
युयुधे वासुदेवेन मित्रस्यापचितौ स्थितः ॥२५॥

ततः शार्ङ्गधनुर्मुक्तैश्छित्त्वा तस्य शरैः शिरः ।
काशिपुर्य्याञ्च चिक्षेप कुर्व्वन् लोकस्य विस्मयम् ॥२६

हत्वा च पौण्ड्रकं शौरिः काशिराजञ्च सानुगम् ।
पुनर्द्वारवतीं प्राप्तो रेमे स्वर्गगतो यथा ॥२७॥

तच्छिरः पतितं दृष्ट्वा तत्र काशिपतेः पुरे ।
जनः किमेतदित्याह केनेत्यत्यन्तविस्मितः ॥२८

ज्ञात्वा तं वासुदेवेन हतं तस्य सुतस्ततः ।
पुरोहितेन सहितस्तोषयामास शङ्करम् (ड) ॥२९

अविमुक्ते महाक्षेत्रे तोषितस्तेन शङ्करः ।
वरं वृणीष्वेति तदा तं प्रोवाच नृपात्मजम् ॥३०॥

स वव्रे भगवान् कृत्या पितृहन्तुर्वधाय मे ।
समुत्तिष्ठतु कृष्णस्य त्वत्प्रसादान्महेश्वर ॥३१॥

पराशर उवाच ।

एवं भविष्यतीत्युक्ते दक्षिणाग्नेरनन्तरम् ।
महाकृत्या समुत्तस्थौ तस्यैवाग्नेर्विनाशिनी (ढ) ॥३२॥

हस्तिभिः अश्वैश्च वलिना निस्त्रिंशायुधैः शालिना श्लाघ्येन ॥१६॥

अपि च तावान्नृण्ये स्थितः सन् युयुधे ॥२५—२७॥

प्रथमं किमेतत् ततश्च ज्ञात्वैतत् केन वा च्छिन्नमित्याह ॥२८—३०॥

पितृहन्तुर्वधाय प्रार्थनीया कृत्या समुत्तिष्ठत्विति वव्रे न तु तं हन्त्विति ॥३१॥

शंकरेणाप्येवं भविष्यतीति तस्याः समुत्थानमात्रमेवानुमतमिति न विरोधः । तस्यैवाभिचर्त्तरेव नत्वभिचार्य्यमाणस्य ॥३२॥

(ट) असौ पौण्ड्रकः । गरुत्मता यथार्थेन श्रीकृष्णवाहनभूतेन गरुडेन गरुत्मान् पौण्ड्रकस्य रथोपरि क्रियया निर्वर्त्तिता गरुडमूर्त्तिरित्यर्थः ।

(ठ) पुरोहितेन सहित इत्यनेन तत्र शङ्करतोषणे पुरोहितस्य साचिव्यं प्रतीयते ।

(ड) अविमुक्ते महाक्षेत्रे वाराणस्याम् । तेन पौण्ड्रकसुतेन । पितृहन्तुः कृष्णस्य वधाय वधमुद्दिश्य, कृत्या आभिचारिकदेवताविशेषः, कृत्या क्रियादेवतयो' रिति कोषात् । समुत्तिष्ठतु उद्भवतु इति वा ।

(ढ) पौण्ड्रकप्रार्थनानन्तरं शङ्करेण प्रोक्तमुं प्रति भविष्यती'ति, त्वया यदुक्तं, तत्तथैव भविष्यतीत्यर्थः । श्रीधरेण—'अनन्तरं कृत्यया श्रीकृष्णविनाशस्याकरणाद्वाक्यस्य विरोधमाशङ्क्य तत्समाधानाय कथितम्—'शङ्करेणापि भविष्यतीति तस्याः समुत्थानमात्रमेवानुमतं, न तु तं हन्त्विति

अत्रान्यथापि शङ्करवचो विरोधपरिहारः सम्भवति, यथा—काशिराजसुतस्य प्रार्थनावाक्यं 'कृत्या पितृहन्तुर्वधाय समुत्तिष्ठतु' इति । अत्र यदि एवमन्वयः क्रियते, यत् कृत्या मम वधाय पितृहन्तुः कृष्णस्य समीपे समुत्तिष्ठतु' इति तदा भाविवस्तुविचारेण शङ्करवाक्यस्य वैफल्याशङ्का न जायते । भावः । दक्षिणाग्नेरनन्तरम् दक्षिणाग्निसाध्याभिचारानन्तरमित्यर्थः तस्यव अभिचारकर्त्तुः काशिराजसुतस्य विनाशिनी विध्वंसकारिणी कृत्या आभिचारिकदेवतारूपिणी अग्नेः हुताशनात् समुत्तस्थौ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततो ज्वालाकरालास्या ज्वलत्केशकलापिका ।
कृष्ण कृष्णेति कुपिता कृत्या द्वारवतीं ययौ(ण)॥३३॥
तामवेक्ष्य जनत्रासविचलल्लोचनो मुने !
ययौ शरण्यं जगतां शरणं मधुसूदनम् ॥३४॥
काशिराजसुतेनेयमाराध्य वृषभध्वजम् ।
उत्पादिता महाकृत्येत्यवगम्याथ चक्रिणा ॥३५॥
जहि कृत्यामिमामुग्रां वह्निज्वालाजटालकाम् ।
चक्रमुत्सृष्टमक्षेषु क्रीड़ासक्तेन लीलया ॥३६॥
तदग्निमालाजटिलज्वालोद्गारातिभीषणाम् ।
कृत्यामनुजगामाशु विष्णुचक्रं सुदर्शनम्(त) ॥३७॥
चक्रप्रतापविध्वस्ता कृत्या माहेश्वरी तदा ।
ननाश वेगिनी वेगात् तदप्यनुजगाम ताम् ॥३८॥
कृत्या वाराणसीमेव प्रविवेश त्वरान्विता ।
विष्णचक्रप्रतिहतप्रभावा मुनिसत्तम(थ) ॥३९॥
ततः काशिबलं भूरि प्रमथानां तथा बलम् ।
समस्तशस्त्रास्त्रयुतं चक्रस्याभिमुखं ययौ(द) ॥४०॥
शस्त्रास्त्रमोक्षचतुरं दग्ध्वा तद्बलमोजसा ।
कृत्यागर्भामशेषां तां दग्ध्वा वाराणसीं पुरीम्(ध)॥४१
सभूभृद्भृत्यपौरान्तु साश्वमातङ्गमानवाम् ।
अशेषकोषकोष्ठां तां दुर्निरीक्ष्यां सुरैरपि(न) ॥४२॥
ज्वालापरिप्लुताशेष-गृह-प्राकारचत्वराम् ।
ददाह तद्धरेश्चक्रं सकलामेव तां पुरीम् ॥४३॥
अक्षीणामर्षमत्युग्रसाध्यसाधनसस्पृहम् ।
तच्चक्रं प्रस्फुरद्दीप्ति विष्णोरभ्याययौ करम् ॥४४॥
इति श्रीविष्णुपुराणे पञ्चमांशे चतुस्त्रिंशः अध्यायः ॥

ज्वलन् केशकलापो यस्याः सा ॥३३॥
त्रासेन विचलन्ति लोचनानि यस्य सः ॥३४॥
वह्निज्वाला एव जटारूपाः संश्लिष्टा अलका यस्यास्तां जहीति चक्रमुत्सृष्टम् ॥३६॥
अग्निमालाभिर्जटिला चासौ ज्वालानामुद्गारैश्चातिभीषणा च ताम्। पाठान्तरे चक्रविशेषणम् ॥३७॥
ननाश अपलायत ॥३८—४१॥
भूभृतां राज्ञां भृत्यैः पौरैश्च सहिताम् ॥४२।४३॥
अक्षीणामर्षम् अगतक्रोधम् अत एवाल्पस्य कृत्यावाराणसीदाहादेः साध्यस्य साधनेन सस्पृहं पुनः कार्यान्तरसाधनाय साकांक्षमित्यर्थः ॥४४॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे चतुस्त्रिंशोऽध्यायः ।

(ण) ज्वालाभिः करालं भीमम् आस्यं वदनं यस्याः सा ।
(त) तत् विष्णुचक्रं सुदर्शनम् अग्निमालेत्यादिविशेषणविशेषितां कृत्यामनुजगामेत्यन्वयः ।
(थ) विष्णुचक्रेण प्रतिहतः प्रभावः यस्याः सा ।
(द) काशिबलं काशिराजसैन्यम्, तथा प्रमथानां रुद्रानुचराणां बलं सैन्यम्, समस्तशस्त्रास्त्रयुतं निखिलविविधप्रकारायुधसमन्वितम् चक्रस्य अभिमुखं सम्मुखं तत्परिभवसम्पादनार्थमिति शेषः ।
(ध) शस्त्राणां तथा अस्त्राणां मोक्षे मोचने चतुरं तद्बलं काशिराजबलं तथा प्रमथबलमित्यर्थः । ओजसा स्वशक्त्या, कृत्या गर्भे यस्याः तां कृत्यायुक्तामित्यर्थः ।
(न) अशेषकोषकोष्ठां निखिलधनागारकुसूलसहिताम् ।

पाठान्तराणि—
(७—१)—त्वक्त्वा सर्व्वमशेषतः ।
(११—२)—समागम्याविलम्बितम् ।
(१३—३) त्वरितस्तत्पुरं— ।
(१४—४)—ततस्तु— ।
(२५—५)—केशवाभिमुखो ययौ ।
(१६—६)—गदाशार्ङ्गबाहुं— ।
(१७—७) स्वगरं पीतवसनं— ।
(१८—८)—नानारत्नोपशोभितम् ।
(२४—९) पातितो गदया भग्नो ध्वजश्चास्य गरुत्मता ।
(२८—१०)—च्छिन्नं केनेति विस्मितः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चत्रिंशः अध्यायः

[कृष्णपुत्र-शाम्बस्य विवाहः ।]

मैत्रेय उवाच ।

भूय एवाहमिच्छामि बलभद्रस्य धीमतः ।
श्रोतुं पराक्रमं ब्रह्मन् ! तन्ममाख्यातुमर्हसि ॥१॥

यमुनाकर्षणादीनि श्रुतानि भगवन्मया ।
तत् कथ्यतां महाभाग ! यदन्यत् कृतवान् बलः ॥२॥

पराशर उवाच ।

मैत्रेय ! श्रूयतां कर्म्म यद् रामेणाभवत् कृतम् ।
अनन्तेनाप्रमेयेण शेषेण धरणीभृता ॥३॥

दुर्य्योधनस्य तनयां (क) स्वयंवरकृतक्षणाम् ।
बलादादत्तवान् वीरः शाम्बो जाम्बवतीसुतः ॥४॥

ततः क्रुद्धा महावीर्य्याः कर्ण-दुर्य्योधनादयः ।
भीष्म-द्रोणादयश्चैव बबन्धुर्युधि निर्ज्जितम् ॥५॥

तच्छ्रुत्वा यादवाः सर्व्वे क्रोधं दुर्य्योधनादिषु ।
मैत्रेय ! चक्रुश्च ततो निहन्तुं ते महोद्यमम् (ख)॥६

तान् निवार्य्य बलः प्राह मदलोलाकुलाक्षरम् ।
मोक्ष्यन्ति ते मद्वचनाद् यास्याम्येको हि कौरवान् ॥७

पराशर उवाच ।

बलदेवस्ततो गत्वा नगरं नागसाह्वयम् ।
बाह्योपवनमध्येऽभूद् न विवेश च तत्पुरम् ॥८॥

बलमागतमाज्ञाय भूपा दुर्य्योधनादयः ।
गामर्घ्यमुदकञ्चैव रामाय प्रत्यवेदयन् ॥९॥

गृहीत्वा विधिवत् सर्व्वं ततस्तानाह कौरवान् ।
आज्ञापयत्युग्रसेनः शाम्बमाशु विमुञ्चत ॥१०॥

ततस्ते तद्वचः श्रुत्वा भीष्मद्रोणादयो द्विज (३) ।
कर्णदुर्य्योधनाद्याश्च चक्रुर्धर्द्विजसत्तम ॥११॥

ऊचुश्च कुपिताः सर्व्वे वाल्लीकाद्याश्च कौरवाः ।
अराज्यार्हं यदोर्व्वंशमवेक्ष्य मुसलायुधम्(ग) ॥१२॥

पञ्चत्रिंशः अध्यायः

यथा सकलबलजनकोषादिसहितां वाराणसीं विष्णुचक्रं ददाह, तथैव सर्वसहितां हस्तिनापुरं बलभद्रो गंगायां प्रक्षेप्तुमुद्यत इति वक्तुं तत् प्रस्तावमाह—'दुर्योधनस्ये'त्यादिना 'विविशुर्गजसाह्वय'मित्यन्तेन। स्वयंवरे कृतक्षणां लब्धावसराम् ॥४॥

(क) ते दुर्य्योधनादयः कौरवाः, मोक्ष्यन्ति विगतबन्धं करिष्यन्ति शाम्बं वद्धमिति शेषः। अहं कौरवान् दुर्य्योधनादीन् यास्यामि प्राप्स्यामि।

मदेन लोलं चपलम् आकुलाक्षरञ्च यथा भवत्येवं प्राह ॥७ तत् पुरं न 'विवेशे'ति स्वोक्ताकरणे योद्धुं तत् पुरञ्च गंगायां प्रक्षेप्तुमिच्छन्। उदकञ्चाप्यर्घ्यं रामाय दत्तवन्तः ॥८॥

(ख) नागसाह्वयं हस्तिनापुरम्। बाह्यस्य नगरबहिर्वर्त्तिनः उपवनस्य मध्ये अभूत् स्थितः।

(ग) यदोर्वंशम् अराज्यार्हं राजत्वायोग्यम् अवेक्ष्य विचार्य्य मुषलायुधं मुषलिनं बलभद्रम्, 'तालाङ्को मुषली हली' ति कोषात्। अत्र 'मुषलायुध' पदेन बलभद्रस्य उपादानाद् बलं मुषलप्रहरणं दृष्ट्वापि न ते भीता इति व्यज्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भो भोः ! किमेतद्भवता बलभद्रेरितं वचः ।
आज्ञां कुरुकुलोत्थानां यादवः कः प्रदास्यति (घ)॥१३
उग्रसेनोऽपि यद्याज्ञां कौरवाणां प्रदास्यति ।
तदलं पाण्डुरच्छत्रैर्नृपयोग्यैर्विडम्बितैः(ङ) ॥१४॥
तद्गच्छ बल ! पापाढ्यं शाम्बमन्यायचेष्टितम् ।
विमोक्ष्यामो न भवतो नोग्रसेनस्य शासनात्(च)॥१५
प्रणतिर्या कृतास्माकमार्य्याणां (४) कुकुरान्धकैः ।
नवाम सा कृता केयमाज्ञा स्वामिनि भृत्यतः ॥१६॥
अध्वमारोपिता युयं समानासनभोजनैः ।
को दोषो भवतां नीतिर्यत् प्रीत्या नावलोकिता ॥१७
अस्माभिरर्घो भवतो योऽयं बल ! निवेदितः ।
प्र मृणैतन्नैतदस्माकं कुल्यं (५) युष्मत्कुलोचितम्(छ)
॥१८

पराशर उवाच ।

इत्युक्त्वा कुरवः सर्व्वे न मुञ्चामो हरेः सुतम् ।
कृतैकनिश्चयास्तूर्णं विविशुर्गजसाह्वयम् ॥१९॥
मत्तः कोपेन चाघूर्णंस्तदधिक्षेपजन्मना(ज) ।
उत्थाय पाष्ण्र्या वसुधां जघान स हलायुधः(झ) ॥२०
ततो विदारिता पृथ्वी पार्ष्णिघातान्महात्मनः ।
आस्फोटयामास तथा दिशः शब्देन पूरयन्(ञ) ॥२१
स उवाचातिताम्राक्षो भ्रुकुटीकुटिलाननः ।
अहो मदापलेपोऽयमसाराणां दुरात्मनाम् ॥२२॥

विड़म्बितैरस्मदनुकरणेन धृतैर्यद्दूनां नृपार्हैर्लाञ्छनैरलम् । नान्यथहरिष्याम इति भावः ॥१४।१५॥

अस्माभिर्मानितत्वात् सा प्रणतिरद्य न कृता चेत्तथा नाम मास्तु, केयमाज्ञा स्वामिनीति । वयं स्वामिनो यादवा-स्तद्भृत्याः, अत आज्ञा न युक्ता, किन्तु विज्ञापयतीति वक्तव्यमिति भावः ॥१६॥

नीतिर्यत् प्रीत्या नावलोकितेति हीनानामतिसम्मानो न कार्य इत्येवम्भूता राजनीतिर्युष्मासु प्रीत्यास्माभिर्न विचारिता, अतोऽस्माकमेवायं दोष इति भावः ॥१७।१८॥

न मुञ्चाम इति कृतैकनिश्चयाः कृतैकमत्याः ॥१९॥
अधिक्षेपजन्मना तिरस्कारकृतेन ॥२०।२१॥
असाराणां बलहीनानाम् ॥२२॥

(घ) हे बलभद्र ! भवता एतत् किं कीदृशम् अयोग्यं वचः 'आज्ञापयत्युग्रसेन' इत्यादिरूपं वाक्यम् ईरितं कथितम् । कुरुकुलोत्थानां कुरुवंशप्रभवाणाम् आज्ञां आदेशम् ।

(ङ) अत्र विड़म्बितैरित्यादि श्रीधरसम्मतार्थकल्पे विड़म्बितैः अनुकृतैः पाण्डुरच्छत्रैरलमित्यर्थः । अर्थान्तरमप्यत्र सम्भाव्यते, यथा—राजानो हि दृप्तानां दर्पमसहमानास्तान् निगृह्णन्ति, तद् एते यादव उग्रसेनः मौढ्यादभिमानेन दृप्तः कौरवानपि आज्ञापयति, तदा तेषां राजोचितच्छत्राणि विड़म्बितानि अप-नीतानि, नृपयोग्यच्छत्रधारिभिस्तैस्तद्दर्पस्यादमनादिति भावः । पाण्डवच्छत्रैरिति पाठे कौरवराजच्छत्राण्येव पाण्डवराज-च्छत्राणीत्यभेदमभिसन्धायोक्तं पाण्डवच्छत्रैरिति । तदेवं राजोचितच्छत्रधारणमस्माकं वृथैव, विशेषाभावादिति भावः ।

(च) भवतः शासनात् आदेशात् न विमोक्ष्यामः वयमिति शेषः, उग्रसेनस्य च शासनात् न विमोक्ष्याम इत्यन्वयः ।

(छ) एतत् अर्घ्यनिवेदनं न अस्माकं कुल्यं कुलोचितम्, किन्तु युष्मत्कुलोचितम्, तथा हि अस्मत्कुलं मान्यतया युष्मत्-कुलप्रदत्तमर्घमर्हति न तु युष्मत्कुलमपकृष्टत्वात् अस्मत्-कुलप्रदत्तमर्घमिति, भावः ।
अथवा अस्माकं कुल्यम् अस्मत्कुलोचितम् अस्मात्कुललभ्यमित्यर्थः, एतत् अर्घरूपं न युष्मत्कुलोचितं युष्मत्कुलेन लब्धुं योग्यमित्यर्थः युष्माभिरेव वयमर्चनीया न त्वस्माभिर्यूयमिति भावः ।

(ज) आधूर्णन्नित्यत्र शतृप्रत्यय आर्षः ।

(झ) पार्ष्णिनेति वक्तव्ये पाष्ण्येति प्रयोग आर्षः ।

(ञ) शब्देन वीरोचितगर्जनेन, आस्फोटयामास बाहूनास्फोटं चकार बलभद्र इति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कौरवाणां महीपत्वमस्माकं किल कालजम् ।
उग्रसेनस्य ये नाज्ञां मन्यन्तेऽद्यापि लङ्घनम् ॥२३॥

आज्ञां प्रतीच्छेद्धर्म्मेण सह देवैः शचीपतिः ।
सदाध्यास्ते सुधर्म्मां तामुग्रसेनः शचीपतेः ॥२४॥

धिङ्मनुष्यशतोच्छिष्टे तुष्टिरेषां नृपासने ।
पारिजाततरोः पुष्पमञ्जरीर्वनिताजनः(ट) ॥२५॥

बिभर्त्ति यस्य भृत्यानां सोऽप्येषां न महीपतिः ।
समस्तभूभृतां नाथ उग्रसेनः स तिष्ठतु ॥२६॥

अद्य निष्कौरवामुर्व्वीं कृत्वा यास्यामि तत्पुरीम् ।
कर्णं दुर्य्योधनं द्रोणमद्य भीष्मं सवाह्लिकम्(ठ) ॥२७

दुष्टान् दुःशासनादींश्च भूरिश्रवसमेव च ।
सोमदत्तं शलं भीममर्ज्जुनं सयुधिष्ठिरम् (६) ॥२८॥

यमजौ कौरवांश्चान्यान् हत्वा साश्वरथद्विपान् ।
वीरमादाय शाम्बञ्च सपत्नीकं ततः पुरीम् ॥
द्वारकामुग्रसेनादीन् गत्वा द्रक्ष्यामि बान्धवान्(ड)॥२९
अथवा कौरवाधीनं (७) समस्तैः कुरुभिः सह ।
भारावतरणे शीघ्रं देवराजेन चोदितः ॥
भागीरथ्यां क्षिपाम्याशु नगरं नागसाह्वयम्(ढ)॥३०

पराशर उवाच ।

इत्युक्त्वा मदरक्ताक्षः कर्षणाधोमुखं हलम् ।
प्राकारवप्रे विन्यस्य (८) चकर्ष मुषलायुधः(ण)॥३१॥
आघूर्णितं तत् सहसा ततो वै हस्तिनापुरम् (९)।
दृष्ट्वा संक्षुब्धहृदयाश्चुक्रुशुः सर्व्वकौरवाः ॥३२॥
राम ! राम ! महावाहो ! क्षम्यतां क्षम्यतां त्वया।
उपसंह्रियतां कोपः प्रसीद मुषलायुध ॥३३॥

कौरवाणां महीपतित्वं स्वतः, अस्माकन्तु कालजम् आगन्तुकमेतत् प्रसादजमित्यर्थः। अद्यापि इन्द्रादीन-

(ट) एषां कौरवाणाम्, मनुष्यशतैः बहुभिर्मनुष्यैः उच्छिष्टे उपभुक्ते उपभोगशेषभूते इत्यर्थः। नृपासने राजसिंहासने तुष्टिरिति धिक्, अथवा इति हेतोस्तान् कौरवान् धिक्। पारिजाततरोरित्यादिश्लोकार्द्धस्य उत्तरश्लोकेनान्वयसमाप्तिः। यस्य उग्रसेनस्य भृत्यानां वनिताजनः पारिजाततरोः पुष्पमञ्जरीः पुष्पाणि तथा मञ्जरीः बिभर्त्ति धारयति उपभुङ्क्ते इत्यर्थः, समस्तभूभुजां नाथ उग्रसेनः स तिष्ठतु तस्य तु कथैव नास्तीत्यर्थः, सोऽपि स उग्रसेनोऽपि एषां समीपे न महीपतिः न राजा, इति महदिदमाश्चर्य्यमिति भावः।

अथवा समस्तभूभृतामित्याद्युत्तरार्धस्य परवर्त्तिश्लोकेन सम्बन्धः। ननु यदि महाप्रभाव एवोग्रसेनस्तर्हि तस्य राजत्वानभ्युपगमादपराधिनो विरुद्धा एते कौरवाः ससैन्येनागत्य तेन दमनीया इत्याकाङ्क्षायामाह समस्तेत्यादि। तथाहि एषां दमने महाराजस्योग्रसेनस्य नापेक्षा, अहमेक एव तद्विषेयभूतस्तद्विषेयं दुष्टदमनं विधास्यामीत्यभिप्रेत्याह अवेत्यादि।

प्याज्ञापयते यस्तस्य ये कुरव आज्ञां न मन्यन्ते नाद्रियन्ते किन्तु तल्लंघनमेव मन्यन्ते ॥२३॥

अद्यापीत्यस्याभिप्रायं विवृणोति, आज्ञां प्रतीच्छेदिति ॥२४—२७॥

यमजौ नकुल-सहदेवौ ॥२८॥

कर्षणार्थमधोमुखं प्राकारवप्रे दुर्गस्य मूलदेशे ॥३१॥

आघूर्णितं विचलितम् ॥३२॥

(ठ) निष्कौरवाम् कौरवशून्याम्, उर्वीं पृथिवीम्, तत्पुरीं तस्य उग्रसेनस्य राज्ञः पुरीं द्वारकां नगरीम्।

(ड) साश्वरथद्विपान् अश्वरथगजसहितान्, सपत्नीकं पत्नीसहितं, पुरीं द्वारकाम्।

(ढ) चोदितः प्रेरितः, नागसाह्वयम् हस्तिनापुरं कौरवाधिष्ठानभूतमिति भावः।

(ण) मदेन वारुणीपानजनितमत्ततया रक्ते लोहितवर्णे अक्षिणी नेत्रे यस्य सः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एष शाम्बः सपत्नीकस्तव निर्यातितो बल !
अविज्ञातप्रभावाणां क्षम्यतामपराधिनाम्(त) ॥३४॥

पराशर उवाच ।

ततो निर्यातयामासुः शाम्बं पत्नीसमन्वितम् ।
निष्क्रम्य नगरात्तूर्णं (१०) कौरवा मुनिपुङ्गव ॥३५॥
भीष्म-द्रोण-कृपादीनां प्रणम्य वदतां प्रियम् ।
क्षान्तमेतन्मयेत्याह बलो बलवतां वरः ॥३६॥
अद्याप्याघूर्णिताकारं लक्ष्यते तत् पुरं द्विज !
एष प्रवादो रामस्य बलशौर्य्योपलक्षणः(थ) ॥३७॥
ततस्तु कौरवाः शाम्बं सम्पूज्य हलिना सह ।
प्रेषयामासुरुद्वाहधनभार्य्यासमन्वितम् ॥३८॥

इति श्रीविष्णुपुराणे पञ्चमांशे पञ्चत्रिंशः अध्यायः ॥

निर्यातितः समर्पितः ॥३४।३५।३६॥

उद्वाहधनेन परिबर्हेण भार्यया च समन्वितम् ॥३८॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाभिधायां स्वप्रकाशाख्ययां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे चतुस्त्रिंशोऽध्यायः ।

(ङ) निर्य्यातितः प्रत्यर्पितः, न विज्ञातः प्रभावः सामर्थ्यं येषां तेषाम् अपराधिनां त्वदधिक्षेपजनितदोषवतामस्माकमित्यर्थः ।

(थ) उपलक्षयति शापयति इत्युपलक्षणः शापक इत्यर्थः, बलशौर्य्ययोः उपलक्षणः परिचायक इत्यर्थः ।

पाठान्तराणि—

(४–१) सुयोधनस्य तनयां— ।
(६–२)—कृष्ण तान् निहन्तुं महोद्यमम् ।
(११–३) ततस्तद्वचनं श्रुत्वा भीष्म-द्रोणादयो नृपाः ।
(१६–४) —मान्यानां— ।
(२८–५) —कुलाद्— ।
(२९—६) सोमदत्तं शलञ्च व भीमार्जुन—युधिष्ठिरान्— ।
(३०—७) —अथवा कौरवावासं— ।
(३१—८) —प्राकार-वप्र-दुर्गस्य— ।
(३२—९) —हास्तिनं पुरम्— ।
(३५—१०)—सपुरात् तूर्णं— ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षट्त्रिंशः अध्यायः

[द्विविदवधः]

पराशर उवाच ।

मैत्रेय ! श्रूयतां (१) तस्य बलस्य बलशालिनः ।
कृतं यदन्यत्तेनाभूत्तदपि श्रूयतां द्विज (२) ॥१

नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्य्यो द्विविदो नाम वानरः ॥२॥

वैरानुबन्धं बलवान् स चकार सुरान् प्रति ।
नरकं हतवान् कृष्णो बलदर्पसमन्वितम् (३) ॥३॥

करिष्ये सर्व्वदेवानां तस्मादेतत्प्रतिक्रियाम् ।
यज्ञविध्वंसनं कुर्व्वन् मर्त्तलोकक्षयं तथा(क) ॥४॥

ततो विध्वंसयामास यज्ञानज्ञानमोहितः ।
बिभेद साधुमर्य्यादां क्षयं चक्रे च देहिनाम् (ख) ॥५॥

ददाह च वनोद्देशान् (४) पुरग्रामान्तराणि च ।
क्वचिच्च पर्व्वताक्षेपैर्ग्रामादीन् समचूर्णयत् ॥६॥

शैलानुत्पाट्य तोयेषु मुमोचाम्बुनिधौ तथा ।
पुनश्चार्णवमध्यस्थः क्षोभयामास सागरम् ॥७॥

तेन विक्षोभितश्चाब्धिरुद्वेलोऽजायत द्विज (५)।
प्लावयंस्तीरजान् ग्रामान् पुरादीनतिवेगवान्(ग) ॥८॥

कामरूपी महारूपं कृत्वा संस्थानशेषतः (६)।
लुण्ठन् भ्रमणसंमर्द्दैः सञ्चूर्णयति वानरः ॥९॥

तेन विप्रकृतं सर्व्वं जगदेतद्दुरात्मना ।
निःस्वाध्यायवषट्कारं मैत्रेयासीत् सुदुःखितम्(घ)॥१०॥

एकदा रैवतोद्याने पपौ पानं हलायुधः ।
रेवती च महाभागा तथैवान्या वरस्त्रियः ॥११॥

उपगीयमानो विलसल्ललनामौलिमध्यगः ।
रेमे यदुवरश्रेष्ठः कुवेर इव मन्दरे ॥१२॥

षट्त्रिंशः अध्यायः

'मैत्रेय श्रूयतोमिति यदुक्तं तदेव विवृणोति-'कृतं यदन्य'दिति ॥१।२।३।४।५।६।७।

रैवतो द्वारकायाः पूर्वतो गिरिस्तत्सम्बन्धिन्युद्याने ॥११॥

विलसल्ललना विलासिन्यः, तासां मौलयः मूर्धन्यः तासां मध्यगः ॥१२॥

(क) एतस्य नरकहननस्य प्रतिक्रियां प्रतीकारं प्रतिहिंसामित्यर्थः, करिष्यामि सम्पादयिष्यामि ।

(ख) यज्ञहविर्भुजो देवाः, अतः यज्ञविध्वंसनेन देवानां महती प्रतिहिंसा साधिता स्यादित्याद्याकूतम् । साधूनां मर्य्यादां स्थितिं बिभेद नाशयामास ।

(ग) उद्वेलः अतिक्रान्तवेलाभूमिः अजायत, तेन लोकस्य सागरजलप्लुतानां महान् क्षयो निग्रहश्च सम्पन्नः निषातामिति भावः ।

(घ) निः न विद्यते स्वाध्यायः वेदपाठः वषट्कारः हविर्दानाय वषट्पदाद्युच्चारणं च यत्र तथाभूतम् । तथाहि तस्मिन् जगति वेदादिपाठः यज्ञादिक्रिया च निःशेषं लोपमापद्यते इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः स वानरोऽभ्येत्य गृहीत्वा सीरिणो हलम् ।
मुषलञ्च चकारास्य सम्मुखञ्च बिड़म्बनम्(ङ) ॥१३॥

तथैव योषितां तासां जहासाभिमुखं कपिः ।
पानपूर्णांश्च करकांश्चिक्षेपाहृत्य वै तदा (७) ॥१४॥

ततः कोपपरीतात्मा भर्त्सयामास तं बलः (८) ।
तथापि तमवज्ञाय चक्रे किलकिलाध्वनिम् ॥१५॥

ततः समुत्थाय बलो (९) जग्राह मुषलं रुषा ।
सोऽपि शैलशिलां भीमां जग्राह प्लवगोत्तमः(च) ॥१६

निक्षेप च स तां क्षिप्तां मुषलेन सहस्रधा ।
विभेद यादवश्रेष्ठः सा पपात महीतले(छ) ॥१७॥

आपतन्मुषलञ्चासौ (१०) समुल्लङ्घ्य प्लवङ्गमः ।
बिलागम्य रोषेण तलेनोरस्यताड़यत् ॥१८॥

ततो बलेन कोपेन मुष्टिना मूर्द्धि ताड़ितः ।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥१९॥

पतता तच्छरीरेण गिरेः शृङ्गमदीर्य्यत ।
मैत्रेय ! शतधा वज्रिवज्रेणेव हि ताड़ितम् (ज)
(२२)॥२०

पुष्पवृष्टिं ततो देवा रामस्योपरि चिक्षिपुः ।
प्रशशंसुस्तथाभ्येत्य साध्वेतत्ते महत् कृतम् ॥२१॥

अनेन दुष्टकपिना दैत्यपक्षोपकारिणा ।
जगन्निराकृतं वीर ! दिष्ट्यासौ क्षयमागतः ॥२२॥

इत्युक्त्वा दिवमाजग्मुर्देवा हृष्टाः सगुह्यकाः ॥२३॥

पराशर उवाच ।

एवंविधान्यनेकानि बलदेवस्य धीमतः ।
कर्म्माण्यपरिमेयाणि शेषस्य धरणीभृतः ॥२४॥

इति श्रीविष्णुपुराणे पञ्चमांशे षट्त्रिंशः अध्यायः ॥

विड़म्बनां भ्रूक्षेपदन्तदर्शनादिविक्रियाम् ॥१३॥

पीयते इति पानं मदिरा तत्पूर्णान् करकान् कलशान् ॥१४।१८।

अदीर्य्यत विदीर्णभूत् ॥१६।२०॥

इति श्रीधरस्वामीकृतायमात्मप्रकाशाभिधाया स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे षट्त्रिंशोऽध्यायः ।

(ङ) सीरिणः हलिनः, सीरो हलं तत् विद्यते यस्य स सीरी तस्य सीरिणः, इति व्युत्पत्तेः 'लाङ्गलं हलं गोदारणञ्च सीर' इति, सीरपाणिः कालिन्दी भेदनो बल' इति च कोषात् ।

(च) प्लवेन प्लुत्या गच्छन्तीति प्लवगा वानरास्तेषु उत्तम महाबलशालित्वात् ।

(छ) क्षिप्तां तेन द्विविदेन वानरेणेति शेषः, तां शैलशिलाम्, यादवश्रेष्ठः बलरामः, सा शैलशिला, आपतन् बलरामेन क्षिप्तः सन् द्विविदवानरं प्रति आगच्छन् यः मुषलः तम्, उरसि बलरामस्य वक्षसि तलेन करतलेन अताड़यत् ।

(ज) वज्रिणः वज्रपाणेः पुरन्दरस्य वज्रेण कुलिशेन ताड़ितम् आहतम् इव ।

पाठान्तराणि—

(१—१) मैत्रेयैतद् बलं—।
(१—२) —त्वया—।
(१—३) —देवराजेन चोचित—।
(१—४) ददाहं सवनाम् देशान् —।
(१—५) लब्धेलो द्विज जायते—।
(६—६) —शस्यान्यशेषतः।
(१४—७) —यता।
(१५—८) —हलो—।
(१६—९) —ततः स्मयित्वा स बलो—।
(१०—११)—विदारितम्—।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तत्रिंशः अध्यायः

[ऋषीणां शापः, यदुवंशविनाशः, भगवतः स्वधामप्रत्यावर्त्तनञ्च]

पराशर उवाच ।

एवं दैत्यवधं कृष्णो बलदेवसहायवान् ।
चक्रे दुष्टक्षितीशानां तथैव जगतः कृते ॥१॥

क्षितेश्च भारं भगवान् फाल्गुनेन समं विभुः (१) ।
अवतारयामास हरिः समस्ताक्षौहिणीवधात्(क) ॥२॥

कृत्वा भारावतरणं भुवो हत्वाखिलान् नृपान् ।
शापव्याजेन विप्राणामुपसंहृतवान् कुलम्(ख) ॥३॥

उत्सृज्य द्वारकां कृष्णस्त्यक्त्वा मानुष्यमात्मभूः (ख) ।
सांशो विष्णुमयं स्थानं प्रविवेश पुनर्निजम् (३) ॥४॥

मैत्रेय उवाच ।

स विप्रशापव्याजेन सञ्जग्ने स्वकुलं कथम् ।
कथञ्च मानुषं देहमुत्ससर्ज्ज जनार्द्दनः ॥५॥

पराशर उवाच ।

विश्वामित्रस्तथा कण्वो नारदश्च महामुनिः ।
पिण्डारके महातीर्थे दृष्टा यदुकुमारकैः ॥६॥

ततस्ते यौवनोन्मत्ता भाविकार्य्यप्रचोदिताः ।
शाम्बं जाम्बवतीपुत्रं भूषयित्वा स्त्रियं यथा ॥७॥

प्रसृतांस्तान्मुनीनूचुः (१) प्रणिपातपुरःसरम् ।
इयं स्त्री पुत्रकामस्य बभ्रोः किं जनयिष्यति ॥८॥

पराशर उवाच ।

दिव्यज्ञानोपपन्नास्ते विप्रलब्धाः कुमारकैः(ग) ।
मुनयः कुपिताः प्रोचुर्मुषलं जनयिष्यति ।
येनाखिलकुलोत्सादो यादवानां भविष्यति*(घ) ।

दुष्टक्षितीशानाञ्च वधं चक्रे ॥१॥

फाल्गुनेन समं तत्सारथ्येन च क्षितेर्भारमवतारयामास ॥२।३॥

(क) अत्र अवतारयामासेत्युक्ते तृतीयपादे नवाक्षराणि सम्पद्यन्ते, तेन च अनुष्टुप्छन्दो व्याघातः, अतः अत्र वतारयामासेति पाठः समीचीनः प्रतिभाति, स च 'वष्टि भागुरिरलोपमवाप्योरुपसर्गयो'रित्यनुशासनेन साधुः । अन्यथा तु आर्षत्वात् साधुत्वं प्रतिपत्तव्यम् । समस्ताक्षौहिणीवधादित्यत्र दुष्टक्षितीशानामिति पूर्वोक्तमनुषज्जनीयम् । अक्षौहिणीविवरणन्तु प्रागुक्तमनुसन्धेयम् ।

(ख) कुलं स्वीयं यदुवंशमित्यर्थः, उपसंहृतवान्, तदिदमुत्तरत्र व्यक्तं विस्तरेण ।

मानुष्यं मनुष्यनाट्यं सांशः बलप्रद्युम्नसहितः ॥५।६॥

भाविकार्यः यादवसंहारस्तेन प्रयुक्ताः ॥७८॥

दिव्यमलौकिकं भगवन्मतं तज्ज्ञानसम्पन्नाः विप्रलब्धाः प्रतारिताः ॥९॥

(ग) विप्रलब्धाः पुंसः शाम्बस्य स्त्रीत्वप्रतिपादनेन प्रतारिताः । कुमारकैः यदुवंशीयकुमारैः ।

(घ) अखिलस्य निःशेषस्य कुलस्य वंशस्य उच्छेदः विध्वंस इति यावत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्युक्तास्तैः कुमारास्ते आचचक्षुर्यथाकृतम् (५)।
उग्रसेनाय मुसलं जज्ञे शाम्बस्य चोदरात् ॥१०॥

तदुग्रसेनो मुसलमयश्चूर्णमकारयत्(ङ)।
क्षिप्ते स चैरकाश्चूर्णाः प्रक्षिप्तस्तैर्महोदधौ (६)॥११॥

मुसलस्याथ लोहस्य चूर्णितस्यान्धकैर्द्विज।
खण्डं चूर्णयितुं शेकुर्नैकं ते तोमराकृति (७)॥१२॥

तदप्यम्बुनिधौ क्षिप्तं मत्स्यो जग्राह घातिभिः (८)।
घातितस्योदरात् तस्य लुब्धो जग्राह तं जरा ॥१३॥

विज्ञातपरमार्थोऽपि भगवान् मधुसूदनः।
नेच्छत्तदन्यथाकर्त्तुं विधिना यत् समीहितम्(च)॥१४

देवैश्च प्रहितो दूतः (९) प्रणिपत्याह केशवम्।
रहस्येवमहं दूतः प्रहितो भगवन् सुरैः(छ) ॥१५॥

विश्वाश्वि (१०)-मरुदादित्य-रुद्र-साध्यादिभिः सह।
विज्ञापयति यच्छक्रस्तदिदं श्रूयतां प्रभो ॥१६॥

भारावतारणार्थाय वर्षाणामधिकं शतम्।
भगवानवतीर्णोऽत्र त्रिदशैः सम्प्रसादितः(११)(ज)।१७

दुर्वृत्ता निहता दैत्या भुवो भारोऽवतारितः।
त्वया सनाथास्त्रिदशा भवन्तु त्रिदिवे पुनः(१२)॥१८

तदतीतं जगन्नाथ वर्षाणामधिकं शतम्।
इदानीं गम्यतां स्वर्गो भवता यदि रोचते(झ)॥१९॥

देवैर्विज्ञाप्यते चेदमथात्रैव रतिस्तव।
तत् स्थीयतां यथाकालमाख्येयमनुजीविभिः(ञ) ॥२०॥

उग्रसेनायाचचक्षुः न तु श्रीकृष्णाय ॥१०॥

उग्रसेनोऽपि श्रीकृष्णमविज्ञाप्यैव स्वयं तदायसं मुसलं चूर्णमकारयत्। अनेन च विनाशकाले तेषां कृष्णवैमुख्यं सूचितम्। स च चूर्णः। तच्चूर्णं महोदधौ प्रक्षिप्तं सत् तरङ्गेषु लग्नम्। एरका धारात्रयोपेतास्तृणभेदा भूत्वा जज्ञे। एकेन मुसलेन बहूनां परस्परं प्रहरणासम्भवात् चूर्णद्वारा तदेव बहुधा परिणतमिति भावः। तोमराकृति तदग्रसदृशम् ॥१२॥

घातिभिर्मत्स्यघातिभिर्घातितस्य तस्योदरात् जरासंज्ञो लुब्धो व्याधो जग्राह। स च जराधिष्ठातृदेवतांशो यदुवंश एव व्याधत्वं प्राप्त इति हरिवंशे प्रसिद्धम् ॥१३—१६॥

पञ्चविंशत्यधिकं शतं शरच्छतं व्यतीताय, पञ्चविंशाधिकमिति शुकोक्तः ॥१७—१९॥

यथाकालं स्वकार्यसिद्धौ सत्याम् ॥२०॥

(ङ) अयसः लोहस्य चूर्णम् अकारयत्, अथवा चर्णं चूर्णभूतम् अयः लोहम् अकारयत्।

(च) विज्ञातः तस्य समीपाद् यादवैः पूर्वं प्रकृतस्य कृष्णादिदृक्षस्य प्रच्छादनेऽपि स्वीयभागवतविभूत्यैव विदितः परमार्थः यथार्थभूतं पारिणामिकं वस्तु येन तथाभूतः। समीहितम् इष्टम् चिकीर्षितमिति वा; तत् अन्यथा कर्त्तुं विनिवर्तयितुं न ऐच्छत्। तस्य तदन्यथाकरणे सत्यामिच्छायां परिणामोऽन्यथैवाभविष्यदिति।

(छ) एकम् एकाकिनम् असन्निहितजनान्तरमित्यर्थः, जनान्तरेण वक्तव्यवस्तुनः विज्ञानस्य अनभिमतत्वादिति भावः।

(ज) सम्प्रसादितः प्रसन्नतां लम्भितः।

(झ) भक्तेत्यत्र भवतामिति वा पाठे रुच्यर्थधातुयोगे चतुर्थी-प्राप्तौ षष्ठीप्रयोग आर्षः।

(ञ) अनुजीविभिः अनुगतैः भृत्यादिकल्पैः जनैः आख्येयं वक्तव्यं प्रभु स्मारणार्थमित्येवास्माभिरिदमुक्तमिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीभगवानुवाच ।

यत्त्वमात्थाखिलं(ट) दूत वेद्म्यहं तदहमप्युत ।
प्रारब्ध एव हि मया यादवानामपि क्षयः (ठ) ॥२१॥

भुवो नाद्यापि भारोऽयं यादवैरनिवर्हितैः ।
अवतार्य्य करोम्येतत् सप्तरात्रेण सत्वरः ॥२२॥

यथा गृहीतामम्भोधेर्दत्त्वाहं द्वारकाभुवम् ।
यादवानुपसंहृत्य यास्यामि त्रिदिवालयम् ॥२३॥

मनुष्यदेहमुत्सृज्य सङ्कर्षणसहायवान् ।
प्राप्त एवास्मि मन्तव्यो देवेन्द्रेण तथा सुरैः ॥२४॥

जरासन्धादयो येऽन्ये निहता भारहेतवः ।
क्षितेस्तेभ्यः कुमारोऽपि यदूनां नापचीयते ॥२५॥

तदेनं सुमहाभारमवतार्य्य क्षितेरहम् ।
यास्याम्यमरलोकस्य पालनाय ब्रवीहि तान्(ड)॥२६॥

पराशर उवाच ।

इत्युक्तो वासुदेवेन देवदूतः प्रणम्य तम् ।
मैत्रेय दिव्यया गत्या देवराजान्तिकं ययौ ॥२७॥

भगवानप्यथोत्पातान् दिव्यभौमान्तरीक्षगान् ।
ददर्श द्वारकापुर्य्यां विनाशाय दिवानिशम् ॥२८॥

तान् दृष्ट्वा यादवानाह पश्यध्वमतिदारुणान् ।
महोत्पातान् शमायैषां प्रभासं याम मा चिरम्(ढ)॥

पराशर उवाच ।

एवमुक्ते तु कृष्णेन यादवप्रवरस्ततः ।
महाभागवतः प्राह प्रणिपत्योद्धवो हरिम् ॥३०॥

भगवन् यन्मया कार्य्यं तदाज्ञापय साम्प्रतम् ।
मन्ये कुलमिदं सर्व्वं भगवान् संहरिष्यति ।
नाशायास्य निमित्तानि कुलस्याच्युत लक्षये ॥३१॥

श्रीभगवानुवाच ।

गच्छ त्वं दिव्यया गत्या मत्प्रसादसमुत्थया ।
वदरीमाश्रमं (१४) पुण्यं गन्धमादनपर्व्वते ॥३२॥

ब्रह्मशापमिषेण मयैव प्रारब्धः ॥२१॥

तत् किमर्थं यादवक्षयः, प्रारब्धः तत्राह भुव इति। अनिवर्हितैः असंहृतैः ॥२२।२३॥

प्राप्त एवास्मीति मन्तव्यः ॥२४॥

यदूनां कुमारो बालोऽपि तेभ्यो नापचीयते न्यूनो न भवति ॥२५॥

भगवानपि स्वयमेव सृष्टानुत्पातान् ददर्श। तत्र दिव्या ग्रहयुद्धादयः भौमा भूकम्पादयः, अन्तरिक्षगाः दिग्दाहोल्कापातादयः ॥२८॥

(ट) आत्थ कथितवान्, आत्थेति निपातनात् सिद्धम् ।

(ठ) उत अथवा एतदहं न केवलं वेद्मि इत्येव किन्तु विदित्वा यादवानां क्षयोऽपि प्रारब्धः प्रवर्त्तितः, मुसलसृष्ट्यादिद्वारेणेति भावः ।

(ड) ब्रूहीति वक्तव्ये ब्रवीहीति प्रयोगं आर्षः ।

(ढ) पश्यध्वमित्यत्रात्मनेपदमार्षम् । एषां महोत्पातानां शमाय प्रभासं तदाख्यं तीर्थं याम वयमिति शेषः ।

(ण) मम प्रसादसमुत्थया अनुग्रहजनितया दिव्यया गत्या गगनगत्या, वदरीमाश्रमं वदरिकाश्रमम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नर-नारायणस्थाने तत्पावितमहीतले (त) (१५)।
मत्सना मत्प्रसादेन तत्र सिद्धिमवाप्स्यसि ॥३३॥
अहं स्वर्गं गमिष्यामि उपसंहृत्य वै कुलम्।
द्वारकाञ्च मया त्यक्तां समुद्रः प्लावयिष्यति ॥*३४॥

मैत्रेय उवाच

स्वं स्वं भुञ्जतां तेषां कलहः किन्निमत्तकः।
संघर्षो वा द्विजश्रेष्ठ तन्ममाख्यातुमर्हसि ॥

पराशर उवाच

मृष्टं मदीयमन्तं ते न मृष्टमिति जल्पताम्।
मृष्टामृष्टकथा जज्ञे संघर्ष-कलहौ ततः ॥
ततश्चान्योन्यमभ्येत्य क्रोधसंरक्तलोचनाः।
जघ्नुः परस्परं ते नु शस्त्रैर्दैवबलात् कृताः ॥

पराशर उवाच।

इत्युक्तः प्रणिपत्यैनं जगामाथ तदोद्धवः।
नर-नारायणस्थानं केशवेनानुमोदितः ॥३५॥
ततस्ते यादवाः सर्व्वे रथानारुह्य शीघ्रगान्।
प्रभासं प्रययुः सार्द्धं कृष्ण-रामादिभिर्द्विज ॥३६॥
प्राप्य प्रभासं प्रयताः स्नातास्ते कुकुरान्धकाः।
चक्रुस्तत्र सुरापानं वासुदेवानुमोदिताः (१६)(थ)॥३७
पिबतां तत्र वै तेषां संघर्षेण परस्परम्।
अतिवादेन्धनो जज्ञे कलहाग्निः क्षयावहः ॥३८॥
जघ्नुः परस्परं ते तु शस्त्रैर्दैवबलात् कृताः।
क्षीणशस्त्राश्च जगृहुः प्रत्यासन्नामथैरकाम् ॥३९॥
एरका तु गृहीता तैर्वज्रभूतेव लक्ष्यते।
तया परस्परं जघ्नुः सम्प्रहारे सुदारुणे ॥४०॥
प्रद्युम्न-शाम्बप्रमुखाः कृतवर्म्माथ सात्यकिः।
अनिरुद्धादयश्चान्ये पृथुर्विपृथुरेव च ॥४१॥
चारुवर्म्मा चारुकश्च तथाक्रूरादयो द्विज।
एरकारूपिभिर्वज्रैस्ते निजघ्नुः परस्परम् ॥४२॥
निवारयामास हरिर्यादवांस्ते च केशवम्।
सहायं मेनिरे प्राप्तं ते निजघ्नुः परस्परम् ॥४३॥
कृष्णोऽपि कुपितस्तेषामेरकामुष्टिमाददे।
वधाय सोऽपि मुसलं मुष्टिर्लोहोऽभवत्तदा ॥४४॥
जघान तेन निःशेषान् यादवानाततायिनः।
जघ्नुश्च सहसाभ्येत्य तथान्ये च परस्परम् ॥४५॥

द्वारकायां मरणे आधिकारिकदेवांशानां यादवानां मुक्तिः स्यात्। तन्माभूदिति स्वर्लोकावाप्तिस्थानं प्रभासं गन्तुं प्रोचयन्नाह, एषामुत्पातानामुपशमार्थं प्रभासं गच्छामेति ॥३३—३४॥

(ङ) ताभ्यां नरनारायणाभ्यां पावितं स्वाधिष्ठानेन तपश्चरणेन च पवित्रतां नीतं महीतलं यत्र तथाभूते।

(थ) वासुदेवानुमोदिता इति अनुमोदनमिदं तत्प्रयुक्तं स्वरूपेण परस्परकलहेन भाविना यदुवंशध्वंसमभिप्रेत्येति ज्ञेयम्।

* कस्मिंश्चिद् ग्रन्थे संख्यारहितांशोऽधिको दृश्यते।

अनुमोदितः तत्त्वज्ञानोपदेशेनानुगृहीतः ॥३५।३६।३७॥

संघर्षेण स्पर्द्धयाऽतिवादोऽधिक्षेपः स एवेन्धनसमुद्दीपको यस्यासौ कलहरूपोऽग्निर्जज्ञे ॥३८॥

दैवबलात् कृताः कृष्णविमोहिताः एरकां मुसलचूर्णजां श्रीकृष्णेन प्रागेव प्रभासप्रान्ते उत्पादितत्वात् प्रत्यासन्नाम ॥३९॥

सम्प्रहारे युद्धे ॥४१॥

निवार्यमाणास्ते यादवाः केशवं तेषां स्वस्वप्रतिपक्षाणां सहायं प्राप्तं मेनिरे। अतस्तद्वाक्यमनादृत्य परस्परं ते च जघ्नुः ॥४२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततश्चार्णवमध्येन जैत्रोऽसौ चक्रिणो रथः ।
पश्यतो दारुकस्याशु हृतोऽश्वैर्द्विजसत्तम (१७) ॥४६॥
चक्रं तथा गदा शार्ङ्गं तूणौ शङ्खोऽसिरेव च ।
प्रदक्षिणं हरिं कृत्वा जग्मुरादित्यवर्त्मना ॥४७॥
क्षणेन नाभवत् कश्चिद् यादवानामघातितः ।
ऋते कृष्णं महाबाहुं दारुकञ्च महामुने ॥४८॥
चंक्रम्यमाणौ तौ रामं वृक्षमूलकृतासनम्(द) ।
ददृशाते मुखाच्चास्य निष्कामन्तं महोरगम् ॥४९॥
निष्क्रम्य स मुखात्तस्य महाभोगो भुजङ्गमः ।
प्रययावर्णवं सिद्धैः स्तूयमानस्तथोरगैः ॥५०॥
ततोऽर्घ्यमादाय तदा जलधिः सम्मुखं ययौ ।
प्रविवेश च तत्तोयं पूजितः पन्नगोत्तमैः ॥५१॥
दृष्ट्वा बलस्य निर्याणं दारुकं प्राह केशवः ।
इदं सर्व्वं त्वमाचक्ष्व वसुदेवोग्रसेनयोः ॥५२॥
निर्याणं बलभद्रस्य यादवानां तथा क्षयम् ।
योगे स्थित्वाहमप्येतं परित्यक्ष्ये कलेवरम्(ध) ॥५३॥
वाच्यश्च द्वारकावासि-जनः सर्व्वस्तथाहुकः ।
यथेमां नगरीं सर्व्वां समुद्रः प्लावयिष्यति ॥५४॥
तस्माद्भ्रवद्भिः सर्व्वैस्तु प्रतीक्ष्यो ह्यर्জ্জুনাগমः ।
न स्थेयं द्वारकामध्ये निष्क्रान्ते तत्र पाण्डवे ॥५५॥
तेनैव सह गन्तव्यं यत्र याति स कौरवः ।
गत्वा च ब्रूहि कौन्तेयमर्জ্জুनं वचनान्मम ॥५६॥
पालनीयस्त्वया शक्त्या जनोऽयं मत्परिग्रहः ।
इत्यर्জ্জুनेन सहितो द्वारवत्या भवान् जनम् ।
गृहीत्वा यातु वज्रश्च यदुराज्येऽभिषिच्यताम्(१८)॥५७॥

पराशर उवाच ।

इत्युक्तो दारुकः कृष्णं प्रणिपत्य पुनः पुनः ।
प्रदक्षिणाञ्च बहुशः कृत्वा प्रायाद् यथोदितम्(न)॥५८॥
स गत्वा च तथा चक्रे (१९) द्वारकायां तथार्জ্জুनम् ।
आनिनाय महाबुद्धिर्वज्रं चक्रे तथा नृपम् ॥५९॥
भगवानपि गोविन्दो वासुदेवात्मकं परम् ।
ब्रह्मात्मनि समारोप्य सर्व्वभूतेष्वधारयत् ॥६०॥
सम्मानयन् द्विजवचो दुर्व्वासा यदुवाच ह ।
योगयुक्तोऽभवत् पादं कृत्वा जानुनि सत्तमः ॥६१॥

सोऽप्येरकामुष्टिस्तदा पुनर्लोहमयं मुसलमेवासीत् ॥४३॥
आततायिनः स्ववधे प्रवृत्तान् ॥४४।४५।४६।४७।४८॥
चंक्रम्यमाणौ तत्र तत्र भ्रमन्तौ ॥४९॥
आत्मनि परं ब्रह्म समारोप्य ब्रह्मैवाहमिति ध्यात्वा तमात्मानं सर्वभूतेष्वधारयत्। सर्वभूतान्यप्यहमेवेति दध्यावित्यर्थः।

(द) वृक्षमूले कस्यचिद् वृक्षस्य मूलदेशे कृतम् आसनम् उपवेशनं येन तम्। ददृशाते इत्यत्र कर्त्तर्य्यात्मनेपदप्रयोगः परस्मैपदिनो दृशेरार्षः।

(ध) परित्यक्ष्ये परित्यजिष्यामि, आत्मनेपदमत्रार्षम्।

एतच्चाप्रच्युतब्रह्मभावे भगवति लोकसंग्रहमात्रं द्रष्टव्यम् ॥६०॥

दुर्वासा यदुवाच तद्द्विजवचः सम्मानयन् जानुनि पादं कृत्वार्द्धासनेनोपविश्य योगयुक्तोऽभवत्। एवञ्च किल भारते कथा। कदाचिदुन्मत्तवेशं दुर्वाससमतिथिं भगवान् भोजयामास। तदा च साङ्गं तदुच्छिष्टेन लिम्पन् पादौ नालिम्पत्। तदा च कुपितः स प्राह तव पादतलं मरणस्थानं भविष्यतीति। तदेतद्वाक्यं सम्मानयितुं तथोपविष्ट इति ॥६१॥

(न) यथोदितम् यथाकथितम् श्रीकृष्णकथानुसारेणैवेत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आययौ च जरानाम स तदा तत्र लुब्धकः(प) ।
मुसलावशेषलोह-सायकन्यस्ततोमरः ॥६२॥
स तं पादं मृगाकारमवेक्ष्यारादवस्थितः ।
तले विव्याध तेनैव तोमरेण द्विजोत्तम ॥६३॥
ददृक्ष ददृशे तत्र चतुर्बाहुधरं नरम्(फ) ।
प्रणिपत्याह चैवैनं प्रसीदेति पुनः पुनः ॥६४॥
अजानता कृतमिदं यदा हरिणशङ्कया ।
क्षम्यतामात्मपापेन दग्धं मा दग्धुमर्हसि(ब)(२७)।६५

पराशर उवाच ।

ततस्तं भगवानाह न तेऽस्ति भयमण्वपि ।
गच्छ त्वं मत्प्रसादेन लुब्ध स्वर्गे सुरालयम् ॥६६॥
विमानमागतं सद्यस्तद्वाक्यसमनन्तरम् ।
आरुह्य प्रययौ स्वर्गं लुब्धकस्तत्प्रसादतः ॥६७॥
गते तस्मिन् स भगवान् संयोज्यात्मानमात्मनि ।
ब्रह्मभूतेऽव्ययेऽचिन्त्ये वासुदेवमयेऽमले ॥६८॥
अजन्मन्यजरेऽनाशिन्यप्रमेयेऽखिलात्मनि (ख) ।
तत्याज मानुषं देहमतीत्य त्रिविधां गतिम् ॥६९॥

इति श्रीविष्णुपुराणे पञ्चमांशे सप्तत्रिंशः अध्यायः ॥

मुसलावशेष लोहमेव एकस्मिन्मुख्ये सायके न्यस्तं तोमराकारं शल्यं येन सः ॥६२-६८॥

त्रिविधां गतिं त्रिगुणात्मिकाम् ॥६९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे सप्तत्रिंशोऽध्यायः ॥

(प) लुब्धकः व्याधः, तत्र आययौ आजगाम ।
(फ) ददृक्ष इत्यार्षम् ।
(ब) हरिणशङ्कया मृगसम्भावनया इदं तव वेधनरूपं कर्म मया अजानता कृतम्, तत् क्षम्यतां अज्ञानकृतत्वादिति भावः ।

पाठान्तराणि—

(१—१) —समन्वितः ।
(२—२) —मनुष्यमात्मनः ।
(३—३) मुने निजम् ।
(४—४) प्रश्रितास्तान् मुनीनूचुः— ।
(५—५) —इत्युक्तास्ते कुमारास्तु आचचक्षुर्यथातथम्— ।
(६—६) जज्ञे तदेरकाचूर्णं प्रक्षिप्तं तैर्महोदधौ — ।
(७—७) चूर्णितशेषन्तु ततो यत्— ।
(८—८) —जालिभिः— ।
(९—९) दैवैश्च प्रहितो वायुः— ।
(१०—१०) —वक्त्रश्चि—।
(११—११)—त्रिदशैः सह चोदितः ।
(१२—१२) —सदा ।
(१३—१३) —परिक्षयः ।
(१४—१४) यद्वदर्य्याश्रमं— ।
(१५—१५) —तत्पवित्रं महीतले ।
* "मद्वेश्म चैकं मुक्त्वा तु भयान्मत्तो जलाशये ।
तत्र सन्निहितश्चाहं भक्तानां हितकाम्यया ॥"३४
(१६—१६) प्रभासं समनुप्राप्ताः कुकुरान्धक वृष्णयः ।
चक्रुस्तत्र महापानं वासुदेवेन चोदितः ॥
(१७—१७) —प्रायादश्वैर्धृतो द्विज ।
(१८—१८) त्वमर्ज्जुनेन सहितो द्वारवत्यां तथा जनम् ।
गृहीता याहि वज्रश्च यदुराजो भविष्यति ॥
(१९—१९) स च गत्वा तदाचष्ट— ।
* निष्प्रपञ्चे महाभाग संयोज्यात्मानमात्मनि ।
तुर्य्यावस्थं सलीलञ्च शेते स्म पुरुषोत्तमः ॥५९॥
(२०—२०) क्षम्यतां मम पापेन दग्धं मां त्रातुमर्हसि ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टत्रिंशोऽध्यायः

यादवानामन्त्येष्टिसंस्कारः, परीक्षितो राज्याभिषेकः, पाण्डवानां वनगमनञ्च ।

पराशर उवाच ।

अर्ज्जुनोऽपि तदान्विष्य कृष्णरामकलेवरे ।
संस्कारं लम्भयामास तथान्येषामनुक्रमात्(क) ॥१॥

अष्टौ महिष्यः कथिता रुक्मिणीप्रमुखास्तु याः ।
उपगुह्य हरेर्देहं विविशुस्ता हुताशनम्(ख) ॥२॥

रेवती चैव रामस्य देहमाश्लिष्य सत्तम ।
विवेश ज्वलितं वह्निं तत्सङ्गाह्लादशीतलम् ॥३॥

उग्रसेनस्तु तच्छ्रुत्वा तथैवानकदुन्दुभिः ।
देवकी रोहिणी चैव विविशुर्जातवेदसम्(ग) ॥४॥

ततोऽर्ज्जुनः प्रेतकार्य्यं कृत्वा तेषां यथाविधि ।
निश्चक्राम जनं सर्व्वं गृहीत्वा वज्रमेव च ॥५॥

द्वारवत्या विनिष्क्रान्ताः कृष्णपत्न्यः सहस्रशः ।
वज्रं जनञ्च कौन्तेयः पालयञ्छनकैर्ययौ ॥६॥

सभा सुधर्म्मा कृष्णेन मर्त्यलोके समुज्झिते ।
स्वर्गं जगाम मैत्रेय पारिजातश्च पादपः ॥७॥

यस्मिन् दिने हरिर्यातो दिवं सन्त्यज्य मेदिनीम् ।
तस्मिन्नेवावतीर्णोऽयं कालकायो बली कलिः ॥८॥

प्लावयामास तां शून्यां द्वारकाञ्च महोदधिः ।
यदुदेवगृहं त्वेकं नाप्लावयत सागरः(घ) ॥९॥

नातिक्रान्तुमलं ब्रह्मंस्तदद्यापि महोदधिः(१) ।
नित्यं सन्निहितस्तत्र भगवान् केशवो यतः ॥१०॥

तदतीव महत् पुण्यं सर्व्वपातकनाशनम् ।
विष्णुक्रीड़ान्वितस्थानं दृष्ट्वा पापात् प्रमुच्यते ॥११॥

पार्थः पञ्चनदे देशे धनधान्यसमन्विते ।
चकार वासं सर्व्वस्य जनस्य मुनिसत्तम ॥१२॥

ततो लोभः समभवद्दस्यूनां निहतेश्वराः ।
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन धन्विना(ङ) ॥१३॥

ततस्ते पापकर्म्माणो लोभोपहतचेतसः ।
आभीरा मन्त्रयामासुः समेत्यात्यन्तदुर्म्मदाः ॥१४॥

अयमेकोऽर्ज्जुनो धन्वी स्त्रीजनं निहतेश्वरम् ।
नयत्यस्मानतिक्रम्य धिगेतद्भ्रुवतां बलम् ॥१५॥

तत्सङ्गेन य आह्लादस्तेन शीतलप्रायम् ॥१-७॥

(क) अन्येषां कृष्णरामभिन्नानां मृतानां यादवानां कलेवरानीति शेषः । संस्कारम् अग्निदाहरूपं सत्कारम् ।

(ख) उपगुह्य आलिङ्गय ।

(ग) जातवेदसम् अग्निं विविशुः प्राणात्ययायेति शेषः, अग्निप्रवेशेन प्राणांस्तत्यजुरिति भावः ।

अवतीर्ण आविर्भूतः, कालकायः मलिनाङ्गः ॥८-११॥

(घ) यदुदेवस्य केशवस्य गृहम् आवासमन्दिरम् ।

(१) अतिक्रमितुमिति वक्तव्ये अतिक्रान्तुमित्यार्ष प्रयोगः ।

(ङ) निहताः मृताः ईश्वराः स्वामिनः यासां ताः निहतेत्यनेन नूनमयं धन्वी एतासां स्वामिनः निहत्य विधवा कृत्वा हरतीति दस्यूनां सम्भावना व्यज्यते । तच्च उत्तरत्र पञ्चदशश्लोके स्पष्टम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हत्वा गर्व्वसमारूढ़ो भीष्म-द्रोण-जयद्रथान् ।
कृपादींश्च न जानाति बलं ग्रामनिवासिनाम् ॥१६॥

हे हे यष्टीर्महायामा गृह्णीतायं सुदुर्म्मतिः ।
सव्वनिवावजानाति किं वो बाहुभिरुन्नतैः ॥१७॥

ततो यष्टिप्रहरणा दस्यवो लोष्टहारिणः ।
सहस्रशोऽभ्यधावन्त तं जनं निहतेश्वरम् ॥१८॥

ततो निवृत्य कौन्तेयः ग्राहाभीरान् हसन्निव ।
निवर्त्तध्वमधर्म्मज्ञा यदि न स्थ मुमूर्षवः ॥१९॥

अवज्ञाय वचस्तस्य जगृहुस्ते तदा धनम् ।
सीजनञ्चैव मैत्रेय विष्वक्सेनपरिग्रहम्(च) ॥२०॥

ततोऽर्ज्जुनो धनुर्द्दिव्यं गाण्डीवमजरं युधि ।
आरोपितुं समारेभे न शशाक स वीर्य्यवान्(छ)॥२१

चकार सज्यं कृच्छ्राच्च तच्चाभूच्छिथिलं पुनः(ज) ।
न सस्मार तथास्त्राणि चिन्तयन्नपि पाण्डवः ॥२२॥

शरान्मुमोच वै तेषु पार्थो वैरिष्वमर्षितः ।
क्षणभेदं ते परं चक्रु रस्ता गाण्डीवधन्वना (झ) ॥२३॥

वह्निना येऽक्षया दत्ताः शरास्तेऽपि क्षयं ययुः ।
युध्यतः(ञ) सह गोपालै रर्ज्जुनस्य भवक्षये ॥२४॥

अचिन्तयच्च कौन्तेयः कृष्णस्यैव हि तद्बलम् ।
यन्मया शरसङ्घातैः सकला भूभुजो जिताः ॥२५॥

मिषतः पाण्डुपुत्रस्य ततस्ताः प्रमदोत्तमाः ।
आभीरैरपकृष्यन्त्यः कामाच्चान्या प्रवव्रजुः ॥२६

ततः शरेषु क्षीणेषु धनुष्कोट्या धनञ्जयः ।
जघान दस्यूंस्ते चास्य प्रहारान् जहसुर्मुने ॥२७॥

प्रेक्षतश्चैव पार्थस्य वृष्ण्यन्धकवरस्त्रियः(ट) ।
जग्मुरादाय ते म्लेच्छाः सम्मता मुनिसत्तम ॥२८

ततः सुदुःखितो जिष्णुः कष्टं कष्टमिति ब्रुवन् ।
अहो भगवता तेन मुषितोऽस्मि रुरोद ह ॥२९

तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः ।
सर्व्वमेकपदे नष्टं दानमश्रोत्रिये यथा ॥३०॥

फल्गुनदारुण्यदेशे ॥१२।१३।१४।१५।१६।१७॥

यष्टिप्रहरणाः दण्डायुधाः लोष्टहारिणः परस्वग्राहिणः ॥१८॥

यदि मुमुर्षवो न स्थ न भवथ ॥१९।२१॥

अस्त्राणि तत्तन्मन्त्रान् ॥२२।२३॥

खाण्डवदाहे अग्निना दत्ताः भवक्षये उद्भवनाशे ॥२४।२६॥

धनुष्कोट्या चापाग्रेण दण्डेनेव जघान। जहसुर्दण्डप्रहारेऽर्ज्जुनादपि तेषामेव वैदग्ध्यात् ॥२७॥

मुषितो वञ्चितोऽस्मि ॥२९॥

(ञ) विष्वक्सेनस्य जनार्द्दनस्य परिग्रहं पत्नीसमूहम् ।

(छ) आरोपयितुमिति वक्तव्ये आरोपितुमिति प्रयोग आर्षः। समारेभे यत्नं चकार ।

(ज) सज्यं ज्यायुक्तं समारोपितगुणमिति यावत् ।

(झ) अमर्षितः क्रोधयुक्तः सन् असहिष्णुः सन्निति वा। अस्ताः क्षिप्ता ते शराः परं केवलं त्वग्भेदं शत्रूणां शरीरचर्मभेदं चक्रुः न मर्म विदारणं चक्रुः, येनामीषां प्राणात्ययः स्यादिति ।

(ञ) युध्यत इत्यत्र शतृप्रयोग आर्षः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहोऽतिबलवद्दैवं विना तेन महात्मना ।
यदसामर्थ्ययुक्तेऽपि नीचवर्गे जयप्रदम् (ठ) ॥३१॥

तौ बाहू स च मे मुष्टिः स्थानं तत् सोऽस्मि चार्ज्जुनः ।
पुण्येनैव विना तेन गतं सर्व्वमसारताम् ॥३२॥

ममार्ज्जुनत्वं भीमस्य भीमत्वं तत्कृतं ध्रुवम् ।
विना तेन यदाभीरैर्जितोऽहं कथमन्यथा ॥३३॥

पराशर उवाच ।

इत्थं वदन् ययौ जिष्णुर्मथुराख्यं पुरोत्तमम् ।
चकार तत्र राजानं वज्रं यादवनन्दनम् ॥३४॥

स ददर्श ततो व्यासं फाल्गुनः काननाश्रयम्(ढ) ।
तमुपेत्य महाभागं विनयेनाभ्यवादयत् ॥३५॥

तं वन्दमानं चरणाववलोक्य मुनिश्चिरम् ।
उवाच पार्थं विच्छायः कथमत्यन्तमीदृशः (ण) ॥३६॥

अवीरजोऽनुगमनं ब्रह्महत्याथवा कृता ।
दृढ़ाशाभङ्गदुःखी वा भ्रष्टच्छायोऽसि साम्प्रतम्(त)॥३७॥

सान्तानिकादयो वा ते याचमाना निराकृताः ।
अगम्यस्त्रीरतिर्वा त्वं तेनासि विगतप्रभः(थ) ॥३८॥

भुक्तोऽप्रदाय विप्रेभ्य एको मिष्टमथो भवान् ।
किं वा कृष्णवित्तानि हृतानि भवतार्ज्जुन ॥३९॥

कच्चित्त्वं शूर्पवातस्य गोचरत्वं गतोऽर्ज्जुन ।
दुष्टचक्षुर्हतो वापि निःश्रीकः कथमन्यथा ॥४०॥

स्पृष्टो नखाम्भसा चाथ घटाम्भःप्रोक्षितोऽपि वा ।
तेनातीवासि विच्छायो न्यूनैर्वा युधि निर्ज्जितः ॥४१॥

एकपदे एकस्मिन्नेव क्षणे। अश्रोत्रिये वेदवर्जिते ॥३०-३४॥

इन्द्रप्रस्थाद् गजसाह्वयं गच्छन्नर्जुनः क्वचित् काननाश्रयं व्यासं ददर्श ॥३५॥

कथमीदृशोऽत्यन्तं विच्छायो निःश्रीकोऽसीति चिरमुवाच। पृच्छ्यमानो दुःखवशात्तस्मिन् प्रतिवक्तुमशक्नुवति चिरं पुनः पुनरुवाचेत्यर्थः ॥३६॥

स्वयमेव निःश्रीकत्वे हेतून् बहुधा विकल्पयन्नाह अवीरज इति पञ्चभिः। अवीनां रजोऽनु तत्पृष्ठतः किं गमनं कृतम्, उपलक्षणञ्चैतन्निषिद्धानामजखरादिरजसाम् अनुगमनस्य। अवीरजोऽनुगमनं रजस्वलागमनं वा स्यात् स्त्रीधर्मिण्यविरजा इत्यमरः। अयं मां रक्षिष्यतीति कस्यचित् या दृढा आशा तस्या भङ्गेन वा दुःखी ॥३७॥

सन्तानार्थम् उद्वोढुकामो धनार्थी सान्तानिकः। आदिशब्दान्मनूक्तान्यप्यप्रत्याख्येयानि गृह्यन्ते। तदु क्तम् सान्तानिकं याजमानमाध्वरं सर्ववेदसम्। गुर्वर्थं पित्र्यमात्रर्थं स्वाध्यायाय्युपलापिन इति ॥३८-४०॥

(ठ) प्रेक्षत इत्यत्र शतृप्रयोग आर्षः।

(ठ) अहोऽतिबलवदित्यत्र सन्धिरार्षः। यत् दैवं असामर्थ्ययुक्ते जययोग्यतारहिते नीचवर्गेऽपि जयप्रदम्।

(ड) तत्कृतं श्रीकृष्णकृतं तद्धेतुकमिति यावत्। तेन विना श्रीकृष्णेन विना तदभावेनेत्यर्थः। आभीरैः गोपालैः, अहं महावीरः अर्जुनः।

(ढ) फाल्गुनः अर्जुनः,

(ण) विगता छाया कान्तिर्यस्य सः गतप्रभ इत्यर्थः।

(त) भ्रष्टा अपगता छाया कान्तिर्यस्य सः।

(थ) निराकृताः प्रत्याख्याताः, अगम्यायाम् अभिगन्तुमयोग्यायां स्त्रियां रतिः रमणाभिलाषः रमणक्रिया वा यस्य सः भूतः, विगता प्रभा कान्तिर्मुखादेरिति शेषः, यस्य सः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

ततः पार्थो विनिःश्वस्य श्रूयतां भगवन्निति ।
प्रोक्त्वा यथावदाचष्ट व्यासायात्मपराभवम्(द) ॥४२॥

अर्ज्जुन उवाच ।

यद्बलं यच्च नस्तेजो यद्वीर्य्यं यत्पराक्रमः ।
या श्रीश्छाया च नः सोऽस्मान् परित्यज्य गतो हरिः ॥४३॥

इतरेणेव महता स्मितपूर्व्वाभिभाषिणा ।
हीना वयं मुने तेन जातास्तृणमया इव ॥४४॥

अस्त्राणां सायकानाञ्च गाण्डीवस्य तथा मम ।
सारता याभवन् मूलं स गतः पुरुषोत्तमः ॥४५॥

यस्यावलोकनादस्मान् श्रीर्जयः सम्पदुन्नतिः ।
न तत्याज स गोविन्दस्त्यक्त्वास्मान् भगवान् गतः ॥४६

भीष्मद्रोणाङ्गराजाद्यास्तथा दुर्य्योधनादयः ।
यत्प्रभावेण निर्दग्धाः स कृष्णस्त्यक्तवान् भुवम् ॥४७

निर्यौवन-हतश्रीका भ्रष्टच्छायेव मेदिनी(ध) ।
विभाति तात नैकोऽहं विरहे तस्य चक्रिणः ॥४८॥

यस्यानुभावाद् भीष्माद्यैर्मय्यग्नौ शलभायितम् ।
विना तेनाद्य कृष्णेन गोपालैरस्मि निर्ज्जितः ॥४९॥

गाण्डीवं त्रिषु लोकेषु ख्यातिं यदनुभावतः ।
गतं तेन विनाभीरलगुड़ैस्तन्निराकृतम् ॥५०॥

स्त्रीसहस्राण्यनेकानि मन्नाथानि महामुने ।
यततो मम नीतानि दस्युभिर्लगुड़ायुधैः(न) ॥५१॥

आनीयमानमाभीरैः कृष्ण कृष्णावरोधनम्(प) ।
हृतं यष्टिप्रहरणैः परिभूय बलं मम ॥५२॥

निःश्रीकता न मे चित्रं यज्जीवामि तदद्भुतम् ।
न चावमानपङ्काङ्की (फ) निर्लज्जोऽस्मि पितामह ॥५३॥

तोयपूर्णे घटे नीयमाने घटत-उच्चलत्तोयेनोक्षितः सिक्तः ॥४१।४२॥

बलं शक्तिस्तेजः सामर्थ्यं, वीर्यं प्रभावः, पराक्रमो विक्रान्तिः, श्रीः सम्पत्, छाया कान्तिः ॥४३॥

इतरेण प्राकृतेन मित्रेणेव। मृगादिबिभीषिकार्थं क्षेत्रेषु निर्मितास्तृणमया धन्विन इव वयं जाताः ॥४४॥

अङ्गराज्याद्याः कर्णाद्याः ॥४७॥

निर्गतं यौवनं शस्यादिप्रसवसामर्थ्यं यस्याः सा निर्यौवना ॥४८॥

अग्नितुल्ये मयि शलभायितं शलभवदाचरितम् ॥४९॥

अहं नाथः पालको येषां तानि यततो यतमानस्य मामनादृत्य ॥५१॥

कृष्ण हे व्यास ॥५२॥

(द) प्रोक्त्वेत्यत्र सोपसर्गस्य वचेः क्त्वाप्रत्ययेन प्रयोग आर्षः। आत्मनः पराभवं पराजयं दस्युभिरिति शेषः।

(ध) निर्यौवना तथा हता नष्टा श्रीः शोभा यस्याः सा, विशेषणद्वये कर्मधारयः एकः अहं न भ्रष्टच्छायः विभामीति मुख्यव्यतिक्रमेणान्वयः।

(न) यतत इति शतृप्रयोग आर्षः। लगुड़ायुधैः यष्टिमात्रप्रहरणैः। नीतानि हृतानि।

(प) आनीयमानं मया नेत्रा सतेयि शेषः कृष्णस्य अवरोधनम् अन्तःपुरिकाकुलं यष्टिप्रहरणैः लगुड़मात्रायुधैः गोपालैरिति शेषः, हृतम्।

(फ) नीचावमानः हीनजनकर्त्तृकः पराभवः स एव पङ्कः तद्रूपः अङ्कः चिह्नं विद्यते यस्य सः, निर्लज्जः त्रपाशून्यः सन् अस्मिन् वर्त्ते जीवामीत्यर्थः। न चावमानपक्षाक्षीति पाठे निर्लज्जः अहं न च अवमानपङ्काङ्की अवमानरूपपङ्कगणनशीलः अवमान एव पङ्कः तम् अङ्कते लेखन्यादिना गणयति इति व्युत्पत्तेः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यास उवाच ।

अलं ते व्रीड़या पार्थ न त्वं शोचितुमर्हसि ।
अवेहि सर्व्वभूतेषु कालस्य गतिरीदृशी ॥५४॥

कालो भवाय भूतानामभवाय च पाण्डव(ब) ।
कालमूलमिदं ज्ञात्वा भव स्थैर्य्यधनोऽर्ज्जुन ॥५५॥

नद्यः समुद्रा गिरयः सकला च वसुन्धरा ।
देवा मनुष्याः पशवस्तरवः ससरीसृपाः ॥५६॥

सृष्टाः कालेन कालेन पुनर्यास्यन्ति संक्षयम् ।
कालात्मकमिदं सर्व्वं ज्ञात्वा शममवाप्नुहि(भ)॥५७॥

यच्चाह कृष्णमाहात्म्यं तत्तथैव धनञ्जय ।
भारावतारकार्य्यार्थमवतीर्णः स मेदिनीम् ॥५८॥

भाराक्रान्ता धरा याता देवानां समितिं पुरा ।
तद्भारमवतीर्णोऽसौ कालरूपी जनार्द्दनः ॥५९॥

तच्च निष्पादितं कार्य्यमशेषा भुभृतो हताः ।
वृष्ण्यन्धककुलं सर्व्वं तथा पार्थोपसंहृतम् ॥६०॥

न किञ्चिदन्यत् कर्त्तव्यमस्य भूमितले प्रभोः ।
अतो गतः स भगवान् कृतकृत्यो यथेच्छया(य)॥६१॥

सृष्टिं सर्गे करोत्येष देवदेवः स्थितौ स्थितिम् ।
अन्तेऽन्ताय समर्थोऽयं साम्प्रतं हि यथाकृतम् ॥६२॥

तस्मात् पार्थ न सन्तापस्त्वया कार्य्यः पराभवात् ।
भवन्ति भवकालेषु पुरुषाणां पराक्रमाः ॥६३॥

त्वयैकेन हता भीष्म-द्रोण-कर्णादयो नृपाः ।
तेषामर्ज्जुन कालोत्थः किं न्यूनाभिभवो न सः ॥६४॥

विष्णोस्तथानुभावेन यथा तेषां पराभवः ।
ततस्तथैव भवतो दस्युभ्योऽन्ते तदुद्भवः(र) ॥६५॥

स देवोऽन्यशरीराणि समाविश्य जगत्स्थितिम् ।
करोति सर्व्वभूतानां नाशं चान्ते जगत्पतिः ॥६६॥

भवोद्भवे च कौन्तेय सहायोऽभूज्जनार्द्दनः ।
भवान्ते त्वद्विपक्षास्ते केशवेनावलोकिताः(ल) ॥६७॥

भवाय उद्भवाय कालमूलं कालाधीनम् ॥५३—६३॥

यथैकस्मात् न्यूनात् त्वत्तो भीष्मादीनां पराभवः कालकृतः, तथैव न्यूनेभ्यः आभीरेभ्यः कालोद्भवः पराभव इत्युपपादयति त्वयैकेनेति षड्भिः ॥६४।४६॥

सर्वभूतानां शरीराणि समाविश्य जगतः स्थितिं नाशञ्च स एव करोति ॥६६॥

भवोद्भवे भाग्यस्योदये भवान्ते भाग्यनाशे ॥६७॥

(ब) अभवाय अभावाय विनाशायेति यावत् । स्थैर्य्यं निर्विकारता चाञ्चल्यशून्यतेति यावत्, धनं रक्षणीयं द्रव्यं यस्य तथाविधो भव ।

(भ) कालात्मकम् कालस्वरूपम्, कालहेतुकेऽपि कार्य्यकारणयोरभेदोपचारात् कालस्वरूपत्वोक्तिः । उक्तमधस्तात् स्वयमेव कालमूलमिदं ज्ञात्वेति ।

(म) तस्याः धरायाः भारं तं भारं वा हर्त्तुमिति शेषः, असौ अवतीर्णः मर्त्यधाम्नि नररूपेणेति शेषः ।

(य) कृतं निष्पादितं समापितमिति यावत् कृत्यं स्वेन कर्त्तव्यं कर्म येन तथाभूतः ।

(र) अनुभावेन प्रभावेण, 'अनुभावः प्रभावे स्यादि' कोषात् । तदुद्भवः तस्य पराभवस्य उद्भवः उत्पत्तिः ।

(ल) भवस्य भाग्यस्य उद्भवे उदये तवेति शेषः, जनार्द्दनः केशवः सहायः अनुकूलः अभूत् तवेति शेषः, भवस्य भाग्यस्य अन्ते नाशे पुनः तवेति शेषः, ते पूर्वं केशवेन अनवलोकिताः अथवा कृपापूर्णदृष्ट्या अनवलोकिताः त्वद्विपक्षाः तव विरोधिपक्षाः केशवेन अवलोकिताः अनुकूलया दृष्ट्या ईक्षिताः, अतएव पूर्वं त्वत्तो भीष्म-द्रोणादीनां पराजयः साम्प्रतं पुनरामीरेभ्योऽपि तव पराभव इति ध्येयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कः श्रद्दध्यात् सगाङ्गेयान् हन्यास्त्वं सर्व्वकौरवान् ।
आभीरेभ्यश्च भवतः कः श्रद्दध्यात् पराभवम् ॥६८॥

पार्थैतत् सर्व्वभूतस्य हरेर्लीलाविचेष्टितम् ।
त्वया यत् कौरवा ध्वस्ता यदाभीरैर्भवान् जितः ॥६९

गृहीता दस्युभिर्याश्च भवतः शोचिताः स्त्रियः(व) ।
तदप्यहं यथावृत्तं कथयामि तवार्ज्जुन ॥७०॥

अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत्(श) ।
बहून् वर्षगणान् पार्थ गृणन् ब्रह्म सनातनम् ॥७१॥

जितेष्वसुरसङ्घेषु मेरुपृष्ठे महोत्सवः ।
बभूव तत्र गच्छन्त्यो ददृशुस्तं(ष) वरस्त्रियः ॥७२॥

रम्भातिलोत्तमाद्याश्च शतशोऽथ सहस्रशः ।
तुष्टुवुस्तं महात्मानं प्रशशंसुश्च पाण्डव ॥७३॥

आकण्ठमग्नं सलिले जटाभारधरं मुनिम् ।
विनयावनताश्चैनं प्रणेमुः स्तोत्रतत्पराः ॥७४॥

यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा ।
सर्व्वास्ताः कौरवश्रेष्ठ वरिष्ठं तं द्विजन्मनाम् ॥७५॥

अष्टावक्र उवाच ।

प्रसन्नोऽहं महाभागा भवतीनां यदिष्यते ।
मत्तस्तद्व्रियतां सर्व्वं प्रदास्याम्यतिदुर्लभम् ॥७६॥

रम्भातिलोत्तमाद्यास्तं वैदिक्योऽप्सरसोऽब्रुवन् ।
प्रसन्ने त्वय्यपर्य्याप्तं किमस्माकमिति द्विज ॥७७॥

इतरास्त्वब्रुवन् विप्र प्रसन्नो भगवान् यदि ।
तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र पुरुषोत्तमम्(स) ॥७८

व्यास उवाच ।

एवं भविष्यतीत्युक्त्वा उत्ततार जलान्मुनिः ।
ददृशुस्तास्तमुत्तीर्णं विरूपं वक्रमष्टधा(ह) ॥७९॥

तं दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत् ।
ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन ॥८०॥

यस्माद् विरूपरूपं मां ज्ञात्वा हासावमानना(क्ष) ।
भवतीभिः कृता तस्मादेष शापं ददामि वः ॥८१॥

मत्प्रसादेन भर्त्तारं लब्ध्वा तं पुरुषोत्तमम् ।
मच्छापोपहताः सर्व्वा दस्युहस्तं गमिष्यथ ॥८२॥

तासाञ्च स्त्रीणां दस्युभिर्हरणम् अष्टावक्रशापात् प्राप्तं केन वारयितुं शक्यमित्याख्यायिकां कथयन्नाह,—गृहीता इत्यादिना दस्युहस्तं गमिष्यथेत्यन्तेन ॥७०॥

(व) शोचिताः भवतः साम्प्रतिकशोकगोचरीभूताः स्त्रियः कृष्णावरोधभूता रमण्यः ।

(श) जलवासे रतः, बहून् वर्षगणान् व्याप्य, गृणन् [illegible]।

तुष्टुवुः प्रगीतैः वाक्यैः । प्रशंसुश्च अप्रगीतैर्वाक्यैः ७३॥

वैदिक्यः वेदप्रसिद्धाः ॥७७।७८॥

उत्ततार बहिर्निर्गतः ॥७९॥

गृहमानानां हासमप्रकटयन्तीनाम् ॥८०—८२॥

(ष) तं जले वसन्तमष्टावक्रम् ।

(स) पुरुषोत्तमम् नारायणम् ।

(ह) उत्ततार तीरे उदतिष्ठत् । अष्टधाः अष्टभिः प्रकारैः वक्रं वक्रशरीरम् विरूपं विकृताकारम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यास उवाच ।

इत्युदीरितमाकर्ण्य मुनिस्ताभिः प्रसादितः ।
पुनः सुरेन्द्रलोकं वै प्राह भूयो गमिष्यथ(क) ॥८३॥

एवं तस्य मुनेः शापादष्टावक्रस्य केशवम् ।
भर्त्तारं प्राप्य ता दस्युहस्तं याता वराङ्गनाः ॥८४॥

तत्त्वया नात्र कर्त्तव्यः शोकोऽल्पोऽपि हि पाण्डव ।
तेनैवाखिलनाथेन सर्व्वं तदुपसंहृतम् ॥८५॥

भवतां चोपसंहारमासन्नं तेन कुर्व्वता ।
बलं तेजस्तथा वीर्य्यं माहात्म्यं चोपसंहृतम् ॥८६॥

जातस्य नियतो मृत्युः पतनञ्च तथोन्नतेः ।
विप्रयोगावसानश्च संयोगः(ख) सञ्चयात् क्षयः ॥८७॥

विज्ञाय न बुधाः शोकं न हर्षमुपयान्ति ये ।
तेषामेवेतरे चेष्टां शिक्षन्तः सन्ति तादृशाः(ग) ॥८८॥

तस्मात्त्वया नरश्रेष्ठ ज्ञात्वैतद् भ्रातृभिः सह ।
परित्यज्याखिलं तन्त्रं गन्तव्यं तपसे वनम् ॥८९॥

तद् गच्छ धर्म्मराजाय निवेद्यैतद्वचो मम ।
परश्वो भ्रातृभिः सार्द्धं यथा यासि तथा कुरु ॥९०॥

पराशर उवाच ।

इत्युक्तोऽभ्येत्य पार्थाभ्यां यमाभ्याञ्च तथार्ज्जुनः(घ)
दृष्टं चैवानुभूतञ्च कथितं तेष्वशेषतः ॥९१॥

व्यासवाक्यञ्च ते सर्व्वे श्रुत्वार्ज्जुनसमीरितम् ।
राज्ये परीक्षितं कृत्वा ययुः पाण्डुसुता वनम्(ङ)॥९२॥

इत्येतत् तव मैत्रेय विस्तरेण मयोदितम् ।
जातस्य यद्यदोर्वंशे वासुदेवस्य चेष्टितम् ॥९३॥

इति श्रीविष्णुपुराणे पञ्चमांशे अष्टत्रिंशः अध्यायः।

पुनः सुरेन्द्रलोकं गमिष्यथेति प्राह ॥८३—८५॥
माहात्म्यं गौरवम् ॥८६॥
उन्नतेः सकाशात् पतनञ्च सञ्चयादनन्तरं क्षयञ्च ॥८७॥
तादृशो हर्षशोकाविहीनाः सन्ति ॥८८॥
तन्त्रं परित्यज्य परिकरं त्वक्त्वा ॥८९।९०॥
दृष्टं यदुकुलक्षयादि । अनुभूतम् आभीरेभ्यः प
भवादि ॥९१।९२॥
कृष्णलीलां निगमयति इत्येतदिति ॥९३॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां पञ्चमांशे अष्टत्रिंशोऽध्यायः॥

(क्ष) विरूपं विकृताकारं रूपं स्वरूपं यस्य तम्, हासेन अवमानना अवज्ञा, अथवा हासः परिहास एव अवमानना ।

(क) भूयः पुनः दस्युहस्तगमनानन्तरमित्यर्थः । सुरेन्द्रस्य देवराजस्य वासवस्य लोकं स्वर्गलोकं गमिष्यथ · प्राप्स्यथ यूयमिति शेषः ।

(ख) संयोगः मेलनम्, विप्रयोगः वियोग एव अवसानम् आयतिः उत्तरकालीनं वस्तु यस्य तथाभूतः ।

(ग) शोकं स्वजनमृत्युप्रभृत्युपस्थिताविति शेषः । हर्षम् अभ्युदयाद्युपस्थिताविति शेषः, इतरे अबुधाः तेषां बुधानामेव चेष्टां शिक्षन्तः तादृशाः हर्षशोकविहीनाः सन्ति भवन्ति । त
हि तेषां बुधानां तथाविधभावानुशीलनेन सर्वैरेव तदा त
हर्षशोकौ हातव्याविति भावः ।

(घ) अर्जुनेन समीरितं कथितम्, व्यासस्य वाक्यम् अर्जु
प्रति उक्तपूर्वमिति शेषः ।

(ङ) परीक्षितम् अभिमन्युसुतं तदाख्यम्, राज्ये कृ
करोतेः क्रियासामान्यवाचित्वात् स्थापयित्वेत्यर्थः । रा
कृत्वेति वा अध्याहारेणान्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठांशः

प्रथमोऽध्यायः

[कलिधर्म्मनिरूपणम् ।]

मैत्रेय उवाच !

आख्याता भवता सर्ग-वंश-मन्वन्तरस्थितिः ।
वंशानुचरितञ्चैव विस्तरेण महामुने ॥१॥
श्रोतुमिच्छाम्यहं त्वत्तो यथावदुपसंहृतिम् ।
महाप्रलयसंस्थानं(क) कल्पान्ते च महामुने ॥२॥

पराशर उवाच ।

मैत्रेय श्रूयतां मत्तो यथावदुपसंहृतिः ।
कल्पान्ते प्राकृते चैव प्रलयो जायते यथा ॥३॥
अहोरात्रं पितॄणान्तु मासोऽब्दस्त्रिदिवौकसाम्(ख) ।
चतुर्युगसहस्रे तु ब्रह्मणो द्वे द्विजोत्तम ॥४॥
कृतं त्रेता द्वापरञ्च कलिश्चैव चतुर्युगम् ।
दिव्यैर्वर्षसहस्रैस्तु तद् द्वादशभिरुच्यते(ग) ॥५॥
चतुर्युगाण्यशेषाणि सदृशानि स्वरूपतः ।
आद्यं कृतयुगं मुक्त्वा मैत्रेयान्ते तथा कलिम् ॥६
आद्ये कृतयुगे सर्गो ब्रह्मणा क्रियते यतः
क्रियते चोपसंहारस्तथान्ते च कलौ युगे ॥७॥

मैत्रेय उवाच ।

कलेः स्वरूपं भगवन् विस्तराद् वक्तुमर्हसि ।
धर्म्मश्चतुष्पाद्भगवन् यस्मिन् विप्लवमृच्छति (घ) ॥८

प्रथमः अध्यायः

श्रीगणेशाय नमः । सर्गादिफलमाख्यातुमुक्तमात्यन्तिकं लयम् । षष्ठेऽंशेऽन्यविरागाय लयान्तरनिरूपणम् । प्रथमांशमारभ्योक्तमर्थमनुवदन् बुभुत्सितमर्थं पृच्छति,—'आख्याते'ति द्वाभ्याम् ॥१॥

यथावत् सर्वथा उपसंहृतिम् आत्यन्तिकं प्रलयमित्यर्थः कल्पान्ते ब्रह्मणो दिनान्ते ॥२॥

प्राकृते महाप्रलये ॥३॥

कल्पप्रमाणं दर्शयन्नाह,—'अहोरात्र' इति । मनुष्याणां मासः पितॄणामहोरात्रः, मनुष्याणामब्दो देवानामहोरात्रः । द्वे चतुर्युगसहस्रे ब्रह्मणोऽहोरात्रः ॥४॥

चतुर्युगमानमाह,—'कृतमि'ति ॥५॥

चतुर्युगस्वरूपमाह,—'चतुर्युगाणी'ति ॥६॥

आद्यं तयोर्वैसादृश्ये हेतुमाह,—'आद्य' इति । अपर्यवसित एव पूर्वप्रश्नस्योत्तरे लब्धावसरोऽन्यत् पृच्छति,—'कलेरि'ति । विप्लवं नाशम् ॥८॥

(क) महाप्रलयस्य संस्थानम् आकारं सपरिकरं स्वरूपमित्यर्थः ।

(ख) मास इति मनुष्याणामिति शेषः । पितॄणां पितृलोकवासिनाम् अहोरात्रः, अब्दः वत्सरः मनुष्याणामिति शेषः त्रिदिवौकसां देवानाम् अहोरात्रः । द्वे चतुर्युगसहस्रे मनुष्याणामिति शेषः, ब्रह्मणः अहोरात्रः एकैक इति शेषः ।

(ग) दिव्यैः द्वादशभिः वर्षसहस्रैः देवानां द्वादशसहस्रैः वत्सरैः, चतुर्युगं मनुष्याणामेकमिति शेषः, चतुर्णां युगानां सत्य-त्रेता-द्वापर-कलिसंज्ञितानां समाहारः चतुर्युगम्, पात्राद्यन्तर्गतत्वाद् युगशब्दस्य ईवभावः ।

(घ) विप्लवं विनाशम् ऋच्छति गच्छति प्राप्नोतीत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

कलेः स्वरूपं मैत्रेय यद्ब्रवान् प्रष्टुमिच्छति ।
तन्निबोध समासन्नं(ङ) वर्त्तते यन्महामुने ॥९॥

वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम् ।
न साम-ऋग्-यजुर्व्वेदविनिष्पादनहेतुका ॥१०॥

विवाहा न कलौ धर्म्म्या न शिष्य-गुरुसंस्थितिः ।
न दाम्पत्यक्रमो नैव वह्निदैवात्मकः क्रमः ॥११॥

यत्र तत्र कुले जातो बली सर्व्वेश्वरः कलौ ।
सर्व्वेभ्य एव वर्णेभ्यो योग्यः कन्यावरोधने ॥१२॥

येन केनैव योगेन द्विजातिर्दीक्षितः कलौ ।
यैव सैव च मैत्रेय प्रायश्चित्तक्रिया कलौ ॥१३॥

सर्व्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विज ।
देवताश्च कलौ सर्व्वाः सर्व्वः सर्व्वस्य चाश्रमः ॥१४॥

उपवासस्तथायासो वित्तोत्सर्गस्तथा कलौ ।
धर्म्मो यथाभिरुचितैरनुष्ठानैरनुष्ठितः ॥१५॥

वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ ।
स्त्रीणां रूपमदश्चैव केशैरेव भविष्यति ॥१६॥

सुवर्णमणिरत्नादौ वस्त्रे चापि क्षयं गते
कलौ स्त्रियो भविष्यन्ति तदा केशैरलङ्कृताः ॥१७॥

परित्यक्षन्ति भर्त्तारं वित्तहीनं तथा स्त्रियः ।
भर्त्ता भविष्यति कलौ वित्तवानेव योषिताम् ॥१८॥

यो यो ददाति बहुलं स स स्वामी तदा नृणाम् ।
स्वामित्वहेतुः सम्बन्धो भावी नाभिजनस्तदा ॥१९॥

उत्तरमाह,—'कलेरि'त्यादिना यावदुत्तराध्यायसमाप्ति ॥९

वर्णानामाश्रमाणाञ्च य आचारस्तदनुसारिणी नृणां प्रवृत्तिर्न भवति सामादिवेदोक्तकर्मविनिष्पादनं हेतुर्यस्याः सा । तथाभूता च न भवति, किन्तु अर्थकामप्रधानैर्वेत्यर्थः ॥१०॥

धर्म्या इति ब्राह्मादिषु विवाहेषु यो विहितः स एव तस्येति व्यवस्था नास्तीत्यर्थः । शिष्यस्य गुरोश्च सम्यक् स्थितिः शुश्रूषानुग्रहरूपा नास्ति । दाम्पत्ये यः क्रमः परस्परं वृत्तिनियमः नास्ति । वह्नौ होमादिप्रकारनियमः देवेषु पूजादिक्रमश्च नास्ति ॥११॥

सर्वेश्वरो नियन्ता दण्डधर इति यावत् । स एव सर्ववर्णेभ्यः कन्याया अवरोधने परिग्रहे योग्या भविष्यति । कन्यावरोधनीति पाठे सवर्णत्वादिनियमं विना सर्वेभ्योऽपि वर्णेभ्यो धनी धनवान् कन्याया वरो योग्यो भविष्यतीत्यर्थः ॥१२॥

येन केनाप्युपायेन निषिद्धद्रव्यादिनापि दीक्षितः स्यात् । यैव सैवेति प्रातश्चित्तक्रियालोकरञ्जनमात्रार्था, न तु पापक्षयार्था ॥१३॥

सर्वाः स्वमतिविलासिता देवताः ॥१४॥

विधिक्रमं विना यथाभिरुचितैरनुष्ठानैः कृत उपवासादिधर्मः स्यात्, आयासः कृच्छ्रादिः ॥१५—१८॥

यो यो हीनोऽपि बहुलं धनं ददाति, स स स्वामी उत्तमानामपि । तत्र हेतुः बहुद्रव्यदानादिना यः सम्बन्धः, स एव स्वामित्वे हेतुर्भावी । न त्वभिजनः सत्कुलीनत्वम् । स्वामिहेतुसम्बन्धो भविताभिजन इति पाठे स्वामित्वहेतुना बहुद्रव्यादानादिना सम्बन्ध एव अभिजनो कुलीनत्वं भविष्यतीत्यर्थः ॥१९॥

(ङ) समासन्नं सन्निहितम् अचिरोत्तरभावीत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गृहान्ता द्रव्यसङ्घाता द्रव्यान्ता च तथा मतिः ।
अर्थाश्चात्मोपभोगान्ता भविष्यन्ति कलौ युगे ॥२०॥

स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः ।
अन्यायावाप्तवित्तेषु पुरुषाश्च स्पृहालवः ॥२१॥

अभ्यर्थितोऽपि सुहृदा स्वार्थहानिं न मानवः ।
पणार्द्धार्द्धमात्रेऽपि करिष्यति तदा द्विज ॥२२॥

समानं पौरुषञ्चेतो भावि विप्रेषु वै कलौ ।
क्षीरप्रदानसम्बन्धि भावि गोषु च गौरवम् ॥२३॥

अनावृष्टिभयप्रायाः प्रजाः क्षुद्भयकातराः ।
भविष्यन्ति तदा सर्व्वा गगनासक्तदृष्टयः ॥२४॥

कन्दपर्णफलाहारास्तापसा इव मानवाः ।
आत्मानं पातयिष्यन्ति तदा वृष्ट्यादिदुःखिताः ॥२५॥

दुर्भिक्षमेव सततं तदा क्लेशमनीश्वराः ।
प्राप्स्यन्ति व्याहतसुखप्रमोदा मानवाः कलौ ॥२६॥

अस्नानभोजिनो(च) नाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पित्र्योदककक्रियाम् ॥२७

लोलुपा ह्रस्वदेहाश्च(छ) बह्वन्नादनतत्पराः ।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ॥२८॥

द्रव्याणां संघाताः सञ्चया अपि गृहान्ताः । गृह एव अन्तः समाप्तिर्येषां ते तथा बहुधनादिसंग्रहेऽपि गृहनिर्माणादिष्वेव क्षीणा भविष्यन्ति । न तु धर्मोपयोगिन इत्यर्थः । नृणां मतिश्च द्रव्यान्ता द्रव्यार्जनमात्रनिष्ठा न त्वात्मज्ञानोपयोगिनी । अर्थाश्च भोग्याः स्रक्चन्दनादय आत्मोपभोगान्ताः स्वभोगमात्रपर्यवसायिनः न त्वतिथिदेवताद्यर्था भविष्यन्ति ॥२०॥

स्वैरिण्यः पुंश्चल्यः । तत्र हेतुः सुन्दरे स्पृहा यासां ताः ॥२१॥

पणो वराटिकाशीतिः, तदर्धार्धं काकिणी, तदर्धमात्रेऽपि निजे स्वार्थस्य हानिं न करिष्यति । कपर्दिकादशकमपि न त्यक्ष्यतीत्यर्थः । पञ्च गुञ्जा तुलितं स्वर्णं वापणः तत्राप्यर्धार्धमपि द्रष्टव्यम् ॥२२॥

समानपौरुषम् अस्मासु विप्रेषु च पुरुषत्वं समानं तस्मात्तेषु विप्रेषु को विशेष इत्यनादरयुक्तं चित्तं शूद्रादेर्भविष्यतीत्यर्थः । समानपौरुषमिति पाठे सगर्वं निष्ठुरञ्चेत्यर्थः । क्षीरेति महिष्यादिष्विव क्षीरप्रदानतो गोषु सत्कारो भविष्यति न तु जातेरित्यर्थः ॥२३॥

क्षुद्भयेन कातराः व्याकुलाः प्रजाः मेघप्रतीक्षया गगने आसक्तदृष्टयो भविष्यन्ति ॥२४॥

पातयिष्यन्ति क्लेशयिष्यन्ति ॥२५॥

अनीश्वरा निर्धनाः । व्याहतं सुखं प्रमोदश्च हर्षो येषां ते ॥२६।२७॥

बहुप्रजेत्यत्र सन्धिरार्षः ॥२८॥

(च) अस्नानभोजिनः स्नानव्यतिरेकेणैव भोजनशीलाः, अग्निदेवतातिथीनां पूजनं न करिष्यन्ति, अग्नौ होमं न करिष्यन्ति, देवतानां पजां न करिष्यन्ति, अतिथीनां सत्कारञ्च न करिष्यन्तीत्यर्थः । पित्र्योदककक्रियां पितृपुरुषान समुद्दिश्य तर्पणश्राद्धादिक्रियाम् । न च करिष्यन्ति ।

(छ) ह्रस्वः अतिह्रस्वपरिमाणः देहः शरीरं यासां ताः, लोलुपाः लोभपरायणाः, बह्वोः समधिकस्य अन्नस्य अदने भोजने तत्पराः व्यापृताः । बह्व्यः अत्यधिकसंख्याः प्रजाः सन्ततयः यासां ताः, अल्पं भाग्यं यासां ताः, बहुसन्तानयुक्ता अथच अल्पभाग्याः येन सन्तानपरिपालनादिकमधिकृत्य महत् कष्टमनुभवितव्यं स्यादिति भावः । अत्र सन्धिरार्ष इति श्रीधरः, तच्च बहुप्रजा अल्पभाग्याश्च इति पृथक् समस्तपदद्वयमात्राभिप्रायेण, बहुप्रजाल्पभाग्येति समस्तपदद्वयस्य कर्मधारयसमासाङ्गीकारे तु न तथेति ध्येयम् ।

(ज) गुरूणां श्वश्रूश्वशुरादीनां तथा भर्तॄणां स्वामिनाम्, आज्ञां भेत्स्यन्ति लङ्घयिष्यन्ति युक्तथादिप्रयोगेण खण्डयिष्यन्तीति वा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उभाभ्यामेव पाणिभ्यां शिरः कण्डूयनं स्त्रियः ।
कुर्व्वन्त्यो गुरुभर्त्तृणामाज्ञां भेत्स्यन्त्यनादृताः(ज)॥२९
स्वपोषणपराः(झ) क्षुद्रा देहसंस्कारवर्ज्जिताः ।
परुषानृतभाषिण्यो भविष्यन्ति कलौ स्त्रियः ॥३०॥
दुःशीला दुष्टशीलेषु कुर्व्वन्त्यः सततं स्पृहाम् ।
असद्वृत्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः ॥३१॥
वेदादानं करिष्यन्ति वटवश्च तदाव्रताः ।
गृहस्थाश्च न होष्यन्ति न दास्यन्त्युचितान्यपि (ञ)॥३२
वनवासा भविष्यन्ति ग्राम्याहारपरिग्रहाः(ट) ।
भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रिताः ॥३३॥
अरक्षितारो हर्त्तारः शुल्कव्याजेन पार्थिवाः ।
हारिणो जनवित्तानां संप्राप्ते तु कलौ युगे ॥३४॥
यो योऽश्वरथनागाढ्यः स स राजा भविष्यति ।
यश्च यश्चाबलः सर्व्वः स स भृत्यः कलौ युगे ॥३५॥
वैश्याः कृषिवाणिज्यादि(ठ) सन्त्यज्य निजकर्म्म वै
शूद्रवृत्त्या प्रवत्स्यन्ति कारुकर्म्मोपजीविनः ॥३६॥
भैक्ष्यव्रताःतथा (ड) शूद्रा प्रव्रज्यालिङ्गिनोऽधमाः ।
पाषण्डसंश्रयाः वृत्तिमाश्रयिष्यन्त्यसंस्कृताः ॥३७॥
दुर्भिक्षकरपीड़ाभिरतीवोपहता जनाः ।
गवेधुककदन्नाद्यान् देशान् यास्यन्ति दुःखिताः॥३८॥
वेदमार्गे प्रलीने च पाषण्डाढ्ये ततो जने ।
अधर्म्मवृद्ध्या लोकानां स्वल्पमायुर्भविष्यति ॥३९॥
अशास्त्रविहितं घोरं तप्यमानेषु वै तपः ।
नरेषु नृपदोषेण बालमृत्युर्भविष्यति ॥४०॥

अनादृताः आदरशून्याः ॥२९॥

परुषमनृतञ्च भाषितं शीलं यासां ताः ॥३०॥

दुष्टशीलेषु असद्वृत्तेषु पुरुषेषु स्पृहां कुर्वन्त्यो व्यभिचारिण्यो भविष्यन्ति ॥३१॥

आश्रमाणां विप्लवमाह,—'वेदादानमि'ति । अव्रता वेदव्रतादिहीना वटवो ब्रह्मचारिणो वेदाध्ययनं करिष्यन्ति ॥३२॥

वनवासाः वानप्रस्थाः भिक्षवः सन्न्यासिनोऽपि पितृपुत्रादीन् विहाय अन्यान् मित्रादीन् सम्प्राप्य तेषु स्नेहसम्बन्धेन यन्त्रो यन्त्रणं तद्वशत्वम् इतो जातो येषां ते तथाभूता भविष्यन्ति ॥३३॥

पार्थिवा अरक्षितारः प्रजापालनमकुर्वन्त एव हर्त्तारः करग्राहिणः, तथा शुल्कच्छलेन वणिग्जनवित्तानामपहारिणो भविष्यन्ति ॥३४।३५॥

शूद्रवृत्त्या सेवया प्रकर्षेण वत्स्यन्ति वासं करिष्यन्ति वर्त्तिष्यन्त इत्यर्थः । प्रवत्स्यन्तीति पाठः सुगमः । कारुकर्म्म वरुडादीनां कर्म कटक्रियादि उपजीवितुं शीलं येषां ते ॥३६।३७॥

गवेधुकादिकदन्नाद्यान् देशान् यास्यन्ति ॥३८।४०॥

(झ) स्वपोषणपरा स्वकीयपोषणमात्रपरायणाः, पतिपुत्रादिपक्षनेन आत्ममोगमात्रे व्यापृता इत्यर्थः । देहसंस्कारवर्जिताः शारीरशौचशून्याः ।

(ञ) न होष्यन्ति अग्नौ देवतादीनुद्दिश्य आहुतिं न दास्यन्ति । उचितानि दातुमिति शेषः, न दास्यन्ति ।

(ट) ग्राम्यः ग्रामोचितः आहारः आहार्य्यवस्तुपरिग्रहः येषां तथाभूताः ।

(ठ) कृषिवाणिज्यादि कृषिकर्म वाणिज्यकर्मादिकं वैश्यवर्णानां कृते शास्त्रविहितं कर्म ।

(ड) भैक्ष्यमेव व्रतं येषां ते, प्रव्रज्या सन्न्यासः तल्लिङ्गं तदुचितं चिह्नं गैरिकवसन-दण्ड-कमण्डलुप्रभृतिकं तद्वन्तः । पाषण्डा एव संश्रयः यस्याः तथाभूताम् वृत्तिं जीविकां मनोवृत्तिं वा असंस्कृताः सन्न्यासादिसंस्कारबहिर्भूता अपीत्यर्थः । अथवा शौचाचारादिवर्जिता इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवित्री योषितां सूतिः पञ्चषट्सप्तवार्षिकी ।
नवाष्टदशवर्षाणां मनुष्याणां तथा कलौ(ढ) ॥४१॥

पलितोद्भवश्च भविता तदा द्वादशवार्षिकः(ण) ।
नातिजीवति वै कश्चित् कलौ वर्षाणि विंशतिम् ॥४२

अल्पप्रज्ञा वृथालिङ्गा दुष्टान्तःकरणाः कलौ ।
यतस्ततो विनङ्क्ष्यन्ति कालेनाल्पेन मानवाः(त) ॥४३

यदा यदा हि पाषण्डवृद्धिर्मैत्रेय लक्ष्यते ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः (थ)॥४४॥

यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् ।
प्रारम्भाश्चावसीदन्ति यदा धर्म्मभृतां नृणाम्(द) ।
तदानुमेयं प्राधान्यं कलेर्मैत्रेय पण्डितैः ॥४५॥

यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः ।
इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम् ॥४६॥

न प्रीतिर्वेदवादेषु पाषण्डेषु यदा रतिः ।
कलेर्वृद्धिस्तदा प्राज्ञैरनुमेया विचक्षणैः ॥४७॥

कलौ जगत्पतिं विष्णुं सर्व्वस्रष्टारमीश्वरम् ।
नार्च्चयिष्यन्ति मैत्रेय पाषण्डोपहता नराः ॥४८॥

किं वेदैः किं द्विजैर्देवैः किं शौचेनाम्बुजन्मना ।
इत्येवं विप्र वक्ष्यन्ति पाषण्डोपहता नराः ॥४९॥

स्वल्पाम्बुवृष्टिः पर्ज्जन्यः शस्यं स्वल्पफलं तथा(ध) ।
फलं तथाल्पसारञ्च विप्र प्राप्ते कलौ युगे ॥५०॥

शाणीप्रायाणि वस्त्राणि शमीप्राया महीरुहाः ।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥५१॥

अणुप्रायाणि धान्यानि अजाप्रायं तथा पयः ।
भविष्यति कलौ प्राप्ते उशीरञ्चानुलेपनम्(न) ॥५२॥

तथा मनुष्याणां पुंसां सूतिः ॥४१॥
विंशतिवर्षानतिक्रम्य न जीवति ॥४२।४३॥
कलेः प्राबल्ये लिङ्गान्याह यदा यदेति पञ्चभिः ॥४४-४८

अम्बुजन्मना वारिणा कृतेन शोचेन किम् ॥४९॥
अल्पसारं निर्वीर्यम् ॥५०॥
शाणी शणसूत्रमयी पट्टिका तत्तुल्यानि वस्त्राणि ॥५१॥
उशीरं सुरभितृणविशेषः ॥५२॥

(द) भवित्रीत्यादि तथाहि स्त्रीणां पञ्चमे वर्षे षष्ठे वर्षे सप्तमे वा वर्षेऽपि सूतिः अपत्यं सन्तानस्य प्रसवो वा भविष्यति, पुरुषाणाञ्च अष्टमे नवमे दशमे वा वर्षेऽपि अपत्यं भविष्यतीत्यर्थः ।

(ण) पलितस्य जराप्रसूतस्य केशशौक्ल्यस्य उद्भवः, उत्पत्तिः । द्वादशवार्षिकः द्वादशवर्षवयःकालीनः । द्वादशवर्षे वयस्येव केशाः जरया शुक्ला भविष्यन्तीत्यर्थः ।

(त) अल्पा क्षीणा प्रज्ञा बुद्धिः येषां ते, वृथा निष्फलं लिङ्गं विप्रादिचिह्नयज्ञोपवीतादि येषां ते, तत्तल्लिङ्गधारिणोऽपि तत्तल्लिङ्गसमुचिताचारमकुर्वाणाः । दुष्टानि कामादिदोषैरतिक्लुषितानि अन्तःकरणानि येषां ते, यतः ततः अतितुच्छादपि हेतोः अल्पेन कालेन स्वल्पेनैव वयसा विनश्यन्ति, एतेनात्यल्पजीवित्वं सूच्यते ।

(थ) पाषण्डा नास्तिकाः तेषां वृद्धिः आधिक्यम् । विचक्षणैः पण्डितैः ।

(द) प्रारम्भाः कृत्यव्यापाराः अवसीदन्ति शिथिलतां गच्छन्ति, स्वल्पतां प्राप्नुवन्तीत्यर्थः ।

(ध) पर्जन्यः शब्दायमानो मेघः, स्वल्पा अम्बुवृष्टिः जलवर्षणं यस्य तथाभूतः, अतिगर्जन्नपि स्वल्पमात्रजलवर्षीत्यर्थः । 'पर्जन्यो रसदब्देन्द्रा'वित्ति कोषात् । शस्यं शस्यबीजम् स्वल्पफलम् अल्पमात्रफलदायि ।

(न) धान्यानि अणुप्रायाणि प्रायेणातिक्षुद्रपरिमाणानि, अजाया इदम् आजम् अजासम्बन्धि तत्प्रायं पयः क्षीरम्, उशीरञ्चानुलेपनमित्यपि प्रायेणेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वश्रू-श्वशुरभूयिष्ठा गुरवश्च नृणां कलौ ।
श्यालाद्या हारिभार्य्याश्च सुहृदो मुनिसत्तम ॥५३॥

कस्य माता पिता कस्य यदा कर्म्मानुगः पुमान् ।
इति चोदाहरिष्यन्ति श्वशुरानुगता नराः ॥५४॥

वाङ्मनःकायिकैर्दोषैरभिभूताः पुनः पुनः ।
नराः पापान्यनुदिनं करिष्यन्त्यल्पमेधसः(प) ॥५५॥

निःसत्त्वानामशौचानां निःश्रीकाणां तथा नृणाम्।(फ)
यद्यद् दुःखाय यत् सर्व्वं कलिकाले भविष्यति ॥५६॥

निःस्वाध्यायवषट्कारे स्वधास्वाहाविवर्ज्जिते ।
तथा प्रविरलो विप्र क्वचिल्लोको निवत्स्यति ॥५७॥

तत्राल्पेनैव यत्नेन पुण्यस्कन्धमनुत्तमम् ।
करोति यं कृतयुगे क्रियते तपसा हि सः(ब) ॥५८॥

इति श्रीविष्णुपुराणे षष्ठांशे प्रथमः अध्यायः ॥

श्यालाः पत्नीभ्रातरः हारिण्यो मनोहरा भार्या येषां ते हारिभार्याश्च सुहृदः तथाविधेषु नृषु नराणां सख्यं भवति इत्यर्थः ॥५३॥

कर्मात्मकः स्वकर्माधीनजन्मा ॥५४॥५५॥

यद्यद्वस्तु तत् सर्वं दुःखार्थमेव भविष्यति ॥५६॥

क्वचित् कीकटादौ ॥५७॥

कलेरेकं महान्तं गुणमाह, तत्रेति अल्पेनैव यत्नेन हरिकीर्त्तनादिनायं पुण्यस्कन्धं पुण्यराशिं नरः करोति, स हि कृतयुगे तपसा महता क्रियते य इति पाठे यः कोऽपि अतिमलिनोऽपीत्यर्थः । अतोऽनेनैकेन गुणेन कलिः सर्वश्रेष्ठ इत्यर्थः ॥५८॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां षष्ठांशे प्रथमोऽध्यायः ।

(प) अल्पा मेधा बुद्धिः येषां ते अल्पमेधसः, बहुव्रीहौ मेधाशब्दस्य असन्तत्वमानुशासनिकम् ।

(फ) निःसत्त्वानां सत्त्वगुणशून्यानाम् साधुतापरिवर्जितानाम् अनुदारचेतसां वा ।

(ब) एतदेवोक्तं श्रीमद्भागवते 'कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्' । इति 'कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः । कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेदिति च ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयः अध्यायः

[वेदव्यासेन कलियुगस्य, शूद्राणाम्, स्त्रियाश्च महत्त्वस्य वर्णनम्]

पराशर उवाच ।

आत्रेयाह महाबुद्धिर्यदत्रैव हि वस्तुनि ।
शृण्वतां महाभाग गदतो मम तत्त्वतः ॥१॥

यस्मिन् कालेऽल्पको धर्म्मो ददाति सुमहत् फलम् ।
मुनीनामित्यभूद् वादः कैश्चासौ क्रियते सुखम् ॥२॥

सन्देहनिर्णयार्थाय वेदव्यासं महामुनिम्(क) ।
पप्रुते संशयं प्रष्टुं मैत्रेय मुनिपुङ्गवाः ॥३॥

ददृशुस्ते मुनिं तत्र जाह्नवीसलिले द्विजाः ।
व्यासं महाभागमर्द्धस्नातं महामतिम् ॥४॥

स्नानावसानं तत्तस्य प्रतीक्षन्तो महर्षयः(ख) ।
तस्थुस्तटे महानद्यास्तरुषण्डमुपाश्रिताः ॥५॥

मग्नोऽथ जाह्नवीतोयादुत्थायाह सुतो मम(ग) ।
कलिः साधुः कलिः साधुरित्येवं शृण्वतां वचः ॥६॥

तेषां मुनीनां भूयश्च ममज्ज स नदीजले(घ) ।
उत्थाय साधु साध्विति शूद्र धन्योऽसि चाब्रवीत् ॥७

स निमग्नः समुत्थाय पुनः प्राह महामुनिः ।
योषितः साधुधन्यास्तास्ताभ्यो धन्यतरोऽस्ति कः ॥८॥

ततः स्नात्वा यथान्यायमायान्तं कृतसत्क्रियम् ।
उपतस्थुर्महाभागं मुनयस्ते सुतं मम ॥९॥

द्वितीयः अध्यायः

अतिनिकृष्टोऽपि कलिरल्पायासेन महाफलप्रदायीत्युपवर्णयितुं प्रसङ्गान्निकृष्टयोः स्त्रीशूद्रयोरपि गुणाधिक्यं कृष्णद्वैपायनेतिहासं प्रस्तौति, व्यासश्चेति, वस्तुनि अर्थे ॥१॥

अयमत्रो विचारः कैश्चाधिकारिभिरसौ धर्मः सुखमनायासेन क्रियते ॥२॥

सन्देहविषयभूतमर्थं प्रष्टुं ययुः ॥३।४॥

स्नानसमाप्तिं प्रतीक्षमाणास्तरूणां षण्डं समूहमुपाश्रिता-स्तस्थुः स्थिताः। उत्थाय उन्मज्य तेषां मुनीनां शृण्वतां कलिः साधुः साधुरित्येवं वाचा मम सुतो व्यास आहेत्यन्वयः ॥६॥

तदेवं मुनिभिरपृष्टेनैव कस्मिन् व्यासेन कालेऽल्पको धर्मो ददाति सुमहत् फलमित्येतत् प्रश्नोत्तरतया कलेः साधुत्वमुक्तम्। कैश्चासौ क्रियते सुखमित्येतन्निर्णयार्थं शूद्रस्य स्त्रीणाञ्च धन्यत्वमाह शूद्र धन्योऽसीति। बुद्धिसन्निधानात् प्रत्यक्षमिवोक्तम्। अत्र कलेः साधुत्वं शूद्रस्य धन्यत्वञ्च योषितां साधुत्वञ्च धन्यतरत्वञ्चेति यथोत्तरं गुणाधिक्यं गंगायामघमर्षेण भगवद्ध्यानपूते चित्ते प्रतीतमित्युन्मज्योन्मज्य वारत्रयोक्त्या दर्शितम् ॥७-९॥

(क) अत्रैव वस्तुनि निकृष्टस्यापि गुणाधिक्यरूपे वस्तुनि [illegible]। यत् तत्त्वमिति शेषः, तत् श्रूयताम्। सन्देहस्य [illegible] क्रियस्य द्विकोटिकज्ञानविषयस्य वस्तुनः इत्यर्थः [illegible]र्थाय एकमात्रकोटिकज्ञानात्मकनिश्चयरूपप्रयोजनाय।

(ख) प्रतीक्षन्त इत्यत्र ईक्षतेरात्मनेपदिनः शतृप्रयोग आर्षः। महत्या नद्याः जाह्नव्याः तटे।

(ग) मम मूलवक्तुः पराशरस्य सुतः व्यासः कृष्णद्वैपायनः।

(घ) मुनीनामित्यनादरे षष्ठी, प्रश्नोत्तरदानादिना मुनीनसम्भाव्येत्यर्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतसंवन्दनांश्चाह कृतासनपरिग्रहान्(ङ) ।
किमर्थमागता यूयमिति सत्यवतीसुतः ॥१०॥

तमूचुः संशयं प्रष्टुं भवन्तं वयमागताः ।
अलं तेनास्तु तावन्नः कथ्यतामपरं त्वया(च) ॥११॥

कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति योषितः ।
यदाह भगवान् साधु धन्याश्चेति पुनः पुनः ॥१२॥

तत् सर्व्वं श्रोतुमिच्छामो न चेद् गुह्यं महामुने ।
तत् कथ्यतां ततो हृत्स्थं प्रक्ष्यामस्त्वां
प्रयोजनम् (छ) ॥१३॥

इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ।
श्रूयतां भो मुनिश्रेष्ठा यदुक्तं साधु साध्विति(ज)॥१४

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन यत् ।
द्वापरे यच्च मासेन अहोरात्रेण तत् कलौ ॥१५॥(झ)

तपसो ब्रह्मचर्य्यस्य जपादेश्च फलं द्विजाः ।
प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम्(ञ)

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्च्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्त्य केशवम् ॥१६

धर्म्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ ।
अल्पायासेन धर्म्मज्ञास्तेन तुष्टोऽस्म्यहं कलेः(ट) ॥१७

व्रतचर्य्यापरैर्ग्राह्यो वेदः पूर्व्वं द्विजातिभिः ।
ततः स्वधर्म्मसम्प्राप्तैर्यष्टव्यं विधिनाध्वरैः ॥१९

वृथा कथा वृथाभोज्यं वृथेज्या च द्विजन्मनाम् ।
पतनाय तथा भाव्यं तैस्त्वसंयमिभिः सदा (ट) ॥२०

कृतं संवन्दनमभिवादनं यैस्तान् ॥१०॥

तेन तावदलमस्तु तत्तावदास्तामित्यर्थः ॥११-१३॥

हृदिस्थप्रश्नस्यैवोत्तरं दत्तमप्यविज्ञाय पृच्छन्तीति प्रहस्येदमब्रवीत् ॥१४॥

(ङ) कृतं संवन्दनं सम्यक् वन्दनं यैः तान्, कृतः आसन-परिग्रहः उपवेशनं यैः तान् आसने उपविष्टानित्यर्थः, तान् मुनीनिति शेषः ।

(च) संशयं सन्देहविषयीभूतं कञ्चन विषयं प्रष्टुम्, प्रच्छेर्द्विकर्मकत्वाद् भवन्तमित्यपि प्रष्टुमित्यस्य कर्म । तेन अस्माकं पूर्वसंशयगोचरेण वस्तुना अलम्, अपरं तद्भिन्नमन्यद् वस्तु नः कथ्यताम् ।

(छ) किं तदित्याह कलिरित्यादि । यत् यस्मात् कारणादाह तत्कारणं सर्वं निःशेषं श्रोतुमिच्छामः वयमिति शेषः । ततः अनन्तरं हृत्स्थम् अस्मन्मनोगतं प्रयोजनं प्रक्ष्यामः ।

(ज) यत् यस्मात् कारणात् उक्तं कथितं मयेति शेषः ।

यत्कृते दशभिरिति द्वाभ्यामल्पेन कालेन कलौ उत्कर्षः । ध्यायन् कृत इति द्वाभ्यामल्पायासेनेति च साधुत्वमुक्तं हायनेन वर्षेण ॥१५-१८॥

शूद्रस्याल्पायासेन पुरुषार्थसिद्धिं वक्तुं त्रैवर्णिकानां क्लेशमाह,—'व्रतचर्यापरैरि'ति चतुर्भिः । व्रतचर्यापरैरिति पाठे उपहरणमुपहारः गुरवे सर्वलाभार्पणैरित्यर्थः ॥

वृथा कथा कृष्णकीर्त्तिरहिता, वृथा भोज्यं हरेरनिवेदितं वृथेज्या दम्भलोभादिपूर्विका ॥२०॥

(झ) मासेन अहोरात्रेण इत्युभयत्र अपवर्गे तृतीया । हेतुना कलिः साध्विति भाषितं मयेति शेषः ।

(ञ) अत्र कलौ तदाख्ये युगे, धर्मज्ञा इति सम्बोधनम् । तथा हि यूयं धर्मस्य कष्टसाध्यत्वं जानीथ एव अत्र युगे अनायासेन धर्मसिद्धेरपरयुगापेक्षया अत्र तं मे ज्ञातुमर्हथ इति भावः ।

(ट) तैः द्विजन्मभिः असंयमिभिः संयमरहितैः पतनाय भाव्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असम्यक्करणे दोषस्तेषां सर्व्वेषु कर्म्मसु (३)।
भोज्यपेयादिकञ्चैषां नेच्छाप्राप्तिकरं द्विजाः (ठ)॥२१

पारतन्त्र्यं समस्तेषु तेषां कार्य्येषु वै ततः।
जयन्ति ते निजात् लोकान् क्लेशेन महता द्विजाः (ड)
॥२२॥

द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान्।
निजान् जयति वै लोकान् शूद्रो धन्यतरस्ततः (ढ)॥२३

भक्ष्याभक्ष्येषु नास्यास्ति पेयापेये वै यतः।
नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितः (ण)॥२४

स्वधर्म्मस्याविरोधेन नरैर्लब्धं धनं सदा।
प्रतिपादनीयं पात्रेषु यष्टव्यञ्च ययाविधि (त) ॥२५॥

तस्यार्জ্জने महाक्लेशः पालने च द्विजोत्तमाः!
तथा सद्विनियोगाय विज्ञेयं गहनं नृणाम् (थ) ॥२६

एभिरन्यैस्तथा क्लेशैः पुरुषा द्विजसत्तमाः।
निजान् जयन्ति वै लोकान् प्राजापत्यादिकान्
क्रमात् (द) ॥२७॥

योषिच्छुश्रूषणं भर्त्तुः कर्म्मणा मनसा गिरा।
कुर्व्वतो समवाप्नोति (४) तत्सालोक्यं यतो द्विजाः
॥२८॥

नातिक्लेशेन महता तानेव पुरुषो यथा।
तृतीयं व्याहृतं तेन मया साध्विति योषितः ॥२९॥

एतद् वः कथितं विप्रा यन्निमित्तमिहागताः।
तत् पृच्छध्वं (५) यथाकामं सर्व्वं वक्ष्यामि वः स्फुटम्
॥३०॥

इच्छया प्राप्तिकरं प्राप्तञ्च न भवति, किन्तु चोदनया ॥२१।२२॥

शूद्रस्य तादृक्क्लेशाभावेन धन्यत्वमुक्तमित्याह द्विजशुश्रूषयेति द्वाभ्याम् ॥२३।२४॥

त्रीणामनायासेन श्रयःप्राप्त्या धन्यत्वं वक्तुं पुरुषाणां तत्प्राप्तौ क्लेशमाह—'स्वधर्म्मस्ये'ति त्रिभिः ॥१५॥

एवं नृणां गहनं क्लेशः ॥२६।२७॥

(ठ) असम्यक्करणे नियमातिक्रमेण करणे दोषः वैगुण्यम् जायतीति शेषः। भोज्येत्यादि—तथाहि यदेव भोक्तुं यदेव च पातुम् इच्छेयुः, तदेव भोक्तुं तदेव च पातुं न शक्नुयुः, परं विध्यनुसारेण तैर्भोक्तव्यं पातव्यञ्चेत्यर्थः। भोज्यपेयादीत्यत्रादिपदाद् लेह्यादिपरिग्रहः।

(ड) तेषां द्विजन्मनां सर्वेषु कार्य्येषु कर्त्तव्यार्थेषु पारतन्त्र्यं शास्त्रपारवश्यम् कठोरशास्त्रनियमपराधीनतेति यावत्।

(ढ) एषः शूद्रः, पाकयज्ञाधिकारवान् पाकयज्ञफललाभे कर्त्ता। धन्यतरः द्विजापेक्षया अधिकधन्यः।

(ण) अस्य शूद्रस्य, भक्ष्याभक्ष्येषु खाद्याखाद्येषु नियमः एतद् भक्ष्यम् एतन्न भक्ष्यम् एतत् पेयं एतत् न पेयमित्यादिरूपं विशेषानुशासनं नास्ति, यस्तु सामान्यनियमोऽस्ति, स नातिक्लेशकर इति मन्तव्यम्, अतएव तस्य असत्कल्पत्वमभिसन्धायोक्तं सामान्यतः 'नास्य भक्ष्याभक्ष्यादिषु नियमः अस्ती'ति।

(त) पात्रेषु यत्पात्रेषु प्रतिपादनीयं देयमित्यर्थः। यष्टव्यं यागादिकं कर्त्तव्यं तेन धनेनेति शेषः। अत्र श्लोके तृतीयपादस्य नवाक्षरत्वेऽपि आर्षत्वान्नानुष्टुभनियमभङ्गदोषः।

(थ) तस्य धनस्य अर्জने पालने च महाक्लेशः। तदुक्तम्—'अर्थानामर्জने दुःखमर्জितानाञ्च रक्षणे। नाशे दुःखं व्यये दुःखं धिगर्थं दुःखसंकुलम्।' इति।

(द) भर्त्तुः स्वामिनः कर्मणा शारीरादिव्यापारेण। गिरा प्रियया हितया च वाचा। शुश्रूषणं सेवामात्रं कुर्वती न त्वन्यान्यपि क्लेशकराणि कर्माणीति शेषः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

ततस्ते मुनयः प्रोचुर्यत् प्रष्टव्यं महामुने !
अन्यस्मिन्नेव तत् पृष्टे यथावत् कथितं त्वया ॥३१॥

ततः प्रहस्य तान् प्राह कृष्णद्वैपायनो मुनिः ।
विस्मयोत्फुल्लनयनांस्तापसांस्तानुपागतान् (ध) ॥३२॥

मयैष भवतां प्रश्नो ज्ञातो दिव्येन चक्षुषा ।
तता हि वः प्रसङ्गेन साधु साध्विति भाषितम् ॥३३

स्वल्पेनैव प्रयत्नेन धर्म्मः सिध्यति वै कलौ ।
नरैरात्मगुणाम्भोभिः क्षालिताखिलकिल्विषैः ॥३४॥

शूद्रैश्च द्विजशुश्रूषातत्परैर्मुनिसत्तमाः !
तथा स्त्रीभिरनायासं (६) पतिशुश्रूषयैव हि ॥३५॥

ततस्त्रितयमप्येतन्मम धन्यतमं मतम् ।
धर्म्मसंसाधने क्लेशो द्विजातीनां कृतादिषु(न) ॥३६॥

भवद्भिर्यदभिप्रेतं तदेतत् कथितं मया ।
अपृष्टेनापि धर्म्मज्ञाः किमन्यत् कथ्यतां द्विजाः (७) ॥३७॥

ततः संम्पूज्य ते व्यासं प्रशस्य च पुनः पुनः ।
यथागतं द्विजा जग्मुर्व्यासोक्तिक्षतसंशयाः(प)(८)॥३८॥

भवतोऽपि महाभाग ! रहस्यं कथितं मया ॥३९॥

योषितः तादृक् क्लेशो नास्तीत्याह—'योषिदि'ति द्वाभ्याम् । पुरुषो यथा महता क्लेशेन प्राजापत्यादीन् लोकान् प्राप्नोति तथा नातिक्लेशेन तांस्तांल्लोकान् प्राप्नोतीत्यर्थः ॥२८।३१॥

इदानीन्तु मदुक्तमेतैर्ज्ञातमिति पुनः प्रहस्याह । अपृष्टेनैव व्यासेन कथमेवं निर्णयः कृतः इति विस्मयोत्फुल्लनयनान् ॥३२।३३॥

उक्तमर्थं निगमयति—'स्वल्पेनैवे'ति चतुर्भिः । आत्मनो हरेर्गुणा एवाम्भांसि तैः क्षालितमखिलं किल्विषं येषां तैर्नरैः कर्त्तृभिर्धर्मः सिध्यति ॥३४॥

यदभिप्रेतं ज्ञातुमिष्टम् ॥३७।३८॥

(ध) विस्मयेन उत्फुल्लानि विकसितानि नयनानि येषां तथाभूतान्। तान् लक्ष्यीकृत्य प्रहस्य तान् प्राहेत्यन्वयात् न तानित्यत्र वृथा द्विरुक्तिदोषः ।

(न) कृतादिषु सत्यत्रेताद्वापरकलियुगेषु द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां धर्मसंसाधने क्लेशः, न तु शूद्राणामपीत्यर्थः । तेषान्तु क्लेशं विनैव धर्मसंसाधनमिति, अत एव शूद्राणां धन्यत्वमुक्तम् इति भावः । अथवा द्विजातीनां ब्राह्मणक्षत्रियवैश्यानाम् उपलक्षणतया शूद्राणामपि कृतादिषु सत्यादियुगेषु धर्मसंसाधने क्लेशः धर्मजनने क्लेशः महत् कष्टम्, किन्तु कलियुगे धर्मसंधाने कस्यापि न महत् कष्टम्, अल्पायासेनैव तत्र धर्मोत्पत्तेः श्रवणात् । तदुक्तं 'कृते यद् ध्यायतो विष्णुं' त्रेतायां यजतो मखैः । द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्' । 'कलेर्दोषनिधे राजन्! अस्ति ह्येको महान् गुणः । कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्' इत्यादि श्रीमद्भागवतवचनम् । अत एव कलेर्धन्यत्वमुक्तमिति भावः । इति कलिधन्यत्वोक्तिसमर्थकमेतदिति ध्येयम् ।

(प) व्यासस्य कृष्णद्वैपायनस्य उक्त्या वचनेन हतः संशयः येषां ते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्यन्तदुष्टस्य कलेरयमेको महान् गुणः(फ) ।
कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥४०॥

यच्चाहं भवता पृष्टो जगतामुपसंहृतिम् ।
प्राकृतामान्तरालाञ्च तप्मप्येष वदामि ते ॥४१॥

इति श्रीविष्णुपुराणे षष्ठांशे द्वितीयः अध्यायः ॥

प्रासङ्गिकं परिसमाप्य प्रस्तुतमनुसन्धत्ते—'यच्चाह'मिति ।
आन्तरालां ब्रह्मणो दिने दिने भवाम् ॥४०॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां षष्ठांशे द्वितीयोऽध्यायः ।

(फ) अत्यन्तदुष्टस्य गुरुतरदोषराशियुक्तस्य कलेः कलि-[illegible]। अयमेको महान् गुण इत्यादि । अनेन श्रीमद्भागवत-[illegible]वाक्यत्वमनुसन्धेयम् ।

(ब) प्राकृतां प्राकृतिकीम् उपसंहृतिं प्रलयम् प्राकृतप्रलय-मित्तर्थः । प्राकुतामित्यत्र ष्णप्रत्ययान्तस्य स्त्रियाम्प्रत्यय आर्षः । आन्तरालामित्यत्रापि तथा ।

पाठान्तराणि—

(१९—१)—विधिवद्धनैः ।
(२०—२)—तैस्तु संयमिभिः सदा ।
(२१—६)—वस्तुषु ।
(२८—४) तद्धिताशुभमाप्नोति— ।
(३०—५) तत्पृच्छत— ।
(३५—६) तथा स्त्रीभिरनायासात्— ।
(३७—७)—किमन्यत् क्रियतां द्विजाः ।
(३८—८)—व्यासोक्तिकृतनिश्चयाः ।

मुमुक्षु भवन वेद वेदाङ्ग पुस्त
वाराणसी ।
आगत क्रमांक 1259
दिनांक 1416

तृतीयोऽध्यायः

[निमेषादिकालमानस्य नैमित्तिकप्रलयस्य च वर्णनम् ।]

पराशर उवाच ।

सर्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः ।
नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको मतः ॥१॥

ब्राह्मो नैमित्तिकस्तेषां कल्पान्ते प्रतिसञ्चरः ।
आत्यन्तिकश्च मोक्षाख्यः प्राकृतो द्विपरार्द्धिकः ॥२॥

मैत्रेय उवाच ।

परार्द्धसंख्यां भगवन् ! ममाचक्ष्व यया तु सः ।
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसञ्चरः ॥३॥

पराशर उवाच ।

स्थानात् स्थानं दशगुणमेकस्माद् गण्यते द्विज !
ततोऽष्टादशमे स्थाने परार्द्धमभिधीयते ॥४॥

तृतीयः अध्यायः

प्रतिसञ्चरः प्रलयः । प्राकृतो द्विपरार्द्धिक इति द्विगुणे-[illegible] ब्रह्मायुःसमाप्तौ भवतः । प्रकृतौ तत्कार्य्ये लयः [illegible] ॥२॥

प्रथमांशे परार्द्धमानमुक्तमेव । तथापि तदेव मानं परार्धस्य उक्तप्रकारान्तरमप्यस्तीत्याह — 'स्थानात् स्थानं दशगुण'-मिति । यथाह वायुः—'कोटिकोटिसहस्राणि परार्द्धमिति कीर्त्यते । परार्द्धं द्विगुणञ्चापि परमायुर्मनीषिणः । स्थानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परार्द्धद्विगुणं यत्तु प्राकृतः प्रलयो द्विज !
तदाव्यक्तेऽखिलं व्यक्तं स्वहेतौ लयमेति वै ॥५॥

निमेषो मानुषो योऽयं मात्रामात्रप्रमाणतः (क) ।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कलाः ॥६॥

नाड़िका तु प्रमाणेन कला दश च पञ्च च ।
उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश ॥७॥

हेममाषैः कृतच्छिद्रश्चतुर्भिश्चतुरङ्गुलैः ।
मागधेन प्रमाणेन जलप्रस्थस्तु स स्मृतः ॥८॥

नाड़िकाभ्यामथ द्वाभ्यां मुहूर्त्तो द्विजसत्तम !
अहोरात्रं मुहूर्त्तास्तु त्रिंशन्मासो दिनैस्तथा ॥९॥

मासैर्द्वादशभिर्वर्षमहोरात्रन्तु तद्विदि ।
त्रिभिर्वर्षशतैर्वर्षं षष्ट्या चैवासुरद्विषाम् ॥१०॥

तैस्तु द्वादशसाहस्रं चतुर्युगमुदाहृतम् ।
चतुर्युगसहस्रन्तु कथ्यते ब्रह्मणो दिनम् ॥११॥

दशगुणं विद्याद् दशाद्दशशतं ततः । सहस्रमयुतं तस्मान्नियुतं प्रयुतं ततः । अर्व्वुदं निर्व्वुदञ्चैव वृन्दञ्चैव ततः परम् । खर्वञ्चैव निखर्व्वञ्च शंखः पद्मं तथैव च । समुद्रो मध्यमन्तश्च परार्धं परमेव च । एवमष्टादशैतानि पदानि गणनाविधौ । कल्पसंख्याप्रवृत्तस्तु परार्धो ब्रह्मणः स्मृतः । तावच्छेषस्य कालोऽन्यत् तदन्ते प्रतिसृज्यत इति । एकं दशगुणं दश दश दशगुणाः शतम् । शतं दशगुणं सहस्रमित्येवमङ्कस्थानानां वामतोऽष्टादशे स्थाने परार्धं भवति । कल्पाश्चात्रासंख्येयाः । कल्पसंख्याप्रवृत्तस्तु परार्द्धो ब्रह्मण इति वायूक्तेः । ततश्च कल्पानां कोटिकोटिसहस्राणि परार्द्धं, तद्द्विगुणं परं ब्रह्मायुरित्युक्तं भवति । यत्तूक्तं प्रथमांशे—'निजेन तस्य मानेन आयुर्वर्षशतं स्मृतम् । तत् पराख्यं तदर्द्धन्तु परार्द्धमभिधीयते । एवन्तु ब्रह्मणो वर्षमेव वर्षशतं हि तदि'त्यादि । तस्मिन् पक्षे कल्पानां षट्त्रिंशत् सहस्राणि ब्रह्मण आयुरित्युक्तं स्यात् । अनयोश्च पक्षयोर्महाकल्पभेदेन व्यवस्था । यद्वा वायूक्तकल्पशब्देन लक्षणया तदंशभूतदिव्यमानुषवर्षादिभिः परार्द्धसंख्यासम्पादनेनाविरोधः समर्थनीयः ॥४।५॥

नैमित्तिकं लयं प्रपञ्चयिष्यन्निमेषादिक्रमेण प्रथमांशोक्तमेव कल्पप्रमाणमनुस्मारयति — 'निमेष' इति सप्तभिः । मात्रैव मात्रा प्रमाणं यस्य सः । एकमात्रलघ्वक्षरोच्चारणकालसम्मितो हि निमेषः, 'निमेषकालतुल्या हि मात्रा लघ्वक्षरञ्च यदि'ति ब्रह्माण्डोक्तेः ॥६॥

नाड़िकाज्ञानोपायमाह—'उन्मानेने'ति सार्द्धेन । अम्भसः उन्मानेन उन्मीयते अनेनेत्युन्मानं पात्रम्, अर्धेन योगे त्रयोदश सार्द्धद्वादशेत्यर्थः । उन्मानरूपेण घटितानि सार्द्धद्वादशपलानि सा नाड़िका । सार्द्धद्वादशपलताम्रनिर्मितपात्रेण सा नाड़िका ज्ञातव्येत्यर्थः ॥७॥

किं प्रमाणं तत् पात्रं कार्यं तदाह—'मागधेन प्रमाणेन जलप्रस्थस्तु स स्मृतः' इति सार्द्धद्वादशपलजलेन हि मगधदेशप्रस्थः पूर्यते, षोड़शपलजलेन हि मागधदेशाख्यः प्रस्थः पूर्यते । यदाह स्कन्धः,—"पलञ्च कुडवः प्रस्थ आढकं द्रोण एव च । धान्यमानेन बोद्धव्याः क्रमशोऽमी चतुर्गुणाः" ॥ तत्प्रमाणं पात्रं कार्यमित्यर्थसिद्धम् । तथापि पात्रेण कथं नाड़िकाज्ञानं क्रियापरिच्छेद्यत्वात् कालस्येत्याशंक्य क्रियासिद्धये प्रस्थं विशिनष्टि—'हेमे'ति । माषः पञ्चगुञ्जः । हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलशलाकाकारेण परिणतैः कृतच्छिद्रः । एतदुक्तं भवति—सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसम्मितमूर्द्ध्वायतं पात्रञ्चतुर्माषचतुरङ्गुलहेमशलाकया कृताधश्छिद्रं जले स्थापिते तेन च्छिद्रेण यावता कालेन पूर्य्यते, तावान् कालो नाड़िकेति । तथा च शुक्र—

"द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः । स्वर्णमाषैः
कृतच्छिद्रं यावत प्रस्थजलप्लुतम्" इति ॥८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स कल्पोऽप्यत्र मनवश्चतुर्दश महामुने !
तदन्ते चैव मैत्रेय ! ब्राह्मो नैमित्तिको लयः ॥१२॥
तस्य स्वरूपमत्युग्रं मैत्रेय गदतो मम ।
शृणुष्व प्राकृतं भूयस्तव वक्ष्याम्यहं लयम् ॥१३॥
चतुर्युगसहस्रान्ते क्षीणप्राये महीतले ।
अनावृष्टिरतीवोग्रा जायते शतवार्षिकी(क) ॥१४॥
ततो यान्यल्पसाराणि तानि सत्त्वान्यशेषतः ।
क्षयं यान्ति मुनिश्रेष्ठ ! पार्थिवान्यत्र पीड़नात्(घ) ॥१५॥
ततः स भगवान् विष्णू रुद्ररूपधरोऽव्ययः ।
क्षयाय यतते कर्त्तुमात्मस्थाः सकलाः प्रजाः(ग) ॥१६॥
ततः स भगवान् विष्णुर्भानोः सप्तसु रश्मिषु ।
स्थितः पिबत्यशेषाणि जलानि मुनिसत्तम ॥१७॥
पीत्वाम्भांसि समस्तानि प्राणिभूमिगतानि वै ।
शोषं नयति मैत्रेय ! समस्तं पृथिवीतलम् ॥१८॥
सरित्-समुद्र-शैलेषु शैल-प्रस्रवणेषु च ।
पातालेषु च यत्तोयं तत् सर्व्वं नयति क्षयम् ॥१९॥
ततस्तस्यानुभावेन तोयाहारोपबृंहिताः ।
त एव रश्मयः सप्त जायन्ते सप्त भास्कराः ॥२०॥
अधश्चोर्द्ध्वञ्च ते दीप्तास्ततः सप्त दिवाकराः ।
दहन्त्यशेषं त्रैलोक्यं सपातालतलं द्विज ॥२१॥
दह्यमानन्तु तैर्दीप्तैस्त्रैलोक्यं द्विज ! भास्करैः ।
साद्रिनद्यर्णवाभोगं निःस्नेहमति जायते (घ) ॥२२॥
ततो निर्दग्धवृक्षाम्बु त्रैलोक्यमखिलं द्विज !
भवत्येका च वसुधा कूर्म्मपृष्ठोपमाकृतिः(ङ) ॥२३॥

तथा त्रिंशता दिनैः मास इत्यर्थः ॥९—१२॥

नैमित्तिकलयप्रकारमाह—'तस्य स्वरूप'मिति यावदध्याय समाप्ति ॥१३॥

क्षीणप्राये दुर्भिक्षादिभिः ॥१४।१५॥

क्षयाय रुद्ररूपधरः सन् आत्मस्थाः स्वस्मिन् लीनाः प्रजाः कर्त्तुं प्रयतते ॥१६॥

सप्त रश्मयः कूर्मोक्ताः —'सुषुम्नो हरिकेशश्च विश्वकर्मा तथैव च। विश्ववर्चास्तथा दर्च्चा वसुः संयद्वसुस्तथे'ति ॥१७॥

प्राणिगतानि रक्तवसादीनि, भूमिगतानि तड़ागादिस्थितानि ॥१८।१९॥

सप्तरश्मयः भास्कराः सप्त-अरोगो भ्राजः पटलः पतङ्गः स्वर्णरोमा ज्योतिष्मान् विभावसुः सप्त सूर्याः इति श्रुत्युक्ताः ॥२०।२१॥

आभोगो विस्तारः, निःस्नेहं अतिरूक्षम् ॥२२।२३॥

(क) क्षीणप्राये दुर्भिक्षरोगाद्युपद्रवैः बाहुल्येन क्षयं प्राप्ते। शतवार्षिकी शतवर्षव्यापिनी अतिदीर्घकाल व्यापिनीत्यर्थः।

(ख) अल्पः सारः बलं येषां तानि, 'सारो बले स्थिरांशे च' इति कोषात्, स्वल्पमात्रजीवनशक्तिसम्पन्नानीत्यर्थः। सत्त्वानि प्राणिनः जन्तव इत्यर्थः। अथवा सत्त्वानि प्राणाः, 'द्रव्यासुजन्तुषायेषु सत्त्वमस्त्री तु जन्तुषु' इति कोषात्। पार्थिवानि पृथिवीसम्बन्धीनि।

(ग) यतते प्रवर्त्तत इत्यर्थः। आत्मस्थाः आत्मगताः आत्मनि लीनाः कर्त्तुम्। 'यत् प्रयन्त्यभिसंविशन्ती'ति श्रुतेः, कारणे लयस्यैव वा विनाशार्थकप्रलयपदार्थत्वात् इति भावः।

(घ) अद्रिः पर्वतः नदी सरित् अर्णवः समुद्रः तेषां आभोगेन विस्तारेण सह वर्त्तमानम्।

(ङ) वृक्षाः अम्बूनि जलानि च वृक्षाम्बूनि निर्दग्धानि निःशेषं दग्धानि वृक्षाम्बूनि यत्र तथाभूतम्, एका वृक्षाद्यपरसहायवस्तुरहिता तलमात्र पर्य्यव सितेत्यर्थः। कूर्मपृष्ठोपमा कूर्मपृष्ठोपमा कूर्मपृष्ठसदृशी आकृतिः यस्याः सा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततः कालाग्निरुद्रोऽसौ भूत्वा सर्व्वहरो हरिः ।
शेषनिःश्वाससम्भूतः पातालानि बभस्त्यधः(च) ॥२४

पातालानि समस्तानि स दग्ध्वा ज्वलनो महान् ।
भूमिमभ्येत्य सकलं बभस्ति वसुधातलम्(छ) ॥२५॥

भुवर्लोकं ततः सर्व्वं स्वर्लोकञ्च सुदारुणः ।
ज्वालामालामहावर्त्तस्तत्रैव परिवर्त्तते ॥२६॥

अम्बरीषमिवाभाति त्रैलोक्यमखिलं तदा ।
ज्वालावर्त्तपरीवारमुपक्षीणचराचरम्(ज) ॥२७॥

ततस्तापपरीतास्तु लोकद्वयनिवासिनः ।
कृताधिकारा गच्छन्ति महर्लोकं महामुने ॥२८॥

तस्मादपि महातापतप्ता लोकास्ततः परम् ।
गच्छन्ति जनलोकं ते दशावृत्त्या परैषिणः ॥२९॥

ततो दग्ध्वा जगत् सर्व्वं रुद्ररूपी जनार्द्दनः ।
मुखनिःश्वासजान् मेघान् करोति मुनिसत्तम(झ)॥३०

ततो गजकुलप्रख्यास्तड़ित्वन्तो निनादिनः(ञ) ।
उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः ॥३१

केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः(ट) ।
धूमवर्णा घनाः केचित् केचित् पीताः पयोधराः ॥३२

केचिद्रासभवर्णाभा लाक्षारसनिभास्तथा ।
केचिद्वैदूर्य्यसङ्काशा इन्द्रनीलनिभाः परे ॥३३॥

शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभास्तथा (ठ) ।
इन्द्रगोपनिभाः केचिन्मनःशिलनिभास्तथा ॥३४॥

बभस्ति भस्मीकरोति ॥२४।२५॥

ज्वालानां मालास्तासां महान्त आवर्त्ता यस्मिन् सः । तत्रैव त्रैलोक्यमध्य एव ॥२६॥

अम्बरीषं भर्जनभाण्डम् ॥२७॥

लोकद्वयनिवासिनः दिवि भुविस्थाः कृताधिकाराः अनुष्ठितस्वीयविनियोगाः ॥२८॥

दशायाः तत्रत्यफलभोगावस्थायाः आवृत्त्या परिवृत्त्या परैषिणः ऊर्द्ध्वलोकैषिणः । अन्ये त्वाहुः—त्रैलोक्येऽपि ये आधिकारिका मन्वाद्यास्ते कृताधिकारा भोगप्रक्षीणकर्माणः सन्तो महर्लोकं प्राप्य तस्मादपि तप्ताः तद्वासिभिः सह सशरीरा जनं यान्ति, तेषां मन्वादीनां मध्ये ये परैषिणः परवस्तुप्राप्तीच्छवः ते दशावारमावृत्त्या क्रमात्तपःसत्यादिद्वारा ततः परमीश्वरं विशन्ति । अन्ये तु—त्रैलोक्यस्था जीवाः स्वात्मनि संह्रियन्ते । यथाह वायुः,—'पितृभिर्मनुभिश्चैव सार्धं सप्तर्षिभिस्तथा । यज्वानश्चैव येऽप्यन्ये तद्भक्ताश्चैव तैः सह । महर्लोकं गमिष्यन्ति त्यक्त्वा त्रैलोक्यमीश्वराः । महर्लोकं परित्यज्य गणास्ते वै चतुर्दश । सशरीराः श्रयन्ते वै जनलोकं सहानुगाः । एवं देवाः सपितरः ऋषयो मनवश्च ह । पुत्रैः सहोर्द्ध्वं गच्छन्ति व्यावर्त्तन्ते च

(च) शेषस्य अनन्तनागस्य निःश्वासात् सम्भूतः कालाग्निरुद्रः कालानलात्मकरुद्ररूपः सन्,

(छ) भूमिं मर्त्यभूमिं अभ्येत्य प्राप्य ।

(ज) अम्बरीषं भर्जनपात्रम्, 'क्लीवेऽम्बरीषं भ्राष्ट्रो ना' इति कोषात् ज्वालानां वह्नि शिखानां आवर्त्तः परीवारः परिवेष्टनं यस्य तत् उपक्षीणं क्षयप्राप्तं चरं गतिमत् अचरं स्थावरञ्च यत्र तथाभूतं नाशितसकलसकलस्थावरजङ्गम् अथवा उपक्षीणं चराचरं गमनशीलं वस्तु यत्र तथाभूतम्, 'चरिष्णुजङ्गमचरत्रसमिञ्च चराचरमिति कोषात् ।

(झ) मुखस्य यो निःश्वासः तस्मात् जायन्ते ये तादृक् स्वीयमुखोत्थश्वासवाष्पसमुद्भूतान् ।

(ञ) गजकुलप्रख्याः हस्तिसमूहाकाराः, तड़ित्वन्तः विद्युद्युक्ताः, निनादिनः गर्जनकारिणः,

(ट) नीलोत्पलवत् श्यामाः कृष्णवर्णाः कुमुदसन्निभा कुमुदपुष्पवत् शुभ्राः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाषपत्रनिभाः केचिदुत्तिष्ठन्ति घना घनाः ।
केचित् पुरवराकाराः केचित् पर्व्वतसन्निभाः ॥३५॥

कूटागारनिभाश्चान्ये केचित् स्थूलनिभा घनाः ।
महारावा महाकायाः पूरयन्ति नभस्तलम् ॥३६॥

वर्षन्तस्ते महासारै-स्तमग्निमतिभैरवम्(ड) ।
शमयन्त्यखिलं विप्र ! त्रैलोक्यान्तरविस्तृतम् ॥३७॥

नष्टे चाग्नौ शतं तेऽपि वर्षाणामनिवारिताः(ढ) ।
प्लावयन्तो जगत् सर्व्वं वर्षन्ति मुनिसत्तम ॥३८॥

धाराभिरक्षमात्राभिः प्लावयित्वाखिलं भुवम् ।
भुवर्लोकं तथैवोर्द्ध्वं प्लावयन्ति दिवं द्विज(ण) ॥३९॥

अन्धकारीकृते लोके नष्टे स्थावरजङ्गमे ।
वर्षन्ति ते महामेघा वर्षाणामधिकं शतम्* ॥४०॥

इति श्रीविष्णुपुराणे षष्ठांशे तृतीयः अध्यायः ॥

[illegible] सह। जनलोकात् सुराः सर्वे दश कल्पान् पुनः पुनः। स्वायंकाले सम्प्राप्ते सम्भूता नैधनेन ह। अवश्यं भावितार्थेन सम्बध्यन्ते तदा तु ते। निवर्त्तन्ते तथावृत्तौ तेषां शक्यो न विस्तरः। महाज्जनञ्चैव जनात्तपश्च तपात् सत्यानि भवन्ति सत्ये। मन्वन्तराणां परिवर्त्तनानि भुञ्जन्ति सत्येन ततोऽन्तराणि। तपोऽभियोगाद्विषयप्रमाणाद्विशन्ति ते शाश्वतमेव देवम्। अथात्मनि महातेजाः सर्वमास्थाय कर्मकृत्। ततः स्वरात्रिं स्वपिति तमस्येकार्णवे जले।' इति ॥२६—३४॥

चाषो नीलपक्षः शकुनः ॥३५॥

कूटागारं गृहविशेषः ॥३६—४०॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशख्यायां वा श्रीविष्णुपुराणटीकायां षष्ठांशे तृतीयोऽध्यायः।

(ड) रासभस्य गर्द्दभस्य वर्णेन तत्तुल्य वर्णेवेत्यर्थ आभान्ति ये ते। लाक्षारसनिभाः लाक्षारसवत् लोहितवर्णाः वैदूर्य्यसङ्काशाः वैदूर्य्यमणितुल्यवर्णा, इन्द्रनीलनिभाः महानीलमणिसमानवर्णाः शङ्खकुन्दनिभाः शङ्खवत् कुन्दकुसुमवच्च श्वेतवर्णाः, इन्द्रगोपनिभाः इन्द्रगोपकीटवर्णाः, घनाः निविड़ाः नाः मेघाः। पुरवराकाराः बृहन्नगराकाराः।

(ड) महासारैः महद्भिः धारासम्पातैः 'धारासम्पात आसार' इति कोषात्। त्रैलोक्यान्तरे त्रिभुवनाभ्यन्तरे विस्तृतं लब्धविचारम्।

(ढ) अग्नौ तस्मिन् त्रैलोक्यव्यापिनि महाज्वालाकुले वह्नौ नष्टे तेन वर्षणेन निर्वाणं गतेऽपि ते घनाः, वर्षाणां शतं व्याप्य शतं वर्षाणि यावदित्यर्थः। सर्वं जगत् प्लावयन्तो वर्षन्ति।

(ण) अक्षसत्रोभिः विभीतकफलतुल्यपरिमाणाभिः धाराभिः जलविन्दुभिः, 'त्रिलङ्गस्तु विभीतकः। अक्षस्तुषः, कर्षफलो भूतावासः कलिद्रुम' इति कोषात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थः अध्यायः

[प्राकृतप्रलयवर्णनम् ।]

पराशर उवाच ।

सप्तर्षिस्थानमाक्रम्य स्थितेऽम्भसि महामुने !
एकार्णवं भवत्येव त्रैलोक्यमखिलं ततः(क) ॥१॥

मुखनिःश्वासजो विष्णोर्वायुस्तान् जलदांस्ततः ।
नाशयित्वा तु मैत्रेय ! वर्षाणामधिकं शतम्(ख) ॥२॥

सर्व्वभूतमयोऽचिन्त्यो भगवान् भूतभावनः ।
अनादिरादिर्विश्वस्य पीत्वा वायुमशेषतः ॥३॥

एकार्णवे ततस्तस्मिन् शेषशय्यास्थितः प्रभुः ।
ब्रह्मरूपधरः शेते भगवानादिकृद्धरिः ॥४॥

जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः ।
ब्रह्मलोकगतैश्चैव चिन्त्यमानो मुमुक्षुभिः ॥५॥

आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः ।
आत्मानं वासुदेवाख्यं चिन्तयन् परमेश्वरः(ग) ॥६॥

एष नैमित्तिको नाम मैत्रेय ! प्रतिसञ्चरः(घ) ।
निमित्तं तत्र यच्छेते ब्रह्मरूपधरो हरिः ॥७॥

यदा जागर्त्ति विश्वात्मा स तदा चेष्टते जगत् ।
निमीलत्येतदखिलं योगशय्याशयेऽच्युते ॥८॥

पद्मयोनेर्दिनं यत्तु चतुर्युगसहस्रवत् ।
एकार्णवाप्लुते लोके तावती रात्रिरिष्यते(ङ) ॥९॥

ततः प्रबुद्धो रात्र्यन्ते पुनः सृष्टिं करोत्यजः ।
ब्रह्मस्वरूपधृग् विष्णुर्यथा ते कथितं पुरा ॥१०॥

चतुर्थः अध्यायः

तदेवं नैमित्तिकं त्रैलोक्यप्रलयं निरूप्य तत्कालीनां स्थितिं निरूपयन्नाह—'सप्तर्षिस्थान'मित्यादिना 'अनावृष्ट्ये'त्यतः प्राक्तनेन ग्रन्थेन ॥१—३॥

(क) अम्भसि तस्मिन् वृष्टिसलिले सप्तर्षिस्थानमाक्रम्य तत्पर्य्यन्तं प्लावयित्वा स्थिते सति, त्रैलोक्यम् एकः अर्णवः समुद्रो यत्र तथाभूतं भवति, सर्वं वाक्यं सावधारणमिति शास्त्रात् त्रैलोक्यं तथाभूतमेव भवति । त्रिभुवने तदा एकं समुद्रं विना नान्यत् किमपि प्रतीतिविषयो भवतीति भावः ।

(ख) तान् येषां वर्षणेन जगदेकार्णवीबभूव तानित्यर्थः । अधिकं सुदीर्घं वर्षाणां शतं व्याप्य । वाति प्रवहति ।

शेष एव शय्या तामाश्रितः शेते ॥४-७॥

स यदा जागर्त्ति तदा जगच्चेष्टते सृष्ट्युन्मुखं भवति, निमीलति लयं याति ॥८॥

(ग) आत्ममायामयीं विष्णुमात्मिकां योगनिद्रां समास्थितः अधिष्ठितः ।

(घ) प्रतिसञ्चरः प्रलयः, तस्य निमित्तप्रभवत्वरूपं नैमित्तिकत्वमुपपादयितुं निमित्तमाह,—निमित्तमित्यादिना । हरिश्चनस्तत्र निमित्तत्वं विवरीतुमाह,—यदा जागर्त्तीत्यादि । अच्युते विष्णौ योगशय्याशये शेषशय्यायां शयित्वा योगनिद्राविष्टे सतीत्यर्थः ।

(ङ) पद्मयोनेः कमलजस्य ब्रह्मणः तावती चतुर्युगसहस्र-परिमितकालात्मिका रात्रिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्येष कल्पसंहारश्चान्तरः प्रलयो द्विज !
नैमित्तिकस्ते कथितः प्राकृतः शृण्वतः परम् ॥११॥

अनावृष्ट्याग्निसम्पर्कात् कृते संक्षालने मुने !
समस्तेष्वेव लोकेषु पातालेष्वखिलेषु च ॥१२॥

महदादेर्विकारस्य विशेषान्तस्य संक्षये ।
कृष्णेच्छाकारिते तस्मिन् प्रवृत्ते प्रतिसञ्चरे(च) ॥१३॥

आपो ग्रसन्ति वै पूर्व्वं भूमेर्गन्धात्मकं गुणम् ।
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते(छ) ॥१४॥

प्रनष्टे गन्धतन्मात्रेऽभवत् पृथ्वी जलात्मिका ।
रसाज्जलं समुद्भूतं तस्माज्जातं रसात्मकम् ॥१५॥

आपस्तदा प्रवृद्धास्तु वेगवत्यो महास्वनाः ।
सर्व्वमापूरयन्तीदं तिष्ठन्ति विचरन्ति च ।
सलिलेनैवोर्म्मिमता लोका व्याप्ताः समन्ततः(ज)॥१६

अपामपि गुणो यस्तु ज्योतिषा पीयते तु सः
नश्यन्त्यापस्ततस्ताश्च रसतन्मात्रसंक्षयात्(झ) ॥१७॥

ततश्चापो हृतरसा ज्योतिष्ट्वं प्राप्नुवन्ति वै ।
अग्न्यवस्थे तु सलिले तेजसा सर्व्वतो वृते(ञ) ॥१८॥

स चाग्निः सर्व्वतो व्याप्य आदत्ते तज्जलं तदा ।
सर्व्वमापूर्य्य तेजोभिस्तदा जगदिदं शनैः(ट) ॥१९॥

अर्च्चिर्भिः संवृते तस्मिन् तिर्य्यगूर्द्ध्वमधस्तथा ।
ज्योतिषोऽपि परं रूपं वायुरत्ति प्रभाकरम् ॥२०॥

प्रलीने च ततस्तस्मिन् वायुभूतेऽखिलात्मनि ।
प्रनष्टे रूपतन्मात्रे हृतरूपो विभावसुः(ठ) ॥२१॥

प्रशाम्यति तदा ज्योतिर्वायुर्दोधूयते महान् ।
निरालोके तदा लोके वाय्ववस्थे च तेजसि(ड) ॥२२॥

कियन्तं कालं शेते, कदा व प्रबुद्धः सन् जगत् सृजतीत्यत्राह—'पद्मयोने'रिति द्वाभ्याम् ॥९—१२॥

महदादेर्विशेषान्तस्य पृथिव्यन्तस्य विकारस्य संक्षये निमित्ते प्रतिसञ्चरे प्रवृत्त इत्यर्थः ॥१३॥

आत्तोऽपहृतो गन्धो यस्याः सा प्रलयत्वाय प्रलीनत्वाय ॥१४-१५॥

सलिलेनैव लोका व्याप्ताः क्रमादित्यर्थः ॥१७।१९॥

प्रभाकरं प्रकाशकं वायुरत्ति ग्रसते ॥२०-२१॥

निरालोके वायुर्दोधूयते प्रचलति ॥२२॥

(च) महदादेः सांख्योक्तमहत्तत्त्वादेः, कृष्णस्य विष्णोः इच्छया कारिते प्रतिसञ्चरे प्रलये प्रवृत्ते सति, इत्यर्थः ।

(छ) प्रलयत्वायेत्यस्य प्रलीनत्वायेत्यर्थमाह श्रीधरः, स च प्रलीयते यः स प्रलयः तस्य भावः प्रलयत्वं तस्मै इति व्युत्पत्त्या समुपपाद्यः ।

(ज) महान् स्वनः शब्दः यासां तथाभूताः महाशब्दकारिण्यः । ऊर्मिमता तरङ्गशालिन्या ।

(झ) रसतन्मात्रस्य जलकारणभूतस्य संक्षयात् सूक्ष्मजलस्य विनाशात् ।

(ञ) हृतः ज्योतिषा पीतः रसः रसरूपो गुणो यासां तथाभूताः, ज्योतिष्ट्वं ज्योतिःस्वरूपत्वं प्राप्नुवन्ति । अग्न्यवस्थे ज्योतिःस्वरूपतापन्ने ।

(ट) इदं सर्वं जगत् शनैः तेजोभिः आपूर्य्येत्यन्वयः ।

(ठ) ततः तस्मिन् ज्योतिषि प्रलीने रूपतन्मात्रस्य स्वोपादानभूतस्य नाशात् प्रणाशं गते सति, हृतं वायुना नाविशतं रूपं रूपतन्मात्रं यस्य तथाभूतः, विभावसुः अग्निः ज्योतिस्तत्त्वमित्यर्थः ।

(ड) प्रशाम्यति नश्यति, दोधूयते इति धूञ्कम्पन इत्यस्य यङि रूपम् । वाय्ववस्थे वायुभावमापन्ने ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततस्तु मूलमासाद्य वायुः सम्भवमात्मनः ।
ऊर्द्ध्वञ्चाधश्च तिर्य्यक् च दोधवीति दिशो दश(ढ)॥२३

वायोरपि गुणं स्पर्शमाकाशो ग्रसते पुनः ।
प्रशाम्यति ततो वायुः खन्तु तिष्ठत्यनावृतम्(ण)॥२४

अरूपमरसस्पर्शमगन्धं न च मूर्त्तिमत् ।
सर्व्वमापूरयच्चैनत् सुमहत् सम्प्रकाशते(त) ॥२५

परिमण्डलं तच्छुषिरमाकाशं शब्दलक्षणम् ।
शब्दमात्रं तदाकाशं सर्व्वमावृत्य तिष्ठति(थ) ॥२६॥

ततः शब्दं गुणं तस्य भूतादिर्ग्रसते पुनः ।
भूतेन्द्रियेषु युगपद् भूतादौ संस्थितेषु वै ॥२७॥

अभिमानात्मको ह्येष भूतादिस्तामसः स्मृतः ।
भूतादिं ग्रसते चापि महान् वै बुद्धिलक्षणः(द) ॥२८॥

उर्व्वी महांश्च जगतः प्रान्तेऽन्तर्बाह्यतस्तथा ॥२९॥

एवं सप्त महाबुद्धे ! क्रमात् प्रकृतयस्तु वै ।
प्रत्याहारे तु ताः सर्व्वाः प्रविशन्ति परस्परम् ॥३०॥

तुमुलं शब्दम् आत्मनः सम्भवं कारणम् आकाशम् आसाद्य ऊर्द्ध्वमधश्च दश दिशो दोधवीति प्रसर्पति ॥२३॥

अनावृतं विकारैरपरिच्छिन्नम् ॥२४-२५॥

परिमण्डलं सर्वतो वर्त्तुलं तच्च ब्रह्माण्डकटाहावृतत्वात् शब्दलक्षणं स्थूलेन शब्देन लक्ष्यम् ॥२६॥

भूतादिरित्यनेनात्र न तामसमात्रग्रहणं किन्तु तस्य प्राधान्येन सामान्यतोऽहंकारमात्रस्य, अत एव भूतानि न्द्रियाणाञ्च युगपत् प्रलयोक्तिः। देवानामप्युपलक्षणमेतत् ॥२७॥

अभिमानविषयाणां भूतादीनां लीनत्वात् केवलाभिमानात्मकस्य चावरणैकस्वभावत्वात्। एष भूतादिस्तदा तामस स्तमप्रधानः स्मृत इत्यर्थः। बुद्धिलक्षणः ज्ञानप्रधानत्वात् ॥२८॥

यथा सृष्टिक्रमप्रातिलोम्येन पृथिव्यादेः महत्तत्त्वपर्यन्तं लय उक्तः। आवरणे स्वयमेव लयक्रम इति वक्तुं ब्रह्माण्डात्वर्त्तिनः कार्यस्य अन्तर्बाह्यतश्च आद्यन्तकोटीर्दर्शयति—उर्व्वी महांश्चेति। ब्रह्माण्डस्यान्तर्यथादौ जगतः पृथिवी महत्तत्त्वं प्रान्ते आद्यन्तसीम्नोर्भवतः तथा ब्रह्माण्डाद्बाह्यतोऽपि। ततः किमत आह—'एव'मिति। यथा चरमसृष्ट्यां पृथ्वीमारभ्य प्रथमसृष्टमहत्तत्त्वपर्यन्तं प्रातिलोम्येन स्वस्वकारणे लयः, एवमावरणभूता अपि याः पृथिव्याद्याः सप्त प्रकृतयः ॥२९॥

(ढ) तुमुलं शब्दं शब्दामात्रं सूक्ष्ममाकाशतत्त्वमित्यर्थः, आत्मनः वायुतत्त्वस्य सम्भवं उत्पत्तिबीजम्, 'अथैतस्मादात्मन आकाशः सम्भूत आकाशाद् वायु'रित्यादि श्रुतेः। दश दिशः व्याप्य, दोधवीति भृशं पुनः पुनर्वा चलति, दोधवीतीति यङ्लुको रूपम्।

(ण) खं आकाशम्।

(त) न विद्यते रूपं यत्र तत्, न विद्यते रसस्पर्शौ यत्र तत्, न विद्यते गन्धो यत्र तत्, रूपरसस्पर्शगन्धशून्यमित्यर्थः, रूपादीनां प्रागुक्तक्रमेण विनाशादिति भावः। न च मूर्त्तिमत् न परिच्छिन्नस्वरूपम्। सुमहत् परममहत्परिमाणयुक्तम्; तदुक्तं कारिकावल्यां विश्वनाथेन—'कालखात्मदिशां सर्वगतत्वं परमं महद्'इति।

(थ) सुषिरं सरन्ध्रं सावकाशमित्यर्थः। शब्दः लक्षणं यस्य तथाभूतम्। शब्दस्य विशेषगुणस्य आश्रयतयैव अप्रत्यक्षस्याकाशस्य सिद्धेः।

(द) बुद्धिः ज्ञानं लक्षणं यस्य स बुद्ध्यादयो महत्तत्त्वस्य धर्मा आश्रयभूतं महत्तत्त्वं साधयन्ति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येनेदमावृतं सर्व्वमण्डमप्सु प्रलीयते ।
सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्व्वतम् ॥३१॥

तदण्डावरणं यत्तु ज्योतिषा पीयते तु तत् ।
ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः ॥३२॥

आकाशञ्चैव भूतादिर्ग्रसते तं तदा महान् ।
महान्तमेभिः सहितं प्रकृतिर्ग्रसते द्विज ॥३३॥

गुणसाम्यमनुद्रिक्तमन्यूनञ्च महामुने(ध) !
प्रोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम् (न) ॥३४॥

इत्येषा प्रकृतिः सर्व्वा व्यक्ताव्यक्तस्वरूपिणी ।
अव्यक्तस्वरूपमव्यक्ते तस्मिन् मैत्रेय ! लीयते(प) ॥३५

एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ।
सोऽप्यंशः सर्वभूतस्य मैत्रेय ! परमात्मनः ॥३६॥

न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ।
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥३७॥

स ब्रह्म तत् परं धाम परमात्मा स चेश्वरः ।
स विष्णुः सर्वमेवेदं यतो नावर्त्तते यतिः(फ) ॥३८॥

प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥३९॥

परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुर्नाम्ना स वेदेषु वेदान्तेषु च गीयते ॥४०॥

) त्वापि प्रत्याहारे उपसंहारे परं परं स्वं स्वं कारणं यन्ति । तदाह—'येने'ति त्रिभिः । येनेदं सप्तद्वीपादिकमभूत्तासीत् तदण्डं अण्डकटाहरूपा पृथ्वी स्वावरणत्वेषु प्रलीयत इत्यर्थः ॥३०।३१॥

(ध) गुणानां सत्त्वरजस्तमसां साम्यम् समावस्था । अनुद्रिक्तम् तेषु गुणेषु कस्याप्याधिक्यशून्यम्, अन्यूनं कस्यापि न्यूनतया हीनम् । गुणसाम्यमनुद्रिक्तमन्यूनञ्चेति त्रयं प्रतिपाद्यबुद्धिस्थार्थमुक्तम् एकमात्रेणापि चरितार्थत्वादिति ध्येयम् ।

(न) हेतुः महत्तत्त्वादीनां सर्वेषां कारणम् । किञ्च परं प्रकृष्टं कारणं कारणावस्थं, न तु कार्य्यावस्थमपि । तथाहि महत्तत्त्वादीनि यथा अहङ्कारतत्त्वादीनां कारणभूतानि तथा मूलप्रकृत्यादीनां कार्य्यभूतान्यपि, अत एवोक्तं 'महदाद्याः प्रकृतिविकृतयः सप्ते'ति । सत्त्वरजस्तमसां साम्यावस्थोपलक्षिता मूलप्रकृतिस्तु केवलं कारणात्मिका, न तु कस्यापि तत्त्वस्य कार्य्यभूतापि, अत एवोक्तं 'मूलप्रकृतिरविकृति'रिति, 'मूले मूलाभावादमूलं मूल'मिति च । अत एव तस्याः प्रकृतेः महत्तत्त्वादिसर्वतत्त्वापेक्षया प्रधानत्वात् प्रधानमित्यपि प्रोच्यते इत्यवधेयम् । अथवा परं प्रकृष्टं कारणम्, अत एव प्रधानं प्रोच्यते । प्राधान्ये कारणं कारणानुसन्धेयम् ।

प्रकृतिस्वरूपं दर्शयंस्तत्कार्यस्य तस्मिन्नेव लयमुपसंहरति—'गुणसाम्य'मिति ॥३४॥

व्यक्ताव्यक्तस्वरूपिणी कार्यकारणरूपा ॥३५॥

प्रकृतिपुरुषयोरपि लयं वक्तुं तयोस्तदंशत्वमाह—'एक' इति । सर्वव्यापी प्रकृतेस्तत्कार्यस्य चाधिष्ठाता, सोऽपीत्यपिशब्दात् प्रकृतिरपि, सर्वभूतस्य प्रकृत्यादिसर्वात्मकस्य परमात्मनोऽंशः ॥३६॥

कः पुनः परमात्मेत्यत्राह—'न सन्ती'ति द्वाभ्याम्, आत्मनः पुरुषात् परे ॥३७॥

पुरुषोत्तमे लीयेते लीनाविव तिष्ठतः ॥३९॥

तस्य तु नास्ति लय इत्याह—'परमात्मे'ति, तस्मात् स एव परमपुरुषार्थः ॥४०॥

(प) व्यक्तस्वरूपं महत्तत्त्वादि, अव्यक्ते साम्यावस्थोपलक्षितगुणत्रयरूपे प्रकृत्याख्ये प्रधाने ।

(फ) यतः यस्माद् ब्रह्मस्वरूपाद विष्णोः यतिः सन्न्यासी मुक्तिमाप्त इति शेषः, नावर्त्तते न पुनः संसरतीत्यर्थः, 'न स पुनरावर्त्तत' इति श्रुतेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म्म वैदिकम् ।
ताभ्यामुभाभ्यां पुरुषैः सर्वमूर्त्तिः स इज्यते(ब) ॥४१॥

ऋग्-यजुः-सामभिर्मार्गैः प्रवृत्तैरिज्यते ह्यसौ ।
यज्ञेश्वरो यज्ञपुमान् पुरुषैः पुरुषोत्तमः(भ) ॥४२॥

ज्ञानात्मा ज्ञानयोगेन ज्ञानमूर्त्तिः स चेज्यते ।
निवृत्ते योगिभिर्मार्गेविष्णुर्मुक्तिफलप्रदः(म) ॥४३॥

ह्रस्व-दीर्घ-प्लुतैर्यत्तु किञ्चिद्वस्त्वभियुज्यते ।
यच्च वाचामविषये तत्सर्वं विष्णुरव्ययः ॥४४॥

व्यक्तं स एव चाव्यक्तं स एव पुरुषोऽव्ययः ।
परमात्मा स विश्वात्मा विश्वरूपधरो हरिः ॥४५॥

व्यक्ताव्यक्तात्मिका तस्मिन् प्रकृतिः सम्प्रलीयते ।
पुरुषश्चापि मैत्रेय ! व्यापिन्यव्याहतात्मनि(य) ॥४६॥

द्विपरार्द्धात्मकः कालः कथितो यो मया तव ।
तदहस्तस्य मैत्रेय ! विष्णोरीशस्य कथ्यते ॥४७॥

व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा ।
तत्र स्थिते निशा चान्या तत्प्रमाणा महामुने ॥४८॥

तत्प्राप्त्यर्थमेव सर्वसाधनजातमित्याह—प्रवृत्तञ्चे'ति ॥४१॥ कैः कथमिज्यत इत्यत्राह—'ऋगि'ति द्वाभ्याम्। प्रवृत्तैरविरक्तैः पुरुषैः ऋग्वेदादिविहितैः कर्मभिः मार्गभूतैरित्यर्थः ॥४२॥

कर्मभिर्विशुद्धचित्तैस्तु योगिभिर्निवृत्ते मार्गे स्थितैर्ज्ञानयोगेन इज्यत इत्यर्थः ॥४३॥

ज्ञानयोगस्वरूपमाह—'ह्रस्वदीर्घे'ति द्वाभ्याम् ॥४४॥

सर्वं विष्णुरेव, न तु ततो व्यतिरिक्तमस्तीत्यत्र हेतुमाह—'व्यक्ताव्यक्तात्मिके'ति ॥४६॥

विष्णोः सर्वोत्कर्षप्रतिपत्त्यर्थं सर्वातिशायिनीमहोरात्रकल्पनामाह—'द्विपरार्द्धे'ति द्वाभ्याम् ॥४७॥

तथा पुरुषे तत्र परमेश्वरे स्थिते सति प्रकृत्यान्च लीनायां स्थितायामित्यर्थः ॥४८॥

एतच्च न वास्तवमित्याह—'नैवे'ति। उपचारः सर्वोत्कर्षप्रतिपत्तये क्रियते इत्यर्थः ॥४८॥

(ब) प्रवृत्तं प्रवृत्तिलक्षणं सकाममित्यर्थः, निवृत्तं निवृत्तिलक्षणं निष्काममित्यर्थः। ताभ्यामुभाभ्यां प्रवृत्तनिवृत्ताभ्यां कर्मभ्याम्, सर्वमूर्त्तिः सर्वं निखिलं वस्तु मूर्त्तिः यस्य सः। इज्यते पूज्यते। तथाहि यो यामेव मूर्त्तिमाश्रित्य सकामो वा वा निष्कामो वा पूजादिकं करोतु, तेन पूजादिना तस्य विष्णोः प्रीतिर्भवति, तस्य सर्वमूर्त्तिमयत्वादिति भावः

(भ) प्रवृत्तैरविरक्तैरिति श्रीधरः।—अविरक्तैः वैराग्यशून्यैः सकामैरिति यावत्। मार्गैः उपायैः। असौ पुरुषोत्तमो विष्णुः इज्यते पूज्यते।

(म) अथ यदा सकामकर्मानुष्ठानेन पुरुषाणां चित्तं विशुद्धं भवति, तदा ते निष्कामे वर्त्मनि समवतिष्ठमाना विष्णुमाराध्य मुक्तिं लभन्त इति प्रतिपादयितुमाह—'ज्ञानात्मे'त्यादि। निवृत्तिलक्षणे निष्काम इति यावत्, मार्गे स्थितैरिति शेषः। योगिभिः ज्ञानयोगमास्थितैः पुरुषैः मुक्तिफलप्रदः स विष्णुः इज्यते तस्य पुरुषोत्तमस्य तेन निष्कामज्ञानयोगमार्गेणाराधनया मुक्तिरूपं फलं तेन दत्तं विन्दन्तीति भावः।

निवृत्तैर्योगिभिर्मार्गैरिति पाठे निवृत्तैः निवृत्तिलक्षणैर्मार्गैरुपलक्षितैः योगिभिः, अथवा निवृत्तैः मार्गैरिति करणे तृतीया। अथवा निवृत्तैः निष्कामैः योगिभिः मार्गैः योग्यैरुपायैः इज्यत इत्यर्थः।

(य) व्यक्ताव्यक्तात्मिका व्यक्ताव्यक्तनिखिलवस्त्वात्मकः। कार्य्यकारणयोरभेदात् अव्यक्तस्यापि व्यक्तरूपत्वं न विरुद्धम्। अव्याहतः अविनश्वरः आत्मा यस्य तथाभूते तस्मिन् विष्णौ।

(र) ईशस्य परमैश्वर्य्यशालिनः विष्णोः तत् अहः दिवसः। तदित्यत्र विधेयप्रधान्यात् क्लीवत्वम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नैवाहस्तस्य न निशा नित्यस्य परमात्मनः ।
उपचारस्तथाप्येष तस्येशस्य द्विजोच्यते ॥४९॥

इत्येष तव मैत्रेय ! कथितः प्राकृतो लयः ।
आत्यन्तिकमितो ब्रह्मन्निबोध प्रतिसञ्चरम् ॥५०

इति श्रीविष्णुपुराणे षष्ठांशे चतुर्थः अध्यायः ॥

प्राकृतं लयमुपसंहरन् आत्यन्तिक-लयमुपक्षिपति-'इती'ति ॥४९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा विष्णुपुराणटीकायां षष्ठांशे चतुर्थोऽध्यायः ।

पञ्चमः अध्यायः

[आध्यात्मिकादित्रिविधतापवर्णनम्, भगवान् वासुदेवश्चेति शब्दद्वयस्य व्याख्या, भगवत. पारमार्थिकस्वरूपवर्णनञ्च ।]

पराशर उवाच ।

आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्(क) ॥१॥

आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः(ख) ॥२॥

शिरोरोग-प्रतिश्याय-ज्वरशूल-भगन्दरैः ।
गुल्मार्शः-श्वयथु-श्वास-च्छर्द्यादिभिरनेकधा ॥३

पञ्चमः अध्यायः

आत्यन्तिको लयो नाम सर्वात्मना अज्ञानतत्कार्यनाशात्मको मोक्षः । तच्चाध्यात्मिकादितापत्रयं दुःसहमिति ज्ञात्वा बुद्ध्वा विवेकी उत्पन्नवैराग्यः सन् गुरूपदेशादिनोत्पन्नज्ञानः प्राप्नोति ॥१॥

(क) आध्यात्मिकादीत्यादिपदेन आधिभौतिकाधिदैविकपरिग्रहः । तापत्रयं दुःखत्रयम् । उत्पन्ने ज्ञानवैराग्ये यस्य, आदौ सर्वं सुखादिकमाधिभौतिकाधिदैविकाध्यात्मिकदुःखानुविद्धं ज्ञात्वा तत्र वैराग्यं लभते, तदपहानहेतुं जिज्ञासमानश्च गुरुमुपसर्पति, तदुपदेशाच्च तद्धानहेतुं तत्त्वज्ञानमासादयति, अनन्तरञ्च मोक्षं प्राप्नोति । तमेव क्रमं सूचयितुमाह श्रीधरः-तच्च आध्यात्मिकादितापत्रयं दुःसहमिति ज्ञात्वा बुद्ध्वा विवेकी उत्पन्नवैराग्यः सन् गुरूपदेशादिनोत्पन्नज्ञानः प्राप्नोती'ति । तथा क्रमविचारे वैराग्यस्य पूर्ववर्त्तित्वेऽपि 'अल्पस्वरतरं तत्र पूर्व' मित्यनुशासनाद् द्वन्द्वसमासे वैराग्यशब्दापेक्षया ज्ञानशब्दस्याल्पस्वरत्वात् पूर्वनिपात इत्यनुध्येयम् । लयमिति तस्य तापत्रयस्येत्यर्थः, लयो ध्वंसः, आत्यन्तिकदुःखध्वंसरूपं मोक्षमिति प्रकृते निर्गलितार्थः, आत्यन्तिकत्वञ्च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम् । तादृशतापत्रयस्यात्यन्तिकध्वंसस्य मोक्षरूपतामाह कपिलो यथा—'त्रिविध दुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ' इति सांख्यसूत्रे ।

(ख) शारीरो मानसस्तथेति—आत्मानं शरीरमधिकृत्य प्रवर्त्तते यदिति व्युत्पत्त्या शरीरार्थकात्मशब्दमुपादाय शारीर इति भेदः, आत्मानं बुद्धिसाधनं मनः अधिकृत्य प्रवर्त्तते यदिति व्युत्पत्त्या मानसार्थकेनात्मशब्देन मानस इति भेदः । तथा च नानार्थकोषः,—'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चे'ति । वर्ष्म शरीरम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथाक्षिरोगातीसार-कुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥४॥

काम-क्रोध-भय-द्वेष-लोभ-मोह-विषादजः ।
शोका-सूया-वमाने-र्ष्या-मात्सर्य्यादिभवस्तथा ॥५॥

मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥६॥

मृग-पक्षि-मनुष्याद्यैः पिशाचोरग-राक्षसैः ।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः (ग) ॥७॥

शीतो-ष्ण-वात-वर्षाम्बु-वैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥८॥

गर्भ-जन्म-जराज्ञान-मृत्यु-नारकजं तथा ।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ॥९॥

सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते ।
उल्वसंवेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः (घ) ॥१०॥

अत्यन्तकटु-तीक्ष्णोष्ण-लवणैर्मातृभोजनैः ।
अत्यन्ततापैरत्यर्थं वर्द्धमानातिवेदनः ॥१२॥

प्रसारणाकुञ्चनादेर्नाज्ञानां प्रभुरात्मनः ।
शकृन्मूत्रमहापङ्कशायी सर्वत्र पीड़ितः

निरुच्छ्वासः सचैतन्यः स्मरन् जन्मशतान्यथ ।
आस्ते गर्भेऽतिदुःखेन निजकर्म्मनिबन्धनः (ङ) ॥१३॥

जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ॥१४॥

आत्मानं कार्यकारणसंघातं निमित्तमधिकृत्य भवतीत्याध्यात्मिकः, तं प्रपञ्चयति-'आध्यात्मिक' इति पञ्चभिः ॥२

प्रतिश्यायः पीनसः । श्वयथुः शोथः । अङ्गामयो वातजलोदरादिः ॥३।४॥

द्वेषोऽप्रीतिः, मोहो वैचित्यं, विषादः सत्त्वहानिः, शोकोऽनुशोचम् । असूया गुणेषु दोषारोपः, ईर्ष्या क्षमाराहित्यं, मात्सर्यं परोत्कर्षासहिष्णुता ॥५।६॥

भूतानि निमित्तत्वेनाधिकृत्य भवतीत्याधिभौतिकः । तमाह-मृगेति मृगादिभिर्यो जन्यते स आधिभौतिकः ॥७॥

केवलं दैवमेवाधिकृत्य भवतीत्याधिदैविकः । तमाह,—शीतोष्णवातेति ॥८॥

एतदेव तापत्रयं गर्भाद्यवस्थाभेदेन सहस्रशः प्रपञ्चयति गर्भेत्यादिना इति संसारतापार्केत्यतः प्राक्तनेन ग्रन्थेन ॥९॥

तत्र गर्भदुःखमाह,—सुकुमारेति चतुर्भिः उल्वं गर्भवेष्टनजालम् । भुग्नं वक्रीभूतं पृष्ठादि यस्य सः ॥१०॥

मात्रा भुक्तैरतिविदादिभिः अत्यन्तमम्लादिभिर्वर्द्धमानातिवेदना यस्य सः ॥११॥

आत्मनो गात्राणां प्रसारणादावसमर्थः ॥१३।१३॥

जन्मदुःखमाह,—जायमान इति द्वाभ्यां पुरीषादिभिराविलं क्लिन्नमाननं यस्य सः । प्राजापत्येन प्रजापतिनियुक्तेन गर्भसंकोचकेन । तस्मादुपायात् स गर्भः करणीयांसं तं योनिं न हिनस्ति ब्रह्मणा हि क्लृप्त इति श्रुतेः ॥१४॥

(ग) आधिभौतिक इति भूतानि प्राणिनः अधिकृत्य प्रवृत्त इत्यर्थः, मृगपक्षिप्रभृति प्राणिप्रभव इति यावत् ।

(घ) सुकुमारतनुः सुकोमलकलेवरः, तेन स्वल्पमात्रकर्दनादिवस्तुसम्पर्कादेव तस्य दुःखसम्भावना । जन्तुर्जीवः, बहुमलावृते प्रभूतक्लेदादिसमाच्छन्ने, मुज्यन्ते यानि तानि भोजनानि तैः । शकृत् पुरीषं, मूत्रं प्रस्रावः, ते एव महापङ्कः तत्र शेते यः सः, 'मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत् । गूथं पुरीषं वर्च्चस्कमस्त्री विष्ठाविषौ स्त्रिया'मिति कोषात् ।

(ङ) निरुच्छ्वासः स्वतन्त्रश्वासशून्यः, जन्मशतानि अतीतानि बहुजन्मानि निजकर्माणि पूर्वपूर्वजन्मसु स्वेनानुष्ठितानि कर्माणि निबन्धनानि कारणानि यस्य तथाभूतः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ।
कृच्छ्रैर्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ॥१५॥

मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना ।
विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम(च) ॥१६॥

कङ्कटैरिव तुन्नाङ्गः क्रकचैरिव दारितः (छ) ।
पूतिव्रणान्निपतितो धरण्यां कृमिको यथा ॥१७॥

कण्डूयने चाप्यशक्तः परिवर्त्तेऽप्यनीश्वरः ।
क्षुत्पानादिकाहारमवाप्नोति परेच्छया ॥१८॥

अशुचिः प्रस्तरे सुप्तः कीटदंशादिभिस्तथा ।
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ॥१९॥

जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि वै ।
बालभावे यदाप्नोति आधिभौतादिकानि च(ज) ॥२०

अज्ञानतमसाच्छन्नो मूढ़ान्तःकरणो नरः ।
न जानाति कुतः कोऽहं क्वाहं गन्ता किमात्मकः ॥२१॥

केन बन्धेन बद्धोऽहं कारणं किमकारणम् ।
किं कार्य्यं किमकार्य्यं वा किं वाच्यं किन्न वोच्यते ॥२२॥

कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वर्त्तेत वा कथम् ।
किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत्(झ) ॥२३

एवं पशुसमैर्मूढ़ैरज्ञानप्रभवं महत् ।
अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः(ञ) ॥२४॥

अज्ञानं तामसो भावः कार्य्यारम्भाः प्रवृत्तयः ।
अज्ञानिनां प्रवर्त्तन्ते कर्म्मलोपास्ततो द्विज ॥२५॥

नरकं कर्म्मणां लोपात् फलमाहुर्महर्षयः ।
तस्मादज्ञानिनां दुःखमिह चामुत्र चोत्तमम्(ट) ॥२६॥

सूतिमारुतैः प्रसूत्यर्थं गर्भप्रेरकैर्वायुभिः ॥१५॥

जन्मानन्तरं दुःखान्याह,—'मूर्च्छा'मिति चतुर्भिः ॥१६॥

तुन्नाङ्गौ व्यथितगात्रः, क्रकचैः विदारणयन्त्रैः, पूतिव्रणात् दुर्गन्धिव्रणतुल्याद्योनेः ॥१७॥

बाल्यदुःखान्याह-'कण्डूयने' इत्यादित्रिभिः ॥१८।२०

यौवनदुःखान्याह—'अज्ञाने'ति षड्भिः। अज्ञानमिह कामलोभाद्यभिनिवेशः तेन तमसाच्छन्नः अन्धीभूतः ॥२१॥

कार्याकार्ये लौकिके ॥२२॥

कर्त्तव्याकर्त्तव्ये वैदिके ॥२३।२४॥

किञ्च अज्ञानं तमसो भावः अतोऽज्ञानिनां विहितेष्वपि कार्यारम्भेष्वप्रवृत्तयः स्युः। ततः कर्मलोपाः प्रवर्त्तन्ते ॥२५॥

ततो नरकप्राप्तिरिति उत्तमम् अत्यधिकं दुःखम् ॥२६॥

(च) विज्ञानभ्रंशं गर्भवासदशायां तस्य यथा व्यतीतजन्मान्तरस्मरणादि रूपं विज्ञानमासीत् तस्माद् विच्युतिम्।

(छ) तुन्नेति व्यथनार्थस्य तुदतेर्धातोः रूपम्, तुन्नानि व्यथितानि अङ्गानि गात्राणि यस्य सः।

(ज) आधिभौतेत्यधिभूतशब्दात् ष्णप्रत्ययेन सिद्धम्।

(झ) कस्मिन् कर्मणि वर्त्तेत, धर्माधर्म्मयोरुक्तयोः कतरस्मिन् वा वर्त्तेत, कुत्र वर्त्तनमिष्टसाधकमित्यर्थः। कथं वा केन प्रकारेण वा वर्त्तेत ? किं गुणदोषवत् किं गुणवत् प्रशस्तं किंवा दोषवत् अप्रशस्तमनिष्टकरमित्यर्थः।

(ञ) प्रभवत्यस्मादिति प्रभवः, अज्ञानं मोहः प्रभवः उत्पत्तिस्थानं यस्य तत् शिश्नोदरपरायणैः कामवृत्त्यादिव्यापृतैः।

(ट) नरकं कर्मणां लोपादिति कर्मणां नित्यनैमित्तिकादि कर्मणां लोपात् अकरणादित्यर्थः, नित्याना कर्मणामकरणस्य साक्षादेव प्रत्यवायजनकत्वात् साक्षादेव नरकजनकत्वम्, काम्यादीनाञ्च चित्तशुद्धिकानामकरणाच्चित्तशुद्धयभावेन असत्कर्मप्रवृत्तिप्रयोजकत्वात् परम्परया तदकरणस्य नरकसाधनत्वमनुसन्धेयम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जराजर्जरदेहश्च शिथिलावयवः क्रमात् ।
विगलच्छीर्णदशनो बली स्नायुशिरावृतः(ठ) ॥२७॥

दूरप्रनष्टनयनो व्योमान्तर्गततारकः ।
नासाविवरनिर्यात-लोमपुञ्जश्चलद्वपुः ॥२८॥

प्रकटीकृतसर्वास्थिर्नतपृष्ठास्थिसंहतिः ।
उत्सन्नजठराग्नित्वादल्पाहारोऽल्पचेष्टितः ॥२९॥

कृच्छ्रचङ्क्रमणोत्थान-शयनासनचेष्टितः ।
मन्दीभवच्छ्रोत्रनेत्रः स्रवल्लालाविलाननः ॥३०॥

अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः ।
तत्क्षणेऽप्यनुभूतानामस्मर्त्ताखिलवस्तुनाम् (ड) ॥३१॥

सकृदुच्चारिते वाक्ये समुद्भूतमहाश्रमः ।
श्वास-कासससमुद्भूतमहायासप्रजागरः ॥३२॥

अन्येनोत्थाप्यतेऽन्येन तथा संवेश्यते जरी ।
भृत्यात्मपुत्रदाराणामवमानास्पदीकृतः(ढ) ॥३३॥

प्रक्षीणाखिलशौचश्च विहाराहारसस्पृहः ।
हास्यः परिजनस्यापि निर्व्विण्णाशेषबान्धवः(ण) ॥३४॥

स्थाविरदुःखान्याह—'जराजर्जरे'ति दशभिः । बली लम्बमाना त्वक्, शिरा रक्तवहा नाड़ी सैवास्थिबन्धनी स्नायुः । दूरे दूरस्थेऽर्थे नष्टं नयनं ग्रहणासमर्थं चक्षुर्यस्य सः । व्योम्नि चक्षुर्गोलकाकाशेऽन्तर्गते निमग्ने तारके कनीनिके यस्य सः ॥२८।३०॥

अनायत्तैरस्वाधीनैः करणैरिन्द्रियैः ॥३१-३४॥

(ठ) विगलन्तः शीर्णा दशना यस्य सः, अथवा विगलन्तः केचित् अविगन्तोऽपि शीर्णाः क्षीणावयवाः केचित् दशना यस्य सः । नासाविवरात् नासिकारन्ध्रात् निर्यातः निर्गतः लोमपुञ्जः रोमसमूहो यस्य सः, चलत् चञ्चलं स्पन्दमानमिति यावत् वायुप्रकोपात् दौर्बल्यातिशयाद्वा वपुः शरीरं यस्य सः । प्रकटीकृतातिक्षीणमांसत्वात् बहिर्दृश्यतां नीतानि सर्वाणि अस्थीनि यस्य सः, नता पृष्ठस्य अस्थिसंहति अस्थिसमूहः यस्य सः, वक्रीभूत पृष्ठास्थिसमूह इत्यर्थः । उत्सन्नः मन्दतां प्राप्तः जठराग्नि कौष्ठ्यः पाचको वह्निर्यस्य सः, अल्पः स्वल्पमात्र आहारः यस्य सः, अग्निमान्द्येन भुक्तवस्तूनां निःशेषजीर्णयाभावात् क्षुधामान्द्यादिदोषातिभावः । अल्पानि स्वल्पमात्राणि चेष्टितानि क्रिया यस्य सः दौर्बल्यादिदोषादधिककार्य्यकरणासमर्थ इत्यर्थः । कृच्छ्रेण कष्टेन यत् चंक्रमणं परिक्रमणं उत्थानं शयनं आसनं च तानि चेष्टितानि यस्य सः । सर्वेषु चंक्रमणादिषु निरुक्तचेष्टितेषु महता क्लेशेन प्रवृत्त इत्यर्थः । मन्दीभवति स्वल्पशक्तिकतापवगाहमाने श्रोत्रनेत्रे श्रवणचक्षुषी यस्य सः स्रवन्त्या गलन्त्या लालया आविलं कलुषितं आननं यस्य सः ।

(ड) अखिलवस्तूनामिति वक्तव्ये वस्तुनामिति दीर्घाभावेन वचनमार्षम् । अस्मर्त्तेति स्मृतिशक्तिमान्वथादिति भावः ।

(ढ) श्वावकासेन यो महान् आयासः कष्टं तेन समुद्भूतः प्रजागरः निद्राविररूपमतिजागरणं यस्य सः । अन्येन जनेन उत्थाप्यते स्वयमुत्थातुमसामर्थ्यात् अन्तेन संवेश्यते शयनं नीयते स्वयं शयितुमशक्तत्वात् । शयनोत्थानयोरपि सुतरां पराधीन इति भावः । जरी जरावान् वार्द्धक्यमापन्न इति यावत् भृत्याः तथा आत्मनः पुत्राः दारा भार्य्याश्च तेषामपि अवमानः अवज्ञा तदास्पदीकृतः तद्गोचरी कृतः जरयेति शेषः । च्विप्रत्ययेन पूर्वं य एव तेषामवमानानास्पदं क्रियते इति सूच्यते ।

(ण) प्रक्षीणानि सातिशयं विलुप्तानि अखिलानि शौचानि बाह्यानि यथानियमं स्नानाद्यभावाद् आभ्यन्तराणि च वैधचमनाद्यभावाद् यस्य तथाभूतः । विहाराहारयोः सस्पृहः स्पृहायुक्तः विहारस्पृहायां सत्यामपि करणशैथिल्यादिदोषादनधिकामफलः भोजनेच्छायां सत्यामपि अग्निमान्द्यादिना बहुभोजनासामर्थ्येनातृप्त इत्यर्थः । अथवा वृद्धावस्थायां विहाराहारयोर्नायाः स्वभावतो वर्द्धनात्तथोक्तिः । हास्यः उपहासगोचरः निर्विण्णाः तदीयदुर्गतिदर्शनेन विषादभूपातः अशेषाः बान्धवा यस्य सः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुभूतमिवान्यस्मिन् जन्मन्यात्मविचेष्टितम् ।
स्मरन् यौवने दीर्घं निःश्वसित्यभितापितः ॥३५॥
एवमादीनि दुःखानि जरायामनुभूय वै ।
मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ॥३६॥
श्लथग्रीवाङ्घ्रिहस्तोऽथ व्याप्तो वेपथुना भृशम् ।
मुहुर्ल्लालापरवशो मुहुर्ज्ञानलवान्वितः(ण) ॥३७॥
हिरण्य-धान्य-तनय-भार्य्या-भृत्य-गृहादिषु ।
एते कथं भविष्यन्ति ममेति ममताकुलः(त) ॥३८॥
मर्मभिद्भिर्महारोगैः क्रकचैरिव दारुणैः ।
शरीरखान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥३९
विवर्त्तमानताराक्षि (ग) हस्तपादं मुहुः क्षिपन् ।
संशुष्यमाणताल्वोष्ठकण्ठो घुरघुरायते ॥४०॥
निरुद्धकण्ठो दोषौघैरुदानश्वासपीड़ितः ।
तापेन महता व्याप्तस्तृषा चार्त्तस्तथा क्षुधा(द) ॥४१॥
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीड़ितः ।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते(ध) ॥४२॥
एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम् ।
शृणुष्व नरके यानि प्राप्यन्ते पुरुषैर्मृतैः ॥४३॥
याम्यकिङ्करपाशादिग्रहणं दण्डताड़नम् ।
यमस्य दर्शनञ्चोग्रमुग्रमार्गविलोकनम्(न) ॥४४॥
करम्भवालुका-वह्नि-यन्त्र-शस्त्रादिभीषणे ।
प्रत्येकं नरके याश्च यातना द्विज ! दुःसहाः ॥४५॥
क्रकचैः पीड्यमानानामूषायाञ्चापि धम्यताम् ।
कुठारैः कृत्यमानानां भूमौ चापि निखन्यताम् ॥४६

यौवने यदात्मनो विविधं चेष्टितं तदन्यजन्मानुभूतमिव स्मरन् दीर्घं श्वासं मुञ्चति ॥३५।३६॥

(ग) श्लथाः शिथिलाः ग्रीवा अङ्घ्रिः पादः हस्तश्च यस्य सः, ज्ञानशून्यता, ज्ञानलवेन स्वल्पमात्रज्ञानेन अन्वितः ।

(ङ) एते हिरण्यादयः, कथं मम मत्स्वामिका भविष्यन्ति, इत्येवं ममताकुलः ममकारेण व्याकुलः । अथवा अतः परं ममाभावदशायामेते मम हिरण्यादयः कथं भविष्यन्ति केन प्रकारेण वर्त्तिष्यन्ते इत्यर्थः, इति ममताकुलः । मर्मभिद्भिः मर्मस्थान भेदिभिः, महारोगैः गुरुतररोगैः विषूचितादिभिः छिद्यमानानि शैथिल्यमानानि अस्थिग्रन्थयः यस्य सः ।

(च) विवर्त्तमाना घूर्णमाना कनीनिका यस्य तथाभूतम् अक्षि चक्षुः हस्तः पादश्च तेषां समाहारः विवर्त्तमानताराक्षिहस्तपादं, यथा तथाभूतम् अक्षि समन्ततः पातयत् हस्तपादञ्च उत्क्षिपन् वातादिदोषादिति भावः । अथवा विवर्त्तमानतारे अक्षिणी यत्र तद् यथा स्यात् तथा हस्तपादं क्षिपन् इत्यर्थः । संशुष्यमाणाः शोषं व्रजन्त्यः तालु ओष्ठः कण्ठश्च यस्य सः ।

मरणदुःखान्याह—'श्लथग्रीवे'ति सार्द्धैः षड्भिः । वेपथुना कम्पेन ॥३७।३८॥

दोषौघैः श्लेष्मादिसंघैर्निरुद्धकण्ठैः घुरु घुरु इत्येवं शब्दं करोति ॥४०।४१॥

यातनार्थमन्यं देहम् ॥४२॥

नरकदुःखान्याह,—'शृणुष्वे'ति सार्धैः षड्भिः ॥४३॥

याम्यकिंकरैः पाशादिग्रहणम् ॥४४॥

करम्भबालुकाः तप्तबालुकाः ॥४५॥

धम्यतां खन्यतामित्यादि कर्मणि परस्मैपदमार्षम् । कृत्यमानानां छिद्यमानानाम् ॥४६॥

(द) उदानश्वासेन ऊर्द्ध्वगामिना श्वासमरुता पीड़ितः ।

(ध) याम्यकिङ्करैः यमदूतैः पीड़ितः सन् बलेशात् अतिकष्टेन उत्क्रान्ति प्राणानाम् उत्क्रमणं देहं परित्यज्य गमनम् आप्नोति, प्राणैर्विमुच्यत इत्यर्थः ।

(न) याम्यकिङ्करैः यमदूतैः पाशादिना ग्रहणम् दण्डेन ताड़नं तैरेवेति शेषः । उग्रं भयङ्करं यमस्य दर्शनम् । उग्रस्य भयङ्करस्य मार्गस्य यमपुरगामनोपयुक्तस्य पथः विलोकनम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यताम् ।
गृध्रैः सम्भक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम् ॥४७
क्वाथ्यतां तैलमध्ये च क्लिश्यतां क्षारकर्दमैः ।
उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयन्त्रकैः ॥४८॥
नरके यानि दुःखानि पापहेतूद्भवानि वै ।
प्राप्यन्ते नारकैर्विप्र ! तेषां संख्या न विद्यते (प)॥४९
न केवलं द्विजश्रेष्ठ नरके दुःखपद्धतिः ।
स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः(फ)॥५०
पुनश्च गर्भे भवति जायते च पुनः पुनः ।
गर्भे विलीयते भूयो जायमानोऽस्तमेति च ॥५१॥
म्रियते जातमात्रश्च बालभावेऽथ यौवने ।
मध्यमं वा वयः प्राप्य वार्द्धके वा ध्रुवा मृतिः ॥५२॥
यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः ।
तन्तुकारणपक्ष्मौघैरास्ते कार्पासबीजवत् ॥५३॥
द्रव्यनाशे तथोत्पत्तौ पालने च तथा नृणाम् ।
भवन्त्यनेकदुःखानि तथैवेष्टविपत्तिषु(ब) ॥५४॥
यद् यत् प्रीतिकरं पुंसां वस्तु मैत्रेय ! जायते ।
तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति(भ) ॥५५॥
कलत्र-पुत्र-भृत्यादि-गृह-क्षेत्र-धनादिकैः ।
क्रियते न तथा भूरि सुखं पुंसां यथाऽसुखम् ॥५६॥
इति संसारदुःखार्क-तापतापितचेतसाम् ।
विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम्(म) ॥५७॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः(य) ॥५८॥

द्वीपिभिर्व्याघ्रैः ॥४७।४८॥

पापमेव हेतुः कारणं तदुद्भवानि ॥४९॥

स्वर्गेऽपि दुःखमेवेत्याह — 'न केवल'मिति । स्वर्गेऽपि निर्वृत्तिर्नास्ति, दुःखपद्धतिरेवास्तीत्यर्थः ॥५०॥

स्वर्गनरकभोगानन्तरं पुनर्गर्भादिदुःखमाह—'पुनश्चे'ति षड्भिः ॥५१।५२॥

दुःखैः प्लुतो व्याप्त आस्ते, तन्तूनां कारणं पक्ष्माणि कार्पासांशवस्तेषामोघैः समूहैः कार्पासबीजं यथा व्याप्तं तद्वत् ॥५३॥

उत्पत्तौ द्रव्यस्यार्जने ॥५४।५५॥

कलत्रादिकैर्यथा असुखं भूरि क्रियते, न तथा सुखं क्रियते ॥५६॥

एवं दुःखानुसन्धानेन लब्धविवेकवैराग्यस्य पुंसो मुमुक्षैव युक्तेत्याशयेनाह—'इती'ति त्रिभिः ॥५७॥

गर्भादिस्थानेषु प्रकर्षेण भविष्यतो दुःखजातस्य भगवत्प्राप्तिरेव भैषज्यं मता सम्मतेत्यन्वयः ॥५८॥

(प) पापमेव हेतुः तस्मादुद्भवो येषां तानि । नारकैः नरकगतैः पुरुषैः ।

(फ) पातभीतस्य स्वर्गादपि भोगेन स्वर्गनिमित्तभूतशुभादृष्टक्षयेण ततः पतनाद् भयं गतस्य जीवस्येत्यर्थः । तदुक्तम्—'क्षीणे पुन्ये मर्त्यलोकं विशन्ती'ति ।

(ब) द्रव्यस्य धनस्य जीवनोपकरणभूतवस्तुनो वा नाशे तथा उत्पत्तौ तस्य द्रव्यस्यैवेति शेषः । पालने च तेषां रक्षणे । तथैव इष्टस्य अभिलषितानां बान्धवादीनां विपत्तिषु मरणादिविपत्पातेषु अनेकानि दुःखानि भवन्तीत्यन्वयः ।

(भ) प्रीतिकरं सुखकरं तस्य तस्य सत्त्वदशायामिति शेषः । तदेव वस्तु दुःखरूपस्य वृक्षस्य बीजत्वं बीजवत् कारणीभावम् उपगच्छति तस्यासत्त्वदशायामिति शेषः ।

(म) इति उक्तरूपाणि यानि दुःखानि तान्येव अर्कतापः सूर्यतापः तेन तापितं चेतः अन्तःकरणं येषां तेषां विमुक्तिपादपच्छायां मोक्षरूपवृक्षच्छायाम् ऋते विना कुत्र सुखं शान्तिः ? अपि तु न कुत्रापीति भावः ।

(य) त्रिविधस्य पूर्वोक्तस्य आध्यात्मिकाधिभौतिकाधिदैविकरूपभेदत्रयभिन्नस्य दुःखजातस्य दुःखसमूहस्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरस्तातिशयाह्लादसुखभावैकलक्षणा ।
भैषज्यं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥५९॥
तस्मात् तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म्म चोक्तं महामुने(र) ॥६०॥
आगमोत्थं विवेकोत्थं द्विधा ज्ञानं तथोच्यते
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥६१॥
अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्य्यस्तथा ज्ञानं यद् विप्रर्षे ! विवेकजम् ॥६२॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम !
तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम ॥६३॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥६४॥
द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः ।
परया त्वक्षरप्राप्तिर्ऋग्वेदादिमयापरा ॥६५॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥६६॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्यव्याप्तं यतः सर्व्वं तद् वै पश्यन्ति सूरयः ॥६७

कथम्भूता भगवत्प्राप्तिस्तदाह—निरस्तातिशय आह्लादो निर्वृतिः यस्मिन् सुखे तद्भावस्तदात्मत्वमेवैकलक्षणं यस्याः सा तथा। किञ्च एकान्ता भगवन्निष्ठामात्रेणावश्यम्भाविनी न तु ऋत्विगादिवैगुण्येन कर्मफलवदनैकान्तिकी अनित्या ॥५९

यत्नस्य साधनविषयत्वात् साधनमाह—'तत्प्राप्ती'ति। कर्म सत्त्वशुद्धिद्वारा ज्ञानं साक्षात् ॥६०॥

तत्र ज्ञानं द्विविधमित्याह—'आगमे'ति। तद्विवृणोति—'शब्दब्रह्मे'ति। आगममयम् आगमोत्थं ज्ञानं शब्दब्रह्मशब्दात्, 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिवाक्याज् जायमानं ब्रह्मश्रवणजं ज्ञानमागमोत्थमित्यर्थः। देहादिविविक्ताकारचित्तवृत्तौ निदिध्यासनाख्यायां प्रकाशमानं परब्रह्म विवेकजं ज्ञानमित्यर्थः। वृत्तिव्यङ्ग्यस्य ब्रह्मण एव ज्ञानाभिधेयत्वाद् ब्रह्मैव ज्ञानमित्युक्तम् ॥६१॥

ननु शब्दश्रवणादपि ब्रह्मज्ञानमेवोत्पद्यते, तेनैवाज्ञानं निवर्त्त्य भगवत्प्राप्तिसिद्धेः किं विवेकजज्ञानेनेत्याशंक्याह—'अन्ध'-मिति निविड़तम इवाज्ञानम्। व्यापकमावरणम् इन्द्रियैः शब्दादिद्वारा जातं ज्ञानं दीपवत् न सर्वात्मना अज्ञाननिवर्त्तकं विवेकजन्तु ज्ञानं सूर्यवत् सर्वाज्ञाननिवर्त्तकमित्यर्थः ॥६२

उक्तलक्षणे ज्ञानद्वैधे मनुसम्मतिमाह, अत्र सबन्धे अस्मिन् प्रसंगे ॥६३॥

शब्दब्रह्मणि श्रवणेन निष्णातो विवेकजेन परं ब्रह्म प्राप्नोति ॥६४॥

तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तमित्येतत्परश्रुतिसम्मतिमाह—'द्वे विद्ये' इति। विद्याशब्देन तद्धेतुकर्मब्रह्मविषयौ वेदभागौ गृह्येते तदाह—'परये'ति। अक्षरप्रतिपादकपराख्यवेदभागादितरः कर्मभाग ऋग्वेदादिशब्देनोच्यते। ब्राह्मणपरिव्राजकादिवत्; सा त्वपरा साधनगोचरत्वात् ॥६५॥

अथ पराख्यया यदाक्षरमधिगम्यते तत्तदृश्यमग्राह्यमित्यथर्वश्रुत्युक्तं परविद्याविषयम् अक्षराख्यं तत्त्वमाह—'यत्त'दिति त्रिभिः ॥६६

(र) तस्य भगवत्प्राप्तिरूपभैषज्यस्य प्राप्तये लाभाय। ज्ञानं तत्त्वज्ञानं कर्म च निवृत्ताख्यं निष्कामं कर्म च तत्प्राप्तिहेतुः भगवत्प्राप्तिरूपमोक्षसाधनम् उक्तम् शास्त्रकारैरिति शेषः तथोक्तं योगवाशिष्ठे—'उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां जायते परमं पदम्।' इति। अनेनात्र ज्ञानकर्मसमुच्चयवादः शंसितः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद् ब्रह्म परमं धाम तद् ध्येयं मोक्षकाङ्क्षिभिः ।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ॥६८॥

तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः(ल) ॥६९॥

एवं निगदितार्थस्य तत्तत्त्वं तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमन्यत् त्रयीमयम् ॥७०॥

अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज !
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ॥७१॥

शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते ।
मैत्रेय ! भगवच्छब्दः सर्व्वकारणकारणे(व) ॥७२॥

सम्भर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥७३॥

ऐश्वर्य्यस्य समग्रस्य धर्म्मस्य यशसः श्रियः ।
ज्ञान-वैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥७४॥

वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि ।
सर्व्वभूतेष्वशेषेषु वकारार्थस्ततोऽन्ययः ॥७५॥

एवमेष महाशब्दो भगवानिति सत्तम !
परमब्रह्मभूतस्य वासुदेवस्य नान्यतः ॥७६॥

विभुं प्रभुं, सर्वगतमपरिच्छिन्नं, व्यापि सर्वकार्यानुगतम्, स्वयन्त्वन्येनाव्याप्तं, यतः सर्वं भवति ॥६७।६८॥

तत् परं ब्रह्मैव स्वेच्छया आविष्कृतषाड्गुण्यम् परमेश्वराख्यं भगवच्छब्दवाच्यं द्वादशाक्षरादिपरविद्योपासनया भक्तैः सुलभदर्शनमित्याह ॥६९॥

ईदृग्विषयञ्च ज्ञानं परविद्येत्याह—'एवमि'ति । निगदितार्थस्य द्वादशाक्षरादिभिरुक्तार्थस्य सतत्त्वं स्वरूपं तत्त्वतः अप्रच्युतब्रह्मस्वरूपेण येन द्वादशाक्षरादिना ज्ञायते तत् परं ज्ञानं परविद्या, त्रयीमयन्तु यत् अपरविद्या कर्माख्या ॥७०॥

ननु यदीश्वरो ब्रह्मैव, कथं तर्हि तस्यानिर्देश्यस्य भगवच्छब्दवाच्यत्वमित्याशङ्क्याह — 'अशब्दे'ति । पूजायां निमित्तभूतायाम् आविष्कृतषाड्गुण्येन भगवच्छब्दः प्रयुज्यते तत्रापि गुणानां स्वरूपाभिपन्नत्वात् उपचारात् मत्वर्थीय प्रयुज्यते तद्भेदविवक्षायाम् ॥७१॥

इत्थम्भूते मुख्य एव भगवच्छब्दो वर्त्तते इत्याह,—शुद्धे इति । शुद्धे असङ्गे महाविभूत्याख्ये अचिन्त्यैश्वर्ये ॥७२॥

अक्षरार्थनिरुक्त्या भगवच्छब्दस्य परमेश्वरवाचकत्वमाह,—सम्भर्त्ता, पोषकः भर्त्ता आधार इत्यर्थद्वयेनान्वितः । नेता कर्मज्ञानफलप्रापकः । गमयिता प्रलये कार्याणां कारणम् । प्रतिस्रष्टा पुनरपि तेषाम् उद्गमयिता सर्गकर्त्ता इति गकारार्थः ॥७३॥

अक्षरार्थनिरुक्त्या इदानीम् अक्षरद्वयात्मकस्य पदस्यार्थमाह,—ऐश्वर्यस्येति इङ्गना संज्ञा ईत्यर्थः ॥७४॥

वकारार्थमाह,—'वसन्ती'ति । यत्राधिष्ठान भूते भूतानि वसन्ति स च भूतेषु वसतीति वकारार्थः ॥७५॥

एवमेष शब्दे वासुदेवस्य वाचकः, नान्यस्येत्यर्थः । भश्चादौ गश्च वश्च भगवानित्यक्षरसाम्यात् निरुक्तिः । षाड्गुण्यं भग इति पक्षे तद्वान् भगवानित्यनुगम एव ॥७६॥

(ल) तदेव भगवद्वाच्यमित्यादि,—अत्र तत् परं ब्रह्मैव स्वेच्छया आविष्कृतषाड्गुण्यं परमेश्वराख्यमिति श्रीधरः । षट् गुणाः यस्य स षड्गुणः तस्य भावः षाड्गुण्यम् आविष्कृतं षाड्गुण्यं येन तत् । षड् गुणाश्च परमेश्वरस्य,—'सर्व्वज्ञता तृप्तिरनादिबोधः, स्वतन्त्रता नित्यमलुप्तशक्तिः । अकुण्ठशक्तिश्च विभोर्विभिज्ञाः षड़ाहुरङ्गानि महेश्वरस्य' । इत्याद्युक्ताः ।

(व) महती निरतिशया विभूतिः ऐश्वर्य्यं यस्य तदाख्ये परब्रह्मणि वाच्ये भगवच्छब्दः वर्त्तते वाच्यतासम्बन्धेनेति शेषः । अथवा परब्रह्मणि वर्त्तते परब्रह्मप्रतिपादकवृत्तिमान् भवति वृत्त्या परब्रह्म प्रतिपादयतीति यावत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्र पूज्यपदार्थोक्ति-परिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः ॥७७॥

उत्पत्तिं प्रलयञ्चैव भूतानामगतिं गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥७८॥

ज्ञान-शक्ति-बलैश्वर्य्य-वीर्य्य-तेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥७९॥

सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः ॥८०॥

खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा ।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः ॥८१॥

भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत् ।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः(श) ॥८२॥

स सर्व्वभूतप्रकृतिं विकारान्
गुणांश्च दोषांश्च मुने ! व्यतीतः ।
अतीतसर्व्वावरणोऽखिलात्मा
तेनास्तृतं यद्भुवनान्तराले ॥८३॥

समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृतभूतवर्गः ।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ(ष) ॥८४॥

तदेवं परमेश्वरे निरतिशयैश्वर्यादियुक्ते मुख्योऽयं शब्दः, अन्यत्र तु गौण इत्याह,—'तत्रे'ति । पूज्यस्य श्रेष्ठस्य यदर्थस्य उक्तौ या परिभाषा संकेतरूपग्रहस्तत्संग्रहः । तत्समन्वितोऽयं शब्दः । अतो नोपचारेण प्रवर्त्तते । अन्यत्र देवादावुपचारेण प्रवर्त्तते ॥७७॥

उपचारे बीजमाह—'उत्पत्ति'मिति ॥७८॥

भगवच्छब्दवाच्यं षाड्गुण्यं प्रकारान्तरेणाह,—'ज्ञाने'ति । हेयैः प्रकृतिगुणैः तत्कार्यैः कर्मभिस्तत्फलैश्च विना ॥७९॥

द्वादशाक्षरान्तर्गतभगवच्छब्दस्यार्थमुक्त्वा वासुदेवशब्दस्यार्थमाह—'सर्वाणी'ति । वसनाद् वासनाच्च वासुः, साधनात् साधुरितिवत् । द्योतनाद् देवः । वासुश्चासौ देवश्चेति वासुदेवः । तदुक्तं मोक्षधर्मे—'वसनाद् देवनाच्चैव वासुदेवस्ततोविदु'रिति ॥८०॥

(श) वसत इत्यत्रात्मनेपदमार्षम् । तानि भूतानि अत्र भगवति वासुदेवे वसन्ति ।

जनकादयोऽपि भगवन्नामालोचननिष्ठयैव ब्रह्मज्ञानं प्राप्ता इति दर्शयन्नाह—'खाण्डिक्ये'ति षड्भिः ॥८१॥

भूतेषु सोऽन्तरिति वासुशब्दो व्याख्यातः । 'धाता विधाते'त्यादिना देवशब्दो दिवेर्धातोः अनेकार्थप्रपञ्चेन व्याख्यात इति ज्ञेयम् ॥८२॥

भुवनान्तराले यदस्ति, तत्सर्वं तेनास्तृतं छन्नं व्याप्तमिति यावत् ॥८३।८४॥

(ष) समस्ताः कल्याणगुणाः यत्र तदात्मकः तत्स्वरूपः, स्वस्य शक्तिलेशेन शक्तेरतिक्षुद्रभागेन लेशमात्रया शक्त्येति यावत्, आवृतः अभिव्याप्तः भूतवर्गः समग्रप्राणिसमाजः समग्राणि सत्तावन्ति वस्तूनि वा येन सः, इच्छया इच्छामात्रेण गृहीतः उरुदेहः सुमहत् शरीरं येन सः, संसाधितानि सम्यक्तया कृतानि जगतां निखिलभुवनानां सर्वजनानां वा हितानि कल्याणानि येन सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेजोबलैश्वर्य्यमहावबोधः
स्ववीर्य्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परापरेशे ॥८५॥

स ईश्वरो व्यष्टिसमष्टिरूपो
व्यक्तस्वरूपोऽप्रकटस्वरूपः ।
सर्व्वेश्वरः सर्व्वगः सर्व्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥८६॥

संज्ञायते येन तदस्तदोषं
शुद्धं परं निर्म्मलमेकरूपम् ।
संदृश्यते वाप्यधिगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥८७॥

इति श्रीविष्णुपुराणे षष्ठांशे पञ्चमः अध्यायः ॥

कल्याणगुणानेवाह—'तेजोबले'ति ॥८६॥

प्रकृतमुपसंहरति—'स' इति। येन ज्ञायते परोक्षवृत्त्या। संदृश्यते साक्षात् क्रियते। अधिगम्यते निःशेषाविद्यानिवृत्त्या प्राप्यते तत् ज्ञानं परा विद्या, अन्यदज्ञानं अविद्यान्तर्वर्त्तिनी अपरा विद्येत्यर्थः ॥८७॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायामात्मप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां षष्ठांशे पञ्चमोऽध्यायः ॥

(स) तेजः आन्तरिकी शक्तिः, बलं शारीरिकी शक्तिः, ऐश्वर्य्यं विभूतिः महान् प्रकृष्टः सर्वदा यथार्थरूपत्वात् सर्वविषयकत्वाच्चेति भावः। तदुत्तरम् अस्त्यर्थे अत्प्रत्ययेन तद्विशिष्ट इत्यर्थः। अथवा उपचारात्तेजःप्रभृतिरूप इत्यर्थः। अथवा तेजोबलैश्वर्य्यैः महस्य उत्सवस्य अवबोधः यत्र सः यः स्वीयेन तेजसा बलेन ऐश्वर्य्येण च सर्वदा उत्सवयुक्त इत्यर्थः। स्ववीर्य्येत्यादिना आर्थिकी पुनरुक्तिरार्षत्वान्न दोषाय। क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च तदादयः तत्प्रमुखा वर्गा यत्र न सन्ति, अथवा क्लेशपदं सामान्यदुःखपरम्, तदादयः अकल्याणगुणाः यत्र न सन्ति परमेश्वरस्य सकलकल्याणगुणमात्राधारत्वादिति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठोऽध्यायः

[केशिध्वज-खाण्डिक्ययोर्विवरणम्]

पराशर उवाच ।

स्वाध्याय-संयमाभ्यां स दृश्यते पुरुषोत्तमः ।
तदाप्तिकारणं ब्रूह्म तदेतदिति चोच्यते ॥१॥
स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमेव च ।
स्वाध्याय-योगसम्पत्त्या परमात्मा प्रकाशते(क) ॥२॥
तदीक्षणाय स्वाध्यायश्चक्षुर्योगस्तथापरम् ॥२॥
न मांसचक्षुषा द्रष्टुं ब्रह्मभूतः स शक्यते(ख) ॥३॥

मैत्रेय उवाच ।

भगवंस्तमहं योगं ज्ञातुमिच्छामि तं वद ।
ज्ञाते यत्राखिलाधारं पश्येयं परमेश्वरम् ॥४॥

पराशर उवाच ।

यथा केशिध्वजः प्राह खाण्डिक्याय महात्मने !
जनकाय पुरा योगं तथाहं कथयामि ते ॥५॥

मैत्रेय उवाच ।

खाण्डिक्यः कोऽभवद् ब्रूह्मन् को वा
केशिध्वजोऽभवत् ।
कथं तयोश्च संवादो योगसम्बन्धवानभूत् ॥६॥

पराशर उवाच ।

धर्म्मध्वजो वै जनकस्तस्य पुत्रो मितध्वजः ।
कृतध्वजश्च नाम्ना स सदाध्यात्मरतिर्नृपः ॥७॥

षष्ठोऽध्यायः ।

पूर्वाध्यायान्ते 'संज्ञायते येने'त्यत्र परमात्मनो ज्ञानदर्शनप्राप्तयो येन भवन्ति, तत्परं ज्ञानमित्युक्तं, तत्र दृढज्ञानं मननसहकृतेन वेदान्तवाक्यश्रवणेन भवतीति प्रसिद्धम् । अत स्तदुत्पत्त्यं दर्शनप्राप्त्योः कारणमाह —'स्वाध्याये'ति । स्वाध्यायः प्रणवजपः, संयमो योगः, ताभ्यां स दृश्यते । तस्य प्राप्तावपि तदेतद् द्वयं कारणम् । अत एव तद्हेतुद्वयं दर्शनद्वारा ब्रह्मणः प्राप्तिहेतुत्वात् ब्रह्मेत्यभिधीयते ॥१॥

(क) । योगम् आश्रित्येति शेषः, आसीत अवतिष्ठेत । अथवा धातूनामनेकार्थत्वात् आसीत अनुतिष्ठेदित्यर्थः ।

(ख) तस्य परमात्मनः ईक्षणाय दर्शनाय स्वाध्यायः प्रणवजपः चक्षुः चक्षुःस्वरूपः अपरं चक्षुः योगः ।

तदनुष्ठानप्रकारमाह — 'स्वाध्याया'दिति । संपत्त्या समृद्धया, तथा च योगशास्त्रम् — 'जपाच्छ्रान्तः पुनर्ध्यायेद् ध्यानाच्छ्रान्तः पुनर्जपेत । जपध्यानाभियोगेन पश्येदात्मानमात्मनि इति ॥२॥

ननु चक्षुरादिभिरप्यात्मन एव स्फुरणात् कथमिदमेव द्वयं तत्प्रकाशकमुच्यते, तत्राह,—'तदीक्षणाये'ति । विषयावच्छेदं विना परिपूर्णब्रह्मभूतो मांसमयैश्चक्षुरादिभिर्द्रष्टुं न शक्यते इत्यर्थः ॥३॥

यत्र यस्मिन् ज्ञाते ज्ञात्वा अनुष्ठिते सतीत्यर्थः ॥४॥

पूर्वाध्यायोपक्षिप्तमितिहासं योगनिरूपणार्थम् अनुवर्त्तयति —'यथा केशिध्वज' इत्यादिना यावदुत्तराध्यायसमाप्ति ॥७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतध्वजस्य पुत्रोऽभूत् ख्यातः केशिध्वजो द्विजः ।
पुत्रो मितध्वजस्यापि खाण्डिक्यो जनकोऽभवत् ॥८॥

कर्म्ममार्गेऽति खाण्डिक्यः पृथिव्यामभवत् कृती ।
केशिध्वजोऽप्यतीवासीदात्मविद्याविशारदः ॥९॥

तावुभावपि चैवास्तां विजिगीषू परस्परम् ।
केशिध्वजेन खाण्डिक्यः स्वराष्ट्रादवरोपितः(ग) ॥१०॥

पुरोधसा मन्त्रिभिश्च समवेतोऽल्पसाधनः ।
राज्यान्निराकृतः सोऽथ दुर्गारण्यचरोऽभवत्(घ) ॥११

इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया ॥१२॥

एकदा वर्त्तमानस्य योगे योगविदां वर !
धर्म्मधेनुं जघानोग्र-शार्दूलो विजने वने ॥१३॥

ततो राजा हतं ज्ञात्वा धेनुं व्याघ्रेण

ऋत्विजः ।

प्रायश्चित्तं स पप्रच्छ किमत्रेति विधीयते ॥१४॥

ते चोचुर्न वयं विद्मः कशेरुः पृच्छ्यतामिति ।

[पञ्चमांश

कशेरुरपि तेनोक्तस्तथैव प्राह भार्गवम् ॥१५॥

शुनकं पृच्छ राजेन्द्र ! नाहं वेद्मि स वेत्स्यति ।
स गत्वा तमपृच्छच्च सोऽप्याह शृणु यन्मुने ॥१६॥

न कशेरुर्न चैवाहं न चान्यः साम्प्रतं भुवि ।
वेत्त्येक एव त्वच्छत्रुः खाण्डिक्यो यो जितस्त्वया

॥१७॥

स चाहं तं प्रयाम्येष प्रष्टुमात्मरिपुं मुने !
प्राप्त एव मया यज्ञो यदि मां स हनिष्यति ॥१८॥

प्रायश्चित्तमशेषेण यदि पृष्टो वदिष्यति ।
ततश्चाविकलो यागो मुनिश्रेष्ठ ! भविष्यति ॥१९॥

पराशर उवाच ।

इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः !
वनं जगाम यत्रास्ते खाण्डिक्यः स महामतिः ॥२०॥

तमायान्तं समालोक्य खाण्डिक्यो

रिपुमात्मनः ।

प्रोवाच क्रोधताम्राक्षः समारोपितकार्म्मुकः(ङ) ॥२१॥

अति अतिशयितः कर्मभागे ॥८।१०॥

अल्पसाधनः स्वल्पपरीवारः ॥११॥

स केशिध्वजः ज्ञानव्यपाश्रयः ज्ञाननिष्ठोऽपि ब्रह्मविद्यामधिष्ठाय ब्रह्मार्पणाभ्यासेन कर्त्तृकर्मादि सर्वं ब्रह्मैवेतिदृष्ट्या बहून् यज्ञान् इयाज कृतवान् । किमर्थम् ? अविद्यया कर्मलक्षणया मृत्युं कामादिकषायशेषं तर्त्तुं क्षपयितुम् ॥१२

धर्मधेनुं होमधेनुं, धर्मदोग्ध्रीमिति पाठे प्रवर्ग्ये हरिर्विशेषो धर्मः तदर्थं पयोदोग्ध्रीं । शार्दूलो व्याघ्रः ॥१३॥

किमत्र प्रायश्चित्तं विधीयत इति पप्रच्छ ॥१४॥

तथैव तेनोक्तः कशेरुरपि शुनकं पृच्छेत्याहेत्यन्वयः ॥१५।१७॥

'प्राप्त एवे'ति । धर्मार्थं यतमानस्तु अन्तरा चेद्विपद्यते । स धर्मफलमाप्नोती'त्यादिवचनात् ॥१८॥

अविकलो योगो भविष्यतीति स चाहेति पूर्वोणान्वयः ॥१९।२१॥

(ग) तौ उभौ केशिध्वजः खाण्डिक्यजनकश्चेति द्वौ ।

(घ) दुर्गं दुर्गमं यत् अरण्यं तत्र चरतीति सः दुर्गारण्यचरः ।

(ङ) क्रोधताम्राक्षः शत्रुं प्रति कोपेन लोहितलोचनः । समारोपितकार्मुकः सज्यीकृतकार्मुकः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खाण्डिक्य उवाच ।

कृष्णाजिनं त्वं कवचमावध्यास्मान्निहंस्यसि ।
कृष्णाजिनधरे वेत्सि न मयि प्रहरिष्यति (च) ॥२२॥

मृगाणां वत पृष्ठेषु मूढ़ ! कृष्णाजिनं न किम् ?
येषां त्वया मया चोग्राः प्रहिताः शितसायकाः (छ)॥२३

न त्वामहं हनिष्यामि न मे जीवन् विमोक्ष्यसे ।
आततायिसि दुर्बुद्धे ! मम राष्ट्रहरो रिपुः ॥२४॥

केशिध्वज उवाच ।

खाण्डिक्य ! संशयं प्रष्टुं भवन्तमहमागतः ।
न त्वां हन्तुं विचार्य्यैतत् कोपं वाणञ्च मुञ्च च (ज)॥२५

पराशर उवाच ।

स तु मन्त्रिभिः सार्द्धमेकान्ते सपुरोहितः ।
मन्त्रयामास खाण्डिक्यः सर्व्वैरेव महामतिः ॥२६॥

तमूचुर्मन्त्रिणो वध्यो रिपुरेष वशं गतः ।
हते तु पृथिवी सर्व्वा तव वश्या भविष्यति (झ) ॥२७

खाण्डिक्यश्चाह तान् सर्व्वानितदेवं न संशयः ।
हते तु पृथिवी सर्व्वा मम वश्या भविष्यति ॥२८॥

परलोकजयस्तस्य पृथिवी सकला मम ।
न हन्मि चेल्लोकजयो मम तस्य वसुन्धरा ।
नाहं मन्ये लोकजयादधिका स्याद् वसुन्धरा (ञ)॥२९

परलोकजयोऽनन्तः स्वल्पकालो महीजयः ।
तस्मादेनं न हिंसिष्ये यत् पृच्छति वदामि तत् (ट)॥३०

कृष्णाजिनकवचवन्धे तस्याभिप्रायमुत्प्रेक्षयते । कृष्णाजिनं मयि खाण्डिक्यो न प्रहरिष्यतीति वेत्सि मन्यसे ॥२२॥

तदर्थमित्याह,—'मृगाणा'मिति । येषां पृष्ठेष्वित्यनुषङ्गः ॥२३॥

अतः 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहश्चैव षडेते आततायिनः' । इतिस्मृतेः । त्वमाततायी, अतः तवापि ते वधे मे न दोषः, 'नाततायि वधे दोषो हन्तुर्भवति कश्चने'त्यादिवचनात् ॥२४॥

(च) कृष्णाजिनधरे मयि न प्रहरिष्यति मच्छत्रुरिति शेषः । वेत्सि । निहंस्यसीत्यत्र इड़ागमाभाव आर्षः ।

(छ) कृष्णाजिनं कृष्णवर्णं चर्म किं न अस्तीति शेषः । शितसायकाः निशिताः वाणाः प्रहिताः प्रेरिताः क्षिप्ता इति यावत् तदर्थमिति शेषः । तत्र यथा कृष्णाजिनं न वाणनिवन्धकं, तथैव त्वय्यपि मया वाणस्य मोक्षे कृष्णाजिनं निबन्धकं भवेदिति भावः ।

(ज) संशयं संशयितं विषयम् । प्रष्टुम् आगतः, न तु हन्तुमागत इति विचार्य्य कोपं मयीति शेषः, मुञ्च, वाणञ्च मुञ्च प्रतिसंहरेत्यर्थः ।

कोपञ्च मुञ्च वाणञ्च मुञ्चेत्यन्वयः ॥२५-२८॥

(झ) वशं गतः आयत्तीभूतः, एष रिपुः तव शत्रुः केशिध्वजः वध्यः हन्तव्यः त्वयेति शेषः । हते त्वया अस्मिन् व्यापादिते सति । सर्वा पृथिवी तव वश्या अधीना भविष्यति, अतः एतस्य हननं त्वया नोपेक्षणीयमिति भावः

(ञ) अस्य केशिध्वजस्य परलोकजयः अन्यायेनेदानीं मया अस्मिन् निहते सतीति शेषः । चेत् यदि न हन्मि इममहमिति शेषः, तदा मम लोकजयः परलोकजयः अन्याय्यानुष्ठानादिति भावः । तस्य केशिध्वजस्य वसुन्धरा पृथ्वी एव तदधीना । लोकजयात् परलोकजयात् वसुन्धरा अधिका स्यादिति नाहं मन्ये ।

(ट) न विद्यते अन्तः अवसानम् अन्त्यावधिरिति यावत् यस्य सः, स्वल्पः स्वल्पमात्रः कालः यस्य सः, महीजयः पृथिवीजयः, अतः स्वल्पकालमात्रभोग्यस्य महीजयस्य कृते अनन्तकालसम्बन्धी परलोकजयो मया न शक्यः समुपेक्षितुमिति भावः । हिंसिष्ये इत्यत्रात्मनेपदमार्षम् । यत् पृच्छति अयमिति शेषः, तत् वदामि अहमिति शेषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

ततस्तमभ्युपेत्याह खाण्डिक्यजनको रिपुम् ।
प्रष्टव्यं यत्त्वया सर्व्वं तत् पृच्छस्व वदाम्यहम्(ठ) ॥३१

पराशर उवाच ।

ततः सर्व्वं यथावृत्तं धर्म्मधेनुवधं द्विज !
कथयित्वा स पप्रच्छ प्रायश्चित्तं हि तद्गतम् ॥३२॥

स चाचष्ट यथान्यायं द्विज ! केशिध्वजाय तत् ।
प्रायश्चित्तमशेषेण यद् वै तत्र विधीयते ॥३३॥

विदितार्थः स तेनैवं सोऽनुज्ञातो महात्मना ।
यागभूमिमुपाश्रित्य चक्रे सर्व्वाः क्रियाः क्रमात्(ड)॥३४

क्रमेण विधिवद् यागं नीत्वा सोऽवभृथाप्लुतः ।
कृतकृत्यस्ततो भूत्वा चिन्तयामास पार्थिवः(ढ) ॥३५॥

पूजिता ऋत्विजः सर्व्वे सदस्या मानिता मया ।
तथैवार्थिजनोऽप्यर्थैर्योजितोऽभिमतैर्यथा(ण) ॥३६

यथार्हमस्य लोकस्य मया सर्व्वं विचेष्टितम् ।
अनिष्पन्नक्रियं चेतस्तथापि मम किं यथा ॥३७॥

इति सञ्चिन्त्य यत्नेन सस्मार स महीपतिः ।
खाण्डिक्याय न दत्तेति मया वै गुरुदक्षिणा ॥३८

जगाम च ततो भूयो रथमारुह्य पार्थिवः ।
मैत्रेय ! दुर्गगहनं खाण्डिक्यो यत्र संस्थितः(त)॥३९

खाण्डिक्योऽपि तथायान्तं पुनर्दृष्ट्वा धृतायुधः(थ)
तस्थौ हन्तुं कृतमतिस्तथाह स पुनर्नृपः(थ) ॥४०

भो नाहं तेऽपकाराय प्राप्तः खाण्डिक्य ! मा कृ
गुरोर्निष्क्रयदानाय मामवेहि त्वमागतम् ॥४१॥

निष्पादितो मया यागः सम्यक् त्वदुपदेशतः ।
सोऽहं ते दातुमिच्छामि वृणुष्व गुरुदक्षिणाम् ॥४

परलोकजयस्तस्येत्युक्तञ्च धर्मार्थं प्रवृत्तस्यान्तराम रणेऽपि तत्फलसिद्धेः, न हन्मि चेल्लोकजय इति । उपसन्नवधकृत-पापप्रतिबन्धाभावे पूर्वैरेव पुण्यैः परलोकसिद्धेरिति-भावः ॥२९-३२॥

'स चाचष्टे'ति-इममेव विषयं प्रस्तुत्य वाजशनेयके स्मृति-होमाख्यं प्रायश्चित्तमुक्तम् । चन्द्रात्ते मनसप्रणोमि स्वाहेत्यादि अस्य च प्रायश्चित्तस्य स्फुटत्वेऽपि यथा देशकालावस्थादिशेषं कल्पनीयम् । खाण्डिक्यादपरो न वेत्तीति पूर्वोक्तस्याभिप्रा यद्वै तत्र प्रायश्चित्तं विधीयते तदशेषं यथान्यायं केशिध्व याचष्टेति ॥३३।३४॥

नीत्वा समाप्य ॥३५।३६॥

तथापि यथावदनिष्पन्नक्रियम् अकृतकृत्यमिवात्म मम चेतः किमिति तिष्ठतीति चिन्तयामासेत्यन्वयः ॥३

(ठ) तं रिपुं केशिध्वजम् । पृच्छस्वेत्यात्मनेपदमार्षम् ।

(ड) सर्वाः क्रियाः केशिध्वजेनोपदिष्टानि सकलानि कर्माणि, क्रमात् क्रमानुसारेण ।

(ढ) अवभृथाप्लुतः यज्ञान्तस्नातः, 'यज्ञावशेषस्नानं यज्ञ-देवावभृथं विदु'रिति कोषात् ।

(ण) अभिमतैः अभिप्रायानुरूपैः अर्थिजनस्येति शे विचेष्टितं कृतम् अस्य लोकस्य यथा अर्हं यथा योग्यम् तथा

(त) दुर्गं दुर्गमं गहनं वनम् । गहनस्य दुर्गत्वं तिशयो व्यज्यते ।

तस्य दुर्गत्वे सत्यपि तत्र गमनाद् गन्तुः प्रकृते वस्तुनि अ

(थ) आयान्तं केशिध्वजमिति शेषः, दृष्ट्वा धृतम् ये येन सः, कृता मतिः इच्छा येन सः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराशर उवाच ।

ततः स मन्त्रिभिः सार्द्धं मन्त्रयामास पार्थिवः ।
गुरुनिष्कृतिकामोऽत्र किमयं प्रार्थ्यतामिति (द) ॥४३

तमूचुर्मन्त्रिणो राज्यमशेषं प्रार्थ्यतामिति ।
कृतिभिः प्रार्थ्यते राज्यमनायासितसैनिकैः(ध) ॥४४

श्रुत्वा तानाह नृपः स खाण्डिक्यो महामतिः ।
स्वल्पकालं महीराज्यं मादृशैः प्रार्थ्यते कथम्(न) ॥४५

एवमेतद्भवन्तोऽत्र ह्यर्थसाधनमन्त्रिणः ।
परमार्थः कथं कोऽत्र यूयं नात्र विचक्षणाः ॥४६॥

पराशर उवाच ।

इत्युक्त्वा समुपेत्यैनं स तु केशिध्वजं नृपम् ।
उवाच किमवश्यं त्वं ददासि गुरुदक्षिणाम् ॥४७

बाढ़मित्येव तेनोक्तः खाण्डिक्यस्तमथाब्रवीत् ।
भवानध्यात्मविज्ञानपरमार्थविचक्षणः ॥४८॥

यदि चेद्दीयते मह्यं भवता गुरुनिष्क्रयः ।
तत् क्लेशप्रशमायालं यत् कर्म्म तदुदीरय ॥४९॥

इति श्रीविष्णुपुराणे षष्ठांशे षष्ठः अध्यायः ॥

भोः खाण्डिक्य ! मा क्रुधः क्रोधं मा कार्षीः ॥४१-४३॥ अनायासिताः युद्धादिक्लेशमप्रापिताः सैनिकाः ॥४४।४५॥

अत्र राज्ये अर्थसाधने मन्त्रिणः । अत्र संसारे कः परमार्थः, स च कथं भवतीत्यत्रार्थे यूयं न पण्डिताः ॥४६।४८॥ तत् तर्हि ॥४९॥

इति श्रीधरस्वामिकृतायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां षष्ठांशे षष्ठोऽध्यायः ।

(द) गुरोः निष्कृतिः दक्षिणादानेन ऋणमुक्तिः तत्कामः ।

(ध) न आयासिताः क्लेशं नीताः सैनिका यैः तथाभूतैः दुर्बलैः कृशलैः जनैः राज्यं प्रार्थ्यते ईदृशावस्थायामिति शेषः । यादृशं राज्यं काम्यं केनाप्युपायेनाधिगन्तव्यम्, तच्चेत् प्रार्थनामात्रेण शक्यलाभं, तदा तदर्थं सैनिकानामायासः क्षतिर्वा न भवति, अतः प्रार्थनयैव राज्यं स्वीकर्त्तव्यमिति भावः ।

(न) महती मतिः यस्य सः, स्वल्पः अत्यल्पमात्रः कालः भोगकालः यस्य सः, राज्यस्य आयुष्कालमात्रभोग्यत्वादायुष्कालस्य चात्यल्पमात्रत्वादेव राज्यस्य तथात्वम् । महामतिरिति विशेषणेन खाण्डिक्यस्य स्वल्पकाल' मित्यादितत्त्वाधिगमे सामर्थ्यं व्यज्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सप्तमोऽध्यायः

[ब्रह्मयोगनिर्णयः ।]

केशिध्वज उवाच ।

न प्रार्थितं त्वया कस्मान्मम राज्यमकण्टकम् ।
राज्यलाभाद् विना नान्यत् क्षत्रियाणामतिप्रियम्(क)॥१

खाण्डिक्य उवाच ।

केशिध्वज ! निबोध त्वं मया न प्रार्थितं यतः ।
राज्यमेतदशेषं ते यत्र गृध्यन्त्यपण्डिताः (ख) ॥२॥
क्षत्रियाणामयं धर्म्मो यत् प्रजापरिपालनम् ।
वधश्च धर्म्मयुद्धेन स्वराज्यपरिपन्थिनाम् ॥३॥
यत्राशक्तस्य मे दोषो नैवास्त्यपहृते त्वया ।
बन्धायैव भवत्येषा अविद्याप्यक्रमोज्झिता ॥४॥
जन्मोपभोगलिप्सार्थमियं राज्यस्पृहा मम ।
अन्येषां दोषजा नैषा धर्म्ममेवानुरुध्यते ॥५॥
न याच्ञा क्षत्रबन्धूनां धर्म्मो ह्येतत् सतां मतम्
अतो न याचितं राज्यमविद्यान्तर्गतं तव ॥६॥

सप्तमः अध्यायः

खाण्डिक्याय ददौ विद्यामविद्यागुरवे वरम् ।
केशिध्वजो न तच्चित्रं न ह्यदेयं महीयसाम् ॥

तत्त्वं जिज्ञासवे खाण्डिक्याय तत्त्वज्ञानमुपदेष्टुं केशिध्वजस्तस्य विवेकवैराग्यपरीक्षार्थमाह—न 'प्रार्थित'मिति । अकण्टकं निष्प्रतिपक्षं राज्यं विना प्रजापालनादेः क्षत्रधर्मस्यासिद्धेः तत्सिद्धये राज्यप्रार्थनैव युक्ता । अन्यथा स्वधर्महानिप्रसङ्गः स्यादिति भावः ॥१॥

अत्रोत्तरं केशिध्वजेत्यादि । यतः कारणात् त्वदीयं राज्यं मया न प्रार्थितं तदिदं निबोध शृणु । यत्र राज्ये अपण्डिताः अविवेकिनो भोगलिप्सव एव गृध्यन्ति अपेक्षां कुर्वन्ति ॥२॥

ननु स्वधर्मसिद्धये पण्डितानामपि राज्याकांक्षा युक्तैवेत्युक्तं तत्राह—'क्षत्रियाणा'मिति । यत् प्रजापालनं, यश्च स्वराज्यप्रतिपक्षाणां वधः, अयं राज्याधिकृतानां क्षत्रियाणां धर्मः, न तु क्षत्रियमात्रस्य ॥३॥

अतो यत्र यदा त्वयापहृते राज्ये सति पुनाराज्यं सात्कर्त्तुमशक्तस्य मम प्रजापालनादित्यागेऽपि दोषो नास्तीत्यर्थः । राज्याधिकाराभावेन तदधिकृते धर्मेऽप्यधिकारनिवृत्तेः । अन्यथा तु दोषः स्यादेव, न पुनरविद्यामयस्य कर्मणस्त्यागे किं स्यादिति वक्तुं शक्यं, यस्मादेषा कर्ममयी अविद्यापि अक्रमोज्झिता सत्येवाधिकारे परित्यक्ता सती पुनर्बन्धाय भवत्येवेत्यर्थः ॥४॥

एवञ्च सति मम वा मन्मन्त्रिणां वा त्वद्राज्यस्पृहा धर्मो न भवतीत्याह—'जन्मे'ति । यदैवं धर्मः, तदा मयेयं राज्यस्पृहा राजजन्मोचितच्छत्रचामराद्युपभोगलिप्सार्थमेव भवेत्, न धर्मार्थं, अन्येषां सचिवादीनामियं त्वद्राज्यस्पृहा राज्यलोभादिदोषजा । अधर्ममेव केवलं नानुरुध्यते नानुवर्तते, अपि तु धर्मच्छलेन अर्थशास्त्रमेवानुवर्तते इत्यर्थः ॥५॥

ननु तथापि याच्ञामात्रेण राज्यं लब्ध्वा महाद् धर्मं किमिति नानुष्ठीयते ? तत्राह—'याच्ञे'ति । अतोऽधर्मत्वात् अविद्यान्तर्गतत्वाच्च त्वदीयं राज्यं मया न प्रार्थितम् ॥६॥

(क) न विद्यते कण्टकः क्षुद्रशत्रुर्यत्र तत् अकण्टकं क्षुद्रेणापि शत्रुणा शून्यम्, 'सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टक' इति कोषात् ।

(ख) गृध्यन्तीति गृधु अभिकाङ्क्षायामिति दिवादिगणपठितस्य रूपम्, गृध्यन्ति अभिकाङ्क्षन्तीत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राज्ये गृध्यन्त्यविद्वांसो ममत्वाहतचेतसः ।
अहम्मानमहापान-मदमत्ता न मादृशः(ग) ॥७॥

पराशर उवाच ।

प्रहृष्टः साध्विति प्राह ततः केशिध्वजो नृपः ।
खाण्डिक्यजनकं प्रीत्या श्रूयतां वचनं मम ॥८॥
अहन्त्वविद्यामृत्युञ्च तर्त्तुकामः करोमि वै ।
राज्यं यागांश्च विविधान् भोगैः पुण्यक्षयं तथा ॥९॥

तदिदं ते मनो दिष्ट्या विवेकैश्वर्य्यतां गतम् ।
श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ॥१०॥

अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः ।
अविद्यातरुसम्भूतेर्बीजमेतद् द्विधा स्थितम्(घ) ॥११॥

पञ्चभूतात्मके देहे देही मोहतमोवृतः ।
अहमेतदितीत्युच्चैः कुरुते कुमतिर्मतिम् ॥१२॥

अतो 'यत्र गृध्यन्त्यपण्डिता' इति यदुक्तं तदेव सिद्धमित्याह—'राज्य' इति । अहंमान एव महापानं तेन यो मदस्तेन मत्ताः ॥७॥

खाण्डिक्येनोक्तं श्रुत्वा केशिध्वजः किं कृतवानित्यपेक्षायामाह 'प्रहृष्टः साध्वि'ति । ततः प्रकृष्ट इति पाठे तव बुद्धिरिति शेषः ॥८॥

अविद्यामयेऽपि राज्ये स्वप्रवृत्तौ तावत् कारणमाह—'अविद्ये'ति । सत्यं त्वयोक्तम् अविद्यान्तर्गतत्वात् राज्यमनुदेयमिति, तच्च ममापि तुल्यम्, तथाप्यविद्यया प्रजापालनादिलक्षणया सत्त्वशुद्ध्या कामक्रोधादिलक्षणं मृत्युं संसारहेतुं तर्त्तुमिच्छन् अहं राज्यादि करोमि । 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत' इति श्रुतेः ॥९॥

पुनस्तदिदं मनोविवेकैश्वर्य्यतां विवेके ऐश्वर्यं सामर्थ्यं तस्य तस्य भावो विवेकैश्वर्य्यता तां गतं प्राप्तम् । उपदेशापेक्षस्य स्वयमेव विवेकाधिकारतां प्राप्तं, एतद्दिष्ट्या भद्रमित्यर्थः । 'विवेकैश्वर्य्यमागत'मिति तु पाठः सुगमः । तदेवं शिष्यस्य विवेकादिकं परीक्ष्य अभिनन्द्य चेदानीं तेन यत् पृष्टः तत् 'क्लेशप्रशमायालं यत् कर्म तदुदीरये'ति तद्वक्तुं प्रथमं तावत् अविद्यास्थं क्लेशस्वरूपं दर्शयति—'तत् श्रूयता'मित्यादिनासार्द्धेन श्लोकेन ॥१०॥

अनात्मनि देहादौ अस्वे क्षेत्रादौ च अहं ममेति या मतिः सा अविद्या विपर्य्ययरूपा, एतस्या अनर्थ हेतुत्वमाह—एतद्द्विधा दर्शितमविद्यास्वरूपं संसाररूपं भूतेबीजतया स्थितम् ॥११॥

देहादावहंमानस्याविद्यात्वमुपपादयति—'पञ्चे'ति । पञ्चभूतात्मके देहे देही कुमतिः विपर्य्यस्तमतिः अहमेतदिति मतिं कुरुते । द्वितीय इतिशब्दस्तदावृत्त्यर्थः । विपर्य्यासे हेतुः मोहतमसा स्वरूपाज्ञानेनावृत इति । अज्ञाते हि वस्तुस्वरूपे विपर्य्यासो भवति ॥१२॥

(ग) ममत्वेन ममकारेण आहतं चेतः येषां ते । मादृशः मत्सदृशाः जना न गृध्यन्तीति । मादृश्शब्दस्य बहुवचने रूपम् । मादृश इत्यस्याकारान्तशब्दप्रकृतिकैकवचनान्तत्वे क्रियायां वचनव्यत्ययेनान्वयः ।

(घ) अनात्मनि आत्मभिन्ने देहेन्द्रियादौ वस्तुनि विशेष्ये या आत्मबुद्धिः आत्मेति बुद्धिः अभेदसम्बन्धेनात्मप्रकारिका समवायसम्बन्धेन आत्मत्वप्रकारिका वा अहमित्याकारा मतिः, यच्च अस्वे स्वत्ववद्भिन्ने क्षेत्रगृहधनादौ विशेष्ये स्वमिति मदीयमिदमित्यादिरूपम् अभेदेन स्वत्ववत्प्रकारकं स्वरूपेण मतान्तरे समवायेन वा स्वत्वप्रकारकं ज्ञानम्, तद् द्विविधं ज्ञानं विपर्य्ययरूपमविद्यापदवाच्यम् । तरुसम्भूतेः संसाररूपवृक्षोत्पत्तेः बीजमिव बीजं कारणम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आकाश-वाय्व-ग्नि-जल-पृथिवीभ्यः पृथक् स्थिते ।
आत्मन्यात्ममयं भावं कः करोति कलेवरे ॥१३॥

कलेवरोपभोग्यं हि गृहक्षेत्रादिकञ्च कः ।
अदेहे ह्यात्मनि प्राज्ञो ममेदमिति मन्यते(ङ) ॥१४॥

इत्थञ्च पुत्र-पौत्रेषु तद्देहोत्पादितेषु कः ।
करोति पण्डितः स्वाम्यमनात्मनि कलेवरे ॥१५॥

सर्व्वं देहोपभोगाय कुरुते कर्म्म मानवः ।
देहश्चान्यो यदा पुंसस्तदा बन्धाय तत्परम् ॥१६॥

मृन्मयञ्च यथा गेहं लिप्यते च मृदम्भसा ।
पार्थिवोऽयं तथा देहो मृदन्नालेपनस्थितिः ॥१७॥

पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपुः ।
आप्यायते यदि ततः पुंसो गर्व्वोऽत्र किं ततः ॥१८॥

अनेकजन्मसाहस्रीं संसारपदवीं व्रजन् ।
मोहश्रमं प्रयातोऽसौ वासनारेणुगुण्ठितः ॥१९॥

प्रक्षाल्यते यदा सोऽस्य रेणुर्ज्ञानोष्णवारिणा ।
तदा संसारपान्थस्य याति मोहश्रमः शमम्(च) ॥२०॥

मोहश्रमे शमं याते स्वस्थान्तःकरणः पुमान् ।
अनन्यातिशयाबाधं परं निर्व्वाणमृच्छति ॥२१॥

कुमतित्वमेव स्पष्टयति—'आकाशे'ति। आकाशादिभ्यः तत्साक्षितया आत्मनि पृथक् स्थिते सति तत्कार्ये देहे अहंभावं कः कुर्यात् ॥१३॥

मम—प्रत्ययस्यापि मिथ्यात्वं स्फुटयति—'कलेवरे'ति द्वाभ्याम्। अदेहे देहव्यतिरिक्ते आत्मनि सति देहोपभोग्यं गृहादि मदीयमिति कः प्राज्ञो मन्येत ॥१४॥

एवं कलेवरे अनात्मनि सति तदुत्पादितेषु पुत्रादिषु कः स्वाम्यं कुर्य्यात् ॥१५॥

तदेवं देहगेहादिष्वहं—ममाभिमानयोरविद्यात्वं समर्पितम् इदानीं तत्पूर्व्वकं कर्त्तृत्वभोक्तृताद्यपि अविद्यामयमेवेत्याह—'सर्व्व'मित्यादिना। देहश्च यदा पुंसः सकाशादन्यस्तदा पुंसो भोगसम्बन्धो नास्त्येव, परं केवलं तत् कर्म्म तस्य बन्धायैव स्यात् ॥१६॥

देहोपभोगायेति यदुक्तं तदेव दृष्टान्तेन समर्थयते—'मृन्मये'ति द्वाभ्याम्। मृदम्बुभ्यामन्नपानरूपाभ्यामालेपेन स्थितिर्यस्य स तथा ॥१७॥

भोगैर्भुज्यमानैरन्नादिभिः ॥१८॥

देहकर्म पुंसो बन्धायेत्युक्तम्, तत्र हेतुमाह—'अनेके'ति। सहस्रमेव साहस्रम् अनेकानि जन्मसाहस्राणि यत्रास्यां संसाररूपां पदवीं मार्गं गच्छन् असौ पुमान् मोहश्रमं मोहकर्तृत्वभोक्तृत्वाद्यभिनिवेशः तत्कृतश्रमं प्राप्तः। यतः वासना अहंममेत्यादिमिथ्याज्ञानसंस्कारः, सैव रेणुः तेन गुण्ठितः ॥१९॥

कदा तस्य श्रमस्योपशम इत्येपेक्षायामाह—'प्रक्षाल्यते' इति। ज्ञानात्मकेनोष्णवारिणा उष्णोदकेन हि सुखेनैवान्तर्गतोऽपि मलः प्रकर्षेण क्षाल्यते ॥२०॥

ततः किमत आह—'मोहश्रम' इति। न विद्यते अन्यस्यातिशयो यस्मिन् तदनन्यातिशयं तच्च तदबाधञ्च निरुपद्रवं निर्व्वाणं सुखं परं मोक्षाख्यं प्राप्नोति ॥२१॥

(ङ) कलेवरोपभोग्यमित्यादि—अत्रायं भावः—जगति गृहक्षेत्रादिवस्तूनां कलेवरेण आत्मभिन्नेन भोग्यत्वं, न तु आत्मभोग्यत्वम्, अतस्तदिदं गृहक्षेत्रादिकं देहसम्बन्धि। तत्र असतः आत्मसम्बन्धस्य ममेदमित्येवं रूपेण प्रतीतिरविद्यैवेति। प्राज्ञो जनः तत्प्रतीतिविरोधिविपरीतज्ञानवानिति न तस्य तथा प्रतीतिरिति।

(च) संसारपान्थस्य संसाररूपस्य पथः पथिकस्य सांसारिकजीवस्येति यावत्। मोहश्रमः शमम् उपशमं याति प्राप्नोति निवृत्तो भवतीति यावत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निर्व्वाणमय एवायमात्मा ज्ञानमयोऽमलः ।
दुःखाज्ञानमला धर्म्माः प्रकृतेस्ते तु नात्मनः(छ) ॥२२
जलस्य नाग्निसंसर्गः स्थालीसङ्गात्तथापि हि ।
शब्दोद्रेकादिकान् धर्म्मांस्तत् करोति यथा मुने ॥२३
तथात्मा प्रकृतेः सङ्गादहम्मानादिदूषितः ।
भजते प्राकृतान् धर्म्मानभ्यस्तेभ्यो हि सोऽव्ययः ॥२४
तदेतत् कथितं बीजमविद्यायास्तव प्रभो !
क्लेशानाञ्च क्षयकरं योगादन्यन्न विद्यते ॥२५॥

खाण्डिक्य उवाच ।

तन्तु ब्रूहि महाभाग ! योगं योगविदुत्तम !
विज्ञातयोगशास्त्रार्थस्त्वमस्यां निमिसन्ततौ (ज)॥२६॥

केशिध्वज उवाच ।

योगस्वरूपं खाण्डिक्य ! श्रूयतां गदतो मम ।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः(झ) ॥२७॥
मन एव मनुष्याणां कारणं बन्ध-मोक्षयोः ।
बन्धाय विषयासङ्गि मुक्तये निर्व्विषयं तथा(ञ) ॥२८
विषयेभ्यः समाहृत्य विज्ञानात्मा मनो मुनिः ।
चिन्तयेन्मूक्तये तेन ब्रह्मभूतं परेश्वरम् ॥२९॥
आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुनिम् ।
विकार्य्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥३०॥
आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥३१॥

नन्वेवं निर्व्वाणस्यागन्तुकत्वे अनित्यता प्रसज्येत, अत आह—'निर्व्वाणमय' एवेति ॥२२॥

कथं तर्हि आत्मनि दुःखादिप्रतीतिस्तत्राह—'जलस्ये'ति द्वाभ्याम्। अग्निसंसर्गेण तप्तायाः स्थाल्याः सङ्गात् तदन्तःस्थितं जलं शब्दमुद्रेकश्च आदिशब्दात् शोषमुष्णत्वादींश्च यथा करोति भजते ॥२३॥

तथा प्राकृते देहे अहंमानात्तत्कर्म्माणि भजते ॥२४॥

अविद्यामुपसंहरंस्तन्निवर्त्तकं योगमुपसंहरति—'तदेत'दिति। अविद्यायाः पञ्चक्लेशाख्यविपर्य्ययरूपायाः बीजं मोहतमःसंज्ञम् आत्मावरणमज्ञानम् ॥२५।२६॥

यत्र योगे स्थितः आरूढो मुनिः ब्रह्मलयं प्राप्य न च्यवते पुनर्न संसरति ॥२७॥

योगेऽवस्थितिर्मनसो विषयवैतृष्ण्यं विना न सिध्यतीत्याशयेनाह—'मन' इति ॥२८॥

अतो मुमुक्षुरेवं कुर्य्यादित्याह—'विषयेभ्य' इति। विज्ञानात्मा विवेकज्ञानयुक्तः पुमान् शब्दादिभ्यो मनः प्रत्याहृत्य तेन मनसा परम् ईश्वरं चिन्तयेत् ॥२९॥

ततः किमत आह—'आत्मभाव'मिति। चिन्तितं तद्ब्रह्म एवंध्यायिनं पुरुषम् आत्मभावम् आत्मैक्यं नयति विकार्य्यं विकारार्हं लोहं स्वशक्त्या आकर्षः अयस्कान्तो यथा। अयन्तु दृष्टान्तः संयोगमात्रे, न तु तदैक्ये ॥३०॥

इदानीं योगस्वरूपं दर्शयति—'आत्मे'ति। आत्मनः प्रयत्नो यमनियमादिविषयः, तत्सापेक्षा तदधीना विशिष्टा सत्त्वमयी या मनसो वृत्तिः तस्या ब्रह्मण्येव संयोगो योगः ॥३१॥

(छ) निर्वाणमय इत्यादि—अत एव निर्वाणस्य आत्मनः स्वाभाविकत्वादागन्तुकत्वाभावेन तस्यानित्यताशङ्का नास्तीति भावः।

(ज) अस्यां तव मम च प्रभवभूतायां निमेः तदाख्यस्य राज्ञः सन्ततौ वंशे त्वं त्वमेव विज्ञातः विशेषेण ज्ञातः योगशास्त्रस्य योगानुशासनस्य अर्थः प्रतिपाद्यं योगरूपं वस्तु येन त्वमसि, अतस्त्वमेव तदुपदेशे समर्थ इति भावः।

(झ) ब्रह्मलयं ब्रह्मणि लयं लीनतां ब्रह्मस्वरूपतामिति यावत् प्राप्य।

(ञ) विषयासङ्गि विषयेषु पुत्रदारगृहादिषु आसक्तं मनः बन्धस्य कारणम्। निर्विषयं विषयशून्यं निरुक्तेषु विषयेष्वनासक्तं मध्यस्थतामापन्नं मन इति यावत् मुक्तेः कारणमित्यन्वयः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवमत्यन्तवैशिष्ट्ययुक्तकर्म्मोपलक्षणः ।
यस्य योगस्य वै योगी मुमुक्षुरभिधीयते ॥३२॥

योगयुक् प्रथमं योगी युञ्जानो ह्यभिधीयते ।
विनिष्पन्नसमाधिस्तु परं ब्रह्मोपलब्धिमान्(ट) ॥३३॥

यद्यन्तरायदोषेण दूष्यते नास्य मानसम् ।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्व्वस्य जायते (ठ) ॥३४॥

विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मचयोऽचिरात्(ड)॥३५॥

ब्रह्मचर्य्यमहिंसा च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन्(ढ)॥३६॥

स्वाध्याय-शौच-सन्तोष-तपांसि नियतात्मवान् ।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः(ण) ॥३७॥

योगिनो लक्षणमाह—'एवमि'ति । एवमनेन प्रकारेणात्यन्तवैशिष्ट्ययुक्तो धर्म उपलक्षणं यस्य योगस्य स यस्यास्ति स एव योगी मुमुक्षुश्च, अन्यस्तु केवलं दाम्भिक इत्यर्थः ॥३२॥

इदानीं योगिनोऽवस्थाभेदेन त्रैविध्यमाह—'योगयु'-गिति । प्रथमं योगनिष्पत्तेः पूर्व्वं तदर्थं योगाभ्यासं कुर्व्वन् योगयुगित्युच्यते, परं ततः पश्चात् ब्रह्मोपलब्धिमान् सन् विनिष्पन्नसमाधिः कथ्यते ॥३३॥

तयोर्मुक्तौ कञ्चिद्विशेषमाह—'यदी'ति द्वाभ्याम् । 'आलस्यं व्याधयस्तीव्राः प्रमादः स्थानसंशयः । अनवस्थितचित्तत्वमश्रद्धा भ्रान्तिदर्शनम् दुःखानि दौर्म्मनस्यञ्च विषयेषु च लोलते'त्येवमाद्यन्तरायरूपेण पूर्व्वस्य योगयुक्संज्ञस्य ॥३४

योगाग्निदग्ध कर्म्मसमूहः ॥३५॥

(ट) युञ्जानः योगम् अभ्यस्यन् । योगयुक् अभिधीयते । 'युञ्जमानो विधीयत' इति पाठे युञ्जमान इत्यार्षम्, विधीयते अभिधीयत इत्यर्थः । ब्रह्मणः उपलब्धिः तद्वान् सन् विनिष्पन्नः विशेषेण निष्पन्नः समाधिः यस्य तथाभूतः ।

(ठ) अभ्यसत इति भ्वादिगणीयस्य असतेरभिपूर्वस्य रूपं योगाभ्यासं कुर्वत इत्यर्थः ।

(ड) योगाग्निना योगरूपेण वह्निना दग्धः समूलमुच्छिन्नः कर्म्मणां कर्मजन्यानादृष्टानां चयः समूहः यस्य सः ।

(ढ) ब्रह्मचर्य्यमित्यादि । योगशास्त्रोक्तयमपदार्थानित्यर्थः । तदुक्तं पातञ्जले योगसूत्रे 'अहिंसा सत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः' इति । अस्यार्थमाह भोजदेवो यथा,—'तत्र

इदानीं यम-नियमा-सन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधय इत्यष्टौ योगाङ्गानि क्रमेण दर्शयिष्यन् यम-नियममाह—'ब्रह्मचर्य'मित्यादित्रिभिः ॥३६॥

प्राणवियोगप्रयोजनव्यापारः, हिंसा, सा च सर्वानर्थहेतुः, तदभावोऽहिंसा । हिंसायाः सर्वप्रकारेणैव परिहार्य्यत्वात् प्रथमं तदभावरूपाया अहिंसाया निर्देशः । सत्यं वाङ्मनसोर्यथार्थत्वम् । स्तेयं परस्वापहरणम्, तदभावोऽस्तेयम् । ब्रह्मचर्यमुपस्थनियमः । अपरिग्रहो भोगसाधनानामनङ्गीकारः । तत्र ते अहिंसादयः पञ्च यमशब्दवाच्याः योगाङ्गत्वेन निर्दिष्टाः' । इति ।

(ण) स्वाध्यायेत्यादि । अनेन योगशास्त्रोदाहृता नियमा उक्ताः । तथा च योगसूत्रम्—'शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः' । इति । अस्यार्थमाह भोजदेवः यथा,—'शौचं द्विविधं बाह्यम् आभ्यन्तरञ्च । बाह्यं मृज्जलादिभिः कायादिप्रक्षलनम् । आभ्यन्तरं मैत्र्यादिभिश्चित्तमलानां प्रक्षालनम् । सन्योषस्तुष्टिः । शेषाः प्रागेव कृतव्याख्यानाः एते शौचादयो नियमशब्दवाच्याः । इति । मैत्र्यादित्यादिपदेन करुणामुदितोपेक्षाणां ग्रहणम् । तदुक्तं पातञ्जले योगसूत्रे यथा,—'मैत्री-करुणा-मुदितो-पेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादन'मिति । अस्यार्थमाह भोजदेवो यथा,—'मैत्री सौहार्दम्, करुणा कृपा, मुदिता हर्षः, उपेक्षा औदासीन्यम् । एता यथाक्रमं सुखितेषु दुःखितेषु पुण्यवत्सु अपुण्यवत्सु च विभावयेत् । तथाहि सुखितेषु साधुषु एषां सुखित्वमिति मैत्रीं कुर्यात्, न तु ईर्ष्यया । दुःखितेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव कुर्यात्,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः
विशिष्टफलदाः काम्या निष्कामाणां विमुक्तिदाः ॥३८

एकं भद्रासनादीनां समास्थाय गुणैर्युतः ।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः(त) ॥३९॥

प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥४०॥

परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्तयोः ॥४१॥

तस्य चालम्बनवतः स्थूलं रूपं द्विजोत्तम !
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥४२॥

शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुचारीणि प्रत्याहारपरायणः ॥४३॥

वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः (थ) ॥४४॥

प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्य्यात् स्थिरं चेतः शुभाश्रये ॥४५॥

खाण्डिक्य उवाच ।

कथ्यतां मे महाभाग ! चेतसो यः शुभाश्रयः ।
यदाधारमशेषं तद्धन्ति दोषसमुद्भवम् ॥४६॥

स्वीयं मनो ब्रह्मप्रवेशे योग्यतां प्रापयन् परस्मिन् ब्रह्मणि मनः प्रवणं कुर्वीतेत्यनेन ईश्वरप्रणिधानाख्यं पञ्चमं नियमं दर्शयति ॥३७।३८।

आसनमाह—'एक'मिति । यमाख्यैर्नियमाख्यैश्च गुणैर्युतः सन् । भद्रासनादीनां लक्षणमुक्तं योगियागवल्कीये —गुल्फौ तु वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् । पार्श्वे पादौ च हस्ताभ्यां दृढं बद्ध्वा सुनिश्चलम् । भद्रासनं भवेदेतत् सर्व्वव्याधिविनाशन'मित्यादि ॥३९॥

प्राणायाममाह—'प्राणाख्यमि'त्यादि । सबीजः सालम्बनो भगवन्मूर्तिध्यानमन्त्रजपसहितः ॥४०॥

द्विविधस्यापि तस्य पुनस्त्रैविध्यमाह—'परस्परेणे'ति । निश्वासेन मुखनासिकाभ्यां निर्गच्छति यो वायुः स प्राणः । उच्छ्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणवृत्त्या अपानवृत्तेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानवृत्त्या प्राणावृत्तेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन स प्राणायामो द्विधा । अनयोर्युगपत् संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः । यद्वा सद्विधानेनेत्येकमेव पदं तत्र चायमर्थः । सद्विधानेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूतं द्वयम् । यश्च कुम्भकेनोभयोः सहाभिभवः । एवमभिभवत्रयेणैकः प्राणायाम इति ॥४१॥

सबीजस्यालम्बनमाह—'तस्य चे'ति स्थूलं वक्ष्यमाणं हिरण्यगर्भादिरूपम् ॥४२॥

प्रत्याहारमाह — 'शब्दादिष्वि'ति चित्तानुचारीणि-चित्तालम्बनादन्यालम्बनशून्यानीत्यर्थः ॥४३।४४॥

तस्मात् प्राणायामप्रत्याहारपूर्व्वकमेव धारणामभ्यसेदित्याह—'प्राणायामेने'ति ॥४५॥

यदाधारश्चेतो दोषफलानामन्तरायाणामुद्भवं हन्ति स आश्रयः कथ्यताम् ॥४६॥

(त) नियतः संयतः, यतिः सन्न्यासी, युञ्जीत योगं कुर्वीत ।

(थ) अतिचलः अत्यन्तं चञ्चलः आत्मा स्वरूपं येषां तेषाम् अतिचञ्चलस्वरूपाणामित्यर्थः, इन्द्रियाणां तेन प्रत्याहारेण वश्यता जायते । तैः इन्द्रियैः अवश्यैः अनायत्तैः सद्भिः योगी योगसाधकः योगसाधनयोग्यः न भवतीति शेषः । तदुक्तम् 'ततः परमा वश्यतेन्द्रियाणा' मिति योगसूत्रे । तत इति प्रत्याहारादित्यर्थः ।

नाटस्थम् । पुण्यवत्सु पुण्यानुमोदनेन हर्षमेव कुर्यात्, न तु कथमेते पुण्यवन्त इति विद्वेषम् । अपुण्यवत्सु च औदासीन्यमेव भावयेत्, न अनुमोदनं, न वा विद्वेषम् । सूत्रे सुखदुःखादिशब्दैरुदाहृतः प्रतिपादिताः । तदेवं मैत्र्यादिपरिकर्मणा चित्ते प्रसीदति सुखेन समाधेराविर्भावो भवति ।' इत्यादि ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केशिध्वज उवाच ।

आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ॥४७॥
त्रिविधा भावना भूप ! विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका ॥४८॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥४९॥
सनन्दनादयो ब्रह्मन् ब्रह्मभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावराश्चराः(द)॥५०॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥५१॥

अक्षीणेषु समस्तेषु विशेषज्ञानकर्म्मसु ।
विश्वमेतत् परं चान्यद् भेदभिन्नदृशां नृप ॥५२॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥५३॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ।
विश्वरूपाच्च वैरूप्यलक्षणं परमात्मनः ॥५४॥
न तद्योगयुजा शक्यं नृप ! चिन्तयितुं यतः ।
तमः स्थूलं हरे रूपं चिन्तयेद् विश्वगोचरम् ॥५५॥
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ।
मारुतो वसवो रुद्रा भास्करास्तारका ग्रहाः ॥५६॥

तमेवाह—'आश्रय' इति । चेतस आश्रयो ब्रह्मैव, तच्च मन्द-मध्यमोत्तमाधिकारिणां यथायोग्यं मूर्त्तामूर्त्तपरापरभेदेन चतुर्धावस्थितं क्रमेण धारणे विषय इति दर्शयितुं ब्रह्मणश्चातुर्व्विध्यमाह । तच्च ब्रह्म मूर्त्तममूर्त्तं चेति द्विधा स्वभावतः स्वेच्छातः मूर्त्तं मूर्तिमत्, अमूर्त्तं तद्रहितं, तत् पुनः प्रत्येकं परञ्चापरञ्चेति द्विधा । तत्र परममूर्त्तं निर्गुणं ब्रह्म अपरञ्चामूर्त्तं षड्गुणैश्वररूपम् । परं मूर्त्तं पद्मनाभादिलीलाविग्रहरूपम् अपरमूर्त्तं हिरण्यगर्भादिविश्वरूपम् ॥४७॥

तदेवं परब्रह्मेश्वरलीलामूर्तिरूपतया चतुर्धेत्युक्तम् तत्र चतुर्थं विश्वाख्यं रूपमाह—'त्रिविधे'त्यादिना, त्रिविधभावनाश्रयजीवात्मकत्वात् तदुपचारेण त्रिविधा भावनेत्युच्यते । तद्धि हरेः स्थूलं रूपम्, अतः पररूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः संधार्य्यमिति भावः । भावना नाम ज्ञानविशेषजा वासना, तां त्रिविधामपि संज्ञयोद्दिशति—'ब्रह्माख्ये'ति ॥४८॥

तामेव विषयत्रैविध्येन विविनक्ति 'ब्रह्मभावात्मिके'ति । भावभावना भावो वस्तु तद्विषया भावना त्रिविधा ॥४९॥

तत्र वयं ब्रह्मैव भवामः, वयं कर्म्मैव कुर्म्मः, वयं पुनरुभयमिदमनुसंदध्म इत्येवं त्रिविधभावनायुक्तान् जीवानुदाहरति—'सनन्दनादय' इति द्वाभ्याम् ॥५०॥

बोधः स्वरूपविषयः, अधिकारश्च सर्गादिविषयः, तद्युक्तेषु तदुभयानुसंधानात्मिका द्विधा भावना विद्यते ॥५१॥

ब्रह्मभावनावन्तोऽपि सनन्दनादयो जीवा एव देहानुसंधाननिवृत्तेरित्याशयेनाह—'अक्षीणेष्वि'ति । विशेषज्ञानहेतुकर्म्मसु निःशेषमक्षीणेषु सत्सु विश्वमेतदन्यत् परं ब्रह्म चान्यद्भाति, भेदेन भेदकरेण अहंकारेण भिन्नदृशाम् अभ्यस्तेऽपि ध्यातृध्येयभेददर्शित्वात् स्थूलविश्वान्तःपातिन एवेत्यर्थः ॥५२॥

शुद्धब्रह्मस्वरूपमाह—'प्रत्यस्तमिते'ति द्वाभ्याम् । प्रत्यस्तमितः प्रविलीनो भेदो यस्मिन् तत् वचसामगोचरम् स्वसंवेद्यं स्वानुभवगम्यम् ॥५३॥

विश्वरूपाद्वैरूप्यं वैलक्षण्यमेव लक्षणं यस्य तज्ज्ञानं परमात्मनो विष्णोः परं रूपमित्यन्वयः ॥५४॥

ननु तर्हि श्रेष्ठत्वादिदमेव चिन्तयितुं युक्तं तत्राह—'नेति' योगयुजा प्रथमाभ्यासिना ॥५५॥

(द) अन्ये सनन्दनादिभिन्नाः देवाद्याः स्थावराः चराः कर्म्मभावनया युता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गन्धर्व्व-यक्षा दैत्याद्याः सकला देवयोनयः ।
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ॥५७॥
नृप ! भूतान्यशेषाणि भूतानां ये च हेतवः ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥५८॥
एकपादं द्विपादञ्च बहुपादमपादकम् ।
मूर्त्तमेतद्धरे रूपं भावनात्रितयात्मकम् ॥५९॥
एतत् सर्व्वमिदं विश्वं जगदेतच्चराचरम् ।
परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥६०॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्म्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥६१॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्व्वगा ।
संसारतापानखिलानवाप्नोत्यनुसन्ततान् ॥६२॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्व्वभूतेषु भूपाल ! तारतम्येन लक्ष्यते ॥६३॥
अप्राणवत्सु स्वल्पाल्पा स्थावरेषु ततोऽधिका ।
सरीसृपेषु तेभ्योऽन्याप्यतिशक्त्या पतत्त्रिषु ॥६४॥
पतत्त्रिभ्यो मृगास्तेभ्यः स्वशक्त्या पशवोऽधिका ।
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः ॥६५॥
तेभ्योऽपि नाग-गन्धर्व्व-यक्षाद्या देवता नृप !
शक्रः समस्तदेवेभ्यस्ततश्चाति प्रजापतिः ॥६६॥
हिरण्यगर्भोऽति ततः पुंसः शक्त्युपलक्षितः ।
एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ॥६७॥
यतस्तच्छक्तियोगेन व्याप्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ॥६८॥
अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः ।
समस्ताः शक्तयश्चेता नृप यत्र प्रतिष्ठिताः ॥६९॥

स्थूलरूपं प्रपञ्चयति—'हिरण्यगर्भ' इत्यादिपञ्चभिः ॥५६।५७ विशेषान्तं पृथिव्यन्तम् ॥५८॥

एतानि सर्व्वाणि चराचराणि यस्मिंस्तज्जगदिदं इदंकारास्पदं विश्वाख्यं मूर्त्तं हरे रूपमित्यन्वयः ॥५९॥

एतच्च न तत्त्वतो विष्णोः स्वरूपमिति चिन्तनीयं, किन्तु तच्छक्तिव्याप्तमित्याह—'शक्तिसमन्वित'मिति ॥६०॥

कासौ शक्तिः, यया व्याप्तमित्यत आह—विष्णुशक्तिः विष्णोः स्वरूपभूता परा चित्स्वरूपा शक्तिः । परमपदपरब्रह्मभूतत्वाद्याख्या प्रोक्ता । प्रत्यस्तमितभेदं यत् सत्तामात्रमित्यत्र यदुक्तं स्वरूपमेव कार्य्योन्मुखं शक्तिशब्देनोक्तम् । इदानीं तच्छक्तिव्याप्तं भावनात्रयात्मकं क्षेत्रज्ञस्वरूपं प्रपञ्चयितुमाह क्षेत्रज्ञाख्येति । व्याप्यव्यापकभेदहेतुभूतं विष्णोः शक्त्यन्तरमाह—'अविद्ये'ति । अविद्येति कर्म्मेति च संज्ञा यस्याः सा । तथा च मायोपलक्ष्यते, हेतुहेतुमतोरविद्याकर्म्मणोरेकोक्त्योक्तिः, संसारलक्षणकार्य्यैक्यात् ॥६१॥

तदेवमाह—'यये'ति । वस्तुतः सर्व्वगता अपि सा क्षेत्रज्ञशक्तिः यया अविद्यया वेष्टिता आश्लिष्टा सती भेदं प्राप्य कर्म्मभिः संसारतापान् प्राप्नोतीत्यर्थः ॥६२॥

जीवानां न्यूनाधिकभावेऽपि सैव हेतुरित्याह—'तये'ति ॥६३

तारतम्यमेवाह—'अप्राणवत्स्वि'त्यादि—सार्द्धैश्चतुर्भिः । अप्राणवत्सु अनभिव्यक्तप्राणेषु स्वल्पा अत्यन्तमल्पा, स्थावरेषु अल्पा अल्पतोऽधिका, सरीसृपेषु क्षुद्रजन्तुषु ततोऽप्यधिका, पतत्त्रिषु अतिशक्त्या अधिकशक्त्या लक्ष्यते ॥६४।६५॥

ततः शक्रादतिशयितः प्रजापतिः ॥६६।६७॥

असङ्गत्वेपि सर्व्वव्याप्तौ दृष्टान्तो 'नभसा यथे'ति । तदेवं मूर्त्तयोर्म्मध्ये स्थूलं रूपं प्रपञ्चितम् । अमूर्त्तयोस्तु प्रथमं रूपं ब्रह्मोक्तं द्वितीयं अमूर्त्तसच्छब्दादिवाच्यं ईश्वराख्यं रूपमाह—'द्वितीय'मिति । योगिध्येयम् आरूढयोगिभिश्चिन्त्यम् ॥६८॥

तदेव विशिनष्टि—'समस्ता' इति । एताः कार्य्यमय्यः समस्ताः शक्तयो यत्र ईश्वरे सर्व्वकारणभूते प्रतिष्ठिताः ॥६९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्विश्वरूपरूपं वै रूपमन्यद्धरेर्महत्
समस्तशक्तिरूपाणि तत् करोति जनेश्वर ॥७०॥
देव-तिर्य्यङ्-मनुष्यादिचेष्टावन्ति स्वलीलया
जगतामुपकाराय न सा कर्म्मनिमित्तजा।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥७१॥
तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप!
चिन्त्यमात्मविशुद्ध्यर्थं सर्व्वकिल्विषनाशनम्(ध)॥७२
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः।
तथा चित्तस्थितो विष्णुर्योगिनां सर्व्वकिल्विषम् (न)
॥७३॥
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥७४॥
शुभाश्रयः स चित्तस्य सर्व्वगस्य तथात्मनः।
त्रिभावभावनातीतो मुक्तये योगिनां नृप ॥७५॥
अन्ये च पुरुषव्याघ्र! चेतसो ये व्यपाश्रयाः।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्म्मयोनयः ॥७६॥
मूर्त्तं भगवतो रूपं सर्व्वापाश्रयनिःस्पृहम्।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते(प) ॥७७॥
यच्च मूर्त्तं हरे रूपं यादृक् चिन्त्यं नराधिप!
तच्छ्रूयतामनाधारे धारणा नोपपद्यते ॥७८॥
प्रसन्नचारुवदनं पद्मपत्रोपमेक्षणम्।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम् (फ) ॥७९॥

अत एव विश्वरूपं विश्वं रूप्यते येन तत्। महत् सर्व्वोत्कृष्टम्। लीलाविग्रहरूपस्य मूर्त्तस्य परस्य तत एवाविर्भावमाह 'समस्ते'ति। समस्तशक्तियुक्तानि रूपाणि ॥७०॥

तदेव प्रकटयति—देवाद्यनुरूपचेष्टायुक्तानि, देव उपेन्द्रादिः तिर्य्यङ्मत्स्यादिः, मनुष्यो रामादिः, आदिशब्दान्मिश्रो नृसिंहादिः। लीलयेत्युक्तिं समर्थयते—'जगता'मिति। कर्म्मनिमित्ताज्जाता हि चेष्टा परिच्छिन्ना सप्रतिघाता च भवति। इयन्तु व्यापिनी सर्व्वजगद्विषया, अव्याहतात्मिका च, अतः सा चेष्टा स्वतन्त्रस्येश्वरस्य लीलैवेत्यर्थः ॥७१॥

भवत्येवं प्रस्तुते किमायातं तत्राह—'तद्रूप'मिति चतुर्भिः। पूर्व्वोक्तेषु तद्रूपं तृतीयं लीलाविग्रहरूपम् ॥७२॥

कक्षं शुष्कतृणम् ॥७३॥

समस्तशक्तीनामाश्रये तत्र अवताररूपे चेतसः स्थितिं कुर्व्वीत ॥७४॥

सर्व्वगस्यात्मनः परब्रह्मणोऽप्याश्रयः प्रतिष्ठा, तदुक्तं भगवता—'ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च। शाश्वतस्य च धर्म्मस्य सुखस्यैकान्तिकस्य चेति। त्रिभावभावनातीतः असंसारित्वात् ॥७५॥

अर्व्वाग्देवतानिन्दया भगवन्मूर्त्तिधारणामेव दृढीकरोति—'अन्ये चे'ति द्वाभ्याम् ॥७६॥

सर्व्वेष्वाश्रयेषु आश्रयणीयेषु अर्थेषु निःस्पृहं परमानन्दरूपत्वात् चित्तविशेषणं वा ॥७७॥

अनाधारे विशिष्टालम्बनरहिते ॥७८।७९॥

(ध) योगयुजा योगव्यापृतेन योगिना। सर्वकिल्विपनाशनं सकलमलापहम्।

(न) उद्धता शिखा ज्वाला यस्य सः सानिलः वायुयुक्तः तेनानुकूलित इत्यर्थः, अग्निः यथा कक्षं शुष्कतृणं दहति, ('कक्षौ तु तृणवीरुधा' विति नानार्थकोषात्।) तथा विष्णुः योगिनां सर्वकिल्विषं दहति निःशेषं नाशयति।

(प) तत्र मूर्त्तं भगवतो रूपे यत् चित्तं धार्य्यते स्थाप्यते एषा धारणा ज्ञेया।

(फ) प्रसन्नं प्रसादयुक्तं चारु वदनं यस्य तथाभूतम्। पद्मपत्रोपमे ईक्षणे नेत्रे यस्य तम्। सुकपोलं सुन्दरगण्डसहितम्। सुविस्तीर्णेन ललाटफलकेन उज्ज्वलं शोभितम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समकर्णान्तविन्यस्त-चारुकर्णविभूषणम् ।
कम्बुग्रीवं सुविस्तीर्ण-श्रीवत्साङ्कितवक्षसम्(ब) ॥८०॥
वलीत्रिभङ्गिना मग्ननाभिना चोदरेण वै ।
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम् ॥८१॥
समसंस्थितोरुजङ्घञ्च सुस्थिराङ्घ्रि वराम्बुजम्
चिन्तयेद् ब्रह्म मूर्त्तञ्च पीतनिर्म्मलवाससम् ॥८२॥
किरीटचारुकेयूर-कटकादिविभूषितम् ।
शार्ङ्ग-शङ्ख-गदा-खड्ग-चक्राक्षबलयान्वितम् ॥८३॥
चिन्तयेत् तन्मना योगी समाधायात्ममानसम् ।
तावद् यावद् दृढ़ीभूता तत्रैव नृप ! धारणा(भ) ॥८४
व्रजतस्तिष्ठतोऽन्यद् वा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति यदा चित्तात् सिद्धां मन्येत तां तदा ॥८५
ततः शङ्ख-गदा-चक्र-शार्ङ्गादिरहितं बुधः ।
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम् ॥८६॥
सा यदा धारणा तद्वदवस्थानवती ततः ।
किरीट-केयूरमुखैर्भूषणै रहितं स्मरेत् ॥८७॥
तदेकावयवं देवं चेतसा हि पुनर्बुधः ।
कुर्य्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥८८॥
तद्रूपप्रत्ययायैका सन्ततिश्चान्यनिःस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ॥८९॥
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यः समाधिः सोऽभिधीयते ॥९०॥

कम्बुग्रीवं रेखात्रयाङ्कितकण्ठम् । सुविस्तीर्णं श्रीवत्साङ्कितं वक्षो यस्य तं विष्णुम् ॥८०॥

त्रयो भङ्गा इव भङ्गास्तरङ्गाकारा रेखाः सन्ति यस्मिन् तत् त्रिभङ्गि, वलीभिस्त्रिभङ्गिना । मग्ना निम्ना नाभिर्यस्मिन् तथाभूतेन चोदरेणोपलक्षितम् ॥८१॥

घृतकाख्यां यष्टिमिव घनीभूतं ब्रह्म मूर्त्तम् ॥८२॥

अक्षवलयम् अक्षमाला अष्टभुजत्वे अवशिष्टयोर्भुजयोः वरदाणौ अपरौ भाव्यौ । चतुर्भुजत्वे शङ्खचक्रगदाब्जान्वितम् ॥८३।८४॥

धारणादार्ढ्यं लक्षणमाह,—'व्रजत' इति । चित्ताद् यदा मूर्त्तिर्नापयाति, तदा तां धारणां दृढां मन्येत ॥८५॥

मूर्त्तिधारणायामेव आयुधभूषणावयवपरित्यागेन आलम्बनौज्ज्वल्यातारतम्यमाह—'तत' इति ॥८६॥

अवस्थानवती दृढा ॥८७॥

तत् ततः एकावयवं पादाङ्गुल्या-दिनानावयवनिष्ठं चित्तं क्रमो वियोज्य एकावयवयुक्तं देवं चेतसा कुर्य्यात् भावयेत् । कूर्मपुराणे भागवते—'तत् सर्व्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् । नान्यानि चिन्तयेद् भूयः सुस्मितं भावयेन्मुखमिति । तदेवं लीलामूर्तिधारणैव स्थूला, सा च क्रमेण चतुर्थ्युक्ता । इदानीं तत्कारणेश्वरधारणमाह—'ततोऽवयविनी'ति— 'प्रसन्नचारुवदनमित्यादिनोक्ता अवयवा येन लीलामूर्तिना आविष्कृताः तस्मिन् । यद्वा अवयवा लीलावताराः येन गृहीतास्तस्मिन् प्रणिधानं चित्तस्थैर्य्यं तत्परो भवेत् ॥८८॥

इदानीं ध्यानमाह—'तद्रूपे'ति । तद्रूपस्य धारणासिद्धस्य वस्तुनः प्रत्यया यस्यां सन्ततौ सा एका अविच्छिन्ना सन्ततिः अन्यनिःस्पृहा-विषयान्तरेणाव्यवधीयमानः विजातीयप्रत्ययानन्तरितः सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः । तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरङ्गैर्निष्पाद्यते ॥८९॥

तस्यैव ध्येयस्य कल्पनाहीनं धातृध्यानध्येयभेदहीनं यथा भवति, एवं यत्स्वरूपग्रहणं तदेकाकारत्वेनावस्थानं ध्यानसाध्यः समाधिः । तदाह पतञ्जलिः—'देहबन्धाश्चितस्य धारणा तत्प्रत्ययैकतानता ध्यानम्, तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति ॥९०॥

(ब) समं वैषम्यरहितं यथा स्यात् तथा कर्णान्तविन्यस्ते कर्णप्रान्तपरिहिते चारुणी सुन्दरे कर्णविभूषणे यस्य तम् । प्रलम्बाः अतिलम्बमानाः अष्टौ भुजा यस्य तम् । अथवा चत्वारः भुजाः यस्य तम् ।

(भ) तत्रैव मूर्त्तब्रह्मरूपे विष्णौ । यावत् यावता कालेनेत्यर्थः धारणा दृढ़ीभूता भवतीति शेषः तावत् चिन्तयेदिति पूर्वेणान्वयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव !
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥९१॥

क्षेत्रज्ञः कारणं ज्ञानं करणं तेन तस्य तत् ।
निष्पाद्यं मुक्तिकार्य्यं वै कृतकृत्यो निवर्त्तते ॥९२॥

तद्भावभावनापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥९३॥

विभेदजनके ज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति(भ) ॥९४॥

इत्युक्तस्ते महायोगः खाण्डिक्य ! परिपृच्छतः ।
संक्षेप-विस्तराभ्यान्तु किमन्यत् क्रियतां तव ॥९५॥

खाण्डिक्य उवाच ।

कथिते योगसद्भावे सर्व्वमेव कृतं मम ।
तवोपदेशेनाशेषो नष्टश्चित्तमलो यतः ॥९६॥

ममेति यन्मया प्रोक्तमसदेतन्न चान्यथा ।
नरेन्द्र ! गदितुं शक्यमपि विज्ञेयवेदिभिः ॥९७

अहं ममेत्यविद्येयं व्यवहारस्तथानयोः ।
परमार्थस्त्वसंलाप्यो गोचरो वचसां न सः ॥९८॥

तद् गच्छ श्रेयसे सर्व्वं ममैतद्भवता कृतम् ।
यद्विमुक्तिप्रदो योगः प्रोक्तः केशिध्वजाव्ययः ॥९९॥

पराशर उवाच ।

यथार्हपूजया तेन खाण्डिक्येन स पूजितः ।
आजगाम पुरं ब्रह्मंस्ततः केशिध्वजो नृपः ॥१००॥

खाण्डिक्योऽपि सुतं कृत्वा राजानं योगसिद्धये ।
वनं जगाम गोविन्दे विनिवेशितमानसः(म) ॥१०१॥

तत्रैकान्तरतिर्भूत्वा यमादिगुणशोधितः ।
विष्ण्वाख्ये निर्म्मले ब्रह्मण्यवाप नृपतिर्लयम्(य)॥१०२

निष्पन्नसमाधेर्मुक्तिप्रकारमाह—'विज्ञान'मिति । समाधिजन्यस्वरूपसाक्षात्कारो विज्ञानम् । प्रक्षीणाः अशेषाः पूर्व्वोक्तास्तिस्रो भावना यस्य सः ॥९१॥

ननु तर्हि विज्ञानेनैव व्यवधानात् कथमात्मनो ब्रह्मैक्यं तत्राह—'क्षेत्रज्ञ' इति ॥९२॥

ननु ज्ञानिनोऽपि भेदप्रतीतिरस्त्येव अन्यथोपदेशाद्यसिद्धेः, तत्राह—'भेदश्चे'ति । बाधित एव कथंचिदनुवर्त्तत इत्यर्थः ॥९३॥

तस्मादज्ञानं तत्कार्य्यञ्च संसारं विनाश्य स्वयमेवाज्ञानकार्य्यमनोवृत्तिरूपत्वाद् दग्धेन्धनानलवत् ज्ञानेऽपि विनष्टे सति न पुनः संसारप्ररोहशङ्केत्याह—'विभेदे'ति ॥९४।९५॥

(भ) कः असन्तं भेदं करिष्यति, विभेदजनकस्य आत्यन्तिकाभावादिति भावः

योगस्य सद्भावे याथार्थ्ये कथिते सति ॥९६॥

ननु चित्तमले अहंममतादौ नष्टे मम तवोपदेशेनेति तद्वचनं न विरुद्धेतेत्यत आह—'ममे'ति । यन्मया प्रोक्तं एतदसदेव बाधितानुवृत्त्या प्रोक्तम् । अन्यथा तु विज्ञेयवेदिभिः अवगतपरमार्थैः गदितुमपि न शक्यं, कुतः पुनः प्रारब्धकर्म्मभोगस्तेषामित्यर्थः ॥९७॥

एतत् स्पष्टयति,—'अहंममे'ति ॥९८।९९॥

राजानं बलदुर्गमन्त्रिभृत्यादिस्वामिनं कृत्वा ॥१०१।१०२॥

(म) गोविन्दे विष्णौ विनिवेशितं विशेषेण समारोपितं मानसं यस्य सः । सुतं राजानं कृत्वा यथावस्थितपरिजनवाहनस्वामिनं कृत्वेत्यर्थः । वनं पूर्वाश्रितवनापेक्षया सुघोरमरण्यं जगाम ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केशिध्वजोऽपि मुक्त्यर्थं स्वकर्म्मक्षपणोन्मुखः ।
बुभुजे विषयान् कर्म्म चक्रे चानभिसंहितम् ॥१०३॥

स कल्पनोपभोगैश्च क्षीणपापोऽमलस्तथा ।
अवाप सिद्धिमत्यन्तं तापक्षयफलां द्विज(र) ॥१०४॥

इति श्रीविष्णुपुराणे षष्ठांशे सप्तमः अध्यायः ॥

मुक्त्यर्थं विदेहकैवल्यार्थम् अनभिसंहितं फलाभिसन्धिशून्यं लोकसंग्रहार्थं कर्म्म चक्रे ॥१०६॥

क्षीणपापः प्रक्षीणप्रारब्धकर्म्मा ॥२०४॥

इति श्रीधरस्वामिकृतायामात्मप्रकाशाख्यायां स्वप्रकाशाख्यायां वा श्रीविष्णुपुराणटीकायां षष्ठेंऽशे सप्तमोऽध्यायः

(ग) तत्र गोविन्दे एकान्ता रतिः अनुरागो यस्य तथाभूतः। यमादिगुणैः प्रागुक्तयमनियमादिभिः चित्तपरिकर्मभूतैः शोधितः चित्तशुद्धिं प्रापितः। नृपतिः खाण्डिक्यजनकः, तस्य राजलाभावेऽपि नृपतिवंशीयत्वात् तथा व्यवहारः।

(र) कल्पनायाः मनोवासनायाः सम्बन्धिनः ये उपभोगाः तैः क्षीणपापः। अत्यन्तमिति तापक्षयविशेषणम्। तापानाम् आध्यात्मिकाधिभौतिकाधिदैविकभेदेन त्रिविधदुःखानां क्षयः नाशः फलं यस्याः तथाभूतां सिद्धिम् अवाप। अत्यन्तं तापक्षयश्च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः। स च परमपुरुषार्थभूतापवर्गस्वरूपम्। तदुक्तम्-सांख्यसूत्रे—'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' इति।

अष्टमोऽध्यायः

[शिष्यपरम्पराकथनम्, विष्णुपुराणस्य माहात्म्यमुपसंहारश्च।]

पराशर उवाच ।

त्रेय कथितः सम्यक् तृतीयः प्रतिसञ्चरः ।
आत्यन्तिको विमुक्तिर्या लयो ब्रह्मणि शाश्वते ॥१

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव भवतो गदितं मया ॥२

पुराणं वैष्णवञ्चैतत् सर्व्वकिल्विषनाशनम् ।
विशिष्टं सर्व्वशास्त्रेभ्यः पुरुषार्थोपपादकम्(क) ॥३

तुभ्यं यथावन्मैत्रेय ! प्रोक्तं शुश्रूषवेऽव्ययम् ।
यदन्यदपि वक्तव्यं तत् पृच्छाद्य वदामि ते(ख) ॥४

मैत्रेय उवाच ।

भगवन् ! कथितं सर्व्वं यत् पृष्टोऽसि मया मुने !
श्रुतञ्चैतन्मया भक्त्या नान्यत् प्रष्टव्यमस्ति ते(ग) ॥५

अष्टमः अध्यायः

अनन्तराध्यायोक्तात्यन्तिकलयोपसंहारपूर्व्वकमादितस्तत् प्रशंसन् सर्व्वपुराणार्थमुपसंहरन्नाह—'इती'ति चतुर्भिः। ब्रह्मणि लयरूपा या विमुक्तिः स एवात्यन्तिकः प्रतिसञ्चरः कथित इत्यन्वयः ॥१-३॥

(क) सर्वशास्त्रेभ्यः विशिष्टं विलक्षणम् उत्कृष्टमिति यावत्। पुरुषार्थानां धर्मार्थकाममोक्षरूपाणां चतुर्णां पुरुषकाम्यप्रयोजनानाम् उपपादकं साधकम्।

(ख) शुश्रूषवे श्रोतुमिच्छवे। अव्ययम् अविनश्वरफलत्वाद्क्षयम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विच्छिन्नाः सर्व्वसन्देहा वैमल्यं मनसः कृतम् ।
त्वत्प्रसादान्मया ज्ञाता उत्पत्ति-स्थिति-संयमाः(घ)॥६

ज्ञातश्चतुर्विधो राशिः शक्तिश्च त्रिविधा गुरो !
विज्ञाता चापि कार्त्स्न्येन त्रिविधा भावभावना ॥७

त्वत्प्रसादान्मया ज्ञातं ज्ञेयमन्यैरलं द्विज !
यथैतदखिलं विष्णोर्जगन्न व्यतिरिच्यते(ङ) ॥८॥

कृतार्थोऽस्म्यपसन्देह-स्त्वत्प्रसादान्महामुने !
वर्णधर्म्मादयो धर्म्मा विदिता यदशेषतः(च) ॥९॥

प्रवृत्तञ्च निवृत्तञ्च ज्ञातं कर्म्म मयाखिलम् ।
प्रसीद विप्रप्रवर ! नान्यत् प्रष्टव्यमस्ति मे ॥१०॥

यदस्य कथनायासैर्योजितोऽसि मया गुरो !
तत् क्षम्यतां विशेषोऽस्ति न सतां पुत्र-शिष्ययोः (छ)॥११॥

पराशर उवाच ।

एतत्ते यन्मयाख्यातं पुराणं वेदसम्मितम् ।
श्रुतेऽस्मिन् सर्व्वदोषोत्थपापराशिः प्रशाम्यति ॥१२॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
